अथानवस्थादीनां स्वस्मिन् स्वभेदापादनमुखेन दूषकतया भेदस्य च निरस्तसमस्तभेदे चिन्मात्रैकरसे ब्रह्मणि सुमेधसा संभावयितुमप्यशक्यतया तत्रानवस्थादयो ऽसंभावितप्रसरा इति सविशेषब्रह्मवादिनां जगत्सत्यतामास्थायुक्तानां ते मतघातिहेतव इति ब्रूषे चेत् ।

तत्किं निर्विशेषसिद्धेः पूर्वं व्यवहारप्रसक्तस्य ते व्यव*हारभङ्गहेतवो न भवन्तीति नातिचित्र, न हि निर्विशेषं साधयिष्यामीत्येतावन्मात्रश्रवणादनवस्थादीनामनवकाशसंभवो निर्युक्तिको न्याय्यः । निर्विशेषब्रह्मवादिना सह सविशेषब्रह्मवादिनो माध्यस्थ्य विचारोपक्रमे यावत्पर्यन्तं नान्यतरपक्षसिद्धिस्तावत्पर्यन्तं तादृशनियमानुपालनमावश्यकं यावता विना विचारो न निर्वहति निष्फलश्च न स्यात् । एवं चानवस्थादीनां दोषभाव उभयोरपि यावद् व्यवहारकालं समान इति कस्य हेतोस्ते ऽनवस्थादयो निर्विशेषब्रह्मवादिनो ऽकस्मादेव सौहार्दमाचरेयुः । यदि तु परीत्यैव परनिराकरणे प्रवृत्तस्य पराभ्युपेतमानमेयादिव्यवस्थयैव व्यवहार इति मानमेयादिव्यवस्थामनातिष्ठमानस्य कथमिव सच्छिद्रप्रवेशशीलशालिनां दोषाणां निश्छिद्रे निर्विशेषब्रह्मवादे ऽवसरसंभवो ऽपीति वदसि तर्हि परीत्या प्रवर्तमानस्य परीत्यनुपालनमुचितमिति ।

परस्य चैषा ऽस्ति व्यवस्था यत्रानवस्थादीनां न स्वव्याघात†कत्वं तत्र तेषां दोषभावो यत्र पुनस्तेषां स्वव्याहतिहेतुत्वं तत्र ते न दोषाः । ततश्च पूर्वपरिचोदितरीत्या ऽनवस्थादीनां दोषवति दो-

* अनवस्थादीनां व्यवहारभङ्गाप्रयोजकत्वे ऽनवस्थादिदोषदूषितानामपि लक्षणानां लक्षणत्वं दुर्वारं तेषां व्यवहारभङ्गहेतुत्वविरहादिति तत्त्वम् ।

† यथा पक्षेतरस्योपाधित्वमनुपाधित्वं च स्वव्यातकत्वाव्याघातकत्वाभ्यां व्यवस्थाप्यते ।

षत्वमथाद्वोषवति दोषत्वमिति जिज्ञासाऽनतिलङ्घितया तेषां तादृशस्थले न दोषत्वमितरत्र च दोषत्वमिति मन्मते ऽस्ति व्यवस्था सा च भवता नाभ्युपेयत इति पररीत्या प्रवर्तमानोऽस्मि कथायामिति ते परप्रतारणमात्रम् ।

वस्तुतस्तु न वयं तच्छून्ये तद्विशिष्टे वा तस्य वृत्तिं ब्रूमहे किन्तु वस्तुतस्तद्विशिष्टे विशेष्ये । एवं च यत्र यद्वर्तते तस्य तच्छून्यत्वमेव कथम् । न च तद्वति वर्तमानस्य तस्मिन् वृत्तिरिति नियमस्तथा सति घटवति भूतले वर्तमानानां रूपरसादीनां घटेऽपि वृत्तिताप्रसङ्गादिति वाचोयुक्तिं पुरस्कृत्य गुणादिमति गुणादिसत्त्वपक्षं स्वावसरे निरूपयिष्याम इत्यकिञ्चिदिदं वादिनां साहसिकतामात्रविजृम्भितं मानोरथिकं वाग्व्यामिश्रणमात्रम् ।

एवं चानात्मत्वहेतुना रूपादेः स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वानुमानासंभवादव्याप्यवृत्तित्वस्य साध्यव्यापकत्वे सति रूपस्नेहाद्यवच्छेदेन साधनाव्यापकतया भवत्युपाधिभाव इत्युपाध्यभावेन हेतुना साध्याभावाद्यनुमानेन अव्याप्यवृत्तित्वानधिकरणत्वे सत्युक्तपक्षतावच्छेदकवत्समानाधिकरणात्यन्ताभावप्रतियोगि । अनात्मत्वात्संयोगवदिति प्रयोगो बाललीलायित इति किमधिकं विज्ञगोष्ठीषु । एवं चापरेऽपीह पञ्चषा वा ततोऽप्यधिका वोपाधयः स्वयमूहनीयास्तर्ककुशलैरित्युपरम्यते ।

नित्यद्रव्यान्यदव्याप्यवृत्तित्वानधिकरणमुक्तप*क्षताऽवच्छेदकवत् । केवलान्वय्यत्यन्ताभावप्रतियोगि । पदार्थत्वान्नित्यद्रव्यवदिति द्वितीयप्रयोगे तु गन्धवहो गन्धवान् । आकाशं स्नेहवत् ।

* ब्रह्मज्ञानेतराबाध्यब्रह्मान्यासत्त्वानधिकरणत्वविदित्यर्थः ।

जलं नीरूपम् । पदार्थत्वात् । घटवत् । जलवत् । वायुवदिति क्रमिकदृष्टान्तद्वारा पदार्थत्वहेतुकगन्धवहादिधर्मिकगन्धाद्यनुमानतुल्यता । पञ्चमप्रकाराविद्यानिवृत्तिपक्षे पदार्थत्वरूपहेतोस्तत्र सत्त्वेऽपि तत्र साध्यविरहेण व्यभिचारश्च । केवलान्वय्यत्यन्ताभावप्रतियोगिष्वाकाशादिषु पक्षतावच्छेदककुक्षौ नित्यद्रव्यान्यत्वोपादानेन सिद्धसाधनवारणेऽप्यर्थान्तरं च । न हि केवलान्वय्यत्यन्ताभावप्रतियोगिनामपि गगनादीनां मिथ्यात्वमाम्नायते तैस्तैर्वादिभिः । न च तदेव मिथ्यात्वं तस्येष्टत्वेनार्थान्तरादिदोषात् ।

किंच पूर्वपरिदर्शितरीत्या हेतोः पक्षधर्मत्वे तत्र केवलान्वय्यत्यन्ताभावप्रतियोगित्वं नास्तीति हेतोर्व्यभिचारित्वम् ।

अपक्षधर्मत्वे तु स्वरूपासिद्धतया हेतुतैव तस्य कीदृशी, न चैतत्संभाव्यतेऽपि यत् यद्वृत्त्यत्यन्ताभावप्रतियोग्यपि भवत्तद्वृत्ति भवेदिति प्रतियोगिनाऽवि*रुन्धतोऽभावत्वायोगात् । प्रतियोगिविरोधित्व†मेव तु भावाभावसाधारणमभावत्वं, न चैतदविरुन्धत्यभावे भावि । भावान्तरमभावोऽन्यः कयाचित्तु व्यपेक्षयेति न्यायेन केवलान्वयिभावस्वरूपब्रह्मात्मकाभावप्रतियोगित्वाङ्गीकारेऽपि वा घटाद्यविरोधिकेवलान्वयिपारिभाषिकतादृशाभावप्रतियोगित्वे इष्टापत्तिरेव । व्यावहारिकपारमार्थिकत्वादिना प्रतियोगि-तदभावावुपकल्प्य दोषपरिहारस्तु यथा न युक्तस्तथाऽसकृदावेदितमिति किं चोद्यपरिहाराभ्याम् ।

यदि संयोगसंबन्धावच्छिन्नप्रतियोगिताककेवलान्वय्यत्यन्ताभावप्रतियोगित्वं साध्यते तदा समवायेन घटवति संयोगाद्युदासी-

* संयोग-तदभावयोरपि प्रतियोग्यवच्छेदकदेशावच्छेदेन विरोधिताऽस्त्येव ।

† इदमिह नास्ति इदमिदं न भवतीति प्रतीतिनियामकोभावाभावसाधारणः स्वरूपसंबन्धविशेषोऽभावत्वमिति निर्वचतां दीधितिकृतामप्येष एवाशयः ।

नसंबन्धावच्छिन्नप्रतियोगिताकाभावसाधने सिद्धसाधनमेवं समवायेन घटवत्यपि । यदि तु वृत्तितानियामकसंबन्धावच्छिन्नप्रतियोगिताकाभावप्रतियोगित्वं साध्यते तदा गगनादेः संयोगादिना वृत्तित्वाप्रसिद्धया दृष्टान्ते गगनादौ साध्यवैकल्यं, न हि संयोगो गगनस्य वृत्तितानियामकः संसर्गः। परकीयवृत्तितानियामकसंबन्धसाधारण्येन तथात्वे तु घटप्रतियोगिकत्वविशिष्टसंयोगस्यापि घट—वृत्तित्वनियामकतया पटादेस्तत्संबन्धावच्छिन्नप्रतियोगिताकाभावमादाय सिद्धसाधनप्रसङ्गः ।

न हि पटादिर्घटप्रतियोगिकत्वविशिष्टसंयोगादिना कदाऽपि वृत्तिरिति केनाप्यभ्युपेयते ।

यदि तु स्वीयवृत्तिताऽनवच्छेदकसंबन्धानवच्छिन्नप्रतियोगिताककेवलान्वय्यत्यन्ताभावप्रतियोगित्वं साध्यते तदा स्वरूपेण पटाद्यभावमादाय सिद्धसाधनवारणेऽपि दृष्टान्ते नित्यद्रव्ये गगनादौ साध्यवैकल्यं संयोग—समवायरूपस्वीयवृत्तितानवच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकतदभावस्यैव केवलान्वयित्वात् । स्वीयवृत्तितावच्छेदकसंबन्धानवच्छिन्नप्रतियोगिताकाभावप्रतियोगित्वसाधने तु स्पष्टमेव सिद्धसाधनं घटादेर्वृत्तितावच्छेदको यः संयोगादिसंबन्धस्तदतिरिक्तो यः स्वरूपादिसंबन्धस्तत्संबन्धावच्छिन्नप्रतियोगिताकाभावस्य परेणाप्यङ्गीकृतत्वात् ।

यदि तु नित्यद्रव्यान्यो ब्रह्मज्ञानेतराबाध्यब्रह्मान्यासत्त्वानधिकरणत्ववान् घटः संयोगसंबन्धावच्छिन्नप्रतियोगिताककेवलान्वय्यत्यन्ताभावप्रतियोगी। पदार्थत्वान्नित्यद्रव्यवदिति वा। नित्यद्रव्यान्यब्रह्मज्ञानेतराबाध्यब्रह्मान्यासत्त्वानधिकरणत्ववान् घटः । सम-

वायसंबन्धावच्छिन्नप्रतियोगिताककेवलान्वय्यत्यन्ताभावप्रतियोगी । नित्यद्रव्यत्वात् । गगनवदिति वा विशिष्य प्रयोगे तात्पर्यम् ।

तदा नित्यद्रव्यत्वमेवोपाधिः । यदि* गुणादौ साध्यसत्त्वेऽपि तत्र नित्यद्रव्यत्वविरहेण साध्योपाध्योर्न समव्याप्तिरिति नित्यद्रव्यत्वं नोपाधिरित्युच्यते तदा संयोगेनावृत्तित्वमेवोपाधिः ।

एवं च घटः संयोगसंबन्धावच्छिन्नप्रतियोगिताककेवलान्वय्यत्यन्ताभावप्रतियोगित्वाभाववान् अवृत्तित्वविरहादित्येवं साध्याभावानुमानेनानुमितिप्रतिबन्धादकिंचिदिदमिति विज्ञाः ।

एवं द्वितीयप्रयोगे समवायेनावृत्तित्वमुपाधिरित्युपाध्यभावेन अवृत्तित्वविरहेण साध्याभावस्यानुमेयत्वादकिंचित्तदिदमिति तद्विदः ।

अथावृत्तित्वविरहघटकस्य वृत्तित्वस्यैव साध्यानुमापकत्वसंभवे अवृत्तित्वविरहोऽव्याप्यत्वासिद्ध इति चेन्न अखण्डाभावघटकतया तत्सार्थक्यसंभवेन वैयर्थ्यशङ्काऽनुदयात् । अत एव तु तावदन्यतमत्वस्य हेत्वाभाससामान्यलक्षणत्वपक्षे तत्त्वस्यैवेतरभेदानुमापकत्वसंभवे तावदन्यतमत्वं न व्याप्यत्वासिद्धमिति तद्विदां स्पष्टमेव ।

न चावृत्तित्वाभावत्वस्य न साध्यव्याप्यतावच्छेदकत्वं तदपेक्षया लघुनो वृत्तित्वस्यैव तथात्वादिति वाच्यम् ।

लघुधर्मसमनियतगुरुधर्मेऽवच्छेदकत्वस्यासकृदेव वादिप्रतिवाद्युभयाभ्युपेतत्वेनैवंविधविचारस्यानवकाशपराहतत्वात् । व्यापकसामानाधिकरण्यरूपव्याप्तिग्रहस्य वाऽनुमितिजनकत्वमिति तच्चोद्यपरिहारयोरनवसरदौःस्थ्याच्चेति सुधियो विमृशन्तु ।

* साध्योपाध्योः समव्याप्तिर्नापेक्षितेति सिद्धान्ताद् यदीति ।

यच्चाद्वैतसिद्धिकृता नित्यद्रव्यस्य दृष्टान्तत्वमभिहितं तदपि बालगुड़*जिह्विकायितं दृष्टान्ते साध्यवैकल्यान्न ह्यवृत्तीनां कालाकाशादीनां केवलान्वय्यत्यन्ताभावप्रतियोगिता सत्त्वप्रतिद्वन्द्विनी तथा सति तावतैव तेषां मिथ्यात्वसिद्धौ भवतोऽपि त†त्रतत्र तत्तद्विशेषणोपादानमनर्थकमेव स्यादिति त्वदीयग्रन्थरहस्यविदां करामलकायितम् ।

किंच सामान्यतः केवलान्वय्यत्यन्ताभावप्रतियोगित्वं ब्रह्मसाधारणं सर्ववस्तुसाधारणं च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावप्रतियोगित्वस्य व्यधिकरणसंबन्धावच्छिन्नप्रतियोगिताकाभावप्रतियोगित्वस्य च सर्वत्रैव संभवादिति सर्वतद्दोषपरिहाराय विशिष्यैव केवलान्वय्यत्यन्ताभावप्रतियोगित्वं साधनीयमिति । ततश्च कालिकेन गगनादेर्नित्यस्यापि वृत्तिमत्त्वेन वृत्तितानवच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकस्य केवलान्वय्यत्यन्ताभावस्यैव प्रतियोगित्वमनुमेयमिति कथं नित्यद्रव्यदृष्टान्तेन घटादिषु संयोग-समवायादिना वृत्तिमत्सु तत्संबन्धावच्छिन्नप्रतियोगिताकाभावसिद्धिसंभवो वृत्तिताऽनवच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकाभावस्यैव साध्यत्वेन वृत्तितावच्छेदकसंयोगादिना वृत्तिमति घटादौ केवलान्वय्यत्यन्ताभावप्रतियोगित्वासिद्धेः । न हि गगनस्य वृत्तितानवच्छेदकसंबन्धावच्छिन्नप्रतियोगिताककेवलान्वय्यत्यन्ताभावप्रतियोगित्वेन घटस्य वृत्तितावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताककेवलान्वय्यत्यन्ताभावप्रतियोगित्वसिद्धिप्रत्याशाऽपि । ततश्च नित्यद्रव्यस्य परीत्या दृष्टान्तत्वाभिधानं स्वपरसिद्धान्तमर्यादा‡ऽतिशायीति तद्वित्सु

* यथा कटुभेषजपानाय गुड़दानेन बाला अनुकूल्यन्ते तथेत्यर्थः ।

† अद्वैतसिद्धिग्रन्थे ।

‡ न च स्वीकर्त्तासि त्वमपि संयोगेन गगनस्य वृत्तिमत्तामिति तु तात्पर्यम् ।

किमु कथनेन । स्वमते तु शुक्तिरूप्यवदिति दृष्टान्तानुसरणमुचितमेव वादकथायां गुरुशिष्ययोरुभयोर्मिथ्याऽभिसंधितया परस्यालब्धाऽवसरतया निराकरणासंभवात् । जल्पे तु शुक्तिरूप्यस्य दृष्टान्तत्वाभिधानं यथा न संभवति तथाऽसकृदेव निरूपितमवशिष्टं च दृष्टान्तासंग*तिप्रदर्शनपरग्रन्थे व्यक्तीभविष्यतीत्यलम् ।

यच्च घटादेः केवलान्वय्यत्यन्ताभावप्रतियोगित्वे खपुष्पादिसाहोदर्ये तद्वैलक्षण्यप्रयोजकाभावादित्याशङ्क्य उत्पत्तिनिवृत्त्योरन्यतरप्रतियोगित्वेन घटादौ खपुष्पादिवैलक्षण्यसंरक्षणमद्वैतसिद्धिकृतां तदपि चिन्तनीयं तत्र परस्य नित्यत्वेनाभिमतानां प्रकृत्यादीनां निवृत्तिप्रतियोगित्वमात्रं वैलक्षण्यनियामकमनित्यानां तूभयमेवेति । एवं चेह खपुष्पादिवैलक्षण्यमुत्पत्त्यादिप्रतियोगित्वे तन्त्रम् । उत्पत्त्यादिप्रतियोगित्वं च खपुष्पादिवैलक्षण्ये इति व्यक्तः परस्पराश्रयः ।

ननु सत उत्पत्तिप्रतियोगित्वं चेदात्मनोऽप्युत्पत्तिप्रसङ्गः । असतश्चेदुत्पत्तिस्तर्हि सतोऽनुत्पादोऽसतश्च नरशृङ्गादेरुत्पत्तिप्रसङ्गः सर्वदा सर्वं सर्वस्माच्चोत्पद्येतासतः सर्वथा सौलभ्यात् । तस्मान्न सत उत्पादो नाप्यसतः । किं तर्हि अनिर्वचनीयस्योत्पत्तिरिति युक्तम् । एवं चानिर्वचनीयं घटादि उत्पद्यते न तु सदात्मतत्त्वं, नापि नरशृङ्गमसदिति सुव्यवस्थेति चेत् । किं तदनिर्वचनीयत्वं सद्भिन्नत्वे सत्यसद्भिन्नत्वे सति सदसद्भिन्नत्वं वा । सत्त्वासत्त्वाभ्यां विचारासहत्वे सति सदसत्त्वेन विचारासहत्वं वा प्रतिपन्नोपाधौ बाध्यत्वं वा अनिर्वचनीयत्वम् । तदेव च मिथ्यात्वम् । एवं च मिथ्यात्वमुत्पत्तौ तन्त्रम् । उत्पत्तौ च मिथ्यात्वमित्येतत्पक्षेऽपि

* शुक्तिरूप्यं नाम न किंचित्तत्त्वत उत्पद्यते बालक्रीडनकमात्रं तदुपकल्पनमित्येतच्चिरूपणपरग्रन्थे इत्यर्थः ।

व्यक्तो ऽन्योन्याश्रयः । उत्पत्तौ मिथ्यात्वं न तन्त्रं किन्तु स्वसामग्रीति सतः सामग्रीसंवलनं नासत इति न किंचिच्चोद्यमिति चेत्तर्हि सामग्रीसंबलनं सदसत्साधारणं वा सत्येवोत्पादसामग्रीसंबलनं वा तत्राद्ये सत इवासतोऽप्युत्पादोऽवर्जनीयः । द्वितीये तु सत्येव सामग्रीसंबलनं नासतीत्याकस्मिकं वा सकारणकं वा । तत्र प्रथमे सामग्र्या आकस्मिकसदुत्पादकत्वपक्षपातस्वीकारे कार्यस्याकस्मिकत्वप्रसङ्गो दुर्वारः । द्वितीये तु किमपराद्धमसता यत्तत्र सामग्री कार्यं न जनयेदिति । कार्यमनुत्पादयन्ती सामग्र्येव वा सा कथं, सामग्र्याः स्वकार्योत्पत्तिव्याप्यत्वात् । किञ्चानिर्वचनीयाया अप्यविद्याया नोत्पत्तिप्रतियोगित्वम् । अनिर्वचनीयाया अप्यविद्यानिवृत्तेश्च न निवृत्तिप्रतियोगित्वं न च भवताऽपि तदभ्युपेयते तस्मादनिर्वचनीयत्वमुत्पत्तिप्रतियोगित्वे निवृत्तिप्रतियोगित्वे वा तन्त्रमिति रिक्तं वचोमात्रम् ।

यदि त्वविद्यायामुत्पत्तिप्रतियोगित्वविरहेऽपि निवृत्तिप्रतियोगित्वस्य, अविद्यानिवृत्तौ निवृत्तिप्रतियोगित्वविरहेऽपि उत्पत्तिप्रतियोगित्वस्य सत्त्वेनान्यतरप्रतियोगित्वनिर्वाहान्न दोषस्तर्हि अविद्यायां निवृत्तिप्रतियोगित्वमात्रम् । अविद्यानिवृत्तौ चोत्पत्तिप्रतियोगित्वमात्रमेव न तु निवृत्तिप्रतियोगित्वमत्र किं तन्त्रतयोक्तं भवति उत्पत्ति—निवृत्तिप्रतियोगित्वे तन्त्रतयोक्तस्यानिर्वचनीयत्वस्योभयप्रतियोगित्वप्रयोजकत्वात् । स्वभावस्य* च यथैतादृशातिप्रसङ्गवारकत्वं न संभवति तथाऽग्रे पराक्रम्य पराकरिष्यामः ।

किंचोत्पत्त्यादिमत्त्वस्यासद्वैलक्षण्यप्रयोजकत्वाङ्गीकारे नित्यानां कालाकाशादीनामसद्व्यावृत्तौ किंचिदन्यदेव प्रयोजकमङ्गीकरणी-

* स्वमते पदार्थानां स्थैर्याभ्युपगमात्स्वभावस्य कारणत्वसंभवेऽपि परमते न तद्भावीति भावः ।

यमिति गौरवम् । तन्नित्यताऽनभ्युपगन्तॄणामपि च ब्रह्मनिष्ठासद्वैलक्षण्ये नोत्पत्तिनिवृत्त्यन्यतरप्रतियोगित्वं प्रयोजकमित्यननुगतरूपस्य वैलक्षण्यप्रयोजकत्वकल्पनाऽपेक्षया प्रमाणसिद्धत्वस्यैवासद्वैलक्षण्यप्रयोजकताऽऽस्थेयेत्यकिञ्चिदिदमुत्पत्त्यादिप्रतियोगित्वेन वैलक्षण्याभिधानम् ।

उत्पत्त्यादिप्रतियोगित्वं घटादेर्नासद्वैलक्षण्यनिबन्धनं किन्तु स्वाभाविकमित्युक्तौ स्वभावस्य सदसत्साधारण्येन दुर्विवेचतया उत्पत्त्यादिप्रतियोगित्वं सतः स्वाभाविकमुतासत इति विवेक्तव्यं तत्र प्रथमे मिथ्यापदार्थतावच्छेदककुक्षिनिक्षिप्ताभावप्रतियोगिनस्सत्त्वं कीदृशं सत्त्वे वा मिथ्यात्वं कथं सत्त्वप्रतिद्वन्द्विमिथ्यात्वमेवानुमित्सितं भवतोऽन्यथा तु पारिभाषिकोदासीन–ग–ज–ड–द–वादिकल्पमिथ्यात्वसाधने विप्रतिपत्तिरेव† कीदृशी । प्रतीयमानत्वमेव विशेष इति चेन्न असतोऽपि प्रतीयमानत्वात् । सत्त्वेन प्रतीयमानत्वं विशेष इति चेत् । तर्हि तदस्त्यसत्यपि भ्रमस्य नियन्तुमशक्यत्वेन असतोऽपि सत्त्वेन भानसंभवात् । सदुपरागेणाप्यसतो न भानमिति चेत्तदेव तु विचार्यते तन्न कुत इति । केवलान्वय्यत्यन्ताभावप्रतियोगिनोर्घट–खपुष्पयोरेकः सन् परश्च न तथेति । न च पर‡मतेऽपि केवलान्वय्यत्यन्ताभावाप्रतियोगित्वं न सत्त्वे तन्त्रं तथा सति केवलान्वय्यत्यन्ताभावप्रतियोगिनां संयोग–परमाणु–दिगाकाशादीनामसत्त्वप्रसङ्गात् । किं त्वन्यदेव किंचित्सत्त्वे प्रयोजकमास्थेयमिति का वेदना भवतां यदि घटादयो भवेयुः केवलान्वय्यत्यन्ताभावप्रतियोगिनः ।

* वादि–प्रतिवादिनोरुभयोरपि वेदान्तिकयोराकाशादिनित्यत्वमननुमतमिति पक्षान्तरावलम्बनम् ।

† विप्रतिपत्त्यनवतारे कथावतारासंभव इति भावः ।

‡ नैयायिकादिमतेऽपीत्यर्थः ।

एवं तर्हि भवतोऽपि कोऽभीष्टसिद्धिः । न हि केवलान्वय्यत्यन्ता-भावप्रतियोगी संयोगो मिथ्या न वा तथाभूतमाकाशादिकं मिथ्या सिद्धसाधनार्थान्तरादिप्रसङ्गादित्यसकृदवोचाम ।

एवं च येन संबन्धेन येन रूपेण यद्यत्र वर्तते तेन संबन्धेन तेन रूपेण तस्मिन् काले तस्मिन्नेव देशे विद्यमानोयस्तस्य वस्तु-नस्तद्देशावच्छेदेन तेन रूपेणाभावस्तत्प्रतियोगित्वं तस्य वस्तुनोमि-थ्यात्वमिति ततश्च घटादेर्वृत्तिमतो मिथ्यात्वोपपादनेऽपि गगनादेः संयोग—समवायादिना वृत्तित्वानङ्गीकारात्संयोगस्य चाव्याप्यवृत्ति-त्वात्तत्र तदभावो मिथ्यात्वं नार्जयेदिति गगनाद्यसंग्रहात् सर्वसाधा-रणं मिथ्यात्वप्रतिद्वन्द्विसत्त्व*—स्वरूपं दुर्निरूपमेव । क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यनर्हत्वमसत्त्वम् । त्रिकालाबाध्यत्वं च सत्त्वमिति चेत्तर्हि त्रिकालाबाध्यविलक्षणत्वे सति क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यर्हत्वमेव मिथ्यात्वं पर्यवस्यति । अत्र च प्रथमदलस्य प्रपञ्चासत्साधारण्यमिति द्वितीयदलव्यतिरेक एव खपुष्पादितो मिथ्याभूतस्य व्यावर्तको वाच्य-स्तत्रापि च सत्त्वेन प्रतीत्यर्हत्वमुत्पत्तिप्रतियोगित्वं वा केवलान्वय्य-त्यन्ताभावप्रतियोगिनोघटादेः कुत इति नोक्तं भवति । तार्किकादेस्तु गगनादेः केवलान्वय्यत्यन्ताभावप्रतियोगित्वं न सर्वथाऽसतः किन्तु कालिकेन सत एवेति सर्वथा केवलान्वय्यत्यन्ताभावप्रतियोगिनः सत्त्वं किमिति न विविक्तं भवति । अयमत्रार्थसंग्रहः—निर्विशेषस्य ब्रह्मणो न विशेषकत्वं तदतिरिक्तस्य तु घटादेः खपुष्पादितो व्यावर्तकत्वेना-भिमतस्य सर्वस्यापि सन्मात्रनिष्ठात्यन्ताभावप्रतियोगितया न व्या-वर्तकतासंभवोऽपि । अत्यन्ताभावप्रतियोगिनोऽपि चेद् व्यावर्तकत्वं

* एतावतोत्पत्ति प्रतियोगित्वे न कथं चिदपि मिथ्यात्वं तत्त्वमिति भावः ।

तर्हि घटादिरेव घटादेर्व्यावर्तकोऽत्यन्ताभावप्रतियोगी भवन्नपीति किमुत्पत्त्यादिप्रतियोगित्वादेर्व्यावर्तकत्वानुसरणफलम् ।

तस्मादत्यन्ताभावप्रतियोगिनो घटादेरुत्पत्तिप्रतियोगित्वं खपुष्पादितो व्यावर्तकमित्यद्वैतसिद्धिकृतामभिधानं कीदृशमिति निरीक्षन्तां विचक्षणाः स्वयमेवेति किमु अकाण्डताण्डवेन ।

किंच संयोगादिना विद्यमानस्यापि घटादेः संयोगसंबन्धावच्छिन्नप्रतियोगिताकाभावमभ्युपयतो यदि "उत्पत्त्यादिप्रयोज्य एव नरशृङ्गाद्यपेक्षया विशेषस्तर्हि सोऽपि विशेषो भवत्यत्यन्ताभावप्रतियोगीति कथं विशेषकः स्यात् । अत्यन्ताभावप्रतियोग्यपि उत्पत्त्यादिप्रतियोगित्वं चेद्विशेषस्तर्हि किम*पकृतं घटेन घटोऽपि अत्यन्ताभावप्रतियोगी भवन्नपि भवेत्स्वस्य विशेषकः । विशेषकत्वेऽत्यन्ताभावाप्रतियोगित्वस्यातन्त्रत्वात् । अन्यथा तूत्पत्तिप्रतियोगित्वमपि अत्यन्ताभावप्रतियोगितया विशेषकं न भवेदित्यतिस्पष्टमित्युक्तमेव ।

किंचासद्वादप्रसङ्गभीत्या सन्मात्रनिष्ठात्यन्ताभावप्रतियोगिनो नरशृङ्गसाधारणस्य घटादेरुत्पत्तिप्रतियोगित्वं न विशेषो नापि सत्त्वेन प्रतीतिमात्रं विशेषो विषयेणैव विशेषो हि निराकारतया धियामित्युक्तयुक्तेर्विषयनिरपेक्षज्ञानस्याव्यावर्तकत्वात् । न च प्रतीयमानत्वमपि विशेषः सम्भवति ब्रह्मातिरिक्तस्य तस्यापि सन्मात्रनिष्ठात्यन्ताभावप्रतियोगिनोविशेषरूपत्वासम्भवादित्यसकृदावेदितत्वात् । न च सर्वथाऽत्यन्ताभावप्रतियोगिनः पदार्थस्य सत्त्वमभ्युपेयतेऽन्ततो गगनादेरवृत्तिपदार्थस्यापि कालिकेनैव वृत्तित्वाङ्गीकारात् । न हि सर्वसंबन्धैः सर्वधर्मैश्चाभावप्रतियोग्यपि अथापि तेनतेन संबन्धेन तेनतेन रूपेण कार्यकारीति चाद्रियन्तेऽनुभवपरायणाः ।

* किमपराद्धमित्यर्थः ।

किंचैवं जगद्व्यवहारं विप्लावयस्ते घटशून्यदेशापेक्षया घटसंयोगवति देशे कोवा विशेषो भवत्युक्तः । द्वयोरपि देशयोर्घटसंयोगाभाववत्त्वस्याविशिष्टत्वात् ।

ज्ञाननिर्वाह्य एव* चेत्कश्चिद्विशेषस्तर्हि सोऽपि विशेषो ब्रह्मातिरिक्तत्वेनात्यन्ताभावप्रतियोगीति कथं विशेषकः स्यात् । अत्यन्ताभावप्रतियोगिनोऽपि विशेषकत्वाङ्गीकारे तु सर्वं सर्वत्र विशेषकमत्यन्ताभावप्रतियोगित्वाविशेषात् । श्रीहर्षो†क्तरीत्याऽतिप्रसङ्गवारणेऽपि कारणतावच्छेदकरूपस्य ब्रह्मातिरिक्तत्वेन तस्य चात्यन्ताभावप्रतियोगित्वेनौदासीन्यादेव नातिप्रसङ्गवारकतेति खण्डनखण्डनावसरे पराक्रम्य निरूपयितास्महे इति प्रतीक्षन्तां सुमेधसः ।

एवं च ब्रह्मातिरिक्तजगज्जातस्यात्यन्ताभावप्रतियोगितया उत्पत्तिप्रतियोगित्वस्याप्यत्यन्ताभावप्रतियोगित्वेन घट—खपुष्पयोर्विशेषकमुत्पत्तिप्रतियोगित्वमत्यन्ताभावप्रतियोगि भवदपि भवेद् । घट—खपुष्पे तु स्वं स्वमात्मानं न परस्परं व्यावर्तयातामिति किं बुद्धिमतां मतिपथमारोहेत कदाऽपि । उत्पत्तिप्रतियोगित्वेऽत्यन्ताभावप्रतियोगित्वं पारमार्थिकमिति उत्पत्तिप्रतियोगित्वं व्यावहारिकं केवलान्वय्यत्यन्ताभावप्रतियोगिनोऽपि घटादेः खपुष्पादितोव्यावर्तकं तर्हि घटेऽपि अत्यन्ताभावप्रतियोगित्वं पारमार्थिकमिति व्यावहारिको घटोऽत्यन्तासतो नरशृङ्गादेः स्वात्मानं व्यावर्तयिष्यतीति किंचिचम्‡ । एवं व्यावहारिकस्य घटादेर्व्यावहारिकात्यन्ताभावप्रतियोगित्वपक्षेऽपि चोद्यपरिहारौ सुधीभिः स्वयमूहनीयाविति किं

* पूर्वं प्रतीतिविषयत्वप्रयोज्यो विशेष उक्तोऽधुना तु प्रतीतिनिर्वाह्यस्यैव विशेषरूपत्वमिति सुसूक्ष्ममीक्षणीयमवधानेन ।

† खाद्यखण्डनकारः श्रीहर्षः ।

‡ न किमपीत्यर्थः ।

वहूपदेशेन । तस्माद् घटादेः केवलान्वय्यत्यन्ताभावप्रतियोगित्वेऽत्यन्तासत्साधारणे उत्पत्त्यादिप्रतियोगित्वं खपुष्पादेर्व्यावर्तकमित्यद्वैतसिद्धिकृतां परमानवधाननिबन्धनमभिधानमिति सन्ति सन्तः साक्षिणः ।

यदपि—आत्मत्वावच्छिन्नधर्मिको भेदो न परमार्थसत्प्रतियोगिकः आत्माप्रतियोगिकत्वात् । शुक्तिरूप्यप्रतियोगिकभेदवत् । न च घटपटसंयोगे व्यभिचारः । हेतुमत्तया निर्णीतेऽङ्कुरादाविव साध्यसंदेहस्यादोषत्वात् । एवमन्येऽपि प्रयोगा यथोचितमारचनीया विपश्चिद्भिरिति दिक् । इत्यात्मव्यतिरिक्तस्यासत्त्वसाधनसंनहनं तदप्येतत्पिपीलिकास्येन प्रासादनिग*रणप्रयासप्रायमिति परिह†सन्ति सन्तः । तथा हि आत्मत्वावच्छिन्नधर्मिकं भेदं पक्षीकृत्य परमार्थसत्प्रतियोगिकत्वाभावं सिषाधयिषता त्वया परमार्थसत्प्रतियोगिकत्वमप्रसाध्य तदभावोनानुमातुं शक्यः । विशिष्टसिद्धेर्विशेषणप्रसिद्धिनान्तरीयकत्वात् । न च परमार्थसतो ब्रह्मणः कुत्रापि प्रतियोगित्वमङ्गीकर्तासे न च तदनङ्गीकृत्य साध्यप्रसिद्धिं निर्वोढासे तथा सति निर्विशेषत्वभङ्गभीत्या पारमार्थिकत्वस्यैवापायात् । सविशेषे तु ब्रह्मणि प्रतियोगित्वं प्रसिद्धमपि न साध्यप्र‡साधनायालं तस्य परमार्थसत्त्वानभ्युपगमात् । यदि तु परमार्थसतो ब्रह्मणः प्रतियोगित्वस्य च प्रत्येकप्रसिद्ध्या विशिष्टप्रसिद्धये प्रयतसे तर्हि नरस्य शृङ्गस्य च प्रत्येकप्रसिद्ध्या नरशृङ्गसाधनमपि ते सुघटम् ।

* असंभूतार्थाभिधानात्प्रासादनिगरणसमता ।

† मोह–मात्सर्यादियुक्तोऽपि माध्यमिकमतमनुसरन्नपि च वैदिकंमन्य इत्युपहासहेतु

‡ यस्य परमार्थसत्त्वं न तस्य प्रतियोगितानिरूपकत्वमसंसर्गित्वाभ्युपगमात् । यस्य च प्रतियोगितानिरूपकता । तस्य तु सोपाधिकतया तत एव पारमार्थ्यं भग्नमिति भावः ।

आग्नेयद्विरुक्तेः स्तुत्यर्थत्वम् । अधि॰ १४ ।

आग्नेयस्तूक्तहेतुत्वादभ्यासेन प्रतीयेत ॥ २७ ॥

दर्शपूर्णमासे यदाग्नेय इति वाक्येनाग्नेययागद्वयं विधाय पुनरपि यदाग्नेयो ऽष्टाकपालो ऽमावास्यायां भवत्यैन्द्रं दधीति विहितम् । इदं कर्मान्तरमुतार्थवाद इति संशये पूर्वपक्षमाह । आग्नेय इति । आग्नेयः अभ्यासेन पुरोडाशद्वयेन प्रतीयेत । उक्तहेतुत्वात् । अभ्यासरूपोक्तहेतोः सत्त्वात् ॥ २७ ॥

अविभागात्तु कर्मणो द्विरुक्तो न विधीयेत ॥ २८ ॥

सिद्धान्त्येकदेशी त्वाह । अविभागेति । द्विरुक्तो ऽप्याग्नेययागः द्वाभ्यां न विधीयेत । कर्मणः प्रकरणैक्येनाविभागाद् अभेदप्रत्यभिज्ञानात् । किं तु विकल्पेन अन्यतरेण विधीयतइति ॥ २८ ॥

अन्यार्था वा पुनः श्रुतिः ॥ २९ ॥

सिद्धान्तमाह । अन्येति । अन्यार्था इन्द्रयागस्तुत्यर्था पुनः श्रुतिः । इन्द्रयागशेषो ऽर्थवाद इति भावः ॥ २९ ॥

इति जैमिनिसूत्रवृत्त्यां द्वितीयाध्यायस्य तृतीयः पादः ॥ ३ ॥

यावज्जीविकाभ्यासस्य कर्तृधर्मत्वम् । अधि॰ १ ।

यावज्जीविको ऽभ्यासः कर्मधर्मः प्रकरणात् ॥ १ ॥

यावज्जीवमग्निहोत्रं जुहोतीति श्रूयते। अत्र दर्शपूर्णमासकर्मार्थतया यावज्जीवकालो विधीयते अथ वा जीवने निमित्ते दर्शपूर्णमासकर्म विधीयते पुरुषार्थतया इति संशये पूर्वपक्षमाह । यावज्जीविक इति । यावज्जीविकः दर्शपूर्णमासाभ्यासः आवृत्तिः कर्मधर्मः कर्माङ्गं प्रकरणात् तत्प्रकरणपाठात् ॥ १ ॥

कर्तुर्वा श्रुतिसंयोगात् ॥ २ ॥

सिद्धान्तमाह । कर्त्तुर्वेति । कर्त्तुः धर्मः अङ्गं पुरुषार्थतया जीवने निमित्ते दर्शपूर्णमासौ नैमित्तिकौ प्रत्यवायपरिहाराय विधीयेते नैमित्तिकाननुष्ठानस्य प्रत्यवायजनकत्वात् । उक्तार्थे हेतुमाह । श्रुतिसंयोगात् ।

यावज्जीवमित्यस्य शक्यार्थलाभात् । कर्मधर्मपक्षे जीवनकाले लक्षणा स्यात् । निमित्ते नैमित्तिकस्यावश्यकतया निमित्तावृत्तौ प्रयोगाभ्यास इत्यभ्यासो ऽपि अर्थसिद्धः । यद्यपि प्रकृतहानिः अप्रकृतकल्पना च पुरुषार्थत्वपक्षे तथा ऽपि लक्षणाभिया वक्ष्यमाणलिङ्गादिहेतुभ्यश्च पुरुषार्थतैव युक्तेति भावः ॥ २ ॥

लिङ्गदर्शनाच्च कर्मधर्मो हि प्रक्रमेण नियम्येत तत्रानुष्ठेयमन्यत्स्यात्* ॥ ३ ॥

किं च यदि यावज्जीववाक्यं कालपरं सत् तावत्कालपर्यन्तमेक एव प्रयोगः संवत्सरसाध्यसत्रादिवत्तर्हि किं चिल्लिङ्गं विरुध्यतइत्याह । लिङ्गेति। दर्शपूर्णमासे ऽपि यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति श्रुतम् । तथा यो दर्शपूर्णमासयाजी सन्नमावास्यां पौर्णमासीं वा ऽतिपादयति स स्वर्गाच्च्यवते । अग्नये पथिकृते ऽष्टाकपालं निर्वपेदिति श्रुतम् । यदि चैकः प्रयोगो मरणपर्यन्तं तदा दर्शपूर्णमासप्रयोगस्य मरणानन्तरमेव समाप्तेः दर्शपूर्णमासयाजी सन् इति कथनं विरुध्येतेति । यदि दर्शपूर्णमासयाजी सन्निति अस्य प्रक्रमेण आरम्भेण चकारसूचितेन अतिपादयेदित्यस्य असमाप्त्या च नियम्येत व्याख्यां कुर्वीत तर्हि अन्यत् पथिकृदनुष्ठानविधिरनर्थकः स्यात् । मरणपर्यन्तमसमाप्तेः मरणानन्तरमनुष्ठानासम्भवादिति भावः । सिद्धान्ते माससाध्यप्रयोगस्य फलहेतुत्वान्मासे सम्पूर्ण एकः समाप्तः । एवं जीवने निमित्ते ऽभ्यासः प्रतिमासम् । तत्र कदा चिदेकप्रयोगलोपे प्रायश्चित्तमिति न किं चिदनुपपन्नम् ॥ ३ ॥

व्यपवर्गं च दर्शयति कालश्चेत्कर्मभेदः स्यात् ॥ ४ ॥

किं च दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति व्यपवर्गं दर्शपूर्णमासप्रयोगसमाप्तिं दर्शयति । तव मते मरणसमयएव प्रयोगसमाप्तिः । अथ कालश्चेत् कर्मभेदः भिन्नसोमरूपं कर्म स्यात्तदेव नेति भावः ॥ ४ ॥

अनित्यत्वात्तु नैवं स्यात् ॥ ५ ॥

यो ऽग्निहोत्रं न जुहोति न दर्शपूर्णमासौ यजते तस्याहुति-

* तत्रानर्थकमिति शा० भा० पाठः ।

भाजो ऽनुध्यायिनीः करोति इत्यर्थवादः नैमित्तिकत्वपक्षे उपपन्नः नैमित्तिककर्मणो नियमेनानुष्ठेयत्वाद्यः नियमेन यस्य ददाति तस्यैकस्मिन् दिने ऽदाने तस्मिन् समये तं ध्यायतीति लोकप्रसिद्ध्या उपपन्नः । काम्यपक्षे काम्यानुष्ठानस्यानित्यत्वान्नैवं स्याद् ध्यानोपपत्तिर्न स्यात् ॥ ५ ॥

विरोधश्चापि पूर्ववत् ॥ ६ ॥

किं च यावज्जीवकालस्याङ्गत्वे यावत्काम्येष्टिष्वतिदेशेन प्राप्तौ सर्वासामिष्टीनां यावज्जीवानुष्ठानं ब्रह्मणा ऽपि कर्तुमशक्यमित्यननुष्ठानलक्षणो विरोधः पूर्ववद् दर्शपूर्णमासाभ्यामिष्ट्वा सोमेनेतिवत् ॥ ६ ॥

कर्तुस्तु धर्मनियमात्कालशास्त्रं निमित्तं स्यात् ॥ ७ ॥

उक्तार्थमुपसंहरति । कर्तुरिति । कालशास्त्रं कालशास्त्रवद्भासमानं यावज्जीवमिति वाक्यम् उक्तरीत्या निमित्तं निमित्तपरं स्यात् । उक्तरीत्या कर्तुर्धर्मनियमात् । कर्त्रङ्गत्वसिद्धान्तात् ॥ ७ ॥

नानाशाखासु विहिताऽग्निहोत्रादिकर्मणामैक्यम् । अधि० २ ।

नामरूपधर्मविशेषपुनरुक्तिनिंदाऽशक्तिसमाप्तिवचनप्रायश्चितान्यार्थदर्शनाच्छाखान्तरेषु कर्मभेदः स्यात् ॥ ८ ॥

एकस्यैव वेदस्य बहुषु शाखासु अग्निहोत्रदर्शपूर्णमासादीनि पठितानि । तानि सर्वाणि भिन्नान्युताभिन्नानीति संशये पूर्वपक्षमाह । नामेति । शाखान्तरेषु सत्सु कर्मभेदः स्यान्नामभेदादिहेतुभ्यः । नाम्नो भेदः काठकं कौथुममिति । कस्यां चिच्छाखायामग्नीषोमीय एकादशकपालः अन्यत्र द्वादशकपालः इति रूपेण भेदः । कारीर्यध्ययने भूमिभोजनं धर्मः अन्यत्र न इति धर्मभेदः । पुनरुक्तिः प्रसिद्धा तया । शाखाभेदेन उदितानुदितहोमयोः निन्दया । एकस्मिन्कर्मणि सर्वशाखागतानुष्ठानाशक्त्या । महाग्निचयनसमाप्तेः शाखाभेदेन भिन्नत्वेन । उदितानुदितहोमयोः स्वस्वकालातिक्रमे प्रायश्चित्तदर्शनेन । द्वादशाहे यदि दीक्षितो बृहत्क्रतुमुपेयाद्यद्यदीक्षितो रथन्तरमिति दीक्षितादीक्षितयोरधिकारं दर्शयति । ताण्डके तु एष वा प्रथमो यज्ञो यज्ञानां यज्ज्योति-

ष्टोम इति सर्वप्राथम्यं दर्शयति। इदं शाखाभेदेन कर्मभेदे एकस्मिन् ज्योतिष्टोमे ताण्डकशाखोक्तं प्राथम्यं निविशेत अन्यत्रादीक्षिताधिकार इत्यन्यार्थदर्शनेनेति नवहेतुभिः ॥ ८ ॥

एकं वा संयोगरूपचोदनाख्याविशेषात् ॥ ९ ॥

सिद्धान्तमाह। एकमिति। सर्वशाखास्वेकं कर्म। संयोगस्य फलस्य रूपस्य द्रव्यदेवतयोः चोदनायाः पुरुषप्रयत्नस्य आख्यायाः नाम्नः अविशेषाद् ऐकरूप्यात् ॥ ९ ॥

न नाम्ना स्यादचोदनाभिधानत्वात् ॥ १० ॥

पूर्वपक्ष्युपन्यस्तहेतुषु प्रथमहेतुं दूषयति। नेति। नाम्ना काठकादिनाम्ना कर्मभेदो न। अचोदनाभिधानत्वात्। चोदनायां कर्मोत्पत्तिवाक्ये यदभिधानं नाम तत्त्वाभावात्। उत्पत्तिवाक्यगतकर्मनामैव कर्मभेदकं न ग्रन्थनाम तथेति भावः ॥ १० ॥

सर्वेषां चैककर्म्यात् ॥ ११ ॥

ननु ग्रन्थनामैव भेदकमस्त्वत आह। सर्वेषामिति। ग्रन्थनाम्न एव कर्मभेदकत्वे दर्शपूर्णमासाग्निहोत्रज्योतिष्टोमादियावत्क्रतूनामेककर्मत्वं स्यात्। तैत्तिरीयमिति ग्रन्थसंज्ञाया एकत्वात्। अतो ग्रन्थसंज्ञैक्यं न भेदप्रतिपादकमिति भावः ॥ ११ ॥

कृतकं त्वभिधानम् ॥ १२ ॥

इतो ऽपि न संज्ञया कर्मभेद इत्याह। कृतेति। कृतकम् अनित्यम्। अभिधानं काठकादिसंज्ञा। यदा कठेन प्रवचनं कृतं तदारभ्य प्रवृत्ता संज्ञा तत्पूर्वं भेदकसंज्ञाभावादेकं कर्म पश्चाद्भिन्नमिति वैरूप्यं स्यादिति भावः ॥ १२ ॥

एकत्वे ऽपि परम् ॥ १३ ॥

द्वितीयं निरस्यति। एकेति। एकत्वे ऽपि कर्मणः परं द्वादशकपालरूपं विकल्पेन निविशतइति शेषः ॥ १३ ॥

विद्यायां धर्मशास्त्रम् ॥ १४ ॥

तृतीयं निरस्यति । विद्यायामिति । धर्मस्य भूमिभोजनादेः शास्त्रं विद्यायाम् अध्ययने अङ्गत्वबोधकं न कारीर्याम् ॥ १४ ॥

आग्नेयवत्पुनर्वचनम् ॥ १५ ॥

चतुर्थं दूषयति । आग्नेयेति । पुनरुक्तिः आग्नेयवत् । यथा ऽऽग्नेयवाक्येन सिद्धे कर्मणि यदाग्नेयो ऽष्टाकपालो भवत्यैन्द्रं दधीत्यत्रानुवादः तथा ॥ १५ ॥

अद्विर्वचनं वा ऽश्रुतिसंयोगाविशेषात् ॥ १६ ॥

नन्वनुवादे फलाभावेन पाठवैयर्थ्यमतः पक्षान्तरमाह । अद्विरिति । अद्विर्वचनम् अनुवादाभावः अश्रुतिसंयोगस्याज्ञातार्थसंबन्धस्य यावच्छाखागतवाक्येष्वविशेषात् । अज्ञातज्ञापकत्वस्य तुल्यत्वादिति भावः । न चैकेनाज्ञातज्ञानसंभवे शेषवैयर्थ्यम् । तत्तच्छाखिना स्वस्वशाखागतवाक्येनैवार्थज्ञानं संपादयेदिति स्वाध्यायविधितात्पर्यात् ॥ १६ ॥

अर्थासन्निधेश्च ॥ १७ ॥

अर्थस्य शाखान्तरप्रतिपादितदर्शपूर्णमासादेः शाखान्तरस्ययोः तयोरसन्निधेः । असन्निहितस्यानुवादासंभवादिति भावः ॥ १७ ॥

न चैकं प्रति शिष्यते ॥ १८ ॥

ननु यस्य शाखायां यावन्तो धर्माः पठिताः तावद्धर्मानुष्ठानेनैवापूर्वोत्पत्तिसंभवे कुतो विकल्पसमुच्चयाद्यनुसरणमत्राह । न चेति । तच्छाखायां पठितो धर्मः तच्छाखिनं प्रति शिष्यते विधीयते न । उद्देश्यसंकोचे मानाभावादिति हेतुः पूरणीयः ॥ १८ ॥

समाप्तिवच्च संप्रेक्षा ॥ १९ ॥

महाग्निचयनस्यसमाप्तिभेदहेतुं निरस्यति । समाप्तीति । समाप्तिवत् । यथा समाप्तिर्भेदकत्वे हेतुः तथा संप्रेक्षा उत्प्रेक्षा । सा च मैत्रायणीयानामग्निः अन्वारोहेषु परिसमाप्यते नास्माकमिति बुद्धिरभेदमुपो-

द्बलयति । यदि भिन्नं कर्म स्यात्तदा नास्माकमिति न स्यात् । किं तु अस्माकमनेन समाप्यतइत्येव स्यात् ॥ १९ ॥

एकत्वेऽपि पराणि निन्दाऽशक्तिसमाप्तिवचनानि ॥ २० ॥

पराणि शेषाणि निन्दाऽशक्तिसमाप्तिवचनानि पूर्वपक्षिणा भेदसाधकत्वेनोपन्यस्तानि कर्मैक्ये ऽप्युपपद्यन्ते । निन्दाया न हि निन्दायां तात्पर्यं किं तु पक्षान्तरविधावित्ति । अशक्तिः विरुद्धार्थानां युगपदनुष्ठानाशक्तिश्च विकल्पेन प्रयोगभेदानुष्ठानेनोपपन्नेति भावः ॥ २० ॥

प्रायश्चित्तं वा निमित्तेन ॥ २१ ॥

ननु सर्वेषां हेतूनामुपपत्तावपि उदितानुदितहोमयोः स्वस्वकालातिक्रमे प्रायश्चित्तं श्रूयते । अस्य सर्वथा कर्मभेदमन्तरा गत्यभावः । वैकल्पिकत्वव्यवस्थापने च वैकल्पिकपक्षातिक्रमे व्रीहियवप्रयोगे प्रायश्चित्तमस्तीत्याशङ्कते । प्रेति । निमित्तेन तत्तत्काललोपनिमित्तेन । ज्ञानज्ञाप्यत्वं तृतीयार्थः । प्रायश्चित्तं कथमिति शेषः ॥ २१ ॥

प्रक्रमाद्वा नियोगेन ॥ २२ ॥

समाधत्ते । प्रक्रमेति । प्रक्रमात् प्रथमप्रयोगात् । नियोगेन नियमेन प्रायश्चित्तगतिः प्रथमप्रयोगे समविकल्पः द्वितीयादिप्रयोगेषु यत्र प्रायश्चित्तश्रवणं तत्र सर्वत्र प्रथमप्रयोगपरिगृहीतस्यैवानुष्ठानं तदतिक्रमे प्रायश्चित्तमिति कल्प्यतइति भावः ॥ २२ ॥

समाप्तिश्च पूर्ववत्त्वाद्यथाज्ञाते प्रतीयेत ॥ २३ ॥

ननु महाग्निचयनसमाप्तिः कर्मभेदलिङ्गमुक्तसंप्रेक्षा कर्मैक्ये लिङ्गमिति तुल्यत्वमापतितमत्राह । समाप्तिरिति । पूर्ववत्त्वाद् अभेदप्रत्यभिज्ञादिपूर्वयुक्तिमत्त्वात्ताभिर्युक्तिभिर्यथाज्ञाते अभेदप्रत्ययविषयीभूते ऽर्थएव समाप्तिः समाप्तिलिङ्गं प्रतीयेत । समाप्तिरपि अभेदपरेति भावः ॥ २३ ॥

लिङ्गमविशिष्टं सर्वशेषत्वान्न हि तत्र कर्मचोदना तस्माद् द्वादशाहस्याहारव्यपदेशः स्यात् ॥ २४ ॥

यच्च पूर्वदर्शिततााण्डकशाखास्थं ज्योतिष्टोमे शाखाविशेषस्थे इत्युक्तं तद्दूषयति । लिङ्गमिति । लिङ्गं प्राथम्यरूपम् अविशिष्टमुभयो-स्तुल्यम् । सर्वशाखास्थज्योतिष्टोमशेषत्वात् । ननु ताण्डकशाखायां श्रूयमाणं प्राथम्यं तच्छाखास्थज्योतिष्टोमएव निविशते न त्वन्यत्रेति कथं सर्वशेषत्वमत्राह । न हीति । तत्र ताण्डकशाखायां कर्मणः ज्योतिष्टो-मस्य चोदना नास्ति अतः विनिगमनाविरहात्सर्वशेषत्वे दीक्षितादीक्षि-तविरोधः कर्मभेदे ऽपि तदवस्थः । तस्माद् द्वादशाहस्य य आहारः प्रयोगः तस्मिन् व्यपदेशः विरुद्धानुष्ठानं विकल्पेन प्रयोगभेदेन स्यात् ॥ २४ ॥

द्रव्ये चाचोदितत्वाद्विधीनामव्यवस्था स्यान्निर्देशाद् व्यवतिष्ठेत तस्मान्नित्यानुवादः स्यात् ॥ २५ ॥

ननूक्तलिङ्गस्योक्तदिशा निर्वाहे ऽपि लिङ्गान्तरं कर्मैक्ये विरुध्यते । तथा हि । महाग्निचयनप्रकरणे यत्पक्षसंमितां मिनुयात्कनीयांसं यज्ञक्र-तुमुपेयात्पापीयस्यात्मनः प्रजा स्याद्वेदिसंमितां मिनोतीति । अस्यार्थः । पक्षसंमितां श्येनाद्याकारो यो ऽग्निः तस्य पक्षः तन्मानपरिमितो देशो यदि यूपैकादशिन्या भवेद् यज्ञक्रतुमल्पं प्राप्नुयात् । क्रतुजन्यं किं चिदल्पं फलं भवेत् । स्वीयप्रजाः पापवासनावत्यः स्युः । अतो वेदिसंमिताः स्युरिति वेदिपरिमितो देश एकादशिन्या भवेदिति । यथा शाखान्तरे रथाक्षमितानि यूपान्तरालानि भवन्तीति । अस्या अपि तत्र निवेशे रथा-क्षमानान्तरालसहितायाः पक्षसंमितायाः वेदिसंमिताया यूपैकादशिन्याः कर्तुमशक्यत्वात्कर्मभेदमङ्गीकृत्यैव व्यवस्था संपाद्येत्याशङ्कायामाह । द्रव्य-इति । द्रव्ये चयनरूपद्रव्यप्रकरणे । अचोदितत्वात् । यूपैकादशिन्या अविहितत्वात् । विधीनां पक्षसंमितनिन्दावेदिसंमितरथाक्षान्तरालवि-धीनाम् । अव्यवस्था परस्परविरोधः । कथमिति पूरणीयम् । कथं स्याद् । न विरोध इत्यर्थः । महाग्निचयने एकादशयूपानामविधानादेक एव यूपः तस्यान्तरालाप्रसक्तेः । रथाक्षमितान्तरालगुणस्तु न निविशतइति न को ऽपि विरोध इति भावः । ननु रथाक्षमितान्तरालशास्त्रस्य कुत्र निवेशस्तत्राह । निर्देशाद् वाचःस्तोमे एकादशयूपविधानेन तत्रैकादश-

यूपनिवेशात् । तत्रैव रथाक्षमानशास्त्रं व्यवतिष्ठते । ननु पक्षसंमितमानस्यै-कयूपे सर्वथा ऽसंभवेन निन्दाऽनवकाशस्तत्राह । तस्मादिति । तस्मा-दुक्तहेतोः । यथा यदन्तरिक्षे चिन्वीतान्तरिक्षं शुचा ऽर्पयेदिति अन्तरिक्षे चयनाभावस्य अन्तरिक्षे चयनासंभवेन लोके सिद्धस्य दोषकथनपूर्वको नित्यानुवादः तथा पक्षमानं नित्यानुवादः स्यात् ॥ २५ ॥

विहितप्रतिषेधात्पक्षे ऽतिरेकः स्यात् ॥ २६ ॥

ननु लिङ्गद्वयोपपत्तावपि अपरं लिङ्गं विरुध्यते विराजं संस्तुतानां द्वे अतिरिच्येते इति । शाखान्तरे तिस्रो ऽतिरिच्यन्तइति । कर्मैक्ये विरुद्ध-संख्यायाः कथं निवेशस्तत्राह । विहितेति । अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीति विधिनिषेधौ एककर्मणि विकल्पेन स्तः । तस्माद् ग्रहणपक्षे तिसृणामतिरेकः अग्रहणपक्षे द्वयोरतिरेक इति पक्षे विकल्पेन स्यात् । अतिरेकोपपत्तिर्भाष्यादवगन्तव्या ॥ २६ ॥

सारस्वते विप्रतिषेधाद्यदेति स्यात् ॥ २७ ॥

नन्वेवमपि सारस्वतसत्रे ये पुरोडाशिनस्तउपवसन्ति ये सान्ना-यिनः ते वत्सान्धारयन्तीति । पुरोडाशिनः असोमयाजिनः । सान्नायिनः सोमयाजिनः । पूर्वोदाहृतेनैष वा प्रथमो यज्ञ इति वाक्येन सर्वेषां क्रतूनां सोमपूर्वकत्वाद्ये पुरोडाशिन इति कथं न विरुध्यते कर्मैक्ये अत्राह । सारस्वतइति । सारस्वते सारस्वतसत्रे विप्रतिषेधात् पूर्वदर्शितविरोधाद् यदेति पदमध्याहार्यं स्यात् । सोमयाजिनामपि पौर्णमास्यां केवलपुरो-डाशित्वाद्यदा पौर्णमास्यां सोमयाजिना ऽपि पुरोडाशित्वं तदा केव-लोपवास इति योज्यमिति भावः ॥ २७ ॥

उपहव्ये प्रतिप्रसवः ॥ २८ ॥

ननु उपहव्यनामके क्रतौ शाखाविशेषे उपहव्यो ऽग्निष्टोमः रथ-न्तरं सामाश्वः श्यावो दक्षिणेति । अन्यत्रोपहव्य उक्थ्यो यज्ञः बृहत्सा-माश्वः श्वेतो रुक्मललाटो दक्षिणेति । अत्र वाक्यद्वये बृहद्रथन्तरसा-म्नोर्ग्रहणं व्यर्थं कर्मैकत्वे प्रकृतितः द्वयोर्विकल्पेन प्राप्तत्वात् । कर्मभेदे तु

कोऽप्युपादत्ते उपादातुं शक्नुवीत वा। वाग्व्यवहारस्य शब्दप्रयोगरूपत्वात् तस्य च शब्दमात्रविषयकत्वात्। किंच सत्यमित्यस्य व्यापकमित्यर्थकल्पनमप्यनुचितम्। सत्यव्यापकयोः समानार्थकताया अप्रसिद्धेः। मिथ्यात्वप्रतिद्वन्द्वित्रिकालाबाध्यत्वरूपप्रसिद्धार्थपरित्यागे मानाभावाच्च। सर्वोचेयं भवत उदन्तरार्थकल्पना कारणात्मकानामपि कार्याणां कारणसत्यत्वातिरिक्तसत्यत्वं व्यवस्थाप्य तेषां कारणज्ञानेन ज्ञानलाभार्था। न चोभयमपि संभवति। कारणात्मकानां सत्यत्वस्यापि कारणसत्यत्वात्मकत्वात्। नापि कारणज्ञानेन कार्यज्ञानं सुलभम्। कारणज्ञानेन भूतभविष्यदादिकार्यज्ञानासंभवस्य पूर्वमुपपादितत्वात्। 'भावेचोपलब्धेः। सत्वाच्चावरस्येति' ब्रह्मसूत्रद्वयमपि कारणानन्यत्वमेव कार्यस्य ब्रूते नतु कारणसत्यत्वातिरिक्तसत्यत्वमपि। एवं च 'यस्मिन् विज्ञाते सर्वं विज्ञातं भवति,'। 'येनादृष्टं दृष्टं भवती'त्यादिश्रुतेरस्मदुक्तार्थ एव शरणीकरणीयस्तथा च न काप्यनुपपत्तिः। [स्नेह. ४०]॥

५८—[स्नेह. ४१] एतेन 'कार्यकारणयोस्तादात्म्येन मृत्तिकेति व्यवह्रियमाणं कारणं सत्यमेवेति अवधारयन्त्या श्रुत्याजगतस्सांवृत्तिकत्ववादिनां जगदतात्विकत्ववादिनां च मतमुदस्यते'- इति परास्तम्। जगतः कारणसत्यत्वातिरिक्तसत्यत्वस्वीकारे कार्यकारणयोस्तादात्म्याभावप्रसङ्गात्। कार्यसत्यत्वस्यापि कारणसत्यत्वानतिरेके तु कारणमेवैकं सत्यं न ततोऽन्यत्किंचित्सत्यमस्तीति कारणसत्यत्वातिरिक्तसत्यत्वेन प्रतीयमानस्य जगतो मिथ्यात्वमेव पर्यवस्यति। यत्तु मृत्तिकासत्यत्त्वविवक्षायां मृत्तिका सत्येति वक्तव्ये सत्यमिति नपुंसकनिर्देशानुपपत्तिरिति। तन्न। मृत्तिकेत्येवं रूपेण

प्रसिद्धं यत्कारणं तदेव सत्यं न तु घटशरावादिरूपकार्यमपीत्यर्थस्य विवक्षणात् । नन्विदं पुरासदेवेति उपक्रमे प्रतिज्ञातसत्त्वकस्य कार्यस्य मिथ्यात्वोक्तौ श्रुतिविरोध इति चेन्न। सदेवेति श्रुत्या सृष्टेः पूर्वं सन्मात्ररूपेणावस्थितेरेवोक्तत्वात् । न च सन्मात्ररूपेणावस्थितं कार्यमेव तदितिवाच्यम् । अनादेः सन्मात्रस्य प्रागभावप्रतियोगित्वरूपकार्यत्वासंभवात् । नापि 'परिणामादिति' सूत्रात्परिणामवादस्य कार्यकारणभावस्य वा वास्तविकत्वं श्रुतिसंमतमस्तीति भ्रमितव्यम् । 'न तस्य कार्यं करणं च विद्यते' 'अशब्दमस्पर्शमरूपमव्ययम्' 'न कर्मणा वर्द्धते नोकनीयानि'त्यादि श्रुतिस्मृतिभिर्निर्विशेषाद्वैतस्यैव वास्तविकत्वावधारणात् । तस्मात् कार्यं नाम न कारणात्तत्वान्तरं किंत्वविद्याप्रत्युपस्थापितनामरूपान्तराद्युपेतं कारणमेवेत्यनवद्यम् ।

५६—[श्लो॰ ४२] यत्तु 'सर्वमिदं जन्यजातं ब्रह्मणो विवर्तो मायायाश्च परिणाम इति भवत्सिद्धान्तः । तत्र यदीयविवर्तभूतमिदं सर्वं तदीयसत्वासत्वे सर्वथोदासीने इति मायासत्वेनैव कार्यस्यामुष्य जगतः सत्वं निर्वहणीयं माया च कल्पितसत्त्वेति न सती। कल्पितं तु सत्वं सांवृत्तिकसत्ववादिना माध्यमिकेनापि स्वीक्रियते इति वाचनिककलहमात्रमेतन्निर्विशेषाद्वैतवादिनो यदसत्कारणकत्वनिराकरणसमर्थनमि'त्यद्वैतसिद्धिकारखण्डनप्रयतनं तत्साहसमात्रम् । अनिर्वाच्याविद्यावादिशून्यकारणवादिनोरद्वैतिमाध्यमिकयोर्मतैक्यस्य शशशृङ्गायमानत्वात् । न च माध्यमिकेनासत्कारणं कल्पनैकशरीरमनिर्वाच्यं वा ऽभ्युपगम्यते । तस्यसदाशून्यैकरूपत्वाभ्युपगमात् । नापि मायायाः स्वतन्त्रं सत्वं क्वाप्युच्यते वेदान्तिभिर्यया जगतः सत्वं निरुह्येत । ब्रह्माश्रितायास्तस्या ब्रह्मस-

त्वेनैव सत्त्ववत्याः स्वातन्त्र्येण जगन्निर्वाहकत्वासंभवात्। ब्रह्मसत्त्वमेव तु तया स्वपरिणामभूततत्तन्नामरूपाद्युपेतं प्रदर्श्यते ऽनेकरूपो मायावीव मायाशक्त्या। तथा चोदासीनमपि ब्रह्मसत्वमेवैकं जगत्सत्वस्य शुक्तिसत्त्वं रूप्यसत्वस्येव निर्वाहकमिति पर्यवस्यति। इदमेव चाभिप्रेत्य भगवता अद्वैतसिद्धिकारेण 'कथमसतः सज्जायेत' 'नासतो ऽदृष्टत्वादिति' 'श्रुतिब्रह्मसूत्रे शून्यवादिमतनिराकरणपरे इति नैताभ्यां व्यावहारिकसत्तावादिनिर्विशेषब्रह्मपक्षक्षपणाशङ्केत्याद्य'भिहितम्। भवता पुनर्ब्रह्मसत्वमुदासीनमितिकृत्वा मायासत्वेनैव सर्वकार्यसत्वं निर्वहणीयमिति जल्पितं विस्मृत्यैव तस्या निस्तत्त्वरूपत्वं निरधिष्ठानभ्रमस्यासंभाव्यत्वं च। इत्थं स्वयमेवाशुद्धमुक्त्वा 'माया च कल्पितसत्वेति न सतीत्यसत्कारणवादपरतैव पर्यवस्यति माध्यमिकानामिव वेदान्तिनामिति' कुचोद्यं च कृत्वा श्रुतिसूत्रप्रमाणमण्डितमप्यद्वैतसिद्धिकारवचो निर्युक्तिकमिति वाङ्मात्रेण सोपहासं तिरस्कृतम्। कोऽयं भवादृशस्य महापण्डितस्यापि प्रमादः।

६०–[स्ने. ४२] एतेन 'किञ्च कल्पनैकशरीरयोः सत्वासत्त्वयोर्न विरोधसंभवोपि। यत एककालावच्छेदेन एकदेशावृत्तित्वं विरोधः सच काल्पनिकजगद्वादिमते न सिद्ध्यतीत्यादि 'तदपि प्रत्युक्तम्। काल्पनिकजगद्वादिमते ऽपि जगत्कारणत्वेनाभिमतस्य सतो ब्रह्मणः केनापि कल्पितत्वाभावात्, माध्यमिकसंमतस्यासतो ऽप्यकल्पितत्वात्, तत्सम्प्रतिपन्नयोरेव च सदसतोः 'कथमसतः सज्जायेत' 'नासतो ऽदृष्टत्वादिति' श्रुतिसूत्राभ्यामनूदितत्वाच्च। सत्वासत्त्वयोः कल्पनैकशरीरत्वाभावेन काल्पनिकजगद्वादिमते ऽपि तयोरेककालावच्छेदेन एकदेशावृत्तित्वरूपविरोधस्यैव संभवात्

किञ्चैवं 'वस्तुसतत्त्वयोः सत्वासत्वयोर्विरोधमभिप्रयती कथमसतः सज्जायेतेति श्रुतिः परं कदर्थिता भवति काल्पनिकजगत्सत्तावादिमते' इत्यपि प्रत्युक्तम्। काल्पनिकजगद्वादिभिरपि श्रुतिसंमतयोरेव सत्त्वासत्वयोः स्वीकारात्। कार्यसत्वस्य च कारणसत्वानन्यत्वात् तस्य चाकाल्पनिकत्वात्। ननु कारणस्याकाल्पनिकत्वे तदनन्यस्य कार्यस्यापि तथात्वमेवोचितम्। नहि एकस्याकाल्पनिकत्वे परस्य च काल्पनिकत्वे तयोरनन्यत्वं संभवति। 'कथमसतः सज्जायेतेति' श्रुतिरप्यसतः सदुत्पत्तिं वारयन्त्युत्पद्यमानस्याकाल्पनिकत्वमेवाहेति चेन्न। कारणात्मना कार्यस्याकाल्पनिकत्वेऽप्यविद्याप्रत्युपस्थापितनामरूपाद्यात्मना काल्पनिकत्वात्। सन्मात्रस्य तु कारकव्यापारात् प्रागपि सिद्धत्वेनाद्यक्षणसंबन्धरूपाया जनेस्तत्र बाधितत्वेनाविद्याकल्पितनामरूपतात्पर्येणैव श्रुत्युक्तायास्तस्या उक्तिसंभवात्। न च काल्पनिककार्यस्याकाल्पनिककारणादन्यत्वमपि। अकल्पितस्यैव कल्पित रूपेणावस्थानात्। 'इन्द्रोमायाभिः पुरुरूप ईयते इत्यादिश्रुतेः। एवं चेते उत्तरे चाक्षेपाभासाः काल्पनिककारणवादमसत्कारणवादं चोपजीव्य प्रवृत्ता इति न ब्रह्मकारणतावादिषु प्रसरन्तीति सुव्यक्तमेव श्रुतियुक्तिकोविदानाम्।

६१–[स्नेह. ४३] यत्तु 'परमप्रकृतमनुसरामः तस्माद्विशिष्टस्यातिरिक्तत्वे ऽनतिरिक्तत्वे वा शुद्धस्य निवर्तकत्वाङ्गीकारे वा कथंचिदपि न निवृत्त्युपपत्तिरिति न किञ्चिदेतदित्या' ऽऽम्रेडनम्। तत्सर्वं चतुर्विंशतितमादिपरिच्छेदेषु साधु प्रत्युक्तमिति नात्र पुनः प्रत्युच्यते।

६२–[स्ने. ४४] यत्तु 'ज्ञानाज्ञानयोर्विरोधित्वादेव शुक्तिप्रमायाः शुक्त्यज्ञानस्येव आत्मप्रमाया आत्माज्ञानविरोधित्वं निर्वाह्यमि'

त्यादिग्रन्थेन गौडब्रह्मानन्दीखण्डननाटनं तत्सर्वमशुद्धमुक्त्वा कुचोद्यम् । गौडब्रह्मानन्दोक्तव्याप्तेर्व्यभिचारमनिर्दिश्यैव ज्ञानाज्ञानयोः समानविषयकत्वमात्रेण विरोधानुपपत्त्यैव तद्दूषणात् । किं व्याप्तिरपि क्वापि विरोधप्रतिसंधानमूलिका भवति या तदनुपपत्तौ न घटेत ? साहचर्यनियम एव तु व्याप्तिः सर्वत्र शास्त्रेषु गीयते साचाव्यभिचारिसाहचर्यदर्शनमात्रेण गृह्यते । मोपपाद्युपपद्यतां वा ज्ञानाज्ञानयोः समानविषयकत्वमात्रेण विरोधः । नापि स केनाप्युपक्षिप्तः । या यद्विषयिका प्रमा सा स्वसमानविषयकाज्ञान–तत्प्रयुक्ताधिकरणकालपूर्वत्वानधिकरणक्षणवृत्तिरित्याकारिकया गौडब्रह्मानन्दीयव्याप्त्या किमपराद्धं यदि न व्यभिचरिता । व्यभिचारस्तु न क्वापि भवतोपदर्शितो येन साऽनुपादेया भवेत् । नच व्यभिचारसंभवोपि । सर्वस्या एव प्रमायाः स्वसमानविषयकाज्ञानतत्प्रयुक्ताधिकरणकालपूर्वत्वानधिकरणक्षणवृत्तिताया एवोपलब्धेः । एवं चोक्तव्याप्तिं खण्डयता भवतैव 'निर्विषेणापि सर्पेण कर्तव्या महती फटे'त्ययं न्यायः साधु नाटितः । ननु नाहमुक्तां व्याप्तिं खण्डयामि किंतु ज्ञानाज्ञानयोः समानविषयकत्वमात्रेण विरोधानुपपत्तिं वच्मीति मन्यते चेत्केन तादृशरूपेण विरोध उपन्यस्तो यो भवता खण्डयितुमारब्धः परेण तु स्वपक्षव्यवस्थापिका व्याप्तिरुपन्यस्ता साचेन्न खण्डिता, निष्कम्प एव तर्हि परपक्षो भवानेव पुनर्निग्रहस्थाननिगृहीतः । तथाच पारमार्षं सूत्रं 'विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थान'मिति । [न्यायसू० १९० आ० २० अध्या० १ ॥]

६३–[स्नेह० ४५] यत्तु 'अज्ञानपदेन ज्ञानाभावो न विवक्ष्यते किंतु ज्ञानविरोधि किञ्चिदनिर्वाच्यं विपरीतज्ञानमेव वाच्यमेवं च तादृशविपरीतबुद्धित्वावच्छिन्नं प्रति शास्त्रजन्यज्ञानस्य

चरमवृत्यात्मकस्य अप्रामाण्यज्ञानानास्कन्दितत्वेनैव विरोधिता वक्तव्या न च तत्सम्भवति बाध्यस्येव ज्ञानस्य बाधकत्वेनाभिमतस्यापि ज्ञानस्याविद्यात्मकदोषजन्यत्वस्यावश्यकत्वेन तस्याप्रतिबन्धकत्वादिति ' । तत्सप्रविंशतितमादिपरिच्छेदेष्वेव दत्तोत्तरम् । ज्ञानाज्ञानयोराविद्यकत्वाविशेषेप्याविद्यकविरुद्धस्वभावसत्वतमोजन्यत्वेन बाध्यबाधकभावोपपत्तेः । भौतिकत्वाविशेषेऽपि यथोष्णहिमयोर्बाध्यबाधकभाव उपपद्यते तद्वत् । नचाज्ञानं प्रति ज्ञानस्याप्रामाण्यज्ञानानास्कन्दितत्वेन विरोधिता वक्तव्या । अज्ञानस्येव ज्ञानस्यापि परमार्थभूमौ बाधितत्वात् । किंतु या यद्विषयकप्रमा सा स्वसमानविषयकाज्ञानतत्प्रयुक्ताधिकरणकालपूर्वत्वानधिकरणक्षणवृत्तिरिति व्याप्तिमुद्रयैव ज्ञानाज्ञानयोर्विरोधः समर्थनीय इति न काप्यनुपपत्तिः ।

६४—[स्नेह· ४६] यत्तु ' स्वरूपतो विद्यमानमबाध्यार्थविषयकत्वं नोपयुज्जीतेति चरमवृत्तिरबाधितार्थविषयिणीत्याकारकज्ञानस्यैवोपयोगिता वाच्या । तत्र चाबाध्यार्थविषयकत्वेनाबाध्यार्थविषयकत्वसाधने साध्याविशेष इत्यादि ' । तत्सर्वथा ज्ञानानां परतः प्रामाण्याग्रहरूपबद्धमुष्टिवानरन्यायानुगृहीतम् । ' ब्रह्मविद्ब्रह्मैव भवतीति ' श्रुतिप्रामाण्यात्सत्यप्यबाधितार्थविषयिण्याश्चरमवृत्तेर्निःश्रेयसरूपे परमोपयोगे ' स्वरूपतो विद्यमानमप्यबाध्यार्थविषयकत्वं चरमवृत्तेर्नोपयुज्यत ' इत्युक्तेर्व्याहतत्वात् । न च ' चरमवृत्तिरबाधितार्थविषयिणीत्याकारकज्ञानस्यैवोपयोगिता वाच्ये'त्यस्योक्तिसंभवोऽपि । सकलवृत्त्यवसानभूतया चरमवृत्त्या वृत्युपादानाविद्यानाशे चरमवृत्तिविषयकानुव्यवसायात्मकस्य वृत्त्यन्तरस्योदेतुमशक्यत्वात् । एवं चागमप्रमाणसिद्धाया अपि चरमवृत्तेः प्रत्यक्षाद्यभावमात्रेणासिद्धिमुत्प्रेक्ष्य जगद्बाधानुपपत्त्युद्भावनमसमञ्जसम् ।

६५—[स्ने· ४७] यत्तु 'नाप्यबाध्यार्थविषकत्वं प्रमात्वं तथा सति लौकिकव्यवहारमात्रोच्छेदप्रसङ्गादित्यादि' । तत्तुच्छम् । संसारदशायामबाध्यार्थविषयकत्वस्य तेन विवक्षितत्वात् । तथा च लौकिकव्यवहारमात्रस्य संसारदशायामबाधितत्वेन न तत्रानाश्वास प्रसङ्गसंभवः । अत एवोक्तम् 'देहात्मप्रत्ययो यद्वत्प्रमाणत्वेन कल्पितः । लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयादिति' । एतेन 'ब्रह्मातिरिक्तसकलप्रपञ्चस्य दोषजन्यत्वेन ज्ञानमात्रस्याप्रामाण्यज्ञानास्कन्दिततया अबाध्यार्थविषयकत्वस्यैव दुर्ग्रहत्वादित्य'पि परास्तम् । चरमवृत्तेश्च परमार्थदृष्टिरूपत्वात्सर्वथा ऽबाध्यार्थविषयकत्वमिति नाविदितं विवेकिनाम् ।

६६—[स्नेह· ४८] यत्तु नापि द्वितीयः कल्पः । चरमज्ञानव्यक्तेर्जगदुत्पादनकारणत्वं ज्ञानाज्ञानयोर्विरोधित्वादेव वक्तव्यं विरोधित्वं च समानविषयकत्वन । न च तत्सम्भवति । अज्ञानस्य शुद्धविषयकत्वात् । ज्ञानस्य च स्वतः प्रमाणवादिनां मीमांसकानां वेदान्तिकानां च स्वावगाहिताया अप्यावश्यकत्वेन अज्ञानकार्यभूतस्वात्मावगाहित्वेन अज्ञानतत्कार्यविषयकज्ञानस्यैव च विरोधित्वेन तस्य तथाभावविरहादित्यादि' । तदसत् । तेजस्तिमिरयोरिव पटाग्निसंयोगयोरिव वा ज्ञानाज्ञानयोरपीतरासहिष्णुत्वरूपविरोधस्यैव घटज्ञानाज्ञानादौ सर्वलोकप्रसिद्धत्वेन तयोः समानविषयकत्वाभावकल्पनमात्रेणाविरोधासिद्धेः । न च तयोरसमानविषयकत्वमपि । अज्ञानस्य शुद्धविषयकत्वे ज्ञानस्यापि तथा त्वात् । ननु ज्ञानस्य स्वतः प्रामाण्यवादिनां मते स्वावगाहित्वेन शुद्धमात्रविषयकाज्ञानापेक्षया ऽधिकविषयकत्वेन कथं तयोः समानविषयकत्वमिति चेन्न । शुद्धविषयिण्याश्चरमवृत्तेश्चैतन्येनैव

प्रकाश्यतया स्वस्याः स्वविषयकत्वाभावेनाज्ञानवृत्तिसमानविषयकत्वाच्चतेः । नहि ज्ञानस्य स्वतः प्रामाण्यवादिनाऽपि वृत्यंशेनैव ज्ञानं प्रकाश्यत इत्युच्यते । कर्तृकर्मविरोधात् । किंतु तद्विषयचैतन्येनैव । 'यस्य भासा सर्वमिदं विभातीति श्रुतेः' । तथा च ज्ञानस्य चरमवृत्त्याख्यस्याज्ञानस्येव शुद्धविषयकत्वं चैतन्यभास्यत्वं चोच्यमानमुपपद्यत एव । एवं च समानविषयकत्वेन ज्ञानाज्ञानयोर्विरोधे सिद्धे, सिद्धे च चरमवृत्त्या जगदुपादानाज्ञाननाशे जगदुत्सादनमेव पर्यवस्यति ।

६७–[स्नेह· ४६] एतेन 'अज्ञानतत्कार्यविषयकज्ञानस्यापि विरोधित्वाङ्गीकारे तु अहमज्ञः अयं घट इत्यादि ज्ञानानामपि जगद्बाधकताप्रसङ्ग इति' परास्तम् । चिदंशस्यैव वृत्तिप्रकाशकत्वेन तस्या अज्ञानतत्कार्यविषयकत्वोक्तेरेवासंभवात् । यथाह्यनलतप्तस्याप्ययसो न दग्धृत्वं किंतु तदाश्रितानलस्यैवैवं चैतन्योपारूढाया अपि वृत्तेर्न स्वप्रकाशकत्वं किंतु चैतन्यस्यैवेति विवेचनीयम् । वृत्तेः स्वप्रकाशत्वप्रवादस्तु दग्धृत्वाश्रयवन्हितादात्म्याध्यासादयोदहतीति व्यवहारवच्चैतन्यतादात्म्याध्यासाद्बोद्धव्यः । एवं च ब्रह्ममात्रविषयिण्या चरमवृत्त्या स्वविरोध्यज्ञाननाशे स्वोपादाननाशाज्जगद्विनाशो दुर्निवारः । इदमेवचाभिप्रेत्य भगवता भामतीकल्पतरुकृताप्युक्तम् 'एतेन शुद्धं ब्रह्मेति विषयीकुर्वाणा वृत्तिः स्वस्वेतरोपाधिनिवृत्तिहेतुरुदयते स्वस्याप्युपाधित्वाविशेषादि'त्यादि । भवता पुनरुक्तां विवेकयुक्तिमविदुषा तन्निरस्तम् वामनेनेव प्रांशुलभ्यं फलमिति किमधिकोपालम्भेन ।

६८–[स्नेह· ५०] एतेन 'घटवद्भूतलमिति धियं प्रति घटाभाववद्भूतलं कुड्यं चेत्यधिकावगाहि ज्ञानं यथा निवर्तकं तथा

मानिके स्थानित्वे सिद्धः स्थानिवद्भावः,एवं तर्ह्यनल्विधौ स्थानिवद्भाव उक्तः, अल्विध्यर्थमिदं, यथा क्षीरपेण सुरापेणोत्तरपदविभक्त्योरेकादेशस्यान्तवद्भावा 'देकाजुत्तरपदे णः' इति णत्वमल्विधिरपि भवति, ननु चानल्विधाविति प्रतिषेधः स्थान्यलाश्रयेष्वेव कार्येषु, अस्य त्वेकादेशस्योत्तरपदं प्रत्यवयवत्वमेव स्थानिवत्त्वेन प्रार्थनीयमच्त्वं तु स्वत एव सिद्धं, ततश्च यथा ऽरुदितामित्यत्र स्वाश्रयं वलादित्वं स्थानिवद्भावकृतं च सार्वधातुकत्वमाश्रित्य 'रुदादिभ्यः सार्वधातुके' इतीड् भवति, तद्वदिहापि स्थानिवद्भावकृतमुत्तरपदावयवत्वं स्वाश्रयं चाच्त्वमाश्रित्य णत्वं भवति, यत्तु स्थान्यल्स्वरूपनिबन्धनं तन्नेष्यतएव यथा खट्वाभिरित्यादावैस्भावादि, तस्माच्चिन्त्यमस्य प्रयोजनम् ॥

"षत्वतुकोरसिद्धः" ॥ 'षत्वे तुकि चेति'। षत्वशास्त्रे तुक्शास्त्रे चेत्यर्थः। 'एकादेश इति'। एकादेशशास्त्र 'माद्गुणः' इत्यादीत्यर्थः। 'असिद्धो भवतीति'। सिद्धो निष्पन्नस्ततो ऽन्यो ऽसिद्धः, तत्र शास्त्रस्वरूपं तावन्निष्पन्नमिति परत्र परशब्दप्रयोगादिवार्थो ऽवगम्यते, तत्कार्यकरणाच्च सादृश्यं तदाह। 'सिद्धकार्याणि न करोतीत्यर्थ इति'। षत्वतुक्शास्त्रसन्निधावेकादेशशास्त्रं स्वकार्यमेकादेशाख्यं कार्य्यं न करोति न प्रवर्त्तयति न प्रतिपादयतीत्यर्थः। सूत्रस्य प्रयोजनमाह। 'असिद्धवचनमिति'। आदेशे कृते यत्कार्यं तद्धेतुकं प्राप्नोति तदादेशलक्षणम्, आदेशो लक्षणन्निमित्तमस्येति कृत्वा, तस्य प्रतिषेधार्थमसिद्धवचनम्, उत्सर्गः स्थानी, सामान्योत्सृष्टत्वात्स लक्षणं यस्य तदुत्सर्गलक्षणन्तस्य भावः प्रवृत्तिर्यथा स्यादित्येवमर्थं चासिद्धवचनम्। 'कोसिचदिति'। 'लिपिसिचिह्वश्चे' ति च्लेरङ्, कशब्दात्सोरुत्वम्, 'अतो रोरप्लुतादप्लुते' इत्युत्वम्, गुणः। 'एङः पदान्तादतीति'। 'परम्प्रत्यादिवद्भावादिति'। आदिवद्भावे हि ओसिचदित्येतदन्तं पदं, ततः सकारः पदादिर्न भवतीति सात्पदाद्योरिति निषेधाभावादेकादेशमोकारमिणमाश्रित्य षत्वं प्राप्नोति तदसिद्धत्वान्न भवति, असिद्धत्वे हि षत्वशास्त्रम्प्रत्येकादेशशास्त्रस्याप्रतिपादकत्वात्को असिचदित्येवमवस्थितम्पदरूपम्भवति, तत्राकारेण व्यवधानात्षत्वाभावः। 'कोस्येति'।

इदमः षष्ठ्येकवचनम्, त्यदाद्यत्वम्, ‘टाङसिङसामिनात्स्याः’ इति स्यादेशः, हलि लोपः, शेषम्पूर्ववत्, एवमादेशलक्षणप्रतिषेधस्योदाहरणानि दर्शितानि, इतरस्य दर्शयति। ‘अधीत्य प्रेत्येति’। ‘एकादेशस्यासिद्धत्वादित्यादि’। असिद्धत्वे हि तुक्शास्त्रसन्निधावधिइइयेत्येव स्थितं पदरूपं भवति, ततश्च ह्रस्वाश्रयस्तुक् प्रवर्त्तते, यदि तु मुख्यस्यैकादेशस्यैव कार्यस्यासिद्धत्वमुच्यते तदा षत्वे नास्ति दोषः, कथमोकारस्तावत्स्वकार्यं षत्वं न करोति, यौ तु ततः पूर्वौ ककारयकारौ तदाश्रयमपि षत्वं न भवति, तेनैवौकारेण व्यवधानात्, तुकि नेष्टसिद्धिः, कथमेकादेशेन ह्रस्वस्य निवर्तितत्वात् । न चैकादेशः स्वकार्यञ्च करोति, अनेन स्थानिनः प्रत्यावृत्तिः शक्या, तस्मात्तुकि शास्त्रासिद्धत्वमेवाश्रयणीयम्, आह च स्थानिवद्वचनानर्थक्यञ्च शास्त्रासिद्धत्वादिति। ‘सम्प्रसारणङीट्स्विति’। सम्प्रसारणे ङौ इटि च य एकादेशस्तस्यासिद्धत्वप्रतिषेधो वक्तव्यः। ‘शकहूष्विति’। शकान् ह्वयतीति यजादित्वात्सम्प्रसारणम्पूर्वत्वं, क्विप्, ‘हलः’ इति दीर्घः। ‘परिवीष्विति’। व्येञः परिपूर्वात् क्विबादि पूर्ववत्। ‘असिद्धत्वात्षत्वन्न प्राप्नोतीति’। पूर्वरूपस्यासिद्धत्वे हि शकहुआ इत्येवमवस्थितं पदरूपम्भवति। ‘वृत्तेच्छत्रमिति’। ‘अपचेच्छत्रमिति’। पचेर्लङ्, उत्तमैकवचनमिट्, शप्। ‘आद्गुणस्यासिद्धत्वादिति’। असिद्धत्वे हि तस्य वृत्तइच्छत्रम्, अपचइच्छत्रमित्येवमवस्थितं पदरूपम्भवति, अत्र सम्प्रसारणे तावत्प्रतिषेधो न वक्तव्य एकादेशोऽसिद्ध इत्युच्यते, न चात्रैकादेशम्पश्यामः, दीर्घेण निवर्त्तितत्वात्, न च दीर्घस्य स्थानिवद्भावादेकादेशग्रहणेन ग्रहणमल्विधित्वात्, ङीटोस्तु प्रतिषेधो वक्तव्य एव, अथ वा लाघवार्थं पदस्येति वक्तव्यम्, अन्तादिग्रहणं च पूर्वसूत्रादनुवर्त्तनीयम्, तेन पदान्तस्य पदादेश्च य एकादेशः सोऽसिद्ध इत्येषोऽर्थो भवति, यद्येवं सुपिप्पला ओषधीस्कृधीत्यत्रौषधिशब्दाद् द्वितीयाबहुवचनम्, ‘ओषधेश्च विभक्तावप्रथमायाः’ मिति दीर्घः, ततः प्रथमयोः पूर्वसवर्णदीर्घः, रुत्वविसर्जनीयौ, अत्रेदानीं ‘कःकरत्करतिकृती’ति विसर्जनीयस्य सत्वमिष्यते तच्च प्राप्नोति, पदान्तपदाद्योरिति वचनात्, एकादेशस्यासिद्ध-

त्वाभावाद् इण उत्तरो विसर्जनीय इती 'णः ष ' इति षत्वं प्राप्नोति, अविशेषेणासिद्धत्वे ओषधीअस् कधीत्येवमवस्थानादिण उत्तरत्वाभावात्षत्वाप्रसङ्गात्सत्वं सिध्यति । ज्ञापकात्सिद्धम् । यदयं कस्कादिषु भ्रातुष्पुत्रशब्दं पठति तज्ज्ञापयति नैकादेशात्परस्य विसर्जनीयस्य षत्वम्भवतीति, यदि स्याद्भ्रातृशब्दान्ङसि 'ऋत उदि ' त्युत्वे एकादेशे रपरे च कृते 'रात्सस्ये ' ति सकारलोपे कृते षष्ठीसमासे 'ऋतो विद्यायोनिसंबन्धेभ्य ' इत्यलुकि रेफस्य विसर्जनीये 'ऋत उदि ' त्युकारस्यैकादेशस्य सिद्धत्वादिदुदुपधस्य चेत्येव षत्वे सिद्धे कस्कादिषु तन्न पठेत्, पठति च, ततो ज्ञायते नैकादेशात्परस्य षत्वमिति, शकहूष्वित्यत्रापि तर्हि न प्राप्नोति, नैष दोषः । तुल्यजातीयस्य ज्ञापकं भवति, कश्च तुल्यजातीयः, यः कुप्वोरनन्तरः, इह च वेञः क्विपि संप्रसारणे पूर्वत्वे च 'ह्रस्वस्य पिति कृती ' ति तुकि प्राप्ते पूर्वत्वस्य सूत्रेणासिद्धत्वे प्राप्ते पदान्तपदाद्योरिति वचनादसिद्धत्वाभावादुदिति तुग्भवत्येव, नहि उ आ इत्येकादेशात्प्रागवस्थायामाकारः पदान्तो नाप्युकारः पदादिः, विभक्तेरभावात्, न चैकादेशात्प्रागेव कृदन्तत्वाद्विभक्त्युत्पत्तिरेकादेशस्यान्तरङ्गत्वात्, अथापि प्रागेवविभक्त्युत्पत्तिरेवमपि उआस् इति स्थिते उकारः पदादिः सकारः पदान्तः सुबन्तं हि पदं न तु ततः पूर्वम्, अथापि भ्याम्प्रभृतावुआभ्यामिति स्थिते स्वादिष्विति पदसंज्ञायां पदान्तपदाद्योरेकादेशस्तथापि न दोषः, पूर्वपरयोरिति वर्त्तते अन्तादिग्रहणञ्च, तत्र यथासंख्यं संबन्धात्पूर्वपदस्य योन्तः परस्य चादिस्तयोरेकादेशोऽसिद्ध इत्यर्थः संपद्यते, आकारश्चात्र पदादिर्न भवति नाप्युकारः पदान्त इत्यसिद्धत्वाभावात्तुग् भवत्येव, किमर्थं पुनः षत्वतुकोरेकादेशस्यासिद्धत्वादुच्यते, यावता द्विपदाश्रयत्वाद्बहिरङ्गस्यैकादेशस्यैकपदाश्रयत्वेनान्तरङ्गयोः षत्वतुकोरसिद्धम्बहिरङ्गमन्तरङ्ग इत्येवासिद्धत्वं सिद्धं, ज्ञापनार्थं तु, एतज्ज्ञापयति यत्र बहिरङ्गस्यान्तरङ्गस्य वाऽचोरानन्तर्यं निमित्तत्वेनाश्रितं तत्र बहिरङ्गपरिभाषा न प्रवर्त्ततइति, तेनाक्षद्यूरित्यत्र बहिरङ्गस्याप्यूठोऽसिद्धत्वाभावाद्यणादेशः सिद्धो भवति, अयमेवार्थः परिभाषारूपेण पठ्यते नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिरिति ॥

"आद्गुणः" ॥ गुणग्रहणं किम्, यावताऽचीति वर्त्तते, एकः पूर्वपरयोरिति च, तत्रान्तर्यतः कण्ठतालव्ययोरकारेकारयोः स्थाने तादृश एवैकारो भविष्यति, कण्ठ्यौष्ठ्ययोश्चाकारोकारयोः स्थाने तादृश एवौकारो भविष्यति, न चैकारौकारयोरपि प्रसङ्गः, वृद्धिरेचीति नियमात्, तदिदानीं नियमार्थम्, ऐचोरनेनैव सिद्धत्वात्, एच्येव वृद्धिर्भवति, उभयथा नियमश्च व्याख्यास्यते, वृद्धिरेवैचीति, इह तर्हि खट्वर्श्यः मालर्श्य इति, प्रमाणतोऽन्तरतमो मूर्द्धन्य ऋकारः प्राप्नोति । उभयोर्योऽन्तरतमस्तेन भाव्यं, न चकार उभयोरन्तरतमः, अकारस्तु शिष्यमाण एव रपरो भवतीति स्थानत उभयोरन्तरतमः, आकारस्तर्हि प्राप्नोति, 'उपसर्गादृति धातौ' वित्येतन्नियमार्थं भविष्यति ऋति धातावेवाकारो नान्यत्रेति, प्लुतस्तर्हि प्राप्नोति खट्वेन्द्रः, प्लुतश्च विषये स्मृतः, प्लुतविधाने हि सति यस्मिन्विषये प्लुतो विहितस्तस्मिन्नप्यनेनैव भाव्यम्, अस्मिन्कर्त्तव्ये आष्टमिकस्य प्लुतस्यासिद्धत्वात्, ततश्च पक्षे ऽनुवाददोषप्रसंगात् प्लुतो न भविष्यति, इह तर्हि खट्वाईषा खट्वेषा, खट्वा ऊढा खट्वोढा, आन्तर्यतश्चतुर्मात्र आदेशः प्राप्नोति, गुणग्रहणे तु क्रियमाणे गुणसंज्ञायान्तपरकरणं सर्वार्थमिति त्रिमात्रचतुर्मात्राणामगुणत्वादप्रसंगः, तस्माद्गुणग्रहणं, श्लोकौ चात्र भवतः ।

आदेशश्चेद्गुणः केन स्यानेन्तरतमो हि सः ।
ऐदौतौ नैचि तावुक्तावृकारो नोभयान्तरः ॥
आकारो नर्त्ति धातौ स प्लुतश्च विषये स्मृतः ।
आन्तर्यात्त्रिचतुर्मात्रो गुणश्च तपरः स्मृतः ॥

इह वृक्षशब्दान्ङिः, वृक्षइइन्द्रमिति स्थिते अकारेकारयोर्गुणश्च प्राप्नोतीकारयोः सवर्णदीर्घश्च, तत्र शब्दपरविप्रतिषेधाद्दीर्घप्रसंगः, तथा तच्छब्दाज्जश्शसोः शिः, तइइन्द्रं, पचेरुत्तमैकवचनमिट् शप्, पचइइन्द्रं, नैष दोषः, एकपदाश्रयत्वादन्तरङ्गो गुणो भविष्यति प्रागेव पदान्तरसंनिधानात् । 'लकारस्य स्थानत इति' । यथा चैतल्लभ्यते तथा लणित्यत्र व्याख्यातम् ॥

"एत्येधत्यूठ्सु" ॥ 'न पुनरेधतेरव्यभिचारादिति' । बाहुल्याभिप्रायेणैतदुक्तम् । अस्ति ह्यस्यापि व्यभिचारः चङ्युपधाह्रस्वत्वे भवान् माप्रे-

दिधदित्यत्रेत्याहुः। 'प्रष्ठोह इति' प्रष्ठं वहतीति छन्दसि सहः, वहश्चेति ण्विः, वाह ऊडित्यूठ्, संप्रसारणं, पूर्वत्वं, ततो वृद्धिः। 'एत्येधत्योरेङि पररूपापवाद इति'। वृद्धिर्विधीयतइत्यनुषङ्गः, यथैव तर्हि एङि पररूपं बाधते एवमाङि पररूपमपि बाधेत, नाप्राप्ते पररूपे ऽस्या वृद्धेरारम्भात्, इत्यत आह। 'ओमाङोश्चेतत्त्विति'। कुत इत्याह। 'येनेति'। 'स तस्य बाधको भवतीति'। तस्यैव बाधको भवतीति यावत्, तद्बाधस्यावश्यम्भावित्वात् तावता च बाधकस्य चरितार्थत्वात्, न चाप्राप्ते एङि पररूपे इयं वृद्धिरारभ्यते, आङि पररूपे तु आ इतः एतः प्रेतः परेत इत्यत्र प्राप्ते उपैति प्रैतीत्यत्र त्वप्राप्ते तस्मान्न बाधते। परिहा[1]रान्तरमाह। 'पुरस्तादिति'। अनन्तरे बाध्ये ज्ञाते तद्बाधया वचनस्य चरितार्थत्वादुत्तरेण सह स्पर्द्धायां परत्वात्तदेव भवतीति भावः। 'अक्षौहिणीति'। अक्षैरूहते ऽवश्यमिति आवश्यके णिनिः, साधनं कृतेति समासः। 'स्वैरमिति'। ईर गतौ, ईरणमीरः, भावे घञ्, स्वेनाभिप्रायेण ईरणं स्वैरं, 'कर्तृकरणे कृता बहुल'मिति समासः, क्रियाविशेषणात्वाल्लोकाश्रयत्वाद्वा लिङ्गस्य नपुंसकत्वम्। स्वेनाभिप्रायेणेरते गच्छतीति स्वैरी, सुप्यजाताविति णिनिः। ईरिग्रहणमनर्थकम्, पदास्वैरिबाह्येति निपातनात्सिद्धम्, पदास्वैरशब्दादिना मत्वर्थीयेन सिद्धम्, णिनिस्त्वनभिधानान्न भविष्यति। 'प्रादित्यादि' ऊढ ऊढि एष एष्य इत्येतान्युत्तरपदानि, इष्यतेरिच्छतेरिष्णातेर्वा यदा ण्यत् तदा प्रैष्यः, यदा घञ् तदा प्रैषः, एङि पररूपापवादो वृद्धिः, ईष्यशब्दे तु प्रेष्य इति भवति, तथा आ ऊढा ओढा प्रोढेत्योमाङोश्चेति पररूपं भवति, पूर्वोपात्तस्य ऋणस्यापनयनाय यदृणमन्यदुपात्तं तदृणार्णम्, दशार्णशब्दो नदीविशेषस्य देशविशेषस्य च संज्ञा॥

"आटश्च"॥ ईक्ष दर्शने, उभ उम्भ पूरणे, उब्ज आर्जवे, ऋधु वृद्धौ, इत्येतेषामुदाहरणानि। 'चकारोधिकविधानार्थ इति'। अस्यैव विवरणम् 'उस्योमाङोश्चेति'। 'पररूपबाधनार्थ इति'। उसि ओमि आङि च

[1] परिभाषेति ३ पु॰ पा॰।

यत्पररूपं प्राप्नोति तद्बाधनार्थमित्यर्थः, अन्यथा परत्वात्तदेव पररूपं स्यात्। 'औस्त्रीयदिति'। अनर्थकेप्युसि पररूपविधानादत्र प्रसङ्गः॥

"उपसर्गादृति धातौ"॥ 'उपार्च्छतीति'। ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु। 'प्रर्च्छको देश इति'। अत्र यत्क्रियायुक्ताः प्रादय इति गमिं प्रति प्रशब्दस्योपसर्गत्वं नर्च्छतिं प्रतीति भवति प्रत्युदाहरणम्, वा सुप्यापिशलेरिति हि विकल्पः। 'स्यादिति'। तेनोत्तरार्थन्तप्रकरणमिति भावः। धातुग्रहणमनर्थकम्, उपसर्गेणैव धातोराक्षेपात्, यत्र चोपसर्गत्वं न संभवति तत्रोपसर्गग्रहणेन प्रादयोपि लक्ष्यन्ते, यथा नासिकाया नस्भावविधौ, इह तु मुख्यमेवोपसर्गत्वं संभवति तत्किं धातुग्रहणेनेत्यत आह। 'उपसर्गग्रहणादेवेति'। शाकल्यस्येदं शाकलम्, तस्य निवृत्त्यर्थं पुनर्धातुग्रहणं, सति तु धातुग्रहणे योगविभागेन पुनर्वृद्धिर्विधीयत इति शाकलं बाध्यते, असति तु तस्मिन् शाकल्यमतेन परत्वात् प्रकृतिभावः स्यादेव॥

"वा सुप्यापिशलेः"॥ सुबन्तस्य धातोरसंभवात्सुबित्येतद्धातोरवयवद्वारकं विशेषणमित्याह। 'सुबन्तावयवे धाताविति' आचार्यग्रहणेनैव पूजाविकल्पयोरपि सिद्धयोः पुनर्वाग्रहणमाचार्यग्रहणस्य प्राधान्येन पूजार्थताख्यापयितुं कृतम्॥

"ओतोम्शसोः"॥ 'गां पश्येति'। ननु चात्र गोतोणिदिति णित्त्वे सति परत्वाद्वृद्धौ कृतायामोकाराभावादात्वेन न भाव्यम्। आत्वविधानन्तु द्योशब्दार्थं स्यान्नहि तत्र णित्त्वमस्ति, गोत इतिवचनादित्यत आह। 'द्योशब्दोपीत्यादि'। सत्यं यदि तत्र णित्त्वं न स्यात्, अस्ति तु तत्रापि णित्त्वं गोत इत्यस्यौकारान्तोपलक्षणत्वात्, वर्णनिर्देशेषु तपरत्वप्रसिद्धेस्ततः किमित्याह। 'तेनेति'। 'शसा साहचर्यादिति'। सुप एव हि शसोत्र सम्भवो नान्यस्याचीत्यधिकारात्। 'अचिनवमसुनवमिति'। 'चिनोतेः सुनोतेश्च लङ् 'तस्थस्थमिपा' मित्यमि कृते विकरणस्य गुणावादेशौ॥

"एङि पररूपम्" ॥ इल प्रेरणे चुरादिः, ओखृ शाखृ इति भूवादौ पठ्येते 'के चिद्वा सुप्यापिशलेरित्यनुवर्तयन्तीति'। यद्येवन्तेन सहास्यैकवाक्यतायाम् असुब्धातुषु नास्य प्रवृत्तिः स्याद् इत्यत आह । 'तच्चेति'। अत्र व्याख्यानमेव शरणम् । 'शकन्ध्वादिष्विति'। शकन्ध्वादयः प्रयोगतोऽनुसर्तव्याः, तेषु पररूपं वक्तव्यम् । कुलटाया वा, कतन्तेभ्य इत्यादिनिर्देशोऽस्मिन्नर्थे लिङ्गम्, अन्धुः कूपः, बहूनि कुलान्यटति नैकस्मिन्कुले ऽवस्थितेति कुलटा. पचादिष्वयम्पठितव्यः, अन्यथा कर्मण्यण् स्यात् । 'एवे चानियोगइति'। नियोगोवश्यम्भावो, नियमोवधारणम्, ततोन्यत्रार्थे पररूपम्भवति, उदाहरणेऽनवक्लृप्तावेवशब्दः, यथा क्वेव भोक्ष्यसइति, अवधारणे तु वृद्धिरेव भवति, 'अमेवाव्ययेन' 'धातोस्तन्निमित्तस्यैव' इहैव संतस्वाय, ममैव हव्यान्यग्नइत्यादि, ओतुर्विडालः, 'तुन्वो र्वे निपातउपसंख्यानम्,' वीति सप्तमीनिर्देशात्तदादिविधिः, वकारादौ निपाते परतः तु नु इत्येतयोः पररूपम्भवति, तु वै त्वै अनुभूततमं चैकम्, नुवै न्वै, एक एवायं निपातः, अर्थाभेदात्, यदाह, न वा निपातैकत्वादिति । अत एव नैतद्वृत्तिकारेण पठितम् । सूत्रे पररूपग्रहणमुत्तरार्थम्, इह त्वेङीत्येव सिद्धम् एङि परत एकादेशो भवतीति । रूपग्रहणं चिन्त्यप्रयोजनम्, तथा चामि पूर्व इत्यत्र रूपग्रहणं न कृतम् ॥

"ओमाङोश्च" ॥ 'अद्योढेति'। आङ्नाङोरेकादेश आङ्ग्रहणेन गृह्यतइति भवत्युदाहरणम्, अत्र च धातूपसर्गयोः कार्यमन्तरङ्गमिति पूर्वमाद्गुणे कृते पश्चादद्यशब्देन संबन्धे वृद्धिः प्राप्नोति, एवमाङो रूपमविनष्टमद्य आगत इत्यादौ तत्र सवर्णदीर्घत्वेन सिद्धं रूपम् । 'अकः सवर्णे दीर्घत्वम्बाध्यतइति'। ननु च मध्येपवादन्यायेन वृद्धेरेव बाधो युक्तो न दीर्घत्वस्य, नैष दोषः । चकारोत्र क्रियते स पुनर्विधानार्थो भविष्यति ॥

"उस्यपदान्तात्" ॥ 'भिन्द्युरिति'। भिदेर्लिङ्, यासुट्, झेर्जुस् । श्नसोरल्लोपः, 'लिङः स लोपोनन्त्यस्ये' ति सलोपः, भिन्द्याउस् अनेन पररूपम् । 'अदुरिति'। दाञो लुङ्, गातिस्थेत्यादिना सिचो लुक्, आत इति झेर्जुस्, अदा उस् अनेन पररूपम् । 'कोस्रेति'। ननु चानर्थकत्वादेवास्यो-

सो ग्रहणं न भविष्यति, एवं तर्ह्येतज्ज्ञापयति अनर्थकस्याप्युसो ग्रहणमिति, तेन भिद्युरित्यादावप्युसि पररूपं भवति, अत्र हि यासुडादिः समुदायोऽर्थवान् न तु तदवयव उस्। 'कोषितेति'। वसेः क्तः, वसतिक्षुधोरिट्, यजादित्वात्संप्रसारणं, शासिवसिघसीनां चेति षत्वं, तस्यासिद्धत्वादुसि न पररूपम्भवति, अस्य तु लाक्षणिकत्वादेवाग्रहणं सिद्धम्। 'अबिभयुरिति'। भियो लङ्, शपः श्लुः, सिजभ्यस्तेत्यादिना झेर्जुस्, जुसि चेति गुणः॥

"अतो गुणे"॥ 'अकः सवर्णे दीर्घस्यापवाद इति'। ननु च मध्येपवादन्यायेन वृद्धेरेवायमपवादो युक्तो न दीर्घस्य, गुणग्रहणाद्दीर्घस्यापि बाधको भविष्यति, अन्यथा ऽतोपदान्तादित्येव वक्तव्यम्। एडीत्येव, ततो जुमि च, अपदान्तादित्येव, एवं सिद्धे गुणग्रहणाद्गुणमात्रेयं विधिः वर्तमानो दीर्घमपि बाधिष्यते। 'अत इति किमिति'। आदिति तैतएवेति प्रश्नः, तपरकरणे तात्पर्यमित्युत्तरम्॥

"अव्यक्तानुकरणस्यात इतौ"॥ 'अव्यक्तमपरिस्फुटवर्णमिति'। अपरिस्फुटा अनभिव्यक्ता अकारादयो वर्णा यस्मिन्तत्तथोक्तम्, यद्येवन्तदनुकरणेनापि तथाविधेनैव भाव्यम्, सदृशं ह्यनुकरणम्भवति, ततश्चानुकार्यइव तत्रापि नैवाच्छब्दोवधार्यते, अनवधारिते चाशक्यं पररूपं कर्त्तुं, तत्राह। 'तदनुकरणं परिस्फुटवर्णमेवेति'। अथ कथन्तर्हि तत्तेनानुक्रियते नहि विसदृशमनुकरणम्भवत्यतिप्रसङ्गादित्यत आह। 'केन चित्सादृश्येनेति'। तत्पुनः सादृश्यं ध्वनेस्तुल्यतया, तेन ह्यव्यक्तमनुकार्यमनुकरोति पुरुषः, अनुकरणं कर्तृ अव्यक्तं कर्मानुकरोति, करणस्य कर्तृत्वविवक्षयां कर्तृप्रत्ययः, अनुकरणशब्दस्तु करणसाधन एव। 'पररूपमेकादेशो भवतीति'। अच्छब्दस्यापि सर्वस्य नालोन्त्यस्य, नानर्थकेलोन्त्यविधिरितिवचनाज्ज्ञापकाच्च, यदयचाम्रेडितस्यान्त्यस्य तु वेति अन्त्यग्रहणङ्करोति तज्ज्ञापयति नात्रालोन्त्यपरिभाषा प्रवर्त्ततइति, किञ्च पूर्वापरसमुदाय एकादेशस्य स्थानीत्युक्तं, ततश्च तदेकदेशे पूर्वस्मिन् खल्वेतत्परिभाषाप्रवृत्तिः कीदृशीति चिन्त्यम्। 'पटदितीति'। प्रक्रियावाक्यमेतत्, न प्रयोगार्हं, पररूपस्य नित्यत्वात्। 'पटि-

तीति'। कथं पुनः पररूपे कृते तदनुकार्यस्य प्रतिपादकम्भवति, कुतश्च तस्या-नुकरणत्वं, नैष दोषः। यथा गवित्ययमाहेति कृतावादेशमपि गोशब्दस्या-नुकरणम्भवति शास्त्रवासनया तद्वदत्राऽपि भविष्यति[1]। 'दकारान्तानुकर-णमेतदिति'। तकारान्तानुकरणे तु रूपमेवैतन्न स्यात्, अपदत्वेन जश्त्वा-भावाद्यथा पटिति करोतीति ॥

"नाम्रेडितस्यान्त्यस्य तु वा"॥ अव्यक्तानुकरणस्याम्रेडितस्येति व्यधिकरणे षष्ठ्यौ, अव्यक्तानुकरणस्य यदवयवभूतमाम्रेडितन्तस्येत्यर्थः। 'नित्यवीप्सयोरिति द्विर्वचनमिति'। वीप्सायोगस्तु यथाकथञ्चिद् द्रष्टव्यः। अपर आह, नित्यवीप्सयोरित्युपलक्षणमेतत्, डाचि बहुलं द्वे भवत इत्यत्र बहुलवचनादन्यस्यापि द्विर्वचनमिति। 'यदा त्विति'। द्विरुक्तस्य समु-दायानुकरणस्य वार्थभेदो भवति ॥

"नित्यमाम्रेडिते डाचि"॥ वार्त्तिकमेवेदम्। वृत्तिकृता सूत्ररूपेण पठितम्। 'डाचि विवक्षितइति'। आशंसायां भूतवच्चेति भविष्यति क्तः, विधित्सितइत्यर्थः। अन्यथा डाजेव न स्यात्, द्व्यजवरार्धत्वाभावात्, तथा च डाज्विधावुक्तम्। 'यस्य च द्विर्वचने द्व्यजवरार्द्धता ततः प्रत्यय' इति, अष्टमे च वक्ष्यति डाचीति विषयसप्तमीति, डाचि विधित्सितएव द्विर्व-चनं क्रियतइत्यत्र प्रयोजनान्तरमाह। 'तच्चेति'। ह्यर्थे चः, तद्धि द्वि-र्वचनं टिलोपात्पूर्वमिष्यते, एवं च पूर्वं सिद्ध्यति, यदि डाचि विधित्सितएव द्विर्वचनम्भवति नान्यथा, यदि हि परभूते द्विर्वचनं स्यात्ततोऽन्तर-ङ्गत्वात्पूर्व टिलोपे कृते टकारान्तस्य द्विर्वचने पटपटेति न सिद्ध्येत्, यद्वा डाचि विहिते उत्पन्ने इत्यर्थः। ननु चोक्तं डाजेव न स्यादिति। नैष दोषः। द्व्यजवरार्द्धादिति भाविव्यपदेशोयम्। यस्य द्व्यजवरार्द्धता भविष्यति द्विर्वचने कृते तस्मादित्यर्थः। यदि डाचि विहितं द्विर्वचनं परत्वाट्टिलो-पप्रसङ्ग इत्युक्तन्तत्राह। 'तच्चेत्यादि'। डाचि बहुलमिति बहुलग्रहणाद् द्विर्वचने कृते टिलोप इत्यर्थः।

१ पटदिति करोतीत्येतन्निवृत्त्यर्थं चेदं वचनं, पटिति करोतीत्येकदेशानुकरणे-नापि सिद्धमिति ३ पु० अधिकम्।

"अकः सवर्णे दीर्घः" ॥ 'अगनयइति'। 'घेर्ङितीति' गुणे कृते दीर्घत्वप्रसङ्गः। 'दध्यत्रेति'। असति सवर्णग्रहणे यणादेशस्य दीर्घस्य च विषयविभागो न ज्ञायेत ततश्च पर्यायः स्यात्। 'कुमारी शेतइति'। ननु च तुल्यास्यप्रयत्नत्वे ऽपि सावर्ण्यमत्र नास्ति नाज्झलाविति प्रतिषेधादित्यत आह। 'नाज्झलावित्यत्रेति'। अणुदित्सवर्णस्य चाप्रत्यय इति ग्रहणकवाक्यन्तच्च नाज्झलावित्यस्य प्रवृत्तिसमये नाभिनिर्वृत्तं, तस्य हि सवर्णसंज्ञाङ्गं, तेन यावत्सा न प्रवर्त्तते तावदनभिनिर्वृत्तम्, सवर्णसंज्ञाऽपि स्वापवादे नाज्झलावित्यस्मिन्नप्रवृत्ते न प्रवर्त्तते, ततश्च पूर्वंनाज्झलावित्यस्य प्रवृत्तिः, पश्चात्सवर्णसंज्ञायाः प्रवृत्तिः, पश्चाद् ग्रहणकवाक्यस्येति एष क्रमः, तेन 'नाज्झला' वित्यत्रागृहीतसवर्णानामचां ग्रहणमिति इकारशकारयोः सावर्ण्यमप्रतिषिद्धम्, तस्मादचीत्यनुवर्त्यमिति। 'ऋति ऋ वावचनमिति'। मध्ये रेफभक्ती द्वे, आदितोऽन्ततोऽर्द्धमात्रा, एवमन्ततः, एवम् लृतीत्यत्रापि, मध्ये द्वे लकारभक्ती, अभितः पूर्ववत्, एवं द्विमात्रयोरप्येतयोरीषत्स्पृष्टत्वाद्विवृत्ताभ्यामृकारलृकाराभ्यामसावर्ण्यादग्रहणाद्दीर्घसंज्ञाया अभावाद्वचनम्। अर्द्धतृतीयमात्रत्वात्तत्कालत्वाभावादित्यन्ये, एतच्च सवर्णसंज्ञायाम्प्रपञ्चितम्। 'दीर्घपक्षे त्विति' ऋकारलृकारयोः समुदायः स्थानी, न च तस्यान्तरतमो दीर्घः संभवति, अतोवयवस्य योन्तरतमः स एव भवति, तत्रापि लृवर्णस्य दीर्घासंभवादृकारस्य योन्तरतमः स ॠकार एव भवति ॥

"प्रथमयोः पूर्वसवर्णः" ॥ 'प्रथमाशब्दो विभक्तिविशेषे रूढ इति'। सुपामाद्यत्रिके 'स पूर्वायाः प्रथमायाः' सप्तमीपञ्चमीप्रथमाश्च इत्यादौ तस्यैव ग्रहणात्। ननु च स्त्रीलिङ्गः प्रथमाशब्दस्तत्र रूढो न चास्य स्त्रीलिङ्गत्वे प्रमाणमस्ति प्रत्युत प्रथमशब्दस्तिङां त्रिकद्वये ऽस्मिन्नेव शास्त्रे संज्ञात्वेन विनियुक्त इति तस्यैव ग्रहणं युक्तं, ततश्च पचति, पचतः, पचन्ति। पचते, पचेते, पचन्ते, चकार, चक्रतुः, चक्रुः, चक्रे, चक्राते, चक्रिरे, इत्यादौ यथाप्राप्तविध्यन्तरबाधेनायं विधिर्युक्तः। किं चैवं सति मुख्येपि प्रथमशब्दे प्रथमयोरिति द्विवचनमुपपद्यते, आत्मनेपदपरस्मैपदभेदेन

प्रथमस्य भेदात् । उच्यते । एवं सति द्विवचननिर्द्देशोऽनर्थकः, लुटः प्रथमस्येत्यादिवत्सिद्धत्वात् । यद्वा वा सुप्यापिशलेरित्यतः सुपीत्यनुवर्त्त-यिष्यते, तेन सुप एव प्रथमस्य ग्रहणं, लिङ्गाच्च, किं लिङ्गं, 'दीर्घाज्जसि च' 'तस्माच्छसो नः पुंसी'ति, अत एव लिङ्गात्सुपामप्यादितः प्रथम-योर्द्वयोर्ग्रहणन्न भवति, अचीत्यधिकाराच्च, नहि सुरजादिः, सुरपि कुण्डं तिष्ठतीत्यत्रावजादिः, नात्रायं विधिः प्राप्नोति, किं कारणम्, अमि पूर्वत्वेन बाध्यते, तस्मात् स्त्रीलिङ्गस्य ग्रहणमिति स्थितम् । तत्साहचर्याद् द्विती-यापि प्रथमेत्युक्तेति, द्विवचनञ्चात्र प्रमाणम् । ननु सकृच्छ्रुतः शब्दो मुख्य-वृत्तिरेव वा भवति जघन्यवृत्तिरेव वा न पुनरुभयवृत्तिः, प्रथमाद्वितीया-समुदाये जघन्यवृत्तिरेवायं, स च समुदाय उद्भूतावयवभेद इति द्विवचनो-पपत्तिः, यथा छत्रिणो गच्छन्तीति । 'वृक्षाः प्लक्षा इति' । नन्वत्राप्यतो गुणइति पररूपेण भवितव्यं, नाप्राप्ते विध्यन्तरे तस्यारम्भात् । स्यादेतत् । प्रथमयोरित्येतदपि दीर्घत्वन्नाप्राप्ते विध्यन्तरे आरभ्यमाणम् अग्नीइत्यादौ यथा यणम्बाधते तथा पररूपमपि बाधिष्यतइति, तन्न, स्वरसन्धिषु गुणयणावुत्सर्गौ, वृद्धिः सवर्णदीर्घत्वं पूर्वसवर्णादेशश्च तयोरप-वादा इति द्वितीयकक्षाप्राप्ताः, पररूपन्तु तृतीयकक्षाप्राप्तमिति तदेव प्राप्नोति । एवं तर्हि योगविभागः करिष्यते, प्रथमयोरिति, अकः सवर्णइत्येव, तेन वृक्षा इत्यादौ पररूपम्बाधित्वा प्रथमयो-रकः सवर्णे दीर्घत्वम्भविष्यति, यथैव तर्हि योगविभागः पररूपम्बाधते तथा वृक्षमित्यादावमि पूर्वमपि बाधेत, तस्य त्वग्निमित्यादिरवकाशः, नैष दोषः, अमि पूर्व इत्यत्रामीति विभज्यते, तत्र च पूर्वसवर्णदीर्घप्रतिषेधः प्रक्ल-तानुवर्त्तिष्यते, प्रथमयोरिति योगविभागेन प्राप्तं दीर्घत्वमपि न भवती-त्यर्थः, एवमपि तस्माच्छसो नः पुंसीत्यत्र तच्छब्देनानन्तरो दीर्घः परामृ-श्यते, एतान् गाश्चरतो बलीवर्द्दान्पश्येत्यत्रातोम्शसोरित्येकादेशान्माभू-दिति, ततः किं, योगविभागे क्रियमाणे अग्नीन् वायूनित्यादावेव नत्वं स्यान्न तु वृक्षानित्यादौ यत्र प्रथमयोरिति योगविभागाद् दीर्घो विधीयते, अयमप्यदोषः । तस्मादित्यनेनाकृस्यानिको दीर्घः परामृश्यते नानन्तरो

नापि दीर्घमात्रम्, एतच्चाक इत्यनुवृत्तेर्लभ्यते, मा भूद्वा योगविभागः प्रथमयोरिति, ननु चोक्तं वृक्षा इत्यादौ पररूपप्रसङ्ग इति, नैष दोषः । आचार्यप्रवृत्तिर्ज्ञापयति न जस्शसोः पररूपं भवतीति, यदयं नादिचीतीज्ग्रहणं करोति, अन्यथा अवर्णान्तस्य नास्त्येव दीर्घप्रसङ्ग इति किमिज्ग्रहणेन, केवलोत्तरार्थं हि तस्मिंस्तत्रैव कर्त्तव्यं स्यात्, यद्वा दीर्घाच्छसीत्येव ब्रूयात्, किमर्थमिदं, नियमार्थं, दीर्घाच्छस्येवेति, तेन जस्शसोर्न भविष्यति । वृत्तिकारस्तु यथोक्ते परिहारे प्रतिपत्तिगौरवप्रसंगाद्न्यायतः परिहारमाह । 'अतो गुण इति यदकारे पररूपमित्यादि' । न्यायं दर्शयति । 'पुरस्तादिति' । इतिकरणो हेतौ । 'अग्नी इत्यत्रेति' । असति हि पूर्वग्रहणे पूर्वसमुदायस्य स्थानिनोऽन्तरतमस्य दीर्घस्याभावादवयवान्तरतमो भवद् पूर्वस्यैवेति नियमकारणाभावात्परसवर्णोऽपि स्यात्, ततस्तन्निवृत्त्यर्थं, पूर्वग्रहणं तु विप्रतिषेधनिराकरणार्थम्, अन्यथा अग्नी इत्यत्र विप्रतिषिद्धमापद्यते, कथं, दीर्घ इति वर्तते, यदि पूर्वो न दीर्घो यदि दीर्घो न पूर्वः । ननु दीर्घग्रहणानुवृत्तिसामर्थ्यात् पूर्वशब्देन पूर्वाकृतिर्गृहीष्यते, कथं पुनः सामर्थ्यं, यावता यत्र पूर्वव्यक्तिर्दीर्घभूता कुमारीः पश्य भस्त्राः पश्येत्यादौ तत्रैव यथा स्यादग्नी इत्यादौ मा भूदित्येवमर्था दीर्घानुवृत्तिः स्यात्, यद्येतावत् प्रयोजनं स्याद् दीर्घाच्छसि पूर्वाम चेति ब्रूयात्, यतस्तु खलु प्रथमयोरित्यारभ्यते ततो ज्ञायते न केवलं कुमारीः पश्येत्यादौ दीर्घस्यैव प्रथमयोरित्यनेन दीर्घो विधित्सितः किं तर्ह्यग्नी इत्यादावपीति, तच्चाकृतिविवक्षायामुपपद्यते, सत्यं, तदेव सवर्णग्रहणेनापि विस्पष्टीक्रियते । 'त्रिमात्रे स्थानिनि त्रिमात्रादेशनिवृत्त्यर्थमिति' । आन्तरतम्यात् त्रिमात्र एव प्राप्नोति, यत्र प्लुताप्लुतप्रसङ्गः स एव प्लुतश्च विषये स्मृत इत्यस्य विषयः, इह तु प्लुतस्यैव प्रसङ्ग इति नायमस्य विषयः ॥

"तस्माच्छसो नः पुंसि" ॥ तस्मादित्यनेनानन्तरः पूर्वसवर्णदीर्घो निर्द्दिश्यत इत्याह । 'तस्मात्पूर्वसवर्णदीर्घादिति' । 'उत्तरस्य शसोवयवस्येति' । उत्तरस्येत्येतच्छसवयवस्य विशेषणं, तस्मादुत्तरो यः शसोवयवस्तस्येति न तु शसः, असंभवात्, नहि पूर्वसवर्णदीर्घात् परः क्व चिच्छस्

संभवति, अन्तादिवद्भावोऽपि न भवति, उभयत आश्रयणात्, अत एवानुपात्तमप्यवयवस्येति लभ्यते । बहुषु बहुवचनमित्यत्र त्रिकं प्रातिपदिकार्थ इत्युक्तं, तेन पुंसीत्येतत्प्रकृतिविशेषणं, पुंशब्दात् परस्य शसोऽवयवस्येति, यद्येवं वृत्तानित्यादिकं पदं नकारान्तमुदाहरणमुपपद्यते, षण्ढकषण्ढकशब्दाविह लोकप्रसिद्धया नपुंसके वर्त्तमानावपि पुंस्त्वानुगतमेवार्थमाहतुः, यथा कुमार्यादिषु वर्त्तमानोऽर्थशब्दः, सामान्यविशेषा एव स्त्रीत्वादयो न पुनस्तनादयः । स्त्रीसूत्रे चैतदुपपादितम् । स्थूरकानित्यादि तूदाहरणद्वयमयुक्तम् । कथं, स्थूरकाया अपत्यानि अररकाया अपत्यानि 'गर्गादिभ्यो यञ्, बहुषु लुक्, स्त्रीप्रत्ययस्यापि लुक् तद्धितलुकीति लुक्, स्थूरक अररक इत्येतौ स्त्रीशब्दौ, ताभ्यां परोऽत्र शस् भवति न तु पुंशब्दाभ्यामित्यत आह । 'सर्वएतइति' । न केवलं वृत्तादयोऽपि त्वेतावपीति सर्वशब्दस्यार्थः, लुप्तेपि प्रत्यये प्रकृतिरेव तदर्थे वर्त्तते. प्रत्ययार्थश्चात्रायमन्यरूपः । 'पुंस्त्वविशिष्टइति । स्त्रीवाचकत्वेन प्रसिद्धावप्येतावस्मिन् प्रयोगे पुंशब्दाविति भावः । यद्येवं चञ्चेव चञ्चाः पुमांस इतीवे प्रतिकृताविति कनो लुम्मनुष्य इति लुपि कृते प्रकृतिरेव चञ्चाशब्दः पुंस्त्वविशिष्टं प्रत्ययार्थमस्मिन् प्रयोगआहेति नत्वप्रसङ्ग इत्यत आह । 'इह त्वित्यादि' । प्रत्ययार्थोपि नैवात्र पुंस्त्वविशिष्टः किं तर्ह्यतिदेशात् स्त्रीत्वविशिष्ट इत्यर्थः । 'तस्मादिति किमिति' । प्रकृतस्य दीर्घग्रहणस्य पञ्चम्या विपरिणामात्सिद्धमिति प्रश्नः । 'एतान् गाः पश्येति' । औतोम्शसोरित्यात्वमेकादेशः, एकः पूर्वपरयोरिति महाप्रकरणं, ततश्च तद्विषयमेव नत्वं स्यादिति मन्यते । नन्वेवं षत्वतुकोरसिद्ध इति च तत्रैव कर्त्तव्यं शसो नः पुंसीति, इह तु प्रकरणादनन्तरमेवोपजीविष्यते, तदेव तर्हि तस्माद्ग्रहणेन विस्पष्टयते ॥

"नादिचि" ॥ 'खट्वे इति' । औङ आप इति औङः शीभावः, कुण्डे इत्यत्रापि न पुंसकाच्चेति ॥

"दीर्घाज्जसि च" ॥ आदिति नानुवर्तते, चकारेणेचेत्यनुकर्ष्यसामर्थ्यादन्यथा पूर्वणेव दीर्घादप्यवर्णादिचि सिद्धः प्रतिषेध इति किं

तदनुवृत्त्यर्थेन चकारेण, दीर्घग्रहणं किं, यावता ऋवर्णस्य ऋतो ङिसर्वनामस्थानयोरिति गुणविधानान्नातिप्रसङ्गः, एवमिदुतोरपि जसि चेति गुणो विधीयते, इह तर्हि वृत्ताः अग्नी वायू इति, ह्रस्वादपि प्रतिषेधः स्यात्, नैष दोषः। नादिचीत्येतन्नियमार्थं भविष्यति, अदृश्यमाणविशेषत्वाच्चोभयथानियमः, आदिच्येवादेवेचीति, तत्राद्येन नियमेन वृत्ता इत्यादि सिद्धं, द्वितीयेनाग्नी वायू इत्यादि, यद्येव तर्ह्यग्नी वायू इत्यादौ निषेधो न भवति एवं कुमार्यौ वध्वावित्यादावपि न स्यात्, तस्माद् दीर्घादिति वक्तव्यम्, जस्ग्रहणं शस्निवृत्त्यर्थम् अन्यथा कुमारीः पश्य वधूः पश्येत्यादौ शस्यपि प्रतिषेधः स्यात्, ज्ञापकान्न भविष्यति, यदयं तस्माच्छसो नः पुंसीति पुंग्रहणं करोति तज्ज्ञापयति न शसि प्रतिषेधो भवतीति, तद्धि नपुंसके सवर्णदीर्घत्वासम्भवात् स्त्रीनिवृत्त्यर्थं कृतम्, यदि च स्त्रियामप्ययं कुमारीः पश्येत्यादौ शस्यपि प्रतिषेधः स्यात्तदा पूर्वसवर्णदीर्घत्वाभावादेव नत्वं न भविष्यति किं पुंग्रहणेन, नैतदस्ति ज्ञापकं, ह्रस्वान्तं यत् स्त्रीलिङ्गं तदर्थमेतत् स्यात् कृतीः पश्य धेनूः पश्येति, तस्माज्जसि चेत्येतदपि वक्तव्यमेव।

"वा छन्दसि"॥ 'मारुतीरिति'। मरुतो देवता आसामिति सास्य देवतेत्यण्, ङीप्, जसि पूर्वसवर्णदीर्घत्वम्। 'वाराहीति'। वाराहस्य विकार इति० अवयवे च प्राण्योषधिवृक्षेभ्य इति प्राणिरजतादिभ्योऽञ्, ङीप्, द्विवचने पूर्वसवर्णदीर्घः, उपानहौ विशेष्ये॥

"अमि पूर्वः"॥ दीर्घादिति नानुवर्त्तते आरम्भसामर्थ्यात्। 'पूर्वग्रहणमित्यादि'। यः पूर्वः श्रुतः स एव यथा स्यात्, कः पुनरन्यः प्राप्नोति तत्राह। 'पूर्वसवर्णो दीर्घो मा भूदिति'। क्व चित्तु समासः पठ्यते, स कर्मधारयो द्रष्टव्यः, एतदुक्तं भवति, असतीह पूर्वग्रहणे प्रकृतं पूर्वग्रहणमनुवर्त्यम्, तस्मिंश्चानुवर्त्तमाने तत्संबद्धं सवर्णग्रहणमप्यनुवर्त्यम्, ततश्च पूर्वस्य यः सवर्णः स एवान्तरतमः प्रसज्येत, तत्र को दोषः, न तावद्वृक्षमित्यादौ द्विमात्रस्य स्थानित्वेन द्विमात्रप्रसङ्गः, वचनसामर्थ्यात्प्रथमयोः पूर्वसवर्ण इत्येव दीर्घस्य सिद्धत्वादत आह। 'कुमारीमित्य-

चेति'। 'वा छन्दसीत्येवेति'। एतच्च वाक्यभेदेन संबध्यते, अन्यथा भाषायां न स्यात्। 'शम्यं चेति'। विकल्पविधानसामर्थ्यात्पूर्वत्वाभावे पूर्वसवर्णदीर्घोऽपि न भवति, तयोरत्र विशेषाभावादिति यणादेश एव भवति ॥

"संप्रसारणाच्च"॥ 'संप्रसारणविधानसामर्थ्यादिति'। कथं पुनः सामर्थ्यं, यावता संहितायां यण् विधीयते ऽसंहितायां संप्रसारणं चरितार्थं, नैतदस्ति, संहितैकपदे नित्येतिवचनात्। 'वा छन्दसीत्येवेति'। पूर्ववद्वाक्यभेदेन संबन्धः। 'यज्यमानइति'। नन्विदानीमेवोक्तं विगृहीतस्य श्रवणं प्राप्नोति तत्कथमत्र यणादेशो ऽत आह। 'पूर्वत्वविधाने हीति'। सत्यमनारब्धे पूर्वत्वे विगृहीतश्रवणं प्राप्नोति संप्रसारणविधानं व्यर्थं मा भूदिति, पूर्वत्वविधाने हि सति तत्प्रतिपत्तिविषये ऽर्थवत्संप्रसारणमिति पूर्वत्वाभावपक्षे यणादेशो भवत्येव, 'संप्रसारणपूर्वत्वे समानाङ्गग्रहणं', यस्मिन्नङ्गे संप्रसारणमवस्थितं तदन्तर्भूतो यो ऽच् तेनैव सह यथा स्यादिह मा भूच्छकहूौ शकहूर्थमिति, शकान् ह्वयतीति क्विपि यजादित्वात्संप्रसारणं, योऽन्त्यो धातोराकारः तस्मिन्नेवाङ्गेऽन्तर्भवति तस्य तावत्पूर्वत्वं, विभक्त्यौकारोर्थशब्दाकारश्च न तस्मिन्नङ्गेऽन्तर्भवत इति तयोः पूर्वत्वं न भवति, अत्र परिहारः यणः स्थाने य इक् स संप्रसारणम्, एकादेशस्तु न यण्स्थानिकः, वर्णाश्रयत्वाच्चान्तादिवद्भावो ऽपि नास्ति, एवं पूर्वत्वमेव तावन्न संप्रसारणम्, किं पुनस्तत्स्थानिक ऊकार इति पूर्वैकादेशाभावः, सम्प्रसारणदीर्घत्वे तु वचनसामर्थ्यादेकादेशस्य पूर्वं प्रत्यन्तवद्भावात् संप्रसारणव्यपदेशः। वृत्तिकारस्तु संप्रसारणत्वमभ्युपेत्य परिहारान्तरमाह। 'अन्तरङ्गे चेति'। देशतो विप्रकर्षात्र बाह्यत्वेनोपवर्णितः, कालतो विप्रकर्षस्तु पश्चादुपनिपाततः, धातावनन्तर्भावकृतं बाह्यत्वं पश्चादुपनिपातस्तु स्पष्ट एव ॥

"ङसिङसोश्च"॥ 'एङ उत्तरयोरिति'। एङ उत्तरौ यौ ङसिङसौ तयोर्यः सम्बन्ध्यकारस्तस्मिन् परत इत्यर्थः। 'अग्नेरागच्छति अग्नेः स्वमिति'। यद्यपि द्वावेङौ ङसिङसावपि द्वावेव तथापि यथासङ्ख्यं

न भवति, नह्यत्र ङसिङसोः कार्यं विधीयते किं तर्हि तत्सम्बन्धिन्यति, स चैक एव, अथापि सम्बन्धिभेदेन तस्य भेदः स्यादेवमपि न दोषः, ईदग्नेः सोमवरुणयोः, धातोरित्यादिनिर्देशात् ॥

"ऋत उत्" ॥ 'द्वयोः षष्ठीनिर्दिष्टयोरित्यादि' । न्यायप्राप्तिप्रदर्शनमेतत्, न पुना रपरत्वे ऽक्रियमाणे किंचिदनिष्टम्, ऋत इति तपरकरणं दीर्घनिवृत्त्यर्थम्, 'उत्योर्ग्रहः' प्रे स्त्राऽयज्ञे, इत्यादौ न भवति । उत इत्यपि तपरकरणं दीर्घनिवृत्त्यर्थमेव, आन्तर्यतो हि द्विमात्रस्य द्विमात्र एव प्राप्नोति । ननु भाव्यमानोण् सवर्णान्न गृह्णातीति, एवं तर्ह्येतज्ज्ञापयति भाव्यमानोप्युकारः सवर्णान् गृह्णातीति, तेनामूभ्यामित्यत्रादसोसेर्दादु दो म इति दीर्घस्य दीर्घ ऊकारो भवति । इह गम्लृप्रभृतिभ्यो ङसिङसोः कृतयोः ऋकारलृकारयोः सवर्णसंज्ञाविधानादस्मिन्नुत्वे लपरत्वे च कृते संयोगान्तलोपे गमुलिति रूपं भवति ॥

"ख्यत्यात् परस्य" ॥ 'खिशब्दखीशब्दयोरित्यादि' । यणादेशे कृते तुल्यरूपत्वाद् द्वयोरपि ग्रहणम्, एतदर्थमेवागन्तुकेनाकारेण यणादेशं कृत्वा विकृतनिर्देशः कृतः, अन्यथा खित्योरिति ह्रस्वयोर्ग्रहणे दीर्घयोर्न स्यात्, दीर्घयोर्ग्रहणे ह्रस्वयोर्न स्यात्, विकृतनिर्देशे तु द्वयोरपि भवति, अकारान्तयोस्तु मुख्यापत्यादिवर्त्तिनोर्ग्रहणं न भवति, 'सख्यु र्यः' 'पत्युर्नो' 'आपत्यस्य चे' त्यादिनिर्देशात् । 'सखीयतेः क्विप् सखीरिति' । ननु चाल्लोपस्य स्थानिवद्भावाद्यणा भाव्यं, तत्र कृते यलोपे स्थानिवत्त्वनिषेधादादिष्टादचः पूर्वत्वाच्च पुनः स्थानिवत्त्वाभावाल्लोपो व्योर्वलीति यलोपे सख्युरित्यादि न सिद्ध्यति । नैतदस्ति । क्वौ लुप्तं न स्थानिवदिति स्थानिवत्त्वनिषेधात् । विकृतनिर्देशस्य प्रयोजनान्तरमप्याह । 'विकृतनिर्देशादिति' । 'अतिसखेरिति' । अतिक्रान्तः सखा येनेति बहुव्रीहिः, यद्वा शोभनः सखा अतिसखा, न पूजनादिति समासान्तनिषेधः, अथ स एव यणादेशोऽत्र कस्मान्न भवति, घेर्ङितीति गुणेन बाधितत्वादिति चेत्,

सुधाकरस्तदपाणिनीयम्, संज्ञायामर्घमेघनिदाघावदाघा इति न्यङ्क्वादौ पठित्वा दहतेर्घञि व्युत्पादनात् । तथा च तत्र वृत्तिः, अपूर्वस्य निपूर्वस्य च दहेरिति ॥ २७ ॥

चमु भक्षणे ॥ चम्नोतीत्यादि ॥ २८ ॥

रि क्षि चिरि जिरि दाश दृ हिंसायाम् ॥ रिणोति । क्षिणोतीत्यादि । अयं भाषायामपीत्यात्रेयमैत्रेयादयः । प्रयुज्यते च । इमां हृदि व्यायतपातमक्षिणोत् । न तद्यशः शस्त्रभृतां क्षिणोति । पञ्चबाण[1]: क्षिणोतीति । शाकटायनादयस्तु छान्दसत्वमेवाहुः । केचित्तु दुङमपि पठन्ति, दुनुते इति । यदाह दुर्गः । तिक तिग षघ रि क्षि चिरि जिरि दाश दृ दुङ् हिंसायां, छान्दसाश्चामी [2]परस्मैभाषा उदात्ता इति ॥ ३४ ॥

वृत् ॥ स्वादयो वृत्ता इत्यर्थः ॥

इति पूर्वदक्षिणपश्चिमसमुद्राधीश्वरश्रीकम्पराजसुतसङ्गमहाराजमहामन्त्रिणा मायणसुतेन माधवसहोदरेण सायणाचार्येण विरचितायां माधवीयायां धातुवृत्तौ स्वादयः संपूर्णाः ॥

१ पञ्चबाणैरिति ४ पु॰ पाठस्तत्र समासश्चिन्त्यः ।
२ परस्मैभाषा उदात्ता इति ४ पु॰ नास्ति ।

अथ तुदादयः ॥

तुद व्यथने ॥ तुदति । तुदतः । तुदन्ति । तुदसि । तुदथः । तुदथ । तुदामि । तुदावः । तुदामः । 'तुदादिभ्यः श'इति शब्विषये शः । तुदती, तुदन्ती स्त्री । तुदती कुले । तुदन्ती कुले 'आच्छीनद्योर्नुमि'ति शत्रन्तस्य शीनद्योर्नुम्विकल्पः । तुदते । तुदन्ते । तुदसे । तुदेथे । तुदध्वे । तुदे । तुदावहे । तुदामहे । तुतोद । तुतुदतुः । तुतोदिथ । तुतुद । तुतोद । तुतुदिव । तुतुदे । तुतुदाते । तुतुदिरे । तुतुदाथे । तुतुदिध्वे । तुतुदे । तुतुदिवहे । क्रादिनियमादिट् । तोत्ता । तोत्स्यति । तोत्स्यते । तुदतु । तुदतात् । तुदताम् । तुदन्तु । तुद । तुदतात् । तुदतं, तुदत । तुदानि । तुदाव । तुदतां, तुदेताम् । तुदन्ताम् । तुदस्व । तुदेथां, तुदध्वं, तुदै । तुदावहै । अतुदत् । अतुदः । अतुदम् । अतुदत । अतुदथाः । अतुदे । तुदेत् । तुदेतां, तुदेयुः । तुदेः । तुदेयं, तुदेत । तुदेयातां, तुदेरन् । तुदेथाः । तुदेय । तुदेवहि । आशिषि तुद्यात्, तुद्यास्ताम् । तुत्सीष्ट । तुत्सीयास्तां, 'लिङ्सिचावात्मनेपदेष्वि'ति कित्त्वान्न गुणः । अतौत्सीत् । अतौत्ताम् । अतौत्सीः । अतौत्सम् । 'वदव्रजे'ति वृद्धिः । 'झलो झली'ति सिचो लोपः । अतुत्त । अतुत्सातां, तुतुत्सति । तुतुत्सते । 'हलन्ताच्चे'ति सनः कित्त्वम् । तोतुद्यते । तोतुदीति । 'नाभ्यस्तस्ये'ति गुणनिषेधः । तोतोत्ति । लघूपधगुणः । तोदयति । अतूतुदत् । तिलंतुदः । 'वातशुनी'त्यादिना खश् । विधुंतुदः । अरुंतुदः । 'विध्वरुषोस्तुद'इति खश् । 'अरुर्द्विषदजन्तस्ये'ति मुम् । 'संयोगान्तस्ये'त्यरुषः सकारस्य लोपः । तोत्रम् 'दाम्नी'त्यादिना करणे ष्ट्रन् । प्रतोदः । 'हलश्चे'ति संज्ञायां करणे घञ् । तुत्त्वा । तुन्नः, तुन्नवान् । 'रदाभ्यामि'ति निष्ठानत्वम् । तुद्यम् । 'पातृतुदिवचिरिचिसिचिभ्यस्थगि'ति थक् ॥ १ ॥

णुद प्रेरणे ॥ प्रणुदते । प्रणुदति इत्यादि तुदिवत् । 'उपसर्गादसमासेपी'ति णत्वम् । नुत्त्वा । नुत्तः । नुन्नः । नुत्तवान् । नुन्नवान् । 'नुदविदे'ति नत्वविकल्पः । काकुर्जिह्वा सास्मिन्नुद्यते इति काकुदं

तालु । 'घञर्थे कविधानमि' ति कः । पृषोदरादित्वात्तुशब्दलोपः पररूपं च । शोकापनुदः । 'तुन्दशोकयोः परिमृजापनुदोरि' त्यनयोः कर्मण्युपपदयोः परिमृजापनुदोः कप्रत्ययः । कर्मण्यणोपवादः । अयं च शोकमपनुद्य सुखस्याहर्त्तरि, 'आलस्यसुखाहरणयोरिति वक्तव्यमि' ति वचनात् । यस्तु दुःखमेकमपनुदति सुखं नाहरति तत्रापि शोकापनोद इति भवति । अयं परस्मैपदिष्वपि पठ्यते । तेनायं भाषायां परस्मैपद्येवेति वर्द्धमानः । स्वाम्यपि तथा परस्मैपदिष्वेवामुं पपाठ । उभयमात्रेयमैत्रेयाद्यनेकव्याख्यानविरुद्धम्, यदाहुरुभयपदिषु पठितस्यास्य पुनः परस्मैपदिषु पाठः कर्त्रभिप्रायेपि परस्मैपदार्थ इति ॥ २ ॥

दिश अतिसर्जने ॥ दिशति । दिशते । दिदेश । दिदेशिथ । दिदिशिव । दिदिशे । दिदिशिरे । दिदिशिषे । दिदिशिवहे । देष्टा । देक्ष्यति । देक्ष्यते । 'व्रश्चा' दिना षत्वे 'षढोः कस्सी' ति कत्वं, दिशतु । दिशताम् । अदिशत् । अदिशत । दिशेत् । दिशेत । आशिषि दिश्यात्, दिक्षीष्ट । अदिक्षत् । अदिक्षताम् । अदिक्षन् । अदिक्षः । अदिक्षत । अदिक्षाताम् । अदिक्षथाः । अदिक्षि । अदिक्षावहि । 'शल इगुपधादि' ति क्सः, 'क्सस्याची' त्यल्लोपः । दिदिक्षति । दिदिक्षते । 'हलन्ताच्चे' ति कित्त्वम् । देदिश्यते । देदिशीति । देदेष्टि । देशयति । अदीदिशत् । दिक् । दिशौ । दिशः । 'ऋत्विगि' त्यादिना क्विनि 'क्विन्प्रत्ययस्य कुरि' ति कुत्वं द्वितीयः, पदान्ते तस्य जश्त्वं गकारः, 'वावसान' इति चर्त्वं ककारः । न च कुत्वं जश्त्वे पूर्वत्रासिद्धं, 'दिगादिभ्यो यदि' ति निर्देशात् । नापि कुत्वं व्रश्चादिषत्वे ऽसिद्धम् । षत्वापवादत्वात्तस्य । प्रतिदिशम् । वीप्सायामव्ययीभावः । 'अव्ययीभावे शरत्प्रभृतिभ्य' इति टच् समासान्तः । दिशा । आपं चापि हलन्तानामिति भागुरिवचनाद् टाप् । दिशि भवं दिश्यम् । 'दिगादिभ्यो यदि' ति यत्, नामादेशं युध्यते । 'नाम्न्यादिशिग्रहोरि' ति द्वितीयान्ते नाम्न्युपपदे आदिशेर्धातुसंबन्धे णमुल् । वाक्यं समासो वा स्तु, 'तृतीयाप्रभृतीनी' ति समासो विकल्प्यते । नामादिश्य युध्यतइति त्वापि

भवति । उक्तं हि । 'तृतीयाप्रभृतीनी'त्यत्र वृत्तौ सर्वत्रैवास्मिन् णमुल्प्रकरणे क्रियाभेदे सति वासरूपविधिना क्त्वापि । दिष्टं, क्तः । दैष्टिकः । 'अस्तिनास्तिदिष्टंमति'रित्यस्त्यादिभ्यो मत्युपाधिभ्यो ऽस्येत्यर्थे ठक्, प्रमाणानुपातिनी यस्य मतिरस्ति स दैष्टिक इति वृत्ति, एतच्चाभिधानस्वभावाल्लब्धम् । दिष्टिः । संज्ञायां क्तिच् । दिशति तमिति देशः । 'अकर्तरि च कारक'इति कर्मणि घञ् । प्रादेशः । 'हलश्चे'ति संज्ञायां करणे घञ् । 'उपसर्गस्य घञी'ति दीर्घः । प्रादेशिनी । णिनिः ॥ ३ ॥

भ्रस्ज पाके ॥ भृज्जति । भृज्जसि । भृज्जामि । भृज्जते । भृज्जसे । भृज्जे । शस्य 'सार्वधातुकमपिदि'ति ङित्त्वा'द्ग्रहिज्या'दिना संप्रसारणम् । पररूपत्वम् । 'झलां जश् झशी'ति सकारस्य दकारस्तस्य श्चुत्वं जकारः । न च श्चुत्वे दत्त्वमसिद्धम् । भृज्जतीनामिति निर्देशादिति व्याख्यातारः । यद्वा जश्त्वस्यासिद्धत्वात्सकारस्यैव श्चुत्वे शकारस्तस्य 'झलां जश् झशीति' जश्त्वेन जकारे ऽपि रूपं सेत्स्यति । बभर्ज्ज । बभर्ज्जतुः । बभर्ज्जुः । बभर्ज्जिथ । बभर्ष्ठ । बभर्ज्जथुः । बभर्ज्जिव । बभर्ज्ज । बभर्ज्जाते । बभर्ज्जिरे । बभर्ज्जिषे इत्यादि । क्रादिनियमादिट् । थलि भारद्वाजनियमाद्विकल्पः । 'भ्रस्जोरोपधयो रमन्यतरस्या'मित्यार्द्धधातुके रेफोपधयोर्निवृत्तिः । रमागमश्च विकल्पेन । आगमे ऽकार उच्चारणार्थः । अन्यदा बभ्रज्ज । बभ्रज्जतुः । बभ्रज्जुः । बभ्रज्जिथ । बभ्रष्ठ । बभ्रज्जथुः । बभ्रज्ज । बभ्रज्जिव । बभ्रज्जे । बभ्रज्जाते । बभ्रज्जिरे । बभ्रज्जिषे, इत्यादि । भर्ष्टा । भ्रष्टा । रमभावे स्कोरिति सकारस्य लोपः । 'व्रश्चा'दिनोभयत्र जकारस्य षत्वे ष्टुत्वम् । भर्क्ष्यति । भर्क्ष्यते । भ्रक्ष्यति । भ्रक्ष्यते । रमभावे स्कोरितिसलोपः । सर्वत्र व्रश्चादिषत्वे 'षढोः कः सी'ति कत्वम् । भृज्जतु । भृज्जताम् । अभृज्जत् । अभृज्जत । भृज्जेत् । भृज्जेयुः । भृज्जेत । भृज्जेयाताम् । भृज्जेरन् । आशिषि भृज्ज्यात् । भृज्ज्यास्ताम् । यासुटः कित्त्वात्संप्रसारणम् । रमागमश्चानेन पूर्वविप्रतिषेधेन बाध्यते । भर्क्षीष्ट । भर्क्षीयास्ताम् । भ्रक्षीष्ट । भ्रक्षीयास्तामित्यादि । रमागमतदभावयोः सलोपादि पूर्ववत् । अभार्क्षीत् । अभार्ष्टाम् । अभार्क्षुः ।

अभार्क्षीः । अभार्ष्टम् । अभार्ष्ट । अभ्राक्षीत् । अभ्राष्टाम् । अभ्राक्षुरित्यादि । 'वदव्रजे'ति वृद्धिः । झलि सिचो लोपे सकारस्याभावात् 'षढोः कः सी'ति न भवति । अभर्ष्ट । अभर्क्षाताम् । अभर्ष्ठाः । अभर्क्षाथाम् । अभर्ड्ढ्वम् । अभर्क्षि । अभर्क्ष्वहि । अभ्रष्ट, अभ्रक्षातामित्यादि पूर्ववत् । यथायोगं सलोपषत्वकत्वानि, यत्र न सिचो लोपस्तत्र कात्परत्वा'दादेशप्रत्यययो'रिति षत्वम् । बिभर्क्षति बिभर्जिषति बिभ्रक्षति, बिभ्रज्जिषति 'सनीवन्ते'त्यादिनेड् विकल्पः, तङि बिभर्क्षते इत्यादि चातूरूप्यम् । बरीभृज्ज्यते, आशीर्लिङ्वदत्रापि रोपधलोपात्पूर्वविप्रतिषेधेन संप्रसारणमेव भवति, अभ्यासस्योरदत्वे 'रीगृत्वत' इति रीक् । 'भ्रस्जोरोपधयो'रितिलोपोऽभ्यासस्य न भवति । तत्रोपदेशग्रहणानुवृत्तेः । बाभ्रष्टीत्यादि । अत्र यङो लुप्तत्वात्तिपा निर्देशाद्वा न संप्रसारणम् । अत एव लुका लुप्तत्त्वादार्धधातुकपरत्वाभावाद् रोपधयोर्लोपो ऽपि न भवति । भर्ज्जयति । अबभर्ज्जत् । भ्रज्जयति । अबभ्रज्जत् । भर्ग्यः । भ्रज्ज्यः । ण्यति रोपधलोपे 'चजोः कुघिण्ण्यतो'रिति कुत्वम् । लोपाभावे तु जश्त्वात्पूर्वं 'पूर्वत्रासिद्ध'मिति 'चजो'रिति कुत्वेन जकारस्य गकारे पश्चात् सकारस्य जश्त्वेन दकारः । भर्गः, भ्रद्गः । घञ्, पूर्ववत् प्रक्रिया । भर्गस्यापत्यं भार्गायणः, । 'भर्गात्त्रैगर्ते' इति फञ्, त्रैगर्तादन्यत्रा 'त इञि'तीञि भार्गिः । भ्रष्टः, भ्रष्टवान् । भृगुः । 'प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्चे'त्युप्रत्ययः संप्रसारणसलोपौ च 'न्यङ्क्वादीनाञ्चे'ति कुत्वम् । भृगोरपत्यं भार्गवः । 'ऋष्यन्धकवृष्णी'त्यण्, बहुत्वे भृगवः । 'अत्रिभृगिव'त्यादिना ऽणो लुक् । भ्राष्ट्रम् । 'भ्रस्जिगमी'त्यादिना ष्ट्रन् वृद्धिश्च । भर्जतइति शपि ॥ ४ ॥

क्षिप प्रेरणे ॥ क्षिपति, क्षिपते । अभिक्षिपति । प्रतिक्षिपति । अतिक्षिपति । 'अभिप्रत्यतिभ्यः क्षिप' इति क्रियाफलस्य कर्तृगामित्वे ऽपि परस्मैपदम् । इदञ्च शुद्धे कर्तरीति कर्मकर्तरि तङ् भवति अभिक्षिप्यतइति । चिक्षेप । चिक्षेपिथ । चिक्षिपिव । चिक्षिपे । चिक्षिपिषे । क्षेप्ता । क्षेप्स्यति । क्षेप्स्यते । क्षिपतु । क्षिपताम् । अक्षिपत् । अक्षिपत ।

त्विपेत् । त्विपेत। त्विप्यात् । त्विप्सीष्ट । अत्वेप्सीत् । अत्वेप्ताम् । अत्विप्त। अत्विप्साताम् । 'लिङ्सिचावात्मनेपदे'ष्विति किन्त्वाच्च गुणः । चित्विप्सति। चित्विप्सते । 'हलन्ताच्चे'ति सनः कित्त्वम् । चेत्विप्यते । चेत्विपीति । चेत्वेप्ति । त्वेपयति । अचित्विपत् । क्षतः त्विप्यतिवदेव ॥ ५ ॥

कृष विलेखने ॥ कृषति । कृषते । चकर्ष । चकृषतुः । चकृषिथ । चकर्ष । चकृषिव । चकृषे । चकृषाते । चकृषिषइत्यादि । क्रष्टा। कर्ष्टा। क्रक्ष्यति। कर्क्ष्यति। क्रक्ष्यते। कर्क्ष्यते। झल्यकित्य'नुदात्तस्य चर्दुपधस्ये'ति पाक्षिके ऽमागमे यणादेशः । कृषतु । कृषताम् । अकृषत् । अकृषत । कृषेत् । कृषेताम् । कृषेत । कृषेयाताम् । आशिषि । कृष्यात् । कृक्षीष्ट । 'लिङ्सिचावात्मनेपदेष्वि'ति कित्त्वान्नामागमो नापि गुणः । अकृक्षत् । अकृक्षताम् । अकृक्षन् । अकृक्षत । अकृक्षाताम् । अकृक्षन्त । 'क्सस्याची'-त्यल्लोपः । अजादौ 'शल इगुपधादि'ति क्सः । अक्रार्क्षीत् । अकार्ष्टाम् । अक्रार्क्षुः । अकृष्ट । अकृक्षाताम् । अकृक्षत । 'स्पृशमृषकृषे'ति पक्षे सिच् । झलि तस्य लोपः । 'वदव्रजे'ति परस्मैपदे वृद्धिः । पूर्ववदमागमविकल्पः । आत्मनेपदे तु 'लिङ्सिचावि'ति कित्त्वान्नामागमः । अत एव न गुणः । चिकृक्षति । 'हलन्ताच्चे'ति सनः कित्त्वान्नामागमो नापि गुणः । चरीकृष्यते । चरीकृष्टीत्यादि । कर्षयति। अचकर्षत्। अचीकृषत् । उर्वृत्वा । 'सप्तम्यां चोपपीडे'त्यत्र कर्षेरिदं ग्रहणं न कृषेरिति वृत्तिः । आत्रेयस्तु व्याख्यानकृन्मतमेतत्, विशेषाभावादिति । हरदत्तस्तु विशेषमाह । यदाह । यद्यप्युभयोरपि विलेखने पाठस्तथापि तौदादिकस्य क्षेत्रविषये विलेखने वृत्तिः, तेन क्षेत्रे उपकृष्य हलेनोपकृष्य, तौदादिकात् क्त्वा-प्रत्यय एव भवति न णमुलिति । न्यासकारोपि कर्ष इति शपा निर्द्देशा-द्भ्वादिकस्य ग्रहणमित्याह ॥ तुदादयोनुदात्ताः स्वरितेतः ॥ ६ ॥

षान्तप्रसङ्गात्सेटं परस्मैपदिनमाह ॥

ऋषी गतौ ॥ ऋषति । प्रार्षति । 'उपसर्गादृती'ति वृद्धिः । आनर्ष । आनृषतुः । आनृषुः । आनर्षिथ आनृषिव । अभ्यासस्योरदत्वे हलादिः शेषे 'अत आदेरि'ति दीर्घः । 'तस्मान्नुड् द्विहल' इति नुट् । अर्षिता ।

अर्षिष्यति। ऋषतु। आर्षत्। 'आटश्चे' ति वृद्धिः। ऋषेत्। ऋष्यात्। मा भवानर्षीत्। 'नेटी' ति न वृद्धिः। अर्षिषिषति। परत्वाद्गुणे कृते द्वितीयस्यैकाचो द्विर्वचनं 'नन्द्रा' इति रेफस्य न भवति। अर्षयति। आर्षिषत्। अर्षित्वा। 'न क्त्वा सेडि' त्यकित्त्वम्। ऋष्टः। ऋष्टवान्। ईदित्त्वादनिट्त्वम्। ऋषभः। 'ऋषिवृषिभ्यां किदि' त्यभच् प्रत्ययः। आर्षभ्यो वत्सः। 'ऋषभोपानहोर्ञ्य' इति विकृतिवाचिन ऋषभशब्दाद्विकृत्यर्थायां प्रकृतौ ञ्यः। अत्र ऋषभावस्था विकृतिः। वत्सावस्था प्रकृतिः। ऋषभतरः। भारवहने मन्दशक्तिरनड्वान्। 'वत्सोक्षे' त्यादिना ष्टरन्। अत्र तनुत्वेन भारवहनाशक्तिरुच्यते। ऋक्षः। 'स्नुव्रश्चिकृत्यृषिभ्यः किदि' ति सः। उदात्त उदात्तेत्॥ ७॥

षान्तसेडीदित्प्रसङ्गात्तादृशमात्मनेपदिनमाह॥

जुषी प्रीतिसेवनयोः॥ जुषते। जुजुषे। जुजुषिषे। जोषिता। जोषिष्यते। जुषताम्। अजुषत। जुषेत। जोषिषीष्ट। अजोषिष्ट। अजोषिषाताम्। जुजुषिषते। जुजोषिषते। जुषित्वा। जोषित्वा। 'रलो व्युपधादि' ति कित्त्वविकल्पः। जोजुष्यते। जोजोर्ष्टि। जोषयति। अजूजुषत्। जुष्यः। 'एतिस्त्वि' त्यादिना क्यप्। जुष्टः। जुष्टवान्। ईदित्त्वादनिट्त्वम्। सजूः। सजुषौ। सजुषः। 'संपदादित्वात् क्विप्। क्विबन्तस्य सहशब्देन बहुव्रीहौ 'वोपसर्जनस्ये' ति सभावः। 'ससजुषो'-रिति रुत्वे 'र्वोरुपधाया' इति दीर्घः। विद्यमानप्रीतिरित्यर्थः। यस्तु सहार्थे रूढः सजूःशब्दस्तस्य सजूः सहार्थे इत्यूर्यादिपाठाद्गतित्वनिपातत्वयोः 'कुगतिप्रादय' इति 'समासे ल्यपि सजूःकृत्येति भवति। सजूरित्येकवचनान्तस्य पाठाद् द्विवचनयोर्न गतित्वं नापि निपातत्वमित्याद्येयः। द्विवचनबहुवचनान्तयोः सहार्थे वृत्त्यभावादेव गतित्वं निपातत्वं च न भविष्यतीति यत्किंचिदेतत्। रूढत्वादेव ह्यमोघान्यासे सजूःकृत्य सहकृत्येत्यर्थे इत्युक्त्वा जुषतेर्जरतेर्वा क्विपि समानस्य सभाव इति व्युत्पत्तेरनियमो दर्शितः। जोषमिति। स्वरादिपाठाद् घञि मान्तत्वं, स्वभावात्क्रियाविषयः॥ ८॥

ओविजी भयचलनयोः ॥ प्रायेणायमुत्पूर्वः । उद्विजते । उद्विविजे । उद्विविजिषे । उद्विजिता । उद्विजिष्यते । 'विज इडि' ति इडादेरङिणतः प्रत्ययस्य ङित्त्वान्न गुणः । उद्विजताम् । उदविजत । उद्विजेत । उद्विजिषीष्ट । उदविजिष्ट । उद्विविजिषते । उद्विजित्वा क्त्विसनो 'रलो व्युपधादि' ति कित्त्वस्य पाक्षिकत्वेप्यस्य 'विज इडि' ति ङित्त्वमिति न गुणः । उद्वेविज्यते । उद्वेविजीति । उद्वेवेक्ति । उद्वेजयति । उदवीविजत् । उद्विग्नः । उद्विग्नवान् । ईदित्त्वादनिट्त्वम् । चोः कुत्वम् । ओदित्त्वान्निष्ठानत्वम् । वेगितमिति घञन्ताद्वेगशब्दादितचि । उद्वेजितमिति णयन्तस्य निष्ठायामिटि । वेवेक्ति वेविक्ते इति जुहोत्यादौ पृथग्भावे ॥ ९ ॥

ओलजी ओलस्जी व्रीडा[1]याम् ॥ लजते । लेजे । लेजिषे । लजिता । लजिष्यते । लजताम् । अलजत । लजेत । लजिषीष्ट । लिङ्गे । अलजिष्ट । लिलजिषते । लालज्यते । लालजीति । लालक्ति । लाजयति । अलीलजत् । लजित्वा । लग्नः । लग्नवान् । ईदित्त्वादनिट्त्वम् । ओदित्त्वान्निष्ठानत्वम् । अयं तवर्गपञ्चमादिरिति चान्द्राः । तन्मतेन नग्ननग्निकाशब्दव्युत्पत्तौ तवर्गादिरयं स्वामिना पठितो न तु स्वमतेन, यदाह । ओलजी ओलस्जी व्रीड इति चान्द्रा इति । आत्रेयमैत्रेयस्वामिसंमताकारशाकटायनादयः सर्वे णादिमेवाहुः । नग्नशब्दस्तु पृषोदरादित्वाद्वर्णव्यत्ययेनेति मैत्रेयः । लज्जते । ललज्जे । लज्जिता । लज्जिष्यते । लज्जताम् । अलज्जत । लज्जेत । लज्जिषीष्ट । अलज्जिष्ट । अलज्जिषाताम् । अलज्जिषत । लिलज्जिषते । जश्त्वश्चुत्वे । लालज्ज्यते । लालज्जीति । लालक्ति । 'स्कोरि' ति सलोपः । लज्जयति । अललज्जत् । लज्जित्वा । लग्नः । लग्नवान् । निष्ठानत्वस्य सिद्धत्वात् 'स्कोरि' ति सलोपः । लज्जा । 'गुरोश्च हल' इत्यकारः । लज्जित इतीतचि । शप्यनयोरपाठः स्वरार्थः । शपि हि 'तास्यनुदा-

[1] व्रीडे इति ३ पु० पाठः ।

तेनुङ्दि’त्यादिना लसार्वधातुकानुदात्तत्वे शपश्च पित्वादनुदात्तत्वे धातुस्वरेणाद्युदात्तं स्यात्। शे तु प्रत्ययस्वरेण मध्योदात्तं भवति। लजति लाजति लज्जति लाज्जतीति चत्वारः शपि भर्त्सने। जुषादय उदात्ता अनुदात्तेतः॥ १०–११॥

ओ[1]दिदुदात्तसोपधप्रसङ्गात्तादृशमपि परस्मैपदिनमाह॥

ओव्रश्चू छेदने॥ वृश्चति। ‘ग्रहिज्या’दिना संप्रसारणे पूर्वरूपत्वे ‘स्तोः श्चुना श्चुरि’ति सकारस्य शकारः। वव्रश्च। वव्रश्चतुः। वव्रश्चिथ। वव्रष्ठ। वव्रश्चिव। संयोगान्तत्वेन लिटः कित्त्वाभावा‘द्ग्रहिज्या’दिना संप्रसारणन्न भवति। अभ्यासस्य ‘लिट्यभ्यासे’ति संप्रसारणे ‘स्तोः श्चुना श्चुरि’ति सकारस्य शकारः। ‘न संप्रसारणे संप्रसारणमि’ति पूर्वस्य निषेधाद्रेफस्यैव सम्प्रसारणप्रसङ्गः, उरदत्त्वस्याङ्गत्वादङ्गाक्षिप्तप्रत्ययेन परनिमित्तत्वा‘दचःपरस्मिन्नि’ति स्थानिवत्त्वेन संप्रसारणपरत्वात्। ऊदित्त्वात्सर्वत्रेड्विकल्पः। क्रादिनियमः प्रतिषिद्धविषय इति थल्यपि विकल्प एव भवति। तत्रेडभावे झल्परत्वा‘त्स्कोरि’ति सलोपे व्रश्चादिना षत्वे ष्टुत्वम्। व्रष्टा, व्रश्चिता। व्रक्ष्यति। व्रश्चिष्यति। अनिटि सलोपषत्वयोः ‘षढोः कः सी’ति कत्वं, वृश्चतु। अवृश्चत्। वृश्चेत्। आशिषि वृश्च्यात्। अव्रश्चीत्। अव्रश्चिष्टाम्। अव्रश्चिषुः। अव्रश्चीः। अव्रश्चिष्टम्। अव्रश्चिष्ट। अव्रश्चिषम्। ‘नेटी’ति न वृद्धिः। अनिटि त्वव्राक्षीत्। पूर्ववत्सलोपषत्वयोः कुत्वम्। अव्राष्टाम्। ‘झलो झली’ति सिचो लोपे प्रत्ययलक्षणेन ‘षढोः कः सी’ति न भवति। तस्य वर्णाश्रयत्वाद्वर्णाश्रये च प्रत्ययलक्षणाभावात्। विव्रश्चिषति। विव्रक्षति। वरीवृश्च्यते। ‘रीगृत्वत’इति रीक्। वाव्रष्टि। वाव्रष्टः। व्रश्चतीति श्तिपा निर्देशाद् ङिद्वचनेषु न सम्प्रसारणम्। व्रश्चयति। अवव्रश्चत्। व्रश्चित्वा। ‘जिव्रश्च्योः क्त्वी’ति नित्यमिट्। ‘न क्त्वा सेडि’त्यकित्त्वाच्च सम्प्रसारणम्। वृक्णः। वृक्णवान्। ‘यस्य विभाषे’त्यनिट्त्वम्। ओदित्त्वान्निष्ठानत्वं, तस्य पूर्वत्रा-

[1] ओदिदुदात्तेति ४ पु॰ नास्ति।

सिद्धत्वात् झल्परत्वेन 'स्कोरि'ति सलोपः । 'चोः कुरि'ति कुत्वं च । 'निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वक्तव्य' इति व्रश्चादिषत्वे निष्ठादेशस्य सिद्धत्वात् झल्परत्वाभावान्न षत्वम् । व्रस्क्यः । व्रस्कः । ण्यद्घञौ । 'चजोः कुघिण्ण्यतोरि'ति कुत्वम् । अझल्परत्वात्सलोपो न भवति । वव्रश्चेत्यादौ वकारस्योपदेशसामर्थ्याद्रेफे वलि परतो लोपो न भवति । न च वृश्चतीत्यादौ संप्रसारणे झल्परत्वाभावाच्छ्रवणमुपदेशस्य प्रयोजनं, तत्रापि संप्रसारणस्य क्ङित्प्रत्ययापेक्षत्वेन बहिरङ्गत्वेनासिद्धत्वादस्ति वलोपप्रसंग इति । वृक्णः । 'स्नुवृश्चिकृत्यृषिभ्यः कि-दि'ति सप्रत्यये षत्वे कुत्वं, 'स्कोरि'ति सलोपश्च ॥ १२ ॥

व्यच व्याजीकरणे ॥ विचति । 'ग्रहिज्यादिना' क्ङिति संप्रसारणं, विव्याच । विविचतुः । विव्यचिथ । विविचथुः । विविच । विव्याच । विविचिव । अपितो लिटः कित्त्वात्संप्रसारणे द्विर्वचनं, पिति तु 'लिट्यभ्यासस्योभयेषामि'त्यभ्यासस्य । 'व्यचेः कुटादित्वमनसी'त्यञ्णित्प्रत्यये विधीयमानं ङित्त्वमनसीतिपर्युदासेन तत्सदृशे क्ङितीति हरदत्तादयः । तेन णल्युत्तमे णलि च णित्त्वाभावपक्षे नास्ति ङित्त्वं नापि कित्त्वं, पिल्लिट्त्वादिति न संप्रसारणम् । अन्ये तु प्रसज्यप्रतिषेधमाश्रयन्ते, तेनात्रापि ङित्त्वमस्तीति संप्रसारणं मन्यन्ते । प्रसज्यप्रतिषेधाश्रयणे प्रमाणं मृग्यं, वाक्यभेदप्रसङ्गात् । व्यचिता । व्यचिष्यति । विचतु । अविचत् । विचेत् । आशिषि विच्यात् । अव्याचीत् । अव्याचिष्टाम् । अव्यचीत् । अव्यचिष्टाम् । 'अतो हलादेरि'ति वा वृद्धिः । विव्यचिषति । तासिस्यसिचां सनश्चाकृत्वान्न ङित्त्वमिति न संप्रसारणं, प्रसज्यप्रतिषेधवादिनामत्रापि ङित्त्वात्संप्रसारणेन भाव्यम् । वेविच्यते । वाव्यचीति । वाव्यक्ति । श्तिपा निर्देशान्न संप्रसारणम् । व्याचयति । अविव्यचत् । विचित्वा । 'न क्त्वा सेडि'त्यकित्त्वेपि क्त्वः क्ङित्त्वाद्व्यचेः कुटादित्वमिति ङित्त्वेन संप्रसारणं गुणाभावश्च । विचितः । उरुव्यचाः । गतिकारकपूर्वस्यापीत्यसुन् । अनसीतिपर्युदासान्न ङित्त्वम् ॥ १३ ॥

उछि उञ्छे ॥ उच्छी विवासे ॥ उञ्छति । उच्छतीत्यादि । भ्वादौ व्याख्यातौ ॥ १४–१५ ॥

ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु ॥ ऋच्छति । 'छे चे' ति तुक्, तुकि यद्वक्तव्यं तत्सर्वं भ्वादावृच्छतौ द्रष्टव्यम् । आनर्च्छ । आनर्च्छतुः । आनर्च्छुः । आनर्च्छिथ । आनर्च्छिव । 'ऋच्छत्यृतामि' ति लिटि गुणः, 'तस्मान्नुड् द्विहल' इत्यत्र द्विहल्ग्रहणमनेकहलुपलक्षणमिति नुडागम इति हरदत्तादयः । ऋच्छिता । ऋच्छिष्यति । ऋच्छतु । आर्च्छत् । ऋच्छेत् । आशिषि ऋच्छ्यात् । मा भवानृच्छीत् । आर्च्छिष्टाम् । आर्च्छिषम् । ऋचिच्छिषति । अभ्यासे खयः शेषः । ऋच्छयति । मा भवानृचिच्छत् । 'समो गम्यृच्छी' ति सम्पूर्वादस्मादकर्मकात्तङ्, समृच्छते । समानर्च्छे । समृच्छिता । समृच्छिष्यते । समृच्छताम् । समार्च्छत । समृच्छेत । आशिषि समृच्छिषीष्ट । समार्च्छिष्ट । ऋच्छित्वा । ऋच्छितः । ऋच्छितवान् । ऋच्छां चकारेति प्रयोगो 'गुरोश्च हल' इत्यकारप्रत्ययान्तादृच्छशब्दात्कर्मणि द्वितीयायां न त्वामि । यतोऽनृच्छ इत्याम्निषिध्यते ॥ १६ ॥

मिच्छ उत्क्लेशे ॥ उत्क्लेशः पीडा । मिच्छति । मिमिच्छ । मिमिच्छतुः । मिच्छिता । मिच्छिष्यति । मिच्छतु । अमिच्छत् । मिच्छेत् । आशिषि मिच्छ्यात् । अन्तरङ्गत्वात्पूर्वं तुगिति न लघूपधगुणः । वृद्धिस्तु 'नेटीति' निषिध्यते । मिमिच्छिषति, मेमिच्छ्यते । मेमिच्छीति । मेमेष्टि । मिच्छयति । अमिमिच्छत् ॥ १७ ॥

जर्ज चर्च झर्झ परिभाषणभर्त्सनयोः ॥ जर्जति । जजर्ज । चर्चति । चर्चिका । संज्ञायां क्वुन्, ण्वुल्वा । झर्झति । जझर्झ । जर्जरः । झर्झरः । बाहुलकाद् रचन्तौ । आद्यन्तावपि चान्तावित्येके । चर्चतिझर्झत्योः शपि पाठः स्वरार्थ इत्युक्तम् ॥ १८–१९–२० ॥

त्वच संवरणे ॥ त्वचति । तत्वाच । त्वचिता, त्वचिष्यति । त्वचतु । अत्वचत् । त्वचेत् । त्वच्यात् । अत्वाचीत् । अत्वचीत् । 'अतो

हलादेरि' ति वा वृद्धिः । तित्वचिषति । तात्वच्यते । तात्वचीति । तात्वक्ति । त्वाचयति । अतित्वचत् । त्वचः । पचाद्यच् । त्वचं गृह्णाति त्वचयति । 'सत्यापपाशे'त्यादिना णिच् । अत्र णिलोपस्य स्थानिवद्भावान्न वृद्धिः । अतत्वचदित्यग्लोपित्वादभ्यासस्येत्वं न । त्वक् । 'अन्येभ्योपि दृश्यन्ते' इति क्विप् । वात्वचम् । 'द्वन्द्वाच्चुदषहान्ता'-दिति टच् ॥ २१ ॥

ऋच् स्तुतौ ॥ ऋचतीत्यादि ऋषतिवत् । अर्च्यं, ण्यति । 'यजयाचरुचप्रवचर्चश्चे' ति कुत्वनिषेधः । अत एव कुत्वनिषेधाज् ज्ञापकाल्लघूपधलक्षणः क्वचिन्न भवति । ऋक् । पूर्ववत्क्विप् । ऋचो व्याख्यानमार्चिकम् । 'द्व्यजृद्ब्राह्मणे' त्यादिना भवव्याख्यानयोष्ठक् । ऋचोऽर्द्धमर्द्धर्चम् । 'अर्द्धं नपुंसकमि' त्येकदेशिनार्द्धशब्दस्य षष्ठीसमासः । 'ऋक्पूरब्धूरि'-त्यादिना ऽकारः समासान्तः । 'अर्द्धर्चाः पुंसि चे' ति पुंनपुंसकयोरयम् । अनृचो माणवको ज्ञेयो बह्वृचश्चरणाख्यायामिति विशेषे अकारप्रत्ययस्य स्मरणादनृक्कं साम बह्वृक्कं सूक्तमित्यादौ शेषलक्षणः कबेव भवति । ऋक् च साम च ऋक्सामे । 'अचतुरे' त्यादिना द्वन्द्वे ऽच् समासान्तः । 'नस्तद्धित' इति साम्नष्टिलोपः ॥ २२ ॥

उब्ज आर्ज्जवे ॥ अयमुपध्मानीयोपध इति केचित् । तथा च 'हयवरडि' त्यत्र वार्तिकम् । 'अयोगवाहानामट्सु णत्वं शर्षु जश्भावषत्वे' इति । अत्र भाष्यं शर्षु चोपदेशः कर्तव्यः । किं प्रयोजनं, जश्भावषत्वे । उब्जिरयमुपध्मानीयोपधः पठ्यते, तस्य जशत्वे कृते उब्जिता उब्जित्वा उब्जितुमुब्जितव्यमित्येतद्रूपं यथा स्यादिति । शर्षु जश्भाव इत्यस्यायमभिप्रायः । शर्षु उपदेशात् झल्त्वाज्जश्त्वमिति । पुनश्च भाष्यम् । यद्युपध्मानीयोपधः पठ्यते । उब्जिजिषतीत्युपध्मानीयादेरेव द्विर्वचनं प्राप्नोतीति । जश्त्वस्यासिद्धत्वादुपध्मानीयादेर्द्विर्वचने जश्त्वेनोपध्मानीयस्य बत्वे उबिब्जिषतीति स्यादिति भावः । तथा कैयटे द्विर्वचने पूर्वत्र जश्त्वमसिद्धमथापि 'पूर्वत्रासिद्धीयमद्विर्वचन' इति सिद्धं, सर्वथोबिब्जिषतीति प्राप्नोति । किं च अभ्युद्गः समुद्ग इति च न सिध्यतः । यद्यपि

गमेद्व्युपसर्गाड्डुपि सिद्धस्तथापि अस्माड्डजि कृते उपध्मानीयस्य च जश्त्वेऽ-भ्युब्जः समुब्ज इत्यपि स्याताम्, तदर्थं 'सुपध्मानीयस्य चे'ति वार्तिकेन कवर्गे परत उपध्मानीयस्य सकारो विधेयः स्यात्, तस्मिन् हि जश्त्वेन दत्वं भविष्यति । तस्मादयं दोपधः पठितव्यः । उक्तं च भाष्ये । यद्ययं दोपधः का रूपसिद्धिः, उब्जित्वा उब्जितुमुब्जितव्यमिति । असिद्धे भ उब्जेः । इदमस्ति 'स्तोः श्चुना श्चु'रिति, ततो वक्ष्यामि भ उब्जेः । उब्जे श्चुना सन्निपाते भो भवतीति, ततश्च 'न न्द्राः' इति निषेधे भत्वस्यासिद्धत्वाद्दकारवर्जस्य द्विर्वचने पश्चाद्दत्वे उब्जिजिषतीतीष्टसिद्धिः । न चास्ति 'पूर्वत्रासिद्धीयमद्विर्वचन'इति । 'नन्द्रा'इत्यस्य द्विर्वचननिषेधरूपत्वात् । न चास्त्यभ्युद्गः समुद्ग इत्यत्र भत्वस्य प्रसङ्गः । तस्य कुत्वे पूर्वत्रासिद्धत्वात्, कृते चास्मिन् चवर्गयोगाभावात् । अपरे तु बकारोपधं पठन्ति । 'न न्द्रा'इत्यत्र बकारस्यापि प्रतिषेधमुपसंचक्षते । तेषामभ्युद्ग इत्यादौ दत्वमपि वक्तव्यम् । उब्जति । उब्जांचकार । उब्जिता । उब्जिष्यति । उब्जतु । औब्जत् । उब्जेत् । आशिषि उब्ज्यात् । औब्जीत् । उब्जयति । माभवानुब्जिजत् । न्युब्जिता शेरतेऽस्मिन्निति न्युब्जो रोगविशेषः । 'भुजन्युब्जौ पाण्युपतापयोरि'ति घञि कुत्वाभावो निपात्यते । ओजः । 'उब्जेर्बलोपश्चे'त्यसुनि बलोपो गुणश्च निपात्यते । ओजायते । 'कर्त्तुः क्यङ् सलोपश्चे'ति क्यङ्सलोपौ । अत्रानुवृत्तस्य वाग्रहणस्य व्यवस्थितविभाषात्वान्नित्योऽत्र सलोपः । ओजसा कृतम् । 'ओजस्सहोम्भस्तमसः तृतीयाया'इत्यलुक् ॥ २३ ॥

उज्झ उत्सर्गे ॥ अयमपि दोपधः, जश्त्वं तु लाक्षणिकम् । उज्झतीत्यादि पूर्ववत् । उद्ध्यो नदः । 'भिद्योद्ध्यौ नदे'इति कर्तरि क्यपि झकारस्य धकारो निपात्यते ॥ २४ ॥

लुभ विमोहने ॥ विमोहनमाकुलीकरणम् । लुभति । लुलोभ । लोब्धा । 'तीषसहे'तीड्विकल्पः । लोभिष्यति । लुभतु । अलुभत् । लुभेत् । लुभ्यात् । अलोभीत् । लुलुभिषति । लुलोभिषति । लुभित्वा । लोभित्वा । 'रलो व्युपधादिति' कित्त्वविकल्पः । लोलुभ्यते । लोलोब्धि ।

लोभयति । अलूलुभत् । विलुभिताः केशाः । 'लुभो विमोहन' इति क्त्वा-निष्ठयोर्नित्यमिट् । गार्ध्ये तु लुभ्यतीति गतम् ॥ २५ ॥

रिफ कत्थनयुद्धनिन्दाहिंसादानेषु ॥ रिफति । रिरेफेत्यादि लुभि-वत् । क्त्वायां 'रलो व्युपधादि'ति न कित्त्वविकल्पः । 'नोपधात्थफा-न्ते'त्यत्र नोपधग्रहणसामर्थ्यात् । यदि हि स्यात्किं नोपधग्रहणेन । न च ऋफ तृफ हिंसायामित्यृकारोपधो व्यावर्त्यः । त्रैशब्द्यं हि नः सा-ध्यम्, रिफित्वा रिम्फित्वा अर्फित्वेति । एतच्च सत्यसति नोपधग्रहणे भवत्येव । सति च[1] नोपधस्य 'न क्त्वा सेडि'ति प्रतिषेधे सति अर्फित्वेति भवति । नोपधस्य त्वस्मिन्विकल्पे रिफित्वा रिम्फित्वेति । असत्यपि नोपधस्य ग्रहणे सर्वत्रास्मिन्विकल्पे प्रवृत्तेपीदमेव रूपत्रयं भवति । रिहीति द्रमिडा इति स्वामी । अनिट्कारिकासु वामनश्च रिहितुही धातुषु न पठ्येते केश्चिदभ्युपगम्येते इति । अत्र न्यासे केश्चिदित्यापिश-लिप्रभृतिभिरिति । तस्मात्तावपि स्त एव । प्रयुज्यते च शिशुं न विप्रा मतिभी रिहन्तीति ॥ २६ ॥

तृप तृम्फ तृप्तौ ॥ आद्यः प्रथमान्त इति वामनः । यदाह तृप्यतिदृप्यती रूपमित्यनिट्कारिकायां श्यना निर्द्देशस्य व्यावर्त्यं दर्शयन् तुदादिषु यो तृपिदृपी तावुदात्तावेवेति । आत्रेयमैत्रेयादयस्तु द्विती-यान्तं पठित्वा प्रथमान्तं वामनः पठतीत्याहुः । तृपति । ततर्प । तर्पि-ता । तर्पिष्यति । तृपतु । अतृपत् । तृपेत् । तृप्यात् । अतर्पीत् । 'स्पृशमृशकृषे'ति सिचो विकल्पनमङ्पवाद इति प्रौषादिकस्यैव । तितर्पिषति । तरीतृप्यते । तर्तर्प्ति । तर्पयति । अतीतृपत् । अततर्पत् । उत्तर्दृुः । तर्पित्वा । तृपितः । तृप्वा तृप्त इति तृप्यतेः । तृम्फति । शस्य ङित्त्वा 'दनिदिताम्'िति नलोपे 'शे तृफादीनाम्'िति नुमागमः । येत्र सानुषङ्गाः पठ्यन्ते तृम्फादय इति, प्रकारवाच्यादिशब्दः, प्रकारश्च सादृश्यं, तच्च नकारानुषं[2]क्ततयेति हरदत्तः । ततृम्फ । तृम्फिता । तृम्फिष्यति । तृम्फतु । अतृम्फत् । तृम्फेत् । आशिषि तृफ्यात् । यासु-

१ तावदिति ४ पु॰ पाठः । २ षङ्गतयेति ४ पु॰ पा॰ ।

टः कित्त्वान्नस्य लोपः । अतृम्फीत् । तितृम्फिषति । तरीतृफ्यते । 'रीगृत्वत' इति रीक् । तरीतृम्फति । तृम्फयति । अततृम्फत् । तृफित्त्वा । तृम्फित्वा । तृफितः । क्त्वायां 'नोपधात्थफान्ताद्वे' ति कित्त्वविकल्पनात्पक्षे नलोपः ॥ २७–२८ ॥

तुप तुम्प तुफ तुम्फ हिंसायाम् ॥ तुपति । तुम्पति । तुफति । तुम्फतीत्यादि पूर्ववत् ॥ एषां भूवादौ पाठः स्वरार्थ इति तत्रैवोक्तम् ॥ २९–३०–३१–३२ ॥

दृफ दृम्फ उत्क्लेशे ॥ प्रथमः प्रथमान्त इति वामनस्तत्तृपतावुपपादितम् । अन्ये द्वितीयान्त इति । दृफति । दृम्फतीत्यादि ॥ ३३–३४ ॥

ऋफ ऋम्फ हिंसायाम् ॥ ऋफति । आनर्फ । आनृफतुः । ऋम्फति । ऋम्फाञ्चकार । अर्पिफिषति । सनि गुणे 'न न्द्रा' इति रेफवर्जितस्य द्विर्वचनम् । ऋम्पिफिषतीत्यत्राप्यनुस्वारपरवर्णयोरसिद्धत्वाच्चकारवर्जितस्य द्विर्वचनम् । अर्फित्वा । ऋम्फित्वेत्यादि पूर्ववत् ॥ ३५–३६ ॥

गुफ गुम्फ ग्रन्थे ॥ गुफति । जुगोफ । गुम्फति । जुगुम्फेत्यादि ॥ ३७–३८ ॥

उभ उम्भ पूरणे ॥ उभति । उवोभ । ऊभतुः । 'अभ्यासस्यासवर्णे' इति गुणविषये उवङ् । अन्यत्र सवर्णदीर्घः । उम्भति । उम्भाञ्चकारेत्यादि । उभौ । इगुपधात्कः । नित्यं द्विवचनान्तः । सर्वादित्वात्सर्वनामत्वं, तत्कार्याणि 'सर्वनाम्नस्तृतीये' त्यादीनि यथासंभवं नेयानि । उभाववयवावस्य उभयो मणिरित्यत्र 'संख्याया अवयवे तयबि' ति तयपि त 'स्योभादुदात्तो नित्यमि' त्ययजादेश उदात्तः । उभाञ्जलि । उभयाञ्जलि । उभाहस्ति । उभयाहस्ति । उभाबाहु । उभयाबाहु । 'द्विदण्ड्यादिभ्यश्चे' ति बहुव्रीहाविच्प्रत्ययान्तता निपात्यन्ते । उभाबाहु उभयाबाहु इत्यत्रैव निर्दैशादिचो लोपः, प्रत्ययलक्षणेनेजन्तत्वादव्ययीभावत्वादव्ययत्वमिति न्यासे । द्विदण्ड्यादिगणपाठादेवैषां साधुत्वे सिद्धे 'द्विदण्ड्यादिभ्यश्चे' ति सूत्रमिजन्तत्वविज्ञानार्थमिति,

तस्य च प्रयोजनमव्ययीभावसंज्ञेति हरदत्तादयः । तिष्ठद्गुप्रभृतिषु द्विजिति पठ्यते, एवं समुदायनिपातनाच्चार्थविशेषे एवावतिष्ठन्ते, तथा च वृत्तिः । द्विदण्डि प्रहरति । द्विमुसलि प्रहरति । एवमुभाञ्जलीत्यादीनामपि प्रहारो ऽन्यपदार्थः । केनोम्भ्यते इति कुम्भः । कर्मणि घञ् । अयस्कुम्भः 'अतः कृकमिकंसकुम्भेति' विसर्जनीयस्य सः । अत एव कुम्भेतिनिर्देशात्कशब्दाकारस्य लोपः पररूपता वा । कुम्भी । गौरादित्वा 'ज्जातेरस्त्री' ति वा ङीष् । अयस्कुम्भी । लिङ्गविशिष्टपरिभाषया सत्वम् । कुम्भीव नासिका ऽस्य कुम्भीनसः । 'अञ् नासिकायाः संज्ञायामि' त्यादिना नासिकाया नसादेशोच् प्रत्ययश्च ॥ ३९–४० ॥

शुभ शुम्भ शोभार्थे ॥ शुभति । शुम्भतीत्यादि ॥ ४१–४२ ॥

दृभी ग्रन्थे ॥ दृभतीत्यादि । ईदित्त्वान्निष्ठायामनिट्त्वम् । दृब्धः ॥ अयमनिटि चुरादौ ॥ ४३ ॥

चृती हिंसाग्रन्थनयोः ॥ चृतति । चचर्त । चचृततुः । चर्त्तिय । चर्त्तिता । चर्त्तिष्यति । चर्त्स्यति । चृततु । अचर्तीत् । चरीचृत्यते । चरीचर्ति । चरीचृतः । चर्त्तयति । अचीचृतत् । अचचर्त्तत् । उच्चृद्ध्वा । चृतः । चृतवान् । 'यस्य विभाषे' त्यनिट्त्वे सिद्धे ऽस्येदित्त्वेन तस्यानित्यत्वज्ञापनाद्भावित इति सिद्धमिति मैत्रेयः । स्वामिकाश्यपौ तु ईदित्त्वं चरीचृतः, चरीचृतवानिति यङ्लुगन्तान्निष्ठायामनिट्त्वार्थमिति ॥ ४४ ॥

विध विधाने ॥ विधति । विवेध । वेधिता । वेधिष्यति । विधतु । अविधत् । विधेत् । विध्यात् । अवेधीत् । विविधिषति । विवेधिषति । विधित्वा । वेधित्वा । वेविध्यते । वेवेद्धि । वेधयति । अवीविधत् । 'रलो व्युपधादि' ति क्त्वासनोः कित्त्वविकल्पः । विधिशब्दमस्मान्मैत्रेय आह । समर्थसूत्रे भाष्यं विधिरिति कोयं शब्दः, विपूर्वाद्धाञः कर्मसाधन इकार इति । अत्र कैयटे विध विधानइत्यस्यौणादिकेन्प्रत्ययान्तस्य निवृत्त्यर्थं विपूर्वाद्धाञ इत्युक्तं, स्वरे चानयोर्भेदः, इन्प्रत्ययान्तस्याद्युदात्तत्वात्, किप्रत्ययान्तस्यान्तोदात्तत्वात्, तस्यैव प्रयोगार्थमेवमुक्तमिति ॥ ४५ ॥

प्रकृतितो विकल्पेन प्राप्तौ तत्तच्छाखोक्ते उपहव्ये नियमार्थं तद्ग्रहणं संगच्छतइति शङ्कते । उपेति । प्रतिप्रसवः विकल्पबाधार्थं पुनस्तयोर्ग्रहणं सफलमिति पूरणीयम् ॥ २८ ॥

गुणार्था वा पुनः श्रुतिः ॥ २९ ॥

समाधत्ते । गुणेति । तत्तत्साम्नि निमित्ते संस्थाविशेषस्य दक्षिणाविशेषस्य विधानार्थं पुनः श्रुतिः पुनः पाठः सफलः अतो न कर्मभेदे लिङ्गमिति भावः ॥ २९ ॥

प्रत्ययं चापि दर्शयति ॥ ३० ॥

एवं भेदसाधकाल्लँ लिङ्गानुद्धृत्य कर्मैक्यसाधकं लिङ्गं दर्शयति । प्रत्ययमिति । प्रत्ययं कर्माभेदज्ञानं वक्ष्यमाणं लिङ्गं दर्शयति । तथा हि । मैत्रायणीयशाखायां समिदादयः प्रयाजा न विहिताः तैत्तिरीयशाखास्थान् समिदादिप्रयाजाननूद्य ऋतवो वै प्रयाजा इत्यनेन, समा होतव्या इति पञ्चानां देशैक्यरूपो गुणो विधीयते । यदि तैत्तिरीयं कर्म भिन्नं तदा तदनुवादो मैत्रायणीये ऽनुपपन्नः अतः कर्मैकम् ॥ ३० ॥

अपि वा क्रमसंयोगाद्विधिपृथक्त्वमेकस्यां शाखायां व्यवतिष्ठेत ॥ ३१ ॥

सिद्धान्ते शङ्कते । अपि वेति । एकस्यां शाखायामेकशाखास्थकर्मणि विधिपृथक्त्वम् अपरशाखास्थकर्मणः पृथक्त्वं व्यवतिष्ठेत सिध्येत् । क्रमसंयोगात् स्वशाखायां क्रमकल्पकपाठादिप्रमाणानां संयोगात् । तथा दर्शपूर्णमासे स्विष्टकृदुत्तरं प्राशित्रदानं पठितं तत इडावदानं कस्यांचिच्छाखायाम् । अपरस्यां तद्विपरीतम् । एवं पाठव्यत्यये अनुष्ठानक्रमो ऽपि पाठानुसारेण विपरीतो भवेत् । तथा सति कर्मैक्यं व्यवस्थाप्य यावच्छाखास्थाङ्गोपसंहारे स्वशाखास्थपाठादिक्रमो ऽत्र बाध्येत । एतदपेक्षया कर्मान्तरमित्यङ्गीकृत्य तत्तच्छाखिनां स स क्रमो नियत इति कल्पनमेव वरिष्ठमिति भावः ॥ ३१ ॥

विरोधिनां त्वसंयोगादैककर्म्यै तत्संयोगाद्विधीनां सर्वकर्मप्रत्ययः स्यात् ॥ ३२ ॥

उक्तदूषणं परिहरति । विरोधिनामिति । पूर्वोक्तयुक्तिभिः सर्वशाखास्थानामैककर्म्ये कर्मणामेकत्वे सिद्धे विधीनां सर्वशाखापठितानामङ्गविधीनां तत्संयोगात्कर्मसंबन्धात् सर्वेषामङ्गानां कर्मणि एककर्मणि प्रत्ययः समन्वयः स्यात् । ननु विरुद्धक्रमस्य कथमन्वयस्तत्राह । विरोधिनां विरुद्धानां पूर्वोदाहृतानां क्रमाणामेकप्रयोगे असंयोगाद् असंबन्धादुपपत्तिः । तथा च प्रयोगभेदेन समावेशः कार्य इति भावः ॥ ३२ ॥

इति जैमिनिसूत्रवृत्त्यां द्वितीयाध्यायस्य चतुर्थः पादः ॥ ४ ॥

समाप्तश्च द्वितीयोऽध्यायः ॥ २ ॥

शेषलक्षणप्रतिज्ञा । अधि० १ ।

अथातः शेषलक्षणम् ॥ १ ॥

शब्दान्तरादिषट्प्रमाणैः कर्मभेदं सापवादं द्वितीये निरूप्य तदुपजीवकं* शेषशेषित्वनिरूपणं प्रतिजानीते । अथेति । अथ भेदनिरूपणानन्तरम् । अतः भेदाधीनत्वाच्छेषशेषिभावस्य । शेषस्य वक्ष्यमाणलक्षणस्य लक्षणम् अध्यायः प्रारभ्यतइति शेषः । प्रतिज्ञावाक्यरूपत्वान्न विषयाद्यपेक्षा ॥ १ ॥

शेषलक्षणम् । अधि० २ ।

शेषः परार्थत्वात् ॥ २ ॥

तत्र कः शेषः केन हेतुना शेष इति प्रश्ने ऽर्थश्रुतिभ्यामुभयोरुत्तरमाह । शेष इति । परार्थत्वाद् व्रीह्यादीनां स्वभिन्नयागार्थत्वाद् व्रीह्यादयः यागं प्रति शेषभूताः । यो यदर्थं प्रवृत्तिविषयीक्रियते स तदङ्गमिति व्याप्तिः । सूत्रे परार्थत्वादितिपञ्चमीश्रुत्या हेतुत्वं स्पष्टम् । यः परार्थः स शेष इति स्वरूपकथनमर्थ्यर्थकम्† ॥ २ ॥

शेषत्वलक्षणम् । अधि० ३ ।

द्रव्यगुणसंस्कारेषु बादरिः ॥ ३ ॥

निरुक्ताङ्गत्वं द्रव्यगुणसंस्कारेष्वेवोत यागफलयोरपीति संशये पूर्वपक्षमाह । द्रव्येति । द्रव्यं व्रीह्यादि गुणः अरुणादिः संस्कारः प्रोक्ष-

---

* कर्मभेदोपजीवकमित्यर्थः । भिन्नानामेव शेषशेषिभावस्य संभवादिति भावः । व्रीहीनवहन्तीत्यादौ द्रव्यकर्मणां शेषशेषिभावस्य कर्मभेदानपेक्षत्वे ऽपि प्रयाजाग्नेयादीनां कर्मणां तद्भेदापेक्षशेषशेषिभावस्य कर्मभेदनिरूपणोत्तरमेव वक्तव्यतया तन्निरूपणोत्तरमेव शेषलक्षणारम्भ इति बोध्यम् ।

† पारार्थ्यं च परोद्देशप्रवृत्तकृतिव्याप्यत्वम् । इदमेव शेषलक्षणं निर्दुष्टम् । अन्यानि तु अतिव्याप्त्यादिदूषणग्रस्तानि । तथा हि यो येन विना न भवति स तस्य शेष इति अविनाभावस्तल्लक्षणम् आग्नेयादिप्रधानयागानां परस्परमविनाभावसत्त्वात्तत्रातिव्याप्तम् । प्रयोज्यत्वं तु तुषोपवापाऽप्रयोज्येषु कपालेषु शेषत्वदर्शनादव्याप्तम् । यथा कपालानां तुषोपवापप्रयोज्यत्वं न, तथा चतुर्थस्य प्रथमपादे स्फुटीभविष्यति । उपकारकत्वमपि लक्षणं प्रधानानामनुष्ठानोपयोगरूपाङ्गोपकारकर्तृत्वात्तेषामपि तच्छेषत्वापत्त्या हेयम् । एवमन्येषु लक्षणेषु दूषणं शास्त्रदीपिकादितो ऽवगन्तव्यम् ।

गादिः एष्वेव पारार्थ्यमिति बादरिराचार्यो मनुते । एवकारेण प्रधानयागफलव्यवच्छेदः । ननु फलार्थत्वाद्यागस्य कथं नाङ्गत्वमिति चेदुच्यते । यथा फलार्थत्वं यागस्य नास्ति तथा षष्ठाद्याधिकरणपूर्वपक्षसूत्रे वक्ष्यते । तथा फलस्य पुरुषं प्रति शेषत्वं नास्ति तदपि तत्रैव स्पष्टम् ॥ ३ ॥

कर्माण्यपि जैमिनिः फलार्थत्वात् ॥ ४ ॥

सिद्धान्तमाह । कर्माण्यपीति । पारार्थ्यमिति योज्यम् । फलरूपपारार्थ्यलक्षणस्य तत्र सत्त्वात् । यथालक्षणसत्त्वोपपत्तिस्तथा षष्ठे व्यक्तीभविष्यति । अपिना द्रव्यगुणसंस्कारपरिग्रहः ॥ ४ ॥

फलं च पुरुषार्थत्वात् ॥ ५ ॥

पुरुषरूपो यः परः तदर्थत्वरूपलक्षणं फले ऽप्यस्त्यतः फलं पुरुषस्याङ्गमित्याह । फलमिति । सूत्रार्थः स्पष्टः* ॥ ५ ॥

अवहननादीनां व्यवस्थितविषयत्वम् । अधि॰ ४ ।

तेषामर्थेन संबन्धः ॥ ६ ॥

दर्शपूर्णमासे पुरोडाशधर्माः अवहननादयः आज्यधर्मा उत्पवनादयः सान्नाय्यधर्माः वत्सापाकरणादयः दृश्यन्ते । ते सर्वार्था उतावहननादयः पुरोडाशार्था उत्पवनादय आज्यस्यैव वत्सापाकरणादयः सान्नाय्यस्यैव धर्मा इति संशये सिद्धान्तेनारभते । तेषामिति । तेषाम् अवहननादीनाम् अर्थेन दृष्टेन फलेन वितुषीभावादिना व्यवस्थया संबन्धः शेषशेषिभावः । दृष्टे फले संभवत्यदृष्टकल्पनाया अन्याय्यत्वादिति भावः ॥ ६ ॥

विहितस्तु सर्वधर्मः स्यात्संयोगतो ऽविशेषात्प्रकरणाऽविशेषाच्च ॥ ७ ॥

पूर्वपक्षयत्तिष्ठते । विहित इति । विहितः शास्त्रेण विहितः सर्वधर्मः सर्वशेषः स्यात् । संयोगतः अविशेषात् साक्षात्परम्परया वा

* इत उत्तरं "पुरुषश्च कर्मार्थत्वाद्" इति सूत्रं भाष्यवार्तिकादिषु व्याख्यातम् । अत्र तु नोपलभ्यते । कर्मार्थत्वात्पुरुषो ऽपि शेष इति तदर्थः स्पष्टः ।

सर्वेषां परमापूर्वसंबन्धाविशेषात् । प्रकरणस्य दर्शपूर्णमासप्रकरणपाठस्य अविशेषात्तुल्यत्वाच्च । अयं भावः व्रीहीनवहन्ति आज्यमुत्पुनातीत्यादौ व्रीह्यादिशब्दा न स्वार्थपराः किं तु प्रकृतापूर्वसाधनद्रव्यपरा इति वक्ष्यति । तथा चोद्देश्यतावच्छेदकस्य सर्वद्रव्यवृत्तित्वाविशेषादव्यवस्थिता एव प्रवर्तन्ते इति ॥ ७ ॥

अर्थलोपादकर्म स्यात् ॥ ८ ॥

सिद्धान्तयुक्तिमाह । अर्थेति । अर्थस्य दृष्टोपकारस्य लोपाद् लोपापत्त्या अकर्म अवहननस्याज्यादिष्वननुष्ठानम् । उत्पवनस्य व्रीह्यादिषु च ॥ ८ ॥

फलं तु सह चेष्टया शब्दार्थोऽभावाद्विप्रयोगे स्यात् ॥ ९ ॥

ननु विधिबलाद्दृष्टोपकारलोपो भवत्वत आह । फलमिति । फलं दृष्टं वितुषीभावादि चेष्टया अवहननादिक्रियया दृश्यते । तत्रैवावघातादिशास्त्रं प्रवर्ततइति पूरणीयम् । विप्रयोगे दृष्टफलस्य वितुषीभावादेरसति अभावाद् दृष्टोपकारकत्वाभावादाज्यादिष्वप्यवघातरूपः शब्दार्थः न स्यात् । दृष्टालाभात् । अयं भावः तण्डुलपदस्य न परमापूर्वसाधने लक्षणा किं तु आग्नेयोत्पत्त्यपूर्वसाधने सन्निकृष्टत्वात् । स च शब्दार्थः व्रीहिरेव नाज्यादिः । अतो न शास्त्रबलेन दृष्टलोप इति ॥ ९ ॥

स्फ्यादीनां व्यवस्थितत्वम् । अधि० ५ ।

द्रव्यं चोत्पत्तिसंयोगात्तदर्थमेव चोद्यते ॥ १० ॥

दर्शपूर्णमासे श्रुतं स्फ्यश्च कपालानि च अग्निहोत्रहवणी च शूर्पं च कृष्णाजिनं च शम्या चोलूखलं च मुसलं च दृषच्चोपला चैतानि वै दश यज्ञायुधानीति । एतानि दश यज्ञसाधनानीत्यर्थः । तथा स्फ्येनोद्धन्ति । कपालेषु पुरोडाशं श्रपयति । अग्निहोत्रहवण्या हवींषि निर्वपति । शूर्पेण तण्डुलान् विविनक्ति । कृष्णाजिनमुलूखलस्याधस्तादुपस्तृणाति । शम्यायां दृषदमादधाति । उलूखलमुसलाभ्यामवहन्ति । दृषदुपलाभ्यां पिनष्टि । इति च श्रुतम् । अत्र दशवाक्यगतस्फ्यादिद्रव्यवाचकपदानि

सर्वाण्यपूर्वसाधनद्रव्यमात्रलक्षकाण्युत शक्यार्थमेव प्रवदन्तीति संशये अत्र स्फ्यादिपदानां यज्ञसाधनपात्रमात्रे लक्षणायां तात्पर्यग्राहकस्य एतानि वै दश यज्ञायुधानीति वाक्यस्य सत्त्वाद् येन केनाप्युद्धननं कर्तव्यमिति बहिः पूर्वपक्षे सिद्धान्तमाह । द्रव्यमिति । द्रव्यं स्फ्यादिद्रव्यं यादृशकार्यार्थं चोद्यते तदर्थं तदङ्गत्वेनैव विधीयते न तु क्रियान्तराङ्गम् । उत्पत्तौ उत्पत्तिवाक्ये स्फ्येनोद्धन्तीत्यादौ उद्धननादिक्रियासंयोगात् । साध्यसाधनभावादिसंबन्धश्रवणात् । अयं भावः स्फ्येनोद्धन्तीत्यत्र मत्वर्थलक्षणया स्फ्यविशिष्टोद्धननेनापूर्वं भावयेदिति तदर्थः । अत्र वैशिष्ट्यं साध्यसाधनभावरूपम् । तथा च स्फ्यसाध्योद्धननेनापूर्वं भावयेदिति फलितत्वात्तत्साध्यमेवोद्धननम् । न च स्फ्यपदस्य यज्ञसाधनलक्षणायां तात्पर्यग्राहकं यज्ञायुधानीति वाक्यम् । तस्य यज्ञायुधानि संभरन्तीतिविधिशेषत्वात् ॥ १० ॥

आरुण्यादिगुणानामसङ्कीर्णत्वम् । अधि० ६ ।

अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात् ॥ ११ ॥

ज्योतिष्टोमे क्रयसंनिधौ श्रूयते अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणातीति । अत्रैकहायनीपिङ्गाक्षीपदे द्रव्यवाचके । वार्तिके बहुव्रीहावन्यपदार्थे शक्तिरिति व्यवस्थापितत्वात्* । तन्मूलयुक्तयः ततोऽवगन्तव्या विस्तरभयान्न लिख्यन्ते । अतः तयोः करणत्वेन क्रये ऽन्वये न किं चिद्बाधकम् । अतः तावपहायारुणास्थले विचारः । अत्रारुणयेति पदं क्रयेण संबध्यतउत वाक्याद्विच्छिद्य प्राकरणिकद्रव्यसामान्येन संबध्यतइति संशये अरुणापदं रूपविशेषे गुणे शक्तं रूपविशेषे क्रयरूपक्रियाकरणत्वं बाधितम् अतो वाक्याद्विच्छिद्य ज्योतिष्टोमापूर्वसाधनद्रव्यं भावयेदित्यध्याहृत्यारुणया द्रव्यं भावयेदिति बोधान्तरमिदमिति बहिः पूर्वपक्षे सिद्धान्तमाह । अर्थैकत्वइति । यस्मिन्वाक्ये द्रव्यगुणयोरेकक्रियान्वयित्वरूपार्थैकत्वं संभवति तस्मिन् सति नियमः परिच्छेद्यपरिच्छे-

* सर्वत्र यौगिकैः शब्दैर्द्रव्यमेवाभिधीयते । न हि संबन्धवाचित्वं संभवत्यतिगौरवादित्यादिनेति शेषः ।

दकभावनियमः श्रूयमाणयोः तयोः स्यात् । ऐककर्म्याद् एकार्थप्रतिपादकत्वरूपैकवाक्यतासत्त्वात् । अयं भावः । उदाहृतवाक्येन भावार्थाधिकरणन्यायेन क्रयो विधीयते । तस्मिन् क्रयरूपैककरणावरुद्धभावनायां करणान्तरसंबन्धस्यानाकाङ्क्षितत्वादगत्या धात्वर्थे सोमेन यजेतेतिवन्मत्वर्थलक्षणामङ्गीकृत्यान्वयः त्रयाणाम्*। एवं त्रितयविशिष्टक्रये विहिते सति आक्षिप्तविशेषणविधयः त्रयः । अरुणया क्रयं भावयेत् । एकहायन्या क्रयं भावयेत् । पिङ्गाक्ष्या क्रयं भावयेद् इति । तत्रैकहायनपिङ्गनेत्रयोः परस्परसामानाधिकरण्यमङ्गीकृत्यैकद्रव्यपरिच्छेदकत्वं तथाऽरुणारूपगुणस्यापि तत्र समावेशे बाधकाभावात्त्रयाणामेकार्थत्वेनैकवाक्यत्वे संभवति सति दुर्बलेन प्रकरणेन अध्याहारेण च भिन्नवाक्यत्वकल्पनमनुचितम् । न चैकार्थेषु विकल्पप्रसक्तिः । विरोधे सत्येव विकल्पात् । प्रकृतेऽविरोधेनान्वयस्य दर्शितत्वात् । न चारुण्यस्य द्रव्येणान्वयः क्रियतइति शङ्क्यम् । अमूर्तस्य साक्षात्क्रियाकरणत्वासंभवेन पदानामर्थं वदतां शक्तिः सहकारिणीति न्यायेन द्रव्यपरिच्छेदद्वारा क्रियान्वये बाधकाभावादिति । इतोऽधिकविचारो भाष्यादावाकरे द्रष्टव्यः ॥ ११ ॥

उद्देश्यगतसंख्याऽविवक्षा । अधि० ७ ।

एकत्वयुक्तमेकस्य श्रुतिसंयोगात् ॥ १२ ॥

ज्योतिष्टोमे श्रुतं दशापवित्रेण ग्रहं संमार्ष्टीति । दशापवित्रं खण्डपटः । ग्रहाः दशैन्द्रवायवादयः । अत्र ग्रहपदोत्तरैकवचनार्थो विवक्षितो न वेति संशये पूर्वपक्षमाह । एकत्वेति । एकत्वयुक्तं ग्रहादिद्रव्यं संमार्गस्योद्देश्यं श्रुतिसंयोगाद् एकत्ववाचकपदघटितत्वादतः एकस्य एकत्वविशिष्टग्रहस्यैव संमार्गः न तु दशानामिति भावः ॥ १२ ॥

सर्वेषां वा लक्षणत्वादविशिष्टं हि लक्षणम् ॥ १३ ॥

सिद्धान्तमाह । सर्वेषामिति । सर्वेषां संमार्गः कार्यः लक्षण-

* शास्त्रदीपिकादिग्रन्थे तु लक्षणां विनैव क्रये साक्षादन्वयः स्वीकृतः । तस्य चामूर्त्तस्य साक्षात्करणत्वं न संभवतीति द्रव्यपरिच्छेदद्वारा तदुपपादनीयमिति च विस्तरेण निरूपितं तत्तत एवावगन्तव्यम् ।

त्वात् । ग्रहत्वात् । ग्रहत्वजातिरूपं यद्ग्रहलक्षणं तस्य सर्वेषु सत्त्वात् । लक्षणं लक्षणा शक्यसंबन्धः । ग्रहत्वजातिप्रतियोगिकः । अविशिष्टमविलक्षणम् । अयं भावः । आकृत्यधिकरणन्यायेन ग्रहपदस्य ग्रहत्वमर्थः । तस्य संमार्गेणान्वयासंभवाल्लक्षणावृत्त्या व्यक्त्युपस्थितिमङ्गीकृत्य तेनैव साकं संमार्गस्यान्वयो वाच्यः । तत्र लक्षितदशग्रहाणां मध्ये अमुकमेव ग्राह्यमित्यत्र नियामकाभावात्सर्वेषां ग्रहणमिति ॥ १३ ॥

चोदिते तु परार्थत्वाद्यथाश्रुति प्रतीयेत ॥ १४ ॥

ननु पशुना यजेतेत्यत्रापि पुंस्त्वमेकत्वं चाविवक्षितं स्यादुक्तयुक्तेरत आह । चोदितइति । चोदिते विहिते उपादेये पश्वादौ यथाश्रुति श्रुत्यनतिक्रमेण एकत्वादिविशिष्टः पशुः प्रतीयेत अवेयात् । परार्थत्वात् । यागार्थत्वात् । अयं भावः आकृत्यधिकरणन्यायेन ग्रहपदस्य ग्रहत्वमर्थः तस्य संमार्गासंभवात्तदाश्रयो लक्ष्यते । तस्य द्वितीयाश्रुत्या प्राधान्यात् प्रतिप्रधानमङ्गावृत्तिरिति न्यायेन दशस्वप्यङ्गावृत्तिः प्राप्ता । सर्वेषु ग्रहेषु संमार्गप्राप्तौ संमार्गः कियत्सु कार्य इत्याकाङ्क्षैव नोदेति अतो ऽविवक्षा । एवमपि एकत्वविवक्षायां संमार्गेणान्वितेषु ग्रहेषु एकवचनेनेतरग्रहेषु नित्यं प्राप्तसंमार्गस्य परिसंख्या कार्या । सा विधिमन्तरा न संभवतीति विध्यावृत्तौ वाक्यभेदः ग्रहं संमृज्यात् तं चैकमिति । पशोस्तु क्रियां प्रत्यङ्गत्वात्प्रत्यङ्गं क्रियाप्राप्त्यभावात्कियद्भिः पशुभिः कार्यमित्याकाङ्क्षोदयाच्छ्रूयमाणा संख्या विवक्षिता । तथा ऽपि अनेकगुणविशिष्टैकक्रियाविधानाच्च विध्यावृत्तिप्रयुक्तो वाक्यभेदश्चेति* ॥ १४ ॥

चमसादौ संमार्गाननुष्ठानम् । अधि० ८ ।

संस्काराद्वा गुणानामव्यवस्था स्यात् ॥ १५ ॥

पूर्वोदाहृतवाक्यएव शक्त्या ग्रहत्वमर्थः उत सोमलिप्तपात्रमात्रं लक्षणया ऽर्थ इति संशये पूर्वपक्षमाह । संस्कारादिति । गुणानां संमा-

* अर्थैकत्वविशिष्टस्य ग्रहस्य संमार्ग एको ऽर्थो विधीयते तेन न कश्चित्पूर्वोक्तो दोषः स्यादिति मतम् । कस्तदा भवति वाक्यार्थः । यद् ग्रहजातीयमेकसंख्यं च द्रव्यं तस्य संमार्ग इति, एवमपि सर्वेषां प्रत्येकमेकत्वाद् ग्रहत्वाच्च संमार्गस्य च तद्गुणत्वात्सर्वत्र प्राप्तिः स्यादिति शास्त्रदीपिकायां विस्तरः ।

ब्रह्माज्ञानस्य स्वात्मावगाहित्वेनाधिकावगाह्यपि ब्रह्मज्ञानं निवर्तकमिति' दृष्टान्तदार्ष्टान्तिकभावोपवर्णनमपि निरस्तम् । सति हि ब्रह्मज्ञानस्याधिकविषयत्वे विरोधाभावसंभावना तदेव तूक्तयुक्त्या न संभवतीत्यलं विरोधाभावशङ्कया तदर्थं दृष्टान्तानुसरणेन च । वृत्त्यंशस्य जडत्वेन स्वभासकत्वायोगात् ।

६९–यत्तूत्प्रेक्षितं 'शब्दादप्यपरोक्षवादिनां वाक्यसमुत्थापरोक्षधीरज्ञाननिवर्तिका शाब्दबोधे च शब्दानुपस्थिताभाननियमेन वृत्त्युपस्थापकपदविरहाद्वृत्तिर्नावभासितुमर्हतीति' । तदसत् । वाक्यसमुत्थापरोक्षधीरज्ञाननिवर्तिकेत्यभ्युपगम्य वाक्यसमवधाने वृत्त्युपस्थापकपदविरहाद्वृत्तिर्नावभासितुमर्हतीत्युक्तेर्व्याहतत्वात् । नन्वखण्डाकाराकारितवृत्त्युपस्थापकपदविरहात्तादृशवृत्तिर्नावभासितुमर्हतीति चेन्न । तत्त्वमादिपदानां जहदजहल्लक्षणावृत्त्याऽखण्डाकाराकारितवृत्त्युपस्थापकानां विद्यमानत्वात् । न हि वाच्यवृत्त्यैवार्था उपस्थाप्यन्ते न लक्षणावृत्त्येति वक्तुमपि शक्यम् । प्रसिद्धिविरोधात् । एवं च तत्त्वमादिपदोपस्थाप्याखण्डाकाराकारितवृत्त्या स्वविरोध्यज्ञाननाशे युज्यत एव तदुपादेयजगन्निवृत्तिरिति ।

७०–[स्नेह· ५१] एतेन 'चरमावृत्तिर्न निर्विशेषज्ञानस्वरूपा ब्रह्मस्वरूपविश्रान्तस्य तथाविधज्ञानस्याऽज्ञानात्रकाशप्रदस्य तेन विरोधासंभवात् । ज्ञानान्तरस्य निवर्तकत्वे तज्ज्ञानमपि ज्ञातृज्ञेयाद्यनुबन्धितया चिद्रूपकमिति तदपि निवर्त्यान्तर्गतमिति तन्निवर्तकं वाच्यम् । तन्निवर्तकमपि च ज्ञानं चिद्रूपकमिति तस्यापि निवर्तकान्तरमित्यनवस्थेति' । तत्सर्वमुन्मुग्धप्रलापमात्रम् । अखण्डाकाराकारितायाश्चरमवृत्तेरज्ञाननिवर्तकत्वस्य कतकरजोदृष्टान्तादिना ब्रह्मविद् ब्रह्मैवभवतीति श्रुत्या च स्वनिवर्तकत्वस्य च सिद्धो भव-

द्वाङ्मात्रेण तयोरविरोधासंभवात् । ननु सा वृत्तिर्ब्रह्म स्वं च विषयीकरोति । स्वं चाज्ञानकार्यमित्यज्ञानविषयकत्वात्तस्यास्तेनाविरोध उच्यते इतिचेत्साधूच्यते । युज्यते तेऽविचारशालिनस्तथाभिधानम् । वृत्तेः स्वविषयकत्वमाचक्षाणो भवानाचष्टां स्वविषयकत्वं नाम किं स्वव्याप्यत्वमुतस्वप्रकाशकत्वम् । नाद्यः । कर्तृकर्मविरोधात् । नह्यङ्गुल्यग्रं तेनैवाङ्गुल्यग्रेण स्पृश्यते जिह्वाग्रेण वा जिह्वाग्रम् । नाप्यन्त्यः । अप्रकाशलक्षणाज्ञानकार्यत्वेन स्वपरप्रकाशकत्वासंभवात् । नचाप्रकाशकत्वेन तस्या अनुपयोगः शङ्क्यः । स्वयं प्रकाशस्वरूपस्य ब्रह्मणः प्रकाशार्थं तस्या अनुपयोगे ऽप्यज्ञदृष्ट्यावरकाज्ञानावरणभङ्गार्थं तस्या आवश्यकत्वात् । तथाचोक्तम् । 'ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्ष्यते । स्वयं प्रकाशरूपत्वादाभासो नोपयुज्यते' इति । एवं च ब्रह्मज्ञानेनैव ब्रह्माज्ञाननिवृत्तौ तन्निवृत्त्या च तत्प्रयुक्तकार्यप्रपञ्चस्यापि निवृत्तिसंभवे ऽलं तदर्थं ज्ञानान्तरानुसरणेन तस्य च ज्ञातृज्ञेयाद्यनुबन्धितया चिद्रूपकत्वोत्प्रेक्षणेन च ।

७१–[स्नेह॰ ५१] एतेन 'निवर्तकत्वेनाभिमतज्ञानस्य चिद्रूपकत्वविरहे तु निर्विशेषज्ञानस्वरूपब्रह्मात्मन्येव पर्यवसानमित्यज्ञानाश्रयत्वेनाभिमतस्य ज्ञानस्याज्ञाननाशकत्वमापतितमित्यादि' तत्सर्वं परास्तम् । निवर्तकत्वेनाभिमतयाऽखण्डाकारवृत्त्या सकलाज्ञाननाशे तत्प्रयुक्तज्ञातृज्ञेयादिभेदस्यापि नाशेन चिद्रूपकत्वनिवर्तिकायास्तस्याश्चिद्रूपकत्वोक्तेरसम्भवात् । न च तस्या निर्विशेषज्ञानस्वरूपत्वम् । तस्या अज्ञानकार्यत्वात् । नाप्यद्वैतहानिः । अज्ञाननिवृत्त्या तस्या अपि निवृत्तेरित्यसकृदावेदितम् । एतेन 'चरमवृत्तेः स्वनाशे किमपि कारणं नोक्तं भवती'त्यपि प्रत्युक्तम् ।

७२ 'यच्च द्वितीयकारणनिरपेक्षप्रतियोगिनः प्रतियोगित्वोपादाननाशत्वरूपद्वयावच्छिन्नस्य स्वस्यैव स्वनाशकत्वाभिधानं तत्पुनरत्यन्तसाहसिकतामात्रं तथाहि यादृशरूपद्वयावच्छिन्नस्य तस्य प्रतियोगिनो नाशकत्वं ब्रूषे तादृशरूपद्वये द्वित्वजनिकाऽपेक्षाबुद्धिर्द्वये द्वयत्वनियामिका बुद्धिश्च कथं नश्यतु । नहीतरापेक्षा बुद्धीनामिवास्याश्चतुर्थक्षणनाश्यत्वं युक्तं वक्तुं तदानीं क्षणत्वनियामकोपाधीनामभावात् भावे वा तन्नाशकस्यैव पुनर्दौर्लभ्यापातादिति'। तदसंबद्धप्रलपितम् । स्वस्य स्वनाशकत्वासंभवमुत्प्रेक्षमाणेन भवताऽसंभवहेतौ प्रदर्शयितव्ये द्वित्वजनकापेक्षाबुद्धिनाशानुपपत्त्युद्भावनस्याप्रयोजकत्वात् । न च स्वस्य स्वनाशकत्वासंभवेऽपि । 'ब्रह्मविद् ब्रह्मैव भवती'त्यादिश्रुतिशतैर्ब्रह्मवेदनस्य निर्विशेषब्रह्ममात्रपर्यवसायित्वप्रतिपादनस्य स्वस्य स्वनिवर्तकत्वास्वीकारेऽनुपपत्तेः । निवर्तमानं च ब्रह्मविज्ञानं स्वावच्छेदकोक्तद्वयोपेतमेव निवर्तते न तु तदनुपेतम् । न हि शिखिनि ध्वस्ते शिखाऽवशिष्यते । ननूक्तरूपद्वयावच्छिन्नस्य सकलविशेषणविशिष्टस्य स्वेन निवृत्तावपि स्वावच्छेदकगतद्वित्वजनकापेक्षाबुद्धिनाशयोगात्तस्यां ध्रियमाणायां द्वित्वानाशे च कथं सर्वात्मनास्वनिवृत्तिरिचेत् । किं द्वित्वानाशात् स्वनिवृत्त्यभावं ब्रूषे आहोस्विदपेक्षाबुद्ध्यनाशादुभयाद्वा । नाद्यः । उक्तरूपद्वयावच्छिन्नस्य धर्मिण एव नाशे तदवच्छेदकगतद्वित्वावस्थितेरसंभवात् । निरधिष्ठानस्य धर्ममात्रस्यावस्थितेरशक्यत्वात् । नापि द्वितीयः । अखण्डाकारवृत्त्या सकलवृत्त्युपादानाज्ञाननाशेऽपेक्षाबुद्धिरूपवृत्त्यन्तरावस्थानायोगात् । अत एव च न तृतीयपक्षो ऽपि संभवदुक्तिक इति न काप्यनुपपत्तिः स्वस्य स्वनिवर्तकत्वे ।

७३—[स्नेह· ५२]· यत्तु 'जगद्बाधजनिकायाश्चरमब्रह्मज्ञा-

नव्यक्तेः स्वयमपि कल्पितत्वात्तत्कल्पकदोषानुवृत्तिस्तत्काले आवश्यकी सोऽपि च दोषः कल्पितोऽथ तत्कल्पककल्पकोऽपीत्यनवस्थितानन्तकल्पनाव्यासक्तचेतसो मुच्यमानस्य जन्तोर्न ब्रह्मज्ञानोदयसंभवो ज्ञानानामयौगपद्यात् । यौगपद्याङ्गीकारे च कार्यकारणभाव एवासंभवीत्यादि '। तदत्यन्तदुर्बोधविलसितम् । यदि ज्ञानानामयौगपद्यं वेत्ति भवान् कथं तर्हि चरमब्रह्मज्ञानव्यक्तिकाले ऽनन्तकल्पनाव्यासक्तिमुत्प्रेक्षते । नहि ज्ञानोदये सति कस्या अपि कल्पनायाः संभवः । तासामज्ञानोपादानत्वात् । ज्ञानेन चाज्ञाननाशात् । ननु कल्पनाव्यासक्तमनसो ज्ञानोदय एव न भवतीति चेन्माभूत्तथाविधस्य ज्ञानोदयः शान्तोदान्त उपरतस्तितिक्षुरित्यादियथोक्तलक्षणसंपन्नस्य गुरुशास्त्रानुविधायिनस्तु केन स प्रतिबध्यताम् । ननु चरमज्ञानव्यक्तेः कल्पितत्वात्तत्कल्पककल्पनानवस्थितिव्यासक्तिरेव जायते न चरमज्ञानव्यक्तिरिति चेन्नैवम् । आत्मज्ञानस्यैवासंभवे 'तरति शोकमात्मवित्' 'सोऽविद्याग्रन्थिं विकिरतीह सोम्ये' त्यादिश्रुतिप्रतिपादितात्मज्ञानफलस्य 'अथातो ब्रह्मजिज्ञासेति' ब्रह्मज्ञानकर्तव्यताप्रतिपादनस्य 'श्रोतव्यः श्रुतिवाक्येभ्य' इत्याद्यात्मज्ञानोपायनिरूपणस्य चानुपपत्तेः । तस्माच्छ्रुतिप्रतिपादितस्यापि ब्रह्मविज्ञानस्याज्ञानकार्यत्वमाचादनुत्पत्तिमुत्प्रेक्षमाणो भवानात्मनः श्रुतिवैमुख्यमेव ख्यापयति । तथाचोक्तं श्रुतिशिरसि 'नावेदविन्मनुते तं बृहन्तमि' त्यादि । एतेन 'चरमज्ञानव्यक्तेर्दोषजन्यतया ऽप्रामाण्यज्ञानास्कन्दितत्वेनाज्ञाननिवर्तकत्वानुपपत्ति' रित्यपि परास्तम् । अप्रामाण्यज्ञानास्कन्दितस्यैव घटज्ञानस्य घटाज्ञाननिवर्तकत्वदर्शनाच्च । एवं चागन्तुकदोषजन्यत्वस्याप्रामाण्यप्रयोजकत्वोत्प्रेक्षणमपि व्यर्थम् । स्यात्तुदोषजन्यस्यापि

परमार्थदृष्ट्या ऽप्रामाण्यज्ञानास्कन्दितत्वात् । दोषजन्यत्वेनाप्रामाण्यज्ञानास्कन्दितत्वाविशेषेऽपि ज्ञानाज्ञानयोर्व्यवहारभूमौ निवर्त्यनिवर्तकभावः फलबलाच्छ्रुतिबलाच्च शरणीकरणीय एवेति ।

७४ यत्तु 'किं चेहोपादाननाशपदेन चरमवृत्तिजनकाज्ञानातिरिक्तोपादाननाश एव वक्तव्योऽन्यथा तु चरमवृत्तिजनकाज्ञाननाशे चरमवृत्तिरेव कथमुदियात् । ततश्च भावानामुद्यतां सान्वयस्वभावत्वाच्चरमवृत्तिकाले स्वजनकाविद्याया ध्रियमाणत्वात्तन्नाशः केन कथं किंस्वरूपश्चेति वक्तव्यमित्यादि' । तदतिफल्गु । आत्मानं लभमानाया एव चरमवृत्तेरुपादाननाशकत्वेनात्मलाभात्प्रागुपादाननाशायोगाद्यथोक्तसामग्रीसमवधाने चरमवृत्त्युदयस्य दुर्वारत्वात् । नह्यलब्धात्मिकाया एव चरमवृत्तेरुपादाननाशकत्वं केनाप्युच्यते येनोपादानकारणाभावादेव तस्या दुर्घटत्वमाशङ्क्येत । आत्मानं लभमाना तु ऽविद्यात्मिकापि उपादानं तेजस्तिमिरमिव निवारयन्त्येवोदेतीति किं विपरीतम् । निर्विशेषाद्वैतपर्यवसानाच्च तस्या न निरन्वयोत्पत्तिविनाशावपि न चोपादाननाशस्य ब्रह्मात्मकत्वे पूर्वोक्तदोषप्रसरः । उपादाननाशस्य ब्रह्मात्मकत्वेपि ब्रह्मण उपादाननाशात्मकत्वाभावादित्यादिना पूर्वमेव सविस्तरं तस्य निरस्तत्वात् ।

७४—[स्नेह॰ ५३] एतेन 'भवत्वविद्यानिवृत्तिर्वृत्तिरूपा भवतु च सा पुनरात्मरूपा वृत्तिनिवृत्तिः परं तु आत्मरूपायां चरमवृत्तिनिवृत्तौ सर्वदैव वर्तमानायां चरमवृत्तिः कथमिव लब्धपदेत्यपि प्रत्युक्तम् । वृत्तिनिवृत्तेर्ब्रह्मात्मकत्वेऽपि ब्रह्मणो वृत्तिनिवृत्त्यात्मकत्वाभावात्तदन्यत्वानन्यत्वाभ्यां निर्वक्तुमशक्यायाश्चरमवृत्तेः स्वोत्पादकसामग्रीसमवधाने निवर्तयितुमशक्यत्वात् । वृत्तिनिवृत्तेर्ब्रह्मरूप-

त्वाभिधानं तु निर्विशेषाद्वैतपर्यवसानादेवेत्यसकृदावेदितम् । कार्यभूतया वृत्तिनिवृत्याऽकार्यभूतेन ब्रह्मणैक्यस्य घटकलशयोरिवनिर्वक्तुमशक्यत्वात् । एवमविद्यानिवृत्तेर्वृत्तिरूपत्वाभिधानमपि कार्यकारणयोस्तादात्म्याभिप्रायेणैव । नह्येतावता कार्यं कारणात्मकमिति कारणेना ऽपि कार्यात्मना भवितव्यं येन तयोः समसामग्रीकता स्यात् । न खलु घटो मृदेवेति मृद् घट एवेत्यपि प्राज्ञः संभावयति । भवतापुनः कार्यकारणयोस्तादात्म्यमर्यादामविदुषा 'ऽविद्यानिवृत्तिश्चेद्वृत्तिरूपा तर्हि वृत्तित्वादेव सा वृत्तिसामग्रीजन्यैवेत्यवश्यमङ्गीकरणीयमिति' प्रलपितम् । परं तु मैवं मंस्त । अविद्यानिवृत्तेर्वृत्तिरूपत्वे ऽपि वृत्तेस्ताद्रूप्याभावेन वैलक्षण्यात्समानसामग्रीकत्वासंभवादिति दिक् । एवमेवमपरे ऽपि भूरिशो भवदुक्तिषु दोषा मादृशैरल्पधिषणैरप्युपलब्धुं शक्येरन्नित्यलं सुरगुरोरपि तत्रासामर्थ्यसंभावनया ।

७५—[स्नेह. ५४] तदेवं जगन्निवर्तकनिवृत्त्योरनुपपत्तिसंभावनाव्युदासेनोपपत्तेरेव व्यवस्थितौ भासमानस्य जगतः प्रातिभासिकरजतस्येव मिथ्यात्वमेव पर्यवस्यति । नचात्र 'सर्वं खल्विदं ब्रह्म नेह नानास्ति किंचने' त्यादिश्रुतिरेव प्रमाणमपित्वनुमानमपि । तत्तु सकलदोषाभासनिरासपूर्वकं श्रुतिपारं गतैश्चित्सुखाचार्यादिभिर्यथावत्साधूपपाद्यते । भवता पुनस्तदनधिगच्छता स्वधीदोषमेव परस्मिन्नधिक्षिपता तदाक्षिप्यते ।

७६—[स्नेह. ५८] तत्रादौ चित्सुखाचार्यप्रतिपादितमिथ्यात्वानुमानसप्रपञ्चानुवादमनु यदुक्तम् 'अयं पटः एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी, अंशित्वादिति स्थापनानुमाने सिषाधयिषितं यदेतत्त-

न्तुनिष्ठात्यन्ताभावप्रतियोगित्वं तद्यदि एतत्तन्तुनिष्ठसमवायसंबन्धावच्छिन्नप्रतियोगिताकात्यन्ताभावप्रतियोगित्वं साध्यते तदा विरुद्धो हेतुर्न हि एतत्तन्त्वन्यासमवेतस्यांशित्वमेतत्तन्तुसमवेतत्वं विना संभवतीत्यादि'। तदसत्। साध्याभावव्याप्यस्यैव हेतोर्विरुद्धत्वाभ्युपगमात्। न च प्रकृतो हेतुः साध्याभावव्याप्तः। एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वं हि साध्यं तदभाववति विपक्ष आत्मनि अंशित्वस्यावृत्तेः। एवं चान्वयेन व्यतिरेकेण च व्याप्तिमतोंऽशित्वरूपहेतोः प्रकृतसाध्यनिरूपितव्याप्यत्वस्यैव सिद्धौ तस्य तदभाव व्याप्यत्वरूपविरुद्धत्वोत्प्रेक्षणं साहसमात्रम्। नाप्यसिद्धो हेतुः। परस्यांशित्वे व्यवहारतो वादिनोरविवादात्। नन्वन्यासमवेतस्य वृत्तिमतोंऽशित्वमेतत्तन्तुसमवेतत्वं विनाऽनुपपन्नमित्यंशित्वेन हेतुना एतत्तन्तुसमवेतत्वमेव साध्यते नत्वेतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वमिति चेन्न। अन्यासमवेतस्यैवांशिन एतच्छुक्तिरजतस्यैतच्छुक्तिसमवेतत्वाभावदर्शनेनांशित्वस्य एतत्तन्तुसमवेतत्वव्याप्यताया वक्तुमशक्यतया तेनैतत्तन्तुसमवेतत्वोन्नयनासंभवात्। प्रत्युत शुक्तिरूप्यादिनिदर्शनैश्चैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वस्यैव तवानुमातुं युक्तत्वात्।

७७—[स्नेह॰ ५६] यत्तु 'यत्तु एतन्निष्ठसमवायसंबन्धावच्छिन्नप्रतियोगिताकात्यन्ताभावाप्रतियोगित्वमेतत्तन्तुसमवेतत्वप्रयोजकमिति'। तदप्यविचारभणितम्। एतन्निष्ठसमवायसंबन्धावच्छिन्नप्रतियोगिताकात्यन्ताभावाप्रतियोगिन्यपि ब्रह्मणि एतत्तन्तुसमवेतत्वाभावात्। नाप्येतन्निष्ठप्रागभावप्रतियोगित्वादिकमेतत्तन्तुसमवेतत्वप्रयोजकं वक्तुं पार्यते। एतत्तन्तुसमवेतत्वे एतन्निष्ठप्रागभावप्रतियोगित्वं हेतुः, एतन्निष्ठप्रागभावप्रतियोगित्वे च एतत्तन्तुसमवेतत्व-

मिति परस्पराश्रयात् । एवं चांशित्वेन हेतुना पटे एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वमेव सिद्ध्यति न कथमप्येतत्तन्तुसमवेतत्वमिति निर्दुष्टमेवोक्तानुमानमिति ।

१८—[स्नेह. ६०] यत्तु 'येन संबन्धविशेषेण तन्तुषु पटः संबद्धस्तेनैव संबन्धेन पटं ऽशित्वव्यवहारोऽपि वक्तव्यस्तेनैव च संबन्धविशेषेण पुनस्तत्तन्तुवृत्तिकात्यन्ताभावप्रतियोगित्वं तस्य पटस्य मिथ्यात्वव्यवहारनिर्वाहकम् । एवं चांशितानियामकसंबन्धेन तन्तुवृत्तिकात्यन्ताभावप्रतियोगी चेत्पटस्तर्हि तस्यांशितैवासिद्धा । नहि पटस्तत्र तेनैव संबन्धविशेषेण वर्तते न वर्तते चेत्युभयमवकल्पते' इत्यादि । तदशुद्धमुक्ता कुचोद्यम् । तन्तुषु पटतदभावयोस्तेनैव संबन्धविशेषेण वृत्तितायाः परैरनभ्युपगमात् । आध्यासिकस्वरूपसंबन्धाभ्यामेव च तत्र तद्वृत्तितायाः स्वीकारात् । पटरूपोऽशी आध्यासिकसंबन्धेन तन्तुषु वर्तमानोऽपि तन्तुस्वरूपेण संबन्धेन न वर्तत एव । श्रुतिश्चात्र भवती 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति' कार्यस्याध्यस्तत्वं ब्रुवती तत्संबन्धस्यार्थत आध्यासिकत्वमेवाहेति न संबन्धस्य काल्पनिकत्वासिद्धिः । तेन च संबन्धेनोपादानसंसृष्टमपि पटादिकार्यं वस्तुत उपादाननिष्ठात्यन्ताभावस्य प्रतियोग्यपीति न काप्यनुपपत्तिः ।

१९—[स्नेह । ६१] यत्तु 'काल्पनिकः संसर्ग इति ब्रुवाणो भवान् संसर्गस्य दोषाजन्यकल्पनैकशरीरत्वमभिमन्यते उत दोषजन्यकल्पनाशरीरत्वमिति भणतु । तत्र कल्पनाया दोषजन्यत्वे तु स दोषः काल्पनिकोऽथाकाल्पनिक इति विवेचनीयम् । तत्र काल्पनिकत्वेऽनवस्थाप्रसङ्गः' इत्याद्याम्रेडनम् । तदाम्रेडनेनैवातीतपरिच्छेदेषु दत्तोत्तरम् । आध्यासिकसंसर्गकल्पनाजनकदोषस्यानिर्वचनीय-

अथ परैर्घटादेः पारमार्थ्याङ्गीकारेण घटादिभेदे परमार्थसत्प्रतियोगिकत्वप्रसिद्ध्या न विशेषणासिद्ध्या साध्याप्रसिद्धिरिति चेन्न। घटादेः परमार्थसत्त्वाङ्गीकारे तदभावे परमार्थसत्प्रतियोगिकत्वाभावस्य दुष्प्रसाधत्वात् । परमार्थसत्त्वानङ्गीकारे वा साध्याप्रसिद्धेर्दुरुद्धरत्वात् ।

अलीकप्रतियोगिकाभावाभ्युपगमपक्षे परमार्थसत्प्रतियोगिकत्वप्रसिद्धिनिरपेक्षस्य परमार्थसत्प्रतियोगिकाभावस्य सुप्रसाधत्वेऽपि तस्य सिद्धतया सिद्धसाधनप्रसङ्गः । न ह्यलीकप्रतियोगिकाभावानभ्युपगमः प्रतियोगिप्रसिद्धिनिरपेक्षाभावाभ्युपगन्तृमते । सिद्धसा*धनस्य स्वार्थनुमाने दोषत्वानङ्गीकारेऽपि परार्थानुमितौ तस्य दोषत्वमावश्यकमिति तु कथातत्त्वज्ञेषु सुप्रसिद्धमिति किं तदुपपादनप्रयासेन । किं चाद्वयशासने परमार्थसदात्मप्रतियोगिकभेदो मायादाववश्यमङ्गीकार्योऽन्यथा मायादेर्ब्रह्मतादात्म्यप्रसङ्गः । एवं च परमार्थसत्प्रतियोगिकाभावस्यात्मन्यपि सत्त्वेन बाधोऽपि । न चाद्वयवादे निर्विशेषसन्मात्रस्य ब्रह्मण एव पारमार्थ्याभ्युपगमेन तस्यैव चैकस्यात्मत्वाङ्गीकारेण स्वस्मिन् स्वभेदानभ्युपगमेन चात्मत्वावच्छिन्नधर्मिके भेदे परमार्थसत्प्रतियोगिकत्वासंभवेन न बाधसंभवोऽपीति वाच्यम् । मायादावात्मप्रतियोगिकभेदस्येव आत्मन्यप्यात्मप्रतियोगिकभेदस्य सत्त्वेन बाधस्यावश्यकत्वात् । न चात्मन्यात्मप्रतियोगिकभेदस्य सत्त्वेऽपि स कल्पित इति न दोष इति वाच्यं भेदमात्रस्यैव भवतः कल्पितत्वेन आत्मन्यात्मप्रतियोगिकभेदे मायादौ ब्रह्मप्रतियोगिकभेदापेक्षया विशेषस्य दुर्वचत्वेन कल्पितत्वोक्तेरतिशयानाधायकत्वात् । तदा

* इच्छापक्षतावादिमते सिद्धसाधनं न दोष इत्यत आह–सिद्धसाधनस्येति, । कथायां वादिजिज्ञासानुरोधेन विवक्षितार्थाभिधानेन सिद्धेऽर्थे। जिज्ञासाऽनुदयेन तस्यावश्यं दोषतेति भावः ।

हि कल्पितत्वोक्तिर्विशिंष्याद्यदि अकल्पितोऽपि भेदो भवेत् । न च तथाऽस्ति अनुयोग्यन्यूनसत्ताकत्वमभावे विवक्षित्वा तद्दोषोपशमप्रयत्नस्तु आशामोदकैरशनायोपशमसमः । अनुयोग्यन्यूनसत्ताकत्वनिवेशस्य मिथ्यात्वसिद्ध्यधीनसिद्धिकतया तथा वक्तुमशक्यत्वात् । एवं चाकल्पितस्य भेदस्यासत्त्वेन कल्पितस्यात्मभेदस्य चात्मन्यपि सत्वेन आत्मत्वावच्छिन्नधर्मिको भेदो न परमार्थसत्प्रतियोगिकः । इत्येतस्य बाधितत्वमिति न बहूपपादनमर्हति ।

किं च साध्यतावच्छेदककुक्षौ परमार्थसत्प्रतियोगिकत्वनिक्षेपोऽपि स्वसिद्धान्ताभिनिवेशनिबन्धन एव । न हि परैः परमार्थसत्त्वमपरमार्थसत्त्वमिति विभागः कल्पितो येन तत्सिद्धान्ततात्पर्येण विशेषणप्रसिद्धिर्निरुह्येत । एवं च पारमार्थ्यविशेषणस्यान्यतरासिद्ध्याऽसिद्धिरपि ।

यदि तु प्रतियोगित्वस्य स्वरूपसंबन्धरूपतया परमार्थसतः सिद्धैव परमार्थसत्प्रतियोगित्वसिद्धिं मनुषे तर्हि प्रतियोगित्वस्य निरूपकद्वयसापेक्षत्वात्किं तद् द्वयमिति निरूपय । तत्र यदि निरूपकद्वयं परमार्थसद् ब्रह्म जगच्चोच्यते तत्र जगत्यात्मभेदस्य परमार्थसत्प्रतियोगिकत्वेऽपि आत्मत्वावच्छिन्नधर्मिके भेदे परमार्थसत्प्रतियोगिकत्वविरहेणात्मातिरिक्तस्य मिथ्यात्वसिद्धिरित्यभिप्रायस्ते तदा त्वदनुमानस्य घटत्वावच्छिन्नधर्मिको भेदो न घटप्रतियोगिकः । घटाप्रतियोगिकत्वात् पटप्रतियोगिकभेदवदित्याभाससमानता । यदि घटत्वावच्छिन्नधर्मिकभेदे घटत्वावच्छिन्नप्रतियोगिकत्वानङ्गीकारेऽपि घटप्रतियोगिकत्वमङ्गीक्रियते तदा आत्मत्वावच्छिन्नधर्मिकभेदे परमार्थसत्त्वावच्छिन्नप्रतियोगिकत्वानङ्गीकारेऽपि परमार्थसत्प्रतियोगिकत्वमपि स्वीक्रियते इति नाणुरपि विशेषः ।

यदि त्वात्मप्रतियोगिकत्वाभावेन सामान्यमुखव्याप्त्या शुक्तिरूप्यादाविव परमार्थसत्प्रतियोगिकत्वाभावसिद्धिप्रत्याशा तदा साऽपि दुराशैव हेतोः सोपाधिकत्वेन तथा वक्तुमशक्यत्वात् । तथा हि यत्रयत्र परमार्थसत्प्रतियोगि*कत्वाभावः शुक्तिरूप्यभेदादौ तत्रतत्र दोषजन्यप्रतियोगिकत्वमिति साध्यव्यापकत्वं साधनाधिकरणं त्वात्मप्रतियोगिकाभाववत्त्वेन घटभेदोऽपि तत्र दोषजन्यप्रतियोगिकत्वं नास्तीति साधनाव्यापकत्वमिति दोषजन्यप्रतियोगिकत्वं भवत्युपाधिः ।

किंच कथंचिदुपाधेरनिश्चयाभिधानेऽपि वा संदिग्धोपाधेरावश्यकत्वेन अनुकूलतर्कानवतारे तस्यैव वाद्यभिमतार्थहानिहेतुतया आवश्यकत्वम् । अत एव त्वनुकूलतर्कानवतारे तत्रतत्र संदिग्धोपाधेर्दूषकत्वं दीधितिकृदाद्यनुमतमिति हेत्वाभासकाण्डविदां सर्वमपरोक्षमिति किं वृथा चोदेन ।

यच्चाभावीयप्रतियोगित्व—संबन्धीयप्रतियोगित्वसाधारण्यभ्रमेण "न च घट—पटसंयोगे व्यभिचारः । हेतुमत्तया निर्णीतेऽङ्कुरादाविव साध्यसन्देहस्यादोषत्वात्" इत्याहाद्वैतसिद्धिकारस्तदेतदपि न युक्तं कार्यताऽवच्छेदककारणतावच्छेदकसंबन्धभेदेन कार्यकारणभावभेदस्यावश्यकतया संयोग—समवायादिस्थलीयतत्तत्प्रतियोगित्वस्यैव भिन्नत्वेऽभावसाधारण्येन सर्वसंबन्धसाधारणप्रतियोगित्वैक्यशङ्काया अप्यसम्भवेन व्यभिचारशङ्काया अवतरितुमप्यशक्यत्वात् ।

यच्च "एवमन्येऽपि प्रयोगा यथोचितमारचनीया विपश्चिद्भिरिति दिक्" इत्याह स्माद्वैतसिद्धकारस्तदेतदपि सर्ववीरचया-

* अस्ति चेद साध्योपाध्योः समा व्याप्तिरित्यपि निरोचणीयम् ।

नन्तरं शल्ये पाण्डवविजयप्रत्याशाऽऽदृशं निरुक्तानुमानानां सर्वेषां शकल*शः प्रतिक्षेपेऽनुमानान्तराणां जगन्मिथ्यात्वसाधकत्वप्रत्याशाया अङ्कस्थमपहाय बालं गर्भस्थस्य शीलाशाप्रायं तर्ककर्कशानां चित्सुखाचार्यादीनां सर्वेषां न्यायप्रयोगस्याशेषेण दूषितत्वेन परप्रयोगाणां परत एवोपेक्षणीयत्वात् ।

इत्यकिंचिदिदमद्वैतसिद्धिकृतां मिथ्यात्वानुमानसंनहनम् ।

यच्च उपाधिहेत्वाभासादिदोषजर्जरं स्वीयं प्राच्यं चानुमानकलेवरमनिरीक्ष्य—हेतवोऽभीष्टसिद्धयर्थं सम्यञ्चोबहवश्च नः । अल्पाः-परस्य दुष्टाश्चेत्यत्र स्पष्टमुदीरितम् । इति सोष्णा†निश्वासं प्राह तदप्यभिनिवेशवशंवदतामेवास्य प्रव्यनक्ति अनुमानशरीरे सर्वाङ्गदोषस्य सर्वत्र प्रसाधितत्वात् ।

यदपि साटोपं मिथ्याऽऽस्फालनम्—अभीष्टसिद्धावनुकूलतर्कबलाबलं चात्र परीक्ष्य यत्नात् । प्रवक्ष्यते दोषगणाः परेषां न खेदनीयं तु मनोऽ‡धुनैव ॥ तदेतदपि प्रमाणपरतन्त्रेभ्यो न रोचते यतोनिर्विशेषब्रह्मवादे नानुकूलतर्कावतारसंभवोऽपि तर्को हि प्रसङ्गफलः । प्रसङ्गश्च भेदनिबन्धनः । न च सोऽभ्युपगतोभवता ।

न च व्यवहारकाले व्यावहारिकभेदस्य प्राची§नाचार्यैः खण्डनैकोद्यमैः खण्डना‖चार्यैश्चाभ्युपेततया भेदानभ्युपगमनिबन्धनदोषदानमद्वैतसंप्रदायतात्पर्यानभिज्ञतानिबन्धनमेवेति वाच्यम् । सत्यमेतदलौकिकपाण्डित्यभाजोभवादृशस्य पण्डितपुङ्गवस्य तात्पर्यं

* खण्डं कृत्वेत्यर्थः ।

† प्रायोऽभिमानमूला वाच उष्णनिश्वासभुवोभवन्तीति सार्वजनीनमेतत् ।

‡ मनोमुधैवेत्यपि पाठान्तरम् ।

§ श्रीहर्षमिश्रैश्च । ‖ गौड़पादश्रीशङ्कराचार्यप्रभृतिभिः ।

मादृशां दुरवबोधमिति परं तु भेदखण्डनयुक्तीनां कोऽयं पक्षपातो यदिमास्तात्त्विकं भेदं न सहन्ते व्यावहारिकं तु क्षमन्ते इति हेतूपन्यासपुरस्सरं वद न हि भवत इव तासां भेदखण्डनयुक्तीनामप्यस्ति संकल्पो यद् व्यावहारिकं भेदं न स्प्रक्ष्याम इति । किंच भेदकर्तनकुठाराणामात्माश्रयान्योन्याश्रयादीनां व्यवहाराविघातकत्वे आत्माश्रयादिदोषदूषितानामपि लक्षणादीनामदुष्टत्वप्रसङ्गेन व्यवहारैापयिकत्वप्रसङ्गः । न ह्यनिर्वचनीयभेदाभ्युपगमश्रवणमात्रेण दोषाणां पलायनपरायणताऽभ्युपगमो निर्युक्तिको युक्तः ।

भवन्मतेऽपि च चोद्यं वा परिहारो वा क्रियतां द्वैतभाषया । अद्वैतभाषया चोद्यं नास्ति नापि तदुत्तरमित्युक्तरीत्या दूषणादिव्यवस्था व्यवहारकाले दुष्टव्यवहारासिद्धिसमर्थनायैव । एवं च भेदस्य दोषव्याकु*लतया तदनङ्गीकारे कथं तन्निय†तव्यवहारसमर्थनमित्यतिस्पष्टम् ।

तस्माद् भेदस्य तात्त्विकत्वरक्षार्थं यावान् मम परिकरोऽपेक्षितस्तावानेव तेऽपि अनतिप्रसक्तव्यवहारसमर्थनाय व्यावहारिकभेदसंरक्षणार्थमिति भेदस्य व्यावहारिकसत्त्वार्थमपि अनिर्वचनवादिना त्वयाऽन्योन्याश्रयादिकमुद्ध‡रणीयं परस्परसापेक्षत्वे व्यवहारस्याप्यसंभवात् । न हि व्यावहारिकमृदः स्वजन्यघटसापेक्षत्वम् ।

* दोषाकुलोऽपि चेद् भेदोऽभ्युपेयेत तेन व्यवहारोऽपि चेत् क्रियेत तर्हि दोषाणां व्यवहारभङ्गाप्रयोजकतया परमार्थभूमौ अद्वयनयानुयायिनां दोषकथाया अप्यसंभवेन अन्योन्याश्रयादिदोषाणां सर्वथा निर्विषयत्वप्रसङ्गात् दोषदूषितस्यापि च व्यवहारस्य नासिद्धिसंभव इति कृतसर्वविप्लवस्य तेऽनधिकारः कथास्विति तु निगूढभणितम् ।

† एवं च भेदोपजीव्यानुकूलतर्कनिरूपणं न तदनभ्युपगन्तृमते इति तत्त्वम् ।

‡ न च क्षन्ताऽस्मि तत्परिहारे इति तु तात्पर्यम् ।

न च वस्तुसन्तं भेदमनभ्युपेत्यापि भेदमात्रेण वा भेदज्ञानमात्रेण वा व्यवहारनिर्वाहस्संभवतीति वाच्यं तथा सत्याविद्यिकव्यावहारिकभेदस्याप्यसिद्धेः ।

किंच भेदमात्रं वा भेदज्ञानमात्रं वा अन्योन्याश्रयाद्यवतारे कथमात्मानं लभेत न हि स्वरूपसन्नेव भेदो भीरुभावमवाप्नोति न तु भेदमात्रं भेदज्ञानमात्रं वेति क्वाप्यवधारितमावयोर्येन भेदमात्रे वा भेदज्ञानमात्रे वा आत्माश्रयादीनामनवकाशो वक्तुं शक्यः । उत्पत्ति-स्थिति-ज्ञप्तिषु त्रेधैव तेषां प्रतिरोधकत्वाङ्गीकारात् । न च भेदप्रतीतेर्वास्तवत्वेऽन्योन्याश्रयादिदोषः सावकाश इति प्रातीतिकभेदाभ्युपगमपक्षे न तद्दोषावकाश इति वाच्यम् । अद्वैतिपक्षे चरमवृत्त्यवास्तवत्वेऽपि तद्विषयस्य वास्तवत्वेन प्रतीतिवास्तवत्वस्य विषयवास्तवत्वव्यभिचारित्वात् ।

भवन्मतसिद्धे निर्विशेषे ब्रह्मणि वस्तुभूते अन्योन्याश्रयाद्यनवतारेण अन्योन्याश्रयादीनां वस्तुभूतार्थदूषकत्वव्याप्त्यसिद्धेश्च ।

नापि तद्विषयकप्रमात्मकप्रतीतिस्थलेऽन्योन्याश्रयादीनां सावकाशतया भेदप्रतीतेश्चायथाभूततया तत्रान्योन्याश्रयादयोऽनवकाशा इति वाच्यं यतस्तथा सति भेदप्रतीतेस्त्वया कुत्रापि प्रमात्वानङ्गीकारेण भेदेऽन्योन्याश्रयादीनामनवसरत्वेन तेषां क्वापि दोषतयोपन्याससंभवः ।

प्रतीतिसामान्य एवान्योन्याश्रयादीनां दूषकत्वेन प्रमात्वपर्यन्तानुधावनासंभवश्च ।

यत्तु मायायामसंभवविरहेण सर्वासंभववारकाविद्यावेषवशान्निखिलानुपपत्तिविधूननेन नाद्वयानुशासने व्यवहारानुपपत्तिशङ्कावसरोऽपीति परस्पराश्रयादिदोषदूषितशरीरमपि व्यवहारमिन्द्रजालवन्निर्व-

हेन्मायेति तत्तु बालैकवञ्चनफलं दुर्भाषितमेवानभिज्ञानां तथा सति दोषदूषितानामपि लक्षणानां लक्षणत्वसंभवे तत्रापि तत्र तत्र तत्तद्विशेषणोपादानवैयर्थ्यापत्तेः। किंच लक्ष्य—लक्षणादिव्यवस्थाया व्यवहारकाले एव त्वयाऽपि वाच्यत्वेन व्यवहारे चेददोषा हेत्वाभासोपाधि—परस्पराश्रयादयस्तर्हि वितीर्णोऽयमन्तिमोऽञ्जलिर्विज्ञवर्येण त्वयाऽनुगताऽनतिप्रसक्तव्यवहारसमर्थनायेति कथमदोषतां तेषां ब्रूयाः। ब्रूयाश्च कथमिव तेषां दोषतामभ्युपेत्य व्यावहारिकभेदसद्भावमविद्यया विद्यमानस्वरूपमपि। तज्जहीहि दोषाणां दोषत्वमुपप्लावय च त्वदीयमपि सिषाधयिषितमर्थजातम्। अभ्युपेहि वा परस्पराश्रयादिदोषाणां दोषत्वं तदुपजीव्यं भेदं च। त्यज च—अनवस्थादयो दोषाः सत्तां निघ्नन्ति वस्तुनः। अद्वैतिनां ते सुहृदः प्रपञ्चे तत्प्रसञ्जकाः। इत्यनवस्थादीनां मिथ्यासौहार्दाभिमानमद्वैतपक्षे।

तस्मादनवस्थादयो निहन्युरेव वा* भेदमथवा क्षमेरन् वा पारमार्थिकमपि भेदमिति सुष्ठु प्रसाधितं भवति।

एवं चानवस्थादीनां दोषताया भेदनैयत्येन भेदस्योपजीव्यतया नानवस्थादयो भेदमुपरोद्धुमलमुपजीव्यविरोधस्यान्याय्यत्वादिति निपुणैकनिरूपणीयमिति किमु बहूक्तेन।

यदपि वादिद्वयसिद्धमृषाभूतेन्द्रजालस्थले कारणादिव्यवस्थोल्लङ्घिकार्यादिदर्शनवदन्यत्र तथाऽदर्शनम्। दर्शने च मृषात्वे एव पर्यवसानम्। एवं च भेदप्रतीतिर्यदि मायिकी न स्यात्सर्वव्यवस्थोल्लङ्घिनी न स्यात्। सर्वव्यवस्थोल्लङ्घिनी चेयं तस्मान्मायिकीति

* पारमार्थिक-व्यावहारिकभेदभिन्नम्।

विपर्ययपर्यवसानान्मायिके व्यवस्थोल्लङ्घनस्य दर्शनेन व्याप्तिसिद्धिरिति वादितात्पर्यमुपवर्ण्यते तदपि न युक्तम् ।

इन्द्रजालस्य सर्वव्यवस्थोल्लङ्घित्वे स्वजनकसामग्रीसमवधानस्याप्यनपेक्षणीयत्वेन सर्वत्रवेन्द्रजालसंभवेन सर्वत्र सर्वं वा स्यात् । क्वचापि वा किमपि न स्यादेव वा । सर्वव्यवस्थोल्लङ्घिन इन्द्रजालस्य स्वजनकसामग्र्या अप्यनपेक्षणीयत्वात् । सामग्रीसापेक्षत्वे तु सर्वव्यवस्थोल्लङ्घनमेव कीदृशम् । न हि सर्वं सर्वमपेक्षते किन्तु किंचित्किंचिदेवेति नियमस्यान्यत्रेव अत्राप्यवलम्बनीयत्वेन विशेषानिरूपणात् ।

किंचेन्द्रजालस्य सर्वव्यवस्थोल्लङ्घित्वे ब्रह्मनाशकत्वं ब्रह्मजनकत्वं वा कुतो न* तस्येति वदावधानेन । नासंभूतार्थजनकतेन्द्रजालस्येति चेत् । तर्हि सर्वव्यवस्थोल्लङ्घिता नेन्द्रजालस्य सिध्यति ।

किंच घटादेरिवेन्द्रजालस्यापि स्वजनकसामग्रीसापेक्षत्वं स्वजन्यकार्यजनकत्वं च पदार्थान्तरैः समानमिति किमु†क्तं भवति ।

यदि त्विन्द्रजालस्य यादृशकार्यजनकत्वं न तादृशकार्यजनकत्वं दण्डघटादेरित्युच्यते तदा यादृशकार्यजनकत्वं दण्डादेर्न तादृशकार्यजनकत्वमिन्द्रजालस्येत्यपि समानम् ।

यदि त्विन्द्रजालेन घट—पटादिसाध्यं जलाहरणप्रावरणादिकार्यं जन्यते इति विवक्षसि तत्किमसदुत्पद्यते इति विश्वसिषि माध्यमिकमतं वा प्रविष्टोऽसि । औपनिषदसिद्धान्तमत्याक्षीर्वा यदेवमनवधानेन ब्रूषे। इन्द्रजालपदेन हि सिद्धौषधविशेषो मन्त्रविशेषो वा

* इन्द्रजालस्य । † न कश्चिदपि विशेष उक्तो भवतीत्यर्थः ।

वक्तव्यो न तु तदतिरिक्तं किंचिदसत्तत्त्वम् । न च तदुभयमपि स्वयं घटपटादिरूपतामुपयाति न वाऽसदुत्पद्यते न वा तेनासदुत्पादयितुं शक्यं किन्तु स्वसामर्थ्यातिशयेन तत्तत्पदार्थसार्थजनकसामग्रीविशेषमिन्द्रजालं झटिति समवधापयति । यथा योगिसंकल्पः । योगिसंकल्पोऽपि नासदुत्पादनशक्तः किन्तु जगतः पाञ्चभौतिकत्वेन सर्वस्य सर्वत्र संनिहिततया झटिति घटयति तं तमतिशयमित्येव शास्त्रसिद्धान्तः । एवं च योगिसंकल्पापेक्षयाऽल्पसत्ताकेनेन्द्रजालेनापि तत्तदर्थजनकसामग्रीसंवलनमात्रं क्रियते । न त्वसदुत्पाद्यते । अमुमेवार्थमनुस्मरति सर्वोपेता च तद्दर्शनादिति बादरायणीयसूत्रमपीति पूर्वमेव समगरिष्महि । अस्ति चेन्द्रजालेऽपि अदृष्टाकृष्टो विशेषोऽन्य*था कार्ये विशेषानुपलम्भप्रसङ्गः । कदाचिदिन्द्रजालप्रभववस्तूनां सर्वोपभोगयोग्यत्वं कदाचिदनेकोपभोगयोग्यत्वं कदाचिदेकमात्रोपभोगयोग्यत्वं कदाचित्तु दर्शनमात्रार्हत्वं न त्वशनायापिपासाद्युपशमहेतुत्वमैन्द्रजालिकस्याम्रफलादेर्नारिकेलजलादेर्वेति बहूनामस्त्यन्वयव्यतिरेकसिद्धमिति ।

अदृष्टाकृष्टोऽपि चातिशयो भवत्येवंजातीयो यथाऽल्पक्षीराऽपि धेनुश्चैत्रीयादृष्टवशाद्बहुक्षीरा मैत्राद्यदृष्टवशेन तु न तादृशीति क्षीरसामग्रीसाद्गुण्यवैगुण्यद्वारैवादृष्टस्य हेतुत्वमिति नेन्द्रजाले कश्चिदतिरेको मतिमतां मतिपथमधिरोहति । स्वल्पस्त्वतिरेको व्यक्तिभेदभिन्न इत्यवर्जनीयः । यथा पद्भ्यां गच्छन् पुरुषो यावन्तं मार्गं पुरुषायुषस्यार्द्धेन गच्छति तमेव मार्गमभिमन्त्रितां पादुकामधिरुह्य क्षणेन गच्छति धूमयानेनापि च कतिभिश्चिद्दिनैरिति निरूपकाणां सर्वमानुभविकमिति । तस्मान्नेन्द्रजालदृष्टान्तेन कार्यकारण-

* सर्वमर्यादोल्लङ्घ्याकस्मिकंकार्यकारणभावानङ्गीकारे ।

भावव्यवस्थोल्लङ्घनोपवर्णनं युक्तम् । इन्द्रजालस्य कालादृष्टादिरूपसाधारणकारणनियम्यत्वात् । स्वयं नियतासाधारणकारणजन्यत्वान्नियतकार्यजनकत्वाच्च ।

ततश्च भेदप्रतीतिर्यदि मायिकी न स्यात् सर्वव्यवस्थोल्लङ्घिनी न स्यात् । सर्वव्यवस्थोल्लङ्घिनी चेयं तस्मान्मायिकीति विपर्ययपर्यवसानमिति यदुक्तं तत्सर्वथाऽयुक्तमिति तस्मात् "अभीष्टसिद्धावनुकूलतर्कबलाबलं चाच परीक्ष्य यत्ना"दिति परेषां तर्कतत्त्वानवधाननिबन्धनमभिधानमिति । तत्सिद्धं भेदानभ्युपगन्तृमते तर्को न कथंचिदप्युपयोगितां भजते इति विदाङ्कुर्वन्तु विद्वांसः ।

किं बहुनाऽभिहितेन विद्वत्सु शीलशालिष्वमत्सरेषु
देवेश्वरे कुलिशमम्बुपतौ च पाशम् ।
भीमे गदां विश*दवाजिनि गाण्डि†वं च ॥
चक्रं च बिभ्रति समित्यथ वासुदेवे ।
युक्तिक्रमं मयि च कुच विपक्षशेषः ॥

इति श्रीपरमपूरुषकृपासरित्पूरपरीवाहपूर्णपाचस्य सत्संप्रदायाचार्यपण्डितस्वामिश्रीराममिश्रशास्त्रिणः सत्कृतौ परमाचार्यपरिचर्यास्वरूपायां स्नेहपूर्तौ प्रथमधाराप्रपाते विश्वमिथ्यात्वानुमाननिराकरणं नाम प्रथमबिन्दुः । सन्तु नः शुभाशिषः पूर्वाचार्याः । परित्राणपरायणः श्रीलक्ष्मीश्वरोऽवतु नः शरणागतदीनानुपलभ्य ।

* अर्जुने ।

† गाण्डिवं, गाण्डीवमिति शब्दद्वयमपि ।

श्रीमते रामानुजाय नमः ।

स्नेहपूर्त्तिभूमिका ।

अत्र स्नेहपूर्त्तिग्रन्थे चत्वारो धाराप्रपातास्तत्रैकैकस्मिन् धाराप्रपाते चत्वारो बिन्दवः । एवं च षोडशबिन्दुसमुदायात्मन्यस्मिन् ग्रन्थे प्रथमो बिन्दुरयमस्मिन् पण्डितपत्रे समाप्तिमुपयातः । परंतु यद्येको बिन्दुरस्य किंचिदधिकैकवर्षेण पूर्तिमापत्तर्हि बहुविस्तरस्यास्य ग्रन्थस्यास्मिन्नल्पोदरे पत्रे समापनं पञ्चदशवर्षपर्यन्तमहाकालसाध्यमनुसंधाय सर्वथा समवलोक्य चास्थास्तुतां लोकस्यामुष्य, विरतोऽस्मि विरमितोऽपि च पण्डितपत्रे मुद्रणात् । अधुना पुनरस्य मुद्रणं महानिबन्धस्य भविता स्वातन्त्र्येण स्वक्षरेषु सुशीघ्रमेव ।

यद्यप्येष निबन्धो महाजटिलातिकुटिलवादियुक्तिनिराकरणपर इति सर्वथा सारल्येन सर्वजनसाधारण्येन च सर्वार्थान् बुबोधयिषतोऽपि मे कथं कथमप्यनवाप्तान्वीक्षिकीशिक्षाणामनासादिततर्ककौशलानामगोचरतयोपेक्षास्पदतामुपगतस्तथाऽप्यस्य न सर्वत्र तादृशं काठिन्यमस्ति यादृशं वादिपरासनपरप्रकरणेषु भासत इति प्रेक्षिष्यन्ते विपश्चितः ।

सिद्धान्तसिद्धार्थाववोधपरप्रकरणानि पुनरस्य सुलभानि येषु ब्रह्मसूत्रार्थसौष्ठवाख्यानं छान्दोग्यबृहदारण्यकादितात्पर्यनिरूपणं गीतार्थस्य षट्कत्रयभेदभिन्नस्य विशिष्टाद्वैते एव सामञ्जस्यमेकदेवतावादश्चेत्यादयोऽर्था आञ्जस्येनेह सुविस्तरं निरूपिताः । तदेतद् भगवदनुग्रहेण ग्रन्थमुद्रणे एव लोकैर्विज्ञास्यत इति न बहुनिरूपणीयम् ।

विशिष्टाद्वैतसंप्रदाये पूर्वं बोधायनमहर्षिप्रणीता*वृत्तिर्ब्रह्मसूत्राणां द्रमिडा†चार्यप्रणीतं भाष्यं टङ्काचार्यनिर्मितं वार्त्तिकं चासीत् ।

आसंश्चापरेऽपि भारुचि–गुहदेवाद्याचार्यप्रणीता निबन्धास्तेष्वेषु कालमहिम्ना विलोपमुपेयिवत्सु भगवद्भिर्यामुनाचार्यपादैस्तमर्थमुद्द्योतयितुं सिद्धित्रयादिग्रन्थाः प्राणायिषत ।

येष्वार्षमतविलोमार्थानां भर्तृ‡प्रणीतभाष्यादीनां निराकरणमासीत् ।

तदनन्तरं चाद्वैतसांप्रदायिकैर्भाष्य–पञ्चपादिका–विवरण–वार्त्तिकादिनिबन्धैस्तदीययुक्तीनामुत्तराभासेषु कृतेषु भगवद्भिर्भाष्यकारैः श्रीरामानुजमुनिभिर्भाष्य–पञ्चपादिकाद्युक्तयुक्तिसमुत्सारणपुरस्सरं विशिष्टाद्वैतं श्रीभाष्यनामकमहानिबन्धप्रणयनेन लोके पुरस्कृतम् ।

तदनु मनुष्यस्वभावसुलभं मात्सर्यमासाद्य वा श्रीभाष्याशयमनवधृत्यैव वा कैश्चिदन्तरालकालप्रभवैरद्वैतसंप्रदायैस्तदुपरि युक्त्याभासविलासप्रसारे कृते सर्वतन्त्रस्वतन्त्रधिषणैर्वेङ्क§टाचार्यादिभिर्याथातथ्येनोत्तरं कृतं तदनन्तरं पुनरद्वैतसिद्धिकार–सिद्धान्तलेशकारादिभिराग्रहैकसहायैर्युक्त्याभासेषु तन्निराकरणपरतयोपन्यस्तेषु दुर्बलमतेर्लोकस्य महानयं व्यामोहोऽनार्षे बोधायनादिमहर्षिप्रदर्शितब्रह्मसूत्रार्थविरुद्धार्थे युक्तिपथविप्रतीपे समुत्पन्न इति तन्निराकरणार्थमयं मे समुद्यमः ।

अस्ति चेदं प्रयोजनान्तरमपि महतोऽमुष्य महाऽऽयासेन

* यस्या निराकरणं तत्रतत्र श्री ६ शङ्कराचार्यादिभिराधुनिकवेदान्तिकैः क्रियते ।

† द्रमिडाचार्यमतं श्री६शङ्कराचार्यैरुपनिषद्भाष्ये भामतीकारेण चोत्थापितम् ।

‡ ये वेदान्ताचार्यपदेन प्रसिद्धिमुपेयिवांसः ।

§ तदेतद्भाष्यं गौड़पादाचार्यशङ्कराचार्यादीनामद्वैतिनामुपनिषदर्थे उपजीव्यमभवदिति तद्विदः ।

निबन्धनिबन्धनस्य प्रायोजना: सरलदृष्टय: (अकबर–जहांगीर प्रभृतिसम्राट्समये आसन् वहवो महानिबन्धानां निबन्धारो महात्मानो यैर्निर्मितानां ग्रन्थानां व्याख्यानमपि सुदुस्संभवमाधुनिकानाम् । विशेषतश्च दर्शनशास्त्राणां विलोप एवाधुनाऽभवदपरिपक्वमतीनां केषांचिदमीषां शुष्कवागाडम्बरमात्रप्रचारेण । दृश्यते हि काश्यादिषु विद्यामहाक्षेत्रेषु चिरमधीयानानामपि न तादृशोविद्यासु परिपाको-यादृश: पूर्वमिति कथयन्ति ।

तदेतत्तेषामभिधायं कियदर्थवदिति विवेकिनोऽमत्सरा: स्वयं मीमांसितार इत्युदास्महे परं तु यदि कस्यचिन्महानिबन्धस्य स्नेहपूर्त्यादिसदृशस्य वादाहवमहाक्षेत्रस्य निर्माण–मुद्रण–प्रचारादिकमधुना न भवेत्तदाऽवश्यं कालान्तरे आधुनिकानां विदुषां कृत्यनुपलम्भान्न ज्ञातारो भविष्यन्तो भारतवर्षीया देशान्तरीया वा आधुनिकानां विदुषां विद्यामाहात्म्यमिति मुगलसाम्राज्यापेक्षया प्राय: सर्वेषु विषयेषु विवर्द्धमानविभूतेर्भारतवर्षस्य नय–विनयोन्नतावनताया: प्रजासमदु:ख–सुखाया दयामयमूर्त्तेर्निजधर्मानुयायिहृदयाया: श्री१०८ राजराजेश्वर्या: प्रतापमध्यन्दिनसमये दर्शनशास्त्राणां मिथ्याऽवनतिं जानीयुरिति तादृशभ्रमनिरसनेनोपयोक्ष्यते ऽयं व्यापार: ।

आबाल्यादभूवमहमिह राजकीये शिक्षाविभागे विद्याविवर्द्धनप्रयत्न: । आसं चाभिपूजितो भृशं शिक्षाविभागदीक्षान् राजकीयकार्यवीक्षकानारभ्य भारतवर्षीयप्रधानराजकीयकार्यालयाधिकृतराजपुरुषपर्यन्तम् ।

अभूवं च कृपया पृष्टोऽसकृदेव तैर्विश्वस्तैर्भारतवर्षीयनीतिपरिवृत्तिसमयेषु ।

अन्वमंसत च ते मां निजगरिम्णैव सहकारिणं नैतिकेषु साम्राज्यप्रबन्धेष्वपीति सर्वमवधाय विधाय च कृतज्ञताप्रवणं मनोऽमुं समयं संस्कृतशास्त्रेष्वपि गुणिगणाग्र्यमभिख्यापयितुं चेष मे यत्न इति सर्वफलविधातुर्भगवतोनारायणस्यानुग्रहेण फलेग्रहिप्रयत्नो भवेयमिति भृशमभ्यर्थये।

काश्यामगस्त्यमुन्याश्रमाश्रमो वाराणसीनिवासनिबद्धप्रवृद्धसमादरः। परमपूरुषकृपासरित्पूरपरीवाहपूर्णपाणं सत्संप्रदायाचार्यपण्डितस्वामिश्रीराममिश्रशास्त्री।

सं० १९५२॥

माघे कृष्णपक्षे बुधे प्रतिपदि।

न, शेषो घ्यसखीति घिसंज्ञा प्रतिषेधादित्यत आह । 'सखिशब्दस्य केवलस्यैव ङीति' । एतच्च तत्रैव प्रतिपादितम् ॥

"अतो रोरप्लुतादप्लुते" ॥ 'उकारानुबन्धकस्येति' । यदि रुशब्दसमुदायस्थानी स्याद् अगुर्वर्थं तत्रैर्थमित्यादावपि प्रसज्येत, स सजुषो रुरित्यत्र चोकारस्यानुनासिकत्वप्रतिज्ञयाऽनुबन्धकरणमनर्थकं स्यात्, तद्यत्रैव सूत्रे विशेषणार्थं क्रियते । 'रुत्वमपीति' । अपिशब्दः पुनःशब्दस्यार्थे, यदि पुना रुत्वमसिद्धं स्यात् स्थानित्वेनाश्रयणमनुपपन्नं स्यात्, उकारानुबन्धकस्य कस्य चिद्रोरभावात् । 'तस्यापीति' । निमित्तभूतस्यापीत्यर्थः । 'सुस्रोता३ अत्र न्वसीति' । दूराद्धूते चेति प्लुतः, नुशब्दः प्रश्ने । 'अश्विन् अत्रेति' । अश्वशब्दान्मत्वर्थीय इनिः, संबुद्ध्यन्तं चैतत्, गुरोरनृत इति प्लुतः, हे अश्विन् अत्रैव प्रदेशे पर्यस्तिष्ठत्वित्यर्थः, प्रायेण तु तकारान्तं पठ्यते तत्राश्विञ्छब्दस्य व्युत्पत्तिर्मृग्या, ननु तपरकरणादेव प्लुतात्परस्य प्लुते वा परतो न भविष्यति, यथा दीर्घे तत्राह । 'प्लुतस्यासिद्धत्वादिति' । ननु च सिद्धः प्लुतः स्वरसन्धिषु, यदयं प्लुतप्रगृह्या अचीति प्रकृतिभावं शास्ति, यस्य हि विकारः प्राप्नोति तस्य प्रकृतिभावो विधातव्यः, न च प्लुतस्यासिद्धत्वे प्लुतस्य सतो विकारप्राप्तिरित्यनर्थकन्तत् स्यात्, अस्तु स्वरसन्धिषु प्लुतः सिद्धः, रोरुत्वं तु स्वरसन्धिर्न भवति, यदि तु संहिताधिकारे यद्विधीयते तन्मात्रविषयं ज्ञापकमाश्रीयते शक्यमकर्त्तुमप्लुतादप्लुतइति ॥

"हशि च" ॥ अप्लुतादित्येव, सुस्रोता३ देहीति । चकारोऽतीत्यस्यानुकर्षणार्थस्तेनोत्तरत्र तस्यैवानुवृत्तिर्भवति न हशीत्यस्य, नहि तदनुकर्षणस्यान्यत्प्रयोजनमस्ति ॥

"प्रकृत्यान्तः पादमव्यपरे" ॥ 'अतीत्येवेति' । न तु हशीति । अत्र हेतुः पूर्वमेवोक्तः । 'एङ इति यत् पञ्चम्यन्तमित्यादि' । एङ इति तावद्व्यवहितमप्यनुवर्त्तते, न त्वनन्तरमपि रोरिति, अत्र च व्याख्यानमेव शरणं, तेनाव्यपरे हशि परतो रु प्रकृत्या भवतीत्यर्थो न

भवति । 'तदर्थादिति'। नहि पञ्चम्यन्तस्य प्रकृत्येत्यनेन सम्बन्धः सम्भवति । 'प्रकृतिरित्यादि' । उभयत्रापि प्रकृतिशब्दो दृष्टः, दुस्त्यजा प्रकृतिः, दध्नः क्षीरं प्रकृतिरिति । 'अन्तरित्यव्ययमित्यादि' । तेन मध्यवाचिनान्तःशब्देनोपजनिते व्यतिरेके पादशब्दात्षष्ठी, तदन्तेन सहाव्ययीभावः । 'ऋक्पादस्यैव ग्रहणमिष्यतइति'। इष्टिरेवैषा, अन्ये तु वा छन्दसीत्यतो मण्डूकप्लुत्या छन्दसीत्यनुवर्त्तयन्ति, एवमवयवार्थं दर्शयित्वा समुदायार्थं दर्शयति । 'अवकारयकारपर इत्यादिना' । 'स्वभावेनावतिष्ठतइति'। यदा प्रकृतिशब्दः स्वभावे वर्त्तते तदायमर्थः, स्वभावपरित्यागेन न संहिताकार्यमापद्यतइत्यर्थः । यदा तु कारणे वर्त्तते तदायमर्थः, एङ्कारणात्मना भवतीति, कारणं परपूर्वत्वादेः कार्यस्यैङ् तस्यात्मा स्वरूपं तेनैव भवति, प्राक् संहिताकार्यादेङो यद्रूपं तेनैवावतिष्ठतइत्यर्थः । अनन्तरोक्तमेवार्थद्वयं विस्पष्टीकरोति । 'न विकारमापद्यतइति'। एवं हि स्वभावेन भवति, यदि स्वभावादन्यथालक्षणां विकारावस्थां न प्राप्नोति तथा एवं कारणात्मना भवति, यदि विकाररूपं नापद्यते, यदि कार्यात्मना न विपरिणमतीत्यर्थः । 'तौ चेदिति'। निमित्तमकारः, कार्य्यमेङ्, उदाहरणेष्वेङः पदान्तादतीति पूर्वत्वस्यायवादेश्च यथायोगमभावः । 'एतेर्चयन्तीति'। अत्रैतत्पदान्ते वर्त्तते, अर्चयन्तीत्यकारश्च परस्य पादस्यादौ । 'के चिदिति'। यदि नान्तःपादमिति पठन्ति एवं सति पूर्वत्वस्यैवानन्तरस्य प्रतिषेधः प्राप्नोति नायवोर्व्यवहितयोरित्यत आह । 'संहितायामिति' । संहितायामित्येतावदेवात्रापेक्ष्यते न तु पूर्वरूपत्वं, तेनैङः संहिताधिकारे यदुक्तं तन्न भवतीत्यर्थः, तेनैतदपि न चोदनीयम्, अनारब्धेऽस्मिन् प्रतिषेधे ऽयवोः प्राप्तिर्नास्ति, पूर्वत्वेन बाधितत्वात्, अनेन तु प्रतिषेधेन पूर्वत्वे बाधिते तयोरुद्भवः स्यात्, तस्यां दशायामस्य व्यापारो नास्ति, आत्माश्रयदोषप्रसङ्गादिति कथमेतच्चोद्यं परिहृतं, यदि पूर्वत्वस्यैवायं प्रतिषेधः स्यात्तत्तदेवापेक्ष्य प्रतिषेधयेत्, यतस्तु खलु संहितायामित्यपेक्ष्य सामान्येन प्रतिषेधति तस्यैतत्प्रयोजनं स्वप्रवृत्त्युत्तरकालमुद्भवतोरयवोरपि प्रति-

षेधो यथा स्यादिति, अत्र च पदान्तादित्यनुवर्त्यम्, अन्यथा अग्नेरहं सुहवस्य प्रणीतौ,वायोरिव सूनृतानामुदर्कइत्यादौ ङसिङसोश्चेति यत्पूर्वरूपं तस्यापि प्रकृतिभावप्रतिषेधो प्राप्नुतः ॥

"अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च" ॥ अव्यादीनामनुकरणत्वात्समासो विभक्तिश्च । 'अव्यादिति' । अवेराशिषि लिङ् । 'अवद्यादिति' । पञ्चम्येकवचनान्तम् । 'अवक्रमुरिति' । अवपूर्वस्य क्रमेर्लिट्युसि द्विर्वचनप्रकरणे छन्दसि वा वक्तव्यमिति द्विर्वचनाभावे रूपं, केचित्तु सूत्रे अवचक्रमुरिति कृतद्विर्वचनं पठन्ति तेषामुदाहरणं मृग्यम् । बह्वृचस्तावदवक्रमुरित्यधीयते । 'अव्रतेति' । वृङ्वृञोर्मन्त्रे घसेत्यादिना च्लेर्लुक्, आत्मनेपदेष्वनत इति अदादेशः । 'अयमिति' । इदं शब्दात् सुः, इदोऽय् पुंसि, अवतेर्लोट्, अवन्तु, तस्मादेवासुनन्तात् क्यच्, क्याच्छन्दसीत्युप्रत्ययः, अवस्युः, तेनोवन्तु पितरो हवेष्विति बह्वृचाः पूर्वरूपमेवाधीयते, अधिब्रुवन्तु ते ऽवन्त्वस्मानिति ॥

"आपो जुषाणो वृष्णो वर्षिष्ठे ऽम्बे ऽम्बाले ऽम्बिकेपूर्वे" ॥ आपो इत्यादीनि पृथक् पदानि अनुकरणानि, विभक्तिस्त्वनुकार्यानुकरणयोर्भेदस्याविवक्षितत्वान्न भवति, सुपां सु लुगिति वा विभक्तेर्लुग् भवति, अम्बिकेपूर्वइत्येतदप्यनुकरणमेव, तत्र प्रथमं जसन्तं द्वितीयं स्वन्तं, तृतीयं शसन्तं, चतुर्थं ङयन्तम्, इतरे संबुद्ध्यन्ते । 'अम्बिकेशब्दात्पूर्वाविति' । अस्मादेव निपातनात्पञ्चमीसमासः । 'अस्मादेव निपातनादिति' । अम्बेत्येतद्विषयमेतत्, इतरयोस्त्वम्बार्थं द्व्यक्षरमिति वक्ष्यमाणत्वान्नैव ह्रस्वप्रसङ्गः ॥

"अङ्गइत्यादौ च" ॥ 'अङ्गशब्दे य एङिति' । स प्रकृत्या भवतीति वक्ष्यमाणेन संबन्धः । 'तदादौ चाकारे यः पूर्व इति' । एङित्यपेक्षते, पूर्वश्च संबन्धः । तच्छब्देनातिक्रान्तप्रत्यवमर्शिनेतिशब्दस्यार्थमाचष्टे, तस्याङ्गशब्दस्यादिस्तदादिः, चकारः किमर्थः, असति चकारेऽङ्गशब्दस्यैवेङ् तदादावति परतः प्रकृत्या भवतीत्यर्थः स्यात्ततश्चाङ्गेऽङ्गे इत्य-

त्रैव स्यात्, सति तु तस्मिन्नङ्गशब्दस्य एवैङ् यत्र क्व चिदति परतः प्रकृत्या भवति, तदादौ चाति परतो यः कश्चिदेङ् प्रकृत्या भवतीत्ययमर्थो भवति, तेन अङ्गे अदीध्यत् प्राणो अङ्गे इत्युभयत्रापि भवति ॥

"अनुदात्ते च कुधपरे" ॥ 'कवर्गधकारपरइति'। कवर्गधकारौ परौ यस्मात्स तथोक्तः, धकारे ऽकार उच्चारणार्थः, अग्निशब्दो ऽङ्गेर्नि-र्नलोश्चेति निप्रत्ययान्तोन्तोदात्तः, अध्वरशब्दः प्रातिपदिकस्वरेणान्तोदात्तः। 'आद्युदात्तो निपात्यतइति'। ऋज्रन्द्राग्नेत्यादावुणादिसूत्रे अग्नोशब्दः प्रातिपदिकस्वरेणान्तोदात्तः ॥

"सर्वत्र विभाषा गोः" ॥ 'सर्वत्र छन्दसि भाषायां चेति'। यद्यपि छन्दसीति न प्रकृतं तथाप्यन्तः पादं यजुषीति वचनाद्वक्रमुरव्रतावस्युरिति छान्दसानुकरणाच्च छान्दसानि पूर्वसूत्राणीति भावः। सर्वत्रग्रहणं तु यजुष्यन्यत्र चेत्यप्युपपन्नं, पदान्तादित्येव, गोरागतं गोःस्वम् ॥

"अवङ् स्फोटायनस्य" ॥ स्फोटो ऽयनं परायणं यस्य स स्फोटायनः, स्फोटप्रतिपादनपरो वैयाकरणाचार्यः, ये त्वौकारं पठन्ति ते नडादिष्वश्वादिषु वा पाठं मन्यन्ते। 'अतीति निवृत्तमिति'। अन्यथा गवौदनादौ न स्यात्, न चैवं सत्यतिप्रसंग इत्याह। 'अचीत्येतत्त्विति'। सर्वत्र चात्र व्याख्यानमेव शरणं, यद्यचीत्यनुवर्त्तते कथमिको यणचीत्यत्रोक्तम् अचीति चाधिकारः संप्रसारणाच्चेति यावदिति, निरन्तरानुवृत्त्यभिप्रायं तदित्यदोषः। 'गवाग्रं गवाजिनमिति'। बहुव्रीहिस्तत्पुरुषो वा। 'गवोष्ट्रमिति'। द्वन्द्वः, गोरावचनं, गोरग्रवक्तव्यः, तत्रापि अवादेशेन सिद्ध्यत्येव, न चैङः पदान्तादिति पूर्वत्वप्रसङ्गः, अगागमस्य तद्ग्रहणेन ग्रहणादोकारस्यापदान्तत्वात्, किं प्रयोजनं, लाघवं तावद्भवति, स्वरे च न दोषः, कथमागमा अनुदात्तास्तत्र गवाग्रादौ बहुव्रीहौ पूर्वपदप्रकृतिस्वरेणागमानुदात्तत्वं संभवति,अवङादेशे त्वान्तर्यतो ऽन्तोदात्तस्यान्तोदात्तोवङादेशः स्यात्। ननु चास्यैकाच सतो व्यपदेशिवद्भावेनान्तो-

दात्तत्वमेष्टव्यं, तत एवाद्युदात्तत्वमपि भविष्यति। ततः किमाद्युदात्तस्याद्युदात्त आदेशो भविष्यति, सत्यमेवमेतत्, न त्विदं लक्षणमस्ति प्रातिपदिकस्यादिरुदात्तो भवतीति, इदं पुनरस्ति प्रातिपदिकस्यान्त उदात्तो भवतीति, योऽसौ लक्षणेनान्तोदात्तस्तत्रान्तर्यतोऽन्तोदात्त आदेशः प्राप्नोति। ननु च गमेर्डो विधीयते, ततः किं, प्रत्ययाद्युदात्तत्वे कृते आन्तर्यत आद्युदात्त आदेशो भविष्यति, कथं पुनरयमाद्युदात्तो यावता एकाच् व्यपदेशिवद्भावेन, यद्येवं तत एवान्तोदात्तोऽपि, तत्रान्तर्यतोऽन्तोदात्तस्यान्तोदात्तो ऽवङादेशः प्रसज्येत। सत्यम्। नन्विदं लक्षणमस्ति प्रत्ययस्यान्तोदात्तो भवतीति, इदं पुनरस्ति प्रत्ययस्यादिरुदात्तो भवतीति, यो ऽसौ लक्षणेनाद्युदात्तस्तत्रान्तर्यत आद्युदात्त आदेशो भविष्यति, स्यादेवं यद्याद्यन्तवदेकस्मिन्निति शास्त्रातिदेशः स्यात्. यदा त्वनेन कार्यमात्रमुदात्तत्वम् असत्येवादित्वे अन्तत्वे चातिदिश्यते तदौकारस्यैवादित्वव्यपदेशाभावात् कुतस्तदादेशस्याद्युदात्तत्वम्, ततश्च पर्यायेण त्वनियतदेशमाद्युदात्तत्वं स्यादिति पक्ष दोषप्रसंगः, तत्र सूत्रकारेण तावल्लाघवमनादृत्यावङादेशः कृतः, तत्र यथा स्वरे दोषो न भवति तथा दर्शयति। 'आद्युदात्तो ऽवङादेशो निपात्यतइति'। एकश्रुत्या सूत्रपाठे यदत्र यत्नेनाद्युदात्तोच्चारणं तदन्तोदात्तत्वबाधनार्थं विज्ञायते, अन्यत्र समासान्तोदात्तत्वेन बाध्यतइति। एतच्च भाष्ये उपदेशिवद्भावो वक्तव्य इति वचनेन लभ्यते, अन्यथा परत्वात् पूर्वं समासान्तोदात्तत्वे कृते अवङि अवङ्स्वर एव सतिशिष्टत्वात् स्यात्, उपदेशिवद्भावे तु पूर्वमवङि कृते पश्चात् समास इति सतिशिष्टत्वात् समासस्वर एव भवति। पदान्तादित्येव, गवे गवोः गवां गवि॥

"इन्द्रे च"॥ अत्र यद्यचीति विशेषणमिन्द्रशब्दो विशेष्यं तदा ऽजादौ इन्द्रशब्दइत्यर्थः स्यात्, ततश्च गवेन्द्रयज्ञ इत्यादौ न स्यात्, अनुत्तरपदत्वात्, यद्यप्यत्रोत्तरपदग्रहणं नास्ति तथाप्यर्थात्समासएतद्विधानं, नह्यन्यत्र गोरनन्तर इन्द्रशब्दः संभवति, समासे च विधानसामर्थ्यादुत्तरपदएव स्यात् ष्यङः संप्रसारणवत्, तस्मादज्विशेष्यम्, इन्द्रशब्दो

विशेषणम्, अचि परतः कस्मिंश्चिन्द्रे यः स्थितस्तस्मिन्निति, तदिदमुक्तम्। 'इन्द्रशब्दस्येचीति'॥

"प्लुतप्रगृह्या अचि नित्यम्"॥ ननु यस्य विकारः प्राप्तस्तस्य प्रकृतिभावो विधेयः, न च प्लुतस्य विकारः प्राप्तः, स्वरसन्धिषु तस्यासिद्धत्वादित्यत आह। 'आश्रयात् प्लुतः सिद्ध इति'। यदिदं प्लुतस्य प्रकृतिभावं प्रति कार्यित्वेनाश्रयणमस्मादेव ज्ञापकात् स्वरसन्धिषु प्लुतः सिद्ध इति कल्प्यतइत्यर्थः। 'आदेशनिमित्तस्याचः परिग्रहार्थमिति'। यस्मिन्नादेशो विधीयते स एव प्रकृतिभावस्यापि निमित्तत्वेन परिगृहीतो यथा स्यादित्येवमर्थमित्यर्थः। 'जानु उ अस्येति'। उञ् निपातस्तस्य पूर्वेण सहैकादेशस्य यन्निमित्तं न स प्रगृह्यादुत्तरो यश्च ततः परो न स एकादेशस्य निमित्तमिति प्रकृतिभावाभावादेकादेशो भवत्येव, असति पुनरज्ग्रहणे प्रगृह्योऽचि परतः प्रकृत्या भवतीत्युच्यमाने पूर्वेण सह यो विकारः प्राप्तस्तस्यापि प्रकृतिभावः स्यात्, पुनरज्ग्रहणे तु न भवति, तत्रैकादेशे कृते तस्यादिवद्भावात्प्रगृह्यग्रहणेन ग्रहणादिको यणचीति यणादेशः प्रकृतिवद्भावाच्च भवति, मय उञो वो वेति पत्ते वकारः। 'नित्यग्रहणमनुवर्त्ततइति'। पूर्वसूत्रे नित्यग्रहणमेतदर्थमेव कृतं, तत्र त्वारम्भसामर्थ्यादेव नित्यो विधिः सिद्धः। 'नित्यमेव प्रकृतिभावो यथा स्यादिति'। अयमेव प्रकृतिभावो नित्यं यथा स्यात्कदाचित्स्वान्तरेण कार्यान्तरसहितो मा भूदित्यर्थः॥

"आङोनुनासिकश्छन्दसि"॥ 'तेनेह न भवतीति'। अनर्थकस्यैवाकारस्य भवति, अभ्र आँ अप इत्यादौ सप्तम्यैव तदर्थस्योक्तत्वात्तदर्थवृत्तिराङनर्थकोऽनर्थान्तरवाचित्वात्, आतरदित्यत्र तु क्रियाविशेषणत्वादर्थवान्, कथं पुनरनर्थकस्य ङित्त्वं, यावता

ईषदर्थे क्रियायोगे मर्यादाऽभिविधौ च यः।
एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित्॥

इत्युक्तम्। सत्यम्। वाक्यस्मरणयोरङिदित्यत्रैव तात्पर्यम्। अन्यत्र सर्वत्र आङ्ङिद्वेदितव्यः, एवं तावद्भाष्ये स्थितम्॥

"इको ऽसवर्णे शाकल्यस्य ह्रस्वश्च" ॥ किमर्थश्चकारः, प्रकृत्येत्येतदनुकृष्यते ऽनेन । ननु च ह्रस्वविधानसामर्थ्यादेव स्वरसंधिर्न भविष्यति, भवेद्दीर्घाणां ह्रस्ववचनसामर्थ्यादेव स्वरसंधिर्न स्यादिति ह्रस्वानां तु प्राप्नोति, नहि ह्रस्वानां ह्रस्वो भवति प्रयोजनाभावात् । अस्ति प्रयोजनं, स्वरसन्धिर्मा[1]भूदिति । इदं तर्हि प्रयोजनं प्रकृतिभावमात्रं क्वचिद्यथा स्यादिति, तेनेषाअक्षादिषु छन्दसि प्रकृति भावमात्रं सिद्धं भवति । 'शाकल्यग्रहणं पूजार्थमिति' । अथ विकल्पार्थं कस्मान्न भवतीत्याह । 'आरम्भसामर्थ्यादेवेति' । सवर्णे ऽचि दीर्घविधानाद्यणादेशस्यासवर्ण एवाज्विषयः, अस्यापि विधेः स एव विषयः, ततश्च विषयैक्यादेव विकल्पे सिद्धे न तदर्थकमाचार्यग्रहणम् । 'सिन्नित्यसमासयोरिति' । नित्याधिकारविहितो ऽस्वपदविग्रहश्च समासो नित्यसमासः, एकापि सप्तमी विषयभेदाद्भिद्यते, सिति परतो नित्यसमासे च विषयइति, शाकल्यस्यायं विधिः शाकलः, कण्वादिभ्यो गोत्रइत्यण् । 'ऋत्विय इति' । ऋतुरस्य प्राप्त इति ऋतोरण्, छन्दसि घस् । 'व्याकरणमिति' । कुगतिप्रादय इति समासः, तत्र नित्यमित्यनुवर्त्तते । 'कुमार्यर्थमिति' । कुमार्यै इदं कुमार्यर्थम्, अस्वपदविग्रहोयं नित्यसमासः ॥

"ऋत्यकः" ॥ 'सवर्णार्थमनिगर्थं च वचनमिति' । होतृऋश्यः खट्वऋश्य इत्यादौ, अन्यत्र पूर्वेणैव सिद्धत्वात् ॥

"अप्लुतवदुपस्थिते" ॥ ऋषिर्वेदस्तत्रभव आर्षस्ततोन्योनार्षः, समुदायाद्वाक्यादवच्छिद्य पृथक्कृत्य स्वरूपे ऽवस्थाप्यते, कैः, पदकारैः, पदस्येयत्तापरिज्ञानाय अप्लुतेन तुल्यं वर्त्ततइत्यप्लुतवत्, तत्र येन साधर्म्येणाप्लुतवत्त्वं तद्दर्शयति । 'अप्लुतकार्यमिति' । तत्रापि प्लुतशब्देनेन विहितस्य कार्यस्य प्रतिषेध इति दर्शयति । 'प्रकृतिभावं न करोतीति' । अन्यथा स्वरसन्धेरपि प्रतिषेधः स्यात्, तस्यापि प्लुतकार्यत्वात् । उदाहरणेषु प्लुतकार्यप्रतिषेधादेकादेशो भवन् प्लुतमेवोपमृद्य भवति, स्वरसन्धि-

१ द्धि न भवतीति ३ पु· पा· ।

प्रकरणे प्लुतस्य सिद्धत्वात् । 'तत्र को दोष इति'। एकादेशेन निवर्त्त्यमानत्वात् प्लुतस्य श्रवणेन न भवितव्यमिति प्लुत एव निषिध्यतां किमर्थमतिदेशाश्रयणमिति प्रश्नः । 'अग्नी ३ इतीति'। यत्र प्लुताश्रयेऽपि प्रकृतिभावः प्राप्नोति प्रगृह्याश्रयोऽपि, तत्र प्लुताश्रयस्य प्रतिषेधेऽपि प्रगृह्याश्रयस्य प्रकृतिभावस्य प्रतिषेधाभावात् प्लुतस्य श्रवणं सिद्ध्यति, प्लुतप्रतिषेधे तु क्रियमाणेऽत्रापि श्रवणं न स्यात् ॥

"ई ३ चाक्रवर्मणस्य" ॥ सूत्रे ई चेति त्रिमात्रिकस्य निर्द्देशः। 'अचि परत इति'। उपस्थितग्रहणं चास्वरितत्वान्निवृत्तम् । 'अस्तु ही ३ इत्यब्रूतामिति'[1]। विभाषा पृष्टप्रतिवचने हेरिति प्लुतः, अस्तेर्लोटि तिप्, 'एरुः'। 'तदुपस्थिते निवृत्त्यर्थमिति'। तत्र पूर्वेणाप्लुतवद्भावस्य नित्यप्राप्तत्वात्, अनुपस्थिते प्राप्त्यर्थमिति, तत्र केन चिदप्राप्तत्वात् । 'इकारादन्यत्रापीति'। तथा च भाष्यम्, ईकारग्रहणेन नार्थ इत्यादि ॥

"दिव उत्" ॥ 'पदग्रहणमनुवर्त्ततइति' । अन्तग्रहणेनाप[2]समस्तमपि केवलं पदग्रहणमेवानुवर्त्तते, ततश्चार्थात् षष्ठ्यन्तं जायते, दिवशब्देन विशेषणात्तदन्तविधिः, ग्रहणवता प्रातिपदिकेनेति तु प्रत्ययविधिविषयं, व्यपदेशिवद्भावात् केवलस्यापि भवितव्यं, व्यपदेशिवद्भावोऽप्रातिपदिकेनेत्येतदपि प्रत्ययविधिविषयमेव । 'सानुबन्धकत्वादिति'। दीव्यतेर्धातोरुकारो ऽनुबन्धः, प्रातिपदिकस्य तु न कश्चिदनुबन्धः । 'दिवः पदस्येति'। तदन्तस्य पदस्येत्यर्थः । 'द्युकाम इति'। दिवं कामयते इति शीलिकामिभक्ष्याचरिभ्यो णः । 'विमलद्युइति'। विमला द्यौरऽस्मिन्निति बहुव्रीहिः । 'अक्षद्युभ्यामिति'। अक्षशब्दउपपदे दीव्यतेः क्विप्, तत्र च्छ्वोः शूडित्यूठ् । अथ तपरकरणं किमर्थं, यद्यपि ऋत उदिति तपरकरणेन ज्ञापितं भाव्यमानोऽप्युकारः सवर्णान् गृह्णातीति, तथाप्यान्तर्यतो ऽर्द्धमात्राकालस्य व्यञ्जनस्य मात्रिक एव भविष्यतीत्यत आह । 'तपरकरणमिति'। यद्यप्यनेन दीर्घो न प्राप्नोति

१ इत्यब्रवीदिति मुद्रितमूलपुस्तके पाठः ।
२ उत्तरपदेनेति पाठः ३ पु· ।

लक्षणान्तरेण तु प्राप्नोतीत्याह। 'द्युभ्यां द्युभिरिति'। उत्वस्याव-काशो यत्रायजादिपरः, विमलद्यु, ऊठो ऽवकाशः द्यूत्वा द्यूतं, यत्र तूभयोः प्रसंगस्तत्र परत्वादूठ् प्राप्नोति तपरकरणादुत्वमेव भवति। यदि प्राप्तस्योठो निवृत्त्यर्थं तपरकरणमित्युच्यते एवं तर्हि च्छ्वोः शूडनु-नासिके चेत्यत्र कथं द्युभ्यां द्युभिरिति परेण चोदिते यद्वक्ष्यति ऊठि कृते दिव उदिति तपरकरणान्मात्राकालो भविष्यतीति तद्विरुद्ध्यते, तस्य ह्यूठि कृते तस्यैवोठो मात्रकालो भविष्यतीत्ययमर्थः। नैष दोषः। ऊठि कृतइत्येतस्य पूर्वेण चोद्यग्रन्थेन सम्बन्धः, कथं द्युभ्यां द्युभिरिति, ऊठि कृतइति, दिव उदिति तपरकरणान् मात्राकालो भविष्यतीत्येतावान् परिहारग्रन्थः, तपरकरणस्य तूपनिवृत्तिरेव प्रयोजनं, तस्मादुत्वमेवात्र कर्त्तव्यं न पुनरूडित्यर्थः॥

"एतत्तदोः सु लोपोऽकोरनञ्समासे हलि"॥ 'सुशब्द इति'। एतेनैतत्तदोरिति सुशब्दापेक्षया संबन्धलक्षणा षष्ठीत्याचष्टे, यद्येवं सुइ-त्येतस्य सापेक्षत्वाल्लोपशब्देन समासो न प्राप्नोति, नैवायं समासः, सु इति पृथक्पदं सुपां सुलुगिति लुप्तषष्ठीकम्। 'कश्च तयोः सुशब्द इति'। यदि यस्ताभ्यां विहितः सुः स तयोः संबन्धी भवति तदा परमस ददाति परमैष ददातीत्यादौ न स्यादिति मन्यमानः पृच्छति, इतरो विदिताभिप्रायः परिहरति। 'यस्तदर्थं न संबद्ध इति'। अर्थद्वारकश्च संबन्धः, यस्तदर्थगतमेकत्वमाचष्टइत्यर्थः। परमस ददाती-त्यादावपि उत्तरपदार्थप्रधानत्वात्तदर्थगतमेवैकत्वमाचष्टइति सिद्धो लोपः। प्रथमैकवचनस्यात्र सुशब्दस्य ग्रहणं न सप्तमीबहुवचनस्य, 'स्यश्छन्दसि' 'सो चि लोपे चेत्पादपूरण'मित्यत्र ह्यस्यैव संभवः, द्वयोः सामान्येन ग्रहणं तर्हि कस्मान्न भवति, एवं तर्हि निरनुबन्धक-ग्रहणे न सानुबन्धकस्येति प्रथमैकवचनस्यैव ग्रहणन्तस्य ह्युकार उच्चा-रणार्थो नानुबन्धः। 'एष इति'। तदोः सः सावनन्त्ययोरिति सकारः, त्यदाद्यत्वं, षत्वम्। 'एषक इति'। 'अव्ययसर्वनाम्नामकच् प्राक् टे'-रित्यकच्। ननु रूपभेदात्साकच्कावेतत्तदावेव न भवतस्तत्किमकोरिति

प्रतिषेधेन, तत्राह। 'तन्मध्यपतित इति'। अस्याश्च परिभाषाया अस्तित्वे अयमेव प्रतिषेधो लिङ्गम्। 'उत्तरपदार्थप्रधानत्वादिति'। एतच्च नञ्सूत्रएव व्याख्यातम्। हल्ङ्याब्भ्य इत्यस्यानन्तरमिदं न कृतं, संहितायां यथा स्यादसंहितायां मा भूदिति॥

"स्यश्छन्दसि बहुलम्"॥ 'स्य इति'। यदित्यस्य प्रथमान्तस्यानुकरणं 'सुपां सुलुगिति' लुप्तषष्ठीकम्, अनुकार्यानुकरणयोर्भेदस्याविवक्षितत्वादनुत्पत्तिरेव वा षष्ठ्याः, उदाहरणं सत्वादि पूर्ववत्॥

"सोचि लोपे चेत्पादपूरणम्"॥ स इति निर्देशः पूर्ववत्। 'के चिदिति'। स्वयं तु छन्दोधिकारादृक्पादस्यैव ग्रहणं मन्यते॥

"सुट् कात् पूर्वः"॥ 'संस्कर्त्तेति'। 'संपुंकानां सो वक्तव्य' इति वचनात् 'समस्सुटो' ति द्विसकारकत्वाद्वा निर्देशस्य समो मकारस्य सकारः, 'अत्रानुनासिकः पूर्वस्य तु वे' ति पूर्वस्यानुनासिकः। इह 'संपर्युपेभ्यः करोतौ भूषणे' 'किरतौ लवन' इत्यादौ ककारादावागमिनि टित्त्वादेव सुट्कात्पूर्वो लभ्यते। ह्रस्वाच्चन्द्रोत्तरपदे इत्यादौ कात्पूर्वत्वासंभवादनुपयोग एवेत्यनर्थकं कात्पूर्वग्रहणम्। स्यादेतत्। संचस्कारेत्यादावभ्यासे संजाते साभ्यासस्य करोतित्वाच्चात्पूर्वः सुट् स्यात्, मा भूच्चात्पूर्वः कात्पूर्व एव यथा स्यादित्येवमर्थं कात्पूर्वग्रहणमिति। तन्न। अत्र हि लिटि द्विर्वचनं च प्राप्नोति, सुट् च, तत्र द्विर्वचनमकृते सुटि कृशब्दस्य प्राप्नोति कृते तु स्कृशब्दस्य, सुडपि कृते द्विर्वचने चकृशब्दस्य प्राप्नोति अकृते तु कृशब्दस्येत्युभयोरनित्ययोः परत्वात् सुटि कृते तस्य धातुग्रहणेन ग्रहणात् सहैव तेन द्विर्वचने 'शर्पूर्व्वाः खय' इति खयः शेषे संचस्कारेति सिद्धं, न च साभ्यासस्याकृतः सुडिति पुनः सुट्प्रसङ्गः, अस्मिन्नेव प्रयोगे लक्षणस्य प्रवृत्तत्वात्। ननु पूर्वं धातुः साधनेन युज्यतइति दर्शने पूर्वं साधनवाचिनि लकारे तदाश्रये च द्विर्वचने एकपदाश्रयत्वादन्तरङ्गे कृते पदद्वयाश्रयत्वाद्बहिरङ्गः सुट् पश्चाद्भवन् चात्पूर्वः स्यात्, समस्करोदित्यादौ चान्तरङ्गत्वात् परत्वाच्चाटि कृते तेन व्यवधानान्नैव सुट् स्यात्, विकरणान्ताङ्गभक्तो ह्यडा-

गमस्तमेव न व्यवदध्यात् करोतिं तु व्यवदधात्येव, इह च समस्कृत संस्कृथा इति यत्र करोतिरेवाङ्गं तत्राटः कृग्रहणेन ग्रहणादट एव पूर्वः सुट् स्यात्, अतो ऽडभ्यासयोरपि कृतयोः कात् पूर्वः सुड्यथा स्यादिति कर्त्तव्यं कात्पूर्वग्रहणं, न कर्त्तव्यम् । 'अडभ्यासव्यवायेपी' त्येतस्मादेव निर्द्देशादेतत्सिद्धं, न च तत्र करिष्यामीति कात्पूर्वग्रहणं, कृतेप्यस्मिन्नसिद्धेः । तथाहि । क्रियमाणमप्येतत्कालावधारणार्थं वा स्यात् करोतेस्तस्यामवस्थायां सुड्भवति यस्यामवस्थायां भवन् कात्पूर्वो भवतीति, करोत्यवधारणार्थं वा, तस्य करोतेः सुड् भवति यस्य भवन् कात्पूर्वो भवतीति, तत्र पूर्वस्मिन् [1]पक्षे यद्यप्यन्तरङ्गे अप्यड्द्विर्वचने बाधित्वा कात्पूर्वग्रहणसामर्थ्यात् पूर्वं सुड्भवति पश्चात्तयोः कृतयोरिष्टं सिद्ध्यति, द्वितीये तु प्रत्युताभ्यासवतोर्निवृत्त्यर्थमेव कात्पूर्वग्रहणं स्यात्, नहि तद्वतोभवन् कात्पूर्वः कृतः स्यात् । स्यादेतत् । न करोत्यवधारणार्थं कात्पूर्वग्रहणं, किं तर्ह्यपकृष्य विधिः, करोतेः सर्वत्र सुड् भवति स तु प्रदेशान्तरे प्राप्तः कात् पूर्वः कर्त्तव्य इति, एवमपि समस्कृत समस्कृथा इति सिद्ध्यति, अटः प्राक् प्राप्नुवन् कात्पूर्वो नीयतइति, समस्करोदित्यादौ त्वसिद्धिरेव, कथं, प्रदेशान्तरे प्राप्तस्य विधिरपकृष्य भवति, न चात्र सुट् प्राप्तो ऽटा व्यवधानादिति कथमपकृष्य विधिर्भवेत्, कथं च संचस्कारेत्यादावपि द्विःप्रयोगे द्विर्वचने उच्चारणभेदाच्छब्दभेद इति द्वौ करोती, तत्र यः समो ऽनन्तरो न तस्य ककारो यस्य च ककारो नासौ समो ऽनन्तर इति अप्राप्तत्वान् न कात्पूर्वं विधीयेत, स्थाने द्विर्वचने च स्थानिवद्भावादेक एव करोतिः, स चाव्यवहित इति कात् पूर्वः प्राप्तः कात् पूर्वः कृत इति न कश्चिद्दोषः । तदेवं धातुः पूर्वं साधनेन युज्यते ततश्च क्रियमाणेपि कात्पूर्वग्रहणे नैवेष्टं सिध्यती 'त्यडभ्यासव्यवायेपी' त्येतदेव कर्त्तव्यं, कात्पूर्वग्रहणं तु शक्यमकर्त्तुमिति वार्त्तिककारस्य पक्षः । यदि तु संपर्युपेः करोताविति तृतीयानिर्द्देशेन समादिभिरुपसृष्टस्य सुड् विधीयते तदा व्यवहितस्याप्युप-

[1] कल्पे इति ३ पु॰ पाठः ।

सृष्टत्वात्, कात्पूर्वग्रहणेनाप्ययमर्थः शक्यते संपादयितुम्, कथं, समस्करोदित्यादौ तावदन्तरेणापि कात्पूर्वग्रहणमटो न भविष्यति, तस्य करोतिं प्रत्यनवयवत्वात्, करोतेस्तु भविष्यति, व्यवहितस्याप्युपसृष्टत्वात्, समस्कृतेत्यादौ त्वटः पूर्वं प्राप्तः कात्पूर्वं चेष्यते, संचस्कारेत्यादौ च स्थाने द्विर्वचने कात्पूर्वं प्राप्तः कात्पूर्वं करिष्यते, द्विःप्रयोगे तु द्वयोरपि करोत्योः प्राप्तः पूर्वस्मादेव करिष्यते, नहि तस्य कृतः कात्पूर्वः कृतः स्यादिति सिद्धमिष्टम्। भाष्यकारस्तु मेने उभयं न कर्त्तव्यं पूर्वं धातुरुपसर्गेण युज्यते ततश्चानुत्पन्नएव प्रत्यये संस्कृइति स्थिते सुटि कृते लकारस्ततस्तन्निबन्धनावड्भ्यासौ ससुट्कस्यैव भविष्यतः। ननु च लब्धस्वरूपा क्रिया विशेषणमाकाङ्क्षति, तल्लाभश्च साधनानन्तरइति पूर्वं धातुः साधनेन युज्यते, लब्धस्वरूपेति, कोऽर्थः, किंप्रतिपन्नस्वरूपेति निष्पन्नस्वरूपा, निष्पत्तिस्तावद्विशेषणसंबन्धेनापयुज्यते, प्रतिपत्तिस्तु विशेषणसंबन्धात्प्रागपि क्रियायाः संभवति, विशिष्टा च क्रिया साधनेन युज्यते। तथाहि। तिष्ठतीति गतिनिवृत्तेः साधनसंबन्धः प्रतीयते, प्रतिष्ठतइति गतेः, गच्छतीति गमनस्य, आगच्छतीत्यागमनस्य, करोतीति व्यापारमात्रस्य, संस्करोतीति भूषणस्य, विशिष्टा च क्रियोपसर्गसंबन्धे सत्येव प्रतीयतइति द्योतकत्वेन वाचकत्वेन वा पूर्वमुपसर्गसंबन्धो ऽपेक्षणीयः, अवश्य चैतदेवं विज्ञेयम्, अन्यथा भवतेरकर्मकत्वाद्भावे लकार उत्पन्न पश्चादनुशब्देन संबन्धे ऽनुभूयते कम्बलो देवदत्तेनेति कथं कर्मणि लकारः स्यात्, अतः पूर्वं धातुरुपसर्गेण युज्यते इत्येतदेव संप्रतिपन्नम्। एवं च पूर्वोक्तन्यासेन सिद्धमिष्टमिति नार्थः कात्पूर्वग्रहणेन, नाप्यड्भ्यासव्यवयेपीत्यनेन, यदि पूर्वं धातुरुपसर्गेण युज्यते अध्येता प्रत्येता प्रत्यायक इत्यादौ पूर्वं धातूपसर्गयोरेकादेशे तस्य धातुं प्रत्यादिवत्त्वात्तत एव प्रत्ययोत्पत्तावनिष्टं प्राप्नोति। नैष दोषः। नेन्द्रस्य परस्येत्यत्र ज्ञापितमेतत् पूर्वोत्तरपदयोस्तावत्कार्यं भवति पश्चात् स्वरसंधिरिति, प्रत्यय इति वा निर्देशो ऽस्यार्थस्य ज्ञापकः। वृत्तिकारस्तु उभयं वक्तव्यमिति

१ साधनसम्बन्धादिति पा॰ ३ पु॰।

मन्यमानः कात्पूर्वग्रहणस्य तावत्प्रयोजनमाह । 'कात्पूर्वग्रहणमित्यादि' । किं पुनरभक्तत्वे प्रयोजनमत आह । 'तथाहीति' 'संस्कृषीष्टेति' । आशिषि लिङ्, आत्मनेपद 'मुश्चे' ति कित्त्वं, सुट्, तयोः कात्पूर्वः सुट्, तस्य करोतिभक्तत्वात् करोतिग्रहणेन ग्रहणात् कृञः संयोगादिता ज्ञायेतेति ऋतश्च संयोगादेरितीट् प्रसज्येत । 'संस्क्रियतइति' । कर्मणि लट् 'रिङ् शयग्लिङ्क्षु,' अत्रापि भक्तत्वे सुटः कृञः संयोगादित्वा 'द्गुणोऽर्तिसंयोगाद्यो' रिति गुणः स्यात्, अतस्तौ मा भूतामिति अभक्तः सुड्वक्तव्य इति भावः । निघातोपि तर्हि न प्राप्नोति । समः पदस्य सुटा व्यवहितत्वात्सुटश्चापदत्वात् । 'गुणः कथमिति' । सुटो ऽभक्तत्वेनाङ्गस्य संयोगादित्वाभावात्प्रश्नः । तन्मध्यपतितस्तद्ग्रहणेन गृह्यतइति स्थाने द्विर्वचनपक्षे द्विःप्रयोगे च समुदायस्यैवाङ्गसंज्ञेत्युक्तं, ततश्च तदङ्गमध्यपतितः तदङ्गग्रहणेन गृह्यते । नन्वेवमपि असंयोगादित्वं तदवस्थमत आह । 'संयोगोपधग्रहणं चेति' । अन्त्यादचः पूर्वस्य वर्णस्योपधासंज्ञाविधानात् तन्मध्यपतितस्तद्ग्रहणेन गृह्यतइत्येतदुक्तम्भवति, यदि न संभक्तः सुट् टित्करणं किमर्थमित्यत आह । 'टित्करणमिति' । सुस्तुस्वञ्जामित्युच्यमाने सुरेत्यादौ यः सुशब्दो यश्चोपसर्गस्तस्यापि ग्रहणं स्यात्, ततश्च सुरां परिचष्टे परिसुरयतीत्यादावपि प्राप्नोति ॥

"अड्भ्यासव्यवायेपि" ॥ व्यवायो व्यवधानम्, अपिशब्दादव्यवधानेपि, असति तु तस्मिन् व्यवाय एव स्यात् । 'संचस्कारियेति' । ऋतो भारद्वाजस्येत्येतदप्यसुट एवेष्यतइति वचनादिडागमः । 'पूर्वं धातुरित्यादि' । यद्यपि पूर्वं धातुः साधनेन युज्यतइत्यत्रापि दर्शने सुतरामेतदनारम्भणीयं तथापि स्वदर्शनत्वादुपपन्नत्वाच्चेदमेव दर्शनमुपन्यस्तम् । अपर आह । किमर्थं पुनरिदमुच्यते इत्यस्यानन्तरं यावतेति पठितव्यं, ततश्च पश्चादड्भ्यासावित्येवमन्तश्चोद्यग्रन्थ इति । परिहरति । 'अभक्तश्चेति' । चस्त्वर्थे । 'तत्र[1]ेति' । अभक्ते । 'एतस्मिंस्तु सती-

१ मुद्रित मूल पुस्तके तत्रेति नास्ति ।

त्यादि'। ननु चास्मादेव वचनात्कृतयोरडभ्यासयोस्तद्व्यवायेपि सुट् कात्पूर्वः क्रियतां, यस्तु संकृइत्यस्यामवस्थायां सुट् प्राप्नोति स केन वार्येत, उच्यते। नाप्राप्ते तस्मिन्नस्यारम्भात्तस्यानेन बाधः, अपरे त्वेतद्व्याद्यभयाद्भाष्यकारमतमेव ज्यायो मन्यन्ते, यत्पुनरुक्तमाद्गुणप्रसंग इति, नैष दोषः। अतश्च संयोगादेरित्यत्र तावदुपदेशइति वर्त्तते, क्व प्रकृतम्, एकाच उपदेशे ऽनुदात्तादिति, ततः किम्, उपदेशे संयोगादेरिति सुटि कृते न भविष्यति, गुणोऽर्तिसंयोगाद्योरित्यत्रापि नित्यमित्यनुवर्त्तते, क्व प्रकृतं, नित्यं छन्दसीति, ततः किं, नित्यं यः संयोगादिस्तस्य गुणः। सुटि कृते न भविष्यति॥

"संपर्युपेभ्यः करोतौ भूषणे"॥ 'संपूर्वस्य क्वचिदभूषणेपीष्यतइति'। एतच्च 'संस्कृतं भक्षा' इति निर्देशाल्लभ्यते॥

"समवाये च"॥ उदाहरणेषु भावे निष्ठा, एवं समुदितमित्यत्रापि॥

"उपात् प्रतियत्नवैकृतवाक्याध्याहारेषु"॥ 'सत इत्यादि'। लब्धसत्ताकस्यार्थस्य पूर्वं ये गुणास्तेभ्योन्ये गुणा आधीयन्ते, येन तद्गुणान्तराधानं तत्पुनः किमर्थमित्याह। 'आधिक्यायेति'। आधिक्यं वृद्धिः। 'वृद्धस्य वा तादवस्थ्यायेति'। तस्य वृद्धियुक्तावस्थायाः प्रच्युतिपरिहारायेत्यर्थः। समीहा चेष्टा। 'अगम्यमानार्थस्येति'। 'अर्थप्रकरणादिना वाक्यस्येति'। वाक्यैकदेशस्येत्यर्थः। 'एधोदकस्येति'। जातिद्वन्द्वः, 'कृञः प्रतियत्न' इति षष्ठी, 'प्रतियत्नप्रकथनोपयोगेषु कृञ' इत्यात्मनेपदम्। 'उपस्कृतं भुङ्क्तइति'। क्रियाविशेषणम्, विकृतं भुङ्क्तइत्यर्थः। 'उपस्कृतं जल्पतीति'। साध्याहारं यथा तथा जल्पतीत्यर्थः। अथैवं कस्मान्न कृतं संप्रतिभ्यां करोतौ भूषणसमवाययोः, उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु चेति। सूत्रकारं पृच्छ॥

" "किरतौ लवने"॥ 'किरतौ लवनविषयइति'। अर्थद्वारकं किरतेर्लवनविषयत्वं, लवनविषये विक्षेपे यः किरतिर्वर्त्तते तत्रेत्यर्थः। तदाह।

'विक्षिप्य लुनन्तीत्यर्थ इति'। साक्षात्तु विषये किरतेर्लवनमेवार्थः स्यात्। 'णमुलत्र वक्तव्य इति'। आभीक्ष्ण्यादेर्णमुलर्थस्याभावात्॥

"हिंसायां प्रतेश्च"॥ 'हिंसायां विषयइति'। न त्वभिधेयायां विक्षेप एव त्वभिधेयस्तदेव दर्शयति। 'तथेति'। उदाहरणे नपुंसके भावे क्तः, हशब्दः कोपे[1], परिनिविभ्य एव सुटः षत्वं न प्रतेः॥

"अपाच्चतुष्पाच्छकुनिष्वालेखने"॥ 'तस्मिन्विषयइति'। न त्वभिधेये, विक्षेप एव त्वभिधेयस्तदाह। 'आलिख्य विक्षिपतीत्यर्थ इति'। 'हर्षजीविकेत्यादि'। हर्षः प्रमोदः, जीविका प्राणप[2]रित्राणोपायः, कुलाय आश्रयः, किं पुनरुदाहरणएवात्मनेपदं भवति न प्रत्युदाहरणेऽत आह। 'हर्षजीविकेत्यादि'॥

"कुस्तुम्बुरूणि जातिः"॥ सूत्रे नपुंसकलिङ्गेन बहुवचनेन च निर्देशात् फलजातावेव सुटा भवितव्यं न त्वोषधिजातावित्याशङ्क्याह। 'सूत्रनिर्देशइति'। नपुंसकलिङ्गग्रहणं बहुवचनस्याप्युपलक्षणम्॥

"अपरस्पराः क्रियासातत्ये"। 'अपरस्परा इति'। अपरे च परे चेति द्वन्द्वः, निपातनादल्पाच्तरस्य परनिपातः। 'सार्था गच्छन्तीति'। सार्थभूता गच्छन्तीत्यर्थः। 'सततमविच्छेदेनेति'। न कदा चिदस्मिन् महापथे गमनं विच्छिद्यतइत्यर्थः। अयं चार्थः, सुटा द्योत्यते। 'किमिदंमिति'। अस्मादेव निपातनान् मलोप इत्युच्यमाने सततमिति न सिद्ध्यति, सूत्रे ष्यञन्तोच्चारणादिति प्रश्नः। 'कथमिति' मलोपस्य लक्षणं न दृश्यते। अथ सातत्यइत्येतदेव निपातनं सामान्येन ततशब्दे परतः समो मकारस्य लोपो भवतीत्यस्यार्थस्य ज्ञापकं कल्प्यते, सन्ततमिति न सिद्ध्येत् बाधकत्वान्निपातनानामिति मन्यमानस्य प्रश्नः। 'समस्तते विकल्पेनेति'। अयमभिप्रायः। सातत्यशब्दं पूर्वाचार्यलक्षणसिद्धमुच्चारयता पूर्वाचार्यलक्षणमाश्रितमतस्तेन समो मकारस्य लोपो विधीयतइति, एवं च कृत्यावश्यंप्रभृतीनामपि कृत्यादिषु मकारलोपः

१ कोपं द्योतयतीति ३ पु० पाठः। २ प्राणयात्रोपाय इति ३ पा०।

सिद्धो भवति, तदेव पूर्वाचार्यलक्षणं पठन्ति । 'लुम्पेदित्यादि' । अन्त्यमिति शेषः । कृत्यप्रत्ययान्ते परतोऽवश्यंशब्दस्यान्त्यं लुम्पेत्, लोपमस्य कुर्यादित्यर्थः, 'शे मुचादीना'मिति नुम् । अवश्यकार्यमित्युदाहरणम्, तुमिति वृत्तभङ्गभयात्षष्ठी न कृता, तुम्प्रत्ययान्तस्यान्त्यं लुम्पेत् काममनसोः शब्दयोः परतः, कर्त्तुं कामोऽस्य कर्त्तुकामः, कर्त्तुं मनोऽस्य कर्त्तुमनाः, तुमप्यत्रोपसंख्यायते, अक्रियोपपदत्वादित्याहुः । संशब्दस्यान्त्यं लुम्पेत्, वा विकल्पेन, हिततयोः शब्दयोः परतः, सहितं, संहितं, सततं, संततं, गतिसमासः, मांसशब्दस्याप्यन्त्यं लुम्पेत्, क्व, पचि, पचतिधातौ, किंविशिष्टे युट्घञोः, युटि घञि च परतो यः पचिस्तस्मिन्नित्यर्थः, मांस्पचनं मांस्पाकः, कर्मणि षष्ठ्याः समासः, संहितायां समासे चैव मलोप इत्याहुः । अथ संततशब्दात् ष्यञ् भवति वा न वा सान्तत्यमिति, नेत्याहुः ॥

"गोष्पदं सेवितासेवितप्रमाणेषु" ॥ 'गावः पद्यन्तेऽस्मिन्निति' । पुंसि संज्ञायामित्यधिकरणे घः, कर्त्तरि षष्ठ्या समासः । 'अगोष्पदान्यरण्यानीति' । ननु च सूत्रे गोष्पदशब्द उपात्तस्तत् किमिदमित्यत आह । 'असेवितइत्यादि' । क्रियते चेदमसेवितग्रहणम्, न च तत्र गोष्पदशब्दः संभवति, तस्मादसेविते गोष्पदशब्दार्थे निपातनं विज्ञायते । 'नार्थ एतेनेति' । असेवितग्रहणेन । कथं तेन विना सिद्धिस्तत्राह । 'गोष्पदप्रतिषेधादिति' । 'सत्यमिति' । गोष्पदप्रतिषेधादिति यदुक्तं तत् सत्यं मन्यते न तु नार्थ एतेनेति, तद् यदि सत्यं किमर्थं तह्यसेवितग्रहणमित्याह । 'यत्र त्विति' । नञ्समासे हि तत्पुरुषः स्वभावादुत्तरपदार्थसदृशमर्थमाचष्टे अब्राह्मणवत्, ततश्च न गोष्पदमगोष्पदमिति नञ्समासे कृते यत्र सेवितस्य सेवनस्य प्रसङ्गोऽस्ति तत्रैवागोष्पदमिति स्यात्, स एव गोष्पदस्य देशस्य सदृशः, यत्र त्वत्यन्तासंभव एव सेवितस्य तत्र न स्यात्, असेवितग्रहणसामर्थ्यात्तु बहुव्रीहिराश्रीयते, स चात्यन्ताभावेऽपि भवति, तेन येषु गवामत्यन्तासम्भवस्तान्यरण्यान्यसेवितशब्देनोच्यन्ते, ततश्च तत्राप्यगोष्पदमिति भवति, अत्यन्तासंभवं स्पष्टयति । 'यानि हि महा-

जुड गतौ ॥ तवर्गपञ्चमान्तमेके पठन्ति । दृश्यते च दृष्टियौ विश्वे मरुतो जुनन्तीति । जुडति । जुजोड । जोडिता । जोडिष्यति । जुडतु । अजुडत् । जुडेत् । जुड्यात् । अजोडीत् । जुजुडिषति । जुजोडिषति । जोडित्वा । जुडित्वा । जोजुड्यते । जोजुडीति । जोजोड्डि । जोडयति । अजूजुडत् । जुडितः । अयं बन्धने ङित्त्वार्थं कुटादौ पठिष्यते । प्रेरणे चुरादौ ॥ ४६ ॥

मृड सुखने ॥ मृडति । ममर्ड । मर्डिता । मर्डिष्यति । मृडतु । अमृडत् । मृडेत् । मृड्यात् । अमर्डीत् । मिमर्डिषति । मरीमृड्यते । मरीमर्ड्डि । मर्डयति । अमीमृडत् । अममर्डत् । उर्त्रद्वा । मृडित्वा । मृडितः । 'मृडमृधे' ति त्त्वायाः कित्त्वम् । मृडः । इगुपधलक्षणः कः । मृडानी । 'इन्द्रवरुणेति' ङीषानुकौ । मृडीकं सुखं, मृडेः कीकन् । अयं क्र्यादौ च ॥ ४७ ॥

पृड च ॥ पृडतीत्यादि मृडिवत् ॥ ४८ ॥

पृण प्रीणने ॥ पृणति । पपर्णेत्यादि । लोकंपृणः । मूलविभुजादित्वात्कः । 'लोकस्य पृणे' इति मुम् ॥ वृण इति दन्त्योष्ठ्यादिरप्यत्र पठितव्यः । तथा च भाष्यं धात्वन्तरे पृणिवृणी इति । धात्वन्तरे इति तौदादिकावित्यर्थं इति कैयटे ॥ ४९ ॥

मृण हिंसायाम् ॥ मृणतीत्यादि । मृणालम् । बाहुलकादालच्, गुणाभावश्च ॥ ५० ॥

तुण कौटिल्ये ॥ तुणति । तुतोण । तोणितेत्यादि । तूण पूरण इति दीर्घोपध आकुस्मीयः ॥ ५१ ॥

पुण कर्मणि शुभे ॥ पुणतीत्यादि । मातरि निपुणः । इगुपधलक्षणः कः । पितरि निपुणः । 'साधुनिपुणाभ्या'मिति तद्युक्तात्सप्तमी । अप्रतेरित्यपनीय अप्रत्यादियोगइति वक्तव्यमित्युक्तम् । प्रत्यादयश्च प्रतिपर्यनव इति पाणिनिनोक्ताः, तेन तैर्योगे द्वितीयैव, पितरं प्रति निपुण इत्यादि । आचारनिपुणः । 'पूर्वसदृशे' त्यादिना तृतीयासमासः

नैपुण्यम् । ब्राह्मणादित्वात् ष्यञ् । षित्त्वान् ङीष् । नैपुणी । 'हलस्तद्धितस्ये'ति यलोपः । नैपुणम् । युवादित्वादण् । अनिपुणः । तत्पुरुषो बहुव्रीहिर्वा । तस्येदमानैपुणम् । अनैपुणम् । 'नञः शुची'त्यादिना पूर्वपदस्य वा वृद्धिरुत्तरपदस्य तु नित्यम् ॥ ५२ ॥

मुण प्रतिज्ञाने ॥ ५३ ॥

कुण शब्दोपकरणयोः ॥ दीर्घोपधः संकोचने आकुस्मीयः ॥ ५४ ॥

शुन गतौ ॥ शुनतीत्यादि । शुनकः । औणादिकः क्वुन् ॥ ५५ ॥

द्रुण हिंसागतिकौटिल्येषु ॥ द्रुणति । द्रुणः खर्जुरः । इगुपधात् कः । द्रुणी कच्छपी । गौरादित्वात् ङीष् । द्रोणः । पचाद्यच् । द्रोणी । पूर्ववन् ङीष् । द्रोणस्य गोत्रमपत्यं द्रौणिः । द्रौणायनः । 'द्रोणपर्वतजीवन्तादन्यतरस्यामि'ति फगिञौ । द्रोणं पचतीति द्रौणी, द्रौणिकी । 'तत्पचतीति च द्रोणादण् चे'त्यण्ठञौ । द्विद्रोणेन धान्यं क्रीणाति । 'प्रकृत्यादिभ्य उपसंख्यानमि'ति तृतीया । अत्रापि द्वितीया प्राप्नोतीति कैयटे । द्वयोर्द्रोणयोः समाहारो द्विद्रोणम् । पात्रादित्वात् स्त्रीत्वाभावः ॥ ५६ ॥

घुण घुर्ण भ्रमणे ॥ घुणति । घूर्णतीत्यादि ॥ घोणते, घूर्णते इति शपि ॥ ५७—५८ ॥

षुर ऐश्वर्यदीप्त्योः ॥ सुरति । सुषोर । सुषुरतुः । 'आदेशप्रत्यययोरि'ति प्रकृतेः षत्वम् । सोरिता । सोषूर्यते । सोषोर्ति । सोरयति । असूषुरत् । सुरन्तीति सुराः । इगुपधलक्षणः कः ॥ ५९ ॥

कुर शब्दे ॥ कुरतीत्यादि । अत्र 'हलि चे'ति दीर्घस्य 'न भकुर्छुरामि'ति न निषेधः । करोतेस्तत्र ग्रहणमिति व्याख्यातृभिरभिधानात् ॥ ६० ॥

खुरच्छेदने ॥ खण्डने चेति मैत्रेयः । खुरति । खुरः । इगुपधलक्षणः कः । कल्याणखुरा । 'स्वाङ्गाच्चोपसर्जनादि'ति ङीषो 'न क्रोडादिबह्वच' इति निषेधः । खुरणः । 'खुरखराभ्यां नस् वक्तव्य' इति ना-

सिकाया नस्भावः । 'अञ् नासिकायाः संज्ञायामि' त्येव सिद्धे वार्तिकमचो निवृत्त्यर्थं, पक्षे ऽच् प्रत्ययोपीष्यतइति वृत्तिः । तेन खुरणास इत्यपि भवति ॥ ६१ ॥

मुर संवेष्टने ॥ मुरति । मुरः । पूर्ववत्कः ॥ ६२ ॥

क्षुर विलेखने ॥ क्षुरति । क्षुरम् । पूर्ववत्कः ॥ ६३ ॥

घुर भीमार्थशब्दयोः ॥ घुरति । घोरः । पचाद्यच्, 'अकर्तरि च कारके' इति घञ् वा । घुर्घुरः । पूर्ववत्कः । 'कुआदीनां के द्वे भवत' इति द्वित्वम् । पृषोदरादित्वान्न हलादिः शेषः ॥ ६४ ॥

पुर अग्रगमने ॥ पुरति । पुरम् । पूर्ववत्कः । पुरी । गौरादित्वान् ङीष् ॥ ६५ ॥

वृहू उद्यमने ॥ दन्त्योष्ठ्यादिरयम् । तथा हि 'मूलमस्याबर्हि,' सक्थ्या बृहन्मा मे बलं विवृहतइति प्रयुज्यते । अन्ये तु बकारादिं पठन्ति । वृहति । ववर्ह । ववृहतुः । ववर्हिथ । ववर्ढ । ऊदित्वादिड्विकल्पः । झलि 'हो ढः' । 'झषस्तथोर्धोऽधः' । 'ष्टुना ष्टुः' । 'ढो ढे लोपः' । वर्हिता । वर्ढा । वर्हिष्यति । वर्क्ष्यति । 'षढोः कस्सी'ति कत्वम्, वृहतु । अवृहत् । वृह्यात् । अवर्हीत् । अवर्हिष्टाम् । अनिट्पक्षे 'शल इगुपधादि' ति क्सः । अवृक्षत् । अवृक्षताम् । विवर्हिषति । विवृक्षति । 'हलन्ताच्चे' ति[1] कित्त्वाच्च गुणः । वरीवृह्यते । वरीवर्ढि, इत्यादि । वर्हयति । अवीवृहत् । अववर्हत् । उद्वृढा । वर्हित्वा । वृढ्वा । 'न क्त्वा सेडि' त्यकित्त्वमिटि । वृढः । वृढवान् । 'यस्य विभाषे' त्यनिट् । 'ढ्रलोप' इति दीर्घः पूर्वाणा इत्यत्र न भवति । वर्हति । वृंहतीति वृद्धौ शपि । वर्हतइति तत्रैव प्राधान्ये । त्रय एते ओ...दयः ॥ ६६ ॥

तृहू स्तृहू तृंहू हिंसार्थाः ॥ तृहति । ततर्ह । स्तृहति । तस्तर्ह । 'शर्पूर्वाः खयः' । तर्हिता । तर्ढा । स्तर्हिता । स्तर्ढेत्यादि, वृह-

१ झलि सनीत्यधिकं ४ पु॰ ।

तिवत् । तरीष्टृह्यते । तरीष्टर्ढि । 'आदेशप्रत्यययोरि' ति प्रकृतेः षत्वम् । तिस्तर्हिषति तिस्तृह्यतीत्यत्र तु 'स्तौतिण्योरेवे' ति नियमान्न षत्वम् । तृहति, शस्य ङित्त्वा 'दनिदिताम्' इति नलोपः । ततृंह । ततृहतुः । ततृंहिथ । ततृण्ढ । धत्वढत्वष्टुत्वढलोपेषु नकारस्य 'नश्चापदान्तस्ये'-त्यनुस्वारे परसवर्णो णकारः । तृण्ढा । तृंहिष्यति । तृङ्क्ष्यति । तृहतु । अतृहत् । तृहेत् । तृह्यात् । यासुटः ङित्त्वान्नलोपः । अतृंहीत् । अतृंहिष्टाम् । अनिट्पक्षेऽप्यनिगुपधत्वात् क्सो नास्तीति सिचि ढत्वकत्वयोः सिचः षत्वं, नकारस्यानुस्वारपसवर्णौ, वृद्धिः, अताङ्क्षीत् । अताण्ढामित्यादि । तितृंहिषति । तितृक्षति । अनिट्पक्ष 'हलन्तादि' त्यत्र हल्ग्रहणस्य जातिवाचकत्वात् सनः ङित्त्वान्नलोपः । तरीतृंहीति । तरीतृण्ढीत्यादि । तृंहयति । अततृंहत् । तृंहित्वा । तृड्ढ्वा । इटि 'न क्त्वा सेडि' त्यकित्त्वम् । तृढः । तृढवान् । अत्र सानुषङ्गं मूर्धन्यादिं चतुर्थमपि ष्टृंह इति धातुं के चित्पठन्ति । आत्रेयमैत्रेयादिभिरयं न पठ्यते । तृह हिंसार्थो रुधादौ ॥ ६७–६८–६९ ॥

इष इच्छायाम् ॥ के चिदुदितं पठन्ति । तस्य च प्रयोजनमिड्विकल्पं क्त्वाविधौ चोदितोनुवाद इति, तद्विधानेपि तथा पठतो दैवादिकक्रैयादिकयोस्तौ न भवत इत्याहुः । न च क्त्वायामिड्विकल्पः प्रयोजनं, 'तीषसहे' ति तादाविड्विकल्पनात् । ये त्वनुदितं पठन्ति ते 'तीषसहे' त्यत्राकारमात्रविकरणेन सहिना साहचर्य्यात्तादृशस्तौदादिक एव ग्रहीष्यत इतीतरयोरग्रहणमाहुः । तथा 'इषुगमियमां छ' इत्यत्रापि 'ष्ठिवुक्लमि' त्यतोऽचीत्यनुवर्तते, तच्च 'ष्ठिवुक्लमि' त्यतोनुवृत्तेन शितीत्यनेन विशेष्यतइति शिति विधीयमानं छत्वमपि तौदादिकस्यैव सम्भवति नेतरयोरित्याहुः । इच्छति, इच्छेत् । 'इच्छार्थेभ्यो विभाषा वर्तमान' इति लिङ्लटौ । इयेष, ईषतुः, पिति तु परत्वाद् गुणे कृते 'अभ्यासस्यासवर्णे' इतीयङ् । अन्यत्र सवर्णदीर्घः । एषिता । एष्टा । एषिष्यति । इच्छतु । इच्छेत्, ऐषीत् । इच्छा । 'इच्छे' ति शप्रत्ययो यगभावश्च निपात्यते । इष्टिरिति बाहुलकात् क्तिच् । 'तितुत्र' तीड्निषेधः ।

एषणी। करणे ल्युट्। इच्छुः। 'बिन्दुरिच्छुरि'त्युप्रत्ययान्तो निपात्यते। एषित्वा, इष्ट्वा। 'तीषसहे'तीड्विकल्पः, 'न क्त्वा सेडि'त्यकित्त्वम्। इष्टः। इष्टवान्। 'यस्य विभाषे'त्यनिट्त्वम्। इष्यतीति श्यनि गतम्॥ ७०॥

मिष स्पर्द्धायाम्॥ मिषति। मिमेष। मेषिता, मेषिष्यति, मिषतु। अमिषत्, मिषेत्। मिष्यात्। अमेषिष्टाम्। मिमिषिषति। मिमेषिषति। मिषित्वा। मेषित्वा। क्त्वासनोः कित्त्वविकल्पः। मेमिष्यते। मेमेष्टि। मेषयति। अमीमिषत्। मेषः। पचाद्यच्। मेषी। जातिलक्षणो ङीष्। निमेषः। घञ्॥ ७१॥

किल श्वैत्ये॥ श्वैत्यक्रीडनयोरिति मैत्रेयः। किलति। चिकेलेत्यादि मिषतिवत्। किल्बिषम्। 'किलेर्बुक्चे'ति टिषच् बुक्चागमः॥ ७२॥

तिल स्नेहने॥ तिलति। तितेलेत्यादि। तेलतीति गतौ शपि॥ ७३॥

चिल वसने॥ चिलतीत्यादि। चेलतीति शपि॥ ७४॥

चल विलसने॥ चलतीत्यादि। चलयतीति कम्पने घटादित्वात्। ज्वलादिपठितस्यापीह पाठे प्रयोजनमुञ्छतीत्यादिवत्स्वरः, तत्र पाठः कर्त्तरि णविकल्पार्थः। चलश्चाल इति। आत्रेयस्तु तिलादित्रयमिह न पठति॥ ७५॥

इल स्वप्नक्षेपणयोः॥ इलति। इयेल। ईलतुः। गुणविषये 'ऽभ्यासस्यासवर्णे' इतीयङ्। एलिता। एलिष्यति। इलतु। ऐलत्। इलेत्। इल्यात्। ऐलीत्। ऐलिष्टाम्। ऐलिष्यत्। एलिलिषति। गुणे कृते द्वितीयस्यैकाचो द्विर्वचनम्। इला पृथिवी। इगुपधलक्षणः कः, टाप्। इल प्रेरणे चुरादौ॥ ७६॥

विल संवरणे 'दन्त्योष्ठ्यादिः। विलति। आविलम्। वेलतीति वेलेः शपि गतम्। कल विल क्षेपइति चुरादौ॥ ७७॥

बिल भेदने॥ बिलतीति बिलम्। बेलतीति शपि। अयं चुरादौ चेत्यात्रेयः। मैत्रेयस्त्वत्रैव पपाठ नान्यत्र। ओष्ठ्यादिरयम्॥ ७८॥

णिल गहने ॥ प्रणिलति । 'उपसर्गादसमासेपी'ति णत्वम् । निनेल । नेलितेत्यादि ॥ ७९ ॥

हिल भावकरणे ॥ भावकरणमभिप्रायसूचनम् । हिलति । जिहेलेत्यादि ॥ ८० ॥

शिल षिल उञ्छे ॥ आद्यस्तालव्यादिरितरो मूर्द्धन्यादिः । शिलति । सिलति । सिषेल । 'आदेशप्रत्यययोरि'ति प्रकृतेः षत्वम् । सेलतीति शपीत्यात्रेयः ॥ ८१ ॥

मिल श्लेषणे ॥ मिलतीत्यादि । मिल इति स्वरितेत्त्वग्रे भविष्यति । तस्येह पाठे प्रयोजनं कर्त्रभिप्रायेपि क्रियाफले परस्मैपदम् ॥ ८२ ॥

लिख अक्षरविन्यासे ॥ लिखति । लिलेख । लेखिता । लेखिष्यति । लिखतु । अलिखत् । लिखेत् । आशिषि लिख्यात् । अलेखीत् । लिलिखिषति । लिलेखिषति । लिखित्वा । लेखित्वा । लिखितः । लिखितवान् । लेखनः । लेखनी । टित्त्वान् ङीप् । रेखा लेखा । भिदादिपाठादङि गुणो लकारस्य वा रेफादेशः । हृल्लेखः । कर्मण्यण् । 'हृदयस्य हृल्लेखे' ति हृद्भावः, लेख इत्यणन्तस्य ग्रहणाद्घञन्ते लेखशब्दे उत्तरपदे हृदयलेख इति भवति । अत्राण्ग्रहणादेवाणन्ते लेखशब्दे उत्तरपदे हृदयस्य हृद्भावे सिद्धे पुनर्लेखो[१]पादानमुत्तरपदाधिकारे प्रत्ययग्रहणपरिभाषा न व्याप्रियतइति ज्ञापनार्थं न तु घञन्तस्यापि ग्रहणार्थमिति प्रागप्युक्तम् । दन्तलेखकः । 'नित्यं क्रीडाजीविकयो'रिति समासः । अत्र केचित्, कुटादिभ्य इत्यत्र कुटस्यादिः, कुटआदिर्येषामित्येकशेषवृत्त्या बहुव्रीहितत्पुरुषयोर्द्वयोरप्याश्रयणात् लिखितुं विश्वसृजोपि शक्तिहानिः, स्वयमेव लिखिष्यतइति समर्थयन्ते, तेषां लेखितेत्यादौ सर्वत्राञ्णित् प्रत्यये गुणाभावात् लिखितेत्यादि स्यात् । तच्च 'रलो व्युपधादी'- 'श्वरेतो सुनि'त्यत्र वृत्तौ लेखित्वा लिखित्वा लिलेखिषति विलेखितुमिति

१ शब्देत्यधिकं ३ पुस्तके ।

दर्शनादा[1]लेखने इति निर्देशाच्च नार्हम्[2]। वर्द्धमानोप्यालेखनइति निर्द्देशा-त्तत्पुरुषपक्षो दुष्ट इत्याह। अत एव वृत्त्यादिविरोधा 'त्संज्ञापूर्वको विधि-रनित्य' इति लिखितेत्यादौ सर्वत्र कैश्चिद्गुणाभावस्य कथनमयुक्तम्। किञ्च लिखितुं, स्वयमेव लिखिष्यतीति द्वावेव प्रयोगौ प्रस्तुत्य यद्भव-श्यमुपपादनीयं 'संज्ञापूर्वको विधिरनित्य' इति हरदत्तेनाभिधानाच्च। अत्रात्रेयः। 'अर्थवेदसत्यानामापुगि' ति दीर्घोच्चारणादन्यत्रापि भव-तीति केचिदिति। तेन लिखमाचष्टे लिखापयतीति भवति॥ ८३॥

कुट कौटिल्ये॥ कुटति। चुकोट। चुकुटतुः। चुकुटिथ। चुकोट। चुकुट। चुकुटिव। 'गाङ्कुटादिभ्योऽञ्णिन्ङिदि' ति अञ्णि-त्प्रत्ययस्य ङित्त्वान्न गुणः। उत्तमे णलि णित्त्वविकल्पनात्पक्षे ङित्त्वाद-गुणत्वम्। कुटिता कुटिष्यति। कुटतु। अकुटत्। कुटेत्। आशिषि कुट्यात्। अकुटीत्। अकुटिष्टाम्। चुकुटिषति। कुटित्वा। 'रलो व्यु-पधादि' ति कित्त्वविकल्पनात्पूर्वविप्रतिषेधेन कुटादिङित्त्वमिष्यते। तस्य ज्ञापकं सर्वत्र सनन्तादात्मनेपदप्रतिषेध इति वार्तिकम्। सर्वेषु पक्षेषु सनन्तादात्मनेपदं प्राप्नोति, चुकुटिषति ङित इत्यात्मनेपदं प्राप्नोति तस्य प्रतिषेधो वक्तव्य इति। भाष्यञ्च यदि हि कित्त्वं स्यात् किमनेना-त्मनेपदप्रतिषेधवचनेनेति। तथा 'ऽनुदात्तङित' इत्यत्रोपदेशानुवर्त्तनं च ङित्त्वस्य पूर्वविप्रतिषेधे प्रमाणम्। तस्य ह्यातिदेशिकं ङित्त्वं कुटादिभ्यो व्यावर्त्यम्। किञ्च ङित्त्वं कुटादिमञ्णितं चापेक्षते, कित्त्वं तु रल-न्ताद्व्युपधाद्धलादेः परं सेटं सनमपेक्षतइति बह्वपेक्षम्, तस्मादल्पापेक्षं ङित्त्वमन्तरङ्गं च। चोकुट्यते। चोकुटीति। चोकोट्टि। गणेन निर्द्देशा-न्ङित्त्वं न यङ्लुकि। कोटयति। अचूकुटत्। णिचो णित्त्वान्न ङित्त्वम्। कोट्यः। कोटः। ण्यघञोर्ञ्णित्त्वादङित्त्वम्। कुटपः परिमाणम्। 'उषिकुटिदलिकचिखजिभ्यः कपन्' ति कपन्। कुटरुः। वर्द्धकी पक्षी च। कुटेः किच्चेत्युरुः। कुटादित्वान्ङित्त्वादेव कित्त्वफले सिद्धे किद्-

१ अपाच्चतुष्पाच्छकुनिष्वालेखने इति ४ पु॰ पा॰।
२ अयुक्तमिति ४ पु॰ पा॰।

चनं तस्यानित्यत्वज्ञापनार्थन्तेन धुवतेरित्रप्रत्यये धवित्रमिति गुणो भवतीत्याहुः। कुड्मलम् । 'कुटिकुषिभ्यां क्मलनि' ति क्मलन्। कुटरो मन्थविष्कुम्भः । बाहुलकादरः । कोटरः । कोटरावणम् । 'वनगिर्योः सञ्ज्ञायां कोटरे' ति दीर्घः । 'वनं पुरगे'त्यादिना णत्वम् । अत्रैव च कोटरेति निर्द्देशादरे[1] गुणः । कुटिलम् । बाहुलकादिलच् । कुटिलिका । कर्मारार्णां सन्दशिनी । सञ्ज्ञायां कन् । कुटिलिकया अगारान् हरतीति कौटिलिकः कर्मारः । 'अण् कुटिलिकाया इत्यण् । कुटी । इन्नन्ता 'त्कृदिकारादक्तिन' इति ङीष् । अल्पा कुटी, कुटीरः । 'कुटीशमीशुण्डाभ्यो र' इति रः । कुट प्रतापने इत्याकुस्मीयः । कूट परितापे इति क्र्यादिः । दीर्घोपधो, ऽयमपि ह्रस्वोपध इत्यात्रेयः । उभावपि दीर्घोपधाविति मैत्रेयः ॥ ८४ ॥

पुट संश्लेषणे ॥ पुटतीत्यादि कुटिवत् ॥ पुटः, पुटिका । अल्पापुटः पुटिका । महांस्तु पुटः । पुटक्षतादीनामुपसंख्यानमिति समानाधिकरणसमासः । 'अन्येषामपि दृश्यत' इति दीर्घः । प्रतिपत्त्राव्यपेक्षमेकस्याल्पत्वमहत्त्वे । अयं भाषार्थश्चुरादौ दण्डके । संसर्गार्थस्तु कथादौ ॥ ८५ ॥

कुच संकोचने ॥ अत एव निर्द्देशात् ल्युटि गुण इति काश्यपः । कुचति । निकुचितेत्यादि । संकोचः । 'न क्वादे' रित्यकुत्वम् । कोचतीति शपि ॥ ८६ ॥

गुज शब्दे ॥ अव्यक्ते शब्दे इत्यात्रेयः । गुजतीत्यादि । गोजः । घञि 'न क्वादेरि' ति न कुत्वम् । गुञ्जतीति शपि ॥ ८७ ॥

गुड रक्षायाम् ॥ गुडतीत्यादि । गुड इक्षुविकारः सन्नाहश्च । इगुपधलक्षणः कप्रत्ययो 'घजर्थे कविधानमि' ति कर्मणि वा । गुडितो हस्ती, संजा[2]तसान्नाह इत्यर्थः । तारकादित्वादितच् । गुडा स्नुही[3] । टाप्, तत्प्रायाः केशा अस्य गुडाकेशः ॥ ८८ ॥

---

१ प्रत्ययइत्यधिकम् ।
२ संज्ञा, जातेति ४ पु॰ पा॰ ।
३ वृक्षविशेषः ।

डिप क्षेपे ॥ डिपति । डिडेप । डिपितेत्यादि । डिप्यतीति श्यनि ॥ ८९ ॥

कुर छेदने ॥ कुरति । चुच्छोर । छुरितेत्यादि ॥ छुर्यात् । छुर्यास्तामित्यादि । अत्र 'हलि चे'ति दीर्घस्य 'न भकुर्छुरामि' ति निषेधः । छुरिका । 'क्वुन् शिल्पिसंज्ञयोरि'ति क्वुन् । आच्छुरितकम् । सोत्प्रासो हासः । निष्ठान्तात्संज्ञायां कन् ॥ ९० ॥

स्फुट विकसने ॥ स्फुटति । पुस्फोट । 'शर्पूर्वाः खय' इति खयः शेषः । स्फोटनइति शप्यात्मनेपदी । स्फोटतीति विशरणार्थः परस्मैपदी तत्रैव । भेदनार्थश्चुरादौ ॥ ९१ ॥

मुट आक्षेपप्रमर्द्दनयोः ॥ मुटति । मुमोट । मुटितेत्यादि । मोटतीति प्रमर्द्दने शपि ॥ ९२ ॥

त्रुट छेदने ॥ त्रुटति । तुत्रोट । त्रुटितेत्यादि । 'वा भ्राशे'ति शविषये वा श्यन् । त्रुट्यति । त्रुट्यतु । त्रुट्येत् । अत्रुट्यत् । त्रोटिः । ण्यन्ताद 'च इरि' त्यौणादिक इप्रत्ययः ॥ ९३ ॥

तुट कलहकर्मणि ॥ तुटति । तुतोट । तुटितेत्यादि । तुटिः । 'इक्कृष्यादिभ्य' इत्यात्रेयः ॥ ९४ ॥

चुट छुट छेदने ॥ चुटति । छुटतीत्यादि । चोटतीति शपि ॥९५-९६॥

जुड बन्धने ॥ प्रेरणे चुरादिः जुडति । जुजोड । जुडितेत्यादि ॥ ९७ ॥

कड मदे ॥ कडति । चकाड । कडितेत्यादि । अस्य ङित्कार्याभावादिह पाठो डकारान्तमात्रानुरोधेन । कुटादिभ्योऽन्यत्रापि शक्यते पठितुम् । अयं भ्वादौ च । पुनःपाठफलमुञ्छतिवत् ॥ कण्डते इति च शपि ॥ ९८ ॥

लुट संश्लेषणे ॥ लुटति । लुलोट । लुण्टतीत्यालस्यप्रतिघातयोः शपि । लोटति लुट्यतीति विलोडने शपि श्यनि च । लोटतीत्युपघाते शपि । प्रतिघाते लोटते इति द्युतादौ । लुण्टतीति स्तेये शपि । गतावपि लुण्टतीति शपि । लुड इत्येके । अयमपि शपि गतौ ॥ ९९ ॥

क्रुड घनत्वे ॥ घनत्वं सान्द्रता । घसनइत्येके । क्रुडति । चक्रुडे । क्रुडितेत्यादि ॥ १०० ॥

कुड बाल्ये ॥ कुडति । चुकोड । कुडितेत्यादि ॥ १०१ ॥

पुड उत्सर्गे ॥ पुडतीत्यादि । मुड इत्यात्रेयः ॥ १०२ ॥

घुट प्रतीघाते ॥ अयं प्रथमान्तः । घुटति । जुघोट । घुटितेत्यादि । घोटकः । एवुल् । घोटः । घञ् । अयं द्युतादावात्मनेपदी गतः ॥ १०३ ॥

तुड तोडने ॥ अयं तृतीयान्तः । प्रथमान्तः कलहकर्मार्थः पूर्वत्र पठितः । तोडनं भेदः । तुडति । तुतोड । तुडितेत्यादि । तोडने तोडतीति शपि ॥ १०४ ॥

थुड [1]स्फुड संवरणे ॥ थुडति । तुथोड । थुडितेत्यादि । स्फुडति । पुस्फोड । 'शर्पूर्वाः खय' इति खयः शेषः । स्फुडितेत्यादि । खुड क्रुड इत्येके । अत्र कुड संघातइत्यात्रेयः, बाल्ये पठितस्येह पाठोऽर्थभेदादिति तस्याभिप्रायो द्रष्टव्यः । अत्रापठतां मैत्रेयादीनां धातूनामनेकार्थत्वादत्रापि वृत्तिर्भविष्यतीत्यभिप्रायः १०५–१०६ ॥

स्फुर स्फुल संचलने ॥ स्फुरतिस्फुलत्योरित्यत्र न्यासे स्फुर स्फुल चलने इत्यनुपसृष्टं पठ्यते, अत्र केवलं शब्दो भिन्नोऽर्थस्त्वेक एव । आत्रेयस्तु स्फुर स्फुरणे, स्फुल संचलने इति पपाठ । 'स्फुरतिस्फुलत्योर्निर्निविभ्य' इति वा षत्वम् । निर्निसोः साधारणमुक्तमुदाहरणम् । पुस्फोर । स्फुरिता । स्फुरिष्यति । स्फुरतु । अस्फुरत् । स्फुरेत्, स्फूर्यात् । 'हलि चे' ति दीर्घः । स्फुरिता, स्फुरिष्यति, सेट्त्वा 'हलि चे' ति न दीर्घः । कुटादित्वा 'द्रलो व्युपधादि'त्यत्र न भवति । पोस्फूर्यते । पोस्फोर्ति । दीर्घस्यासिद्धत्वाद्गुणः । पोस्फूर्तः । स्फारयति । स्फोरयति 'चिस्फुरोर्णौवि' ति वा ऽऽत्वम् । अपुस्फुरत्, आत्वपक्षे णौ कृतमभ्यासे स्थानिवदित्यभ्यासस्योकारान्तत्वे ह्रस्व इत्युकारः । 'ओः पुयण्जी' ति इत्वं न भवति,

[1] तुड इति ४ पु॰ पाठः । धातुपाठे तु थुड स्थुड इति दृश्यते । अयमेव पाठो युक्तः, उत्तरत्रास्मिन्नेवार्थे स्फुडतेर्वक्ष्यमाणत्वात् ।

सकारेण पवर्गपरत्वस्य व्यवधानात् । एवं णयन्तात्सन्यपि पुस्फोरयिषति पुस्फारयिषतीति भवतः, मैत्रेयस्तु स्फुर स्फुरणे इति पृथक् पठित्वा स्फर इत्येके, अदुपधः, स्फरति । पस्फारेत्याह । स्फुलतीत्यादि स्फुरतिवत् । णत्वं त्वस्य न भवति । तथा 'हलि चे' ति दीर्घत्वमपि न भवति, अरेफान्तत्वात् ॥ १०७–१०८ ॥

स्फुड चुड व्रुड संवरणे ॥ मैत्रेयेणैते न पठ्यन्ते । आत्रेयादयस्तु पठन्ति । स्फुडति । पुस्फोड । खयः शेषः । चुडति । चुचोड । व्रुडति । वुव्रोडेत्यादि । अत्र क्रुड भृड निमज्जनइत्येके इत्यात्रेयः । मैत्रेयस्तु क्रुडं पठित्वा भृड इत्यप्येके इत्याह । क्रुडति । क्रोडः । घञ् । क्रोडा । अश्वानामुरः, टाबन्तोयं स्वभावतो विशेषविषयः । कल्याणी क्रोडा यस्याः सा कल्याणक्रोडा । बहुव्रीहावुपसर्जनह्रस्वत्वे 'न क्रोडादिबह्वच' इति स्वाङ्गलक्षणो ङीष् निषिध्यते । क्रोडादिषु टाबन्तस्य पाठाद् भुजान्तरमात्रवचनस्य क्रोडशब्दस्य बहुव्रीहौ स्वाङ्गलक्षणो ङीष्विकल्प एव भवति । कल्याणक्रोडी कल्याणक्रोडा मयूरीति । भृडतीत्यादि । व्रश्चादय उदात्ता उदात्तेतः ॥ १०९–११०–१११ ॥

अथ सेटमात्मनेपदिनमाह ॥

गुरी उद्यमने ॥ गुरते । जुगुरे । जुगुरिषे । गुरिता । गुरिष्यते । गुरताम् । अगुरत । गुरेत । गुरिषीष्ट । अगुरिष्ट । अगुरिषाताम् । जुगुरिषते । जोगूर्यते । जोगोर्त्ति । गोरयति । अजूगुरत् । खड्गापगारं युध्यन्ते खड्गापगोरमिति वा, त्वरया खड्गमुद्यम्य युध्यन्तइत्यर्थः । 'द्वितीयायां चे' ति परीप्सायां णमुल्, 'अपगुरोर्णमुली' ति वात्वम् ॥ गूर्णः । गूर्णवान् । ईदित्त्वादनिट्त्वं, गूर्तिः । 'तितुत्र' तीणिनषेधः, । दीर्घोपधोयं चुरादौ, हिंसागत्योर्दिवादौ, ईदिदुदात्तोनुदात्तेत् ॥ ११२ ॥

निष्ठायामनिट्त्वसाम्यात् पुनः परस्मैपदप्रस्तावः ।

णू स्तवने । ह्रस्वान्तमात्रे[1]यादयः पठन्ति । यथा तु भाष्यं तथा दीर्घान्तः । यदाह कुटादिसूत्रे तस्मान्नूत्वा धूत्वेत्येव भवितव्यमिति ।

१ मैत्रयेत्यधिकम् ३ । पु॰

नुनाव । नुनुवतुः । नुनुविथ । नुविता । नुविष्यति । ङित्त्वेन गुणनिषेधत्वादुवङ् । नुवतु । अनुवत् । नुवेत्, नूयात् । अनुवीत् । नुनूषति । 'सनि ग्रहगुहोश्चे' तीण्निषेधः । नोनूयते । नोनोति । नूत्वा । नूतः । नूतवान् । 'श्र्युकः क्किती' त्यनिट्त्वम् ॥ ११३ ॥

धू विधूनने ॥ अयं पूर्वश्चोदात्तः ॥ धुवतीत्यादि नुवतिवत् । धवित्रं व्यञ्जनम् । 'अर्त्तिलूधू' इति करणे इत्रः । 'कुटः क्ङिच्चे' त्यादिज्ञापकात्कुटादिङित्त्वाचित्यत्वाद्गुण इति केचिदिति कुटतावुक्तम्, विदिभिदीतिसूत्रे हरदत्तस्तु ङित्त्वमेवेच्छन् धुवित्रमित्युवङमेवाह। प्राणा वै धवित्रमिति तु छान्दसमिति च ॥ ११४ ॥

कुटाद्युवर्णान्तपरस्मैपदिनिष्ठानिट्प्रस्तावादाह ॥

गु पुरीषोत्सर्गे ॥ गुवति । जुगाव । जुगुवतुः । जुगुविथ । जुगुथ । तासौ नित्यानिट्त्वाद्भारद्वाजनियमाच्च थलीड्विकल्पोन्यत्र क्रादिनियमान्नित्यमिट् । गुता । गुष्यति । गुवतु । अगुवत् । गुवेत् । आशिषि गूयात् । अगुषीत् । अगुताम् । अगुषुः । झलि 'ह्रस्वादङ्गादि' ति सिच्लोपः । जुगूषतीत्यादि । 'अज्झनगमां सनी' ति दीर्घः । गूनः । गूनवान् । 'दुग्वोर्दीर्घश्चे' ति निष्ठानत्वं दीर्घश्च ॥ ११५ ॥

ध्रु गतिस्थैर्ययोः ॥ ध्रुवतीत्यादि गुवतिवत् । ध्रुवः । पचाद्यच् । अत्र स्वाम्यादयो ध्रुव इति वकारान्तं धातुं पठन्ति । उक्तञ्च 'ध्रुवमपाये' इत्यत्र हरदत्तेन ध्रु गतिस्थैर्ययोरित्यस्मात्पचाद्यच्, ये ध्रुव गतिस्थैर्ययोरिति पठन्ति, तेषामिगुपधलक्षणः कप्रत्यय इति, अस्मिन् पक्षे सेट् । ध्रुवति । दुध्राव । दुध्रुवतुः । दुध्रुविथ । ध्रुविता । ध्रुविष्यति । ध्रुवतु । अध्रुवत् । ध्रुवेत् । आशिषि ध्रूव्यात् । 'हलि चे' ति दीर्घः । अध्रुवीत् । अध्रुविष्टाम् । अध्रुविषुः । दुध्रुविषति । दोध्रूव्यते । अयं गुवतिश्चानुदात्तौ उदात्तेतौ ध्रुवतिर्वान्तवादिनां सेट् ॥ ११६ ॥

कुङ् शब्दे ॥ केचिद्दीर्घान्तमिमं पठन्तीत्यात्रेयमैत्रेयौ । एवं स्वामिकाश्यपसुधाकरधनपालसंमताकारा अपि । शाकटायनस्तु कुङ् कूङ् शब्दे इत्युभयं पपाठ । तत्र ह्रस्वान्तो न्यासकारस्यापीष्टः । यदाह 'इके

क्ङिति' त्यत्र चुकूषत इत्यत्र दीर्घवचनमर्थवत् । तत्र गाङ्कुटादिसूत्रेण ङित्त्वाद्गुणो न प्रवर्त्तत इति दीर्घस्यावकाश इति । तन्मते कुवते चुकुवे इत्यादि गुवतिवत् । हरदत्तस्य तु दीर्घान्त एवेष्टः । यदाह । कुटादि-सूत्रे आकूतमिति दर्शनाद् दीर्घान्त इति, पुनः स एवे 'को क्ङिति' त्यत्र ननु कुङ् शब्दे कुटादिश्चुकूषते इत्यस्ति दीर्घस्यावकाशः । दीर्घान्तोय-मित्यवोचामेति । अत्र कैयटेपि । न च दीर्घविधानस्य कुङ् शब्देइति धातुरवकाशश्चुकूषत इति, तस्मात्कूङ्शब्द इति पाठस्तत्र कुटादित्वा-न्ङित्त्वे सति गुणाभावाद्दीर्घस्य श्रवणं सिद्धं, लोकवेदयोश्चाकूतशब्दस्य प्रयोगो दृश्यत इति। अत्र पत्तेयं सेट्। कुवते। इत्यादि नुवतिवत् ॥ ११७ ॥

वृत् ॥ कुटादयो वृत्ता इत्यर्थः ॥

ङित्प्रसङ्गादाह ।

पृङ् व्यायामे ॥ आङ्पूर्वः । प्रायेणायं व्याङ्पूर्वः । व्याप्रियते । 'रिङ् शयग्लिङ्क्षु' इति रिङादेशः, तस्येयङादेशः । व्यापप्रे । व्याप-प्राते । व्यापर्त्ता । व्यापर्त्तासे । व्यापरिष्यते । 'ऋद्धनोस्ये' इतीट् । व्याप्रियताम् । व्याप्रियत । व्याप्रियेत । आशिषि व्यापृषीष्ट । व्यापृ-षीयास्ताम् । व्यापृषीरन् । व्यापृत । व्यापृषाताम् । व्यापृषत । 'ह्रस्वा-दङ्गादि' ति क्ङलि सिचो लोपः । 'उश्चे' ति लिङ्सिचोः कित्त्वान्न गुणः । व्यापुपूर्षते। 'इको क्ङलि' ति सनः कित्त्वा 'दज्झनगमां सनी' ति दीर्घ 'उदोष्ठ्यपूर्वस्ये' त्युत्वे रपरत्वे 'हलि चे' ति दीर्घः । व्यापेप्रियते । 'रीङृत' इति रीङ् । व्यापर्पर्तीत्यादि । 'ऋतश्चे' ति रुग्रिगीकः । व्यापारयति । व्यापीपरत् । व्यापृत्य । व्यापृतवान् ॥ ११८ ॥

मृङ् प्राणत्यागे ॥ म्रियते । ममार । मम्रतुः । मम्रुः । ममर्थ । मम्रिव । क्रादिनियमादिट् । थलि 'त्वचस्तास्वत्यल्यनिटो नित्यमि'-तीण् न भवति । मर्त्ता । मरिष्यति । 'ऋद्धनोरि' तीट् । म्रियताम् । अम्रियत । म्रियेत । मृषीष्ट । अमृत । अमृषाताम्, क्ङलि सिचो लोपः । 'उश्चेति' लिङ्सिचोः कित्त्वान्न गुणः । 'म्रियतेर्लुङ्लिङोश्चे' ति लुङ्लिङ्शिद्विषयएव तङिति नियमादतोन्यत्र परस्मैपदमेव । यद्येवमू र्

विधिरस्तु सूत्रं किं ङित्त्वेन. तत्क्रियते 'तास्यनुदात्तेन्ङिददुपदेशादि' ति विशेषणार्थं, तेन माह्रिमृतेत्यत्र लसार्वधातुकानुदात्तत्वे धातोरन्त इति धातोरुदात्तत्वं भवति। अत एव ङित्त्वसामर्थ्यात्सिज्लोपस्य पूर्वत्रासिद्धत्वं नेति लसार्वधातुकस्य ङितः परत्वं भवति। अन्यथा प्रत्ययाद्युदात्तत्वे धातुरनुदात्तः स्यात्। न च 'तिङ्ङतिङ' इति सर्वनिघातप्रसङ्गः। 'हि चे' ति निषेधात्। मुमूर्षति। सनः कित्त्वे दीर्घात्वरपरत्वदीर्घाः। 'पूर्ववत्सन' इति तङत्र न भवति, नहि म्रियतिमात्रमात्मनेपदस्य निमित्तं, किन्तु शिल्लुङ्लिङोपि। न चात्र ते म्रियतेरनन्तराः संभवन्ति। मरीम्रीयते, 'रीङ् ऋत' इति रीङ्। मर्मरीति। मर्मर्तीत्यादि। मारयति। अमीमरत्, मृत्वा। मृतः। मृतवान्। न म्रियते इति अमृतम्। 'मतिबुद्धिपूजार्थेभ्यश्चे' त्यत्र चकारस्यानुक्तसमुच्चयार्थत्वाद्वर्त्तमाने क्तः। नञ्समासः। अमरः। पचाद्यच् पूर्ववत्समासः। मृत्युः। 'भुजिमृङ्भ्यां युक्त्युकावि' ति त्युक्, अनुदात्तावात्मनेभाषौ ॥ ११९ ॥

रेफवदनिट्प्रकरणादाह ॥

रि पि गतौ ॥ रियति। लघूपधगुणादन्तरङ्गत्वादियङादेशः। रिराय। रियतुः। रियुः। 'एरनेकाच' इति यण्। रिरयिथ। रियिव। रिरेथ। रियिम। क्रादिनियमादिट्। थ 'ल्यचस्तास्वदि' तीण्निषेधः। भारद्वाजनियमाच्च विकल्पः। रियतुरित्यादौ यणो बहिरङ्गलक्षणस्यासिद्धत्वाद्रेफस्य हल्परत्वाभावा 'दुपधायां चे' ति न दीर्घः। रेता, रेष्यति। रियतु। अरियत्। रियेत्। आशिषि। रीयात्। अकृत्सार्वधातुकयोरिति दीर्घः। अरैषीत्। अरैष्टाम्। अरैषुः। रिरीषति। सनः कित्त्वे 'इञ्झनगमामि' ति दीर्घः। रेरीयते। रेरयीति। रेरेति। राययति। अरीरयत्। पियतीत्यादि रियतिवत् ॥ १२० ॥ १२१ ॥

धि धारणे ॥ धियति। दिधाय। दिध्यतुः। दिध्युः। दिधयिथ। दिधेथ। धेतेत्यादि ॥ १२२ ॥

क्षि निवासगत्योः ॥ क्षियति। चिक्षाय। चिक्षियतुः। चिक्षियुः। चिक्षयिथ। चिक्षेथ। संयोगपूर्वत्वाच्च यणादेश इतीयङ्। क्षेतेत्यादि

रियतिवत् । प्रक्षीय । 'क्षिय' इति ल्यपि दीर्घः । क्षीणो देवदत्तः । अकर्मकत्वाद्गत्यर्थत्वाद्वा कर्तरि क्तः 'निष्ठायामण्यदर्थे' इति दीर्घः । ण्यदर्थो भावकर्मणी 'क्षियो दीर्घादि' ति निष्ठानत्वम् । इदमेषां क्षीणं, 'क्तोऽधिकरणे चे' ति ध्रौव्यार्थत्वाद्गत्यर्थत्वाद्वाधिकरणे क्तः । दीर्घत्वनत्वे पूर्ववत् । भावे तु क्षितं, ण्यदर्थत्वेन दीर्घाभावाच्च निष्ठानत्वं, क्षीणायुर्वृषलः । क्षितायुर्वृषलः । क्षीणकः । क्षितकः । क्तान्तादनुकम्पायां कन्, 'वाक्रोशदैन्ययोरि' ति दीर्घविकल्पः, पूर्ववद्दीर्घनत्वे । क्षयी । 'जिदृक्षीत्यादि' नेनिः । रियत्यादयोनुदात्ता उदात्तेतः ॥ क्षयतीति गतं शपि ॥ १२३ ॥

षकारवत्परस्मैपदिप्रसङ्गात्तादृशं सेट्माह ॥

षू प्रेरणे ॥ सुवति । सुवतः । सुवन्ति । सुवसि । सुवामि । सुषुवति, 'उपसर्गात्सुनोतिसुवती' ति षत्वम् । सुषाव । सुषुवतुः । सुषविथ । सुषुविव । अभ्यासात्परस्या 'देशप्रत्यययोरि' ति षत्वम् । सुसुषाव । विसुषाव 'उपसर्गादि' ति षत्वमभ्यासस्य 'स्थादिष्वभ्यासेन चाभ्यासस्ये' ति नियमाच्च भवति । सविता । सविष्यति । सुवतु । असुवत् । अभ्यषुवत् । 'प्राक्सिताड्व्यवायेपी' ति षत्वम् । सुवेत् । सूयात् । असावीत् । असाविष्टाम् । अभ्यषावीत् । लङ्वत्षत्वं, सुसूषति । 'स्तौतिण्योरि' ति न षत्वम् । अभिसुसूषति । पूर्ववत्स्थादिनियमादभ्यासस्य न षत्वम्, प्रकृतेश्च 'स्तौतिण्योरि' ति नियमात् 'सनि ग्रहगुहोश्चे' त्यनिट्त्वा- 'दिको झलि' ति सनः कित्त्वम् । सोषूयते । सोषोति । सावयति । असूषवत् । सूत्वा । सूतः । सूर्यः । 'राजसूयेत्यादिना क्यपि रुडागमः । सूर्यस्य स्त्री देवता सूर्या । 'सूर्याद्देवतायां चाब्वक्तव्य' इति चाप् । पुंयोगङीषोपवादः । अदेवतायां तु ङीषेव सूरी मानुषीति । 'सूर्यतिष्ये' ति तद्धिते ईति च भसंज्ञानिमित्ते यलोपः । सूर्यस्येदं सौर्यमित्यत्र सूर्यस्य छे च ड्यां चेति नियमाच्च लोपः । यद्यप्यत्र 'यस्येति चेत्यल्लोपस्य यलोपविधिम्प्रति न स्थानिवदिति स्थानिवत्त्वनिषेधाद्यकारो नोपधस्तथा 'प्यसिद्धवदत्राभादि' त्यसिद्धत्वादुपधात्वादस्ति

लोपप्रसंगः, सौरी बलाकेत्यत्र तु 'तेनैकदिगि'त्यणि ङीप्यणो 'यस्येती'तिलोपस्य पूर्ववदसिद्धत्वादुपधायकार इति तस्य लोपः । इकारपरत्वात्, न चाणि यो यस्येतिलोपस्तस्यासिद्धत्वादनुपधात्वमिति शङ्क्यम् । अणयल्लोपो यलोपस्त्वीतीति व्याश्रयत्वेनासिद्धत्वाप्रसङ्गात् । न च स्थानिवद्भावेनोपधात्वभङ्गः । यलोपविधौ तस्य निषेधात् । नत्वेवमपि यकारः सूर्यस्योपधा न भवति किन्त्वणन्तस्येति लोपो न स्यात् । नैष दोषः । नात्र सूर्यादिभिरुपधां विशेषयिष्यामः किन्तु भसंज्ञकेन, भस्योपधा यो यकारो वस्तुतः सूर्यादिसंबन्धीति । एवं च सौरीयमित्यत्रापि अणन्ताच्छे पूर्ववद् यलोपः सिध्यति । सौर्यं हिमवतः शृङ्गं इत्यत्र पूर्ववदणि । 'नपुंसकाच्चे'ति शीभावे पूर्ववदीति प्राप्तो यलोपो ङ्यामितीकारस्य विशेषणाच्च भवति । सौरो मन्त्र इति प्रयोगस्तु सूरशब्दादणि द्रष्टव्यः । प्रसवी । 'जिदृक्षिवी'त्यादिनेनिः । सवित्रम् । 'अर्त्तिलू'इति इत्रः । सूरः । 'सूसूधागृविभ्यः क्रनि'ति क्रन् । सूरिस्तु सूङः क्रिरिति, षूङ उक्तः, सूते सूयतइति लुक्श्यनोः ॥ १२४ ॥

कॄ विक्षेपे ॥ किरति । किरतः । 'ऋत इद्धातोरि'तीत्वम् । चकार । चकरतुः । चकरिथ । चकार । चकर । चकरिव, 'ऋच्छत्यृता'मिति लिटि गुणः, णिति पूर्वविप्रतिषेधे 'नाचो ञ्णिती'ति वृद्धिः, कृते वा गुणे 'अत उपधाया'इति वृद्धिः । करिता, करीता, करिष्यति । करीष्यति । 'वृतोवे'तीटो वा दीर्घः । किरतु । अकिरत् । किरेत् । कीर्यात् ॥ इत्वे 'हलिचे'ति दीर्घः । अकारीत् । अकारिष्टाम् । सिचि वृद्धिः ॥ 'वृतो वे'तीटो दीर्घस्य 'सिचि च परस्मैपदेष्वि'ति निषेधः । चिकरिषति । 'सनि ग्रहगुहोश्चेति' चशब्दादुगन्तलक्षणेणिनषेधे प्राप्ते तदपवाद 'इट् सनि वे'ति विकल्पे च प्राप्ते 'किरश्च पञ्चभ्य'इति नित्यमिट् 'अस्य दीर्घत्वं नेच्छन्तीति वामनः, हरदत्तोपीष्टिरेवेयमिति । भागवृत्तौ त्वत्रापि दीर्घविकल्पो दृश्यते । चेकीर्यते । परत्वादित्वादौ द्विर्वचनम् । चाकरीति । चार्कर्त्ति । अभ्यासस्य ह्रस्वोरदत्वहलादिशेषेषु 'दीर्घोकित'इति दीर्घः । 'ऋतश्चे'ति अभ्यासस्य रुगादिविधौ

गादीनामव्यवस्था चमसेष्वेव कार्यमिति नियमाभावः स्यात् । संस्कारात् संमार्गस्य संस्काररूपत्वात् । संस्कारोद्देश्यतावच्छेदकस्य अपूर्वसाधनत्वरूपस्य व्रीहीन्प्रोक्षतीत्यादौ व्यवस्थापितत्वात्तस्य चमसादावपि सत्त्वादिति भावः ॥ १५ ॥

व्यवस्था वा ऽर्थस्य श्रुतिसंयोगात्तस्य शब्दप्रमाणत्वात् ॥ १६ ॥

सिद्धान्तमाह । व्यवस्थेति । व्यवस्था ग्रहेष्वेवेति नियमः । अर्थस्य ग्रहरूपार्थस्य श्रुतिसंयोगाच् शक्येन मुख्यवृत्तिसंबन्धात् । लक्षणायामपि ग्रहजन्यापूर्वलक्षणाया एव युक्तत्वादाग्नेयाद्यपूर्ववदिति* भावः । ननु ग्रहापूर्वमेव लक्षयेन्न परमापूर्वमित्यत्र किं नियामकमत आह । तस्येति । तस्य अपूर्वसाधनस्य शब्दप्रमाणत्वाच् शास्त्रैकगम्यत्वात् । ग्रहपदश्रवणाद्ग्रहापूर्वमेव लक्षयेदिति भावः ॥ १६ ॥

सप्तदशारत्नित्वस्य पशुधर्मत्वम् । अधि० ९ ।

आनर्थक्यात्तदङ्गेषु ॥ १७ ॥

सप्तदशारत्निर्वाजपेयस्य यूपो भवतीति श्रुतम् । अत्र यूपपदं ग्रहविशेषलक्षकमुत शक्यार्थ एवेति संशये वाजपेयस्य सोमविकारत्वेन यूपाप्रसक्तेः खादिरत्वादिना सदृशवाजपेयसंबन्धिषोडशिग्रहलक्षको यूपशब्द इति बहिः पूर्वपक्षे सिद्धान्तमाह । आनर्थक्यादिति । वाजपेये प्रधाने यूपाभावेनानर्थक्याद्यूपपदानर्थक्यात्तदङ्गेषु प्राजापत्यादिपशुषु निविशतइदं वाक्यम् । लक्षणां विना ऽपि संभवे लक्षणा ऽनुचिता । श्रूयमाणषष्ठ्याः संबन्धमात्रे शक्तत्वेन परम्परासंबन्धस्यापि शक्यार्थत्वादिति भावः ॥ १७ ॥

अभिक्रमणादीनां प्रयाजमात्राङ्गत्वम् । अधि० १० ।

कर्तृगुणे तु कर्मासमवायित्वाद्वाक्यभेदः स्यात् ॥ १८ ॥

* सोमयागस्यैकत्वे ऽपि अभ्यासानां भेदात्तेषां च विनश्वराणामपूर्वमन्तरा परमापूर्वसाधनत्वायोगादवान्तरापूर्वकल्पनायां सन्निहितत्वाद् ग्रहजन्यापूर्वमेव लक्षयितुं युज्यतइति भावः ।

दर्शपूर्णमासे प्रयाजसन्निधौ अभिक्रामं जुहोतीति श्रुतम् । इदमभिक्रमणं सर्वहोमाङ्गमुत प्रयाजमात्राङ्गमिति संशये पूर्वपक्षमाह । कर्तृगुणइति । अभिक्रमणस्य धात्वर्थेन कर्मणा साकमसमवायित्वादन्वयायोग्यत्वात् । कारकस्यैव क्रियान्वयित्वेन क्रियायाः क्रियाकारकत्वेनान्वयासंभवात्प्रकरणेन परिगृहीतप्रयोगकर्त्रन्वितं कर्तृगुणतया ऽन्वितं सत्तत्संस्काररूपम् । इत्थं चाभिक्रमणे कर्तृगुणे सति श्रूयमाणवाक्याद्विच्छिद्यान्यत्रान्वये निखिलदर्शपूर्णमासप्रयोगकर्तारमभिक्रमणक्रियया संस्कुर्यादिति वाक्यं श्रूयमाणवाक्याद्भिद्येत अन्यदेव भवेत् । जुहोतीति अवयुत्यानुवादः ॥ १८ ॥

साकाङ्क्षं त्वेकवाक्यं स्यादसमाप्तं हि पूर्वेण ॥ १९ ॥

सिद्धान्तमाह । साकाङ्क्षमिति । अभिक्राममिति णमुलन्तं जुहोतीतिक्रियापदसाकाङ्क्षम्, अत एकवाक्यं स्यान्न वाक्यभेदः । हि यतः पूर्वेण णमुलन्तेन असमाप्तमपरिपूर्णम् । तथा च परिपूर्त्यर्थं क्रियान्तरमध्याहार्यं ततो वरं सन्निहितयोजनम् । सन्निहितं प्रयाजानुवादकं जुहोतीति । अतः प्रयाजस्यैवाङ्गमिति भावः* ॥ १९ ॥

उपवीतस्य प्राकरणिकाङ्गत्वम् । अधि० ११ ।

सन्दिग्धेषु व्यवायाद्वाक्यभेदः स्यात् ॥ २० ॥

विश्वरूपो वै त्वाष्ट्र इत्यध्याये सप्तमाष्टमानुवाकयोः सामिधेनीब्राह्मणमाम्नातम् । नवमे निवित्सञ्ज्ञकमन्त्रब्राह्मणं दशमे काम्यसामिधेनी-

---

* अत्र वार्तिककारो ऽन्यथा अधिकरणं वर्णयांचकार । तथा हि । "यदा त्वतिस्थूलत्वाच्चैवाभिक्राममित्येतत्पदमात्रविच्छेदेन पूर्वपक्षः क्रियते, कथं तर्हि यज्जुहोतीति समस्तप्रकरणजुहोत्यनुवादेन अभिक्रमणविधानाद् अवान्तरप्रकरणस्य चाभावाद् महाप्रकरणविनियोगाश्रयेण पूर्वपक्षाश्रयणं. तदा कर्तृगुणे त्वभिक्रमणे अवान्तरप्रकरणापर्युपस्थापितप्रयाजकर्मासमवायात् तत्प्रकरणैकवाक्यत्वाभावमात्रमेव वाक्यभेदः स्यादित्युक्त्वा साकाङ्क्षं त्विति अवान्तरप्रकरणमेव प्रयाजचोदनाप्रसृतकथंभावाकाङ्क्षासंबन्धद्वारा तदेकवाक्यत्वेन सिद्धान्तो ऽभिधीयते । यदप्यसमाप्तं हि पूर्वेणेति, तत्र वाक्यासमाप्त्यभिप्रायेण । किं तर्हि असमाप्तं ह्यवान्तरप्रकरणं पूर्वेण प्रयाजस्वरूपगुणविधिनेत्यर्थः । येनाभिक्रमणादूर्ध्वं प्रयाजानां गुणो ऽपरः । विधास्यते प्रयाजानां तस्मात्प्रकरणास्तिता" । इदं सर्वं तन्त्रवार्तिके । इतो ऽधिकविचारः शास्त्रदीपिकायां द्रष्टव्यः ।

श्चोक्त्वैकादशे उपव्ययतइत्युपवीतविधिः श्रूयते । अये ऽपि तिष्ठन्नन्वाहेति के चन सामिधेनीधर्माः पठिताः । एवं सति उपवीतं सामिधेन्यङ्गं सर्वाङ्गं वेति संशये पूर्वाधिकरणन्यायेन सन्निहितपरित्यागे मानाभावा-त्सामिधेन्यङ्गमिति बहिः पूर्वपक्षे सिद्धान्तमाह । सन्दिग्धेष्विति । सन्दिग्धेषु अवान्तरप्रकरणसंदेहविषयेषु वाक्येषु सत्सु निर्विद्भिर्व्यवधाना-द्वाक्यभेदः स्यात् । सामिधेनीवाक्यैकवाक्यतापत्तं न, किं तु महाप्रक-रणेन सर्वाङ्गम् ॥ २० ॥

वैकङ्कतादिपात्राणां कृत्स्नयागगुणत्वम् । अधि० १२ ।

गुणानां च परार्थत्वादसंबन्धः समत्वात्स्यात् ॥ २१ ॥

अग्न्याधानसन्निधौ पठितं वारणो यज्ञावचरः वैकङ्कतो यज्ञाव-चर इति । यज्ञावचरो यज्ञसाधनम् । इदं पवमाने ऽप्यङ्गमथ वा यज्ञ-साधनमात्राङ्गमिति संशये आधानसन्निधौ पवमानेष्टीनां पाठेनाधाना-ङ्गत्वादाधाने यागाभावेन यज्ञसाधनपात्राणामप्रसक्तेस्तत्सन्निधौ पाठवैय-र्थ्याद्वाजपेयस्य यूप इतिवत्तदङ्गे पवमानेष्टौ निविशतइति बहिः पूर्व-पक्षे सिद्धान्तमाह । गुणानामिति । गुणानां वारणवैकङ्कतादिगुणानां परार्थत्वाद् यज्ञसाधनपात्रार्थत्वाद् आधाने यागाभावात्पवमानेष्टिसन्नि-धावस्य वाक्यस्य पाठाभावेनासन्निधिपाठस्य समत्वाद् यज्ञान्तरैः पव-मानेष्ट्या साकमसंबन्धः अङ्गाङ्गिभावो न । नापि वाजपेयस्य यूप इति-न्यायप्रवृत्तिः । आधानपवमानेष्ट्योः अङ्गाङ्गिभावनिराकरणस्याग्रे वक्ष्यमा-णत्वात् । अतः सर्वयज्ञाङ्गम्* ॥ २१ ॥

---

* वार्तिककारस्तु भाष्यकारोक्ताश्रुतवाक्यकल्पनाममृष्यमाणः पवमानेष्टीनामा-धानाङ्गत्वे ऽपि वैकङ्कतादिपात्राणां न पवमानेष्टिषु निवेशः । वाजपेयस्य यूप इत्यत्र व्यवहितसंबन्धे ऽपि षष्ठ्युपपत्तेस्तथा कल्पने ऽपि अत्र तथा कल्पने मानाभावात् । यज्ञावचर इति हि पूषानुमन्त्रणन्यायेन उत्कृष्टं सद् अनारभ्यवादरूपेण सर्वत्र पात्राणि विदधातीति नार्थो ऽधिकरणेन । गुणानां चेति सूत्रं तु, ननु निविदां सामिधेन्यङ्ग-त्वाद् व्यवधायकत्वं न स्यादिति पूर्वाधिकरणसिद्धान्ताशङ्कायां निवृत्त्यर्थम् । लिङ्गेन निविदां सामिधेनीनां च अग्निसमिन्धनगुणत्वाच्च तासां मिथः संबन्ध इत्याह । अङ्गीकृतं चैतत् पार्थसारथिमिश्रादिभिरिति ।

वार्त्रघ्न्याद्यनुवाक्यानामाज्यभागाङ्गत्वम् । अधि· १३ ।

मिथश्चानर्थसंबन्धात् ॥ २२ ॥

दर्शपूर्णमासप्रकरणे श्रुतम् । वार्त्रघ्नी* पौर्णमास्यामनूच्येते वृधन्वती अमावास्यायामिति । अत्र वार्त्रघ्नीवृधन्वत्यौ प्रधानयागाङ्गं यद्वा ऽऽज्यभागाङ्गमिति संशये प्रधानयागवाचकयोरमावास्यापौर्णमासीपदयोः श्रवणात्प्रधानेनैव संबन्ध इति बहिः पूर्वपक्षे सिद्धान्तमाह । मिथ इति । मिथः युगलीभूतयोः द्वित्वविशिष्टयाज्यापुरोनुवाक्ययोः प्रधानेनानर्थः निरर्थः निष्प्रयोजनः संबन्धः । अयं भावः । दर्शे पौर्णमासे च प्रत्येकं प्रधानत्रयम् । तैः प्रत्येकं संबन्धो ऽपि निष्प्रयोजनः । एकस्यैकेन युगलेन चरितार्थत्वात् । न समूहे एकेन न्यूनत्वाद् । अतः आज्यभागयोर्द्वित्वात्तयोर्युगलं तत्र सफलम् आस्ताभ्यामन्वितपूर्णमासरूपे काले तयोर्वात्रघ्नी अमावास्याकाले वृधन्वतीति नियामकं वाक्यम्* ॥ २२ ॥

हस्तावनेजनादीनां कृत्स्नप्राकरणिकाङ्गत्वम् । अधि· १४ ।

आनन्तर्यमचोदना ॥ २३ ॥

दर्शपूर्णमासयोः श्रूयते हस्तावनेनिक्ते, उलपराजिं स्तृणातीति । अवनेनिक्ते प्रक्षालयति । अत्र हस्तप्रक्षालनमुलपराजिस्तरणार्थं उतैतदुत्तरं क्रियमाणसर्वकर्मार्थमिति संशये हस्तप्रक्षालनस्य फलाकाङ्क्षायामुलपराजिस्तरणार्थत्वेन वाक्ययोरेकवाक्यत्वसम्भवात्तदर्थमेवेति बहिः पूर्वपक्षे सिद्धान्तमाह । आनन्तर्यमिति । आनन्तर्यं सान्निध्यम् । अचोदना एकवाक्यतासाधकं न । तथा सति घटमाहरति गां नयतीत्यनयोरप्येकवाक्यतापत्तेरिति भावः ॥ २३ ॥

वाक्यानां च समाप्तत्वात् ॥ २४ ॥

एकवाक्यताया लक्षणमपि नास्तीत्याह । वाक्यानामिति । स्पष्टं विभागे परस्परं साकाङ्क्षत्वाभावादिति भावः ॥ २४ ॥

* वा छन्दसीति पूर्वसवर्णदीर्घः । एवमेव वृधन्वती इत्यत्रापि बोध्यम् ।

चतुर्धाकरणस्याग्नेयमात्राङ्गत्वम् । अधि· १५ ।

शेषस्तु गुणसंयुक्तः साधारणः प्रतीयेत मिथस्तेषामसंबन्धात् ॥ २५ ॥

दर्शपूर्णमासे श्रूयते आग्नेयं चतुर्धा करोतीति । अत्र चतुर्धाकरणं पुरोडाशमात्राङ्गमुत केवलाग्नेयपुरोडाशाङ्गमिति संशये पूर्वपक्षमाह । शेष इति । शेषः चतुर्धाकरणरूपस्संस्काररूपो गुणः गुणसंयुक्तः अग्निरूपगुणसंबन्धविशिष्टो ऽपि गुणसंबन्धविशिष्टोद्देश्यवाचकपदघटितो ऽपीति फलितम् । साधारणः अग्नीषोमैन्द्राग्नसाधारणः । तेषां चतुर्धाकरणव्यक्तीनामग्नेश्च शास्त्रान्तरे असंबन्धादुद्देश्यतावच्छेदकत्वेन अग्नेरश्रवणात् । अयं भावः । शतपथे पुरोडाशं प्रकृत्य तं चतुर्धा करोतीति श्रुतम् । तत्र तच्छब्दस्य प्रकृतपुरोडाशमात्रपरत्वादत्राप्याग्नेयपदं पुरोडाशमात्रपरमिति २५ ॥

व्यवस्था वा ऽर्थसंयोगाल्लिङ्गस्यार्थेन संबन्धाल्लक्षणार्था गुणश्रुतिः ॥ २६ ॥

सिद्धान्तमाह । व्यवस्थेति । व्यवस्था आग्नेयस्यैव चतुर्धाकरणनियमः । अर्थेन देवतारूपतद्धितार्थेन पुरोडाशस्य सम्बन्धात् । सूक्तहविषोः इत्यनुशासनेन देवतातद्धितत्वाच्च सम्बन्धसामान्यवाची अग्नीषोमस्थले अग्नौ देवतात्वं न पर्याप्तमिति भावं दर्शयति । लिङ्गस्य देवतात्वपर्याप्तिप्रकाशकलिङ्गस्य इतरनिरपेक्षत्वरूपसामर्थ्यरूपार्थेन सम्बन्धात् । अग्नीषोमीयघटकाग्नेः सोमसापेक्षत्वाच्च तत्रोक्तसामर्थ्यमिति भावः । ननु आग्नेयस्य मस्तकं विरुज्य प्राशित्रमवद्यतीति श्रुतत्वात्कथं सर्वपुरोडाशेभ्यः प्राशित्रावदानमत आह । लक्षणेति । आग्नेयमस्तकोपलक्षणार्था गुणश्रुतिः अग्निदेवतासम्बन्धश्रुतिः । आग्नेयपदस्य अवद्यतीत्यनेन न सम्बन्धः किन्तु मस्तकेन । तथा चाग्नेयस्यैव शिरोभेदनं नेतरस्य । यत्तु शाखान्तरे पुरोडाशं चतुर्धा करोतीति तस्याप्यत्रैवोपसंहारः । यत्र

सामान्यवाचकस्य प्रमाणान्तरेण विशेषोपसंहारस्तत्र विशेषपरत्वमेव । यथा घटमानयेत्युक्ते गेहस्थघटे तात्पर्यग्रहे सति तत्परत्वमेव नान्यपरत्वमिति सर्वानुभवः, एवमिहापि आग्नेयं चतुर्धा करोतीति वाक्येनैकवाक्यतायामुपसंहारस्योपपत्तेर्न किञ्चिद्बाधकम् ॥ २६ ॥

इति जैमिनिसूत्रवृत्त्यां तृतीयाध्यायस्य प्रथमः पादः ॥ १ ॥

लवनप्रकाशकमन्त्राणां मुख्ये बर्हिषि विनियोगः । अधि० १ ।

अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावः स्यात्तस्मादुत्पत्तिसंबन्धो ऽर्थेन नित्यसंयोगात् ॥ १ ॥

पूर्वपादे श्रुत्या विनियोगश्चिन्तितः । अस्मिन्पादे लिङ्गेन विनियोगश्चिन्त्यते । मन्त्राधिकरणे मन्त्राणां कर्मसमवेतार्थस्मारकतया क्रत्वङ्गत्वमिति स्थितम् । तत्र पदानामर्थस्मारकत्वं द्विधा शक्त्या लक्षणया च । एवं सति बर्हिर्देवसनं दामीति मन्त्रे बर्हिष्पदेन शक्त्या कुशाः लक्षणया तत्सदृशाः तृणविशेषाः । उभयोः खण्डने अयं मन्त्रः उत कुशखण्डनएवेति संशये ऽर्थस्मारकत्वस्य तुल्यत्वादुभयत्र विनियोग इति बहिः पूर्वपक्षे सिद्धान्तमाह । अर्थेति । उत्पत्त्या औत्पत्तिकेन स्वाभाविकेन मुख्येनैव अर्थेन मन्त्रघटकपदानां संबन्धः स्यात् । कुतः नित्यसंयोगात् । पदपदार्थयोः संबन्धो नित्य इति प्रथमाध्याये व्यवस्थापितत्वात् । यस्माच्छक्तिसंबन्धो नित्यः तयोस्तस्मादर्थस्य *मुख्यार्थस्याभिधानं कथनं तद्द्वारा संयोगात् क्रतुसंबन्धान्मन्त्रेषु शेषभावः क्रत्वङ्गत्वं स्यात् । नामुख्यार्थस्मरणद्वारा । मुख्यार्थेनैव मन्त्रस्य निराकाङ्क्षत्वादमुख्ये न प्रवृत्तिरिति भावः ॥ १ ॥

संस्कारकत्वादचोदिते न स्यात् ॥ २ ॥

नन्वेवं सति पूषानुमन्त्रणमन्त्रस्य प्रकरणविच्छेदापत्तिरित्यत्रेष्टापत्तिमाह । संस्कारेति । संस्कारकत्वात्पूषानुमन्त्रणमन्त्रस्य देवतास्मार-

* मुखमिव प्रधानत्वान्मुख्यः प्रथमः इत्यर्थः । गुणानैरपेक्ष्येण यः शब्दात्प्रथमं प्रतीयते स इति यावत् । यथा अग्निशब्दस्य ज्वलनः । शब्दार्थगुणसंबन्धात्प्रतीयमानो ऽर्थो गौणः । यथा अग्निशब्दस्य माणवक इति तयोर्विशेषः ।

क्रत्वरूपसंस्कारजनकत्वात् । अचोदिते अविहितपूर्वदेवताके यागे न स्यात् मन्त्रस्याङ्गत्वं न स्यात् । यत्र संस्कारसंभवः तत्रैवाङ्गमिति भावः ॥ २ ॥

इन्द्रप्रकाशकमन्त्राणां श्रुत्या गार्हपत्ये विनियोगः । अधि० २ ।

वचनात्त्वयथार्थमैन्द्री स्यात् ॥ ३ ॥

महाग्निचयने श्रूयते ऐन्द्र्या गार्हपत्यमुपतिष्ठतइति । ऐन्द्रर्चा किमिन्द्रस्योपस्थानमुत गार्हपत्यस्येति संशये इन्द्रोपस्थानएव पूर्वाधिकरणन्यायेन मन्त्रस्य समर्थत्वादिन्द्रस्यैव उपस्थानमिति बहिः पूर्वपक्षे सिद्धान्तमाह । वचनादिति । वचनाद् गार्हपत्यमितिद्वितीयाश्रुतिवचनाद् । ऐन्द्री इन्द्रदेवताप्रकाशिका ऋग् । अयथार्थम् इदं क्रियाविशेषणम् । पुरुहूतप्रकाशकं यथा तथा न स्यात् । इदि परमैश्वर्यइति योगेन तद्धितश्रुतेरर्थस्य देवतारूपस्य गार्हपत्ये ऽप्यबाधाद् द्वितीयाश्रुत्यनुसारेणैन्द्रीपदघटकमन्त्रस्येन्द्रपदस्य अन्यथा नयनं किमिति वचनं न कुर्यात् । न हि वचनस्य अतिभार इति न्यायेनेति ध्येयम् ॥ ३ ॥

गुणाद्वा ऽप्यभिधानं स्यात्संबन्धस्याशास्त्रहेतुत्वात् ॥ ४ ॥

ननु लिङ्गेन कल्प्यमानं शास्त्रमिन्द्रपदघटितया ऋचा गार्हपत्यं प्रकाशयेदिति भवेत् । इदं जलेन दहेदितिवदशक्यार्थं वचनसहस्रेणापीन्द्रपदेन गार्हपत्यप्रकाशासम्भवादत्राह । गुणादिति । यदुक्तमिन्द्रपदगार्हपत्यार्थयोः शक्तिरूपः संबन्धः शास्त्रसहस्रेणापि न सिध्यति तस्य नित्यत्वादिति, तदस्माकमप्यनुमतमित्याह । संबन्धस्य शक्तिरूपसंबन्धस्य । अशास्त्रहेतुत्वात् । शास्त्रानधीनत्वात् । ननु कथं तर्हि इन्द्रशब्देन गार्हपत्यप्रकाशनमत्राह । गुणाद् शक्यसंबन्धरूपगौणवृत्त्यन्तरेण अभिधानं प्रकाशनं स्यात् । सिंहो देवदत्त इतिवत्* ॥ ४ ॥

* ननु ब्राह्मणस्यगार्हपत्यपदस्यैव इन्द्रे गौणी वृत्तिरस्तु मन्त्रानुसारादिति चेत्र । विहितार्थत्वेन मन्त्रे एव तादृशकल्पनाया युक्तत्वात् । न विधौ परः शब्दार्थ इति न्यायेन अज्ञातार्थज्ञापके ब्राह्मणे तथाविधकल्पनाया अनुचितत्वाच्चेति भावः ।

आह्वानप्रकाशकमन्त्राणामाह्वाने विनियोगः । अधि० ३ ।

तथा ऽऽह्वानमपीति चेत् ॥ ५ ॥

दर्शपूर्णमासयोः श्रूयते हविष्कृदेहीति त्रिरवघ्नन्नाह्वयतीति । अत्र हविष्कृदेहीति मन्त्रः अवहननाङ्गमुत लिङ्गेन आह्वानाङ्गमिति संशये पूर्वपक्षमाह । तथेति । यथेन्द्रशब्दस्य गौणवृत्त्या गार्हपत्यप्रकाशकत्वं तथा हविष्कृदेहीति मन्त्रे आह्वानम् आह्वानवाचकम् एहीति अवहननलक्षकम्* । हविष्कृदेहीत्यवघ्नन्निति पदयोजना । आह्वयतीति मन्त्रे एहीत्यर्थानुवादः ॥ ५ ॥

न कालविधिश्चोदितत्वात् ॥ ६ ॥

सिद्धान्तमाह । नेति । नावहननार्थो मन्त्रः । नञ आवृत्त्या अवघ्नन्निति अनेन अवहननकालं लक्षयित्वा कालसंबन्धविधिरपि न । कालसंबन्धस्य त्रिरभ्यासस्य च विधाने वाक्यभेदात् । हविष्कर्तुरवहननकालआह्वानस्य लोकतः चोदितत्वाज् ज्ञातत्वाच्च त्रिरभ्यासमात्रविधिः ॥ ६ ॥

गुणाभावात् ॥ ७ ॥

मन्त्रस्यास्य एहीत्यस्य अवहननलक्षणायां सदृशस्यैव उपस्थितिर्भवेत् । यथा सिंहो माणवक इत्यत्रोभयसाधारणोपस्थापकं क्रूरत्वं तथा मुख्यार्थसदृशं झटिति प्रतीयमानं रूपं नेत्याह† । गुणेति ॥ ७ ॥

इतश्च तथा लिङ्गात् ॥ ८ ॥

इतः अर्थवादरूपाल्लिङ्गात् न हविष्कृदित्यस्य अवहननतात्पर्यकत्वम् । अर्थवादस्तु वाग्वै हविष्कृदिति । वाक्सादृश्यं स्त्रीत्वेन प्रतीयते । अवहननं न स्त्रीसदृशमिति भावः ॥ ८ ॥

---

* इत उत्तरं "हविष्कृत्पदं वा हविरुत्पत्तिजनकत्वेन अवहननपरं प्रतीमास्यात् । हे हविष्कृद् अवहनन एहि सिद्धो भवति मन्त्रार्थः" इति अधिकः पाठः गो० दा० पु० ।

† "हविष्कृत्पदस्यावहननपरत्वे तस्यां क्रियायामाहूतो ऽस्मीतिज्ञानरूपगुणाभावाददृष्टार्थता मन्त्रस्य स्यादित्याहेति" मन्त्रस्यस्येत्यारभ्य रूपं नेत्याहेत्यन्तस्य स्थाने पाठः गो० दा० पु० ।

त्वाभ्युपगमेन काल्पनिकत्वाकाल्पनिकत्वाभ्यां निर्वक्तुमशक्यत्वादिति । एवं चांशित्वरूपो हेतुर्न विरुद्धो नाप्यसिद्ध इति सूपपन्नमेवोक्तानुमानशरीरं न कथमपि भवत्पाणिना पिधातुं शक्यत इति ।

८०–[स्नेह· ६२] नचायं पटः एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वाभाववान् एतत्तन्त्वारब्धत्वादित्यनुमानान्तरेण पूर्वोक्तं मिथ्यात्वस्थापनानुमानं सत्प्रतिपक्षितमिति वाच्यम् । यच्चैतन्निष्ठात्यन्ताभावप्रतियोगित्वं तच्चैतत्तन्त्वारब्धत्वाभाव इति व्यतिरेकव्याप्तावेतन्निष्ठप्रागभावाप्रतियोगित्वस्योपाधित्वात् । ननु साध्यव्यापकत्वे सति साधनाव्यापक उपाधिः । यच्चैतत्तन्त्वारब्धत्वाभावस्तच्चैतन्निष्ठप्रागभावा प्रतियोगित्वमिति साध्यव्यापकत्वेपि यच्चैतन्निष्ठात्यन्ताभावप्रतियोगित्वं तच्चैतन्निष्ठप्रागभावाप्रतियोगित्वमेवेति साधनाव्यापकत्वाभावात्कथं तस्योपाधित्वमिति चेन्न । एतत्तन्त्वारब्धत्वाभावव्यापकस्यैतत्तन्तुनिष्ठप्रागभावाप्रतियोगित्वस्य पक्षावृत्तित्वेन निश्चितस्य, पक्षवृत्तितया संदिह्यमानैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वाव्यापकत्वेनोपाधित्वानपायात् ।

८१–[स्नेह· ६२] यत्तु 'प्रागभावस्यैतन्निष्ठत्वे हि एतन्निष्ठप्रागभावाप्रतियोगित्वमुपाधिरिति वाच्यम् । नचैतत्संभवति । अयं प्रागभावः, एतन्निष्ठात्यन्ताभावप्रतियोगी, प्रागभावत्वात् प्रागभावान्तरवदिति त्वदुक्तरीत्यैव एतत्प्रागभावस्यैतन्निष्ठत्वविरहेणैतन्निष्ठप्रागभावाप्रतियोगित्वस्योपाधित्वाभिधानानुपपत्तेरिति' । तदसत् । प्रतिवाद्यभिमतपरिभाषामभ्युपगम्यैव वादकथायाः प्रारम्भात् । अन्यथा परस्परभाषानभिज्ञयोरिव वादिनोः कथाप्रसङ्गस्यैवासम्भवात् । प्रागभावादिपदार्थान् स्वीकृत्यैव खलु प्रतिवादी प्रतिपक्षानुमा-

नमुपन्यस्यतीति तदनुसारेणैव तस्य सोपाधिकत्वमभिहितम् । न चेत्सोपि प्रागभावं स्वीकुर्यात् प्रतिपक्षानुमानेऽभिहितम् 'एतत्तन्त्वारब्धत्वादि' ति स्वहेतुमेवासिद्धयेत् । नचैतत्तन्त्वारब्धत्वं नाम एतत्तन्तुनिष्ठप्रागभावप्रतियोगित्वादन्यत्किञ्चिदस्तीत्यकामेनापि प्रतिपक्षानुमानपक्षपातिना प्रागभावोऽङ्गीकृतो वेदितव्यः । तथा सत्युपपन्नमेव तं प्रति प्रागभावाप्रतियोगित्वस्योपाधित्वाभिधानमिति न किं चिच्चोद्यम् । एतेन 'सिद्धान्ते प्रागभावानङ्गीकारेण एतन्निष्ठप्रागभावाप्रतियोगित्वस्योपाधित्वाभिधानं नान्यतरासिद्धं किन्तूभयवाद्यसिद्ध' मित्युक्तिः परास्ता । एवं च अयं पटः एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वाभाववान् एतत्तन्त्वारब्धत्वादित्यनुमानमुपाधिदूषितमिति न कथमपि प्रतिपक्षतामावहतीति स्पष्टमेव ।

८२—[स्नेह० ६२] यत्तु 'एवं च अयं पटः एतत्तन्तुनिष्ठोपादानतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकात्यन्ताभावाभाववान् एतत्तन्तुसंबद्धत्वादिति सत्प्रतिपक्षतापीति' । तदसंबद्धोपक्रमोपसंहारयितम् । अयं पट एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वाभाववान् एतत्तन्त्वारब्धत्वादित्याकारकप्रतिपक्षानुमानेनोपक्रम्य अयं पट एतत्तन्तुनिष्ठोपादानतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकात्यन्ताभावाभाववान् एतत्तन्तुसंबद्धत्वादिति विलक्षणहेतुसाध्यकप्रतिपक्षानुमानेनोपसंहारात् । यदि चोपक्रमोक्तानुमानस्योपाधिदूषितत्वात्तत्रारुच्यैवेदं स्वतन्त्रं प्रतिपक्षानुमानान्तरमुपन्यस्तमित्यभिधत्से तथापि न ते निस्तारः । प्रतिपक्षानुमानान्तरेऽपि एतत्तन्तुसंबद्धत्वरूपहेतोरुपादानतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकात्यन्ताभाववत्यपि भूतले विद्यमानत्वेनानैकान्तिकत्वात् । एवं चोभयोरपि प्रतिपक्षानुमानयोरसङ्गतत्वेनासत्प्रतिपक्षमेव विजयते मिथ्यात्वस्थापनानुमानमिति ।

८३–[स्नेह० ६३] यत्तु 'अयं पट एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी अंशित्वादिति स्थापनानुमाने [प्रथमम्] एतत्तन्त्वनारब्धत्वमुपाधिम् उक्त्वा [पश्चात्] एतत्तन्त्वसंबद्धत्वमुपाधिरि' त्युक्तम्। तदुभयमप्यसङ्गतम्। तत्रादावेतत्तन्त्वनारब्धत्वस्योपाधित्वे तदभावस्य साध्याभावव्याप्यत्वं स्यादिति एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वाभाववान् एतत्तन्त्वारब्धत्वादित्युपाध्यभावेन साध्याभावे साध्यमाने उपाध्यभावे साध्याभावस्य च व्यतिरेकव्याप्तेरेव वाच्यतया तच्चैतन्निष्ठप्रागभावप्रतियोगित्वस्योपाधित्वात्। तथाहि। यच्चैतन्निष्ठात्यन्ताभावप्रतियोगित्वं तच्चैतत्तन्त्वारब्धत्वाभाव इति व्यतिरेकव्याप्तावेतन्निष्ठप्रागभावाप्रतियोगित्वमुपाधिः। यच्चैतत्तन्त्वारब्धत्वाभावस्तच्चैतन्निष्ठप्रागभावाप्रतियोगित्वमिति साध्यव्यापकता। यच्चैतन्निष्ठात्यन्ताभावप्रतियोगित्वं तच्चैतन्निष्ठप्रागभावाप्रतियोगित्वं नास्ति। उपाध्यभाववत्यपि प्रकृतपक्षे एतन्निष्ठात्यन्ताभावप्रतियोगित्वस्य सन्दिह्यमानत्वेन विद्यमानत्वादिति साधनाव्यापकत्वम्। नह्युपाधेर्हेत्वाभासानामिव स्वयं दोषत्वमपितु दोषोन्नायकत्वमिति दोषोन्नयने चोपाध्यनुग्राहित्वेन स्वयं दूषितः सन्न परं दूषयितुमीष्टे। नहि स्वयमसिद्धः परं साधयतीति न्यायात्। यः पुनरेतत्तन्त्वसंबद्धत्वरूपो ऽपर उपाधिरुपन्यस्तः सोप्यसिद्धः। भवन्मते आकाशादिष्ववृत्तिषु पदार्थेषु सत्यप्येतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वे एतत्तन्त्वसंबद्धत्वविरहेणोक्तोपाधेः साध्यव्यापकत्वाभावेनोपाधित्वापायात्।

८४–[स्नेह० ८३] यत्तु 'नचाकाशादिष्ववृत्तिषु साध्याव्यापकत्वमाशङ्कनीयम्। एतत्तन्तुसंसृष्टत्वाभावरूपोपाधिशरीरप्रविष्टसंसर्गस्योपादानतानियामकस्यैव वक्तव्यत्वेन तस्य चाकाशाद्यवृत्तिप-

दार्थव्याप्तनतया उपाधेः साध्यव्यापकताया अक्षतत्वादिति' । तदसारम् । तत्राप्युपाधिसंसर्गात् । उपाध्यभावेन साध्याभावे साध्यमाने व्यतिरेकव्याप्तावेतदुपादानकान्यत्वस्यैवोपाधित्वात् । तथा चायं प्रयोगः । एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वाभाववान् । एतत्तन्तुसंसृष्टत्वात् । यत्र चैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वं तत्रैतत्तन्तुसंसृष्टत्वाभाव इति व्यतिरेकव्याप्तौ प्रकृतपक्षावृत्तितया निश्चितस्यैतत्तन्तुसंसृष्टत्वाभावरूपसाध्यव्यापकस्यैतदुपादानकान्यत्वस्य पक्षवृत्तितया सन्दिह्यमानैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वरूपसाधनाव्यापनादुपाधित्वमिति न एतत्तन्तुसंसृष्टत्वाभावस्योपाधित्वव्यवस्थितिः ।

८५-[स्नेह० ६४] एतेन ' अयं पट एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वाभाववान् एतत्तन्तुसंसृष्टत्वादित्युपाध्यभावेन साध्यव्यतिरेकोन्नयनान्न स्थापनानुमानप्रसरसम्भव ' इति परास्तम् । नाप्येतत्तन्तुसंसृष्टत्वं यद्येतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वाभावव्यभिचारि स्यात्तर्हि एतत्तन्तुजन्यमेव न स्यादित्यनुकूलतर्कावतारसम्भवोऽपि । एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्ववतोऽपि पटस्याऽऽध्यासिकसंबन्धेनैतत्तन्तुसंसृष्टत्वसंभवात् । लौकिकपारमार्थिकरजतत्वस्य शुक्तिनिष्ठात्यन्ताभावप्रतियोगित्ववतोऽप्याध्यासिकसंबन्धेन शुक्त्यादिसंसृष्टत्वदर्शनात् । एवं च सकलोपाधिनिरासे निरुपाधिकमेव राजते मिथ्यात्वस्थापनानुमानम् । अनुकूलतर्कश्चात्र 'एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चन वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्य'मित्यादि श्रुतिशतम् । यत्स्पष्टमेव सजातीयविजातीयस्वगतभेदशून्यत्वं ब्रह्मणोऽभिदधत् कारणस्य सद्वितीयत्वं निषेधतीत्यलमसम्भाव्यश्रौतार्थकल्पनप्रयासेन वृथापरिश्रमावहेनेति ।

८६—[स्नेह० ६५] यत्तु 'अयं पट एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वाभावाभाववान् एतत्तन्तूपादानकान्यत्वाभावादित्युपाध्यभावेन साध्याभावानुमानं ततश्च पटादेः सत्यत्वानुमाननिरसनं तदेतदपि बालव्यामोहनमात्रम् । अत्रैतत्पटभिन्नत्वस्योपाधित्वेन निरुक्तोपाध्यभावेन साध्याभावानुमानासम्भवादि'ति । तदसत् । अत्राप्येतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वाभाववान् एतत्पटभिन्नत्वाभावादित्युपाध्यभावेन साध्याभावे साधनीये व्यतिरेकव्याप्तावेतत्तन्तूपादानकान्यत्वरूपोपाधेस्तादवस्थ्यात् । यत्रैतत्पटभिन्नत्वाभावाभावस्तत्रैतत्तन्तूपादानकान्यत्वमिति साध्यव्यापकोपाधेर्यत्रैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वाभावाभावस्तत्रैतत्तन्तूपादानकान्यत्वं नास्तीति साधनाव्यापकत्वात् । एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वस्य पक्षवृत्तितया सन्दिह्यमानत्वेन विद्यमानत्वेऽपि तवोक्तोपाधेरविद्यमानत्वात् । एवं चोपाध्यभावेन विरुद्धसाध्यसिद्धेरशक्यत्वाद्युक्तमेवायं पट एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वाभावाभाववान् एतत्तन्तूपादानकान्यत्वाभावादित्युपाध्यभावेन साध्याभावानुमानं ततश्च पटादेः सत्यत्वानुमाननिरसनमिति ।

८७—यत्तु 'नाप्येतदुपादानकान्यत्वमप्युपाधिरुपाध्यभावेन साध्याभावानुमाने उपादानत्वातिरिक्तभागस्य वैयर्थ्यादिति । तदतीवानुग्धम् । एतत्तन्तूपादानकान्यत्वमिति ह्युपाधिशरीरं तदभावेन साध्याभावे साध्यमाने हेतुशरीरे नैकस्यापि पदस्य वैयर्थ्यसम्भवः । नन्वेतत्तन्तूपादानकत्वमित्येतावन्मात्रोक्त्यैवं निर्वाहे एतत्तन्तूपादानकान्यत्वाभाव इत्यधिकोक्तेर्वैयर्थ्यमिति चेन्न । एतत्तन्तूपादानकान्यत्वाभावस्यैतत्तन्तूपादानकत्वसमानार्थकतया तदनतिरेकात् । नहि विष्णुरिति ह्यवरेणैव नाम्ना निर्वाहे नारायणेत्यधिका-

चरनाम्नो वैयर्थ्यमुद्भावयति कश्चित् । शाब्दिका अप्याहुः । पर्यायशब्दानां लाघवगौरवचर्चा नाद्रियत इति । नचैतत्तन्तूपादानकत्वमित्यत्र कस्यापि पदस्य वैयर्थ्यमस्तीति तत्पर्यायभूतैतत्तन्तूपादानकान्यत्वाभावत्वमित्यत्रापि कस्यापि पदस्य वैयर्थ्यं भवितुं नार्हति । किं च साध्याव्यापके साधनव्यापके चोपाधित्वं न सम्भवति । प्रकृतोपाधौतु तदुभयमपि नास्तीत्यविकल एवैतदुपादानकान्यत्वमित्यस्योपाधिभावः प्रतिपक्षानुमान प्रतीति दिक् ।

८८—एवं विविधैः शङ्कितारोपितोपाधिभिः प्रतिपक्षानुमाने-र्बाधादिभिश्चाकुलमिव कर्तुमिष्यते पिशुनवचनैः स्थितप्रज्ञस्वान्तमिव मिथ्यात्वस्थापनानुमानमाप्रथमबिन्दूपनिपातं स्नेहपूर्त्या । सर्वे चैव ते दोषा नटसैनिका इव स्वरूपव्याक्रियामात्रेणैव कृतपराक्रिया इति प्रादर्शि सुनिपुणं स्नेहपूर्तिपरीक्षया । व्यवासीयत चानयात्र तस्याः सदोषाया अशेषं स्वरूपं व्याकर्तुम् । परन्तु श्रीशङ्करभगवत्पादसत्सम्प्रदायातिक्रमाद्वा तद्दर्शितश्रौतार्थेषु मिथ्यादोषाभिशंसनापराधाद्वा ऽनपेक्षितात्यर्थग्रन्थविस्तराद्वा ऽल्पार्थानल्पशब्दकलापाद्वा कथमपि प्रेक्षकगणैरनादृतेति सहसैव साभ्यसूयमिवास्मात्पण्डितपथात् प्रनष्टां तां स्वसहचरीमालोच्य तद्वियोगमसहमानया तत्पदमन्वेषिष्यन्त्येव स्वयमप्यकाण्ड एवानयेतो निवृत्यते ।

नूनमनयोरितो निवृत्तिरनल्परसिकतरजनमनोविनोदापनोदाय भवेत् । यथा चेक आहूरसिकवरा 'अहो ! परमोपयोगिनीयमद्वैतसिद्धान्तान् आपाततो द्विषन्त्यपि स्नेहपूर्तिर्यो भूयोभूयः सायासमारचितैराक्षेपैर्यथा यथा परपक्षमाक्षिपति तथा तथाऽनायाससिद्धोपपत्तीः परपक्षाश्रिताः सूचयन्ती दृढयत्येव केवलं स्थूणानिखननन्यायेन परपक्षम् । धन्यतमा चेयं स्नेहपूर्तिपरीक्षा याऽद्वैतम-

ताक्षेपप्रतिक्षेपव्याजेन न केवलमद्वैतसिद्धान्तानेव स्मारयत्यपि त्वपास्तसमस्तमलं निर्विशेषाद्वैतमेवावशेषयन्ती परमपुरुषार्थभूतं निःश्रेयसं स्वभक्तानां करामलकवत्सम्पादयतीव। क्व नु ते उभे अपि परमोपकारिके भूयोऽपि दर्शनपथं गमयेमहीति'।

निवर्तमाना स्नेहपूर्तिपरीक्षाऽपि नानतिवेलं तामनुचिन्तयति । यस्या अयमान्तरः श्लोकः—

स्नेहपूर्ते क्व गन्तासि प्रेक्षकैर्यद्यनादृता ।
संप्रीत्या यत्र गन्तासि तत्रास्तां नो समागमः ॥

इति सस्नेहमाशासाना तामनुसिसीर्षन्त्येवेतो विनिष्क्रामति स्नेहपूर्तिपरीक्षेति शिवम् ।

नार्थानी ? ति चिन्तायाम् आख्यानानि शंसन्तत्याख्यानानां पारिप्लवे विनियोगान्न विद्याप्रधानत्वं न्याय्यमिति चेन्न सर्वाण्याख्यानानि पारिप्लवप्रयोगेन विनियोगमर्हन्ति, कुतः विशेषितत्वात् विनियोगस्य, आख्यानानि शंसन्तीत्युक्त्वा तत्रैव मनुर्वैवस्वतो राजेत्यादिना मन्वादीनामख्यानानि विशेष्यन्ते, अतस्तेषामेव तत्र विनियोग इति गम्यते, तस्मान्न सर्ववेदान्तेष्वाख्यानश्रुतयः पारिप्लवप्रयोगार्थाः, अपि तु विद्याविध्यर्थाः ॥

सू० तथा चैकवाक्योपबन्धात् ॥ २४ ॥

आत्मा वा अरे द्रष्टव्य इत्यादिविधिनैकवाक्यतयोपबन्धाच्चाख्यानानां विद्याविध्यर्थान्येव तानीति गम्यते, यथा सोऽरोदीदित्येवमादेः कर्मविध्यर्थत्वं न पारिप्लवार्थत्वम्, ॥

पारिप्लवार्थाधिकरणं समाप्तम् ॥

आग्नीन्धनाधिकरणम् । **सू० अत एव चाग्नीन्धनाद्यनपेक्षा ॥ २५ ॥**

स्तुतिप्रसङ्गादवान्तरसङ्गतिविशेषेणार्थद्वयं चिन्तितं, विद्यावन्त उर्द्ध्वरेतस आश्रमिणः सन्तीत्युक्तम्, उर्द्ध्वरेतस्सु च शब्दे हीत्यादिभिः सूत्रैः, इदानीमूर्द्ध्वरेतसो यज्ञाद्यभावात्तदङ्गिका विद्या न सम्भवतीत्याशङ्क्याह अत एव चाग्नीन्धनाद्यनपेक्षेति, यत उर्द्ध्वरेतस आश्रमिणो विद्यासम्बन्धित्वेन श्रुत्या परिगृह्यन्ते "ब्रह्मसंस्थोऽमृतत्वमेती"ति, ये चेमेऽरण्ये श्रद्धा तप इत्युपासते एतमेव

प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति यदिच्छन्तोब्रह्मचर्यं चरतीत्यादिकथा अत एवोर्ध्वरेतस्सु विद्याग्नीन्धनाद्यनपेक्षा, अग्नीन्धनमग्न्याधानम् आधानपूर्विकाग्निहोत्रदर्शपूर्णमासादिकर्मानपेक्षा तेषु विद्या केवलस्वाश्रमविहितकर्मापेक्षेत्यर्थः ॥ अग्नीन्धनाद्यधिकरणं समाप्तम् ॥

टी० सू० पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ २३ ॥ इदमपि प्रासङ्गिकमधिकरणं रसतमादिवाक्यानां स्तुत्यर्थत्वं पूर्वपक्षीकृत्योपासनपरत्वं स्थापितम्, एवं प्रातर्दनाद्याख्यानानि किं स्तुत्यर्थानि? उत पारिप्लवार्थानी? ति शङ्कया सङ्गतिः, पारिप्लवा आख्यानानि, इह पारिप्लवशब्देनाख्यानशंसनं विवक्षितं श्वेतकेतुर्हारुणेय इत्यादिवाक्यानि किं पारिप्लवप्रयोगार्थानि? उत विद्याविधानार्थानि? किं पारिप्लवे सर्वाख्यानानां विनियोगः? उत मन्वाद्याख्यानानामेवे? ति किमाख्यानानि शंसन्तीत्याख्यान–शब्दः सर्वाख्यानपरः? उत मन्वाद्याख्यानपरः? किमाख्यानविशेषाम्नानमाख्यान–शब्दस्य विशेषपरतामवगमयति ने? ति न चेदाख्यानशब्दस्य सर्वाख्यानपरतया सर्वेषां तत्र विनियुक्तत्वात् सर्वाख्यानानि पारिप्लवार्थानि स्युर्विशेषपरतामवगमयति चेदाख्यान–शब्दस्य मन्वाद्याख्यानविशेषविषयतया तेषामेव पारिप्लवे विनियोगात् श्वेतकेतूपाख्यानादीनि विद्याविधानार्थानि स्युः, विद्याविशेषप्रतिपादनार्थानि स्तावकत्वेन प्रतिपादनार्थानि इत्यर्थः । विद्याविध्यर्था इति, विद्याविधेःस्तावकतया शेषभूता इत्यर्थः । प्रकरणोपात्तमात्रानभ्युपगमे आख्यानानन्त्यात् अशक्यत्वं च स्यात्, ॥ सू० तथा चैकवाक्योपबन्धात् ॥ २४ ॥ उपबन्धोऽन्वयः यथेति हिरण्यदक्षिण्यत्ववाक्यैकवाक्यतयोपबन्धात् सोऽरोदीदित्येवमादेः कर्मविध्यर्थत्वमित्यर्थः ॥ पारिप्लवार्थाधिकरणं समाप्तम् ॥ सू० अत एव चाग्नीन्धनाद्यनपेक्षा ॥ २५ ॥ व्याख्यातयोरधिकरणयोः प्रासङ्गिकत्वमाह "स्तुतिप्रसङ्गादि"ति, अस्याधिकरणस्य प्रथमाधिकरणेन सङ्गतिमाह "विद्यावन्त"इति, आशङ्क्याहेति, सूत्रे च–शब्दः शङ्काद्योतक

इति भावः । किं परिव्राजां ब्रह्मविद्याधिकारोऽस्ति ? नेति किं यज्ञाङ्गिकैव विद्या ? उताश्रमप्रयुक्तधर्माङ्गिका ? किमूर्द्ध्वरेतसां विद्यासम्बन्धप्रतिपादकवाक्यानि विद्याया आश्रधर्माङ्गकत्त्वमवगमयन्ति ? ने ? ति, न चेद्यज्ञाद्यङ्गकत्त्वाद्विद्यायां परिव्राजामनधिकारः अवगमयन्ति चेदाश्रमधर्माङ्गतया परिव्राजां ब्रह्मविद्याधिकारः । अतः शब्दार्थमाह "यत" इति, परे त्विदं सूत्रमाद्यधिकरणफलनिगमनपरमाहुः । अत एव विद्यातः पुरुषार्थत्वाद्विद्यया फलोत्पत्तौ न कर्मापेक्षेति, इदं च निगमनमुत्पत्तावेव कर्मापेक्षेत्यनन्तरसूत्रे वक्तुं युक्तमिति अश्ववदिति सूत्रे तदिदं मन्दफलत्वादनादरणीयं पूर्वपक्षे युक्त्यन्तरे सम्भवति सङ्गते च सति तन्निरासपरत्वं हि सप्रयोजनम् उर्द्ध्वरेतसआश्रमसद्भाव आसन्नत्वादतइति परामर्शयोग्यश्च अग्नीन्धनाधिकरणं समाप्तम् ॥

सर्वापेक्षाऽधिकरणम् ।

सू० सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २६ ॥

वृ० यदि विद्या यज्ञानद्यपेक्षैवामृतत्वं साधयति तर्हि गृहस्थेष्वपि तदनपेक्षैव साधयितुमर्हति, यज्ञादिश्रुतिरपि विविदिषन्तीति शब्दात् कर्मणो वेदनाङ्गतां न प्रतिपादयति अत आह "सर्वापेक्षे"ति, अग्निहोत्रादिसर्वकर्मापेक्षैव विद्या कर्मवत्सु गृहस्थेषु, कुतः यज्ञादिश्रुतेः, "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेन" इत्यादिना यज्ञादयो हि विद्याङ्गत्वेन श्रूयन्ते यज्ञादिना विविदिषन्ति वेदितुमिच्छन्ति यज्ञादिभिर्वेदनं प्राप्तुमिच्छन्तीत्यर्थः यज्ञादीनां ज्ञानसाधनत्वे सत्येव यज्ञादिभिर्ज्ञानं प्राप्तुमिच्छन्तीति व्यपदेश उपप-

द्यते यथाऽसेर्हननसाधनत्वे सत्यसिना जिघांसतीति व्यपदेशः, अतो यज्ञादीनां ज्ञानसाधनत्वमवगम्यते । ज्ञानं च वाक्यार्थज्ञानादर्थान्तरभूतं ध्यानोपासनादिशब्दवाच्यं विशदतमप्रत्यक्षताऽऽपन्नं स्मृतिरूपनिरतिशयप्रियमहरहरभ्यासाधेयातिशयमाप्रयाणादनुवर्त्तमानं मोक्षसाधनमित्युक्तमस्माभिः पूर्वमेव, वक्ष्यति च "आवृत्तिरसकृदुपदेशा" दित्यादिना, एवंरूपं ध्यानमहरहरनुष्ठीयमानैर्नित्यैर्नैमित्तकैः कर्मभिः परमपुरुषाराधनरूपैः परमपुरुषप्रसादद्वारेण जायते इति यज्ञादिना विविदिषन्तीति शास्त्रेण प्रतिपाद्यते, अतः कर्मवत्सु गृहस्थेषु यज्ञादिनित्यनैमित्तकसर्वकर्मापेक्षा विद्या, अश्ववत्—यथा पुरुषगमनसाधनभूतोऽश्वः स्वसपरिकरबन्धपरिकर्मापेक्षः, एवं मोक्षसाधनभूताऽपि विद्या नित्यनैमित्तिककर्मपरिकरापेक्षा, तदिदमाह स्वयमेव भगवान् "यज्ञोदानं तपः कर्म न त्याज्यं कार्यमेव तत् । यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् । स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः" इति, ॥ सर्वापेक्षाऽधिकरणं समाप्तम् ॥

टी० सू० सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २६ ॥ सङ्गतिः स्फुटा, किं गृहस्थस्य यज्ञादिकवर्मवतो विद्यायामधिकारः ? उत तद्रहितस्ये ? ति, यज्ञादिकर्म बिद्याङ्गं ने ? ति यज्ञेनेत्यादिश्रुतिर्विद्याङ्गतया यज्ञादिकर्म विनियुङ्क्ते ने ? ति किं कर्मणो विद्योत्पादकत्वं सम्भवति ने ? ति, असम्भवे विनियोगाभावात् यज्ञादेर्विद्याङ्गत्वाभावात्तद्रहितस्य गृहस्थस्य

विद्याधिकारः सम्भवेत्, सम्भवति चेत् विनियोगाद् यज्ञादेर्विद्याङ्गतया तद्वतो गृहस्थस्य विद्याधिकारः, यज्ञादिश्रुतिरपीति इच्छासाधनत्वं वदतीति भावः । यज्ञादिसर्वकर्मापेक्षैवेति सूत्रे प्रतिज्ञापदानन्तरश्च–शब्दोऽवधारणार्थं इति भावः । ज्ञानसाधनत्वे सत्येवेति परमसाध्येच्छया विनाऽवान्तरसाध्येषु प्रवृत्तिर्नोपपद्यते यथा स्वर्गेच्छया विना स्वर्गार्थयज्ञादौ प्रवृत्त्यनुपपत्तिः, एवं ज्ञानेच्छया विना तदर्थेच्छासिद्ध्यर्थप्रवृत्त्यनुपपत्तेः, संजातज्ञानेच्छस्य चेच्छासिद्ध्यर्थप्रतिपत्तिनैरपेक्ष्याच्च यज्ञादेरिच्छासाधनत्वं नोपपद्यत इति भावः ॥ ज्ञानस्य न यज्ञाद्यपेक्षा वाक्यादेव तदुत्पत्तेरित्यत्राह "ज्ञानं चे"ति, आप्रयाणादनुवर्त्तमानं चेति अङ्गिनोऽनुवृत्त्या तदङ्गस्य कर्मणोऽप्यनुवृत्तिरपेक्षितेति भावः । यज्ञादिषु प्रवृत्तिर्मनोऽवधानविरोधिनी स्यात् प्रवृत्तिरूपत्वादित्यत्राह "एवंरूपं चे"ति, अदृष्टद्वारोपकारकत्वान्न दोष इत्यर्थः । अश्ववत् रथचर्यायोग्योऽश्वो न लाङ्गलाकर्षणे युज्यते, तथा फलोपपत्तौ न कर्मापेक्षत इति परे व्याचक्षते फलोत्पत्तावनपेक्षत्वे प्रमाणिकेऽपि उत्पत्तावपेक्षैव सूत्रप्रतिपाद्या सर्वापेक्षेति प्रतिज्ञातत्वात्, अतः परोक्तव्याख्यानं क्लिष्टम् । अपरे तु विद्यायाः फलोत्पत्तावनुग्राहकत्वेन यज्ञाद्यपेक्षाऽस्ति नेति विचार्यास्तीति सिद्धान्तयन्ति यज्ञादिवाक्ये फलसिद्धावपेक्षाप्रतीत्यभावात् वेदनसाधनत्वमात्रं हि तत्रावगम्यते तेन न विद्यायाः फलसिद्धौ उपकारकत्वम् अशाब्दत्वात् निचाय्य तस्मिन् दृष्टे तमेवं विद्वानित्यादिभिरुत्पन्नस्य वेदनस्य मोक्षसाधनत्वेऽन्यानपेक्षत्वप्रतीतिस्वारस्याच्च तदनुपपन्नम् । अन्ये तु विद्याया यज्ञाद्यपेक्षत्वे परिव्राजां विद्याऽनधिकारप्रसङ्गात् गृहस्थेष्वपि यज्ञाद्यनपेक्षेति पूर्वपक्षं कृत्वा गृहिणां परिव्राजां चाचारे समानेऽपि सङ्गतिनिवृत्तिरूपपारिव्राज्यस्य गार्हस्थ्यस्थाननिविष्टत्वात् कर्मतन्निवृत्तिरूपयोगार्हस्थ्यपारिव्राज्ययोर्ग्रहणाग्रहणवद्विकल्पोपपत्तेः परिव्राजकेषु विद्यायामनपेक्षितस्य यज्ञादिकर्मणो गृहिष्वपेक्षा युज्यत इति सूत्रद्वयमेकाधिकरणं वर्णयन्ति । तदयुक्तम् अधिकरणभेदस्यैव युक्तत्वात्, तथा हि किमुभयं सिद्धान्तसूत्रं तर्हि यतिष्वनपेक्षाया गृहिष्वपेक्षायाश्च परस्परतादर्थ्याभावात्साध्यद्वयं स्यात्,

तदानीमैकाधिकरण्यमयुक्तं, यद्युच्येत आद्यं सूत्रं पूर्वपक्षविषयं यतिष्वनपेक्षत्वात्, गृहिष्वप्यनपेक्षेत्येवमर्थपरमिति तच्च यतिषु यज्ञानपेक्षविद्याऽधिकारस्याधिकरणान्तरसाध्यत्वात् तस्य च तन्मूलपूर्वपक्षस्य चैकसूत्रप्रतिपाद्यत्वे वाक्यभेदप्रसङ्गाच्च, ऊर्द्ध्वरेतस्सु च शब्दे हीत्यत्रैव तत्समर्थनमाभिप्रायिकमिति च न वाच्यं विद्याऽनङ्गत्वसमर्थनोपक्षीणस्य सूत्रस्य विद्याऽधिकारसमर्थनेऽपि तात्पर्यकल्पने गौरवप्रसङ्गात् । अत आद्यसूत्रस्याधिकरणान्तरत्वं युक्तं, तथा सत्यनन्तराधिकरणपूर्वपक्षहेतुरर्थसिद्धः स्यात्, अतोऽधिकरणभेदः स्वारसिकप्राप्तः ॥ सर्वापेक्षाऽधिकरणं समाप्तम् ॥

शमदमाद्यधिकरणम् ।

सू० शमदमाद्युपेतः स्यात्तथाऽपि तु तद्विधेस्तदङ्गतया तेषामप्यावश्यानुष्ठेयत्वात् ॥ २७ ॥

भा० गृहस्थस्य शमदमादीन्यप्यनुष्ठेयानि ? उत नेति चिन्तायाम् आन्तरबाह्यकरणव्यापाररूपत्वात्कर्मानुष्ठानस्य शमदमादीनां तद्विपरीतरूपत्वाच्चाननुष्ठेयानीति प्राप्ते उच्यते यद्यपि गृहस्थः करणव्यापाररूपकर्मसु प्रवृत्तः तथाऽपि स विद्वान् शमदमाद्युपेतः स्यात्, कुतः तदङ्गतया तद्विधेः–विद्याङ्गतया तेषां विधेः तस्मादेवं विच्छान्तोदान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्येदिति, विद्योत्पत्तेश्चित्तसमाधानरूपत्वेन दृष्टपरिकरत्वाच्छमादीनां विद्यानिर्वृत्तये तेषां शमादीनामवश्यानुष्ठेयत्वाच्च तान्यप्यनुष्ठेयानि । न च करणव्यापारतद्विपर्ययरूपत्वेन कर्मणां शमदमादीनां च परस्परविरोधः, भिन्नविषयत्वात्, विहितेषु करणव्यापारः अविहितेषु प्रयो-

जनशून्येषु च तदुपशम इति, न च करणव्यापाररूपकर्मसु वर्त्तमानस्य वासनावशात् शमादीनामुपादेयत्वासम्भवः विहितानां कर्मणां परमपुरुषाराधनतया तत्प्रसादद्वारेण निखिलविपरीतवासनोच्छेदहेतुत्वात्, अतो गृहस्थस्य शमदमादयोऽप्यनुष्ठेयाः ॥ शमदमाद्यधिकरणं समाप्तम् ॥

टी० सू० शमदमाद्युपेतः स्यात्तथाऽपि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात् ॥ २७ ॥ सङ्गतिः पूर्वपक्षोत्थानमुखेन स्फुटा, किं विद्यानिष्ठस्य गृहस्थस्य शमादीन्युपादेया? न्युत ने? ति किं यज्ञादीनां शमादीनां चविरोधोऽस्ति ने? ति किमत्र विधीयमाना करणव्यापारोपरतिरूपा शान्तिर्यज्ञादिव्यतिरिक्तव्यापारशान्तिः? उत सर्वव्यापारशान्तिः? सर्वशान्तिश्चेद्विरोधादनुपादेयानि, न चेदविरोधात् गृहस्थस्याप्युपादेयानि, यद्यपीत्यादि विहितत्वाद्. दृष्टमुखेनोपकारकत्वाच्च शमाद्यनुष्ठेयमित्यर्थः । अविहितेषु प्रयोजनशून्येषु चेति शरीरधारणार्थमितभोजनादिव्यावृत्त्यर्थं प्रयोजनशून्येष्वित्युक्तम् ॥ यद्वा अविहितेषु अविहिताप्रतिषिद्धेषु प्रयोजनशून्येषु मुमुक्षोः प्रयोजनशून्यानि काम्यकर्माणि तेष्वित्यर्थः ॥ परे त्विदं सूत्रं पूर्वाधिकरणेऽन्तर्भाव्य व्याचक्षते यज्ञेन विविदिषन्ति इति वर्त्तमानापदेशतया न यज्ञादिविधिः किन्तु यज्ञादिपरिकरवती महाभागा विद्येति विद्यास्तुतिरित्याशङ्क्य एवं यज्ञाद्यनपेक्षायामपि शमाद्युपेतः स्यात् शमादीनां विधानाद्विहितानामवश्यानुष्ठेयत्वात्, यज्ञादीनि चानुष्ठेयानि विविदिषासंयोगस्याप्राप्तत्वेन विहितत्वात्तानि बाह्यतराणि, शमादीनि तु प्रत्यासन्नसाधनानि इति शङ्का तावदयुक्ता यज्ञाद्यपेक्षया शमादेर्विरोधाभावात्ततश्च तथाऽपीति वैयर्थ्यं विविदिषासंयोगस्याप्राप्ततया यज्ञादेरप्यनुष्ठेयत्वमविवक्षितमशाब्दं च, पूर्वसूत्रविवक्षितस्यात्र कथनमिति चेन्न ततोऽपि वरं पूर्वसूत्रस्य स्तुत्यर्थतापरत्वं विहाय विविदिषा संयोगसमर्थनपरतया ख्यानं विविदिषार्थत्वं चायुक्तमित्युक्तं तदभ्युपगमेऽपि यज्ञा-

दीनां शमादीनां च चोपादेयतासमर्थनस्य मिथस्तादर्थ्याभावात्सूत्रद्वयस्यैकाधिकरण्यमयुक्तम् ॥ शमदमाद्यधिकरणं समाप्तम् ॥

सर्वान्नानुमत्यधिकरणम् ।

सू० सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ २८ ॥

भा० वाजिनां छन्दोगानां च प्राणविद्यायाम् "न ह वा अस्यानन्नं जग्धं भवति नानन्नं परिगृहीतं भवति न ह वा एवंविदि किञ्चनानन्नं भवती"ति प्राणविदः सर्वान्नानुमतिः संकीर्त्यते, किमियं सर्वान्नानुमतिः प्राणविद्यानिष्ठस्य सर्वदा ? उत प्राणात्ययापत्ताविति विशये विशेषानुपदानात्सर्वदेति प्राप्त उच्यते प्राणात्यय इति, च-शब्दोऽवधारणे प्राणात्ययापत्तावेवेत्यर्थः, कुतः तद्दर्शनात्, दृश्यते ह्यन्यच ब्रह्मविदामपि प्राणात्ययापत्तावेव सर्वान्नाभ्युनुज्ञा, किं पुनः प्राणविदः "उषस्तः किल चाक्रायणो ब्रह्मविदग्रेसरो मटचीहतेषु कुरुषु दुर्भिक्षदूषितेभ्यग्रामे वसन्ननशनेन प्राणसंशयमापन्नो ब्रह्मविद्यानिष्पत्तये प्राणानामनवसादमाकाङ्क्षमाण इभ्यं कुल्माषान् खादन्तं भिक्षमाणस्तेन चोच्छिष्टेभ्योऽन्ये न विद्यन्त इति प्रत्युक्तः पुनरप्येतेषां मे देहीत्युक्त्वा तेन चेभ्येनोच्छिष्टेभ्य आदाय दत्तान्कुल्माषान्परिगृह्यानुपानप्रतिग्रहमिभ्येनार्थित उच्छिष्टमेव मे पीतं स्यादिति वदंश्चाक्रायणः किमेते कुल्माषा अनुच्छिष्टा इतीभ्येन पर्यनुयुक्तो न वा अजीविष्यमिमानखादन् कामो म उदपानमिति कुल्माषाखा-

न्त्यरण्यानीति'। तत्र केचिदाहुः। यत्र गवामत्यन्तासंभवस्तत्रैवा-गोष्पदशब्दः प्रयोक्तव्यो न त्वसंभवइति। अन्ये त्वविशेषेणेच्छन्ति। न चैवमसेवितग्रहणस्य वैयर्थ्यम्, असति ह्यस्मिन्ननत्यन्तासंभवे न स्यात्। 'गोष्पदपूरमिति'। 'वर्षप्रमाणऊलोपश्चास्यान्यतरस्या'मिति णमुल्। ननु च गोष्पदमिति षष्ठीसमासो ऽयं तस्य गोः संबन्धि पदमर्थः, न तु प्रमाणं, तत्राह। 'नात्र गोष्पदं स्वार्थप्रतिपादनार्थमुपादीयतइति'। तथा च गोष्पदपूरं वृष्टो देव इति, असत्यपि गोष्पदपूरणे प्रयुज्यते, यथा चेलक्नोपं वृष्टो देव इत्यसत्यपि चेलक्नोपे॥

"आस्पदं प्रतिष्ठायाम्"॥ 'आत्मयापनायेति'। प्राणधारण-मात्मयापनन्तदर्थं यत्स्थानं सा प्रतिष्ठा। 'आस्पदमिति'। आङ्पू-र्वात्पदेः पूर्ववदधिकरणे घः, लोकाश्रयत्वादस्मादेव निपातनाद्वा नपुं-सकलिङ्गता, आपदमित्यव्ययीभावसमासः॥

"आश्चर्यमनित्ये"॥ यद्याश्चर्यमनित्ये निपात्यते, घटादावति-प्रसङ्ग इत्यत आह। 'अनित्यतयेत्यादि'। लोके यदनुचितमदृष्टपूर्वमुपल-भ्यते तदनित्यतया व्याप्तं कादाचित्कत्वमतो ऽनित्यता विषयभूता भवति, तया विषयभूतयाद्भुतत्वं विस्मयहेतुत्वमुपलक्षते, उदाहरणे 'अनवक्लृप्त्यमर्षयोरकिंवृत्तेपी'त्यनवक्लृप्तावसंभावनायां लिङ्, रूणस्य म[1]न्दकर्णस्य चाविशिष्टे कालादौ भोजनमध्ययनं चादृष्ट[2]पूर्वं दृश्यमा-नमद्भुतं भवतीति। 'आश्चर्यमिति'। 'चरेराङि चागुरा'विति यत्। आचर्यमनुष्ठेयमित्यर्थः॥

"वर्चस्के ऽवस्करः"॥ कुत्सितं वर्चो वर्चस्कं, कुत्सितइति कन्, 'सोपदादाविति' सत्वम्। कना निर्द्देशो दीप्तौ मा भूदिति। दीप्तावपि हि वर्चःशब्दो वर्त्तते। 'अन्नमलमिति'। भाण्डेषु यल्लग्नं काष्टादिना ऽपकृष्य काकादिभ्यो विकीर्यते तदन्नमलम्। 'अवकीर्यतइति'। भूमाववक्षिप्यतइत्यर्थः। 'तत्संबन्धाद् देशो-

१ मन्दस्येत्येव पाठः १ पु०।
२ अपूर्वस्येति पाठः १ पु०।

पीति'। यत्र भाण्डानि परिमृज्यन्ते देशे स देशः, तथा च याज्ञ[1]-वल्क्यः। 'संमार्जितावस्करया व्यये चामुक्तहस्तये'ति। अपर आह। पुरीषं वर्चस्कं तद्देशश्चेति। 'अवकर इति'। ब्रह्मचारिणः स्त्रियां रेतः-सेकोवकरः, यतो ऽवकीर्णी भवति॥

"अपस्करो रथाङ्गम्"॥ अत्र सूत्रे तृतीय उपसर्गः पूर्वत्र षष्ठः॥

"विष्किरः शकुनिर्विकिरो वा"॥ 'विष्किरो वेत्यादि'। शकु-नावभिधेये विष्किर इति वा सुणिनपात्यतइत्येतावतैव सुट्विकल्पः सिद्ध इत्यर्थः। 'विकिरग्रहणमित्यादि'। असति तस्मिन् कप्रत्ययान्तस्य विकिरशब्दस्य शकुनौ विकल्पार्थमेवेदं वचनं स्यादिति विकिरशब्द-स्यान्यत्र प्रयोगो न निवर्तितः स्यादिति, पुनर्विकिरग्रहणे तु सति भवति, यथा तु भाष्यं तथा विष्किरः शकुनौ वेत्येतावत् सूत्रम्॥

"ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे"॥ 'सुडागमो भवतीति'। पूर्वे कात्पूर्वग्रहणादभक्तः सुडित्युक्तम्, इह तु कात्पूर्वत्वं न संभवति, आग-मलिङ्गं च टित्त्वमस्तीत्यागम एव सुडुक्त इति भावः, स च भवन्नुभ-यनिर्देशे पञ्चमीनिर्देशो बलीयानिति चन्द्रशब्दस्यैव भवति। 'सूर्याचन्द्र-मसाविति'। द्वन्द्वः। 'देवताद्वन्द्वे चे'त्यनङ् 'उत्तरपदमित्यादि'। स्वनिकायप्रसिद्धिरेवैषा॥

"प्रतिष्कशश्च कशेः"॥ 'अत्र यद्यपीत्यादि'। 'कशेरिति'। यद्धातोरुपादानं तस्य नान्यत्प्रयोजनमिति भावः॥

"प्रस्कण्वहरिश्चन्द्रावृषी"॥ हरिश्चन्द्रो राजर्षिः। 'प्रकण्वो देश इति'। कण्वं पापं तत्प्रगतं यस्मात्स एवमुच्यते, हरिः चन्द्रो यस्य मुग्धस्य स हरिचन्द्रः॥

"मस्करमस्करिणौ वेणुपरिव्राजकयोः"॥ 'परिव्राजके त्विनिर-पीति'। मत्वर्थाभावादिनिरप्राप्तो ऽतः सोपि निपात्यते, नहि परिव्रा-

[1] पुस्तकद्वयेप्येवमेव पाठः, याज्ञवल्क्यस्मृतौ तु 'संयतोपस्करा दक्षा हृष्टा व्य-यपराङ्मुखी'ति पाठ उपलभ्यते, मनुस्मृतावपि 'सुसंस्कृतोपस्करया व्यये चामुक्तह-स्तये'ति पाठः।

नक्रो मकरेण तद्वान्, मस्करेण तु वेणुना तद्वान् भवति, दण्डधारणात्, ततः किं, मस्करशब्दादिनिना सिद्धम् । एवमपि संयोगे मत्वर्थीयविधानान्मस्करसंयुक्त एव मस्करीत्युच्येत,माभूदेवं परिव्राजकमात्रवचनो यथा स्यादितीनिर्निपात्यते, व्युत्पत्तेरदर्शनाद्वा नात्र स्पष्टं निपात्यं तद्दर्शयति । 'के चिदिति' । 'माकरणशील इति' । प्रतिषेधशील इत्यर्थः । 'कर्मापवादित्वादिति' । कर्मशब्देनेह काम्यकर्माणि विवक्षितानि न नित्यनैमित्तिकानि, तानि हि मुमुक्षोरपि कर्त्तव्यानि । यथाहुः ।

मोक्षार्थी न प्रवर्त्तेत तत्र काम्यनिषिद्धयोः ।
नित्यनैमित्तिके कुर्यात्प्रत्यवायनिवृत्तये ॥

इति । तानि कर्माण्यपवदितुं प्रतिषेद्धुं शीलमस्य स कर्मापवादी । परमहंसास्तु कर्ममात्रमपवदन्ति । 'मा कुरुतेति' । न कर्त्तव्यानीत्यर्थः । कर्मणि लुङ् ॥

"कास्तीराजस्तुन्दे नगरे" ॥ के चिन्नगरे इति प्रथमाद्विवचनान्तमाहुः । वृत्तौ तु सप्तम्यन्तं व्याख्यातम् । 'कातीरमिति' । इणदर्थे चेति काभावः ॥

"कारस्करो वृक्षः" ॥ 'पारस्करप्रभृतिष्वेवेति' । नेदं[1] सूत्रमधीयतइत्यर्थः ॥

"पारस्करप्रभृतीनि च संज्ञायाम्" ॥ रूढिशब्दा एते यथाकथं चिद्व्युत्पाद्याः, पारङ्करोतीति पारस्करः । कृञो हेत्वित्यादिना टः । रथं यातीति रथ्या । आतोनुपसर्गे कः, षत्वमप्यत्र निपात्यते । अन्ये तु सकारमेव पठन्ति । किं करोतीति करोतेर्डुः, किमोन्त्यलोपः, सुट्, किष्कुः । किमपि धत्ते किष्किन्धा । पूर्ववत्कः, किमो द्विर्वचनं पूर्वस्य मलोपः, सुट्, उभयत्राप्यत्र षत्वमपि निपात्यते । तत्करोतीति तस्करः । अत्र हि तच्छब्देन चोरकर्म प्रसिद्धं निन्द्यं परामृश्यते । 'प्रात्तुम्पताविति' । तुप तुम्प हिंसार्थौ, इत्येतस्मिन्धातौ परतः प्रशब्दात्परः सुड् भवति धात्वर्थस्य

१ मूले नेदं सूत्रमधीयतइति पाठो दृश्यते स पदमञ्जर्यसंमतः ।

चेद्गौः कर्त्ता भवति, प्रस्नुम्यतीति यत्र तिबन्ते[1] सुट्, स्वशब्देन धातुग्रहणा-त्तदादावपि भवति प्रस्नुम्यतो गावौ प्रस्नुम्यन्ति गाव इति । 'चित्तिचित्तयोरिति' । चिती संज्ञाने, क्तिन्, नपुंसके भावे क्तः ॥

प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते ।
तपो निश्चयसंयोगात्प्रायश्चित्तमिति स्मृतम् ॥

"अनुदात्तं पदमेकवर्जम्" ॥ 'एकवर्जमिति' । एकं वर्ज्जयित्वेत्यर्थः । द्वितीयायां चेति णमुल् । तत्र हि परीप्सायामिति प्रायिकम्, अत्र यदि पदमिति जातावेकवचनं स्यात्तदेकवर्जमित्येकशब्देनापि प्रत्यासत्त्या पदमेवोच्येत, ततश्चायमर्थो भवति, वाक्ये पदान्यनुदात्तानि भवन्ति एकं पदं वर्जयित्वेति, अनुदात्तशब्दश्चेदानीं लौकिकः, लोके ह्यचामनुदात्तादिगुणयोगे हलपि तदनुरक्तत्वात्तद्धर्मा गृह्यतइति अज्झलसमुदायरूपं पदमेवानुदात्तमिति सामानाधिकरण्येन व्यपदिशति । अत्र पक्षे किमेकं वर्जनीयमिति नियमकारणाभावात्सर्वेषामेव पदानां पर्यायेण वर्जनात्स्वरनियमो न स्यात् तस्मात्पदमिति व्यक्तिनिर्द्देशः, विवक्षितं चैकत्वम् । अनुदात्तशब्दश्च नीचैरनुदात्त इत्यज्विशेषे पारिभाषिक इति तस्यैव ग्रहणं युक्तम्, एकशब्देनापि सन्निधानादजेवोच्यते, कथं तर्ह्यज्झल्समुदायरूपस्य पदस्याज्मात्रवाचिनानुदात्तशब्देन सामानाधिकरण्यमवयवावयविनोरभेदोपचारात् अर्शआद्यच्प्रत्ययान्तत्वाद्वानुदात्ताच्कं पदमेवानुदात्तं, यद्येवमनुदात्तशब्देनापि पदमेव प्राधान्येनोच्यते अज् गुणभावेनेति पुनरप्येकशब्दस्य संख्येयापेक्षायां प्रधानभूतपदमेव संख्येयं प्राप्नोति । उच्यते । पदमित्येकत्वं विवक्षितमित्युक्तं, तत्रैकं पदमनुदात्ताच्कं भवत्येकं पदं वर्जयित्वेति नायमर्थः सम्भवतीति सामर्थ्याद्गुणभूतोऽप्यजेवैकशब्देनोच्यते । यद्वा पदशब्दोऽपि लक्षणया तत्स्थेष्वच्षु वर्त्तते, तत्राचां पदस्थत्वाव्यभिचारादेकत्वविवक्षार्थमेव पदग्रहणं, सर्वथा त्वयमर्थो विवक्षितः, एकस्मिन्पदे वर्त्तमाना अचोऽनुदात्ता भवन्ति एकमचं वर्जयित्वेति । एवं स्थिते यदीदं स्वतन्त्रं लक्षणं स्यात्तदा

१ तिबन्तइति नास्ति २ पु० ।

नियमो वा स्यादेकमचं वर्जयित्वा परिशिष्टमनुदात्तमेव भवतीति, विधिर्वा, तत्राद्ये पक्षे येषामचां लक्षणान्तरेणोदात्तः स्वरितो वा विधीयते तत्रानियमप्रसङ्गाभावात्तद्व्यतिरिक्तविषयमेवेदं भवति । अस्ति हि तत्रानियमप्रसङ्गः, अस्वरस्याच उच्चारणासम्भवात् । 'एकंवर्जमिति'। यस्ययस्योदात्तस्वरितविधानं सस वर्ज्य इत्यर्थो भवति, ततश्चत्वार इत्यादावागमादीनां पृथक् स्वरप्रसङ्गः, आमलकीज इत्यत्र ङीषः प्रत्ययाद्युदात्तत्वं 'गतिकारकोपपदात्कृदि'ति जशब्दस्योदात्तत्वं 'दीर्घकाशतुषभ्राष्ट्रवटञ्ज'इति पूर्वपदाद्युदात्तत्वम्, अन्त्यात्पूर्वं बह्वच इति लकाराकारस्योदात्तत्वमिति युगपदुदात्तचतुष्टयप्रसङ्गः । ननु च नाप्राप्ते कृत्स्वरआरभ्यमाणेन दीर्घकाशेत्याद्युदात्तत्वेनापोदितत्वादेव कृत्स्वरो न भविष्यति. तथाद्युदात्तत्वं कुटीज इत्यादौ सावकाशमुपसरज इत्यादौ सावकाशे 'नान्त्यात्पूर्वं बह्वच' इत्यनेन परत्वाद् बाधिष्यतइति कथमुदात्तचतुष्टयप्रसङ्गः । उच्यते । विरोधे समानफलत्वे बाध्यबाधकभावः, विप्रतिषेधोपि विरोध एव, तच्चोभयं स्वरेषु नास्तीति कृत्कृत्यप्रत्ययसंज्ञानामिव समावेशप्रसङ्गः, सत्यपि विप्रतिषेधे ङीष उदात्तत्वे कृते पश्चादन्त्यात्पूर्वं बह्वच इत्येतस्मिन्प्रवृत्तेपि पूर्वकृतस्य ङीष उदात्तस्यानिवृत्तेरनिष्टमेव । यदि च यस्ययस्योदात्तस्वरितविधानं तंतं वर्जयित्वा परिशिष्टमनुदात्तमेवेत्यर्थः स्यात्पदमेकवर्जमिति द्वयमपि व्यर्थं स्यात्, सामान्येनाचोनुदात्ता इत्येवास्तु, प्रत्ययाद्युदात्तत्वादिविषये तैर्बाधितत्वादेवानुदात्तत्वं न भविष्यति, तस्मात्पदमेकवर्जमिति वचनाचायं स्वतन्त्रो नियमः । अथ विधिस्तदा येषामचां लक्षणान्तरेणोदात्तः स्वरितो वा न विधीयते तेष्वप्यनुदात्तस्य पक्षे प्राप्तत्वाद्विधिरनुपपन्न इति लक्षणान्तरेण येषामुदात्तः स्वरितो वा विहितस्तएकस्मिन्पदे वर्तमाना अनुदात्ता भवन्त्येकमचं वर्जयित्वेत्यर्थः स्यात्, क एको वर्ज्य इति न ज्ञायेत, अथापि परनित्यादिभिर्व्यवस्था एवमपि सतिशिष्टेनापि व्यवस्था न स्यात्, कथ,मौपगवत्वमित्यत्र द्वे प्रत्ययाद्युदात्तत्वे, तत्रैकस्यानुदात्तत्वं विधीयमान कस्य भवतु उदात्तस्वरितव्यतिरिक्तानां चाचाम-

नियमप्रसङ्ग एवावतिष्ठेत, तदेवं स्वतन्त्रेऽस्मिन् विधौ नियमे वा नेष्टं सिद्ध्यति। अथाधिकारः स्यात्तदा कर्षात्वतो घञोन्त इत्यत्रास्योपस्थाने सत्ययमर्थो भवति कर्षशब्दस्याकारवतोऽन्त उदात्तो भवति तमेकं वर्जयित्वा तस्मिन्पदे वर्त्तमानाः परिशिष्टा अचोनुदात्ता भवन्तीति, एवमन्यत्रापि, यत्रयत्रोपस्थानं तत्रतत्र सूत्रविहितं स्वरं वर्जयित्वा परिशिष्टस्यानुदात्तविधानम्। एकग्रहणमपि तत्र विधीयमानस्य स्वरस्योपलक्षणार्थं, तेन 'तवै चान्तश्च युगपत्' 'उभे वनस्पत्यादिषु युगपदि' त्यादौ द्वयोरपि वर्जनं भवति। इन्द्राबृहस्पती इत्यत्र बृहस्पतिशब्दे वनस्पत्यादित्वाद् द्व्युदात्ते इन्द्रशब्देन द्वन्द्वे 'देवताद्वन्द्वे चे'ति द्वयोरपि प्रकृतिस्वरत्वमिति त्रयाणां वर्जनं भवतीत्येवं षाष्ठिके स्वरे न कश्चिद्दोषः। 'आद्युदात्तश्च' 'समानोदरे शयित ओ चोदात्तः' 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्त' इत्यादिषु प्रदेशान्तरवर्त्तिषु स्वरविधिष्वस्यानुपस्थानात्तेषु परिशिष्टस्यानुदात्तत्वं न स्यात्, एकवर्जमिति च व्यर्थं स्यात्. कथमनुदात्तं पदमित्येवाधिकारोस्तु, न चैवं तत्तत्सूत्रविहितस्यापि स्वरस्यानुदात्तप्रसङ्गः, तद्विधानसामर्थ्यात्, तदेवं पक्षान्तरसम्भवात्परिभाषेयमिति निश्चित्याह। 'परिभाषेयमिति'। लिङ्गवती चेयं, स्वरविधिश्च लिङ्गमित्याह। 'स्वरविधिविषयेति'। 'यत्रान्य इति'। अनुदात्तापेक्षमन्यत्वम्। 'उदात्तः स्वरितो वेति'। अनुदात्तस्यानुदात्तवर्जनं व्यर्थमिति तद्विरोधाद् उदात्तः स्वरितो वा परिसंख्येयः, तद्विधावेवास्योपस्थानमिति भावः। उपस्थितमित्यनेन स्वरविधिभिरस्यैकवाक्यत्वता दर्शिता। 'कः पुनरिति'। वर्ज्यविशेषस्य सूत्रेऽनिर्देशात्प्रश्नः। 'यस्य स्वरो विधीयतइति'। यत्रेदमुपतिष्ठते तत्र यः स्वरो विधीयते स उच्यते। 'असाविति'। यदि ह्यसावपि न वर्ज्येत तस्य तत्स्वरविधानमनर्थकं स्यात्। 'धातुस्वरं श्नास्वरो बाधतइति'। सति शिष्टेन व्यवस्थाया वक्ष्यमाणत्वात्। 'श्नास्वरं तस्स्वर इति'। बाधतइत्यनुषङ्गः। अत्रापि हेतुर्वक्ष्यते विकरणस्वरस्तु सतिशिष्टोपीत्यत्र। 'तस्स्वरमाम्स्वर इति'। पूर्ववदनुषङ्गः। सति शिष्टत्वं हेतुः। 'आगमस्येत्यादि'। उपलक्षणमेतत्।

अनेन हि तत्तल्लक्षणाभिनिर्वृत्तानां बहूनामुदात्तस्वरितानां समावेशनिवृत्तिः प्रयोजनमस्येत्युच्यते। न चैतावदेव प्रयोजनं, येषामपि केनापि स्वरित उदात्तो वा न विधीयते, यथा ऽनेकाचु प्रत्ययेषु धातुषु वा ऽऽद्यन्तव्यतिरिक्तानामचां तेषामप्यनुदात्तनियमस्यैतदधीनत्वात्। 'चत्वार इति'। चतेरुरन्निति चतुर्शब्द आद्युदात्तः। 'अनड्वाह इति। 'अनसि वहेः क्विब् उश्चानस' इति क्विप्, यजादित्वात् संप्रसारणम्, अनःशब्दोऽसुन्प्रत्ययान्त आद्युदात्तः, गतिकारकोपपदात्कृदिति उत्तरपदप्रकृतिस्वरेण धातोरन्त उदात्तः। 'अस्थनीति'। असिसञ्जिभ्यां क्थिन्नित्याद्युदात्तो ऽस्थिशब्दः, दधिशब्दो नब्विषयस्यानिसन्तस्येत्याद्युदात्तः, नबिति नपुंसकाख्या। यस्यासौ स्वरो विधीयते स वर्ज्यते इत्युक्तं सर्वेषां चागमादीनां स्वरो विधीयतइत्यविशेषेण वर्जनप्रसङ्ग इत्यत आह। 'परनित्यान्तरङ्गापवादैरिति'। स तस्मिन्योगे सर्वेषामेव तेषां स्वकस्वरवर्ज्यमन्यमनुदात्तं चिकीर्षतां परस्परविरोध उपजायते, परत्वादिभिर्युक्तैव व्यवस्था। 'सतिशिष्टेन चेति'। व्यवस्थेत्यपेक्षते। एतदेव विवृणोति। 'यो हीति'। सामान्येनोक्तमुदाहरणनिष्ठं करोति। 'तथाहीति'। एतच्च सतिशिष्टस्य बाधकत्वं न्यायतस्सिद्धम्, कथमुदात्तस्वरितविधिभिरेकवाक्यतापन्नयाऽनया शेषनिघातः क्रियतइत्युक्तम्. ततः किमुत्सर्गस्यापवादस्य वा या चरमा प्रवृत्तिस्तस्यामिदमुपतिष्ठते. एवं च तस्यैव लक्षणस्य या चरमा प्रवृत्तिस्तत्रास्या उपस्थाने पूर्वा प्रवृत्तिर्बाध्यते, तद्यथैापगवत्वमिति, अत्र ह्याद्युदात्तश्चेत्यस्य प्रतिप्रत्ययमावृत्तौ त्वप्रत्यये यदा प्रवर्त्तते तदा ऽनया निघातः क्रियते, यदि सतिशिष्टस्वरो बाधको विकरणस्वरोऽपि लसार्वधातुकस्वरस्य बाधकः प्राप्नोति. तत्राह। 'विकरणस्वरस्त्विति'। एवं मन्यते। यदयं तासेः परस्य लसार्वधातुकस्यानुदात्तत्वं शास्ति तज्ज्ञापकमुक्तस्यार्थस्य, अन्यथा यद्यपि लावस्थायां तासिर्विधीयते तथापि लकारमात्रापेक्षत्वादन्तरङ्गेषु च लादेशेषु कृतेषु पश्चात्तासिरिति तत्स्वरस्य सतिशिष्टत्वाच्छेषनिघातेनैव सिद्धेरनर्थकं तत्स्यादिति। 'विभक्तिस्वरादिति'। सतिशिष्टत्वाद्विभक्तिस्वरे प्राप्ते वचनम्। 'नञ्स्वरेणेति'।

तत्पुरुषे तुल्यार्थेति प्रकृतिभावविहितेन । 'विभक्तिनिमित्तस्वरादिति'। विभक्तिर्निमित्तं यस्य तस्य यः स्वरस्तस्मादित्यर्थः । 'वाक्ये हीत्यादि' । देवदत्तशब्द आमन्त्रितस्वरेणाद्युदात्तः, गामित्याद्युदात्तः, गमेर्डोः प्रत्ययस्वरः, औतोम्शसोरित्यात्वमेकादेश एकादेश उदात्तेनोदात्तः, निपाता आद्युदात्ता, उपसर्गाश्चाभिवर्जमित्याद्युदात्तत्वे वर्जितत्वादभेः फिषित्यनेनान्तोदात्तत्वं, फिषिति प्रातिपदिकस्य पूर्वाचार्याणां संज्ञा । आङ् उपसर्गस्वरेणाद्युदात्तः । अजेर्लोट्, तिङ्ङतिङ इति निघातः, शुक्लशब्दः प्रातिपदिकस्वरेणान्तोदात्तः, टापा विभक्त्या चैकादेश उदात्तेनोदात्तः, तदेवं पदग्रहणाद्वाक्ये पृथगेव स्वरो भवति । ननु च यदि वाक्येपि शेषनिघातः स्यात्, ततश्च सतिशिष्टस्वरत्वादीनां व्यवस्थापकानां तत्रासंभवात्क एको वर्जनीय इति न ज्ञायेत । सत्यं, विशेषाग्रहणात्पर्यायेण वर्जनं भविष्यति । यदि तर्हि पदग्रहणं क्रियते एवं सति यावत्पदसंज्ञा न भवति तावच्छेषनिघातेन न भवितव्यं, ततश्च कुवल्या विकारः कौवलमित्यत्रानुदात्तादेश्चेत्यञ् न प्राप्नोति, यतः कुवलशब्दोयं ग्रामादित्येनाद्युदात्तः, गौरादित्वान्ङीषि विहिते ऽपि पदव्यपदेशाभावादाद्युदात्तत्वं न परित्यजतीत्यत आह । 'परिमाणार्थं चेति' । पदमत्र गौणमभिप्रेतं यस्य पदसंज्ञा भविष्यति न मुख्यं, पदाधिकारे पुनः पदग्रहणात् । किं चोदात्तस्वरितविधिभिरेकीभूय शेषनिघातः क्रियत इत्युक्तं तस्यां च दशायां युष्मदस्मदोर्ङसि, ङयि चेत्यादावेव पदत्वं निश्चितं भवति न पुनर्धातोरित्यादिषु धात्वाद्युपदेशानन्तरं प्रवर्त्तमानेषु, अतश्च तैरेकीभूतस्य पदशब्दस्य तदेकदेशे ऽपि भविष्यति वृत्तिः । यद्येवं यत्रयत्रास्योपस्थानं तत्रतत्र सर्वं पदं ततोपि चान्यत्र न्यूनं न कार्यित्वेन संनिहितमिति तत्रैवास्तु परिशिष्टमनुदात्तं भविष्यति नार्थो वाक्यनिवृत्त्यर्थेन पदग्रहणेन । उच्यते । असति पदग्रहणे धातोरन्त उदात्तो भवति परिशिष्टमनुदात्तमित्युक्ते धातोरेव यत्परिशिष्टं तदनुदात्तमिति गम्येत, एवमाद्युदात्तश्चेत्यादौ, ततश्च धातुप्रत्यययोः पृथक्स्वरः स्यादेव, अत एकपदे भविष्यतां सर्वेषामेवानुदात्तत्वं यथा स्यादित्येवमर्थं

पदग्रहणम् । 'पदाधिकारस्य निवृत्तिं करोतीति' । गौणार्थमेतत्पदग्रहणं मुख्यपदाधिकारस्य निवृत्तिं कारयति, तेन किं सिद्धं भवति, तत्राह । 'तेनेति' । ज्ञापकमप्यस्मिन्नर्थे दर्शयति । 'गर्भिणीशब्दश्चेति' । गर्भोऽस्या अस्तीति मत्वर्थीय इनिः, ङीप्, गर्भशब्दो ग्रामादिः, तत्र यदीनि-प्रत्ययस्योदात्तविधिसमकालमेवानुदात्तत्वं भवति ततो गर्भिणीशब्दस्या-नुदात्तादित्वादनुदात्तादेरित्यञि प्राप्ते तद्बाधनार्थं युज्यते तस्य भिक्षादिषु पाठः, अथ पदसंज्ञाया उत्तरकालं शिष्टस्यानुदात्तत्वं भवेत्ततो गर्भिणी-शब्द आद्युदात्तः स्यात्ततश्चाञो बाधनार्थं भिक्षादिषु न पठितव्यः स्यात् । 'कुवलगर्भशब्दावाद्युदात्ताविति' । तत्र चोक्त एव प्रकारः, ततः कुवलशब्दादञ्सिद्धये आश्रयणीयं, गर्भिणीशब्दश्च ज्ञापकमुपपद्यत-इति भावः । अत्रेदं चोद्यते । उदात्तस्वरितविधिरेकीभूतमप्येतन्नियमार्थं चेद् विहितस्वररहितेष्वेव स्यात्, विध्यर्थं चेद् विहितस्वरेष्वेव स्याद् इति प्रागुक्तो दोषस्तदवस्थ एव । उच्यते । उक्तं पदग्रहणमेकस्मिन्पदे-ऽन्तर्भूतानां सर्वेषामनुदात्तत्वमिति, अतो यथैतदुपपद्यते तथा विधिरूपेण नियमरूपेण वोभयरूपेण वा प्रवृत्तिर्भविष्यति । नन्वेवमप्येकवर्जमिति व्यर्थं, तद्धि यत्र सूत्रे येन व्यापारेण यस्य स्वरो विधीयते तस्य माभूदि-त्येवमर्थं, यदि च तस्यापि स्यादनर्थकमेव तत्स्यात् । उच्यते । एकवर्ज-मिति वचनात्परिभाषात्वनिर्णयः, तद्धि स्वातन्त्र्येऽधिकारे च न कर्तव्यं, परिभाषात्वे तु प्रवृत्तिविषयज्ञानार्थं कर्तव्यमिति सर्वमवदातम् ॥

"कर्षात्वतो घञोन्त उदात्तः" ॥ आदस्यास्तीत्यात्वान्, तसौ मत्वर्थइति भसंज्ञा, कर्षश्चात्वांश्चेति समाहारद्वन्द्वः । 'विकृतनिर्देश इति' । विकरणान्तस्येदमनुकरणं न तु घञन्तनिर्देश इति भावः । अथ किमर्थो मतुन्निर्देशः, यावता न क्वचिदप्याकारात्परो घञस्तीति साम-र्थ्यात्तद्वतो ग्रहणं भविष्यति । उच्यते । घञाक्षिप्तो धातुरात इत्यनेन विशेष्येत, तत्र तदन्तविधौ ज्ञायमाने आनन्तर्यस्यासंभवाद्द्रुधानं विशे-ष्येत, आकारान्ताद्यो विहित इति, ततश्च दाय इत्यादावेव स्यात्पाक इत्यादौ तु न स्यात्, मतुन्निर्देशात्तु सर्वत्र भवतीति । लाक्षणिकस्याः

CC.0- Sampurnanand University Collection. Digitized by eGangotri

प्यत्वतो ग्रहणमिष्यते। वृषादिषु कामपामपदानां पाठात्। अलोन्त्यस्येत्येव सिद्धेऽन्तग्रहणमुत्तरार्थम्॥

"उञ्छादीनां च"॥ उञ्छि उञ्छे, म्लेच्छ अव्यक्ते शब्दे, जनि युद्धे, अत्र कुत्वाभावो निपातनात्, जल्प व्यक्तायां वाचि. व्यध, ताडने, व्यधजपोरनुपसर्गइत्यप्। 'वध इति'। हनश्च वध इत्यप्। 'कालविशेषइति'। कृतद्वापरादौ। घृ ए निगरणे, ऋदोरप्, विग्रमित्यनेन दूष्यशब्दस्य विशेषे वृत्तिं दर्शयति। विद ज्ञाने, ओविजी भयचलनयोः, वेष्ट वेष्टने, बन्ध बन्धने, ष्टुञ् स्तुतौ, यु मिश्रणे, द्रु गतौ, । 'उपसमस्तार्थमेतदिति'। केवलानां धातूनां क्विबन्तानां धातुस्वरेणैव सिद्धत्वात्। 'परिष्टुदिति'। संपदादित्वात्क्विप्, तेन प्रादिसमासः, पूर्वपदादिति षत्वम्। अव्ययपूर्वपदप्रकृतिस्वरे प्राप्तेन्तोदात्तत्वं, सोपपदात्तु क्विपि कृत्स्वरेणैव सिद्धम्।'अन्यत्र मध्योदात्त इति'। स हि वृतु वर्त्तनइत्यस्मादिनिप्रत्ययेन व्युत्पाद्यते। दृ विदारणे। 'साम्बतापौ भावगर्हायामिति'। साम्बो भित्तते, अम्बया सह भित्तणं गर्हितं, बहुव्रीहौ पूर्वपदप्रकृतिस्वरस्यापवादः। तापो दस्यूनाम्। धार्मिकेषु दस्युकर्तृकस्तापो गर्हितः। कर्षात्वत इत्येव सिद्धे भावगर्हाया अन्यत्राद्युदात्तार्थं वचनम्। 'उत्तमशश्वत्तमाविति'। तमबन्तावेतौ द्रव्यप्रकर्षविवक्षायामामभावः, पित्त्वादनुदात्ते प्राप्ते पाठः। 'सर्वत्रेति'। भावगर्हायामन्यत्र च। छन्दसि भाषायां चेत्यन्ये। भक्ष अदने चुरादिः, मन्थ विलोडने, भुज कौटिल्ये, दिह उपचये। 'एरजण्यन्तानामिति'। ये तु अनार्षमेतद्वचनमित्याहुस्तेषां भक्षशब्दस्य पाठे प्रयोजनं मृग्यम्॥

"अनुदात्तस्य च यत्रोदात्तलोपः"॥ 'कुमारशब्दोन्तोदात्त इति'। फिषित्यनेन। अन्यत्रापि प्रातिपदिकस्यान्तोदात्तत्वमनेनैव द्रष्टव्यम्। 'पथिन्शब्दोन्तोदात्त इति'। पतेस्थ चेतीन्प्रत्ययान्तत्वात्। 'कुमुदादयोन्तोदात्ता इति'। कुमुदशब्दो मूलविभुजादित्वात्कप्रत्ययान्तः, नडशब्दोव्युत्पन्नं, वी गत्यादिष्वस्मादसच्। तुडागमश्च, वेतसश्चित्स्वरेणान्तोदात्तः। 'प्रासङ्ग इति'। प्रासज्यतइति प्रासङ्गः, कर्मणि

घञन्तं, तद्वहतीति प्राग्घिताद्यदिति यत् । 'नैतदस्तीति' । 'उदात्तो लुप्यतइति यत्तस्य प्रतिषेधः, कथं नैतदस्तीत्याह । 'स्वरिते हीति' । प्रागेव पदसंज्ञायाः स्वरविधिसमकालमेव शेषनिघातो भविष्यतीत्युक्तं पुरस्तात् । 'तत्कुत उदात्तलोप इति' । न कुतश्चिदित्यर्थः । 'तदेतदित्यादि' । यस्मादेवमनुदात्तग्रहणस्य व्या[1]वर्त्यंन्न सम्भवति तस्मादेतदनुदात्तग्रहणमादेरनुदात्तार्थम् । अथासत्यनुदात्तग्रहणे कस्य स्यादित्यत आह । 'अन्त इति' । 'मा हि धुक्षातामिति' । दुहेर्माङि लुङात्मनेपदम् । आतामाथामौ, च्लेः क्सः । अदुपदेशादिति लसार्वधातुकानुदात्तत्वं, क्सः प्रत्ययस्वरेणान्तोदात्तः, 'क्सस्याचि' त्यकारलोपः, माङः प्रयोगोऽडागमनिवृत्त्यर्थः, अटि हि सति पदमाद्युदात्तं भवति, हिशब्दप्रयोगो 'हि चे' ति निघातप्रतिषेधार्थः । अत्रासत्यनुदात्तग्रहणे आतामाथामोर्द्वितीयस्याच उदात्तः स्यात्, अन्ताधिकारात् सति त्वस्मिन्नादेर्भवति । इदन्तु वक्तव्यं, यत्रोदात्तलोपइत्युच्यमाने कथमन्त्यस्य प्रसङ्गः, नहि तदुदात्तलोपस्य निमित्तमिति । उच्यते । आदेरपि तर्हि न प्राप्नोति, तस्यानुदात्तलोपं प्रत्यनिमित्तत्वात्, 'क्सस्याचि' त्यजादौ प्रत्यये विधानात्, तस्माद्यत्र प्रत्ययउदात्तलोपस्तत्संबन्धिनोऽनुदात्तस्योदात्तो भवतीति सूत्रार्थे ऽन्ताधिकारादन्त्यस्य प्रसङ्गः । यदि तु निमित्तत्वानादरेण यत्रानुदात्ते परत उदात्तलोपस्तस्योदात्तो भवतीति सूत्रार्थस्तदा नान्त्यस्य प्रसङ्गः । 'भृगव इति' । अत्रिभृगुकुत्सेत्यादिना बहुषु लुक् । तत्र बहुष्वित्यर्थग्रहणं न बहुवचनस्य । 'बैदीति' । बिदाद्यञन्ताच्छार्ङ्गरवाद्यञो ङीन् ॥

"चितः" ॥ 'भङ्गुरमिति' । 'चजोः कु घिण्ण्यतो' रिति कुत्वम् । 'कुण्डिना इति' । कुण्डशब्दान्मत्वर्थीय इनिः, स्त्रियां ङीप्, कुण्डिनीशब्दो मध्योदात्तः, कुण्डिन्या अपत्यानि बहूनि गर्गादियञो बहुषु लुक्, परिशिष्टस्य कुण्डिनजादेशः । 'चिति प्रत्ययइति' । ननु च नात्र चितीति प्रत्ययग्रहणं कुण्डिनजादेरपि ग्रहणात्, तस्मादयमत्रार्थः । यत्र चित्प्र-

१ प्रत्युदाहरणमिति २ पु॰ पा॰ ।

त्ययस्तत्र समुदायस्येष्यतइति, कथं पुनरेतल्लभ्यते, चित इत्यवयवादेषा षष्ठी, न कार्यिणः, चितोवयवस्य संबन्धी यः समुदायः स कार्यो, अथ वा चिदस्यास्तीति चितः, अर्शआदेराकृतिगणत्वादच् प्रत्ययः, पञ्चम्यर्थे प्रथमा, तेन चिद्वतः समुदायस्येत्यर्थः। अत्र च लिङ्गमकश्चित्करणम- न्यथा तस्यैकाच्त्वादनर्थकं तत्स्यात्, कुण्डिनजादेर्व्यपदेशिवद्भावेन चिद्व- त्त्वम् ॥

"तद्धितस्य" ॥ 'कौञ्जायना इति'। कुञ्जस्यापत्यानि बहूनि, गोत्रे 'कुञ्जादिभ्यश्च्फञ्'। 'व्रातच्फञोरस्त्रिया' मिति ञ्यः, 'ञ्यादय- स्तद्राजाः' तद्राजस्य बहुषु लुक्। 'किमर्थमिति'। पूर्वेण सिद्धमिति प्रश्नः। 'परमपीति'। चकारो व्रातच्फञोरस्त्रियामित्यत्र विशेषणेन चरि- तार्थः। ञकारोपि वृद्ध्यर्थः, तत्रासत्यस्मिन्परत्वाद् ञित्स्वरः ॥

"तिसृभ्यो जसः" ॥ अर्थगतं बहुत्वं शब्दे आरोप्य बहुवचन- निर्देशः। 'तिसृ इति'। अन्तोदात्तस्य त्रिशब्दस्य स्थाने तिसृशब्द आदेशः स्थानिवद्भावादन्तोदात्तः। 'अनुदात्तौ सुप्पिता'विति जसनुदात्तः, तत्रा- ऽचि परतोऽचि र ऋतः। जस इति किमर्थं, तिसृकाः, स्वार्थे क प्रत्ययः, तिसृभावे संज्ञायां कनीति तिस्रादेशः, नित्स्वरोत्र बाधको भविष्यति, नाप्राप्ते स्वरान्तरे तिसृस्वर आरभ्यते, स यथैव सुप्पितावनुदात्तावित्येतं बाधते एवं नित्स्वरमपि बाधेत, नैष दोषः। येन नाप्राप्ते इत्येतस्य बाधनं भविष्यति, न वा प्राप्ते अनुदात्तौ सुप्पितावित्येतस्मिन् तिसृस्वर आरभ्यते, तिसृकेत्यत्रापि हि टापा सहैकादेशस्य स्थानिवद्भावात्पित्स्वरः प्राप्नोति, अथ वा मध्येपवादाः पूर्वान्विधीन्बाधन्तइति तिसृस्वरोनु- दात्तौ सुप्पितावित्येतमेव बाधिष्यते न नित्स्वरं बहुवचनविषयत्वाद् द्विवचनैकवचने न स्तः, शसि तु भवितव्यमुदात्तयणो हल्पूर्वादिति, अन्याः सर्वा हलादयो विभक्तयस्तत्र 'षट्त्रिचतुर्भ्यो हलादि' 'झल्यु- पोत्तम' मित्यनेन स्वरेण भवितव्यं, तत्रान्तरेणापि जस्ग्रहणं जस एव भविष्यति, अत आह। 'जस्ग्रहणमुप[१]समस्तार्थमिति'। समासेपि तिसृ-

१ उपसर्जनार्थमिति २ पु॰ पा॰।

शब्दात्परो जस् भविष्यति, 'अतितिसावित्ति'। अत्रातेरकृत्पदे इत्यत्रातेर्धातुलोप इति वक्तव्यमिति वचनात्प्राप्तमन्तोदात्तत्वं बाधित्वा विभक्तेरुदात्तत्वं स्यात्, जस्ग्रहणात्तूदात्तस्वरितयोर्यण इति स्वरितो भवति, अतितिस्र इत्यत्र त्वनेन जस उदात्तत्वं भवत्येव ॥

"चतुरः शसि" ॥ अनुकरणत्वेनार्थवत्त्वा[1]भावादेकवचनम् । इह चतस्रः पश्येत्यत्र चतसादेशे कृते स्थानिवद्भावादयं स्वरः प्राप्नोति तदाह । 'चतस्रादेश इति'। स्थानिवद्भावादेवाद्युदात्तत्वे सिद्धे पुनराद्युदात्तत्वनिपातनमस्य स्वरस्य बाधनार्थमिति भावः । यद्येवं तर्हि निपातनस्वरः शस्स्वरं बाधते एवं 'षड्त्रिचतुर्भ्यो हलादि' रित्येतमपि विभक्तिस्वरं बाधेत चतसृणामिति, ज्ञापकात्सिद्धं. यदयं षड्त्रिचतुर्भ्यो हलादिरिति हलादिग्रहणं करोति तज्ज्ञापयति न निपातनस्वरो विभक्तिस्वरं बाधत इति, तद्धि तत्र न कर्त्तव्यं, कथं, सर्वेषामपि बहुवचनविषयत्वाद् द्विवचनैकवचने न सम्भवतः । न चोपलक्ष्यते सम्भवो, विहितविशेषणाश्रयणात् । तत्र षड्भ्यस्तावत् जस्शसोर्लुका भवितव्यम् । अन्या सर्वा हलादयो विभक्तयस्त्रीशब्देपि जसि न भवितव्यमसर्वनामस्थानमित्यधिकारात्, शसि भवितव्यम् एकादेश उदात्तेनोदात्त इति, अन्या हलादयस्तिसृशब्देऽपि जसि तिसृभ्यो जस इति भवितव्यम्, शस्यपि उदात्तयणो हल्पूर्वादिति, अन्या हलादयः । चतुर्शब्देपि जस्यसर्वनामस्थान इति निषेधः, शसि चतुरः शसीत्ययमेव भवति, अन्यास्तु हलादयः, तदेतद्धलादिग्रहणं चतस्रः पश्येत्यत्र माभूदित्येतदर्थमेव कृतं, यदि च निपातनस्वरेण विभक्तिस्वरो बाध्येत हलादिग्रहणमनर्थकं स्यात्, चतस्रः पश्येत्यत्र निपातनस्वरेणैव बाधितत्वाद् विभक्तिस्वरस्याप्रसङ्गात् किं तन्निवृत्त्यर्थेन हलादिग्रहणेन, तत्क्रियमाणं विभक्तिस्वरस्य बलीयस्त्वं ज्ञापयति इति चतसृणामित्यत्र विभक्तिस्वरः सिद्धः । 'यणादेशस्य चेति'। 'अचि र ऋत' इति रादेशस्यास्मात्स्वरात्पूर्वं परत्वात्कृतस्य ।

[1] अर्थवत्त्वाभावादिति २ पु० पा० ।

एतदुक्तं भवति । परत्वादादेशे कृते ऋकारस्य तावन्न भवति, तशब्दाकारस्यापि न भवति रादेशस्य स्थानिवद्भावादिति । न च स्वरविधौ स्थानिवत्त्वनिषेधः, स्वरदीर्घयलोपेषु लोपाजादेश एव न स्थानिवदिति वचनात् ॥

"सावेकाचः स्तृतीयादिर्विभक्तिः" ॥ 'साविति सप्तमीबहुवचनस्य सुशब्दस्य ग्रहणमिति'। न प्रथमैकवचनस्य व्याख्यानात्, प्रयोजनन्तूत्तरत्र वक्ष्यति। 'पातेति'। पातेर्लटः शत्रादेशः। 'राज्ञेति'। सावित्येतस्मिन्नसत्येकाचः परा तृतीयादिर्विभक्तिरुदात्ता भवतीत्यर्थो भवति. भवति चायमल्लोपे कृते एकाच्। ननु च विहितविशेषणं विज्ञास्यते, एकाचो या विहिता तृतीयादिरिति. न. प्रमाणाभावात् । 'सप्तमीबहुवचनस्य ग्रहणादिति'। प्रथमैकवचने तु 'त्वाहौसा' विति त्वादेशे कृते युष्मच्छब्द एकाच् भवति शेषे लोपे कृते ऽकारान्तत्वात्सावर्वर्णेति प्रतिषेधो भविष्यति, तदिह प्रथमैकवचनाग्रहणे को हेतुरिति चिन्त्यम् ॥

"अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे" ॥ 'नित्यशब्दः स्वर्यतइति' । स्वरितत्वमस्य क्रियतइत्यर्थः । तत्र स्वरितो गुणः क्रियारूपेण निर्दिष्टः, स्वरितत्वे सति किं भवतीत्याह । 'तेनेति'। स्वरितेनाधिकार इत्यत्रायमप्यर्थो व्याख्यातः । स्वरितेन लिङ्गेन यदत्राधिकारः स प्रत्येतव्य इति ततो नित्याधिकारविहितः समासोऽत्र प्रतिषिध्यते । 'अ[१]वाचेति'। नञ्समासः । 'तत्पुरुषोऽयमिति'। न बहुव्रीहिः । तेन नञ्सुभ्यामित्यन्तोदात्तत्वं न भवति, अव्ययपूर्वपदप्रकृतिस्वर एव भवतीति भावः । प्रायेण तु सुवाचा सुत्वचा इति पाठः । तत्र प्रत्युदाहरणदिगियं दर्शितेति व्याख्येयं, न पुनरत्र प्रसङ्गः, प्रादिसमासस्य नित्यसमासत्वात् । अथोत्तरपदग्रहणं किमर्थं, यावतानित्यसमासइत्याधारसप्तमी विज्ञास्यते, अनित्यसमासस्यान्तोदात्तादेकाचः परा तृतीयादिर्विभक्तिरिति, तच्चोत्तरपदमेव, तत्राह । 'उत्तरपदग्रहणमिति'। अयं भावः । सत्सप्तमी विज्ञायेत, ततश्च समासस्याश्रयत्वा-

१ मुद्रितमूलपुस्तके तु परमवाचा परमत्वचेति पाठः ।

त्तस्यैवैकाच्त्वमन्तोदात्तत्वं च विशेषणं स्यादिति। 'अग्निचिता सोमसुतेति'। 'अग्नौ चेः,' 'सोमे सुञः' इति क्विप्, नित्यशब्दः स्वर्यतइति यदुक्तं तस्य प्रयोजनमाह। 'यस्त्विति'॥

"अञ्चेश्छन्दस्यसर्वनामस्थानम्" ॥ 'दधीचइति'। दध्यञ्चतीति ऋत्विगित्यादिना क्विन्, अनुनासिकलोपः, 'अच' इत्यकारलोपः, 'चा' विति दीर्घत्वम्,। 'शसोपि परिग्रहार्थमिति'। शसादिग्रहणं तु न कृतं, नपुंसके शसि माभूत्, सुटि च यथा स्यादिति॥

"ऊडिदंपदाद्यप्पुम्रैद्युभ्यः॥ 'प्रष्ठौह इति'। 'छन्दसि सहः' 'वहश्चे'ति ण्विः। वाह ऊठ्येत्येधत्यूठ्स्विति वृद्धिः। 'ऊठुपधाग्रहणमिति'। उपधाभूत ऊठ् गृह्यते न त्वन्त्य इत्यर्थः। पञ्चमीनिर्देशादन्त्यस्यैव ग्रहणे प्राप्ते वचनम्। 'अन्तोदात्तादित्यधिकारादन्वादेशे न भवतीति'। अत एव हेतोः सावेकाचइत्यनेनापि न भवति, यदि स्यादिहान्तोदात्ताधिकारो व्यर्थः स्यात्। ननु च यदीमे नानुशसो अभ्यवर्षादिति शसोन्वादेशेन माभूदिति प्रयोजनम्, एकाच इत्यधिकारादेव सिद्धं, तथा च तदस्मै तथ्यं तदस्य प्रियं प्रेणा तदेषामित्यादि सर्वानुदात्तं पदमधीयते। 'पदादयो निशूपर्यन्ता गृह्यन्त इति'। पदन्नोमासितिसूत्रे निर्दिष्टाः, तत्रैकाच इत्यनुवृत्तेर्निशः परे न गृह्यन्ते, यदा त्वल्लोपे कृते एकाचो भवन्ति तदोदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं सिद्धं, येप्याद्युदात्तानां स्थाने विधीयन्तआदेशास्ते तत्रैवान्तोदात्ता निपात्यन्त, वृत्तावप्येतदेवोक्तं द्रष्टव्यम्। 'आसनीति'। आस्यशब्दस्यासनादेशः, यत्रैकाचस्तेषां शसर्थं ग्रहणम्॥

"अष्टनो दीर्घात्"॥ 'घृतादिपाठादन्तोदात्त इति'। तेनोत्तरार्थमनुवर्तमानस्यान्तोदात्तादित्यस्य नेहापि विरोध इति भावः। 'अष्टस्विति'। ननु चात्र दीर्घग्रहणमनर्थकं, यावताष्टन आ विभक्तावित्यनेन भवितव्यं तद्विधौ विकल्पस्याभावादित्यत आह। 'इदमेवेति'। नित्ये ह्यात्वे व्यावर्त्याभावादिह दीर्घग्रहणमनर्थकं स्यात्। 'कृतात्वस्य च षट्संज्ञामिति'। इदमेव दीर्घग्रहणमष्टनो ज्ञापयतीति संबन्धः, कथ-

मेतदित्यत आह । 'अन्यथा हीति'। आत्वाभावपक्षेयं स्वरो माभूदित्येतदर्थं हि दीर्घग्रहणं, यदि च कृतात्वस्याष्टनः षट्संज्ञा न स्यात्तदात्वपक्षे सावकाशमिममष्टनः स्वरमनात्वपक्षे षट्संज्ञायां सत्यां झल्युपोत्तममिति षट्स्वरः परत्वाद्बाधिष्यते इत्यनर्थकं दीर्घग्रहणं स्याद्यदा तु कृतात्वस्याष्टनः षट्संज्ञा भवति तदा नाप्राप्ते षट्स्वरे आरभ्यमाणोऽष्टनः स्वरो ऽनात्वपक्षेपि स्यादिति तन्निवृत्तये क्रियमाणमर्थवद्भवति, कथं पुनरेकेन यत्नेनोभयं शक्यं ज्ञापयितुं, को दोषः, अन्यथानुपपत्त्या ह्यनेकोप्यर्थो ज्ञाप्यते तेनैतदुभयमन्तरेणानुपपद्यमानमुभयमपि ज्ञापयति ॥

"शतुरनुमो नद्यजादी"॥ 'तुदती तुदतीति'। तुदादित्वाच्छः, आच्छीनद्योर्नुम्विकल्पितः । तत्र नुमभावपक्षे उदाहरणं, नुम्पक्षे प्रत्युदाहरणम् । 'तुदन्तीति'। श्नाभ्यस्तयोरात इत्याकारलोपः. अत्र प्रत्ययस्वरेण शत्रन्तमन्तोदात्तम्। तत्रेत्यादिना प्रत्युदाहरणस्य द्व्यङ्गविकलतां परिहरति । 'तत्र पूर्वत्रासिद्धमिति नेष्यतइति'। अत्र च ज्ञापकमयमेवानुम इति प्रतिषेधः, नहि ङीं चिदेकादेशस्वरमन्तरेण शत्रन्तं सनुम्कमन्तोदात्तमस्ति । 'बृहन्महतोरुपसंख्यानमिति'। शतृवद्भावादेव सिद्धे नियमार्थमिदं पृषदादीनां माभूदिति, गौरादिषु बृहन्महतोः पाठोनर्थक इति स्त्रीप्रकरणएवोक्तम् ॥

"उदात्तयणो हल्पूर्वात्" ॥ उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्येति प्राप्ते वचनम् । 'बहुतितवा ब्राह्मण्यति'। स्त्रीलिङ्गोपादानं नाभावनिवृत्त्यर्थम्। तनोतेर्डउः सन्वच्चेति, चालनी तितउः पुमान्, ततो बहुव्रीहिः, बहोर्नञ्वदुत्तरपदभूम्नीत्युत्तरपदान्तोदात्तः, तत्रोदात्तस्वरितयोरिति विभक्तेः स्वरितत्वम् । 'नकारग्रहणं च कर्त्तव्यमिति'। उदात्तस्थाने यो नकारस्ततोपि परस्या नद्या उदात्तत्वं वक्तव्यमित्यर्थः। तदर्थं केचिदुदात्तहलो हल्पूर्वादिति पठनीयमिति मन्यन्ते । 'वाक्पत्नीति'। तत्पुरुषः । पत्यावैश्वर्य्ये इति पूर्वपदप्रकृतिस्वरस्य न भूवाक्चिद्दिधिष्विति प्रतिषेधात्समासान्तोदात्तत्वे विभाषा सपूर्वस्येति नकारः ॥

तपरकरणसामर्थ्यादृकारान्तस्याङ्गस्य योऽभ्यास इति सूत्रार्थव्यवस्थापनादत्राभ्यासस्य ह्रस्वत्वेन ऋकारान्तत्वेऽपि तदाश्रयो रुगादिर्न भवति अङ्गस्य दीर्घान्तत्वात् । एवन्तरत्यादावपि प्रतिपादितम् । कारयति । अचीकरत् । अवकिरते हस्ती स्वयमेव, अवाकीर्ष्ट हस्ती स्वयमेव, 'भूषाकर्मकिरादिसनां वोपसंख्यानमि' ति यक्चिणोः प्रतिषेधः । हस्तिनं कश्चित्पांश्वादिना ऽवकिरति तत्र सौकर्यातिशयाद्धस्ती कर्तृत्वेन विवक्ष्यत इति कैयटे । अत्र सिचो 'लिङ्सिचोरात्मनेपदेष्वि' ती ड्विकल्पः । इट्पक्षे सिचः कित्त्वाभावाद्गुणः । अवाकरिष्टेत्यादि, 'वृत' इतीटो दीर्घपक्षे अवाकरीष्टेत्यादि त्रैरूप्यं, लिङि 'न लिङी' ति दीर्घनिषेधा-'ल्लिङ्सिचोरात्मनेपदेष्वि' तीटो ऽभावाभावाभ्यां द्वैरूप्यम्, अवकीर्षीष्ट अवकरिषीष्टेति । अनिट्पक्षे 'लिङ्सिचो' 'ऋश्चे' ति कित्त्वाद्गुणाभावे 'ऋत' इतीत्वम् । अपस्किरते वृषो हृष्टः । अपस्किरते कुक्कुटो भक्षार्थी । अपस्किरते श्वा आश्रयार्थी । 'किरतेर्हर्षजीविकाकुलायकरणेष्वि' ति तङ् । 'अपाच्चतुष्पाच्छकुनिष्वालेखने' इति अपात्किरतौ परे कात्पूर्वः सुट्, अत्रापि 'किरतेर्हर्षजीविकाकुलायकरणेष्वि' ति पठ्यते । तत्र किरत्यर्थस्य हर्षो हेतुत्वेन विषय, इतरे फलत्वेनेति व्याख्याकाराः । तत्र हृष्टत्वाद्वृषभो विलिख्य विक्षिपतीत्यर्थः । इतरोऽपि कुक्कुटः श्वा च जीविकायै कुलायकरणाय च विलिख्य विक्षिपतीत्यर्थः । अपचस्करे । अपास्किरत । 'अड्भ्यासव्यवायेपी' ति सुट् । लुङि तु कर्मकर्तरि चेड्दीर्घयोर्विकल्पनात्त्रैरूप्यम् । अपास्कीर्ष्ट, अपास्करिष्ट, अपास्करीष्टेति । आशिषि लिङ्यपि 'लिङ्सिचोरि' तीटो विकल्पे 'न लिङी' ति दीर्घनिषेधे च कर्मकर्तृवद् द्वैरूप्यम् । अपस्कीर्षीष्ट अपस्करिषीष्टेति । अनिट्पक्षे पूर्ववत्'ऋश्चे' ति लिङ्सिचोः कित्त्वादि । अपस्करिता । अपस्करीतेत्यादि । अपचिस्करिषते । 'किरश्चे' ती 'ट् सनि वे' तिविकल्पं बाधते । अस्येटो दीर्घो नेत्युक्तम् । अपचेस्कीर्यते । अपचाकर्ति । किरतावि-क्ष्तिपा निर्देशादत्र सुण् न भवति । अपस्कारयति अपाचिस्करत् । अड्भ्यासाभ्यामुभाभ्यां व्यवधानेऽपि सुड् भवति । उपस्किरति श्वापदः ।

प्रतिस्किरति, 'हिंसायां प्रतेश्चे'ति किरतेः कात्पूर्वः सुट्, चकारेणोपः समुच्चीयते । तथा विक्षिपति यथा हिंसामनुबध्नातीत्यर्थः । प्रतेः सुट्, उपसर्गादित्यादिना षत्वं परिनिविभ्य एव सुटः षत्वं न प्रतेः । उपस्कारं काश्मीरका लुनन्ति, विक्षिप्य लुनन्तीत्यर्थः । 'किरतौ लवन' इति सुट् । णमुलप्यत्रेष्यते, तथा च वृत्तिः । णमुलप्यत्र वक्तव्य इति । अवस्करः । ऋदोरप् । काष्ठादिना भाण्डादिभ्यो यदन्नमलमपकृष्य भूमौ विक्षिप्यते तदन्नमलमवस्कर उच्यते, तद्योगाद्देशोऽपि । 'वर्चस्के ऽवस्कर' इति सुड् निपात्यते, अन्यत्रावकरः । ब्रह्मचारिणः स्त्रियां रेतःसेकः । अपस्करः । पूर्ववदप् । 'अपस्करो रथाङ्गमि'ति सुट् । विष्किरः विकिरः । 'इगुपधज्ञाप्रीकिरः क' इति कः । 'विष्किरः शकुनिर्विकिरो वे'ति सुड्विकल्पः, उत्कारो धान्यस्य निकारो धान्यस्य । 'कॄ धान्य' इति उन्न्योरुपपदयोर्घञ् । अन्यत्र उत्करो निकर इत्येव भवति । कीर्णः । कीर्णवान् । 'श्र्युकः किती'-तीणिनषेधादित्वरत्वद्दीर्घेषु निष्ठानत्वम् । कीर्णिः । 'तितुत्रे'त्यनिट्त्वम्, ऋल्वादिभ्यःक्तिन्निष्ठावदिति नत्वम्, अत एव निष्ठावद्भावाद्वा ऽनिट्त्वम्, अवकीर्णमनेनेत्यवकीर्णी । 'इष्टादिभ्यश्चे'ति तृतीयार्थे प्रथमान्तादिनिः । अवकीर्णं नाम स्त्रियां ब्रह्मचारिणा रेतसो विक्षेपः । कुरुः । 'कृग्रोरुच्चे'ति उप्रत्ययो धातोश्चोकारान्तादेशो रपरत्वं च, कौरवः । प्राग्दीव्यतीयोण् अपत्यादन्यत्र । अपत्ये तु कौरव्यः । तत्र 'कुर्वादिभ्यो ण्य' इति ण्यः । अत्राक्षत्रियकुरोर्ग्रहणं, तेनास्य तद्राजसंज्ञाया अभावाद्बहुषु लुङ् न भवतीति कौरव्या इति भवति, क्षत्रियस्य तु 'कुरुनादिभ्यो ण्य' इति ण्यः, तस्य 'ते तद्राजा' इति तद्राजत्वा 'त्तद्राजस्य बहुषु तेनैवास्त्रिया'मिति बहुषु लुकि कुरव इति भवति । कौरव्याः पशव इति भट्टनारायणप्रयोगश्चिन्त्यः । ब्राह्मणत्वारोपाच्च लुगिति समर्थनार्थो न पुष्यति, स्त्रियां कुरूः । 'स्त्रियामवन्तिकुन्तिकुरुभ्यश्चे'ति तद्राजस्य लुक्, गोत्रं च चरणैः सहे'ति जातित्वादुकारान्तत्वादूङ्, अत तद्राजस्य 'कौरव्यमाण्डूकाभ्यां चे'ति ष्फः, आयनादेशः, षित्वान्ङीष्, कौरव्यायणी, 'ण्यक्षत्रियार्षञितो यूनि लुगणिञो'रिति लुकि

पिता पुत्रश्च कौरव्यः। अयमप्यक्षत्रियकौरव्यस्य, क्षत्रियस्य तु तिकादिपाठात्फिञा भाव्यं कौरव्यायणिरिति, तत्र ह्यौरसशब्देन क्षत्रियवचनेन साहचर्यात्कौरव्यशब्दोपि तादृशो गृह्यते। यस्तु जनपदवाची कुरुशब्दस्तस्य 'कच्छादिभ्यश्चे'ति भवादौ शैषिकोण्, जनपदवुञोपवादः। कौरवो गौरिति। भवादौ मनुष्ये तत्स्थे कच्छादिभ्यो 'मनुष्यतत्स्थयोर्वुञि'ति वुञ् विधानात् कौरवको मनुष्यः कौरवकं हसितमिति, कृणाति कृणीतइति श्ने। करोतीत्यौ। कृणोति। कृणुतइति श्नौ॥ १२५॥

गॄ निगरणे॥ गिरति। गिलति। 'अचि विभाषे'त्यजादौ सर्वत्र वा लत्वम्। जगार। जगाल। जगरिथ, जगलिथ। गरिता। गरीता। गलिता। गलीता। गरिष्यति। गरीष्यति। गलिष्यति। गलीष्यति। 'वॄतो वे'त्यलिटीटो वा दीर्घः, गिरतु। गिलतु। अगिरत्। अगिलत्। गिरेत्। गिलेत्। गीर्यात्। 'किदाशिषी'ति कित्त्वादित्वे। 'हलि चे'ति दीर्घत्वम्। अगारीत्। अगालीत्। अगारिष्टाम्। अगालिष्टाम्। 'सिचि च परस्मैपदे'ष्विवतीटो दीर्घनिषेधः। जिगरिषति। जिगलिषति। 'किरश्च पञ्चभ्य' इतीट्। अस्य दीर्घविकल्पो नेति किरतावुक्तम्। जेगिल्यते। 'लुपसदे'त्यादिना भावगर्हायां यङ्, इत्त्वरपरत्वयोः 'हलि चे' ति दीर्घात्पूर्वं 'पूर्वत्रासिद्धमि' ति 'ग्रो यङी' ति लत्त्वेनेदानीं रेफान्तविहतनिर्मितत्वाच्च दीर्घः। जागर्ति। जागीर्तः। गारयति गालयति। अजीगरत्। अजीगलत्। 'निगरणचलने' ति नित्यं परस्मैपदम्। गार्यते। गाल्यते। अन्तरङ्गत्वात्पूर्वं णिलोपादजाद्यपेक्षो लत्वविकल्पः, कृते वा णिलोपे स्थानिवत्त्वेनाजादिपरत्वाद्भविष्यति। न च पूर्वत्रासिद्धे न स्थानिवदिति, तस्य दोषः संयोगादिलोपलत्वणत्वेष्वित्युक्तत्वात्। गिरते ग्रासः स्वयमेव। अगरिष्ट। अगरीष्ट। अगीर्ष्ट ग्रासः स्वयमेव। 'भूषाकर्मकिरादिसना' मिति किरादित्वाद्यक्चिणोर्निषेधः। 'लिङ्सिचोरात्मनेपदे' ष्विति वा इट्। तस्य पूर्ववत्पक्षे दीर्घः। अगलिष्ट। अगलीष्टीटि लत्वं चोदाहार्यम्। अनिटि 'उश्चे' ति कित्त्वादित्वरपरत्वे। अवजगिरे। अवजगरिषे। 'अवाद्ग्र' इति तङ्। अलिटीत्यनुवर्तनाच्च 'वॄत'

इति दीर्घः । अवगरिता । अवगरीता, अवगलिता । अवगलीता । अवगरिष्यते । अवगरीष्यते । अवगिरताम् । अवागिरत । अवगिरेत । अवगीर्षीष्ट । अवगरिषीष्ट । 'लिङ्सिचोरात्मनेपदेष्वि' तीड् वा, अवागरीष्ट, लिङ्वत्प्रक्रिया, अवगिरतइत्यादौ सर्वत्राजादौ लत्वमुदाहार्यम्, इटो दीर्घत्वं च लिङ्लिटौ वर्जयित्वा । 'अवाद्ग्र' इति सर्वत्र तङ्, नित्यं शब्दं संगिरन्ते वैयाकरणाः । 'समःप्रतिज्ञाने' इति तङ् । मुदं गिरतीति मुद्गरः । पचाद्यच् । गलः । प्राण्यङ्गविषयम् । अचि व्यवस्थितविभाषया लत्वं, निगारः । उद्गारः 'उन्योर्ग्रः' इति घञ् । तिमिंगिलः । मूलविभुजादित्वात्कः । 'गिलेऽगिलस्ये' ति मुम्, अगिलस्येति वचनाद् गिलगिलइत्यत्र न भवतिः । गुरुः । 'कृग्रोरुच्चे' त्युप्रत्ययो धातोश्चोकारः । गृणातेर्वा ऽयं शब्दार्थात् । गरिष्ठः । गरिमा । गरीयान् । 'प्रियस्थिरेत्या' दिना इष्ठेमेयस्सु गुरुशब्दस्य गरादेशः । पृथ्वादिपाठादिमनिज्वा, तदभावे 'इगन्तादि' त्यणि गौरवम् । गारयति । णाविष्ठवदिति गरादेशः । गर्भः । 'अर्तिगृभ्यां भन्निति' भन् । गर्भिणी । इदन्ताद् ङीष् । गोगर्भिणी । 'चतुष्पादो गर्भिण्ये' ति तत्पुरुषः । गर्भिणीनां समूहो गार्भिणम् । भिक्षादित्वादण् । 'भस्याढे तद्धिते' इति पुंवद्भावः । 'इनण्यनपत्य' इति प्रकृतिभावः । गर्भिणी भार्या यस्य स गर्भिभार्यः । 'स्त्रियाः पुंवदि' ति पुंवद्भावः । ननु स्त्रियामनवयवभूतः गर्भसंबन्धः प्रवृत्तिनिमित्तं, पुंसि तु अवयवभूतगर्भसंबन्धो यथा गर्भी व्रीहिरिति, तेन समानायामाकृतौ भाषितपुंस्कत्वाभावात्कथं पुंवद्भावः । नैष दोषः । अन्तर्वस्तुसंबन्धमात्रस्येह प्रवृत्तिनिमितत्त्वात् । अयं शब्दार्थः क्र्यादौ । ज्ञानार्थश्चुरादौ । गरतीति शपि गतम् । [1]सुवतिकीरतिगिरय उदात्ताः ॥ १२६ ॥

दृङ् आदरे ॥ आद्रियते 'रिङ् शयग्लिङ्' क्ष्विति रिङ् । आदद्रे । आदद्रिषे । आदर्त्ता । आदरिष्यते । 'ऋद्धनोः स्य' इतीट् । आद्रियताम् । आद्रियत । आद्रियेत । आदृषीष्ट । आदृत । आदृषाताम् । 'उश्चे' ति लिङ्सिचोः कित्त्वं, किति सिचो लोपः । आदिदरिषते ।

[1] किरतीति गिरतीति उदात्ताउदात्तेताविति ४ पुस्तके पाठः ।

'किरश्चपञ्चभ्य' इतीट्। देद्रीयते 'रीङ् ऋत' इति रीङ्। दर्दर्ति। दारयति। अदीदरत्। आद्रियते स्वयमेव किरादित्वाद्यक्चिणोः प्रतिषेधः, आदृत्यः 'एतिस्त्व' त्यादिना क्यप्। आदरी 'जिदृक्षी' त्यादिना इनिः। आदरः। 'ग्रहवृदृनिश्चिगमश्चे' ति अप्। केचित्तु भये दरति इति घटादिपाठादाहुः। दृणातीति दारणे॥ १२७॥

धृङ् अवस्थाने॥ ध्रियते इत्यादि आद्रियते इतिवत्। आधारः। 'अध्याये' त्यादिनाधिकरणे घञ्। धर्मः। मनिन्। अत्र वक्तव्यं भूवादावुक्तम्। धरते धरतीति शपि। द्रियतिध्रियती अनुदात्तावात्मनेभाषौ॥ १२८॥

अतः परं शीयत्यन्ता अनुदात्तेतः॥

प्रच्छ ज्ञीप्सायाम्॥ पृच्छति। 'छे चे' ति तुकि 'स्तोश्चुना श्चु-रि' ति श्चुत्वम्। 'ग्रहिज्या' दिना संप्रसारणं ङिति। पप्रच्छ। पप्रच्छुः। पप्रष्ठ। पप्रच्छिथ। क्रादिनियमादिट्। थलि 'तूपदेशेत्वत' इति निषेधाद्भारद्वाजनियमाच्च विकल्पः। अनिटि व्रश्चादिना षत्वे 'ष्टुना ष्टुरि' ति थकारस्य ठकारः। अन्तरङ्गत्वात्पूर्वन्तुकि संयोगात्परत्वाल्लिटः कित्त्वाभावाच संप्रसारणम्। प्रष्टा। प्रक्ष्यति। 'षढोः कः सी' ति कत्वं, 'पृच्छतु। अपृच्छत्। पृच्छेत्। आशिषि पृच्छ्यात्। अप्राक्षीत्। अप्राष्टाम् 'झलो झली' ति सिचो लोपः। 'वदव्रजे' ति वृद्धिः। पिपृच्छिषति। 'किरश्च पञ्चभ्य' इतीट्, 'रुदविदे' त्यादिना सनः कित्त्वात्संप्रसारणम्, परीपृच्छ्यते 'रीगृत्वत' इति रीक्। पाप्रच्छीति। पाप्रष्टि, पाप्रष्ट इत्यादि, पृच्छतीति श्तिपा निर्देशाच्च सम्प्रसारणम्। प्रच्छयति, अपप्रच्छत्, संपृच्छते 'समो गम्यृच्छी' त्यकर्मकात्संपूर्वात्तङ्। संपप्रच्छे, संपप्रच्छिषे। संप्रष्टा। संप्रक्ष्यते। संपृच्छताम्। समपृच्छत। संपृच्छेत। संप्रक्षीष्ट। समप्रष्ट। समप्रक्षाताम्। समप्रक्षतेति, झलि सिचो लोपे ष्टुत्वम्। अन्यत्र कत्वम्। आपृच्छते गुरुम्। 'आङि नुप्रच्छयोरुपसंख्यानमि' ति तङ्। प्रश्नः। 'यजयाचे' ति नङ् 'च्छ्वोः शूडि' ति सतुक्कस्य च्छस्य शकारः, 'शादि' ति श्चुत्वनिषेधः - 'प्रश्ने चासन्नकाल' इति निर्देशाच्च संप्रसारणम्। पृच्छतीति प्राट्।

शब्दं पृच्छतीतिशब्दप्राट्। 'क्विब्वचिप्रच्छीत्या' दिना निरुपपदात्सोपपदाच्च प्रच्छेः क्विप्, दीर्घासंप्रसारणं च, 'च्छ्वोःशूडि' ति शकारः। 'व्रश्चा'-दिना तस्य पदान्ते षत्वं, जश्त्वचर्त्वे च, पृच्छा। भिदादेराकृतिगणत्वादङित्यात्रेयः। पृष्ट्वा। पृष्टः। पृष्टवान्। अयं द्विकर्मकः। तत्र अप्रधाने दुहादीनामिति लादयोऽप्रधाने भवन्ति। माणवकः पृच्छ्यते पन्थानम्। प्रष्टव्यः, पृष्टः। पृष्टवान् इति। अन्यदपि द्विकर्मकसाधारणं नाथत्यादौ प्रपञ्चितं तत एवावधार्यम् ॥ १२९ ॥

वृत् ॥ किरादयो वृत्ता इत्यर्थः ॥

सृज विसर्गे ॥ सृजति। ससर्ज। ससृजतुः। ससर्जिथ। सस्रष्ठ। ससृजिव। 'विभाषा सृजिदृशोरि' ति थलीड्विकल्पः। इडभावे झलाद्यकित्परत्वा 'त्सृजिदृशोर्झल्यमकिती' त्यमागमे यणादेशः। 'व्रश्चा' दिना षत्वं, ष्टुत्वं, स्रष्टा। स्रक्ष्यति। सृजतु। असृजत्। सृजेत्। आशिषि सृज्यात्। अस्राक्षीत्। अस्राष्टाम्। अमागमे यणि। च 'वदव्रजे' ति वृद्धिः। झलि सिज्लोपः। सिसृक्षति। 'हलन्ताच्चे' ति सनः कित्त्वान्नामागमो नापि गुणः। सरीसृज्यते। रीगागमः। सरीसृजीति। सरीसर्ष्टि। सरीसृष्ट इत्यादि। सर्जयति। असीसृजत्। अससर्जत्। उत्स्रष्टा। सृज्यते मालाम्, असर्जि मालां, श्रद्धया निष्पादयति, श्रद्धया निष्पादितवानित्यर्थः। 'सृजियुज्योः श्यंस्तु'। 'सृजियुज्योः सकर्मकयोः कर्ता बहुलं कर्मवद् भवतीति वक्तव्यम्'। सृजेः श्रद्धोपपन्ने कर्तरीति भाष्यकारवचनात्सकर्मकस्यापि कर्मवद्भावः। श्यना यगेव बाध्यते न तु चिणिति कैयटे। तदयं कर्मवद्भावश्चिणात्मनेपदार्थो भवति। सृज्यम्। 'ऋदुपधादि' ति क्यप्। पाणिभ्यां सृज्यते इति पाणिसर्ग्या रज्जुः। 'पाणौ सृजेर्ण्यद्वक्तव्यः'। 'समवपूर्वाच्चे' ति ण्यति 'चजोः कुघिण्ण्यतोरि' ति कुत्वम्। सृजति तामिति स्रक्। 'ऋत्विगि' त्यादिना कर्मणि क्विन्, अमागमः, कत्वञ्च। संसर्गी। 'सम्पृचे' त्यादिना घिनुण्। रज्जुः। 'सृजेरसुम् चे' त्युप्रत्ययः सलोपो ऽसुमागमश्च। तत्र सकारस्य जश्त्वे श्चुत्वं, स्रग्वी। 'अस्मायामेधास्रजे' ति

मत्वर्थे विनिः । स्रजिष्ठः । स्रजीयान् । स्रजयति 'विन्मतोर्लुक्' णाविष्ठवदिति चेष्टेमेयःसु णौ च विनो लुक्, सृज्यते इति गतं श्यनि ॥ १३० ॥

टुमस्जो शुद्धौ ॥ मज्जति । 'झलां जशि'ति सकारस्य दकारः, तस्य चुत्वं जकारः, ममज्ज । ममज्जतुः । ममज्जिथ । ममङ्क्थ । ममज्जिव । क्रादिनियमादिट् । थ 'ल्युपदेशेत्वत'इति निषेधाद्भारद्वाजनियमाच्च विकल्पः । अनिट्पक्षे 'मस्जिनशोर्झली'ति नुम् । स च 'मस्जेरन्त्यात्पूर्वं नुममिच्छन्त्यनुषङ्गसंयोगादिलोपार्थे'मित्यन्त्यात्पूर्वइति 'स्कोः संयोगाद्योरि'ति सलोपः । जकारस्य 'चोः कुरि'ति कुत्वे 'खरि च'ति चर्त्वम् । नकारस्य 'नश्चापदान्तस्ये'त्यनुस्वारे परसवर्णः । मङ्क्ता । मङ्क्ष्यति । मज्जतु । अमज्जत् । मज्जेत् । मज्ज्यात् । लिङो । अमाङ्क्षीत् । अमाङ्क्ताम् । अमाङ्क्षुः । 'वदव्रजे'ति वृद्धिः । झलि सिचो लोपः । मिमङ्क्षति । मामज्ज्यते । मामङ्क्ति । मज्जयति । अममज्जत् । मज्जथुः । 'ट्वितो थुच्' । मङ्क्त्वा । मक्त्वा । 'जान्तनशां विभाषे'ति क्त्वायां वा ऽनु शासिकलोपः । मग्नः । मग्नवान् । 'अनिदितामि'ति नस्य लोपः, सलोपकुत्वे च । 'ओदितश्चे'ति नत्वं, मद्गुयः, मद्गुः, ण्यति घञि च 'च जोः कुघिण्ण्यतोरि'ति कुत्वे 'झलां जश् झशी'ति सकारस्य दकारः । मद्गुः । 'भृमृशी'त्यादिनोप्रत्ययः । 'न्यङ्क्वादित्वात्कुत्वं, पूर्ववत्सकारस्य दकारः । मुद्गरः । बाहुलकादुरच् कुत्वञ्च । मज्जा । मज्जानौ । 'श्वन्नुक्षे'ति कनिनन्तो निपात्यते ॥ १३१ ॥

रुजो भङ्गे ॥ चोरस्य रुजति रोगः । 'रुजार्थानां भाववचनानामज्वरे'रिति धात्वर्थस्य भावकर्तृकत्वे कर्मणि शेषे षष्ठी । अत्र भावो धात्वर्थः । वचनशब्दश्च कर्तृवचनः । अत्र केचिद्रुजाशब्दस्य व्याधौ रूढत्वाद्भाववचनानामित्यस्य प्रत्युदाहरणं श्लेष्मा पुरुषं रुजतीति रुजेर्व्याध्यर्थत्वमेवाहुः । श्लेष्मा पुरुषं रुजति व्याधिना योजयतीति ह्यर्थः । वृत्तिभाष्ययोस्तु रुजां भङ्गमाश्रित्य नदी कुलानि रुजतीति प्रत्युदाहृतम् । अशेषविवक्षायामपि कर्मणि नित्यं द्वितीया[1] भवति । चोरं

१ द्वितीयेवेति ४ पु० पा० ।

रुजतीति । रुरोज । रुरुजतुः । रुरोजिथ । रुरुजिव । रोक्ता । रोक्ष्यति । रुजतु । अरुजत् । रुजेत् । रुज्यात् । अरौक्षीत् । अरौक्ताम् । अरौक्षुः । झलि सिचो लोपः । 'चोः कुः' । रुरुक्षति । रोरुज्यते । रोरोक्ति । रोजयति । अरूरुजत् । निष्पूर्वोयं व्याधिप्रशमने । नीरुजति मिताशीति । कूलमुद्रुजः । 'उदि कूले रुजिवहो'रिति खश् । रोगः । 'पदरुजे'ति कर्तरि घञ् । हृद्रोगः । हृदयरोगः । 'वा शोकष्यञ्रोगेष्वि'ति हृद्भावविकल्पः । रुक्त्वा । रुग्णः । रुग्णवान् । ओदित्त्वान्नत्वम् । लुग्नं जीर्णवस्त्रं, 'कपिलकादीनां संज्ञाछन्दसो'रिति लत्वम् । रुजा । भिदादेराकृतिगणत्वादङ् ॥ हिंसार्थोयं चुरादौ ॥ १३२ ॥

भुजो कौटिल्ये ॥ भुजतीत्यादि रुजिवत् । मूलविभुजो रथः । 'मूलविभुजादीनामुपसंख्यानमि'त्यणोपवादः कः । 'भुजोनवन'इत्यत्र संयोगवद्विप्रयोगस्यापि विशेषस्मृतिहेतुत्वादवत्सा धेनुरानीयतामितिवदनवनप्रतिषेधेन संभवन्नवनसंबन्धो रौधादिक एव गृह्यते । उक्तञ्च तत्र भाष्ये, अनवनकौटिल्ययोरिति वक्तव्यमिति । तस्मादस्मान्न तङ् ॥ १३३ ॥

छुप स्पर्शे ॥ द्वितीयादिरयम् । केचित्प्रथमादिम्पठन्ति ते भाष्यविरोधादुपेक्ष्याः । तथा च 'दीर्घाकित'इत्यत्र चेच्छिद्यते चोच्छुप्यते इत्यत्र 'छे चे'ति तुकि गुणो न प्राप्नोतीत्याशङ्क्य परत्वाद्गुणे पश्चात्तुगिति समर्थितम्, हरदत्तोपि परत्वाद्गुणे कृते पश्चात्तुगित्याह । छुपति । चुच्छोप । चुच्छुपतुः । चुच्छुपिथ । चुच्छुपिव । छोप्ता । छोप्स्यति । छुपतु । अछुपत् । छुपेत् । छुप्यात् । लुङि अच्छौप्सीत् । अच्छौप्ताम् । चुच्छुप्सति । चोच्छुप्यते । चोच्छोप्ति । छोपयति । अचुच्छुपत् । छुपित्वा । छुप्तः ॥ १३४ ॥

रुश रिश हिंसायाम् ॥ रुशति । रुरोश । रुरोशिथ । रुरुशिव । रोष्टा । रोक्ष्यति । रुशतु । अरुशत्, रुशेत् । रुश्यात् । अरुक्षत् । 'शल इगुपधादनिट'इति क्सः । रुरुक्षति । रोरुश्यते । रोरोष्टि । रोशयति ।

अरुरुशत्। रिशति। रिरेश। रेक्ष्यति। रिशतु। अरिशत्, रिशेत्। अरिक्षत्। रिरिक्षति। रेरिश्यते। रेरेष्टि। रेशयति। अरीरिशत्॥ १३५–१३६॥

लिश गतौ॥ लिशतीत्यादि रिशतिवत्। लिश्यते इति दैवादिकस्य॥ १३७॥

स्पृश संस्पर्शने॥ स्पृशति। पस्पर्श। पस्पृशतुः। पस्पर्शिथ। पस्पृशिव। खयः शेपः। स्पर्ष्टा। स्पृशतु। अस्पृशत्। स्पृशेत्। स्पृश्यात्। अस्पार्क्षीत्। अस्पार्ष्टाम्। अस्पार्क्षुः। अस्प्राक्षीत्। अस्प्राष्टाम्। अस्प्राक्षुः। 'स्पृशमृशे'ति पक्षे सिचि पूर्ववदम्विकल्पः। अन्यदा क्सः। अस्पृक्षदित्यादि। पिस्पृक्षति। उरदत्वे 'सन्यत' इतीत्वम्। परिस्पृश्यते। परीस्पर्ष्टि। इयिकोरप्युदाहार्यम्। अपरिस्पर्गित्यत्र 'क्विन्प्रत्ययस्य कुरि'ति पदान्ते कुत्वं, रात्सस्ये'ति नियमाच्च संयोगान्तलोपः। इह क्विनि दृष्टो धातुः क्विन्प्रत्यय उच्यते। अस्त्येवास्य क्विनो विधानं 'स्पृशोनुदके क्विन्'ति। मन्त्रेण स्पृशतीति मन्त्रस्पृक्। स्पृशोऽनुदके सुबन्तमात्रे उपपदे क्विन्। उदकं स्पृशतीत्यत्र कर्मण्यण् उदकस्पर्श इति। हृदिस्पृक् दिविस्पृगित्यत्र 'हृद्युभ्यां ङेरुपसंख्यानमि'त्यलुक्। स्पर्शो रोगः। 'पदरुजविशस्पृशो घञि'ति घञ्। तत्र वार्तिकं स्पृश उपताप इति, स्पर्शवान् आद्यविस्पर्श उच्यते॥ १३८॥

विच्छ गतौ॥ उदात्तेत्। विच्छायति। 'छे चे'ति तुक्। 'गुपूधूपविच्छी'त्यायः। सार्वधातुके नित्यम्। विच्छायांचकार। विविच्छ। विविच्छतुः। विविच्छिथ। विविच्छिव 'आयादय आर्द्धधातुके वे'त्यार्द्धधातुके भाविन्यायोत्पत्तिविकल्पः। निवृत्तिविकल्पे प्रत्ययलक्षणेनायान्तत्वादाम्प्रत्ययः स्यात्, विच्छाञ्चकारेति। विच्छिता विच्छायिता। विच्छिष्यति। विच्छायिष्यति। विच्छायतु। अविच्छिष्टाम्। विविच्छिषति। वेविच्छ्यते। यङ्लुको विवक्षायान्त्वार्धधातुकविषयत्वस्यैवापहारादायोत्पत्तिविकल्पो नेति प्रागेवोपपादितत्वाद्यङ्लुङ्नास्ति। विच्छयति। अविविच्छत्। अविविच्छायत्। विश्नः। 'यजयाचे'ति नङ्, 'च्छ्वोः शूडि'-

ति शः, 'नेड्वशि कृती'तीण्निषेधः, विच्छित्वा । विच्छायित्वा । विच्छितः । विच्छायितः । अयं भासार्थे चुरादौ ॥ १३९ ॥

विश प्रवेशने ॥ विशति । इत्यादि रिषतिवत् । निविशते । 'नेर्विश' इति तङ् । उत्तरसूत्रोपात्तैः पर्यादिभिः साहचर्यादिहोपसर्गो गृह्यते न तु तत्प्रतिरूपक इत्यङ्के निविशति भयादित्यत्र तङभावः प्रतिरूपकापेक्षो द्रष्टव्यः । निविविशे । निविविशिषे । निवेष्टा । निवेक्ष्यते । निविशताम् । न्यविशत । निविशेत । निविक्षीष्ट । न्यविक्षत । निविविक्षते । निवेविश्यते । निवेविशीति । निवेवेष्टि । विष्टः, विष्टवान् । विट् । विशौ । विशः । क्विप् । देवविशा । अजादिपाठाद्धलन्तादपि टाप् । वेशः । 'पदरुजविशे'ति कर्तरि घञ्, वेश्या जनसमाश्रये तु 'हलश्चे'ति अधिकरणे घञ् । गेहानुप्रवेशमास्ते गेहंगेहमनुप्रवेशमास्ते । 'विशिपदी'-त्यादिना णमुल् । तृतीयाप्रभृतित्वात्समासविकल्पः । असमासे व्याप्यमानतायां द्रव्यवचनस्य द्विर्वचनम् । आसेव्यमानतायान्तु क्रियावचनस्य णमुलन्तस्य, समासे तु व्याप्त्यासेवयोस्तेनैवोक्तत्वान्न द्विर्वचनं, क्त्वाप्यत्र वासरूपेण भवति । गेहमनुप्रविश्यानुप्रविश्यास्ते गेहंगेहमनुप्रविश्यास्त इति । समासस्त्वस्य न भवत्यनुपपदे विधानादित्येतत्सर्वं स्कन्दत्यादावुक्तम् । ग्राममभिनिविशते । 'अभिनिविशश्चे'त्याधारः कर्म । अत्र मण्डूकप्लुत्या 'परिक्रयणे संप्रदानमन्यतरस्यामि'त्यतोऽन्यतरस्यांग्रहणानुवृत्तेस्तस्य च व्यवस्थितविभाषात्वात्कल्याणेऽभिनिवेशः, पापेऽभिनिवेशः, याया संज्ञा यस्मिन्नभिविशते इत्यादौ कर्मत्वाभावः । वेशन्तः । 'दृविशिभ्यां झच्'-ति झच् । 'झोन्तः' । वेश्म । मनिन् ॥ १४० ॥

मृश आमर्शने ॥ आमर्शनं स्पर्शः ॥ मृशतीत्यादि सर्वं स्पृशतिवत् ॥ १४१ ॥

णुद प्रेरणे ॥ कर्त्रभिप्रायेपि क्रियाफले परस्मैपदार्थः पुनः पाठः, नुदतीत्यादि रूपं पूर्ववत् ॥ १४२ ॥

षद्लृ विशरणगत्यवसादनेषु ॥ एवं धनपालः । विसरणइत्यात्रेयमैत्रेयौ दुर्गश्च, शिति 'पाघ्रे'त्यादिना सीदादेशः । सीदतीत्यादि,

अन्यत्र ससादेत्यादि सर्वं भौवादिकवत् । इह पाठे प्रयोजनं सीदती सीदन्तीति नुम्विकल्पः । एवं तर्ह्येतेनैव रूपद्वये सिद्धे तत्रास्य पाठोनर्थक इति केचित् । ज्वलितिकसन्तेभ्यो णार्थः साद इति । स्वरश्च भिद्यते, शपि सीदतीत्यत्र शप्तिपोः पित्त्वादनुदात्तत्वं धातुरुदात्तः । शे तु प्रत्ययस्वरेणोदात्ते मध्योदात्तत्वम् ॥ १४३ ॥

शद्लृ शातने ॥ 'पाघ्रे'त्यादिना शिति शीयादेशः ॥ शीयतइत्यादि । अन्यत्र शशाद । शत्तेत्यादि सर्वं भौवादिकवत् । 'शदेः शित' इति शिद्विषये तङ्विधानाच्चास्य शता ऽस्तीति नुम्विकल्पस्य प्रयोजनस्याभावात्पुनः पाठे प्रयोजनं पूर्वत्स्वरभेदः । पृच्छत्यादयोनुदात्ता उदात्तेतः । विच्छिरेकः सेट् ॥ १४४ ॥

अथोभयपदिनमाह ।

मिल सङ्गमने ॥ मिल संश्लेषणइति पठितस्येह पुनः पाठः कर्त्रभिप्राये लङर्थे इत्यात्रेयः । अयं ह्युदात्तस्वरितेत्, मिलतीत्यादि पूर्ववत् । मिलते । मिमिले । मेलिता । मेलिष्यते । मिलताम् । अमिलत । मिलेत । मिलिषीष्ट । अमेलिष्ट । मिमिलिषते । मिमेलिषते ॥ १४५ ॥

मुच्लृ मोक्षणे ॥ मुञ्चति । 'शे मुचादीनामि'ति शे नुम् । मुमोच । मुमुचतुः । मुमोचिथ । मुमुचिव । मोक्ता, मोक्ष्यति । मुञ्चतु । अमुञ्चत् । मुञ्चेत् । मुच्यात् । अमुचत् । अमोक्ष्यत् । मुञ्चते । मुमुचे । मोक्ता । मोक्ष्यते । मुञ्चताम् । अमुञ्चत । मुञ्चेत । मुक्षीष्ट । अमुक्त । अमुक्षाताम् । झलि सिचो लोपः । 'चोः कुः', मुमुक्षति । मुमुक्षते वत्सं, कर्मकर्तरि मोक्षते वत्सः स्वयमेवेत्यपि भवति 'मुचो ऽकर्मकस्य गुणो वे'ति सनन्तस्य पक्षे गुणे 'अत्र लोपोभ्यासस्ये'त्यभ्यासलोपः, यक्चिणो'र्भूषाकर्मकिरादिसनामि'ति निषेधः । मोमुच्यते । मोमोक्ति । मोचयति । अमूमुचत् । मोक्षः । सनन्तात् घञि पूर्ववद्गुणाभ्यासलोपौ । निर्मुच्यत इति निर्मोकः । घञि चजोः कुघिण्ण्यतोरि'ति कुत्वम् । अमोच्यमश्वं यदि मन्यसे इत्यत्रावश्यके ण्यः । 'ण्य आवश्यक' इति कुत्वनिषेधः । नखमुचानि धनूंषि, मूलविभुजादित्वात्कर्तरि कः । मुष्टेर्व

हिर्भूतानीत्यर्थः । जलमुक् । जलमुचौ । क्विप् । मुक्ता, क्तिच्क्तौ च संज्ञायामिति संज्ञायां क्तः । मुक्तैव मौक्तिकम् । 'विनयादिभ्यश्चे' ति स्वार्थे ठक् । नमुचिः । 'इगुपधात्किच्चे' ति इन् । 'नभ्राडि' त्यादिना नञः प्रकृतिभावः । चक्रमुक्तः । 'अपेतापोढमुक्ते' ति पञ्चमीसमासः । प्रमोचनेयं चुरादिः । मुञ्चते मुञ्चतीति कल्कने शपि गतम् ॥ १४६ ॥

लुपॢ छेदने ॥ लुम्पति । लुम्पते इत्यादि मुञ्चतिवत् । लोलुप्यते । 'लुपसदे' त्यादिना भावगर्हायामेव यङ् । लुप्तनिर्दिष्ट इत्यत्रापूर्वकालस्यापि लुप्तशब्दस्य भाष्यकारप्रयोगात्पूर्वनिपातः । लोपयति । अलूलुपत् । अलुलोपत् । काण्यादित्वाद्वा ह्रस्वविकल्पः ॥ १४७ ॥

विदॢ लाभे ॥ अयं सेडपि मुचादिकार्यानुरोधार्थमिह पठितः । विन्दति । विन्दतः । 'विदो लटो वे' त्यत्र लादेशैः सम्भवदानन्तर्यस्यादादिकस्यैव ग्रह इति विकरणेन व्यवहितानन्तर्यादस्मात्परेषां तिबादीनां णलादयो न भवन्ति । अत एव हेतोः 'विदेः शतुर्वसुरि' त्यत्रापि पूर्ववत्सम्भवदानन्तर्य आदादिक एव गृह्यते इति विदन्नित्यत्र वस्वादेशो न भवति। विवेद, विविदतुः। विवेदिथ, विन्दतु, अविन्दत्। 'सिजभ्यस्तविदिभ्य' इत्यत्रापि पूर्ववत्सम्भवदानन्तर्यस्यादादिकस्यैव ग्रह इत्यविन्दन्नित्यत्र जुस्न भवति । विन्देत् । आशिषि विद्यात् । 'समो गम्यृच्छी' त्यत्र गम्यादिभिः साहचर्यात्परस्मैपदिन एव विदेर्ग्रह इत्यस्य तङ्नियमाभावात्कर्माविवक्षायामपि संविन्दति संविन्दत इत्युभयं भवति। अविदत् । अविदताम् । लृदित्वादङ् । विन्दते । विविदे । वेदिता । वेदिष्यते । विन्दताम् । अविन्दत । विन्देत । वेदिषीष्ट । अवेदिष्ट । 'उपविदे' त्यत्र उषजागृभ्यामपरस्मैपदिभ्यामादादिकेन जागर्तिना साहचर्यात्परस्मैपदिन आदादिकस्य ज्ञानार्थकस्यैव ग्रह इत्यात्मनेपदिनस्तौदादिकस्य सत्ताविचारणार्थयोरुभयपदिनश्चास्माच्च भवति । विविदिषति । विवेदिषति । विदित्वा । वेदित्वा 'रलो व्युपधादि' ति वा कित्त्वं, 'रुदविदे' त्यत्राकारस्य विवक्षितत्वादस्य न ग्रहः । अत एव तत्र न्यासे विद ज्ञाने इत्युपात्तः, तथा च 'सत्सूद्विषे' त्यत्र वृत्तिः । विद

ज्ञाने, विद सत्तायां, विद विचारणे इति त्रयाणां ग्रहणलाभार्थस्याकारस्य विवक्षितत्वादिति । वेविद्यते । वेवेत्ति । वेदयति, अवीविदत् । विन्दतीति विन्दः । 'अनुपसर्गाल्लिम्पविन्द' ति शः, विकरणस्यास्य चैकादेशः । गोविन्दः कुविन्द इत्यादौ 'गवादिषु विन्देः संज्ञायामि' ति शः, ब्राह्मणवेदं भोजयति । 'कर्मणि दृशिविदोः साकल्य' इति साकल्यविशिष्टे कर्मण्युपपदे णमुल्, यं यं ब्राह्मणं जानाति तं तं भोजयतीत्यर्थः । अत्र सत्तार्थस्यैकस्य न ग्रहोऽकर्मकत्वात् । यावद्वेदं भोजयति, यावल्लभते तावद्भोजयतीत्यर्थः । 'यावतिविन्दजीवोरि' ति णमुल् । 'विदिभिदिच्छिदेः कुरजि'-त्यत्र ज्ञानार्थ एव न्यासे गृहीतः, स्वभावादिति वृत्तिः, 'विन्दुरिच्छु' रित्यत्रापि स्वभावात् ज्ञानार्थस्य ग्रह इति न्यासे । 'संज्ञायां समजे' त्यत्रापि ज्ञानार्थ एव न्यासे गृहीतः । वित्तं धनम् । वित्तः प्रसिद्धः । 'वित्तो भोगप्रत्यययोरि' ति निष्ठानत्वनिषेधः । भुज्यतइति भोगो धनं, प्रतीयतइति प्रत्ययः प्रसिद्धः, अन्यत्र वित्तः । 'विभाषा गमहनविदविशामि' ति क्वसाविड्विकल्पना 'वसस्य विभाषे' त्यनिट्त्वम् । कातन्त्रे त्वयमनिडुक्तः । तन्मते वेत्ता वेत्स्यतीत्यादि । इदं च व्याघ्रभूतेर्नाभिमतम् । तथाहि विद्यतिविन्तइत्यपीति श्यना श्नमा च निर्देशाद्दैवादिकस्य रौधादिकस्य चानिट्त्वं तेनोक्तं नान्यस्य । तथा वृत्तिकारोपि विद्यति विन्तइति निर्देशात् ज्ञानार्थलाभार्थयोरिटमाह । वेदिता विद्यानां वेदिता धनस्येति । परिवेत्तृशब्दस्तु विद्यतिविन्त्योरन्यतरस्य परिपूर्वस्यार्थान्तरे वृत्तस्य द्रष्टव्यः, तृजन्तोप्ययं स्वभावादनूढेयजे पूर्वमूढेवरजे वर्तते । 'अप्तृन्नि' त्यादौ नप्त्रादीनां ग्रहणमौणादिकतृचन्तानां संज्ञाशब्दमात्रस्यैवेत्युद्गातारावित्यादिवत्परिवेत्तारावित्यादौ दीर्घो भवति ॥ १४८ ॥

लिप उपदेहे ॥ लिम्पति । लिलेप । लिलेपिथ । लिलिपिव । लेप्ता । लेप्सति । लिम्पतु । अलिम्पत् । लिम्पेत् । लिप्यात् । अलिपत् । 'लिपि सिचि ह्वश्चे' त्यङ् परस्मैपदे, अन्यत्रा 'त्मनेपदेष्वन्यतरस्यामि' ति पक्षे सिच् । अलिपत । अलिपेताम् । अलिपन्त । अलिप्त । अलिप्साताम् । अलिप्सतेत्युभयं भवति, लिम्पते । लिलिप्सति ।

लिलिप्सते । लेलिप्यते । लेलेप्ति । लेपयति । अलीलिपत् । लिम्पः । 'अनुपसर्गात्लिम्पे 'ति शः । निलिम्पा देवाः । 'नौ लिम्पेरि ' ति शः । लिप्रवासितमित्यत्र राजदन्तादिपाठात्पूर्वकालस्यापि परनिपातः । लिपिः । लिबिः 'इगुपधात्किच्चे ' ति इत्प्रत्ययः । 'दिवाविभे ' त्यादौ लिपिलिबीति निर्द्देशात्पकारस्य पत्ते बकारः ॥ १४९ ॥

षिच क्षरणे ॥ सिञ्चति । सिषेच । सिषिचतुः । सिषेचिथ । क्रादिनियमादिट् । 'आदेशप्रत्यययोरि ' ति प्रकृतेः षत्वम् । सेक्ता । सेक्ष्यति । सिञ्चतु । असिञ्चत् । सिच्यात् । असिचत् । 'लिपिसिचिह्वश्चे ' ति परस्मैपदेङ् । अन्यत्रा 'त्मनेपदेष्वन्यतरस्यामि ' ति विकल्पः । असिक्त । असिक्षाताम् । असिचत । असिचेतामित्यादि । सिञ्चते । सिषिचे इत्यादि, सिसिक्षति । सिसिक्षते । 'स्तौतिण्योरेवे ' ति नियमाच्च षत्वम् । सेसिच्यते । 'सिचो यङी ' ति न षत्वम् । सेसेक्ति । सेचयति । असीषिचत् । अत्र स्वामी षत्वं नेच्छति । अभिषिचति 'स्तौतिण्योरेवे ' ति नियमम्बाधित्वा 'स्थादिष्वभ्यासेन चाभ्यासस्ये ' ति षत्वम् । अभिसेसिच्यते इत्यत्र 'उपसर्गाद्धि ' ति प्राप्तेरपि परत्वा 'त्सिचो यङी '- ति निषेधो भवति, उपसर्गादिति प्राप्तिस्तु पुरस्तादपवादन्यायेन 'सात्पदाद्योरि ' ति निषेधमेव बाधते । सेक्त्रम् । 'दाम्नीशसे 'त्यादिना ष्ट्रन् । सिक्थम् । पातॄतुदिवचिरिचिसिचिभ्यस्थगिति थक् । सिचयशब्दस्तु बाहुलकात्कथनन्तः । मुचादयोनुदात्ताः स्वरितेतः । विदतिस्तु सेडेकः ॥१५०॥

कृती छेदने ॥ उदात्त उदात्तेत् । कृन्तति । चकर्त्त । चकृततुः । चकर्तिथ । चकृत । चकृतिव । कर्तिता । कर्त्स्यति । कर्तिष्यति । 'सेसिची ' त्यादिना सकारादाविड्विकल्पः । कृन्ततु । अकृन्तत् । कृन्तेत् । कृत्यात् । लिङौ । अकर्तीत् । अकर्तिष्टाम् । चिकृत्सति चिकर्तिषति । चरीकृत्यते । चरिकर्त्तीत्यादि । कर्तयति । अचकर्तत् । उर्कद्वा । विकर्तनः । नन्द्यादिः । कृतः । कृतवान् । कृतिः । क्तिन् । कृत्समुद[१]कम् । सत्रश्चिकृ-

१ पानीयमिति ४ पु० पाठः ।

त्यृषिभ्यः क्विदि' ति सप्रत्ययः स कित् । 'तितुत्र' तीण्निषेधः कृत्स्नम् । 'कृत्यशुभ्यां क्स्नन्' इति क्स्नन् । बाहुलकादिडभावश्च ॥ १५१ ॥

खिद परिघाते ॥ अनुदात्त उदात्तेत् । खिन्दति । चिखेद । चिखिदतुः । चिखेदिथ । खेत्ता । खेत्स्यति । खिन्दतु । अखिन्दत् । खिन्देत् । खिद्यात् । लुङि अखैत्सीत् । अखैत्ताम् । 'वदव्रजे' ति वृद्धिः । झलि सिचो लोपः, चिखित्सति । चेखिद्यते । चेखेत्ति । चेखिदीति । खेदयति । अचीखिदत् । खित्त्वा । खिन्नः । खिदिरम् । 'इषिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दितिमिमिहिमुहिमुचिरुचिरुधिवन्धिशुषिभ्यः किरच्' इति किरच् । विद्यतइति दैन्ये दिवादिपाठात् । अयं कर्मकर्तरीति वदन् वामनो दिवादावस्य पाठं नेच्छति । खिद दैन्यइति रुधादौ गतः ॥ १५२ ॥

पिश अवयवे ॥ उदात उदात्तेत् । पिंशति । पिपेशिथ । पिपिशिव । पेशिता पेशिष्यति । पिंशतु । अपिंशत् । पिंशेत् । पिश्यात् । अपेशिष्टाम् । पिपिशिषति । पेपिश्यते । पेपिशीति । पेपेष्टि । पेशयति । अपीपिशत् । पिशित्वा, पेशित्वा । पिशितम् । पिशिताशः पिशाचः । पृषोदरादित्वात्सिद्धिः[1] । पिशङ्गः । बाहुलकादङ्गच् । पिशङ्गी 'पिशङ्गादुपसंख्यानमिति ङीप् । पेशी गर्भकोशः । पचाद्यजन्ताद्गौरादित्वान्ङीष् । अयं दीपनायामपि वर्तते । तथा च त्वष्टा रूपाणि पिंशत्वित्यत्र हरदत्तः, पिंशतिर्दीप्तिकर्मा । नक्षत्रेभिः पितरो द्यामपिंशन्निति दर्शनादिति । पिशगतौ चुरादौ ॥ १५३ ॥

वृत् ॥ तुदादयो मुचादयश्च वृत्ता इत्यर्थः ॥

इति श्रीपूर्वदक्षिणपश्चिमसमुद्राधीश्वरकम्पराजसुतसंगममहामन्त्रिणा सायणसुतेन माधवसहोदरेण सायणाचार्येण विरचितायां माधवीयायां धातुवृत्तौ तुदादिगणः सम्पूर्णः ॥

१ पिशितपूर्वादशधातोरणि इतशब्दस्य लोपः, शकारस्य चकारश्चकारस्य जश्त्वाभावश्च पृषोदरादित्वात् । पिशितमश्नातीति पिशाचः ।

अथ रुधादयः ॥

रुधिर् आवरणे ॥ अयं द्विकर्मकः । व्रजं गां रुणद्धि । रुन्द्धः । रुन्धन्ति । रुणत्सि । रुन्धः । रुन्ध । रुणध्मि । रुन्ध्वः । रुन्ध्मः । 'रुधादिभ्यः श्नमि'ति शपोपवादः श्नम् । नित्यत्वादयं गुणात्पूर्वम्भवति । मित्वादचोऽन्त्यात्परः, शकारः श्नान्नलोप इति विशेषणार्थः । 'झषस्तथो'रितिझषोनन्तरयोस्तथोर्धत्वे 'झलां जश् झशी'ति धातोर्दत्वं, रुन्ध इत्यादौ क्ङिति सार्वधातुके 'श्नसोरल्लोप' इत्यकारस्य लोपः । 'नश्चापदान्त' त्यनुस्वारः परसवर्णः । अल्लोपस्यान्लयोर्नस्यानित्वं, 'नपदान्ते'त्यादिना निषेधात् । णत्वे तु कर्तव्ये परसवर्णस्य पूर्वत्रासिद्धत्वाच्च तद्भवति । न चानुस्वारात्पूर्वं णत्वप्रसङ्गः । तस्यासिद्धत्वात् । रुणत्सीत्यत्र 'खरि चे'ति चर्त्वं, रुरोध । रुरुधतुः । रुरुधुः । रुरोधिथ । रुरुधिव । क्रादिनियमादिट् । रोद्धा । रोत्स्यति । रुणद्धु, रुन्धात् । रुन्धाम् । रुन्धन्तु । रुणद्धि, हेर्धित्वे जश्त्वम् । रुन्धम् । रुन्ध । रुणधानि । रुणधाव । रुणधाम । अरुणत् । अरुणद् । अरुन्धाम् । अरुन्धन् । अरुणत् । अरुणद् । अरुणः । अरुन्धम् । अरुणधम् । अरुन्ध्व । अरुन्ध्म । 'हल्ङ्या'दिना तिस्योर्लोपः । जश्त्वं वा चर्त्वञ्च । सिपि 'दश्चे'ति वा रुत्वमपि । रुन्ध्यात् । रुन्ध्याताम् । रुन्ध्युः । रुन्ध्याः । रुन्ध्याम् । रुन्ध्याव । आशिषि रुध्यात् । रुध्यास्तां, लुङि 'इरितो वे'ति अङ्पक्षे । अरुधत् । अरुधताम् । अन्यदा अरौत्सीत् । अरौद्धाम् । अरौत्सुः । अरौत्सीः । अरौद्धम् । अरौद्ध । अरौत्सम् । अरौत्स्व । अरौत्स्म । रुन्धे । रुन्धाते । रुन्धते । 'आत्मनेपदेष्वि'त्यद्भावः । रुन्त्से । रुन्धाथे । रुन्ध्वे । रुन्ध्वहे । रुरुधे । रुरुधाते । रुरुधिरे । रुरुधिषे । रुरुधिवहे । रोद्धा । रोत्स्यते । रुन्धाम् । रुन्धाताम् । रुन्धताम् । रुन्त्स्व । रुणधै । रुणधावहै । अरुन्धाताम् । अरुन्धत । अरुन्धाः । अरुन्धि । अरुन्ध्वहि । रुन्धीत । रुन्धीयाताम् । रुन्धीयाः । रुन्धीय । रुन्धीवहि । आशिषि । रुत्सीष्ट । रुत्सीयास्ताम् ।

विधिकोपश्चोपदेशे स्यात् ॥ ९ ॥

विधेः अव रक्षो दिवः सपत्नं वध्यासमित्यवहन्तीति अवहननाङ्गत्वेन उक्तमन्त्रविधेः कोपः निर्विषयता स्यात् । हविष्कृदेहीति मन्त्रस्यावहननाङ्गत्वोपदेशे । न चाष्टदोषग्रस्तो विकल्पो युक्त इति भावः ॥ ९ ॥

अग्निविहरणादिप्रकाशकमन्त्राणां तत्रैव विनियोगः । अधि· ४ ।

तथोत्थानविसर्जने ॥ १० ॥

ज्योतिष्टोमे श्रूयते, तिष्ठन्नन्वाह, अग्नीदग्नीन्विहरेति । तथा व्रतं कृणुतेति वाचं विसृजतीति । किमुत्थानवाग्विसर्जने उद्दिश्य उक्तौ द्वौ मन्त्रौ विनियुज्येते उत पूर्ववत् काललक्षकत्वमिति संशये पूर्ववद्वाक्यभेदाभावाद् ब्राह्मणवाक्यस्य प्रबलत्वेन लक्षणायां मानाभावादनुवादकमन्त्रवाक्ये एव लक्षणोचिता । तथा चाग्नीत्पदव्रतपदयोर्मन्त्रघटकयोः उत्थानवाग्विसर्गयोरर्थयोर्लक्षणामङ्गीकृत्य तत्रैव विनियोग इति बहिः पूर्वपक्षे सिद्धान्तमाह । तथेति । यथा ऽवघ्नचिति काललक्षकं तथोत्थानविसर्जने काललक्षके । ब्राह्मणवाक्येन विनियोगे ऽपि गार्हपत्यशब्दवद् न द्वितीयाश्रुतिरस्त्यतः प्रबलेन लिङ्गेनैव विनियोग इति भावः ॥ १० ॥

सूक्तवाकस्य प्रस्तरप्रहरणाङ्गत्वम् । अधि· ५ ।

सूक्तवाके च कालविधिः परार्थत्वात् ॥ ११ ॥

सूक्तवाकेन प्रस्तरं प्रहरतीति दर्शपूर्णमासे श्रुतम् । अत्र सूक्तवाकशब्दः तत्काललक्षकः अथ वा सूक्तवाकस्य प्रस्तरप्रहरणाङ्गत्वं प्रतिपादयतीति संशये पूर्वपक्षमाह । सूक्तेति । सूक्तवाके तद्घटितादाहृतवाक्ये तृतीयान्तेन तत्कालो लक्ष्यते । सूक्तवाकप्रस्तरयोः परार्थत्वात् । सूक्तवाकस्य देवतास्तुतिः प्रस्तरस्य स्रुग्धारणमिति उभयोरन्यत्र विनियुक्तत्वेन तयोः परस्परमङ्गाङ्गिभावो न संभवतीति भावः ॥ ११ ॥

उपदेशो वा याज्याशब्दो हि नाकस्मात् ॥ १२ ॥

सिद्धान्तमाह । उपेति । उपदेशः प्रस्तरप्रहरणं प्रति अङ्गत्वेन विधिः । अन्यथा अकस्माद् होमानङ्गभूतस्य सूक्तवाकस्य याज्याशब्दः

याज्यात्वेन स्तुतिः तदर्थवादे सूक्तवाको हि याज्या प्रस्तरो हविरितीत्यत्र न युज्यते । होमसाधनएव याज्यापदप्रवृत्तेरिति भावः ॥ १२ ॥

स देवतार्थस्तत्संयोगात् ॥ १३ ॥

ननु प्रपूर्वकहरतिधातोः अग्निप्रक्षेपोऽर्थः न याग इति कथं यागप्रकाशने समर्थस्तत्राह । स इति । सः सूक्तवाकः देवतार्थः देवताद्रव्यसंबन्धरूपो यागः अर्थः प्रपूर्वकहरतिधातोर्यस्मादिति समासेन यागार्थकल्पकः । सूक्तवाकेनेतितृतीयासंयोगात् । अयं भावः । तृतीयाश्रुत्या सूक्तवाकस्य प्रहरणाङ्गत्वे सिद्धे सूक्तवाकस्यास्य अग्निरिदं हविरजुषत, अग्निः इदं प्रस्तररूपं हविः अजुषत स्वीकृतवानिति लिङ्गस्यान्यथाऽनुपपत्त्या धातोर्यागार्थकत्वं सिध्यतीति ॥ १३ ॥

प्रतिपत्तिरिति चेन्न स्विष्टकृद्वदुभयसंस्कारः स्यात् ॥ १४ ॥

ननु प्रस्तरस्य स्रुग्धारणे विनियुक्तस्य प्रक्षेपेण प्रस्तरं संस्कुर्यादिति प्रतिपत्तिरेव, नोद्दिश्य त्यागरूपयागाङ्गत्वमपि । अपूर्वद्वयकल्पनापत्तेरिति शङ्कते । प्रतिपत्तिरिति । अपूर्वद्वयकल्पने इष्टापत्तिमाह । नेति । वक्ष्यमाणस्विष्टकृन्न्यायेन उभयसंस्कारः । प्रक्षेपः प्रस्तरं संस्कुर्वन् सन्निपत्योपकारकः तृतीयाश्रुत्या प्रस्तरकरणकः त्यागः प्रयाजादिवदारादुपकारकश्चेति भावः ॥ १४ ॥

सूक्तवाकानामर्थानुसारेण विनियोगः । अधि॰ ६ ।

कृत्स्नोपदेशादुभयत्र सर्ववचनम् ॥ १५ ॥

अयं सूक्तवाकः कृत्स्नः प्रत्येकं दर्शे पूर्णमासे चाङ्गमुत विभज्याङ्गमिति संशये पूर्वपक्षमाह । कृत्स्नोपदेशादिति । सूक्तवाकेनेति कृत्स्नस्याङ्गत्वेन उपदेशाद् उभयत्र सर्ववचनं कृत्स्नपाठः ॥ १५ ॥

यथार्थं वा शेषभूतसंस्कारत्वात् ॥ १६ ॥

सिद्धान्तमाह ।'यथेति । यथार्थे यथालिङ्गं विभज्य विनियोगः । शेषभूतानां दर्शे पूर्णमासे च प्रत्येकमङ्गभूतदेवतासंस्काररूपत्वात् । अनङ्गभूतानां संस्काराकाङ्क्षाविरहादिति भावः ॥ १६ ॥

वचनादिति चेत् ॥ १७ ॥

ननु सूक्तवाकेनेति तृतीयान्तेन वचनेन निखिलसूक्तवाकस्य विनियोगे क्रियमाणे तत्र न युक्त्यपेक्षा । न हि वचनस्यातिभारो ऽस्तीति शङ्कते । वचनादिति ॥ १७ ॥

प्रकरणाविभागादुभे प्रति कृत्स्नशब्दः ॥ १८ ॥

समाधत्ते । प्रकरणेति । प्रकरणस्य महाप्रकरणस्य अविभागात् कृत्स्नशो विनियोग उभे प्रति उभयोर्मिलित्वा । तथा च तृतीयाश्रुत्या विनियोगो ऽपि अबाधित इति भावः ॥ १८ ॥

काम्ययाज्यानुवाक्यानां काम्यमात्राङ्गत्वम् । अधि० ७ ।

लिङ्गक्रमसमाख्यानात् काम्ययुक्तं समाम्नानम् ॥ १९ ॥

उभा वामिन्द्राग्नी इत्यनुवाके इन्द्राग्निलिङ्गका अष्टौ ऋच आम्नाताः । ता ऋचः केवलेन लिङ्गेन यत्र क्व चन विनियोक्तव्या इति बहिः पूर्वपक्षे सिद्धान्तमाह । लिङ्गेति । न केवलं लिङ्गेन विनियोगः, किं तु लिङ्गक्रमसमाख्याभिर्मिलित्वा । काम्ययाज्यानुवाक्याकाण्डमिति समाख्यया काम्येष्टिषु ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकाम इत्यादौ । तत्रापि क्रमप्रमाणेन प्रथमेष्टेः प्रथमयाज्यानुवाक्यायुगलमिति रीत्या समानपठितं काम्ययुक्तं काम्येष्टिसंबद्धं स्यान्न केवलेन लिङ्गेनेति भावः ॥१९॥

आग्नीध्रोपस्थाने प्राकृतानां मन्त्राणां विनियोगः । अधि० ८ ।

अधिकारे च मन्त्रविधिरतदाख्येषु शिष्टत्वात् ॥ २० ॥

ज्योतिष्टोमे आग्नेय्या ऽऽग्नीध्रमुपतिष्ठतइति श्रुतम् । अत्राग्नेयीपदं प्रकृताप्रकृतसाधारणपरमुत प्रकृतमात्रपरमिति संशये पूर्वपक्षमाह । अधीति । अधिकारे यत्किञ्चित्क्रतुसंनिधौ यो मन्त्रविधिः सः अतदाख्येषु अप्रकृतमन्त्रेषु चकारेण प्रकृतेषु च स्यात् । अविशेषेण अङ्गत्वेन विहितत्वात् ॥ २० ॥

तदाख्यो वा प्रकरणोपपत्तिभ्याम् ॥ २१ ॥

सिद्धान्तमाह । तदिति । तस्मिन्प्रकरणे आख्या पाठो यस्य मन्त्रस्य स एवोपस्थाने योज्यः । प्रकरणेन संनिधिपाठेन उपपत्त्या युक्त्या च ॥ २१ ॥

अनर्थकश्चोपदेशः स्यादसंबन्धात्फलवता न ह्युपस्थानं फलवत् ॥ २२ ॥

युक्तिमेव प्रकटयति । अनर्थेति । उपदेशः मन्त्रस्योपस्थानं प्रति साधनत्वोपदेशः अनर्थकः व्यर्थः स्यात् । त्वया प्रकरणस्यानादरात् फलवता क्रतुना संबन्धबोधकप्रमाणाभावेन असंबन्धात् । उपस्थानं न स्वतः फलवत् । अयं भावः । प्रकरणाङ्गीकारे प्रकरणे सामान्यरूपेण अयं मन्त्रः क्रतुना संबद्धः तत्प्रकरणपाठादिति निश्चये केन साकं संबन्ध इति विशेषजिज्ञासायाम् इदं वाक्यमुपस्थानेन फलवत्क्रतुसंबद्धेन संबद्धं करोतीति परम्परया फलवत्त्वादुपपन्ना प्रवृत्तिः । अन्यथा उपस्थानस्य फलकल्पनापत्तेरिति ॥ २२ ॥

सर्वेषां चोपदिष्टत्वात् ॥ २३ ॥

नन्वेवं सति अप्रकृतपठितानां मन्त्राणां विनियोगः कुत्रापि न स्यादित्यत आह । सर्वेषामिति । सर्वेषामप्रकृतपठितानां वाचःस्तोमक्रतुसंबन्धस्य, अविनियुक्ता वाचःस्तोमे संपद्यन्त इति वचनेन फलसंबन्धस्य उपदिष्टत्वान्न काऽप्यनुपपत्तिः ॥ २३ ॥

भक्षमन्त्राणां यथालिङ्गं ग्रहणादौ विनियोगः । अधि० ६ ।

लिङ्गसमाख्याभ्यां भक्षार्थताऽनुवाकस्य ॥ २४ ॥

अग्निष्टोमप्रकरणे भक्षेहीत्यनुवाकः भक्षानुवाक इतिसमाख्याविशिष्टः पठितः । सोऽनुवाकः सर्वः भक्षणाङ्गमुत अनुवाकमध्यपठितवाक्यानि कानि चिल्लिङ्गेन केवलेन क्रियान्तरेऽपि विनियुज्यन्त इति संशये पूर्वपक्षमाह । लिङ्गेति । यथा काम्ययाज्याकाण्डमितिसमाख्यासहितेन लिङ्गेन मन्त्राणां काम्येष्टिष्वेव विनियोगः तथा भक्षानुवाकसमाख्यासहितेन भक्षयामीति लिङ्गेन भक्षार्थताऽनुवाकस्य । एतदनुसारेण मध्यवर्तिलिङ्गान्तराण्यमुख्यवृत्त्या भक्षपराणि ॥ २४ ॥

तस्य रूपोपदेशाभ्यामपकर्षोऽर्थस्य चोदितत्वात् ॥ २५ ॥

सिद्धान्तमाह । तस्येति । तस्य भक्षेहीति सद्यासमित्यादिमन्त्रकलापस्य अपकर्षः भक्षवाक्याद्विच्छेदः रूपोपदेशाभ्याम् । रूपं ग्रहणप्रकाशनसामर्थ्यम् अश्विनोस्त्वा बाहुभ्यां सद्यासमित्यंशतिष्ठ म्

उपदेशः सदसि भक्षयन्तीति भक्षणविधिः । ताभ्याम् । ननु भक्षणविधिवद् ग्रहणविध्यभावाद् ग्रहणलिङ्गमविहितमर्थं कथं प्रकाशयेदत आह । अर्थस्य ग्रहणरूपार्थस्य चोदितत्वाद् भक्षणविधिनैव तस्य विहितत्वात् । ग्रहणेन विना भक्षणानुपपत्तेरिति । तथा च भक्षेहीति सध्यासमित्यन्तो ग्रहणे । वसुमद्गणस्येत्यादिभक्षयामीत्यन्तो भक्षणे एवेति विभज्यैव विनियोगः । समाख्यया लिङ्गबाधासंभवादिति भावः ॥ २५ ॥

मन्द्राभिभूतिरित्यादेर्भक्षयामीत्यन्तस्यैकमन्त्रत्वम् । अधि० १० ।

गुणाभिधानान्मन्द्रादिरेकमन्त्रः स्यात्तयोरेकार्थसंयोगात् ॥ २६ ॥

तत्रैव मन्द्राभिभूतिः केतुर्यज्ञानां वाग् जुषाणा सोमस्य तृप्यत्विति अये वसुमद्गणस्यति भक्षयाम्यन्तः भक्षमन्त्रः । तत्र प्रथममन्त्रः भक्षणमन्त्रात् पृथक् सन् वाचः तृप्तिं प्रकाशयति उत भक्षणमन्त्रशेष इति संशये पूर्ववत्तृप्तिलिङ्गाद् भिन्नं वाक्यमिति बहिः पूर्वपक्षे सिद्धान्तमाह । गुणेति । मन्द्रादिः मन्द्रशब्दप्रथमो मन्त्रः भक्षयामीत्यन्तेन अग्रिमेण सहैकमन्त्रः एकं वाक्यं स्यात् । गुणस्य भक्षणफलस्य वाचः तृप्तेः तेनाभिधानात् । ननु द्वयोर्विभागे साकाङ्क्षत्वाभावात् कथमैक्यमत्राह, तयोः वाक्ययोः एकेन अर्थेन एकशाब्दबोधेन संयोगात् । अयं भावः । तृप्तेर्न विधिसंभवः । तस्याः पुरुषकृत्यसाध्यत्वात् स्वर्गवत् । किं तु भक्षणे कृते स्वाभाविकी सा । अतस्तस्या मन्त्रानपेक्षत्वाद् भक्षणेन किं भवतीत्याकाङ्क्षां संपाद्य भक्षयामि तृप्तिर्भवतु, प्राप्तकाले लोटं कृत्वा कथंचिदेकवाक्यता संपादनीयेति ॥ २६ ॥

इन्द्रपीतस्येत्यादिमन्त्राणां सर्वेषु भक्षणेषु ऊहेन विनियोगः । अधि० ११ ।

लिङ्गविशेषनिर्देशात्समानविधानेष्वनैन्द्राणाममन्त्रत्वम् ॥ २७ ॥

तत्रैवेन्द्रपीतस्येतिपदघटितभक्षमन्त्रस्य अनिन्द्रे मैत्रावरुणादिग्रहभक्षणे पाठोऽस्ति न वेति संशये पूर्वपक्षमाह । लिङ्गेति । समानविधाने प्रकृतिविकृतिभावशून्यस्थले अनैन्द्राणां मैत्रावरुणादिग्रहाणां भक्षणे

अमन्त्रत्वं मन्त्ररहितत्वम् । लिङ्गविशेषस्य इन्द्रपीतस्येति लिङ्गस्य निर्देशात् । अयं भावः । ऐन्द्रानैन्द्रग्रहाणामेकक्रतौ तुल्यतया पाठेन प्रकृतिविकृतिभावाभावेन अनैन्द्रभक्षे इन्द्रपीतस्येतिमन्त्रप्राप्त्यभावेन लिङ्गाभावादूहासंभवादमन्त्रभक्षणमिति ॥ २७ ॥

यथादैवतं वा तत्प्रकृतित्वं हि दर्शयति ॥ २८ ॥

पूर्वपक्षान्तरमाह । हि यतः तत्प्रकृतित्वम् ऐन्द्रप्रकृतित्वं सर्वग्रहाणां दर्शयति सोमग्रहणमन्त्रः । इन्द्राय त्वा वसुमते जुष्टं गृह्णामीति इन्द्रोद्देशेनैव सोमग्रहणं निखिलसोमधर्मा इन्द्रयागमुद्दिश्येति तस्यैव प्रकृतित्वमिति भावः । इत्थं चानैन्द्राणां विकृतित्वाद्यथादैवतं यद्दैवताको यागः तत्तद्देवताया ऊहेन तत्र तत्र भक्षमन्त्रपाठः ॥ २८ ॥

अभ्युन्नीतसोमभक्षणे इन्द्रस्याप्युपलक्षणम् । अधि० १२ ।

पुनरभ्युन्नीतेषु सर्वेषामुपलक्षणं द्विशेषत्वात् ॥ २९ ॥

एवमपर्यवसिते ऽधिकरणे अत्रैव विचारान्तरमारभ्यते । सवनसंबन्धिचमसगणेषु प्रथमं हूयमाना नव ग्रहाः सवनमुखीयाः । ते नवापि प्रथममिन्द्राय हूयन्ते । तत्रैव ये मैत्रावरुणब्राह्मणाच्छंसिनेष्टृपोत्राग्नीध्रीयचमसाः तेषु प्रथममिन्द्राय हुत्वा भक्षितेषु सशेषेष्वेव पुनर्द्रोणकलशादभ्युन्नीय मित्रावरुणादिदेवताभ्यो हुत्वा तत्र शेषभक्षणं क्रियते । तत्रोहपक्षे इन्द्रपीतस्य मित्रावरुणाभ्यां पीतस्येत्याद्युभयोरुच्चारणमुत केवलं मित्रावरुणाभ्यां पीतस्येत्यूह इति संशये सिद्धान्तेनोपक्रमते । पुनरिति । पुनरभ्युन्नीतेषु पूर्वदर्शितस्थलेषु सर्वेषाम् इन्द्रसहितमित्रावरुणादीनाम् उपलक्षणं भक्षमन्त्रे योजनं कर्तव्यम् । द्विशेषत्वात् । इन्द्रः प्रथमहवनोद्देश्यः तच्छेषवत्येव पात्रे पुनर्गृहीत्वा मित्रावरुणोद्देशेन हुतत्वादिन्द्रमित्रावरुणात्मकोभयपीतशेषत्वाद्भक्ष्यद्रव्यस्य ॥ २९ ॥

अपनयाद्वा पूर्वस्य अनुपलक्षणम् ॥ ३० ॥

पूर्वपक्षी स्वमतमाह । अपनयादिति । पूर्वस्य प्रथमं यदुद्देशेन होमः तस्येन्द्रस्य अनुपलक्षणं मन्त्रे योजनं न कर्तव्यम् । इन्द्रपीतशेषे

पुनः मैत्रावरुणाद्युद्देशेन गृहीते पूर्वसहिते पुनर्गृहीते मित्रावरुणादिदेवतान्तरसंबन्धे इन्द्रसंबन्धस्य अपनयाद्विच्छेदात् ॥ ३० ॥

अग्रहणाद्वा ऽनपायः स्यात् ॥ ३१ ॥

एतदुत्तरमाह । अग्रहणादिति । अनपायः मन्त्रे इन्द्रस्य विच्छेदो न । अग्रहणात् । द्रोणकलशान्मित्रावरुणाद्युद्देशेन गृहीतद्रव्यभिन्नत्वात्पूर्वशेषस्य । अयं भावः । पूर्वशेषे गृह्णातीत्येव विधिः । तथा च मित्रावरुणादिसंबन्धिसोमरसस्य पूर्वशेषेण संबन्धरूपः संस्कारो विधीयते । एतावन्मात्रेण इन्द्रसंबन्धापनयो न भविष्यति । तस्मात्सर्वेषामुपलक्षणम् ॥ ३१ ॥

पात्नीवतभक्षणे इन्द्रादीनामनुपलक्षणम् । अधि० १३ ।

पात्नीवते तु पूर्ववत्त्वात् ॥ ३२ ॥

प्रातःसवने ऐन्द्रवायवमैत्रावरुणाश्विनग्रहाः द्विदेवत्याः । तेषां होमशेषः वचनादादित्यस्थालीं प्राप्य पश्चात्तृतीयसवने आग्रयणस्थालीं प्राप्नोति पश्चादेवं परम्परया द्विदेवत्यशेषश्चाग्रयणस्थाल्यां स्थिते उपांशुपात्रेण पात्नीवतमाग्रयणाद्गृह्णातीति वचनेनाग्रयणस्थालीस्थद्विदेवत्यशेषसहिताग्रयणस्थालीस्थसोमरसस्य पात्नीवते ग्रहणं विहितम् । तत्र होमशेषभक्षणे भक्षणमन्त्रे द्विदेवत्यानाम् ऊहो ऽस्ति न वेति संशये पूर्वपक्षमाह । पात्नीवतइति । पत्नीवते पात्नीवतशेषभक्षणमन्त्रे द्विदेवत्या अप्यूह्याः पूर्ववत्त्वात् पूर्वं हुतद्विदेवत्यशेषवत्त्वात् पूर्वाधिकरणसिद्धान्तवत् ॥ ३२ ॥

ग्रहणाद्वा ऽपनीतः स्यात् ॥ ३३ ॥

सिद्धान्तमाह । ग्रहणादिति । ग्रहणात् पात्नीवतमाग्रयणाद्गृह्णातीति विधानात् । अपनीतः पूर्वदेवतासंबन्धविभेदवान् पत्नीवदर्थं गृहीतसोमः स्यात् । अयं भावः । पूर्वादाहृतस्थले ऐन्द्रे समाश्लेषयेदिति तत्संयोगमात्रविधिः इह तु पात्नीवतमाग्रयणाद्गृह्णातीत्यनेन आग्रयणाद्गृहीतद्रव्यसामान्ये पत्नीवद्देवतासंबन्धसिद्धौ द्विदेवत्यशेषे ऽपि पत्नी-

वत्संबन्धसिद्धौ द्विदेवत्यसंबन्धनिवृत्तिस्त्वर्थसिद्धा । अतो द्विदेवत्या मन्त्रे नोपलक्षणीया इति ॥ ३३ ॥

पात्नीवतशेषभक्षणे त्वष्टुरनुपलक्षणम् । अधि० १४ ।

त्वष्टारं तूपलक्षयेत्पानात् ॥ ३४ ॥

तत्रैव होमशेषभक्षे त्वष्ट्रा पीतस्येति ऊहो न वेति संशये पूर्वपक्षमाह । त्वष्टारमिति । पानात् पात्नीवतहोममन्त्रे *अग्नाइ पत्नीवः†सजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहेत्यत्र त्वष्ट्रा सह पानलिङ्गात् ॥ ३४ ॥

अतुल्यत्वात्तु नैवं स्यात् ॥ ३५ ॥

सिद्धान्तमाह । अतुल्यत्वादिति । मन्त्रलिङ्गकल्पितस्य तस्य त्वष्टुर्देवतात्वविधेः पात्नीवतमाग्रयणाद्गृह्णातीति पत्नीवतः देवतात्वबोधकश्रुतेश्चातुल्यत्वात्तुल्यबलत्वाभावात् । एवमुक्तरीत्या ऊहः न स्यात् । त्वष्टुः साहित्यं समीपवृत्तित्वमात्रं‡ लिङ्गेन बोध्यतइति भावः ॥ ३५ ॥

पात्नीवतशेषभक्षणे त्रिंशतोऽनुपलक्षणम् । अधि० । १५ ।

त्रिंशच्च परार्थत्वात् ॥ ३६ ॥

तत्रैव पात्नीवतयागे, एभिरग्ने रथं याह्यर्वाङ् नानारथं वा विभवो ह्यश्वाः, पत्नीवतः त्रिंशतं त्रींश्च देवाननुष्वध मादयस्वेति याज्या । अस्या अर्थः । हे अग्ने एभिरुत्तरार्धे वक्ष्यमाणैर्देवैः सह रथं रथान् वाऽऽरुह्य याहि, ततः पत्नीवतः त्रिंशतं त्रीन् त्रयस्त्रिंशद्देवान् पत्नीवन्तं

* एचोऽप्रगृह्यस्यादूराद्धूते पूर्वार्धस्यादुत्तरस्येदुतौ इति सूत्रस्थेन आमन्त्रिते छन्दसि प्लुतविकारोऽयं वक्तव्य इति वार्तिकेन एकारपूर्वभागस्य आकारः प्लुतः उत्तरभागस्य इकारः । अग्ने इत्यर्थः ।

† पत्नीवच्छब्दस्य संबुद्धौ मतुवसो रु संबुद्धौ छन्दसीति सूत्रेण रुः ।

‡ सहैव दशभिः पुत्रैर्भारं वहति गर्दभीत्यत्र सहभावे ऽपि वोढृत्वादर्शनात्लक्षते ऽपि त्वष्टुः पातृत्वं नास्तीति कल्प्यते । किं च सत्यपि पातृत्वे देवतात्वं तस्य न संभवति । पात्नीवतमाग्रयणाद्गृह्णातीति विधौ तद्धितेन निरपेक्षस्य त्वष्टुः देवतात्वप्रतीत्या मन्त्रलिङ्गेन कल्पितदेवताया बाधविकल्पसमुच्चयानामशक्यकल्पनत्वात् । देवताया विग्रहवत्त्वस्य देवताधिकरणे निरसिष्यमाणत्वेन तस्याः पातृत्वाभावेन तेन देवतात्वस्य कल्पयितुमशक्यत्वाच्चेति ज्ञेयम् ।

च सोमरसेन मादयेति । अत्र मादनस्य पानं विना ऽसंभवात्तेषां पानं सिद्धम् । अतः मन्त्रे ते ऽप्युपलक्षणीया इति बहिः पूर्वपक्षे सिद्धान्तमाह । त्रिंशदिति । त्रिंशत् त्रयस्त्रिंशच्च नोपलक्ष्याः परार्थत्वात् मन्त्रस्य उत्पत्तिविध्यधीनत्वात् । तत्रोक्तत्रयस्त्रिंशदश्रवणादिति भावः । पत्नीवदुद्देशेन द्रव्ये दत्ते तेन स्वभागमध्ये अन्येभ्यो ऽपि दत्त इति स्तुतिसंभवात्तया लिङ्गं नेयम् ॥ ३६ ॥

भक्षणे ऽनुवषट्कारदेवताया अनुपलक्षणम् । अधि० १६ ।

वषट्कारश्च कर्तृवत् ॥ ३७ ॥

सोमयागे सर्वत्र सोमस्याग्ने वीहीत्यनुवषट्कृते जुहोतीति । नात्र पूर्ववत्परार्थत्वमतः अग्निना पीतत्वात्सो ऽपि भक्षमन्त्रे उपलक्षणीय इति बहिः पूर्वपक्षे सिद्धान्तमाह । वषडिति । वषट्कारः अनुवषट्कारदेवता ऽग्निः नोपलक्षणीयः मन्त्रे कर्तृवत् । यथा प्रकृतिभूते इन्द्रयागे प्रथमं होत्रा पीतस्य पश्चादध्वर्युपानार्थं पठिते ऽस्मिन् मन्त्रे होतृपीतस्येति न पठितं तथा ऽनुवषट्कारदेवतापाठो ऽपि नास्ति । अयं भावः । प्रकृतावैन्द्रग्रहवेलायामिन्द्रोद्देशेनैव गृहीतो नाग्न्युद्देशेन न वा होत्रुद्देशेन । अतः मन्त्रे केवलमिन्द्रपीतस्येत्येव पाठः । तथैव विकृतावपीति ॥ ३७ ॥

अनैन्द्राणाममन्त्रकभक्षणम् । अधि० १७ ।

छन्दोनिषेधस्तु सर्वगामित्वात् ॥ ३८ ॥

प्रथमपूर्वपक्षी द्वितीयपूर्वपक्षं दूषयति । छन्द इति । सूत्रे प्रकृतिविकृतिभावो नेति पूरणीयम् । सोमधर्माणामभिषवादीनां सर्वगामित्वात् । सर्वयागोद्देशेन समानविधानात् । ननु तृतीयसवने षोडशिग्रहे तृतीयस्य सवनस्य जगतीच्छन्दस इति मन्त्रे अनुष्टुप्छन्दस इति मन्त्रं सचमतीति सचमति ऊहं कुर्यादित्यूहविधानं प्रकृतिविकृतिभावे लिङ्गमित्यत्राह । छन्दोनिषेधस्तु जगतीच्छन्दोनिषेधस्तु वाचनिकः तावन्मात्रपर इति भावः । तस्मादनैन्द्रेषु विकृतित्वाभावाद् ऊहासंभवेन अमन्त्रभक्षणम् ॥ ३८ ॥

ऐन्द्राग्नभक्षस्यामन्त्रकत्वम् । अधि· १८ ।

ऐन्द्राग्ने तु लिङ्गभावात्स्यात् ॥ ३९ ॥

एवं स्थिते ऐन्द्राग्नमृतुपात्रेण गृह्णातीति स्थितम् ऐन्द्राग्नशेषभक्षणममन्त्रं समन्त्रं वेति संशये पूर्वपक्षमाह । ऐन्द्रेति । ऐन्द्राग्ने तच्छेषभक्षणे इन्द्ररूपलिङ्गस्य भावात् सत्त्वात् समन्त्रं स्यात् * ॥ ३९ ॥

एकस्मिन्वा देवतान्तराद्विभागवत् ॥ ४० ॥

सिद्धान्तमाह । एकस्मिन्निति । एकस्मिन् एकदेवताकहविःशेषभक्षणे मन्त्रः ऐन्द्राग्नस्य देवतान्तराद् एकदेवतातो विलक्षणत्वात् । विभागवत् । आग्नेयं चतुर्धा करोतीतिवत † ॥ ४० ॥

गायत्रच्छन्दस इत्यादिमन्त्राणामनेकच्छन्दस्के विनियोगः । अधि· १९ ।

छन्दश्च देवतावत् ॥ ४१ ॥

तस्मिन्नेव भक्षमन्त्रे गायत्रच्छन्दस इति लिङ्गाद् यत्र स्तोत्रशस्त्रादौ गायत्रीच्छन्दस्कैव ऋक् तत्रैवायं मन्त्रः । यथा केवलेन्द्रशेषएवायं मन्त्रः न देवतान्तरसहिते तद्वदित्यभिप्रायवतः पूर्वपक्षे सूत्रमाह । छन्दश्चेति । छन्दश्च गायत्रादिच्छन्दः केवलं यत्र तत्रैव भक्षमन्त्रः पूर्वाधिकरणसिद्धदेवतावत् ॥ ४१ ॥

सर्वेषु वा अभावादेकच्छन्दसः ॥ ४२ ॥

सिद्धान्तमाह । सर्वेष्विति । सर्वेषु नानाच्छन्दस्केषु सर्वेषु क्रतुषु भक्षमन्त्रः स्यात् । केवलेन्द्रयागप्रसिद्धिवत्केवलगायत्रच्छन्दस्कयागस्याभावात् । तथा च मन्त्रस्य कुत्रापि विनियोगो न स्यादिति भावः ॥ ४२ ॥

एकादशाधिकरणोक्तस्योपसंहारः ।

सर्वेषां त्वेकमन्त्रत्वमैतिशायनस्य भक्तिपानत्वात् ॥ ४३ ॥

द्वितीयपूर्वपक्षस्य पूर्वमेव दूषितत्वात् प्रथमपूर्वपक्षं दूषयन् इन्द्र-

---

* इन्द्राग्निभ्यां पीतो ऽपि इन्द्रपीत इति व्यपदेष्टुं शक्यते, यथा डित्थडवित्थयोर्माता डित्थमातेति । तथा चोहाभावे ऽपि समन्त्रकं भक्षणम् इति भावः ।

† देवतायाः पानाभावेन पाधातोर्दाने लाक्षणिकत्वेन समुदायपर्याप्तोद्देश्यताकदानस्यान्यतरेण व्यपदेशानर्हत्वाच्चतुर्धाकरणवदैन्द्राग्नादिष्वमन्त्रकं भक्षणमिति भावः।

पीताधिकरणसिद्धान्तमाह । सर्वेषामिति । सर्वेषामैन्द्राणामनैन्द्राणां च एकमन्त्रत्वम् एकरूपे युक्तमन्त्रत्वम् अविकृतमिति यावत् । भक्तिपानत्वात् । भक्तिः लक्षणारूपा वृत्तिः पाने पिबतिधातौ यस्मिन्वाक्ये तत्त्वात् । अयं भावः इन्द्रपीतस्येति सोमविशेषणं सवनविशेषणं वा । सोमविशेषणत्वे तृतीयातत्पुरुषः सवनविशेषणत्वे इन्द्रेण पीतं यस्मिन् सवनइति बहुव्रीहिः । यद्यपि बहुव्रीहौ उभयपदलक्षणापत्त्या तत्पुरुषाज्जघन्यतया तत्पुरुषसमासमाश्रित्य सोमविशेषणत्वमेवोचितम् । तथा ऽपि प्रकृते इन्द्रस्य पानकर्तृत्वस्य नवमे निरस्यमानत्वात् पाधातोरगत्या त्यागार्थे लक्षणा इन्द्रपदस्येन्द्रोद्देश्यके लक्षणा इन्द्रोद्देश्यकत्यागकर्मीभूतः सोम इति वाच्यम् । तथा च तत्पुरुषे ऽपि लक्षणायाम् उभयत्र तुल्यत्वाद् गायत्रच्छन्दस इत्यस्य सवनविशेषणत्वात् तत्समीपवर्त्तिन इन्द्रपीतस्येत्यस्यापि सवनविशेषणत्वमुचितमिति * ॥ ४३ ॥

इति तृतीयस्याध्यायस्य द्वितीयः पादः ॥

उच्चैस्त्वादीनां वेदधर्मत्वम् । अधि· १ ।

श्रुतेर्जाताधिकारः स्यात् ॥ १ ॥

ज्योतिष्टोमे श्रूयते, उच्चैः ऋचा क्रियते उचैस्साम्ना उपांशु यजुषेति । उच्चैस्त्वादिधर्माः ऋगादिजातिमधिकृत्य प्रवृत्ताः किं वा ऋग्वेदादीन् अधिकृत्य प्रवृत्ता इति संशये पूर्वपक्षमाह । श्रुतेरिति । जाते ऋक्त्वादिजातौ अधिकारः स्यात् । उच्चैस्त्वादिधर्माः ऋक्त्वादिजात्यवच्छिन्ना इत्यर्थः । ऋचेति श्रुतेः । ऋगादिशब्दानाम् ऋक्त्वादिजातौ शक्तत्वादिति भावः ॥ १ ॥

वेदो वा प्रायदर्शनात् ॥ २ ॥

सिद्धान्तमाह । वेद इति । वेदः उक्तविध्युद्देशः मन्त्रब्राह्मणसमुदायरूपवेदधर्मः ऋग्वेदेन यद्विहितं तत्सर्वमुच्चैरित्यर्थः । प्राये वाक्यो-

* तत्पुरुषे समासान्तोदात्तत्वापत्त्या श्रूयमाणस्य आद्युदात्तस्वरस्यासिद्धिप्रसङ्गः । बहुव्रीहौ तु इन्द्रशब्दस्याद्युदात्तत्वाद् बहुव्रीहौ प्रकृत्या पूर्वपदमिति पूर्वपदप्रकृतिस्वरे निरुक्तस्वरसिद्धिः । अतो ऽपि बहुव्रीहिसमास इति निर्णेतुं शक्यतइति बोध्यम् ।

पक्रमे वेदशब्ददर्शनात् । प्रजापतिरकामयत प्रजाः सृजेयेति स तपो ऽतप्यत तस्मात्तेपानात्त्रयो देवा असृज्यन्ताग्निर्वायुरादित्यस्ते तपो ऽतप्यन्त तेभ्यस्तेपानेभ्यः* त्रयो वेदा असृज्यन्ताग्नेर्ऋग्वेदः वायोर्यजुर्वेदः आदित्यात्सामवेद इति उपक्रम्य तस्मादुच्चैर्ऋचा क्रियतइत्युपसंहारादसंजातविरोधित्वेन प्रबलत्वेन उपक्रमानुसारेण उपसंहारनयनमिति भावः ॥ २ ॥

लिङ्गाच्च ॥ ३ ॥

ऋक्पदेन वेदबोधो ऽपि अन्यत्र दृश्यतइत्याह । लिङ्गादिति । ऋग्भिः पूर्वाह्णे दिवि देव ईयते यजुर्वेदेन तिष्ठति मध्ये अह्नः । सामवेदेनास्तमये महीयते वेदैरशून्यस्त्रिभिरेति सूर्य इत्यत्र प्रथमचरणे ऋग्भिरित्यत्र ऋग्वेदे ऋग्व्यवहार इत्यत्र चतुर्थचरणे वेदैरिति बहुवचनं लिङ्गम् । अन्यथा वेदाभ्यामित्येव वदेत् ॥ ३ ॥

धर्मोपदेशाच्च न हि द्रव्येण संबन्धः ॥ ४ ॥

इतश्च वेदधर्म इत्याह । धर्मेति । उच्चैः साम्नेति साम्नः पृथग् धर्मोपदेशात् । ऋच्यध्यूढं साम गायतीति ऋच्येव गेयत्वाद् उच्चैस्त्वसिद्धेः पुनर्विधानं व्यर्थं स्यादिति भावः । उक्तार्थमेवाह । न हीति । द्रव्येण साम्ना संबन्धः वक्तव्यो न हि ॥ ४ ॥

त्रयीविद्याख्या च तद्विदि ॥ ५ ॥

हेत्वन्तरमाह । त्रयीति । त्रयी विद्या यस्य स त्रयीविद्यः । त्रयीति ऋक्सामयजुःषु प्रसिद्धः तथा ऽपि त्रयीत्यनेन न ऋक्सामयजुषो गृह्यन्ते किं तु त्रयीपदस्य वेदत्रये लक्षणां कल्पयित्वा तद्विदि त्रयीविद्य इत्याख्या भवति तथा प्रकृते ऽपि उपसंहारवाक्ये लक्षणया एकवाक्यत्वसंपादनमिति भावः ॥ ५ ॥

व्यतिक्रमे यथाश्रुतीति चेत् ॥ ६ ॥

ननु एकमेव कर्म ऋग्वेदे यजुर्वेदे च विहितं तदङ्गमन्त्रे वेदध-

* कानजन्तमेतत् ।

र्मपचे उच्चैस्त्वोपांशुत्वयोरेकत्र प्राप्तौ विकल्पापत्तिः । मन्मते यदि ऋङ्मन्त्रः तर्हि उच्चैस्त्वम् । यदि यजुः तर्हि उपांशुत्वमित्यविकल्प इत्यभिप्रायेण शङ्कते । व्यतीति । व्यतिक्रमे ऋचां यजुर्वेदे यजुषाम् ऋग्वेदे पाठे ऽपि यथाश्रुति ऋचि उच्चैस्त्वं यजुःषु उपांशुत्वं यथाश्रुतं तथैव पाठः । ऋक्त्वादिधर्मानपायात् ॥ ६ ॥

न सर्वस्मिन्निवेशात् ॥ ७ ॥

आशङ्कां परिहरति । नेति । सर्वस्मिन् यजुर्वेदत्वावच्छिन्ने उपांशुत्वनिवेशात् । एवमितरत्र । अयं भावः । याजुर्वेदिकायामृच्यपि उपांशुत्वं वेदधर्मत्वात् । वेदद्वये कर्मविधाने ऽपि भूयस्त्वेन स्वरनिर्णय इति व्यवहिताग्रिमाधिकरणे वक्ष्यमाणत्वान्न विकल्पावकाश इति ॥ ७ ॥

संयोगान्न प्रकरणेन बाध्यते ॥ ८ ॥

ननूपांशुत्वस्य यदि यजुर्वेदत्वमुद्देश्यतावच्छेदकं तर्हि तावद्वर्णसमुदायपर्याप्तत्वाद्वेदत्वस्य निखिलक्रतुषु उपांशुत्वं स्यात् । इत्थं च ज्योतिष्टोमसंनिधौ पाठात्प्रकरणबाधः । यजुर्धर्मत्वे यजुष्ट्वस्य प्रत्येकं विश्रान्तत्वादाग्नेय्या ऽऽग्नीध्रमितिवत्प्रकृतयजुषां ग्रहणसम्भव इत्यत्राह । वेदेति । तत्तद्वेदविहितक्रियात्वावच्छेदेन तत्तत्स्वरसंबन्धः प्राप्स्यमानः प्रकरणेन बाध्यतइति न, किं तु प्रकरणमेव बाधितं भवति वाक्येन । वेदसंयोगाद् उपक्रमे वेदसंबन्धात् । तथा चोक्ताशङ्कायामिष्टापत्तिरेवेति भावः ॥ ८ ॥

आधाने गानस्योपांशुत्वम् । अधि २ ।

गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः ॥ ९ ॥

यजुर्वेदे वसन्ते ब्राह्मणो ऽग्निमादधीतेति आधानं विहितं तत्रैव रथन्तरमभिगायते गार्हपत्यआधीयमानइति साम्नामङ्गत्वं श्रूयते । आधानाङ्गत्वेन पठ्यमानसाम्नि उच्चैस्त्वमुतोपांशुत्वमिति संशये सामवेदत्वावच्छिन्ने उच्चैस्त्वत्य क्लृप्तत्वादुक्तसाम्नां सामवेदपठितत्वादुच्चैस्त्वमिति बहिः पूर्वपचे सिद्धान्तमाह । गुणेति । गुणः अङ्गभूतं साम मुख्यं प्रधानमाधानं तयोर्धर्मयोः उच्चैस्त्वोपांशुत्वयोः व्यतिक्रमे विरोधे

वेदेन संबन्धः प्रतिपाद्यत्वरूपो यत्र सः। मुख्येन मुख्यानुसारेण नेयः। तदर्थत्वाद् अङ्गानां प्रधानार्थत्वात् ॥ ९ ॥

ज्योतिष्टोमस्य याजुर्वेदिकत्वम्। अधि॰ ३।

भूयस्त्वेनोभयश्रुति ॥ १० ॥

ज्योतिष्टोमेन स्वर्गकामो यजेतेति यजुर्वेदे सामवेदे च श्रूयते। अत्र वेदद्वये प्रधानविधेः तुल्यत्वाद् द्वयोस्स्वरयोः विकल्प इति बहिः पूर्वपक्षे सिद्धान्तमाह। भूय इति। उभयत्र वेदद्वये श्रुतिर्यस्य कर्मणः तद् भूयस्त्वेन अङ्गभूयस्त्वेन प्रधानविधिरिति निर्णयम्। यथा सचिवो ऽल्पपरिवारेणैकत्र तिष्ठति, राजा ऽधिकपरिवारेण, तादृशे परिवाराधिक्येनायं राजेति निर्णयो भवति, तथा ऽत्रापीति भावः ॥ १० ॥

प्रकरणस्य विनियोजकत्वम्। अधि॰ ४।

असंयुक्तं प्रकरणादितिकर्तव्यतार्थत्वात् ॥ ११ ॥

किमेतानि श्रुत्यादीनि त्रीण्येव विनियोजकानि उत अन्यान्यपि सन्तीति प्रश्ने आह। असंयुक्तमिति। श्रुत्यादित्रिभिरसंयुक्तं प्रकरणादुभयाकाङ्क्षारूपाद् विनियुज्यते। यथा दर्शपूर्णमाससन्निधौ समिधो यजति तनूनपातं यजतीत्यादिवाक्यानि फलरहितानि फलमाकाङ्क्षन्ति। दर्शपूर्णमासाभ्यामिति श्रुतकरणीभूतो यागः स्वव्यापारमाकाङ्क्षति। आकाङ्क्षाद्वयेन प्रयाजादिव्यापारसहितेन दर्शपूर्णमासरूपयागद्वयेन स्वर्गमुत्पादयेदिति वाक्यैकवाक्यतां कल्पयित्वा ऽङ्गाङ्गिभावः सिध्यति *। उक्तार्थएव हेतुमाह। इतिकर्तव्यतार्थत्वात्। प्रधानस्येतिकर्तव्यताकाङ्क्षासत्त्वात्। अयमङ्गानां फलाकाङ्क्षासत्त्वाच्चेत्यस्योपलक्षकः ॥ ११ ॥

स्थानस्य विनियोजकत्वम्। अधि॰ ५।

क्रमश्च देशसाम्यात् ॥ १२ ॥

दर्शपूर्णमासे याजमानकाण्डे अनुमन्त्रणमन्त्रमध्ये द्वितीयस्थाने †दब्धिरस्यदब्धो भूयासमिति मन्त्रः पठितः। अस्य विनियोजकं प्रमाणं

* तदुक्तं भट्टपादैः। "स्वार्थबोधसमाप्तानामङ्गाङ्गित्वव्यपेक्षया। वाक्यानामेकवाक्यत्वं पुनः संहत्य जायत"इति।

† दब्धिर्घातुकमायुधमिति माधवः।

न पश्याम इति बहिराक्षेपे सिद्धान्तमाह । क्रम इति । क्रमः स्थानं मन्त्रस्य विनियोजकम् । देशसाम्यात् । स्थानैक्यात् । प्रथमः अग्नियागः द्वितीय उपांशुयागः । मन्त्रेष्वपि प्रथमः अग्नेरहं देवयेति द्वितीयो दब्धिरसीति द्वितीयस्यानैक्यम् । प्रकरणपठितस्य मन्त्रस्य विनियोगाकाङ्क्षासत्त्वात्तया ऽऽकाङ्क्षया अनेन मन्त्रेण उपांशुयागापूर्वमनुमन्त्रणद्वारा भावयेदिति वाक्यं कल्पयित्वा विनियोगः सिध्यतीति भावः * ॥ १२ ॥

समाख्याया विनियोजकत्वम् । अधि० ६ ।

समाख्या चैवं तदर्थत्वात् ॥ १३ ॥

समाख्या च एवं विनियोजिका । तस्यास्तदर्थत्वात् । तत् क्रियाकर्तृसंबन्धकल्पनम् अर्थः यस्याः तत्त्वात् । यथा ऽऽध्वर्यवमिति समाख्या, अध्वर्युकर्तृकक्रियाप्रतिपादकमाध्वर्यवमिति तत्प्रतिपाद्यक्रियायामध्वर्युकर्तृकत्वं ज्ञापयति । अतः सा ऽपि विनियोजिका ॥ १३ ॥

श्रुत्यादीनां पूर्वपूर्वबलीयस्त्वम् । अधि० ७ ।

श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात् ॥ १४ ॥

एवं षट् प्रमाणानि विनियोजकानि निरूप्य तेषां मध्ये द्वयोर्विरुद्धयोस्सन्निपाते उत्तरोत्तरं दुर्बलमिति दर्शयति । श्रुतीति । षण्णां मध्ये द्वयोर्विरुद्धयोः समवाये एकत्र सन्निपाते पारदौर्बल्यमुत्तरोत्तरं पूर्वपूर्वाद् दुर्बलं पूर्वेणोत्तरस्य बाधः । अर्थविप्रकर्षाद् उत्तरप्रमाणस्य पूर्वप्रमाणकल्पकत्वादर्थस्य विनियोगस्य † विप्रकर्षाद्विलम्बात् । यथा ऐन्द्र्या गार्हपत्यमुपतिष्ठत इत्यत्र इन्द्रलिङ्गेन इन्द्रोपस्थाने गार्हपत्यमिति द्वती-

---

* स्थानं द्विविधम् । पाठकृतमर्थकृतं च । पाठकृतमपि द्विविधम् । यथासंख्यपाठः सन्निधिपाठश्च । यथासंख्यपाठस्योदाहरणं दब्धिमन्त्रः । शुन्धध्वं दैव्याय कर्मणे इत्ययं मन्त्रः शोधनीयेषु वस्तुषु साधारणो भासते । तत्र साचाय्यपात्राणि कुम्भीशाखापवित्रादीन्यनन्तरेषु मातरिश्वन इत्यादिमन्त्रेष्ववभासन्ते इति सन्निधिना तत्पात्रप्रोक्षणे शुन्धध्वमिति मन्त्रो विनियुज्यते । अनुष्ठानसादेश्यात् पशुधर्माणामग्नीषोमीयाङ्गत्वम् । तदेवं क्रमस्य त्रैविध्यं द्रष्टव्यमिति माधवः ।

† अङ्गाङ्गित्वनिर्णयस्येति यावदित्यधिकः पाठः गो० दा० पु० ।

याश्रुत्या गार्हपत्योपस्थाने एवमुभयत्र द्वाभ्यां प्रमाणाभ्यां मन्त्रस्य विनियोगे प्राप्ते, मन्त्रे इन्द्रलिङ्गेन अनेनेन्द्रमुपतिष्ठेतेति श्रुतिं कल्पयित्वे-न्द्रोपस्थानाङ्गत्वं वाच्यम्। ततः पूर्वमेव गार्हपत्यमिति प्रत्यक्षश्रुत्या झटिति गार्हपत्योपस्थाने विनियुज्यतइति लिङ्गात्प्रबला। अवशिष्टानामपि सरणिरेवम् ऊह्या *। विस्तरभयान्न लिख्यते ॥ १४ ॥

द्वादशोपसत्ताया अहीनाङ्गत्वम्। अधि० ८।

अहीनो वा प्रकरणाद्गौणः ॥ १५ ॥

ज्योतिष्टोमे श्रुतम्। तिस्र एव साह्नस्य उपसदो द्वादशाहीनस्येति। अत्राहीनशब्दो योगरूढ्या ऽर्थस्मारकः उत केवलयोगेनेति संशये पूर्वपक्षमाह। अहीन इति। अहीनः वाक्यघटकतच्छब्दः गौणः केवलयौगिकः न हीनः अहीनः इति व्युत्पत्त्या सर्वक्रतुश्रेष्ठ इत्यर्थको ज्योतिष्टोमएव। प्रकरणात्। ज्योतिष्टोमप्रकरणात्। अहर्गणसाध्यक्रतुपरत्वे प्रकरणबाधात्। उक्तार्थतामादृत्य ज्योतिष्टोमएवोपसत्सु त्रित्वद्वादशत्वयोः विकल्पेन प्रयोगभेदेन समावेश इति भावः ॥ १५ ॥

---

* सा चेत्थम्। स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि। तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इत्यत्र समभिव्याहाररूपाद्वाक्यात्पूर्वोत्तरार्धयोरेकवाक्यत्वे सदनकरणस्थापनयोरुभयत्रायं कृत्स्नो मन्त्रो विनियोक्तव्य इति पूर्वपक्षः। शक्तिमकल्पयित्वा वाक्येन विनियोगासंभवाद् यावद् वाक्यं शक्तिं कल्पयित्वा श्रुतिं कल्पयति तावल्लिङ्गं श्रुतिं कल्पयित्वा विनियोजकं भवतीति वाक्यस्य शक्तिकल्पनाव्यवधानेन विप्रकर्षात्सन्निकृष्टेन लिङ्गेन सदनस्थापनयोः पूर्वोत्तरार्धयोर्विभज्यैव विनियोग इति सिद्धान्तः॥ एवं वाक्यप्रकरणयोर्विरोधे प्रकरणस्य वाक्यकल्पनाधिक्येन विप्रकर्षात्सन्निकृष्टेन वाक्येन विनियोगः। तथा च अग्नीषोमाविदं हविरजुषेतामवीवृधेतां महो ज्यायो ऽक्रातामित्यत्र अग्नीषोमावित्यस्य पूर्वपादोक्तरीत्या लिङ्गात्पौर्णमास्यङ्गत्वे सिद्धे इदं हविरित्यादेरपि तदङ्गत्वं, न तु दर्शपूर्णमाससाधारणात्प्रकरणाद्दर्शाङ्गत्वमपीति ज्ञेयम्। एवमिन्द्राग्नी इदं हविरजुषेतामित्यादावपि द्रष्टव्यम्॥ प्रकरणस्थानयोर्विरोधे उदाहरणम् अभिषेचनीयाख्यराजसूयान्तर्गतसोमयागसन्निधौ पठिताः, अक्षैर्दीव्यति, राजन्यं जिनाति, शौनः शेपमाख्यापयतीत्यादिविहिता विदेवनादयः। तेषां सन्निधिपाठादभिषेचनीयाङ्गत्वे प्राप्ते प्रकरणाद्राजसूयाङ्गत्वम्। स्थानस्य प्रकरणकल्पनाधिक्येन विनियोजकत्वे प्रकरणापेक्षया विप्रकृष्टत्वात्। अतस्तदन्तर्गतसर्वयागाङ्गत्वं विदेवनादीनाम्॥ शुन्धध्वं दैव्याय कर्मणे इत्ययं मन्त्रः पौरोडाशिकमिति समाख्यया पुरोडाशकाण्डोक्तानामुलूखलादीनां शोधने न विनियुज्यते। किं तु स्थानात्सान्नाय्यपात्रशोधने एव। पूर्वोक्तरीत्या समाख्यापेक्षया स्थानस्य सन्निकृष्टत्वादित्यन्यत्र विस्तरः॥

असंयोगात्तु मुख्यस्य तस्मादपकृष्येत ॥ १६ ॥

सिद्धान्तमाह । असंयोगादिति । मुख्यस्य रूढ्यर्थस्य अहःसमूहसाध्यक्रतुत्वस्य ज्योतिष्टोमे असंयोगाद् बाधात् । तस्माज् ज्योतिष्टोमप्रकरणादपकृष्येत विच्छिद्येत । अहः खः क्रतौ, अहर्गणसाध्ये क्रतौ वाच्ये खप्रत्ययः स्यादिति खप्रत्ययान्तस्य उक्तार्थे शक्तिप्रतिपादनात् तद्बाधादुत्कर्ष इति भावः ॥ १६ ॥

कुलायादौ प्रतिपदोरुत्कर्षः । अधि० ६ ।

द्वित्वबहुत्वयुक्तं वा ऽचोदनात्तस्य ॥ १७ ॥

ज्योतिष्टोमे श्रूयते, युवं हि स्थः स्वर्पती इति द्वयोः प्रतिपदं कुर्यादेते असृग्रमिन्दव इति बहुभ्यो यजमानेभ्यः प्रतिपदं कुर्यादिति । युवं युवां स्वर्पती स्वर्गाधिपती स्थ इति प्रथममन्त्रार्थः । एते यजमानाः स्वर्गस्रवः चन्द्रतुल्या इत्यपरार्थः । युवमितिद्विवचनान्तघटितो मन्त्रः यजमानद्वयकर्तृकप्रयोगे स्तोत्रशस्त्रादौ प्रथमं पठेदिति वाक्यार्थः । तथैवापरो वाक्यार्थः । इमौ प्रकरणे निविशेते किं वा विच्छिद्येते इति संशये सिद्धान्तेनोपक्रमते । द्वित्वेति । द्वित्वबहुत्वयुक्तं द्विवचनबहुवचनयुक्तं मन्त्रद्वयम् । तस्मादपकृष्यतइति पूर्वसूत्रस्थमनुषज्यते । ज्योतिष्टोमाद्विच्छिद्य, एतेन राजपुरोहितौ सायुज्यकामौ यजेयातामिति विहितद्विकर्तृके सत्रे बहुकर्तृके च निविशतइत्यर्थः । ज्योतिष्टोमे तस्य द्विकर्तृकत्वस्य बहुकर्तृकत्वस्य च अचोदनादविधानात् ॥ १७ ॥

पक्षेणार्थकृतस्येति चेत् ॥ १८ ॥

पूर्वपक्षमाह । पक्षेणेति । पक्षेण असामर्थ्येन हेतुना अर्थकृतस्य आर्थिकयजमानद्वयस्य संभव इति शेषः । ज्योतिष्टोमस्यावश्यकर्तव्यत्वाद् एकस्य असामर्थ्येन अर्थादेव यजमानद्वयं त्रयं वा सिध्यतीति तत्र मन्त्रद्वयं निविशतामिति भावः ॥ १८ ॥

न प्रकृतेरेकसंयोगात् ॥ १९ ॥

ज्योतिष्टोमेन स्वर्गकामो यजेतेत्याख्यातैकवचनेनैकत्वस्य विहितत्वादित्यभिप्रायेण दूषयति । नेति । प्रकृतेः ज्योतिष्टोमस्य एकेन एककर्त्रा

संयोगात् परिच्छेदात् । विहितैकत्वस्यार्थिकद्वित्वेन न बाध इति भावः ॥ १९ ॥

जाघन्याः प्रकरणादनुत्कर्षः । अधि॰ १० ।

जाघनी चैकदेशत्वात् ॥ २० ॥

जाघन्या पत्नीः* संयाजयन्तीति दर्शपूर्णमासयोः श्रुतम् । जाघनी पशुपुच्छम् । अस्य प्रकृतिभूतदर्शपूर्णमासयोर्निवेश उताग्नीषोमीयपशाविति संशये पूर्वपक्षमाह । जाघनीति । जाघनी जाघनीविधिः पशावपकृष्येत । एकदेशत्वात् । पश्ववयवत्वात् । अयं भावः । यथोत्तरार्धात्स्विष्टकृते ऽवद्यतीत्यत्र उत्तरार्धस्य अवयवस्य अवयविसापेक्षत्वेन प्रकृताग्नेयादिपुरोडाशा गृहीतास्तथा जाघन्याः पशुरूपावयविसापेक्षत्वाद् दर्शपूर्णमासे पशोरभावाद् उत्तरत्रोत्कर्ष इति ॥ २० ॥

चोदना वा अपूर्वत्वात् ॥ २१ ॥

सिद्धान्तमाह । चोदनेति । चोदना जाघन्याः पत्नीसंयाजाङ्गत्वेन चोदना, विधिरयम् । अपूर्वत्वात् । अप्राप्तत्वात् ॥ २१ ॥

एकदेश इति चेत् ॥ २२ ॥

नन्ववयवः अवयविनं विना न सम्भवतीति तमवश्यमाक्षिपेदिति शङ्कते । एकेति । एकदेशः अवयवः अवयविसापेक्ष इति पूरणीयम् ॥ २२ ॥

न प्रकृतेरशास्त्रनिष्पत्तेः ॥ २३ ॥

परिहरति । नेति । नावयव्यपेक्षा । प्रकृतेर्दर्शपूर्णमासस्य तत्संबन्धिजाघन्याः अशास्त्रनिष्पत्तेः असंस्कृतस्यापि क्रयादिना तावन्मात्रस्य निष्पत्तेः । अयं भावः । उत्तरार्धात्स्विष्टकृते इत्यत्र उत्तरार्धशब्दः कस्येत्यवयविनं नित्यमाकाङ्क्षति । तथा न जाघनीशब्दश्रवणानन्तरं कस्येत्याकाङ्क्षा ऽस्ति । तस्य पशुपुच्छे रूढत्वादिति ॥ २३ ॥

* पत्नीशब्दो ऽत्र आहुतिचतुष्टयात्मकस्य कर्मणो नामधेयैकदेशः । अत एव श्रूयते, पञ्च प्रयाजा इज्यन्ते, चत्वारः पत्नीसंयाजा इति । तत्र तृतीयाहुतौ देवपत्नीनां देवतात्वात्तद्द्वारा कर्मनाम्नः पत्नीसंयाजशब्दस्य प्रवृत्तिरिति माधवीये जै॰ न्या॰ वि॰ ।

संतर्दनस्य संस्थानिवेशः । अधि॰ ११ ।

संतर्दनं प्रकृतौ क्रयणवदनर्थलोपात्स्यात् ॥ २४ ॥

ज्योतिष्टोमे अभिषवणफलके प्रकृत्य श्रूयते, न संतृणत्त्यसंतृण्णे हि हनू अथो खलु दीर्घसोमे संतृद्याद्धृत्याइति । न संतृणत्ति फलकयोर्मेलनं न कुर्यादित्यर्थः । दीर्घसोमे इति वाक्यस्य प्रकरणे निवेश उतान्यत्रेति संशये पूर्वपक्षमाह । समिति । संतर्दनं तयोः परस्परसंयोगः प्रकृतौ निविशते । दीर्घस्य यजमानस्य सोम इतिषष्ठीतत्पुरुषसंभवादनर्थलोपाद् उक्तार्थस्याबाधात् । नन्वसंतर्दनमपि प्रकृतौ श्रूयते कथं द्वयोर्निवेश इत्यत आह । क्रयणवदिति । यथा गवा ते क्रीणातीति क्रयस्य गवैव सिद्धौ पुनर्वाससा क्रीणातीत्यादिभिः सह गौर्विकल्प्यते तथाऽत्रापि । न च दशद्रव्याणां समुच्चयस्य द्वादशे सिद्धान्तात् कथं विकल्पः कथं वा क्रयवदिति दृष्टान्त इति वाच्यम् । द्वादशे विकल्प इति पूर्वपक्षमतं गृहीत्वैव दृष्टान्तसंकीर्तनात् ॥ २४ ॥

उत्कर्षो वा ग्रहणाद्विशेषस्य ॥ २५ ॥

सिद्धान्तमाह । उत्कर्ष इति । प्रकरणादुत्कर्षः दीर्घसोमइति विशेषस्य ग्रहणात् ॥ २५ ॥

कर्तृतो वा विशेषस्य तन्निमित्तत्वात् ॥ २६ ॥

असंतर्दनं नित्यम् । पञ्चदशसामिधेनीवत् । वैश्यकर्तृकत्वे निमित्ते तत्रैव साप्तदश्यं तथा असंतर्दनं नित्यं संतर्दनं कर्तृविशेषे निमित्तइत्यभिप्रायेण शङ्कते । कर्त्रिति । कर्तृतो विशेषस्य यजमाने दीर्घत्वस्य तन्निमित्तत्वात् संतर्दननिमित्तत्वात् ॥ २६ ॥

क्रतुतो वाऽर्थवादानुपपत्तेः स्यात् ॥ २७ ॥

सिद्धान्ती पूर्वपक्षं निराह । क्रतुत इति । क्रतुतः विशेषस्य दीर्घकालसाध्यत्वस्य संतर्दननिमित्तत्वं, न कर्तृतः । अर्थवादानुपपत्तेः । धृत्याइत्यर्थवादस्य कर्तृविशेषपक्षे ऽसंभवः । तथा हि । चिरकालसाध्यक्रतौ पुनः पुनः ग्रावभिः हन्यमाने फलकयोः विश्लिष्टयोः दारणशङ्का

भवति । परस्परं संयोगे परस्पराश्रयेण शिथिलं न भवेत् । अतः तत्र संतर्दनं कार्यमित्यर्थवादः संगतः । न हि यजमानदैर्घ्यं धारणे निमित्तमिति ॥ २७ ॥

संस्थाश्च कर्तृवद्धारणाविशेषात् ॥ २८ ॥

संस्थासु संतर्दनं निविशतइति सिद्धान्त्यभिप्रायं ज्ञात्वा तमाक्षिपति । संस्था इति । संस्था अग्निष्टोमादिसंस्थाः न संतर्दनाश्रयाः प्रकृतौ कर्तृवत् । यथा कर्तुर्दैर्घ्यं धारणे अप्रयोजकं तथा प्रकृतौ यावान् सोमः तावानेव संस्थास्वपीति अर्थवादप्रतिपाद्यधारणार्थस्य संस्थायामप्यविशेषात् । तथा चार्थवादप्रतिपाद्यार्थो न स्वरस इति भावः ॥ २८ ॥

उक्थ्यादिषु वा ऽर्थस्य विद्यमानत्वात् ॥ २९ ॥

सिद्धान्त्याह । उक्थ्यादीति । उक्थ्यादिसंस्थासूत्कर्षः संभवति तास्वर्थस्य संतर्दनफलस्य दृढधारणस्य विद्यमानत्वात् । उक्थ्यादिषु यागाभ्यासवृद्धिरस्ति । तच्च द्रव्याधिक्यमन्तरा न संभवति । सोमाधिक्ये अभिषवाधिक्यात्संतर्दनं सफलमिति भावः ॥ २९ ॥

अविशेषात् स्तुतिर्व्यर्थेति चेत् ॥ ३० ॥

ज्योतिष्टोमे दशमुष्टिपरिमितः सोम उक्थ्यादिष्वपि तावानेव अतिदेशेनायाति कुतो ऽधिकः सोमः । सोमयागाभ्यासवृद्धिस्त्वल्पं गृहीत्वैव पूरणीयेति नाभिषवाधिक्यम् । धृत्याइति स्तुतिर्व्यर्थैवेति शङ्कते । अविशेषादिति । अविशेषात् । सोममानाविशेषात् । अधिकद्रव्यापादकशास्त्राभावादिति भावः ॥ ३० ॥

स्यादनित्यत्वात् ॥ ३१ ॥

उक्थ्यादावर्थवादसाफल्यं द्रढयति । स्यादिति । सोमस्याधिक्यमुक्थ्यादिषु शास्त्रीयं स्यात् । दशमुष्टिपरिमाणस्यानित्यत्वात् । प्रजाभ्यस्त्वेत्युपसमूहतीत्यधिकसोमस्यापि विधानादिति अवदानवृद्धावभिषवस्यापि वृद्धेर्धृत्याइत्यर्थवादः सफल इति भावः ॥ ३१ ॥

प्रवर्ग्यनिषेधस्य प्रथमप्रयोगविषयत्वम् । अधि॰ १२ ।

संख्यायुक्तं क्रतोः प्रकरणात्स्यात् ॥ ३२ ॥

ज्योतिष्टोमे श्रुतं, न प्रथमयज्ञे प्रवृञ्ज्यादिति । न प्रवृञ्ज्यात् प्रवर्ग्याख्यं कर्म न कुर्यात् । ज्योतिष्टोमस्य यावत्प्रयोगेषु निषेधः उत प्रथमप्रयोगइति संशये पूर्वपक्षमाह । संख्येति । संख्यायुक्तं प्रथमपदयुक्तं क्रतोः संबन्धित्वेन विधायकं प्रकरणात् । नानृतं वदेदितिवत् । एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोम इत्यनेन ज्योतिष्टोमवाचकत्वे सिद्धे प्रथमयज्ञमात्रे निवेशादिति भावः ॥ ३२ ॥

नैमित्तिकं वा कर्तृसंयोगाल्लिङ्गस्य तन्निमित्तत्वात् ॥ ३३ ॥

सिद्धान्तमाह । नैमित्तिकमिति । चतुर्षु वेदेषु न प्रथमसंज्ञकः क्रतुरस्ति । किं तु कर्तृसंबन्धाद् आद्यप्रयत्नसंबन्धात् प्राथम्यं वस्तुनिष्ठं नैमित्तिकं द्वितीयकृत्यादिसापेक्षम् । कथं ज्ञातं तत्राह । लिङ्गस्य अर्थनिर्णायकव्यवहारस्य तन्निमित्तत्वाद् द्वितीयकृत्यादिसापेक्षत्वस्य लोके दृष्टत्वात् । प्रथमशब्दस्य आद्यकृत्यधीनप्रथमप्रयोगे रूढत्वात्प्रथमप्रयोगेष्वेव संबध्यते निषेध इति भावः * ॥ ३३ ॥

पौष्णपेषणस्य विकृतौ निवेशः । अधि॰ १३ ।

पौष्णं पेषणं विकृतौ प्रतीयेताचोदनात्प्रकृतौ ॥ ३४ ॥

दर्शपूर्णमासयोः श्रूयते, तस्मात्पूषा प्रपिष्टभाग इति । पूषोद्देश्यकं द्रव्यं पेषणं कृत्वा देयमित्यर्थः । इदं दर्शपूर्णमासादुत्कृष्यते न वेति संशये सिद्धान्तमेवाह । पौष्णमिति । पौष्णं पूषोद्देश्यकद्रव्यसंबन्धि यत्पेषणं तद्विकृतौ पौष्णं चरुमित्यादौ प्रतीयेत । प्रकृतौ अचोदनात् पूष्णः अङ्गत्वेनाविधानात् ॥ ३४ ॥

---

* ननु सप्तसंस्थायुक्तस्य ज्योतिष्टोमस्य प्रथमसंस्थारूपे ऽग्निष्टोमे ऽयं निषेधः पर्यवस्यति । तथा च अग्निष्टोमे प्रवृणक्तीतिविधिव्याकोप इति चेत् । मैवम् । कामं तु यो ऽनूचानः स्यात्तत्र प्रवृञ्ज्यादिति श्रवणाद् विधेरनूचानकर्तृके ऽग्निष्टोमे प्रवृत्तिः तदितरकर्तृके च निषेधस्येति कल्पनात् ।

पौष्णपेषणस्य चरावेव निवेशः । अधि० १४

तत्सर्वार्थमविशेषात् ॥ ३५ ॥

पौष्णं चरुम् । पौष्णं श्याममालभेत । पौष्णं द्वादशकपालमिति चरुपशुपुरोडाशा विहिताः । सर्वत्र पेषणमुत चरावेवेति संशये पूर्वपक्षमाह । तदिति । तत् पेषणं सर्वार्थम् अविशेषात् । विशेषाश्रवणात् ॥ ३५ ॥

चरौ वाऽर्थोक्तं पुरोडाशेऽर्थविप्रतिषेधात्पशौ न स्यात् ॥ ३६ ॥

सिद्धान्तमाह । चराविति । चरौ पेषणमनेन विधीयते । पुरोडाशे तु अर्थेन पुरोडाशसिद्धिरूपकार्येणैव पेषणमुक्तम् । पशावर्थविप्रतिषेधाद् हृदयावदानादिरूपक्रियाकलापलोपापत्तेः । पशोः पेषणे सर्वमेकं पिण्डं भवेत् । ततः किम् । हृदयं जिह्वा इत्यादि भेदाभावेन पृथक् पृथग् अवयवावदानादि लुप्येत । तस्माच्चरावेव पेषणम् ॥ ३६ ॥

चरावपीति चेत् ॥ ३७ ॥

ननु चरावपि विप्रतिषेधः विशदसिद्धौदने चरुशब्दप्रयोगात् । पेषणानन्तरं अपणे यवागूः स्याद् न चरुरिति शङ्कते । चरावपीति । विप्रतिषेधोऽस्तीति पूरणीयम् ॥ ३७ ॥

न पक्तिनामत्वात् ॥ ३८ ॥

नेति । चरौ न विरोधः । चरुपदस्य पक्तिनामत्वात् । स्थाल्यधिकरणकपाकविशेषनामत्वात्तस्याः पिष्टपाकेऽपि सत्त्वादितिभावः ॥ ३८ ॥

पौष्णपेषणस्यैकदेवत्ये निवेशः । अधि० १५ ।

एकस्मिन्नेकसंयोगात् ॥ ३९ ॥

सोमापौष्णं चरुं निर्वपतीत्यत्रापि पेषणं स्याद् न वेति संशये सिद्धान्तेनोपक्रमते । एकस्मिन्निति । एकस्मिन्नेकपूषदेवताके चरौ पेषणम् । पूषा प्रपिष्टभाग इत्येकेन पूष्णा संयोगात् ॥ ३९ ॥

धर्मविप्रतिषेधाच्च ॥ ४० ॥

धर्मयोः सोमस्यापेषणं पूष्णश्च पेषणमिति तयोर्विप्रतिषेधाद् विरोधात् ॥ ४० ॥

अपि वा सद्द्वितीये स्याद् देवतानिमित्तत्वात् ॥ ४१ ॥

पूर्वपक्षमाह । अपि वेति । अपि वेति पक्षान्तरद्योतकम् । सद्द्वितीये सोमापौष्णे ऽपि पेषणं स्यात् । पेषणस्य देवतानिमित्तत्वात् पूषदेवतासद्भावमात्रस्य निमित्तत्वात् । अयं भावः । आग्नेयं चतुर्धा करोतीत्यत्र इतरसापेक्षत्वे तद्धितोत्पत्तिर्न स्यादिति स्थितम् । इन्द्रपीतस्येत्यत्र इतरसापेक्षत्वे समासो न स्यादिति स्थितम् । इह तु तयोर्दोषयोरभावात्केवलं पूष्णः सत्तामात्रस्य पेषणे कारणत्वात् तस्य सत्त्वाद् द्विदेवत्ये पेषणमिति ॥ ४१ ॥

लिङ्गदर्शनाच्च ॥ ४२ ॥

द्विदेवत्ये पेषणमित्यत्र लिङ्गं दर्शयति । लिङ्गेति । सोमापौष्णं चरुं निर्वपेन्नेमपिष्टं पशुकाम इति वाक्ये, नेमपिष्टम् अर्धपिष्टम्, अत्र पूष्णो ऽर्धभागसत्त्वात्तत्पेषणकथनं लिङ्गं द्विदेवत्ये ऽपि पेषणे ॥ ४२ ॥

वचनात्सर्वपेषणं तं प्रति शास्त्रवत्त्वादर्थाभावाद् द्विचरावपेषणं भवति ॥ ४३ ॥

नन्विदं विधिवाक्यं लिङ्गं कथं भवेदत्राह । वचनादिति । यदीदं वचनं भवेत् तदा वचनाद् एतद्वचनात् सर्वेषु सोमापौष्णसंबन्धिपशुपुरोडाशचरुषु पेषणं भवेत् । कुतः । तं प्रति सर्वोद्देशेन शास्त्रवत्त्वात् । उक्तवचनतात्पर्यात् । ननु चरुशब्दस्य श्रूयमाणत्वात् कथं सर्वेषु पेषणं तत्राह । अर्थाभावाच्चरुपदार्थविवक्षाया अभावाच्चरौ चरुमात्रे अपेषणं पेषणाभावः किं तु पशावपि स्यात् । अतो न पेषणविधिः किं तु लिङ्गमिति । अयं भावः । पेषणविधिपक्षे चरुमुद्दिश्य विधीयते उत सोमापौष्णमुद्दिश्य उत विशिष्टमुद्दिश्य । नाद्यः । ऐन्द्रं चरुम् आदित्यं चरुमित्यत्रापि तदापत्तेः । न द्वितीयः । ऐन्द्रापौष्णे तदभावप्रसङ्गात् । सोमापौष्णपशावपि पेषणप्रसङ्गाच्च । न तृतीयः । विशिष्टोद्देशे वाक्यभेदप्रसङ्गात् । तस्मान्नेदं पेषणविधायकं वाक्यं किं तु पशुफलमुद्दिश्य यागमात्रविधानम् । अर्धपेषणं तु पूषसंबन्धेन प्राप्तमनूद्यते । अत एव लिङ्गमपि ॥ ४३ ॥

एकस्मिन्वा ऽर्थधर्मत्वादैन्द्राग्नवदुभ-
योर्न स्यादचोदितत्वात् ॥ ४४ ॥

सिद्धान्तमाह । एकस्मिन्निति । एकस्मिन् एकदेवताकएव पेष-याम् अर्थस्य यागस्य धर्मत्वाद् अङ्गत्वात् । उभयोः सोमापूष्णोः यागाङ्ग-त्वेनाचोदितत्वात् तद्यागे पेषणं न स्याद् ऐन्द्राग्नवद् ऐन्द्राग्ने चतु-र्धाकरणाभाववत् । अयं भावः देवताया हविर्भक्षणादीनां निराकरिष्य-माणत्वाद्देवतार्थत्वाभावादगत्या यागार्थत्वं वाच्यम् । तथा च केवलपूष-देवताकएव वाक्येन विधानात्तत्रैवेति सिद्धम् ॥ ४४ ॥

हेतुमात्रमदन्तत्वम् ॥ ४५ ॥

नन्वदन्तको हीति देवतार्थत्वं दर्शयत्यत्राह । हेत्विति । अद-न्तत्वं हेतुमात्रं केवलमर्थवादः । तेन ह्यन्नमितिवत् ॥ ४५ ॥

वचनं परम् ॥ ४६ ॥

ननु नेमपिष्टमिति लिङ्गस्य का गतिस्तत्राह । वचनमिति । परम् उक्तं वाक्यं वचनं तावद्गुणविशिष्टकर्मणः अपूर्वस्य पशुफलहेतोर्वि-धायकम् ॥ ४६ ॥

इति जैमिनिसूत्रवृत्तौ तृतीयस्याध्यायस्य तृतीयः पादः ॥ ३ ॥

निवीतस्यार्थवादत्वम् । अधि० १ ।

निवीतमिति मनुष्यधर्मः शब्दस्य
तत्प्रधानत्वात् ॥ १ ॥

दर्शपूर्णमासयोः श्रुतं, निवीतं मनुष्याणां प्राचीनावीतं पितृणाम् उपवीतं देवानाम् उपव्ययतइति । अत्र निवीतं मनुष्याणामित्यर्थवादो विधिर्वा । विधित्वे ऽपि अयं पुरुषार्थ उत क्रत्वर्थ इति संशये पूर्वपक्ष-माह । निवीतमिति । निवीतमिति विधिः मनुष्यधर्मः मनुष्याङ्गम् । शब्दस्य मनुष्याणामिति षष्ठ्यन्तशब्दस्य तत्प्रधानत्वात् । मनुष्यप्राधा-न्यगमकत्वात् । दध्नेन्द्रियकामस्य जुहुयादित्यत्र षष्ठ्यन्तस्य प्राधान्यगम-कत्वस्य क्लृप्तत्वादिति भावः ॥ १ ॥

KĀVYA-PRAKĀÇA.

CHAPTER I.

AIM, CAUSE AND FORMS OF POETRY.

The paging here followed is that of the Bombay edition, 1889. Ed. Vāmanāchārya.

In the beginning, the author invokes the appropriate divinity, for the removal of impediments :—

Invocation.

1.—[*Page* 2.] **Glorious is the poet's speech comprehending a creation ungoverned by Nature's laws, pleasurable in its entirety, independent (of accessories) and agreeable through ninefold Poetic Sentiment *(Rasa)*.***

The creation of the poet contrasted with that of Brahmā.

The creation of Brahmā is controlled by the laws of Nature, abounds in pleasure, pain and delusion, is dependent upon material and co-operative causes, such as atoms and actions respectively,—has only six tastes, and through these too, is not always agreeable. The creation of the poet's speech, however, is unlike this, and hence "is glorious"—which expression implies reverence to it.

The author next states the subject (of his work), with its aims :—

The Effects of Poetry.

2.—[*Page* 5.] **Poetry is for—fame, wealth, knowledge of rights and usages, removal of evils, uninterrupted extreme pleasure, and exhortation, similar (in agreeableness) to that coming from a beloved consort.**

Fame—as that of Kālidāsa and others.

* *Rasa*, properly so called, consists in sentiments of love, hatred and the like—manifesting themselves, in poetry and drama, through the various causes—the excitant, the ensuant and the auxiliary [vide Ch. IV]. For want of a more correct term in English, I have rendered it by "poetic sentiment," which rendering has been adopted throughout the translation.

Wealth—as received by Dhāvaka and others from çrī Harṣa and other kings.

Knowledge—of rights and usages proper to kings and others.

Removal of Evils—as in the case of Mayūra (through his propitiation of) the Sun.

The chief aim of poetry, however, is the attainment of pure unalloyed pleasure, immediately following the sensing of Poetic Sentiment (*Rasa).*

When Poetry exercises its full functions, it helps the development of various Poetic Sentiments sublates the direct effects of the effects of a word and its expressed meaning,—and as such it differs from the *Veda,* in which the word—equal to a superior's command predominates; and also from the *Purāṇas* in which the predominating element is the sense in the form of friendly advice (not to be necessarily followed *verbatim*). Such poetry is the work of poets, expert at representing things in a light passing the comprehension of ordinary people; it offers advice to other poets, and men of taste, having like a dear wife, attracted attention, by means of a charming tenderness in the advice—advice such as that one should behave like Rāma, and not like Rāvaṇa. And poetry, as such, is by all means to be attempted.

Having defined the aims, the author now states the causes of poetry.

Cause of Poetry.

3.—Poetic genius, proficiency arising from a careful study of objects, Science and Poetry, and practice of the teachings of practical men—these three conjointly, constitute the cause of the production of Poetry.

(1) *Poetic genius*—the seed of poetry, so to say. This is a peculiar faculty without which, (in the first place) there could be no poetry; or even if there were, it would be ridiculous.

(2) Facility of composition arising from a careful study of—'*objects,*' i. e. of all kinds of objects, animate as well as inanimate;

'*Science*,' viz. prosody, grammar, vocabulary, zoology, &c.; and '*poetry*,' the works of great poets. The word *ādi* (etc.) includes History and the rest.

(3) Frequent attempt at writing poetry under instructions from men capable of writing and appreciating poetry.

The above three *conjointly*, not singly, constitute the *cause*—not *causes*—of the production of poetry.

Having thus stated the cause, the author next states the nature (or character) of poetry:

Definition of Poetry.

4.—It consists in word and sense (or meaning)—without faults and with properties (of style); and sometimes devoid of any Figure of Speech.

[*Page* 11.] The *Faults (grammatical mistake, &c.)*, *Properties (Mādhurya, &c.)* and *Figures of Speech* (*upamā, &c.*) will be described later on (Chapters VII., VIII., IX. and X.).

The word '*sometimes*' denotes that though poetry generally has some Figure or the other, yet if in any case there be no Figure directly expressed, this fact alone is not enough to make the composition cease to be poetry. As for example—

[*Page* 12.] "Though there is that very man for my husband, who deprived me of my virginity, these the same Chaitra nights, this the same breeze fragrant with the odour of the full-blown Mālatī, proceeding from the Kadamba—myself the same; yet my heart longs for the amorous sportings beneath the Vētasa bower on the banks of the Rēvā."

[*Page* 13.] In this verse, there is no explicit Figure of Speech. The poetic sentiment (erotic) being the primary element, cannot be said to be a Figure (because a Poetic Sentiment is said to be a Figure, only when it occupies a subordinate position) [see below].

The author next states the divisions of poetry:

4. *contd.* [*Page* 14.] That in which the suggested meaning supersedes the expressed one, is poetry of the best kind, called *Dhvani* by the learned.

Superior kind of Poetry termed Dhvani.

That—viz. Poetry.

By the learned—i. e. by the grammarians, that word is called *Dhvani* which suggests the *sphōṭa* which is all-important (in as much as it is through this *sphōṭa* that a word signifies its meaning). Others carry this doctrine (of the grammarians) a step farther, and apply the term *Dhvani* to *words* as well as to *sense* capable of suggesting meanings superseding the directly expressed one.

As an example of *Dhvani*, we have—

[*Page* 15.] "The sandal-paintings of thy breast have entirely disappeared, and faded is the colour of thy lower lip; thy eyes devoid of jetty dye in the corners, and this thy slender body quivering with horripilation;—(from these indications, I infer) O false woman that not knowing the advent of a friend's sufferings, thou hadst been to a tank to bathe and not to that mean wretch!"

Here the word "*mean*" *(adhama)* suggests the principal meaning—viz. "Thou had gone to dally in my lover's company."

5.—[*Page* 16.] When the suggested meaning is not as described above, it is middling poetry, called the Poetry of Subordinate Suggestion.

Middling Poetry of Subordinate Suggestion.

Not as described above—i. e. not superseding the expressed meaning.

Example:

"The face of the young woman darkens on seeing the rustic youth holding in his hand the fresh flower of Vanjula."

In this, the suggested meaning that "thou hadst promised to bear me company in the Vanjula-bower, but thou never wentest there" is subservient to the more charming expressed meaning—the gloom on the face.*

* Because the charm of the *Erotic in Separation* is enhanced by the gloom on the girl's face, which therefore supersedes the former suggested meaning.

5. *contd.* [*Page* 17.] Non-suggestive Poetry, consisting in fanciful word and meaning, is of the inferior kind, (called Fanciful Poetry, by the learned).*

Third-Class Poetry—Fanciful.

Fanciful, i. e. consisting of excellence and figure.

Non-suggestive, i. e. devoid of any explicit suggested meaning.

Inferior, i. e. of the lowest kind.

Example:

† Svacchandocchaladacchakacchakuharacchātētarāmbucchatā-
Murchanmōhamarṣiharṣavihitasnānāhnikahnāya vaḥ
Bhidyādudyadudāradarduradarīdīrghādaridradruma-
Drōhōdrēkamahōrmimeduramadā mandākīnī mandatām.

[" May the celestial Gangā remove your illusion !—

Gangā, on whose banks are performed, with pleasure, the daily ablutions of the great Ṛiṣis who have their delusion washed away by the beautiful sprinkling of the clear and spontaneously rising waters dashing against the bank-holes occupied by big toads; and whose pride is intensified (as it were) by the high waves rising on account of the falling in of wide-spreading trees."]

And again—

‡ Vinirgatammānadamātmamandirād
Bhavatyupaçrutya yadricchayāpi yam
Sasambhramēndradrutapātitārgalā
Nimīlitākshīva bhiyā 'mrāvatī.

[" Having her gates hastily closed by Indra—on hearing of Hayagriva, the pride-killer (of enemies, but pride-giver, of friends), coming out of his palace, though without any special motive—Amarāvatī appears as with closed eyes."]

Thus ends Chapter I. in which are determined the aim, cause and nature of poetry.

* This much, according to the *Udyota*, has to be supplied here, in order to make the definition tally with the former two.

† This is an instance of Fanciful Language abounding, as it does, in plentiful alliteration—and though we have also got the sentiment of love for Gangā and the Figure *Vyatireka*, as the suggested meaning, yet these are not taken into consideration, because the aim of the poet lies in mere alliteration, without any eye to the meaning.

‡ An instance of fanciful meaning—the suggested meaning being the heroism of Hayagrīva, which is suppressed by the figure *utprekshā* "निमीलिताक्षीव" and hence the former becomes inexplicit.

२३१

CHAPTER II.

DEFINITION OF WORD AND MEANING.

[*Page* 20]. The author defines the nature of word and meaning in their order.

6.—Here *word* is of three kinds: the *expressive*, the *indicative*, and the *suggestive*.

The three kinds of *word*.

Here—i. e. in poetry.

These (the three kinds of words) will be defined later on.

6. *contd.* The meanings of these (the three kinds of words) are the *expressed*, etc.

Three kinds of meaning.

i. e. the *Expressed*, the *Indicated*, and the *Suggested*.

6. *contd.* And according to some, the *Import* also.

The fourth according to some.

At the time of construing the meanings of words—whose forms will be explained later on—in accordance with Expectancy, Compatibility, and Proximity, we have a fourth function *of meaning*—in the form of Import, which differs in form from the other three (the Expressed, the Indicated and the Suggested), and belongs to sentence, though not to words. This according to the (a) *Abhihitanvayāvadīs*.

[*Page* 22.] According to the *Anvitābhidhānavādīs*, the connected meaning of a sentence is *expressed* (without the process of the connection and the meanings of the several component words. [That is to say, connected ideas are expressed by the sentence, not that the ideas are connected after they are conveyed severally by the words.

(a) That is, the Bhāṭṭamīmāmsakas, according to whom the purport of a sentence arises out of the *logical connection* among the words and not out of the *meaning* of words taken by themselves. The *Kāvyapradīpa*, thus lays down their position: लाघवात् पदानां पदार्थमात्रे शक्तिः, न त्वन्वयांशेऽपि, गौरवादन्यलभ्यत्वाच्च। तदंशो हि तात्पर्यार्थो वाच्यार्थविलक्षणशरीर आकांक्षादिवशादपदार्थोऽपि प्रतीयते। न चापदार्थप्रतीतावतिप्रसङ्गः, स्वरूपसतः शक्यान्वयत्वस्य नियामकत्वात्, इत्यभिहितान्वयवादिनाम्मतम्॥

7.—To almost all the meanings belongs the power of suggestion (which is not confined to words alone).

Suggestion belonging to all meanings.

To exemplify (the suggestiveness). (1) of the Expressed meaning—

[*Page* 24]. "Mother, you told me that provisions are wanting in the household; so now, let me know what is to be done, (for you know) that day-light will not last for ever."

Here, the meaning by suggestion is that the speaker is desirous of roving at pleasure, (the suggestion being due to the fact of the speaker being a bad character).

[*Page* क 24]. (2) of the Indicated—

"O, my friend! thou hast been every moment troubled by pursuing that beautiful person (my lover) for my sake; (and in so doing), thou hast acted just as becomes thy goodness and affection."

Here, the meaning implied by indication is that 'thou hast acted as my enemy in receiving the embraces of my lover; and by this indicated meaning is suggested the fault of the lover (that of of being untrue to his beloved).

(3) Of the Suggested—

"Lo! The motionless and undisturbed white crane shines on the lotus-leaf—as if it were a conch-shell on a pure emerald vessel."

Here by "Motionless" is suggested quietness (security), and thence loneliness, and hence lastly, that—'the place will do well for our *point de reunion*'—is hinted by a woman to her lover. Or, the meaning suggested may be that 'you tell a lie, you never went to the place' (fixed for our meeting).

Now the author states respectively the nature of (the different kinds of words), the *expressive* and the rest.

7. *contd.* That (word) which denotes the direct conventional meaning is (called) the *Expressive*.

The expressive word defined.

[*Page* ग 24.] Such words as have no denotation attached to them by convention, can have no sense; hence words can denote a particular meaning only when backed by convention. Such being the case, the word whose conventional meaning is comprehended directly—*i. e.* without any intermediate steps—is called the *Expressive.*

8. [*Page* घ 24.] Convention is four-fold,—consisting of *class* and the rest—or (according to others) *class* alone.

Four-fold Convention.

Though it is the individual (of a class) that does an action for a particular purpose, and as such the individual alone is capable of application or the reverse [*i. e.* the denotation of a word can only consist of the individual, and hence the convension is properly applicable to the individual alone], yet owing to the faults of (*a*) *Endlessness* and *Vagueness*, it is not proper to apply convention to it (*i. e.* the individual), and (*b*) further since in such sentences as 'the ox Dittha is moving,' no differentiation of objects [*i. e.* the denotations of each word by itself, the ground of application], would not (*c*) be possible—for these reasons, convention must be applied to the natural character (differentiating characteristics or conditions) of the individual, and not to the individual alone.

The Individualistic and the Class-theory contrasted.

(*a*) These two terms are thus explained in the *Vivaraṇa:* "Is the term 'ox' applicable to all individual oxen, or to one particular individual ox? Having thus laid down the two possible positions, he state the flaw in the former view: "On account of *endlessness*"—*i. e.* owing to the impossibility of forming a notion of the infinite number of oxen through a single word, we cannot apply convention to that case. He next states the flaw in the latter view—"On account of *vagueness*"—*i. e.* in that case there would never be any idea of any other ox, on the uttering of the word ox, save that particular ox with reference to which, the convention has been previously applied."

(*b*) The following fault applies to both the positions noticed in the above note.

(*c*) For, according to the Individualistic theory, the whole sentence denotes only an individual cow, and as such, there would be no difference in the denotations of the words—'ox,' 'Dittha,' and 'moving.'

दने स्वस्य प्राणसंशयापत्तेस्तावन्मात्रखादनेन धृतप्राणस्य स्वस्योच्छिष्टोदकपानं कामकारितं निषिद्धं स्यादित्युक्त्वा स्वखादितशेषं जायायै दत्त्वा तया च रक्षितानपरेद्युर्यागजनेनार्जिजीषया जिगमिषुः पुनरपि प्राणसंशयमापन्नस्तानेवेभ्योच्छिष्टान् स्वोच्छिष्टभूतान् पर्युषितांश्चखाद, अतो-ब्रह्मविदामपि प्राणसंशय एव सर्वान्नानुमतिदर्शनादचाविशेषेण कीर्तितमपि प्राणविदः सर्वान्नीनत्वं प्राणात्यया-पत्तावेवेति निश्चीयते ॥

टी० सू० सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ २८ ॥ ब्रह्मविदां शमादयोऽनुष्ठेया इत्युक्तं, तत्र भोजननियमरूपः शमविशेषोऽस्ति न वेति विचार्यत इति सङ्गतिः. प्राणविदः सर्वान्नानुमतिः किं सर्वदा ? उत प्राणसंशयापत्तौ ? किं ब्रह्मविद उषस्तस्य प्राणसंशये सत्युच्छिष्टानुमतिदर्शनं प्राणविदः सर्वान्नानुमतेरापद्विषयत्वमवगमयति नेति न चेत्सर्वदानुमतिः स्यात्, ब्रह्मविदोऽपि प्राणसंशयेऽनुमतिमवगमयति चेत्कैमुत्यनीत्या प्राणविदः सर्वान्नानुमतिः प्राणसंशयापत्तावेव स्यात् प्राणविद्यानिष्ठस्यापि सर्वान्नानुमतेर्दर्शनात् ब्रह्मविदः किं पुनर्न्यायसिद्धा सर्वान्नानुमतिरिति पूर्वपक्षसूत्रं प्राणविद्यामात्रविषयं तथाऽपि ब्रह्मविदां सर्वान्नानुमतिः पूर्वपक्षेभिप्रेता । मटची–अश्मवृष्टिः, इभमर्हतीति इभ्यो हस्तिपः, कुल्माषो माषविशेषः, ब्रह्मविदामपि सर्वान्नानुमतिः प्राणात्यये किं पुनर्दुर्बलप्राणविद्यानिष्ठस्येति कैमुत्यन्यायात् सिद्धान्तः ॥

सू० अबाधाच्च ॥ २९ ॥

भू० "आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृति"रिति ब्रह्मविद्योत्पत्तावाहारशुद्धिविधानाबाधादपि ब्रह्मविदां सर्वान्नीनत्वमापद्विषयमवगम्यते । एवं ब्रह्मविदामतिशयि-

तथाशक्तीनामपि सर्वान्नीनत्वस्यापद्विषयत्वात् प्राणविदोऽप्यशक्तेः सर्वान्नानुमतिरापद्विषयैव ॥

सू० अपि स्मर्यते ॥ ३० ॥

अपि चापद्विषयमेव सर्वान्नीनत्वं ब्रह्मविदामन्येषां च स्मर्यते "प्राणसंशयमापन्नो योऽन्नमत्ति यतस्ततः । लिप्यते न स पापेन पद्मपत्त्रमिवाम्भसे"ति ॥

सू० शब्दश्चातोऽकामकारे ॥ ३१ ॥

यतो ब्रह्मविदामन्येषां च सर्वान्नीनत्वमापद्विषयमेव अत एव सर्वेषामकामकारेशब्दः कामकारस्य प्रतिषेधकः शब्दो वर्त्तते, अस्ति हि कठानां संहितायां कामकारस्य प्रतिषेधकः शब्दः, "तस्माद्ब्राह्मणः सुरां न पिबति पाप्मना नोत्सृजा" इतीति, पाप्मना [1]सृष्टो न भवानी"ति मत्वा ब्राह्मणः सुरां न पिबतीत्यर्थः ॥ सर्वान्नानुमत्यधिकरणं समाप्तम् ॥

टी० सू० अबाधाच्च ॥ २९ ॥ पूर्वसूत्रे ब्रह्मविदनुष्ठानदर्शनात्कैमुतिकन्याय उपपादितः, अत्र ब्रह्मविद्विषयवचनेन स एव कैमुतिकन्याय उपपादितः, । सू० अपि स्मर्यते ॥ ३० ॥ न केवलं सर्वान्नानुमतेर्ब्रह्मविद आपद्विषयत्वात् प्राणविद आपद्विषयत्वं कल्प्यं सर्वेषामपि स्मृतौ कण्ठोक्तमेवेति भावः । सू० शब्दश्चातोऽकामकारे ॥ ३१ ॥ ब्राह्मण–शब्दस्यासंकुचितवृत्तित्वात् ब्रह्मविदामपि इदं वाक्यं साधारणं, किं पुनः प्राणविद इतिभावः परे चापरे च सर्वान्नानुज्ञानं किं शमादिवद्विद्याङ्गं विधीयते ? उत स्तुत्यर्थं संकीर्त्यत ? इति विचार्य उपदेशस्य प्रवृत्तिकरत्वोपपत्तेः

[1] संसृष्टोन भवानीति पा० ।

प्राणविद्यासविधानादङ्गविधिः भक्ष्याभक्ष्यशास्त्रं न हिंस्यादितिवद्विशेष-शास्त्रबाध्यमिति पूर्वपक्षं कृत्वा विधायकाभावाच सर्वान्नानुज्ञाविधिः किन्तु सर्वं प्राणस्यान्नमिति विज्ञानप्रशंसार्थोऽर्थवादः, प्राणात्यये हि सर्वान्नानुज्ञा दृश्यते न सर्वदेति व्याचक्षते, तदयुक्तं सूत्रेऽर्थवादशब्दाध्या-हारेण प्रतिज्ञाया वर्णनीयत्वात्, भाष्योक्तयोजनायां हि प्राणात्यय-शब्दे-नैव हि प्रतिज्ञा पूर्णा । अन्ये तु किं सर्वान्नानुमतिः क्रियते? उतार्थवाद? इत्युपोद्घातविचारं कृत्वा ज्यैष्ठ्यश्रैष्ठ्यगुणकप्राणविद्याङ्गभूतस्य सर्वं प्राण-स्यान्नमिति ज्ञानस्य फलत्वात्तदुक्तिरर्थवादमात्रमिति पूर्वपक्षं कृत्वा सर्व-मिदं प्राणस्यान्नमिति वाक्यसामर्थ्याद्विधेः कल्प्यत्वात् अप्रतीतविज्ञानत-द्विधिकल्पनायोगात् येन केन चिदन्नेन प्राणो रक्षितव्य इति विधिरिति निश्चित्य पश्चात्साक्षाद्विचारमाहुः किमियं सर्वान्नानुमतिः सर्वदा? उत प्राणात्यय? इति, अविशेषात् सर्वदेति पूर्वपक्षः, अप्रतिषिद्धान्नेनान्यदा रक्ष-णसिद्धेः प्राणात्यय इति सिद्धान्तः कृतः, तत्रोपोद्घातचिन्तायाम् अप्रती-तविज्ञानतद्विधिकल्पनगौरवं तदुक्तमयुक्तं स होवाच किं मेऽन्नं भविष्य-तीत्युक्ते यत्किञ्चिदिदमाश्वभ्य आशकुनिभ्यस्तत्तेऽन्नमित्युक्त्वा न ह वा एवं-विदि किञ्चनानन्नमित्येवंविच्छब्देन वेदनस्याभिहितत्वात् अत एवाश्रु-तस्य प्राणरक्षणस्य तद्विधेश्च कल्पनमप्ययुक्तम् ॥ सर्वान्नानुमत्यधिकरणं समाप्तम् ॥

विहितत्वाधिकरणम् ।

सू० विहितत्वाच्चाश्रमक-र्मापि ॥ ३२ ॥

भू० यज्ञादिकर्माङ्गिका ब्रह्मविद्येत्युक्तं, तानि च यज्ञादीनि कर्माण्यमुमुक्षुणा केवलाश्रमिणाऽप्यनुष्ठेयानि? उत ने? ति चिन्तायां विद्याङ्गानां सतां केवलाश्र[1]मिशेषत्वे नित्या-नित्यसंयोगविरोधः प्रसज्यते इति यज्ञादीनां केवला-

१ केवलाश्रमशेषत्वे इति पा० ।

श्रमधर्मत्वं न सम्भवतीति प्राप्त उच्यते "आश्रमकर्मापी"ति, आश्रमस्य कर्मापि भवति केवलाश्रमिणामप्यनुष्ठेयानीत्यर्थः, कुतः, यावज्जीवमग्निहोत्रं जुहोति इत्यादिना विहितत्वात्, जीवननिमित्ततया नित्यवद्विहितत्वादित्यर्थः । तथा विद्याङ्गतया च तमेतं वेदानुवचनेनेत्यादिना विहितत्वाद्विद्याशेषतयाऽप्यनुष्ठेयानीत्याह—

सू० सहकारित्वेन च ॥ ३३ ॥

विद्योत्पत्तिद्वारेण विद्यासहकारितयाऽप्यनुष्ठेयानि अग्निहोत्रादीनामिव जीवनाधिकारस्वर्गाधिकारवद्विनियोगपृथक्त्वेनोभयार्थत्वं न विरुद्ध्यत इत्यर्थः । तद्वदेव कर्मान्तरत्वमपि नास्तीत्याह—

टी० सू० विहितत्वाच्चाश्रमकर्मापि ॥ ३२ ॥ अवान्तरसङ्गतिमाह "यज्ञादी" ति, परमप्रकृतेन सङ्गतिरित्यर्थः । किं विद्याङ्गभूतान्याश्रमकर्माणि केवलाश्रमिणोऽप्यनुष्ठेयानि ? ने ? ति, किमेषां विद्याङ्गत्वे केवलाश्रमाङ्गत्वं सम्भवति नेति ?, किं केवलाश्रमाङ्गत्वे नित्यानित्यसंयोगविरोधः प्रसज्यते नेति ?, आश्रमाङ्गत्वे विद्याङ्गत्वे च कर्मान्तरत्वमस्ति नेति च ? कर्मान्तरत्वे सत्यनेकस्य कर्मणो विनियोगपृथक्त्वाभावेन नित्यानित्यसंयोगविरोधप्रसङ्गेन केवलाश्रमाङ्गत्वासम्भवादमुमुक्षोरननुष्ठेयानि कर्मान्तरत्वं नास्ति चेद्विनियोगपृथक्त्वेन नित्यानित्यसंयोगविरोधाभावात् केवलाश्रमाङ्गत्वसम्भवात् केवलाश्रमिणोऽप्यनुष्ठेयानीति, नित्यानित्यसंयोगविरोध इति यावज्जीवमनुष्ठानं मोक्षेच्छानुगुणमनुष्ठानं च विरुद्धमित्यर्थः । केवलाश्रमधर्मत्वं—मुमुक्षारहिताश्रमधर्मत्वम् । आश्रमीति पाठो दृष्टश्चेत् केवलशब्दोऽमुमुक्षुपरः अनुष्ठेयानीत्यर्थं इति, यज्ञादीनि कर्माणि इत्यध्याहारः । अनेन सङ्गतमुत्तरसूत्रार्थमाह "तथा चे"ति, सू० । सहकारि·

त्वेन च ॥ ३३ ॥ समुच्चयव्यावृत्त्यर्थं विद्योत्पत्तिद्वारेणेत्युक्तं, नित्यानित्यसंयोगविरोधमाशङ्क्याह "अग्निहोत्रादीनामिवे"ति, विनियोगपृथक्त्वेन विनियोगः—शेषत्वज्ञापकविधिः, विनियोगपृथक्त्वदर्शनेन नित्यानित्यसंयोगविरोधपरिहारः सूत्रद्वयफलं, न त्वेकस्य विनियोगद्वैविध्यस्यकेनादर्शितत्वात् ॥ उत्तरसूत्रकृत्यमाह "तद्वदि"ति,

सू० सर्वथाऽपि त एवोभयलिङ्गात् ॥ ३४ ॥

भू० सर्वथा विद्यार्थत्वे आश्रमार्थत्वेऽपि त एव यज्ञादय इति प्रतिपत्तव्यं न कर्मस्वरूपभेद इत्यर्थः कुतः उभयलिङ्गात् उभयत्र श्रुतौ यज्ञादिशब्दैः प्रत्यभिज्ञाप्य विनियोगात् कर्मस्वरूपभेदे प्रमाणाभावाच्च ॥

सू० अनभिभवं च दर्शयति ॥ ३५ ॥

"धर्मेण पापमपनुदतीत्यादिभिश्च तानेव यज्ञादिधर्म्मान्निर्दिश्य तैर्विद्याया अनभिभवं पापकर्मभिरुत्पत्तिप्रतिबन्धाभावं दर्शयति अहरहरनुष्ठीयमानैर्हि यज्ञादिभिर्विशुद्धेऽन्तःकरणे प्रत्यहं प्रकृष्यमाणा विद्योत्पद्यते, अतस्त एवोभयत्र यज्ञादयः ॥ विहितत्वाधिकरणं समाप्तम् ॥

विधुराधिकरणम् । **सू० अन्तरा चापि तु तद्दृष्टेः ॥ ३६ ॥**

चतुर्णामाश्रमिणां ब्रह्मविद्यायामधिकारोऽस्ति विद्यासहकारिण आश्रमधर्मा इति चोक्तम् । ये पुनराश्रमान्तरा वर्त्तन्ते विधुरादयः तेषां ब्रह्मविद्याऽधिकारोऽस्ति नेति विषये आश्रमधर्मेतिकर्त्तव्यताकत्वाद्विद्याया अना-

श्रमिणां चाश्रमधर्माभावान्नास्त्यधिकार इति प्राप्ते उच्यते "अन्तरा चापि त्वि"ति, तु-शब्दः पक्षव्यावृत्त्यर्थः, च-शब्दोऽवधारणार्थः अन्तरा वर्त्तमानानामनाश्रमिणामपि विद्यायामधिकारोऽस्त्येव कुतः तद्दृष्टेः, दृश्यते हि रैक्वभीष्मसंवर्त्तादीनामनाश्रमिणामपि ब्रह्मविद्यानिष्ठत्वं, न चाश्रमधर्मैरेव विद्याऽनुग्रह इति शक्यं वक्तुं "यज्ञेन दानेन तपसा नाशकेने"ति दानादीनामाश्रमेष्वनैकान्तानामप्यनुग्राहकत्वश्रवणात्, यथोक्तरेतस्तु विद्यानिष्ठत्वदर्शनादग्निहोत्रादिव्यतिरिक्तैरेव विद्यानुग्रहः क्रियते तथाऽनाश्रमिष्वपि विद्यादर्शनादाश्रमानियतैर्जपोपवासदानदेवताऽऽराधनादिभिर्विद्याऽनुग्रहः शक्यते कर्त्तुम् ॥

सू० अपि स्मर्य्यते ॥ ३७ ॥

अपि चानाश्रमिणामपि जपादिभिरेव विद्यानुग्रहः स्मर्यते "जप्येनापि च संसिद्ध्येद्ब्राह्मणो नात्र संशयः ॥ कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते" ॥ इति संसिद्ध्येज्जपाद्यनुगृहीतया विद्यया सिद्धो भवतीत्यर्थः, ॥

सू० विशेषानुग्रहश्च ॥ ३८ ॥

न केवलं न्यायस्मृतिभ्यामयमर्थः साधनीयः श्रूयते चानाश्रमनियतैर्धर्मविशेषैर्विद्यानुग्रहः, "तपसा ब्रह्मचर्येण श्रद्धया विद्ययाऽऽत्मानमन्विष्येति, ॥

सू० अतस्त्वितरज्ज्यायोलिङ्गाच्च ॥ ३९ ॥

तु-शब्दोऽवधारणे, अतोऽनाश्रमित्वादितरदाश्रमित्वमेव ज्यायः, अनाश्रमित्वमापद्विषयं शक्तस्य चाश्रमित्वमेवोपादेयमित्यर्थः । भूयोधर्म्मकाल्पधर्म्मकयोरतुल्यकार्य्यत्वात्, लिङ्गाच्च स्मृतेश्चेत्यर्थः, स्मर्य्यते च शक्तं प्रत्याश्रमस्योपादेयत्वम् "अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः" इत्यादिना निवृत्तब्रह्मचर्य्यस्य मृतभार्य्यस्य चावैराग्ये सति दारालाभ आपत् ॥ विधुराधिकरणं समाप्तम् ॥

टी० सू० सर्वथाऽपित एवोभयलिङ्गात् ॥ ३४ ॥ अग्निहोत्र-शब्दस्य तुल्यत्वेऽपि कुण्डपायिना मयनाग्निहोत्रे मासमग्निहोत्रं जुहोतीति विहिते स्वरूपभेदो दृश्यत इत्यत्राह "कर्मस्वरूपभेदे प्रमाणाभावाच्चे"ति, कर्मान्तरत्वव्युदासस्य तन्त्रेणानुष्ठानं फलम् । सू० अनभिभवं च दर्शयति ॥ ३५ ॥ आदि-शब्दोयज्ञादिवाक्यपरः अङ्गत्वं वदता यज्ञेन दानेनेत्यादिना यज्ञादिधर्मा निर्दिष्टाः, अङ्गत्वेन किञ्चित्कारं वदद्वाक्यमपि यज्ञादिपर्याय-शब्देन निर्दिशतीत्यर्थः । दर्शयति श्रुतिरिति शेषः किञ्चित्कारं विवृणोति "अहरह"रिति, सर्वापेक्षेति विद्याङ्गत्वमुक्तं सहकारित्वेन चेति फलविरोधिनिरसनेन समसमुच्चय उक्त इत्यन्ये । विद्याया एव प्रतिबन्धकनिवर्त्तनशास्त्रवशात् ब्रह्मप्राप्तेर्नित्यतया साध्यत्वानुपपत्तेः सहभावश्रवणस्याङ्गभावविषयतया अन्यथासिद्धत्वात्तथा विभागकल्पनमयुक्तं, सूत्रभेदस्तु शङ्काभेदनिबन्धनः, उभयलिङ्गादिति तमेतं वेदानुवचनेन, अनाश्रितः कर्मफलमित्यादि श्रुतिलिङ्गात् स्मृतिलिङ्गाच्च सिद्धवज्ज्ञानरूपादित्याहुः । ततोऽपि श्रुताविव वाक्यद्वये प्रत्यभिज्ञापनपरत्वमुक्तम् । अनन्यत्वस्य साध्यत्वात् । विहितत्वाधिकरणं समाप्तम् ॥ सू० अन्तरा चापि तद्दृष्टेः ॥ ३६ ॥ आवान्तरसङ्गतिमाह "चतुर्णा"मिति, किं विधुरादीनां ब्रह्मविद्याधिकारोऽस्ति न ? किं तेषां साङ्गब्रह्मविद्योपसंहारसा-

मर्थ्यमस्ति नेति, किमाश्रमाणां साधारणधर्माङ्गिका विद्या भवति नेति?, तपसा ब्रह्मचर्येणेत्यादिविनियोगोपबृंहितं रैक्वादीनां विद्यानिष्ठत्वदर्शनं विद्यायाः साधारणकर्माङ्गकत्वमवगमयति नेति,न चेत्साधारणधर्माङ्गकत्वासम्भवात्साङ्गविद्योपसंहारासामर्थ्येन विधुरादीनामनधिकारः, अवगमयति चेत्साधारणधर्माङ्गकत्वेन विद्यायास्तदुपसंहारसामर्थ्याद्विधुरादीनां ब्रह्मविद्याधिकारः. विधुरो मृतदारः,आदि–शब्दोपात्तोऽकृतदारः । न चेति आश्रमधर्मानुपपत्तौ वर्णधर्मैरनुग्रह उपपद्यत इत्यर्थः ॥ अनैकान्तिकानाम् अनियतानाम् ॥ सू० अपि स्मर्यते ॥ ३७ ॥ ब्राह्मणः–ब्रह्मविद्यानिष्ठः, अत्र जपादिना विद्यानुग्रहः कथं ज्ञायत इत्यत्राह जपाद्यनुगृहीतयेति ॥ सू० विशेषानुग्रहश्च ॥ ३८ ॥ विशेष–शब्दं समासं च व्याचष्टे "धर्मविशेषैर्विद्यानुग्रह" इति. आश्रमानियतधर्मैरेवानुग्रह उपपद्यते चेदाश्रमप्राप्तिक्षमैरप्याश्रमा उपेक्ष्येरन्,ततश्च यज्ञादिश्रुतिवैयर्थ्यं स्यादित्यत्राह–सू० अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ ३९ ॥ भूयोधर्मकाल्पधर्मकयोरतुल्यकार्यत्वादिति, शक्तं प्रत्यतुल्यकार्यत्वादित्यर्थः । श्रुतेरनुमापकत्वात् स्मृतिर्लिङ्ग–शब्देनोच्यते, आपच्छब्दार्थमाह "निवृत्तब्रह्मचर्यस्ये"ति, पारिव्राज्यव्यावृत्त्यर्थमाह "अवैराग्ये सती"ति, ब्रह्मनिष्ठेष्वनुयायिवैराग्यं नाम लोकान्तरजन्मान्तरभोगनैरपेक्ष्यम्, अतः इदमवैराग्यमविरुद्धम् । यद्वा गार्हस्थ्यधर्मश्रद्धा अवैराग्यं, परे चापरे च अपि स्मर्यते इत्येत् संवर्त्तादीनामाश्रमबहिष्ठनग्नचर्यास्मरणपरं व्याचक्षते विशेषानुग्रहश्चेत्येतज्जप्येनैव तु संसिध्येदित्यनेन साधारणधर्मविशेषैर्विद्यानुग्रहसम्भवपरमनेकजन्मसंसिद्ध इति पूर्वकृतसुकृतैर्विद्यानुग्रहपरं च व्याचक्षते, तदयुक्तं विद्यायाः साधारणधर्मानुग्राह्यत्वे नग्नचरणस्य विरुद्धत्वात्, न हि नग्नचर्या नाम सर्वाश्रमसाधारणो धर्मः क्वचिच्चोदितः अतः सूत्रद्वयस्य साधारणधर्मानुग्रहपरश्रुतिस्मृतिविषयत्वं युक्तम् उन्मत्तचर्यास्मरणेनाश्रमानपेक्षत्वं सिध्यतीति चेत् न, उन्मत्तचर्याया जनेनावमतो योगी योगसिद्धिं च विन्दतीति जनावमानजनितयोगसिद्धये स्वप्रकर्षाच्छादनार्थत्वाद् दृष्टे सम्भवत्यदृष्टकल्पनस्यान्याय्यत्वाद्विध्यन्तरादर्शनाच्छादनार्थतयाऽप्युपपन्नेनोन्मत्ताचरणेन विद्याया आश्रमनैरपेक्ष्यकल्पनायोगात्

"नोङ्धात्वोः"॥ 'ऊङो धातोश्च य उदात्तयण् हल्पूर्व इति'। अनेन पूर्वस्याः प्राप्तेरयं प्रतिषेध इति दर्शयति। 'तस्मात्परा [1]तृतीयादिर्विभक्तिरिति'। यद्यपि पूर्वसूत्रे नद्यजादी इत्यनुवर्त्तते न तृतीयादिरिति तथाप्यत्र बाहुल्येन तृतीयादेरेव संभवादिदमुक्तं, तथाहि। ऊङ्धातुयणः परा नदी तावन्न संभवति, नाप्यूङ्यणः शस् संभवति, धातुयणस्तु संभवति॥

"ह्रस्वनुड्भ्याम्मतुप्"॥ 'अक्षण्वतेति'। छन्दस्यपि दृश्यत इत्यनङ्, अनो नुडिति नुडागमः, पूर्वस्य नकारस्य लोपः। 'शीर्षण्वतेति'। शीर्षंश्छन्दसीति निपातितः। 'वसुशब्द आद्युदात्त इति'। वसेरुप्रत्ययः, धान्ये निदित्यधिकारे, अथेह कस्मान्न भवति मरुतो ऽस्य सन्ति मरुत्वानिति। मरुच्छब्दो हि मृग्रोरुतिरिति उतिप्रत्ययान्तत्वात्प्रत्ययस्वरेणान्तोदात्तः। न च तकारेण व्यवधानं, स्वरविधौ व्यञ्जनस्याविद्यमानत्वात्, इत्यत आह। 'अत्रेति'। कथं पुनर्ज्ञायते नाश्रोयतइति, नुड्ग्रहणात्, तद्ध्यक्षण्वतेत्यादौ यथा स्यादित्येवमर्थमन्यथा नकारस्य लुप्तस्यापि स्वरविधावसिद्धेर्नकारेण व्यवधानान्न स्यादिति, यदि चात्र व्यञ्जनमविद्यमानवत्स्यात्ततो ऽसिद्धलोपस्यापि तस्याविद्यमानत्वादेव स्वरः सिद्ध इति नुड्ग्रहणमनर्थकं स्यात्, नैतद्युक्तमुच्यते, यदि हि नकारलोपस्यासिद्धत्वेपि नकारो ऽविद्यमानवत्स्यात्स्वरविधौ नकारलोपस्यासिद्धवद्वचनमनर्थकं स्यात्तस्मान्नलोपविषये ऽविद्यमानवद्भावो न प्रवर्त्ततइति कर्त्तव्यमेव नुड्ग्रहणम्, एवं तर्हीष्टिरेवेयमत्र स्वरे ऽविद्यमानवत्परिभाषा न प्रवर्त्ततइति, रेशब्दाच्चेति पाठः। 'आरेवानिति'। रयि अस्यास्तीति मतुपि रयेर्मतौ बहुलमिति सम्प्रसारणं, पूर्वत्वमाद्गुणः, ततो ह्रस्वाभावाद्वचनम्। 'त्रिवतीरिति'। छन्दसीर इति वत्वं, वा छन्दसीति पूर्वसवर्णदीर्घः॥

"नामन्यतरस्याम्"॥ 'म[2]तुब्निति चेति'। तच्चार्थात्सप्तम्यन्तं सम्पद्यते। 'अन्यथा हि साम्प्रतिक एव स्यादिति'। साम्प्रतिकाभावे हि भूत-

[1] अजाद्यसर्वनामस्थानविभक्तिरिति मुद्रितमूलपुस्तकपाठः पदमञ्जर्यसंमतः।
[2] मतुब्ग्रहणं चेति मुद्रितमूलपुस्तके पाठः।

पूर्वगतिर्भवति न तु तस्मिन्सत्यपि, ततस्तिसृणां चतसृणामित्यत्र 'न तिसृचतसृ' इति दीर्घप्रतिषेधात्साम्प्रतिक एव ह्रस्वो विद्यते इति तत्रैव स्यादग्नीनां वायूनामित्यादौ परत्वान्नित्यत्वाच्च दीर्घत्वे कृते ह्रस्वाभावान्न स्यात्, तस्मान्नुटा ह्रस्वो विशेष्यते, यद्येवं 'मतौ बह्वचोनजिरादीनां' 'शरादीनां चे'ति येषां मतौ दीर्घत्वमुच्यते तेषां न स्यात्। नैष दोषः। संज्ञायामिति वर्त्तते, ततश्चातुरर्थिकएव मतौ दीर्घत्वं न तु तदस्यास्त्यस्मिन्नित्यत्र, तत्र मतौ ह्रस्वान्तत्व द्भविष्यति, एवमपि तिसृणां चतसृणामित्यत्र न स्यात्, तिसृचतसृभावस्यैव तत्राभावात्, इष्टमेवैतत्संगृहीतम् अत्र हि षट्त्रिचतुर्भ्यो हलादिरिति नित्यमेव विभक्तेरुदात्तत्वमिष्यते। 'धेन्वां शकट्यामिति'। धेट इत्वेति नुप्रत्ययान्तो धेनुशब्दोन्तोदात्तः, शकटिशकट्योरक्षरमक्षरं पर्यायेणेति शकटीशब्दोपि पदान्तोदात्तः, त्रपुशब्दो वसुशब्दश्चाद्युदात्तः॥

"षट्त्रिचतुर्भ्यो हलादिः"॥ 'अन्तोदात्तादिति निवृत्तमिति'। यद्येतदनुवर्त्तेत पञ्चानां नवानां चतुर्णामित्यत्र न स्यात्, त्रः संख्याया इत्याद्युदात्तत्वात्, क्व तर्हि स्यात्, सप्तानामष्टानां, सप्ताष्टशब्दौ घृतादित्वादन्तोदात्तौ। त्र इति रेफनकारान्ताया इत्यर्थः। 'चतसः पश्येति'। यद्येतदिह हलादिग्रहणस्य व्यावर्त्यं तथा चतुरः शसीत्यत्रावोचाम॥

"झल्युपोत्तमम्"॥ झलादौ विभक्तौ परतः षट्त्रिचतुर्णां त्रिप्रभृत्यक्षराभावात् झलादिविभक्त्यन्तस्य पदस्य ग्रहणं, यदाह। 'विभक्त्यन्ते पदे उपोत्तममुदात्तम्भवतीति'॥

"न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः"॥ साविति यदि सप्तमीबहुवचनस्य ग्रहणं स्यात्तेभ्यः केभ्य इत्यत्र न स्यात्, तत्किंशब्दयोः सप्तमीबहुवचने परतस्त्यदाद्यत्वे कृते बहुवचने झल्येदित्येत्वविधानात्, ताभिर्याभिरित्यादावेव स्यात् तासु यास्वित्यत्रावर्णान्तत्वात्तस्मात्प्रथमैकवचनस्य ग्रहणमित्याह। 'सौ प्रथमैकवचनइति'। अनन्तरस्य प्रतिषेधस्यासम्भवात्सर्वस्यैव षाष्ठिकस्वरस्य प्रतिषेधो विज्ञायतइत्याह।

'इत्येतेभ्यो यदुक्तं तन्न भवतीति'। एवं च वृत्रवानित्यादौ ह्रस्वनुड्भ्यां मतुबित्यपि प्रतिषेधो भवति, उदात्तनिवृत्तिस्वरस्य प्रतिषेधो नेष्यते । 'सुगुनेति'। बहुव्रीहौ गोस्त्रियोरुपसर्जनस्येति ह्रस्वः, नञ्सुभ्यामित्यन्तोदात्तत्वम् । 'शुनेति'। ननु च नलोपे कृते सावर्णान्तमेतत्, न, स्वरविधौ नलोपस्यासिद्धत्वात् । न चायं स्वरविधिः, स्वरप्रतिषेधोऽयम् । एवं तर्हि शुनः प्रतिषेधं कुर्वन्नज्ञापयति अस्मिन्प्रतिषेधे नलोपोऽसिद्धो भवतीति, तेन नृशब्दात्सप्तम्येकवचने नरीत्यत्र सावेकाच इति विभक्तेरुदात्तत्वं भवति, पितृमानित्यादौ ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं भवति, अन्यथा साववर्णेति प्रतिषेधः स्यात् । 'प्राचेति'। पूर्ववन्नलोपदीर्घादि । 'क्रुञ्चेति'। क्रुञ्च क्रुञ्च कौटिल्याल्पीभावयोः । ऋत्विगित्यादिना क्विन्, तत्रैव सूत्रे क्रुञ्चेति निपातनान्नलोपाभावः । 'कृतिर्वेति'। कृती छेदने ॥

"दिवो झल्" ॥ 'झलादिरिति'। कथं पुनरसति सप्तमीनिर्देशे तदादिविधिर्भवति, केवलझलात्मिकाया विभक्तेरभावात्, अस्तु तर्हि तदन्तविधिः, का पुनर्झलन्ता विभक्तिः, शसादिः सकारान्ता । एवं तर्हि षट्त्रिचतुर्भ्यो हलादिरित्यत आदिग्रहणमनुवर्तते, दिवः परा विभक्तिर्नोदात्ता भवति, कीदृशी यस्या झलादिरिति, अयं योगः शक्योऽवक्तुं, कथमेवं वक्ष्यामि, अष्टनो दीर्घात्, दिवो झलादिः, शतरनुमो नदी चेति, ऊडिदमित्यादौ च दिवो ग्रहणं न करिष्यामि, एवमपि नु चान्यतरस्यामित्युत्तरसूत्रे तत्र झलग्रहणं कर्तव्यं, नदी चेति चकारश्च क्रियत इति नास्ति लाघवे विशेषः ॥

"तित्स्वरितम्" ॥ इह कस्मान्न भवति स्तृत इद्धातोरास्तीर्णं विस्तीर्णं, तत्कालग्रहणार्थतया चरितार्थत्वादिति चेत्, न । अनेकप्रयोजनदर्शनादनुबन्धानां, तद्यथा ऽऽचिक इत्यादौ ठकि सति स्वरो वृद्धिश्च भवति, एवं तर्हि नायमिकारस्तपरः, किं तर्हि, दपरः, यद्येवमूकारस्य स्थाने आन्तर्यतो दीर्घः प्राप्नोति, भाव्यमानोण् सवर्णान्न गृह्णाति यद्येव 'मदसोऽसेर्दादु दो मः' अमूभ्यां दीर्घस्य स्थाने दीर्घो न स्यात् ।

नैष दोषः । ज्ञापितमेत 'ह्रिव उत्' इत उदिति तपरकरणेन भाव्यमानोऽप्युकारः सवर्णान् गृह्णातीति । तयोरेव तर्ह्युकारयोः स्वरितत्वप्रसङ्गः । तावपि तर्हि न तपरौ, किं तर्हि दपरौ, कथं तर्हि ज्ञापकं तपरस्तत्कालस्येत्यत्र दकारोऽपि चर्त्वभूतो निर्दिश्यते, अणुदित्सवर्णस्य चाप्रत्ययस्तपरस्तत्कालस्येति, यदि दकारोऽपि निर्दिश्यते ऋदोरबित्यत्रापि तद्ग्रहणादिहैव स्याद्यवस्तवः, लवः पव इत्यत्र न स्यात्, तादपि परस्तपर इति तादपि परस्य तपरत्वात्, एवं तर्हि ऋदोरबित्यत्र धकारो जश्त्वभूत उच्चारणार्थो निर्दिश्यते, तत्र जश्त्वस्यासिद्धत्वान्नायमृकारो दपरः, ये तु प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणमिति परिभाषां पठन्ति तेषामृत इद्धातोरित्यादौ सत्यपि तित्त्वे नास्य स्वरस्य प्रसङ्गः, तपरस्तत्कालस्येत्यत्र दकारोपि न प्रश्लेष्टव्यः,

तस्यास्तु परिभाषाया भाष्यवार्तिकयोरिह ।
अदर्शनादयं यत्नो महानस्माभिरादृतः ॥

"तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः" ॥ तास्यादीनां समाहारद्वन्द्वः । 'अदुपदेशादिति' । उपदिश्यतइत्युपदेशः, तस्याकारेण विशेषणात्तदन्तविधिः, अच्चासावुपदेशश्चादुपदेशः, उपदिश्यमानदशायां यदवर्णान्तं तस्मादित्यर्थः । 'अकारोपदेशादिति' । अकारान्तादुपदेशादित्यर्थः । 'कर्त्तेत्यादि' । लुङात्मनेपदे प्रथमपुरुषस्य डारौरसः, तासिः । एकवचने टिलोपः, इतरत्र रि चेति सलोपः, आस्त इत्यादावदादित्वाच्छपो लुक्, तुदत इत्यादीनि तसन्तानि, कथं पुनः शबुपदेशेऽदन्तो भविष्यति, यावता पकारान्तोयं तत्रेत्यत आह । 'अनुबन्धस्यानेकान्तत्वादकारान्तोपदेश एवेति' । उदीचामाङ इति कृतात्वनिर्द्देशाज्ज्ञापकादनुमीयते कार्येष्वनुबन्धाः श्रूयमाणा अपि न प्रतिबन्धका इति । 'पचमानो यजमान इति' । लटः शानच् । नन्वत्र मुका व्यवधानमत आह । 'यद्यत्रेति' । 'स्यादिति' । संभावने लिङ्, अङ्गस्य यो ऽकारस्तस्य मुगित्याश्रयणादस्य पक्षस्य संभवः । 'तदा लसार्वधातुकमदुपदेशादनन्तरमिति' । स्वावयवेन व्यवधानाभावादुपदेशग्रहणाच्च मुकि सत्यर्द्धमात्राव्यवधानेऽपि प्रवर्त्तते निघातः । 'आतो

ङित' इतीयादेशस्तु न भवति, अत इत्यत्र तपरकरणात् । अनन्तरयोगे पञ्चमी मृग्या, परमिति वाध्याहारः । 'अथाकारान्तस्याङ्गस्येति' । अकारेणाङ्गस्य विशेषणादिति भावः । 'लसार्वधातुकस्येति' । सिद्ध इति वक्ष्यमाणेन सबन्धः, निघात इति चानुषङ्गः, तथा च लसार्वधातुकस्य निघातः सिद्ध इत्यर्थः । 'असिद्ध इति' । प्रकृतत्वान्मुगिति गम्यते । 'बहिरङ्गत्वादिति' । बहिरङ्गत्वं तु मुको बहूपेक्षत्वात्, स हि अकारान्तविशिष्टमङ्गमाश्रयति आनञ्च प्रत्ययविशेषम् । अयं तु स्वरोदुपदेशमात्रं लसार्वधातुकमात्रं चापेक्षतइत्यन्तरङ्गः । 'चित्स्वरोपीत्यादि' । चित्स्वरस्यावकाशः चलनः, चलनशब्दार्थादकर्मकाद्युच्, अस्यावकाश आस्ते शेते इति, प[1]वमान इत्यादौ परत्वादयं निघातश्चित्स्वरं बाधते । ननु चैकस्य द्विकार्ययोगे विप्रतिषेधो, न चात्रैको द्विकार्ययुक्तः, कथ,-मादेरनुदात्तत्वमन्त्यस्य चित्स्वरः, नात्रादेरनुदात्तत्वं किं तर्हि संघातः कार्यो, अत्र ज्ञापकमुत्तरत्र वक्ष्यामः, ततश्चानस्य सर्वानुदात्तत्वेन भवितव्यं नत्वादेरित्यस्त्येव विरोध इति परत्वादयं बाधतइति युक्तमेव । 'चिनुतः चिन्वन्तीति' । ननु च सार्वधातुकमपिदिति श्नुरपि ङिद्देव तत्कथमिदं प्रत्युदाहरणमत आह । 'ङिदयं श्नुः पूर्वस्य कार्यं प्रतीति' । तत्र हि ङिति यत्कार्यं तदतिदिश्यते, यदाह । सिद्धं तु पूर्वस्य कार्यातिदेशादिति । नायं स्थितः सिद्धान्तः, अतो ङित इत्यत्र वक्ष्यति सार्वधातुकमपिदित्यत्र ङित इव ङिद्वदित्यङ्गीक्रियतइत्यादि, अत्र तु पक्षे परिहार उपदेशग्रहणमुभाभ्यामपि संबध्यते, ङिदुपदेशाददुपदेशादिति । 'पचावः पचाम इति' । असत्युपदेशग्रहणे परत्वान्नित्यत्वाच्च दीर्घे कृते तपरकरणान्न स्यात् । ननु च तपरकरणं न करिष्यते, यदि तु न क्रियते यातः वातइत्यत्रापि प्राप्नोति । 'हतो हथ इति' । अत्रानुदात्तोपदेशेत्यादिनानुनासिकलोपे कृते सत्यकारात्परं लसार्वधातुकं भवति तथाप्युपदेशग्रहणान्न भवति, नहि हन्तिरदन्त उपदिश्यते, अथ योत्रादन्तो हशब्दस्तदाश्रयमनुदात्तत्वं कस्मान्न भवति,

[1] पचमान इति ४ पु॰ पा॰ ।

तावतानुपदेशात्, समुदायपरो हि हन्त्युपदेशः । 'कतीह पवमाना इति'। 'पूङ्यजोः शानन्', तत्र च लट इति निवृत्तत्वान्न लादेशोयम्। 'शिश्यइति'। एरनेकाच इति यणादेशः, लिट् चेत्यार्द्धधातुकमेतत्। 'यदधीतइति'। यच्छब्दप्रयोगो निपातैर्यद्यदीति निघातप्रतिषेधार्थः।

"आदिः सिचो ऽन्यतरस्याम्" ॥ 'माहि कार्ष्टामिति'। हे-र्माङश्च प्रयोगे पूर्ववदेव प्रयोजनमुक्तम्। 'अपरो मध्योदात्त इति'। ननु च वलादिरिह प्रत्ययः, इडागम आगमाश्चानुदात्ता भवन्ति, तस्मादिहा-प्यन्तोदात्तत्वेन भवितव्यमत आह । 'सिचश्चित्करणादिति'। 'अनिटः पित इति'। अनिटः सिचः परः पित्पक्षे उदात्तो भवति पक्षे त्वनुदात्तः, तेन माहिकार्षमिति तिङन्तं पक्षे आद्युदात्तं पक्षे त्वन्तो-दात्तम्, अन्यथा धातुस्वरेण नित्यमाद्युदात्तं स्यात्। 'मध्योदात्त एवेति'। सिचः स्वरेण, एवकारेण न त्वन्तोदात्त इति दर्शयति ॥

"स्वपादिर्हिंसामच्यनिटि" ॥ 'स्वपादिरा वृत्करणादिति'। आगणान्तादित्यर्थः। तत्र ञिष्वप् शये, श्वस प्राणने, अन चेत्येतेभ्यः परे जक्षित्यादयो ऽभ्यस्तसंज्ञकास्तेषु परत्वादभ्यस्तानामादिरिति स्वरो भवति, ये तु ततः परे षस् स्वप्ने, वश कान्तौ, ह्नुङ् अपनयने, चर्करीत-मिति, तत्र चर्करीतमभ्यस्तम्, अन्ये तु षसिवसी छान्दसौ, छन्दसि च दृष्टानुविधानं, ह्नुङोप्ययं स्वरो न भवति अहृविङोरित्यनुवृत्तेः, पारिशेष्या-दादितस्त्रिष्वेवायं स्वरः। 'हिंसन्तीति'। हिसि हिंसायां रुधादिः, ऽऽद्व्लोपः, 'असोरल्लोपः'।

"अभ्यस्तानामादिः" ॥ 'आदिरिति वर्त्तमानइति'। 'आदिः सिचोन्यतरस्या' मित्यतः। 'पुनरादिग्रहणं नित्यार्थ मिति'। अन्यथा आदिग्रहणसंबद्धमन्यतरस्यांग्रहणमनुवर्तेत ॥

"अनुदात्ते च" ॥ अनजा[1]द्यर्थमिदम्। 'जिहीते मिमीतइति'। 'ईं हल्यघोः, ङित्त्वाल्लसार्वधातुकानुदात्तत्वम् । अविद्यमानोदात्त-

१ अत्रैतद्वर्णनान्मूले अनजाद्यर्थं आरम्भ इति पाठो ऽपपाठः।

इति वदतानुदात्त इति बहुव्रीहिनिर्द्देशोऽयमित्युक्तं, तत्र प्रयोजनमाह । 'अनुदात्तइति' । 'बहुव्रीहिनिर्द्देश इत्यादि' । न विद्यते उदात्तो यस्मिन्नित्यनुदात्तः । 'मा हि स्म दधादिति' । शास्त्रीये ऽनुदात्ते गृह्यमाणे नित्यत्वादन्तरङ्गत्वाद्वा इकारलोपे कृते ऽचोनुदात्तस्य परस्याभावादाद्युदात्तत्वं न स्यात्, बहुव्रीहौ विज्ञाते तु भवति । 'दधात्यत्रेति' । अत्र यणादेशस्य बहिरङ्गत्वेनासिद्धत्वादपि स्वरः सिद्धः ॥

'सर्वस्य सुपि" ॥ सर्वशब्द उणादिषु अन्तोदात्तो निपातितः, सर्वस्य विकारः सार्वे इत्यनुदात्तादिलक्षणो ऽञ् यथा स्यादिति । 'प्रत्ययलक्षणेनापीत्यादि' । न लुमताङ्गस्येत्यत्रैतदुपपादितम् । 'सर्वस्वरो ऽनकच्कस्येति' । तन्मध्यपतितस्य तद्ग्रहणेन ग्रहणात्साकच्कस्याप्युदात्तत्वं प्राप्ते वचनम् ॥

"भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति" ॥ आद्युदात्तस्यापवादोयम् । जागरामिति सौत्रो निर्द्देशः । अत्र मदिर्दिवादिः, दरिद्राजाग्रावदादी, अन्ये जुहोत्यादयः । 'पञ्चम लकार इति' । लस्येत्यत्र दर्शितक्रमे पञ्चमलकारो लेट्, लेट्शब्दस्तु वृत्तिकारदेशे जुगुप्सितः, यथात्र द्रविडदेशे निविशब्दः । 'दधनदिति' । 'इतश्च लोपः परस्मैपदेषु' 'लेटोडाटा' वित्यट् । 'दरिद्रतीति' । अत्र परत्वादाकारलोपे कृते इकारस्योदात्तत्वप्रसङ्गः । अथ प्रत्ययग्रहणं किमर्थं, यावता भ्यादिभ्यः परः पित्प्रत्यय एव संभवति, ननु चायमस्ति 'आडुत्तमस्य पिच्च, विभयानि, अत्रापि लोडुत्तमस्यैव पित्त्वं विधीयते न त्वाट इति, आट्सहितो लोडुत्तमः पिद्भवति स च प्रत्यय एव । अत एव लोडादेशात्पितः पूर्वमाड् भवति, प्रत्ययात्तु पूर्वो न भवति आट्सहितस्य प्रत्ययत्वादिति तन्निवृत्त्यर्थं प्रत्ययग्रहणमिति, न वाच्यं कथं यथैव प्रत्ययत्वमाट्सहितस्य तथा पित्त्वमपि तस्यैव, इदं तर्हि प्रयोजनं, प्रत्ययात्पूर्वस्याच उदात्तत्वं यथा स्यात्संघातस्य माभूदिति, एतदेव ज्ञापकं स्वरविधौ संघातः कार्यीति, तेन तास्यनुदात्तेदिति निघातः पचमान इत्यादौ चित्स्वरं परत्वाद्बाधतइति यदुक्तं तदुपपन्नं भवति । अथ पूर्वग्रहणं किमर्थं, प्रत्यये

पितीति वक्तव्यं, तत्र तस्मिन्निति निर्दिष्टे पूर्वस्येति पूर्वस्यैव भविष्यति, इदं तर्हि प्रयोजनं पिति पूर्वं कार्यभाग्यथा स्यात्पिदन्तं मामूदिति, कथं पुनः सप्तमीनिर्द्देशे तदन्तस्य प्रसंगः, एतदेव ज्ञापयति स्वरविधौ सप्तम्यस्तदन्तसप्तम्य इति, किं सिद्धं भवति, उपोत्तमं रिति, रित्प्रत्ययान्ते उपोत्तममुदात्तं भवति न तु रिति परतः पूर्वस्य, चङन्यतरस्यां चङन्तस्य, यद्येवं चतुरः शसीतिशसन्तस्य प्राप्नोति, शस्ग्रहणसामर्थ्याच्च भविष्यति। यदि हि चतुरः शसीत्यनेन शस उदात्तत्वमिष्टं स्यात्तत उडिदमित्यस्यानन्तरं चतुरश्चेति ब्रूयात्, तत्रासर्वनामस्थानग्रहणानुवृत्त्या षट्त्रिचतुर्भ्यो हलादिरिति हलादेरुदात्तत्वविधानाच्च शस एव भविष्यति॥

"लिति" ॥ प्रत्ययात्पूर्वमिति वर्त्तते, तेन लिदन्ते स्वरप्रसंगो न चोदनीयः॥

"आदिर्णमुल्यन्यतरस्याम्" ॥ 'लोलूयंलोलूयमिति । एकाच्सु धातुषु लित्स्वरस्यास्य च विशेषाभावादनेकाजुदाहृतः । 'आम्रेडितानुदात्तत्वे कृतइति' । अनुदात्तं चेत्यनेन॥

"अचः कर्तृयकि" ॥ कर्तृवाचिनि सार्वधातुके विहितो यक् कर्तृयक् । 'उपदेशइति वर्त्तत इति' । अदुपदेशादित्यत्र यदुपदेशग्रहणं तदुपसमस्तमपि स्वरितत्वप्रतिज्ञानादिह संबद्ध्यते, तच्चार्थात्सप्तम्यन्तं संपद्यतइति मत्वोक्तं, न तु सप्तम्यन्तमुपदेशग्रहणं प्रकृतमस्ति, यदि तूपदेशग्रहणं नानुवर्त्तेत कार्यतइत्यादौ रपरत्वे सति न स्यात्, तस्मादुपदेशइत्यनुवर्त्त्यम्, यद्येवं जायते स्वयमेवेत्यादौ न स्यात्, ये विभाषेत्यात्वे सत्युत्तरकालमजन्ता जनादयो न तूपदेशइत्यत आह । 'जनादीनामिति' । 'ये विभाषे' त्यत्रानुदात्तोपदेशेत्यत उपदेशग्रहणमनुवर्तते, सा च विषयसप्तमीति उपदेशएव जनादीनामात्वं भवति । 'जायते स्वयमेवेति' । अन्तर्भावितण्यर्थो जनिः कर्मकर्तृविषयः, दृश्यते चान्तर्भावितण्यर्थस्य प्रयोगः, यथैकं द्वादशधा जज्ञइति॥

"थलि च सेटीडन्तो वा" ॥ अन्यतरस्यामिति वर्त्तमाने वाग्रहणं कार्यिविकल्पार्थम्, अन्यतरस्यांग्रहणेन कार्यं विकल्पते वाग्रहणेन कार्यिणः,

तेनेडादयः पर्यायेण कार्यं प्रतिपद्यन्ते । ननु चान्तश्च तवै युगपदित्यादौ युगपद्ग्रहणादेवान्यत्र पर्यायः सिद्धः सत्यमादेरपि प्राप्ते वाग्रहणम् । अन्यथा श्रुतयोऽिडन्तयोरेव कार्यित्व विकल्पेत, वाग्रहणे तु सति यद्येवं विकल्पोर्थो ऽप्यापि समुच्चयः सर्वथादेरपि भवति । 'सेटीति किमिति' । इड्ग्रहणादेव थल् सेट् ग्रहीष्यतइति प्रश्नः । 'ययाथेति' । अयमभिप्रायः। इड्ग्रहणं यदेडागमः क्रियते तदा तस्योदात्तार्थं स्यात्ततश्च यथा लुलविथेत्यादौ चतुर्णां पर्यायेणोदात्तविधाने ययिथेत्यादौ चतुर्थाभावेपि पर्यायेणोदात्तत्रयं भवति एवमिडभावेपि स्यादिति ॥

"अनित्यादिर्नित्यम्" ॥ 'प्रत्ययस्वरापवाद इति' । बाहुल्यादेवमुक्तम् । 'श्रोत्रियंश्छन्दोधीत' इति, अत्र हि वाक्यार्थे पदवचनमित्यत्र पक्षे न प्रत्ययस्वरप्रसङ्गः । 'प्रत्ययलक्षणमत्र नेष्यतइति'। ननु च न लुमताङ्गस्येति प्रतिषेधादेव प्रत्ययलक्षणं न करिष्यते, किमुच्यते प्रत्ययलक्षणमत्र नेष्यतइति, एवमन्यतो ज्ञापितमेतत्, स्वरविधौ सप्तम्यस्तदन्तसप्तम्य इति, ततश्च यथा पूर्वसूत्रे थलन्तं कार्यि तथात्रापि ञ्निदन्तं कार्यि न तु ततः पूर्वमङ्गमित्यनङ्गकार्यत्वात्प्रतिषेधो न सिद्ध्यतीति । 'अञ्जि कनि चेति' । चकाराद्बिदाद्यञ्जि च ॥

"आमन्त्रितस्य च" ॥ अत्र कारकाद्दत्तश्रुतयोरेवाशिषीति प्राप्तिः प्रतिषिद्ध्यते, शेषनिघातेन बाध्यतइत्यर्थः । 'प्रत्ययलक्षणमत्र नेष्यतइति' । षष्ठीनिर्द्देशेन तत्कार्यस्य स्पष्टत्वात् । 'सर्पिरिति' । सृपेरिसि सर्पिःशब्दोन्तोदात्तः, स्वमोर्नपुंसकादिति सोर्लुक्, सप्तशब्दो घृतादित्वादन्तोदात्तः, षड्भ्यो लुगिति जसो लुक् ॥

"पथिमथोः सर्वनामस्थाने" ॥ 'पथिमथिशब्दावित्यादि' । गमेरिनिः, पुषःकित्, मन्थः, पतेस्थ चेतीनिप्रत्ययः, मन्थः कित्त्वादुपधालोपः । 'मन्था इति' । पथिमथ्यृभुक्षामादित्यादिकार्यम् । 'पथः पश्येति' । भस्य टेर्लोपः, प्रत्ययलक्षणमत्रापि नेष्यते, अतिप्रसङ्गस्तु पूर्ववत् ॥

"अन्तश्च तवै युगपत्" ॥ 'कर्त्तवै इति'। कृत्यार्थे तवैकेन्केन्यत्वन इति तवैप्रत्ययः। किं पुनः कारणं पर्यायनिवृत्तये यत्नः क्रियतइत्याह। 'एकवर्जमिति [1]हीत्यादि' ॥

"क्षयो निवासे" ॥ क्षि निवासगत्योरित्यस्माद् अधिकरणे घः। '[2]क्षयो दस्यूनामिति'। क्षयेश्च कर्त्तरि षष्ठी ॥

"वृषादीनां च" ॥ वृषु सेचने, जनी प्रादुर्भावे, ज्वर रोगे, हि गतौ, कै गै रै शब्दे। 'एते सर्वे ऽच्प्रत्ययान्ता इति'। पचादित्वात्, बाहुल्यात्त्विदमुक्तं, वृषेत्यत्रेगुपधलक्षणः कः, णीञ् प्रापणे, तायृ संतानपालनयोः, केचित्तय इति पठन्ति,अय पय तय गतौ, क्वचि च्चयशब्दः पठ्यते, स चिनोतेर्द्रष्टव्यः। इण् गतौ, अंग समाधाने, विद ज्ञाने, षूद निरासे, दु दाहे, वद व्यक्तायां वाचि, अत सातत्यगमने, केचिदतौ न पठन्ति, गुहू संवरणे, शम उपशमे, अण रण शब्दे। 'संमतौ भावकर्मणोरिति'। शमरणाविति वर्त्तते, संमतावर्थे शमरणौ भावकर्मणोर्यथाक्रममाद्युदात्तौ भवतः, मत्रि गुप्तभाषणे,। 'शान्तिरिति'। शमेः क्तिचि, कमु कान्तौ, यमु उपरमे, केचिद्यमशब्दं न पठन्ति, स्व शब्दे गतौ, धृञ् धारणे, कॄ विक्षेपे, भिदादिषु निपातनाद्वृद्धिः, वह प्रापणे, क्लृपू सामर्थ्ये, पद गतौ ॥

"संज्ञायामुपमानम्" ॥ 'यद्येवमिति'। यद्यत्र कनो लुवित्यर्थः। 'एतदेवेत्यादि'। ज्ञापकाभावे तु सप्तमीनिर्देशेपि प्रत्ययलक्षणप्रतिषेधो न स्यात्, स्वरविधौ सप्तम्यस्तदन्तसप्तम्य इति ज्ञापनेन तदन्तस्य कार्यित्वात्। 'क्वचिदिति'। वचनात्क्वचिद्भवत्येव, यथा सर्वस्य सुपीत्यत्र ॥

"निष्ठा च द्व्यजनात्" ॥ इहाद्यात्तः अद्यात्त इत्येकादेशस्य बहिरङ्गत्वादसिद्धत्वादनादिति प्रतिषेधाभावः, भीष्मशब्दो भियः षुक्चेति मक्प्रत्ययान्तः। 'चिन्तित इति'। चिति स्मृत्यां चुरादिः ॥

१ मुद्रितमूलपुस्तके हीति नास्ति।
२ मुद्रितमूलपुस्तके क्षयो वर्तते दस्यूनामिति पाठः।

"आशितः कर्ता" ॥ 'अशेरिति'। अश भोजने इत्यस्मात्। 'आङ्पूर्वादविवक्षिते कर्मणीति'। उक्तं हि 'प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिये'ति। 'कर्तरि क्त इति'। गत्यर्थाकर्मकेत्यादिना। भाष्ये तु कर्तरि क्तो निपात्यत इति स्थितं, यदि तह्याङ्पूर्वकस्याशेराशित इति रूपम् अवग्रहः प्राप्नोति, तस्मादुपधादीर्घत्वमपि निपात्यत इति वार्तिककारः। वृत्तिकारस्तु संहितापाठ एव नित्यः, पदपाठस्तु पौरुषेयः, ततश्च न लक्षणेन पदकारा अनुवर्त्याः पदकारैर्नाम लक्षणमनुवर्त्यमिति मन्यते। अपर आह। अशेर्ण्यन्तस्य प्रयोज्यकर्तरि गतिबुद्धिप्रत्यवसानार्थेति कर्मसंज्ञके निष्ठायामाशित इति रूपं, स एवात्र भूतपूर्वगत्या कर्ता विवक्षित इति ॥

"रिक्ते विभाषा" ॥ 'रिक्तइति'। रिचिर्विरेचने। 'संज्ञायामित्यादि'। निष्ठा च द्व्यजनादित्यस्यावकाशो दत्ता गुप्तः, अस्यावकाशोऽसंज्ञायां, रिक्तो घट इति संज्ञायामुभयप्रसंगे पूर्वविप्रतिषेधः ॥

"जुष्टार्पिते चच्छन्दसि" ॥ 'जुष्ट इति'। जुषी प्रीतिसेवनयोः, श्वीदितो निष्ठायामितीट्प्रतिषेधः। 'अर्पित इति'। अर्त्तेर्णिच्, अर्त्तीत्यादिना पुक् ॥

"नित्यं मन्त्रे" ॥ आरम्भसामर्थ्यादेव सिद्धे नित्यग्रहणमुत्तरार्थम् ॥

"युष्मदस्मदोर्ङसि" ॥ युष्मसिभ्यां मदिक्, युषिः सौत्रो धातुः। 'तव ममेति'। 'युस्मदस्मद्भ्यां ङसोऽश्' 'तवममौ ङसी'ति मपर्यन्तस्य तवममादेशः, शेषे लोपः, अतो गुण इति पररूपत्वम्, एकादेश उदात्तेनोदात्त इति विभक्तेरुदात्तत्वे प्राप्ते इदमुच्यते ॥

"ङयि च" ॥ 'तुभ्यं मह्यमिति'। ङेप्रथमयोरम्, तुभ्यमह्यौ ङयि, अथ किमर्थो योगविभागो न युष्मदस्मदोर्ङङसोरित्येवोच्येत, एवं हि चकारो न कर्त्तव्यो भवति, अत आह। 'पृथग्योगकरणमिति'। आशङ्काग्रहणेनास्वरितत्वादेव यथासंख्यं न भविष्यतीति शक्यं वक्तुमिति दर्शयति, अत्रापि पूर्ववद्विभक्तिस्वरः प्राप्तः ॥

"यतो नावः" ॥ अत्रानाव इति प्रतिषेधो ज्ञापयति स्वरविधौ व्यञ्जनमविद्यमानवदिति, अन्यथा य आदिर्नकारो नासौ स्वरयोग्यो यश्च स्वरयोग्य आकारो नासावादिरिति प्रतिषेधोनर्थकः स्यात् ॥

"ईडवन्दवृशंसदुहां ण्यतः" ॥ ईड स्तुतौ, वदि अभिवादनस्तुत्योः, वृङ् संभक्तौ, शंसु स्तुतौ, दुह प्रपूरणे, कथं वार्य इत्यत्र ण्यत्, यावता एतिस्तुशास्वित्यादिना विशेषविहितेन क्यपा भाव्यमत आह । 'वार्य इत्यादि' । अथ वृङो ऽपि क्यबेव कस्मान्न भवत्यत आह । 'क्यबिधौ हीत्यादि' । एतच्च तत्रैव प्रतिपादितम् ॥

"विभाषा वेण्विन्धानयोः" ॥ 'गुप्रत्ययान्तइति' । तिष्ठतेर्णुरिति तत्रानुवर्तते । 'उदात्तनिवृत्तिस्वरेणेति' । श्नसोरल्लोप इति श्नसोकारस्योदात्तस्य लोपात् । 'वेणुरित्यादि' । संज्ञायामुपमानमित्यस्यावकाशः चञ्चा वध्रिका, विभाषाया अवकाशो ऽनुपमानभूतो वेणुः शुष्क उपवने, वेणुरिति संज्ञायामुपमाने पूर्वविप्रतिषेधः ॥

"त्यागरागहासकुहश्वठक्रथानाम्" ॥ कुह विस्मापने, श्वठ क्रथ भाषणे चौरादिकावदन्तौ, निघातस्यैवायमपवादो युक्तः, नैतदेवं, यद्ययं निघातस्यापवादः स्यात्तत्रैवायं ब्रूयादनुदात्तं पदमेकवर्जं नहि स्वार्यम् ॥

"चङ्यन्यतरस्याम्" ॥ उदाहरणे एकवचनातिक्रमणे हेतुर्मृग्यः । 'माहिदधदिति' । विभाषा घेट्श्व्योरिति च्लेश्चङादेशः ॥

"मतोः पूर्वमात्संज्ञायां स्त्रियाम्" ॥ 'मतोः पूर्व आकार इति' । अर्थव्याख्यानमेतत्सूत्रे तु शब्दरूपापेक्षया नपुंसकनिर्देशः । केचित्तु सूत्रे पूर्वशब्दं पुल्लिङ्गमेव पठन्ति, उदाहरणे चातुरर्थिको नद्यां मतुप् । मतौ बह्वचोऽनजिरादीनां चेति दीर्घत्वम् । 'मतोरिति किं, गवादनीति' । मतोरित्यस्मिन्नसति पूर्वग्रहणमपि न क्रियेतेति संज्ञाशब्दसंबन्धिन आकारमात्रस्य प्रसङ्गः, पूर्वग्रहणं मतोरनन्तरस्य पूर्वस्य यथा स्यादिह माभूत्सानु[१]मतीति ॥

१ साभ्रमतीति ३ पु॰ पा॰ ।

"अन्तो ऽवत्याः" ॥ इहासंदेहार्थं वत्या अन्त इत्यवचनादकारप्रश्लेषो निश्चितः, तत्र प्रयोजनं पृच्छति । 'अवत्या इति किमुच्यतइति' । अथावत्या इत्युच्यमानेपि राजवतीत्यत्र कस्मान्न भवति, भवति ह्येतदपि नलोपे कृते ऽवतीशब्दान्तमत आह । 'स्वरविधावित्यादि' । ननु चोदाहरणेपि मतोर्वत्वस्यासिद्धत्वादवतीशब्दान्तत्वं नास्तीत्याह । 'वत्वं पुनरिति' । पुनःशब्दो नलोपाद्विशेषं द्योतयति ॥

"ईवत्याः" ॥ अहीवतीत्यादौ पूर्वं दीर्घः, संज्ञायामिति वत्वं, योगविभागश्चिन्त्यप्रयोजनः ॥

"चौ" ॥ 'उदात्तनिवृत्तिस्वरापवादोयमिति' । कृदुत्तरपदप्रकृतिस्वरेणोदात्तस्याञ्चत्यकारस्य विभक्तिनिमित्तको 'ऽच' इति लोपः । 'चावतद्धितइति वक्तव्यमिति' । चौ यः स्वरः स तद्धिते परतो न भवतीत्यर्थः । अन्यथा योऽनुदात्तः प्रत्ययो दधीचः पश्येत्यादौ तत्र यथोदात्तनिवृत्तिस्वरं बाधते तथा दाधीच इत्यादौ प्रत्ययस्वरमपि सतिशिष्टः स्वरो बाधेत, तस्मादतद्धितइति वक्तव्यम्, अस्मिँश्च सति उदात्तनिवृत्तिस्वरस्याऽयमपवादो भवति ॥

"समासस्य" ॥ 'राजदृषदिति' । ननु च योत्र समासस्यान्तो दकारो नासौ स्वरभाक्, यश्च ततः पूर्वोऽकारो नासौ समासस्यान्तोऽत आह । 'स्वरविधाविति' । न स्वरस्यैव विधिः किं तर्हि योऽप्यनुदात्तादेरञित्यादिः सोपि स्वरविधिः, स्वराश्रयत्वात्, तेन सोपि विधिर्व्यञ्जनादौ व्यञ्जनान्ते च भवति, अत्र च ज्ञापकञ्चोन्तरपदेनुदात्तादावित्युक्त्वा पृथिव्याः प्रतिषेधः । 'नानास्वरापवाद इति' । यद्यप्यनुदात्तम्पदमेकवर्जं' मित्यस्ति तथापि वर्जने विशेषाश्रयणात्पर्यायेण नानास्वरप्रसङ्गः, तत्र राजशब्दः 'कनिन्युवृषितक्षी' त्यादिना कनिन्प्रत्ययान्तत्वादाद्युदात्तः, पुरः कुषन् पुरुषः, ब्रह्मणोपत्यं ब्राह्मणो ऽणन्तः, कलतृपश्च, वृषादिभ्यश्चित्, कमेर्बुक् च, कम्बलः, 'कन्याराजन्यशिष्यामनुष्याणामन्त' इति कन्याशब्दोन्तस्वरितः, 'स्वनहसोर्वा' इत्यप् धातुस्वरः, पटत्पटद्भवतीति पटहः, पृषोदरादिरन्तोदात्तः, 'शाश-

पिप्पल्यादयश्च', पचादिषु नदडिति पठ्यते, टित्वान्ङीप्, नदी, उदात्तनिवृत्तिस्वरः, पोषशब्दो घञन्तः 'कर्षात्वतो घञोऽन्त उदात्तः' 'इगुपधज्ञाप्रीकिरः कः' 'पुषादि'... 'दृणातेः पुग् ह्रस्वश्च' इति, प्रत्ययस्वरः। समिध्यते ययेति समित्, संपदादित्वात्क्विप्, कृदुत्तरपदप्रकृतिस्वरः, एते नानास्वरास्तेषामपवादः॥

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां षष्ठस्याध्यायस्य

प्रथमश्चरणः॥

"बहुव्रीहौ प्रकृत्या पूर्वपदम्"॥ इह यस्य विकारः प्राप्तस्तस्य प्रकृतिभावो विधेयः, न च कृत्स्नस्य पूर्वपदस्य शेषनिघातलक्षणो विकारः प्राप्तः किं तु तत्स्थयोरुदात्तस्वरितयोरेव, तस्मात्तयोरेव पूर्वपदशब्दो वर्तते तदाह। 'पूर्वपदग्रहणमित्यादि'। समासान्तोदात्तत्वे हीत्यादिना विकारप्राप्तिन्दर्शयति। 'समासान्तोदात्तत्वापवादोऽयमिति'। नाप्राप्ते तस्मिन्नारम्भात्। ननु च यत्र सामान्यविधिप्रवृत्तिमनपेक्ष्य विशेषविधिप्रवृत्तिस्तत्रापवादत्वं, यथा 'कर्मण्यण्' 'आतोऽनुपसर्गे कः' इति, इह तु सत्यां विकारप्राप्तौ प्रकृतिभावो विधेयः, विकारप्राप्तिश्च समासस्येत्यस्मिन् प्रवृत्तइति कथन्तत्प्रवृत्त्यपेक्षस्तदपवादः, अतः समासस्येत्यस्मिन्प्रवृत्ते प्राप्तस्य शेषनिघातस्यैवायमपवादो युक्तः, नैतदेवं, यद्ययन्निघातापवादः स्यात्तन्नैवायं ब्रूयादनुदात्तम्पदमेकवर्ज्जं, बहुव्रीहौ पूर्वपदमिति। नन्वेवमुच्यमाने समपाद इत्यादौ स्वाभाविकस्यापि पूर्वपदानुदात्तस्य प्रतिषेधप्रसङ्गः, किं कारणमनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति, तस्मात्समासस्येत्यस्यानन्तरमारभ्यमाणस्तस्यैवायमपवादः। ननु चोक्तं कथन्तत्प्रवृत्त्यपेक्षस्तदपवाद इति, उच्यते, निदानोच्छेदेन निदानिन उच्छेदः शक्यते कर्त्तुं, समासान्तोदात्तत्वं च शेषनिघातलक्षणस्य पूर्वपदविकारस्य निदानमतस्तदभावद्वारेण निदानभूतस्य समासान्तोदात्तस्यैवास्मिन् विषयेऽप्रवृत्तिराख्यायते। नन्वेवं नानापदस्वरप्राप्तौ समासस्येत्यस्यारम्भात्तदप्रवृत्तौ द्वयोरपि पूर्वोत्तरपदयोः प्रकृतिस्वरप्रसङ्गः। तथाहि सति न बहुव्रीहेरिति समासान्तोदात्तत्वमेव प्रतिषेधेत्, अस्तु

वा समासान्तोदात्तत्वमस्तु वा शेषनिघातः, पश्चात्तु प्रकृत्येत्यनेन स्वरविशेषमुपलक्ष्य स स्वरः पूर्वपदस्य विधीयते, शेषनिघातात्प्राक् पूर्वपदस्य प्रकृत्या यः स्वरस्तत्स्वरसम्पूर्वपदं बहुव्रीहौ भवतीति, यदि वा प्रकृत्येत्यनेन स्वरविशेषउपलक्षिते सत्ययमर्थो भवति बहुव्रीहौ पूर्वपदस्य स्वाभाविको यः स्वर आद्युदात्तत्वादिकः स भवतीति, एवञ्च यथा पूर्वपदस्यादिरुदात्तो भवतीत्युक्तेन समासस्येत्येतत्प्रवृत्त्यपेक्षा, तादृगेतदिति युज्यते तदपवादता। 'कृष्णो मृग इति'। यस्याजिनं कृष्णाजिनमित्युच्यते। 'ब्रह्मचारिशब्दः कृदुत्तरपदप्रकृति स्वरेणान्तोदात्त इति'। तथा चाधीयते ब्रह्मचारी चरति विषयद्विषाम्, कस्य ब्रह्मचार्यसीत्यादौ। 'णिनीति'[1]। पूर्वपदाद्युदात्तत्वन्तु न भवति प्रवृद्धादिषु पाठादाकृतिगणो हि स दृश्यते, वृत्तौ तु कृदुत्तरपदप्रकृतिस्वरेणेत्युपलक्षणम्, अपर आह छन्दसि परादिश्च परान्तश्चेत्यन्तोदात्तत्वं, वृत्तेस्त्वयमर्थः ब्रह्मेव चरति ब्रह्मचारीत्युपमानमत्र पूर्वपदन्ततः किम्, उपमानं शब्दार्थप्रकृतावेवेति नियमात्कृदुत्तरपदप्रकृतिस्वर एव भवतीति । 'स्नातकशब्दः कन्प्रत्ययान्त इति'। यावादिषु स्नात वेदसमाप्ताविति पठ्यते, 'मनोर्जातावञ्यतौ षुक्च' मनुष्यः। यदि त्वयं प्रकृतिभावः समासान्तोदात्तत्वं बाधते सर्वानुदात्तेपि पूर्वपदे बाधेत, तत्रापि ह्यस्य प्रवृत्तिर्न केन चिद्वार्यते, विशेषविधिश्च प्रवर्त्तमानः सत्यपि सम्भवे सामान्यविधेर्बाधको भवति, तक्रदानमिव दधिदानस्येत्यत आह । 'उदात्तग्रहणमित्यादि' । न्यायतोप्ययमर्थः सिद्धः, कथं यस्य विकारः प्राप्तस्तस्य प्रकृतिभावो विधेयः, विकारप्राप्तिश्चोदात्तस्वरितयोरेव, अत एव पूर्वमुक्तमुदात्ते स्वरिते वा वर्त्ततइति । 'समभागइति'। समशब्दः सूत्रो डमबिति व्युत्पादितः सर्वानुदात्तः, नन्वत्रासत्यपि समासान्तोदात्तत्वे भागशब्दस्य कर्षात्वत इति अन्तोदात्तत्वात् समभागशब्दोन्तोदात्त एव भविष्यति, तस्मादुदाहरणदिगयं दर्शिता, समपाद इत्युदाहर्तव्यं, पादशब्दो वृषादित्वादाद्युदात्तः । किमर्थं पुनरिदमुच्यते, पूर्वपदप्रकृतिस्वरो यथा स्यात्

१ मुद्रितमूलपुस्तके णिन्यन्तइति नास्ति ।

समासान्तोदात्तत्वं माभूदिति, नञ्सुभ्यामित्येतन्नियमार्थं भविष्यति, यदि बहुव्रीहावन्तोदात्तत्वं भवति नञ्सुभ्यामेवेति, न चैवञ्चानापदस्वरप्राप्तौ समासान्तोदात्तत्वविधानान्नियमेन तस्मिन्व्यावर्त्तितेपि पूर्वोत्तरपदयोर्द्वयोरपि पर्यायेण प्रकृतिस्वरप्रसङ्गः, 'शितेर्नित्याबह्वज्' इत्यस्य नियमार्थत्वात्, यदि बहुव्रीहावुत्तरपदम्प्रकृत्या भवति शितेरेव परमिति। उच्यते। 'नञ्सुभ्या' मित्येष तावन्नियमो नोपपद्यते, अनुदरः सूदर इत्यादौ उदाराश्वेषु क्षेपइति पूर्वपदान्तोदात्तस्य प्राप्तस्य बाधनाद्विधिसम्भवात्। 'शितेर्नित्याबह्वज्' इत्येतदपि शितेर्नित्याबह्वजेवेत्यनेन नियमेन शीतिललाटादिष्वेवोत्तरपदप्रकृतिस्वरं निवर्त्तयेन्न चित्रगुप्रभृतिष्वित्यारभ्यमेवैतत्, बहुव्रीहिग्रहणन्तु शक्यमकर्त्तुं. तत्पुरुषे कस्मान्न भवति, तत्पुरुषे तुल्यार्थेत्यादिनियमार्थम्भविष्यति, तत्पुरुषे तुल्यार्थाद्येवेति, गन्तव्यपण्यमेव वाणिजे, गतादिष्वेवोत्तरपदेषु द्विगावित्यादि, द्वन्द्वे कस्मान्न भवति, राजन्यबहुवचनद्वन्द्वइत्येतन्नियमार्थम्भविष्यति, द्वन्द्वे भवति राजन्यबहुवचनद्वन्द्वएवेति, अव्ययीभावे कस्मान्न भवति, परिप्रत्युपापावर्ज्यमानेत्यादि नियमार्थं भविष्यति, परिप्रत्युपापा एवाव्ययीभावइति, विपरीतस्तु नियमः सर्वत्र न भविष्यति नानिष्टार्था शास्त्रप्रवृत्तिरिति, एवमप्यसति बहुव्रीहिग्रहणे समासान्तोदात्तस्य पूर्वपदप्रकृतिस्वरस्य चैकविषयत्वाद्विरोधाच्च तुल्यश्वेतः पञ्चारत्निरित्यादौ पर्यायः प्राप्नोति, तत्पुरुषादिषु तुल्यार्थादीन्येव पूर्वपदानि प्रकृतिस्वराणि भवन्ति नान्यानीत्येव हि नियमः कृतो न तुल्यार्थादिपूर्वपदेषु तत्पुरुषादिषु पूर्वपदप्रकृतिस्वरत्वमेवेति। अथाप्यगृह्यमाणविशेषत्वादुभयनियमः, तत्पुरुषादिषु तुल्यार्थादीन्येव तेषु पूर्वपदप्रकृतिस्वरत्वमेवेति, तथा च बहुन्यतरस्यामिति वर्त्तमाने दिष्टिवितस्त्योश्चेति विकल्पो विधीयते पञ्चदिष्टिः पञ्चवितस्तिरित्यादाविगन्ते द्विगाविति नित्यपूर्वपदप्रकृतिस्वरो माभूदिति, तथापि चित्रगुरित्यादौ बहुव्रीहौ पर्यायप्रसङ्गः, ज्ञापकात्सिद्धं, यदयं द्वित्रिभ्यां पाद्दन्मूर्द्धस्विति द्विपादित्यादावन्तोदात्तविकल्पं शास्ति तज्ज्ञापयति न बहुव्रीहावन्तोदात्तत्व-

'लिङ्सिचावि' ति कित्त्वम्। अरुत्साताम्। अरुत्सत। अरुद्धाः। अरुत्सि। अरुत्स्वहि। कर्मकर्तरि अरुद्ध गौः स्वयमेवेत्यत्र 'न रुध' इति चिणो निषेधः। शुद्धे तु कर्मण्यरोधीति भवति। रुरुत्सते। 'हलन्ताच्चे' ति सनः कित्त्वम्। रोरुध्यते। रोरोद्धि। रोधयति। अरूरुधत्। अस्याप्रधाने कर्मणि लादयः। अङ्गरोधी। ग्रहादित्वाण्णिनिः, अनुरोधी। 'संपृचा' दिना घिनुण्, प्रतिरोधी। 'भविष्यति गम्यादय' इति इन्नन्तो भविष्यदर्थे, व्रजउपरोधं, व्रजेन उपरोधं, 'सप्तम्यां चोपपीडरुधे' ति सप्तम्यन्ते तृतीयान्ते चोपपदे णमुल्। 'तृतीयाप्रभृतीनी' ति समासविकल्पः। केचिदुपशब्दस्य पीडयतिनैव संबन्धमाहुः। भट्टिकारस्य तूपोपसर्गग्रहणमतन्त्रमिति प्रागेवोक्तम्। रोधः। असुन्। रुधिरम्। 'इषिमदी' त्यादिना किरच्। अनुरुध्यतइति श्यनि गतम्॥ १॥

भिदिर् विदारणे॥ भिनत्ति। भिन्तः, भिन्दन्ति। भिनत्सि। भिन्थः। भिन्थ, भिनद्मि, भिन्द्वः। भिन्द्मः। बिभेद। बिभिदतुः। बिभिदुः। बिभेदिथ। बिभिदिव। भेत्ता। भेत्स्यति। भिनत्तु। भिन्तात्। भिन्ताम्। भिन्दन्तु। भिन्धि। भिनदानि। अभिनत्। अभिन्ताम्। अभिन्दन्। अभिनः। अभिन्तम्। अभिन्त। अभिनदम्। अभिन्द्व। भिन्द्यात्। भिन्द्याताम्। भिन्द्युः। भिन्द्याम्। आशिषि। भिद्यात्। भिद्यास्ताम्। लुङि अभिदत्। अभिदताम्। अभैत्सीत्। अभैत्ताम्। भिन्ते। भिन्त्से। भिन्दे। बिभिदे। बिभिदिषे। भेत्ता। भेत्स्यते। भिन्ताम्। भिन्दाताम्। भिन्त्स्व, भिनदै। अभिन्त। अभिन्दाताम्। अभिन्दत। अभिन्त्याः। अभिन्दि। भिन्दीत। आशिषि भित्सीष्ट। अभित्त। अभित्साताम्। बिभित्सति। बिभित्सते। बेभिद्यते। बेभिदीति। बेभेत्ति। भेदयति। अबीभिदत्। सर्वत्र रुधिवत्प्रक्रिया। भिदेलिमानि काष्ठानि। 'केलिमर उपसंख्यानमि' ति केलिमर्। अयं कर्मकर्तरि, भिद्यो नदः। 'भिद्योद्ध्यौ नद' इति कर्तरि क्यपि निपात्यते। कर्तरि काष्ठभित्। प्रभित् 'सत्सूद्विषे' त्यादिना क्विप्। भिदुरं काष्ठम्। 'विदिभिदिच्छिदेः कुरजि' ति कुरच्। स्वभावादयं

कर्मकर्तरि । भिदा । भिदादित्वादङ् । तत्र भिदा विदारणे इति-पाठादन्यत्र भित्तिरिति भवति । भित्तम् । 'भित्तं शकल' मिति शकले निष्ठानत्वाभावादन्यत्र भिन्नमिति भवति । भिदिरं वज्रम् । 'इषिम-दी' त्यादिना किरच् । उद्भित् क्विप् । उद्भिदः । इगुपधलक्षणः कः ॥ २ ॥

छिदिर् द्वैधीकरणे ॥ छिनत्तीत्यादि भिनत्तिवत् । छिदुरम् । 'वि-दिभिदिच्छिदेः कुरच' इति कुरच् । अयं कर्मकर्तरीति वृत्तिः । करीन्द्रद-र्पच्छिदुरं मृगेन्द्रं, रसज्ञाया इत्थं विदुरशशिधामभ्रमकरानित्यादिप्रयोगद-र्शनात् कर्मकर्तरीति वृत्तिकारोक्तं प्रायिकमित्यात्रेयः। र[1]ज्जुच्छित् । 'सत्-सूद्विषे' त्यादिना क्विप् । छिदा । छिदा द्वैधीकरण इति भिदादिपाठादङ् । अन्यत्र छित्तिः, घञ् छेदः, छैदिकं 'छेदादिभ्यो नित्यमि' ति तदर्हतीत्यस्मिन्नर्थे ठक् । शीर्षच्छेद्यः शैर्षच्छेदिकः । 'शीर्षच्छेदाद्यच्चे' ति । तदर्हतीत्यर्थे यत्ठकौ, अत्रैव निर्देशात् प्रत्ययसन्नियोगेन शिरसः शीर्ष-भावः । छिदिरम् । 'इषिमदी' त्यादिना किरच् । छिद्रम् । 'स्फायि-तञ्ची' त्यादिना रक्, छेद द्वैधीकरणे चुरादौ ॥ ३ ॥

रिचिर् विरेचने ॥ रिणक्ति । रिङ्क्ते । रिणच्मि । रिङ्क्थः रिङ्क्थ । रिणच्मि । रिञ्च्वः रिरेच । रिरिचतुः, रिरेचिथ । रिरिचिव । रेक्ता । रेक्ष्यति । रिणक्तु । रिङ्क्तात् । रिङ्क्ताम् । रिञ्चन्तु । रिङ्ग्धि । रिङ्-क्तात् । रिणचानि । अरिणक् । रिञ्च्यात् । रिञ्च्याताम् । आशिषि, रि-च्यात् । लुङ् । अरिचत् । अरैक्षीत्, रिङ्क्ते । रिरिचे । रेक्ता । रेक्ष्यते । रिङ्क्ताम् । रिङ्क्ष्व । रिणचै । अरिङ्क्त । अरिङ्क्थाः । अरिञ्चि । रिञ्चीत । रिक्षीष्ट । अरिक्त । अरिक्षाताम् । रिरिक्षति । रिरिक्षते । रेरिच्यते । रेरि-चीति । रेरेक्ति । रेचयति । अरीरिचत् । रेकः । घञि 'चजोः कुघिण्ण्यतो-रि' ति कुत्वम् । रिक्थं, 'पातृतुदिवचिरिचिसिचिभ्यस्थक्' विरिञ्चः विरिञ्चिः विरिचिनः, एते पृषोदरादयः । रिच वियोजनसम्पर्चनयोरिति चुरादौ ॥ ४ ॥

१ वयच्छिदिति ३ पु॰ पा॰ ।

विजिर् पृथग्भावे ॥ विनक्ति, विङ्क्तः, विङ्क्ते इत्यादि रिचिवत्। विवेकी। संपृचादिना घिनुण्। विवेकः, घञ्, 'चजो'रिति कुत्वमुभयत्र ॥ ५ ॥

क्षुदिर् संपेषणे ॥ क्षुणत्ति। क्षुन्तः। क्षुन्दन्ति। क्षुणत्सि, क्षुणद्मि। क्षुन्द्वः, क्षुन्ते। क्षुन्दाते। क्षुन्त्से क्षुन्त्खे। क्षुन्द्वहे, चुक्षोद, चुक्षुदतुः। चुक्षोदिथ। चुक्षुदिव। चुक्षुदे। चुक्षुदिषे। चुक्षुदिवहे। क्षोत्ता। क्षोत्स्यति क्षोत्स्यते। क्षुणत्तु। क्षुन्तात्। क्षुन्ताम्। क्षुन्दन्तु। क्षुन्धि। क्षुणदानि। क्षुन्ताम्। क्षुन्दाताम्। क्षुन्दताम्। क्षुन्त्स्व। क्षुणदै। क्षुणदावहै। अक्षुणत्। अक्षुन्ताम्। अक्षुन्दन्। अक्षुणत्। अक्षुणद्। अक्षुणः। अक्षुणदम्। अक्षुन्द्व। अक्षुन्त। अक्षुन्दाताम्। अक्षुन्दत। अक्षुन्थाः। अक्षुन्दि। अक्षुन्द्वहि। क्षुन्द्यात्। क्षुन्द्याताम्। क्षुन्दीत। क्षुन्दीयाताम्। आशिषि क्षुद्यात्। क्षुद्यास्ताम्। क्षुत्सीष्ट, क्षुत्सीयास्ताम्। अक्षुदत्। अक्षुदताम्। अक्षुदन्। अक्षोत्सीत्। अक्षौत्ताम्, अक्षुत्त। अक्षुत्साताम्। चुक्षुत्सति। चुक्षुत्सते। चोक्षुद्यते। चोक्षोत्ति। क्षोदयति। अचुक्षुदत्। क्षुद्रः। 'स्फायितञ्ची'त्यादिना रक्, क्षुद्राभिः कृतं क्षौद्रं मधु। 'क्षुद्राभ्रमरे'ति तेन कृतमिति विषयेञ्। क्षोदिष्ठः, क्षोदीयान्, क्षोदिमा, 'स्थूलदूरे'त्यादिना यणादेर्लोपइष्ठेमेयस्सु पूर्वस्य च गुणः, पृथ्वादित्वादिमनिच्, क्षोदयति। णाविष्ठवदिति यणादेर्लोपो गुणश्च ॥ ६ ॥

युजिर् योगे। युनक्ति। युङ्क्तः। युञ्जन्ति। युनक्षि। युनज्मि। युङ्क्ते। युञ्जाते। युङ्क्षे। युञ्जे। युञ्ज्वहे। युयोज। युयोजिथ। युयोज। युयुजिव। युयुजे। योक्ता। योक्ष्यति। योक्ष्यते। युनक्तु। युङ्क्तात्। युङ्क्ताम्। युञ्जन्तु। युङ्ग्धि। युङ्क्तात्। युङ्क्तम्। युनजानि। युनजाव। युनजाम। युङ्क्ताम्। अयुनक्। अयुनग्। अयुङ्क्तम्। अयुङ्क्त। अयुञ्जि। अयुञ्ज्वहि। युञ्ज्यात्। युञ्ज्याताम्। युञ्जीत। आशिषि युज्यात्। युक्षीष्ट। 'प्रोपाभ्यां युजेरयज्ञपात्रेष्वि'त्यकर्त्रभिप्रायेपि तङ्। यज्ञपात्रे तु पात्राणि प्रयुनक्तीति। अत्र प्रग्रहणं स्वरान्तस्योपसर्गस्योपलक्षणम्। उपग्रहणमपि स्वरादेः,। तथा च वार्त्तिकं स्वराद्यन्तोपसृष्टा-

दिति वक्तव्यमिति । युज्यते ब्रह्मचारी योगम् । 'सृजियुज्योः श्यंस्त्वि'-ति कर्मवद्भावः, श्यंश्च यकोपवादः । अत्र कैयटे युज्यते इति योगः, ब्रह्मचारिणं योगो युनक्ति संबध्नातीत्यर्थः । ततो ब्रह्मचारिणः कर्तृत्वविवक्षायां युज्यते ब्रह्मचारी योगमिति भवतीति, श्यन्यकोः स्वरे भेदः । 'तास्यनुदात्तेदि'ति लसार्वधातुकानुदात्तत्वे यकि प्रत्ययस्वरेण स एवोदात्तः स्यात् । श्यनि तु नित्स्वरेण धातुरुदात्तो भवति । युग्यं वाहनम् । 'युग्यञ्च पत्र'-इति कर्मणि करणे वा क्यपि कुत्वन्निपात्यते । अन्यत्र योग्यमिति । ण्यति कुत्वम्, प्रयोज्यः । नियोज्यः । 'प्रयोज्यनियोज्यौ शक्यार्थे' इति ण्यति कुत्वाभावो निपात्यते, युङ् । युञ्जौ । 'ऋत्विगि'त्यादिना क्विन्, ऋत्विगादिभिर्निपातनैः साहचर्यादञ्चुयुजिक्रुञ्चामन्यदपि कार्यम्भवतीति ज्ञापनाद् उपपदाधिकारेपि निरुपपदादयं प्रत्ययो भवति, 'युजेरसमासे' इति सर्वनामस्थाने नुम् । पदान्ते संयोगान्तलोपः, 'क्विन्प्रत्ययस्य कुरि'-ति कुत्वम् । अन्यत्रानुस्वारपरसवर्णौ । असर्वनामस्थाने युजः । युग्भ्यामिति, युक्ष्वित्यत्र कुत्वे 'खरि चे'ति चर्त्वम् । अश्वयुक् । 'सत्सूद्विषे'-त्यादिना क्विप् । अत्र सूत्रे युजेत्यकारो न विवक्षित इति युनक्तियुज्यत्योर्द्वयोरपि ग्रहणं, 'युजेरसमास' इतीकारवतः सर्वनामस्थाने समासे नुम्निषेधोकाराविवक्षायां ज्ञापकः । यदि हि युजेः क्विप् न स्यात् ऋत्विगित्यादिना क्विन्नपि निपातनैः साहचर्यादनुपपदादेव स्यादित्यश्वयुगिति रूपमेव नास्तीति क्विन्नुम्निषेधेन । योक्त्रः । 'दाम्नी'त्यादिना ष्ट्रन् । अत्र स्तौत्यादिसाहचर्यादुभयपदिनोस्यैव ग्रहो न तु युज्यतेः, अकारस्तूच्चारणमात्रार्थः । हरदत्तोप्यनभिधानाद्युज्यतेर्न ग्रह इति । योगी । 'संपृचादि'ना घिनुण् । अत्र युनक्तियुज्यत्योर्द्वयोरपि ग्रहणं निरनुबन्धकस्योपादानादकारप्रश्लेषेपि नास्ति प्रमाणम् । प्रायोगिकम् । भवार्थे अध्यात्मादित्वात् ठञ् । 'अनुशतिकादित्वादुभयपदवृद्धिः । योगाय प्रभवति योग्यः, यौगिकः । 'योगाद्यच्चे'ति यत्ठञौ । युगम् । घञ् । उञ्छादिपाठादगुणत्वम्, विशिष्टविषयं चैतत्, रथाङ्गे कालविशेषे च, युग्यम् । 'तद्वहति रथयुगे'ति यत् । संयुगे साधु सांयुगीनम् । 'प्रति-

जनादिभ्यः खञि’ति खञ्, प्रतिजनादिपाठादेव संयुगशब्दस्य घञि गुणाभावः । परियोगः । पलियोगः ‘परेश्च घाङ्कयोरि’त्यत्र योगे चेति वक्तव्याद्वा लत्वम् । रुधादयोऽनुदात्तास्स्वरितेतः ॥ ७ ॥

अथ सेटौ स्वरितेतावाह ।

उच्छृदिर् दीप्तिदेवनयोः ॥ उकारः क्त्वायामिड्विकल्पार्थः । छृणत्ति । छृन्त्तः । छृन्दन्ति । छृणत्सि । छृन्थः, छृन्त्ते । छृन्त्से । छृन्द्वे । छृन्द्महे । चच्छर्द । चच्छृदतुः । चच्छृदुः । चच्छृदिषे । ‘सेसिची’ति सकारादावपिड्विकल्पं बाधित्वा क्रादिनियमान्नित्य एवेड्भवति । अन्ये तु विकल्पमाहुः, क्रादिनियमस्य प्रतिषेधविषयत्वात् । छर्दिता । छर्दिष्यति । छर्दिष्यते । छर्त्स्यते । ‘सेसिची’तीड्विकल्पः । छृणत्तु । छृन्तात् । छृन्ताम् । छृन्दन्तु । अच्छृणत् । अच्छृन्ताम् । अच्छृन्त । अच्छृन्दाताम् । छृन्द्यात् । छृन्दीत । आशिषि छृद्यात् । छर्दिषीष्ट । छृत्सीष्ट । अच्छृदत् । [1]अच्छर्दिष्ट । अच्छर्दिषाताम् । चिच्छर्दिषति । चिच्छृत्सति । चरीच्छृद्यते । चर्छर्ति । छर्दयति । अचच्छर्दत् । अत्र सन्वदित्वादन्तरङ्गत्वात्तुक् । न चास्ति वार्णादाङ्गं बलीय इति, व्याश्रयत्वात्, तुकः छकार आश्रयः, इत्वस्य तु चङ्परो णिः । अ[2]चच्छृदत् । उच्छर्दा । छृत्वा । छर्दित्वा । उदित्त्वादिड्विकल्पः छृण्णः । छृण्णवान् । ‘यस्य विभाषे’त्यनिट्त्वम् । छृदी संदीपने युजादौ ॥ ८ ॥

उतृदिर् हिंसानादरयोः ॥ तृणत्तीत्यादि छृणत्तिवत् ॥ ९ ॥

कृती वेष्टने ॥ कृणत्ति । कृन्त्तः । कृन्तन्ति । कृणत्सि । कृणद्मि । कृणत्तु । अकृणत् । कृन्त्यात् । कर्तितेत्यादि तौदादिकवत् ॥ १० ॥

ञिइन्धी दीप्तौ ॥ उदात्तोऽनुदात्तेत् । इन्धे । इन्धाते । इन्त्से । इन्धे । ‘श्नान्नलोप’ इति श्नात्परस्य प्रकृतेर्नकारस्य लोपः क्ङितोः । ‘श्नसोरल्लोप’ इत्यल्लोपः, इन्धाञ्चक्रे । इजादेरित्याम् । अत्र

[1] अच्छृत्त । अच्छृत्साताम् । अच्छृत्सतेति ४ । पु॰ पाठ उपलभ्यते स न युक्तः ।
[2] अचिच्छृददिति ४ पु॰ पाठोऽपि तथैव ।

न्यासकारादयः । केचि 'दिन्धिभवतिभ्यां च' इति इन्धेः परस्य लिटः कित्त्वविधानसामर्थ्यादामो विकल्पमिच्छन्ति तदिन्धेश्छन्दो विषयत्वादुवो वुको नित्यत्वादित्यादि भाष्यवार्तिकविरोधादुपेक्ष्यम् । इन्धिता । इन्धिष्यते । इन्धाम् । इन्धाताम् । इन्धताम् । इन्त्स्व । इनधै । ऐन्ध । ऐन्धाताम् । ऐन्धत । ऐन्धाः । ऐन्धि । इन्धीत । इन्धीयाताम् । आशिषि इन्धिषीष्ट । इन्धिषीयास्ताम् । ऐन्धिष्ट । ऐन्धिषाताम् । इन्दिधिषते । 'नन्द्रा' इति नकारवर्जितस्य द्विर्वचनम् । इन्धयति । ऐन्दिधत् । इद्धः । ञित्वाद्वर्तमाने क्तः । ईदित्त्वादनिट्त्वम् । एधः । 'श्रवोदैधोद्म' ति निपातनाद्घञि नलोपः । सान्तस्त्वेधस्शब्द औणादिकेऽसुनि बाहुलकाच्चलोपे । अग्निमिन्धे इति अग्निमिन्धः । 'भ्राष्ट्राग्न्योरिन्धे' इति मुम् । समित् । समिद् । समिधौ । 'संपदादित्वात् क्विप् । सामिधेन्यो मन्त्रः । 'समिधामाधाने षेण्यण्' इति षेण्यण् । सामिधेनी ऋक् । षित्वान्ङीष् । 'हलस्तद्धितस्ये' ति यलोपः, अग्निमिन्धे इत्यग्नीत् । ऋत्विग्विशेषः, क्विप् चेति क्विप् । आग्नीध्रः । अग्नीधः शरणे रण् भं चेति रण्प्रत्ययः, भं चेति भत्वात्पदत्वाभावाज्जश्त्वं न भवति । शरणं गृहम् । ञित्वाद्वृद्धिः, । 'आग्नीध्रः साधारणादञ्चे' ति स्वार्थेञ्यद्यपीदमेव रूपम् । प्रयोजनन्तु स्त्रियामाग्नीन्ध्री शालेति 'टिड्ढेति' ङीप् । विविधमिन्धे इति वीध्रः । अग्निर्विमलश्च । 'वाविन्धेरि' ति वावुपसर्गे उपपदइन्धेः क्रन्, कित्त्वादनुनासिकलोपः ॥ ११ ॥

खिद दैन्ये ॥ खिन्ते । खिन्दाते । खिन्त्से । खिन्दे । खिन्ताम् । खिन्दाताम् । खिन्त्स्व खिनदै । अखिन्त । अखिन्दाताम् । अखिन्दि । खिन्दीत । चिखिदे । खेत्तेत्यादि खिद्यतिवत् । खिन्दतीति शे गतम् ॥ १२ ॥

विद विचारणे ॥ विन्ते इत्यादि खिनत्तिवत् ॥ वित्तः, विन्नः । 'नुदविदोन्दत्रे' ति निष्ठानत्वविकल्पः ॥ उन्दिना साहचर्यादस्यैव तत्र ग्रहः । खिदिविदी अनुदात्तावनुदात्तेतौ ॥ १३ ॥

शिष्लृ विशेषणे ॥ इतो भुनक्त्यन्ता अनुदात्ता उदात्तेतः । शिनष्टि । शिंष्टः । शिंषन्ति । शिनक्षि । शिनष्मि । शिंष्वः । ष्टुत्वं तवर्गस्य, सकारादौ षस्य कत्वम् । शिशेष । शिशिषतुः । शिशेषिथ । शिशिषिव । शेष्टा, शेक्ष्यति, शिनष्टु, शिंष्टात् । शिंष्टाम् । शिंड्ढि । हेर्धित्वं, षत्वजश्त्वानुस्वारपरसवर्णा यथायोग्यम् । शिनषाणि । अशिनट् । अशिनड् । षकारस्य 'झलां जशोन्ते' इति जश्त्वे चर्त्वविकल्पः । अशिंष्टाम् । अशिनट् । अशिनषम् । अशिंष्व । शिंष्यात् । शिंष्याताम् । आशिषि । शिष्यात्, लुङि अशिषत् । लृदित्त्वात्परस्मैपदे ऽङ् । तङि तु क्सः, व्यत्यशिक्षतेत्यादि । शिशिक्षति । शिशिक्षते । शेशिष्यते । शेशिषीति । शेशेष्टि । शेषयति । अशीशिषत् । शिष्टः, शिष्टवान् । विशेषः । वैशेषिकं, 'विनयादिभ्यश्चे' ति स्वार्थे ठक् । महत्या विशिष्टः महाविशिष्टः 'महदात्वे घासकरविशिष्टेषूपसंख्यानमि' ति पुंवद्भाव आत्वं च । शेषतीति दण्डके हिंसायां शपि । शेषयतीति युजादिपाठादसर्वोपयोगे ॥ १४ ॥

पिष्लृ संचूर्णने ॥ पिनष्टीत्यादि शिषिवत् । शुष्कपेषं पिनष्टि । चूर्णपेषं पिनष्टि । रुक्षपेषं पिनष्टि । 'शुष्कचूर्णरुक्षेषु पिष' इति शुष्कादौ कर्मण्युपपदे णमुल् । शुष्कं पिनष्टीत्यर्थः । उदपेषं पिनष्टि । 'स्नेहने पिष' इति स्नेहवाचिनि करणे उपपदे णमुल्, उदकेन पिनष्टीत्यर्थग्रहणम् । 'पेषं वासवाहनधिषु चे' ति उदभावः । सर्वत्र कषादित्वाद्यथाविध्यनुप्रयोगः । पिष्टमयम् । 'पिष्टाच्चे' ति विकारे मयट् । विष्टकर्णः । 'कर्णे लक्षणस्ये' ति कर्णे उत्तरपदे लक्षणवाचिनो विधीयमानो दीर्घस्तत्रैव विष्टादिपर्युदासान्न भवति । चोरस्य पिनष्टि । 'जासिनि प्रहणे' त्यादिना कर्मणि शेषे हिंसायां षष्ठी, अशेषे चाहिंसायाञ्च चोरं पिनष्टि, धानाः पिनष्टीति द्वितीयैव भवति ॥ १५ ॥

भञ्जो आमर्द्दने ॥ भनक्ति । भङ्क्तः । भञ्जन्ति । भनक्षि । भनज्मि, भञ्ज्वः । 'श्नान्नलोप' इति प्रकृतिनकारस्य लोपः । नकारे परतोकारस्य 'अतो दीर्घो यञी' ति दीर्घो न भवति । अकारान्तस्यानङ्गत्वात् । किन्तु

'श्नशोरल्लोप' इत्यकारलोपो, झलि 'चोः कुरि'ति कुत्वे 'खरि चे'ति चर्त्वं, बभञ्ज । बभञ्जतुः । बभञ्जिथ । बभङ्क्थ । बभञ्जिव । क्रादिनियमादिट्, थल्यु 'पदेशेत्वत' इति निषेधाद्भारद्वाजनियमाच्च विकल्पः । भङ्क्ता । भङ्क्ष्यति । भनक्तु । भङ्क्तात् । भङ्ग्धि । हेरपित्त्वात् 'श्नसोरल्लोपः' । धित्वे कुत्वं गकारः । भनजानि । अभनक् । अभनग् । पदान्तत्वात्कुत्वे चर्त्वविकल्पः । अभङ्क्ताम् । अभञ्जन् । अभनक् । अभनजम् । भञ्ज्यात् । आशिषि भज्यात् । अभाङ्क्षीत् । अभङ्क्ताम् । झलि सिचो लोपः । बिभङ्क्षति । बम्भज्यते । बम्भञ्जीति । बम्भङ्क्ति । 'जपजभदहदशभञ्जे'ति यङि यङ्लुकि चाभ्यासस्य नुक् । तस्य अनुस्वारे पदान्तवद्वचनात्परसवर्णविकल्पः । भञ्जयति । अबभञ्जत् । कर्मणि अभञ्जि । अभाजि । 'भञ्जेश्च चिणी'त्यनुनासिकलोपविकल्पः । भङ्क्त्वा । भक्त्वा 'जान्तनशां विभाषे'ति क्त्वायामनुनासिकलोपविकल्पः । भग्नः । भग्नवान् 'ओदितश्चे'त्योदित्त्वान्निष्ठानत्वम्, तस्यासिद्धत्वात्पूर्वमेव कुत्वम् । भङ्गुरा । 'भञ्जभासे'ति कर्मकर्तरि घुरच् । 'चजोः कु घिण्ण्यतोरि'ति कुत्वम् । भङ्गः । घञ् । भङ्गा कुसुम्भम् । कर्मणि घञन्ताट्टाप् । भङ्गानां भवनं क्षेत्रं भङ्ग्यम् । 'विभाषा तिलमाषोमाभङ्गाणुभ्य' इति यत् । 'विभाषाग्रहणात् खञि भाङ्गीनं' भङ्गापि धान्यमिति स्थितं, भङ्गानां रजो भङ्गाकटम् । 'अलाबूतिलोमाभङ्गाभ्यो रजसि कटजि'ति कटच् । भङ्गी । पिप्पल्यादित्वान्ङीष्, भाज् दीप्त्यर्थ इति चुरादौ दण्डके इदित् । भजते भजतीति सेवायां शपि गतम् ॥ १६ ॥

भुज पालनाभ्यवहारयोः ॥ भुनक्ति । भुङ्क्तः । भुञ्जन्ति । भुनक्षि । भुङ्क्थः । भुञ्ज्यात् । आशिषि भुज्यात् । अभौक्षीत् । अभौक्ताम् । बुभुक्षति । 'हलन्ताच्चे'ति सनः कित्त्वम् । बोभुज्यते । बोभुजीति । बोभोक्ति । भोजयति । अबूभुजत् । भुङ्क्ते । भुञ्जाते । भुञ्जते । भुङ्क्षे, बुभुजे । बुभुजिषे । भोक्ता । भोक्तासे । भोक्ष्यते । भुङ्क्ताम् । अभुङ्क्त । अभुञ्जाताम् । भुञ्जीत । भुञ्जीयाताम् । आशिषि । भुक्षीष्ट । अभुक्त । 'लिङ्सिचावात्मनेपदेष्वि'ति कित्त्वादगुणत्वम् । बुभुक्षते ।

'भुजोऽनवन' इति तङ्। भुजोऽदने इति वक्तव्ये अनवनइतिवचनमव्यवहारादन्यत्रापि तङर्थं, तथा चेदमपि सिध्यति। 'बुभुजे पृथिवीपालः पृथिवीमेव केवलाम्'। अनुभव इहार्थः। भोजयति देवदत्तं यज्ञदत्तः। 'गतिबुद्धी'त्यादिना प्रयोज्यः कर्म। निगरणार्थत्वान्नित्यम्परस्मैपदम्। इदमेषां भुक्तम्, 'क्तोऽधिकरणे च'त्यधिकरणे भावे कर्मणि वर्तमाने क्तः। एवं भावकर्मणोरुदाहार्यम्। भुक्ता ब्राह्मणा इति, भुक्तमेषामस्तीत्यर्शआद्यजन्तः, 'भोज्यं भक्ष्य'इति ण्यति अकुत्वं निपात्यते। अभक्ष्ये तु भोग्या लक्ष्मीः। भोगः शरीरं 'हलश्चे'ति संज्ञायां घञ्। मातृभोगीणः। 'आत्मन्विश्वजनभोगोत्तरपदादि'ति तस्मै हितमिति विषये खः। आचार्यभोगीन इत्यत्र'चार्यादणत्वं चेति' णत्वाभावः। राजभोगीनः। राजाचार्याभ्यान्तु नित्यं भोगोत्तरपदाभ्यामेवेति भोगोत्तरपदाभ्यामेवाभ्यां हितप्रत्ययनियमादाचार्याय हितं राज्ञे हितमित्यत्र वाक्यमेव भवति न तु सामान्यतश्छः प्रत्ययः। मात्रे हितमित्यादौ तु मात्रीयमित्यादि भवत्येव। भुजः। 'हलश्चे'ति करणे घञ्। 'भुजन्युब्जौ पाण्युपतापयो'रिति अगुणत्वमकुत्वं च निपातितम्। भुजा। अयमेव टाबन्तः। भोजः। पचाद्यच्। भजतीति शपि। भुजतीति शे कौटिल्ये। शिषादयश्चत्वारोऽनुदात्ता उदात्तेतः॥ १९॥

तृह हिंसायाम्॥ तृणेढि, तृण्ढः। तृंहन्ति। तृणेक्षि। तृण्ढः। तृण्ढ। तृणेह्मि। तृंह्वः। तृंह्मः। 'तृणह इमि'ति हलादौ पिति सार्वधातुके तृणह इमागमः। आद्गुणः, झलि पदान्ते च 'होढ' इति हो ढत्वे 'झषस्तथोर्धोऽध' इति धत्वे ष्टुत्वे 'ढो ढे लोप' इति पूर्वस्य लोपः। अपिति श्नसोरल्लोपे ऽनुस्वारपरसवर्णौ, सिपि ढत्वे 'षढोः कः सी'ति कत्वं, ततर्ह। ततृहतुः। ततृहुः। ततर्हिथ। ततृहिव। तर्हिता। तर्हिष्यति। तृणेढु। तृण्ढात्। तृण्ढाम्। तृंहन्तु। तृण्ढि। तृणहानि। तातङो ङित्त्वान्ङिच्च पिन्न भवतीत्यपित्त्वाद्धेरपि 'सेर्ह्यपिच्चे'त्यपित्त्वान्नेमागमः। उत्तमस्य तु पित्त्वेऽप्यहलादित्वान्न भवति। अतृणेट्। अतृणेड्। अतृण्ढाम्। अतृंहन्। अतृणेट्। अतृणेड्। अतृण-

हम् । अतृंहू । तिप्सिपोर्हल्ङ्यादिलोपे प्रत्ययलक्षणेन हलादिपित्सार्वधातुकपरत्वादिमागमः । वर्णाश्रये नास्ति प्रत्ययलक्षणमिति निषेधो वर्णमात्रप्रत्ययविषयत्वादिति हलादिप्रत्ययस्याश्रयणान्न प्रवर्तते, मिपि नित्यत्वात्पूर्वमेवामि अहलादित्वान्नेमागमः । तातङश्च ङित्त्वात् श्नसोरल्लोपे तृणहरूपस्याभावान्नेमागमप्रसङ्गः । आशिषि तृह्यात् तृह्यास्ताम् । अतर्हीत् । अतर्हिष्टाम् । 'नेटी'ति वृद्धिनिषेधः । तितर्हिषति । तरीतृह्यते । तरीतर्ढि । तर्हयति । अतीतृहत्, अततर्हत् । उर्ह्वा । तर्हित्वा । 'नक्त्वामेडि' त्यकित्त्वम् ॥ १८ ॥

हिसि हिंसायाम् ॥ हिनस्ति । हिंस्तः । हिंसन्ति । हिनस्सि । हिनस्मि । इदित्त्वान्नुम् । तस्य 'श्नान्नलोप' इति लोपः । ङिति श्नसोरल्लोपे 'नश्चापदान्तस्ये' त्यनुस्वारः । जिहिंस, जिहिंसतुः । जिहिंसिथ । जिहिंसिव । हिंसिता । हिंसिष्यति । हिनस्तु । हिंस्तात् । हिंस्ताम् । हिंसन्तु । हिन्धि । 'श्नान्नलोपश्नसोरल्लोपयो 'र्द्धिचे'ति सलोपे ऽनुस्वारपरसवर्णौ । हिनसानि । अहिनत् । अहिंस्ताम् । अहिंसन् । अहिनत् । अहिनद् । अहिनः । अहिनसम् । अहिंस्व । तिपि 'तिप्यनस्तेरि'ति सस्य दः । 'सिपि धातोरुर्वे'ति दत्वरुत्वे, हिंस्यात् । हिंस्याताम् । हिंस्यात् । हिंस्यास्ताम् । लिङि । अहिंसीत् अहिंसिष्टं । जिहिंसिषति । जेहिंस्यते । जेहिंस्ति । हिंसयति । अजिहिंसत् । हिंसकः । 'निन्दहिंसे'ति वुञ् । हिंस्रम् । 'नमि कम्पी' त्यादिना रः । हिंसा । 'गुरोश्च हल' इत्यकारः । हिंसित्वा, हिंसितः । हिनस्तीति सिंहः । अच् । पृषोदरादित्वादाद्यन्तविपर्ययः ॥ १९ ॥

उन्दी क्लेदने ॥ उनत्ति । उन्तः । उनदानि । औनत् । औन्ताम् । औन्दन् । औनः । औनत् । औनद् । औनदम् 'दश्चे'ति सिपि वा रुत्वम् । उन्द्यात् । उन्द्याताम् । उद्यात् । उद्यास्ताम् । लिङि, औन्दीत् । औन्दिष्टाम् । उन्दिदिषति । 'न न्द्रा' इति नकारस्याद्वित्वम् । उन्दयति । उन्दित्वा । उन्नम् । उत्तम् । ईदित्त्वादनिट्त्वम् । 'नुदविदोन्दे' ति निष्ठानत्वविकल्पः । अवोदः । घञ् । किञ्चिदार्द्रः, उन्द-

नमोद्म । मनिन्नौणादिकः । ओद्मः । 'अवोदैधौद्म' ति नलोपो घञ्यगुणत्वञ्च निपात्यते । इन्दुः । 'उन्देरिच्चादे' रिति उप्रत्यय इकारश्चोकारस्य । ओदनम् । 'उन्देर्नलोपश्चे'ति युचि नलोपः । उद्रम् । 'स्फायीतञ्चीति' रक् । उदकः । उदकम् । क्वुन्नन्तो निपातितः । उदधिः । क्षीरोदः । 'उदकस्योदः संज्ञाया' मिति पूर्वपदस्योत्तरपदस्योदादेशः । उदवासः, उदकस्य वाहन, उदवाहनः । उदधिर्घटः । 'पेषं वासवाहनाधिषु च' पेषमादावुत्तरपदे उदकस्योदादेशः, असंज्ञार्थं वचनम्, उदकस्य पात्रमुदकपात्रम् 'एकहलादौ पूरयितव्ये ऽन्यतरस्यामि'ति वोदभावः । इह पूरयितव्यं पूरणीयं, तद्वाचिन्यसहाये हलादावुत्तरपदे उदकस्योद इति सूत्रार्थः । उदमन्थः । 'मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च'ति मन्थादिषूत्तरपदेषूदकस्योदभावः । उदौदन इत्यादि चोदाहार्यम् । उदन्वान् घटः, उदन्वान् नाम ऋषिः । 'उदन्वानुदधौ च'ति मतुप्युदकस्योदभाव उदधौ संज्ञायां च निपात्यते, उदधिग्रहणमसंज्ञार्थम् । उदन्यति । पिपासतीत्यर्थः । 'अशनायोदन्ये'ति क्यच्युदकस्योदभावः पिपासायाम् । उदक्यः । 'उदकस्योदः संज्ञायामि'ति दिगादिपाठाद्यत् ॥ २० ॥

अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु ॥ अनक्ति । अङ्क्तः । अञ्जन्ति । अनक्षि । अनज्मि । अञ्ज्वः । 'श्नान्नलोपः' । 'श्नसोरल्लोपः' । 'चोः कु'र्झलि पदान्ते च 'खरि च'ति चर्त्वम् । आनञ्ज । आनञ्जतुः । आनञ्जिथ । आनङ्क्थ । आनञ्जिव । आनञ्ज्व । ऊदित्त्वादिड्विकल्पः । क्रादिनियमः प्रतिषेधविषय इत्युक्तम्, 'अत आदे'रि'त्यभ्यासादेर्दीर्घे 'तस्मान्नुड्' ति नुट् । अङ्क्ता । अञ्जिता । अङ्क्ष्यति । अञ्जिष्यति । अनक्तु । अङ्क्तात् । अङ्ग्धि । अनजानि । आनक् । आङ्क्ताम् । आनजम् । आञ्ज्व । अञ्ज्यात् । अज्यात् । लिङि । आञ्जीत् । आञ्जिष्टाम् । 'अञ्जेः सिची'ति नित्यमिट् । अञ्जिजिषति । 'स्मिपूङ्रञ्ज्वशांसनी'ति नित्यमिट् । 'न न्द्राः' इति नकारस्य न द्विर्वचनम् । अञ्जयति । आञ्जिजत् । अञ्जित्वा । अङ्क्त्वा । अनिट्पक्षे 'जान्तनशां विभाषे'ति पक्षे ऽनुनासिकलोपः । इट्पक्षे 'न

त्त्वा सेडि' त्यकित्त्वम् । अक्तः । अक्तवान् । 'यस्य विभाषे' त्यनिट्त्वम् । आज्यम् । 'आङ्पूर्वादञ्जेः संज्ञायामि'ति क्यप्यनुनासिकलोपः । व्यङ्ग्यम् । ण्यति कुत्वम् । अङ्गः । भावे घञ् । अञ्जिका । संज्ञायां ण्वुल् । लिपि विशेषः । अञ्जनं ल्युट् । काञ्जिकम् । अञ्जिरभिव्यक्तिः । केन जलेन अञ्जिरस्येति बहुव्रीहौ कप् । अञ्जलिः । 'ऋतन्यञ्जी'त्यादिना ऽलिच् । द्वे अञ्जली प्रमाणमस्य द्व्यञ्जलं व्यञ्जलम् 'द्वित्रिभ्यामञ्जलेरि' ति समासान्तो ऽच् द्विगौ । 'अद्ध्यर्धपूर्वद्विगो'रित्यार्हीयस्य ठञो लुक् । अद्विगौ द्व्यञ्जलिः ॥ २१ ॥

तञ्चू सङ्कोचने ॥ तनक्ति । तङ्क्तः । तञ्चन्ति । तनक्षि । तनच्मि । ततञ्च । ततञ्चतुः । ततञ्चिथ । ततङ्क्थ । ततञ्चिव । ऊदित्त्वा'त्स्वरत्यादि'ना इड्विकल्पः । क्रादिनियमः प्रतिषेधविषय इत्युक्तम् । तङ्क्ता । तञ्चिता । तङ्क्ष्यति । तञ्चिष्यते । तनक्तु । तङ्क्तात् । तङ्ग्धि । तनचानि । अतनक् । अतङ्क्ताम् । अतञ्चन् । अतनक् । अतनचम् । अतञ्च्व । तञ्च्यात् । आशिषि तच्यात् । अताङ्क्षीत् । तितञ्चिषति । तितङ्क्षति । तातच्यते । तातङ्क्ति । तञ्चयति । अततञ्चत् । आतञ्चनम्, ल्युट् । आतङ्कः । घञ् तञ्चित्वा, इट्पक्षे 'न त्त्वा सेडि'त्यकित्त्वाच्चलोपाभावः । तक्तः । 'यस्य विभाषे' त्यनिट्त्वम् । अयं प्रथमान्तोपि, तृतीयान्तमध्ये ऊदित्प्रसङ्गादेकवर्गीयत्वाच्च पठितः । आत्रेयादयस्तु तृतीयान्तमेव पठन्ति । तक्रम् । 'स्फायितञ्ची' त्यादिना रक् । बाहुलकाच्चकारस्य ककारः ॥ २२ ॥

ओविजी भयचलनयोः ॥ विनक्ति । विङ्क्तः । विञ्जन्ति । विनक्षि । विनज्मि । विञ्ज्वः । विञ्ज्मः । विविजतुः । विविजिथ । विविजिव 'विज इ'डिति इडादिप्रत्ययस्य पित्त्वेपि ङित्त्वान्न गुणः । विजिता । विजिष्यति । विनक्तु । विङ्क्तात् । विङ्ग्धि, विनजानि । अविनक् । अविङ्क्ताम् । विञ्ज्यात्, विञ्ज्यातां, विज्यात् । विज्यास्तां, लिङि । अविजीत् । अविजिष्टाम् । विविजिषति । वेविज्यते । वेविजीति । वेवेक्ति । वेजयति । अवीविजत् । विजित्वा । 'न

क्त्वा सेडि' त्यकित्त्वेपि 'विज इडि' ति ङित्त्वाच्च गुणः । विग्नः । विग्नवान् । ईदित्त्वादनिट्त्वम् । ओदित्त्वाच्चिष्ठानत्वम् । वेगितमिति घञन्तात्तारकादित्वादितजित्युक्तम् । वेवेक्ति । वेविक्ते इति श्लौ गतम् । उद्विजत इति शे ॥ २३ ॥

वृजी वर्जने ॥ वृणक्ति । वृङ्क्तः । वृञ्जन्ति । ववर्ज । ववृजतुः । ववर्जिथ । ववृजिव । वर्जिता । वर्जिष्यति । वृणक्तु । वृङ्क्तात् । वृङ्क्ताम् । वृङ्ग्धि । वृणजानि । अवृणक् । अवृङ्क्ताम् । अवृणक्, अवृङ्क्त । अवृणजम् । अवृञ्ज्व । वृञ्ज्यात् । वृज्यात् । लिङि, अवर्जीत् । अवर्जिष्टाम् । विवर्जिषति । वरीवृज्यते । वरिवृजीति । वरीवर्क्तीत्यादि । वर्जयति । अवीवृजत् । अववर्जत् । वर्जित्वा । 'न क्त्वा सेडि' त्यकित्त्वाद्गुणः । वृक्तः, ईदित्त्वादनिट्त्वम् । प्रवर्ग्यम् । ण्यति कुत्वम् । अत्र वृची वरणे इति दुर्गादयः पठन्ति, तस्यापि वृजिवद्रूपञ्चेयम् ॥ २४ ॥

पृची सम्पर्के ॥ पृणक्ति । पृङ्क्तः । पृञ्चन्ति । पपर्च । पपृचतुः । पपर्चिथेत्यादि वृजिवत् । संपर्की । 'संपृचे' त्यादिना घिनुण् । तृहादय उदात्ता उदात्तेतः ॥ २५ ॥

वृत् ॥ रुधादयो वृत्ता इत्यर्थः । धातुपारायणे तु गणसमाप्तिर्नेष्यते, तेन लुनति पुनतीति सिध्यतीति ॥

इति श्रीपूर्वदक्षिणपश्चिमसमुद्राधीश्वरकम्पराजसुतसङ्गममहाराजमहामन्त्रिणा सायणसुतेन माधवसहोदरेण सायणाचार्येण विरचितायां माधवीयायां धातुवृत्तौ रुधादयः संपूर्णाः ॥

अथ तनादयः ॥

तनु विस्तारे ॥ तनोति । तनुतः । तन्वन्ति । तनोषि । तनोमि, तन्वः । तन्मः । तनुमः । 'तनादिकृञ्भ्य उरि' ति उप्रत्ययः । शपोऽपवादः । तस्य पिति 'सार्वधातुकार्द्धधातुकयोरि' ति गुणः, अन्यत्राजादौ यणादेशः । वकारमकारादौ 'लोपश्चास्यान्यतरस्यां म्वोरि' ति पक्षे लोपः । ततान । तेनतुः । तेनुः । तेनिथ । तेनथुः । तेन । ततान । ततन । तेनिव । क्ङिति लिटि 'थलि च सेटी'त्येत्वाभ्यासलोपौ । तनिता । तनिष्यति । तनोतु । तनुतात् । तनुताम् । तन्वन्तु । तनु । तनवानि । 'उतश्च प्रत्ययादि' ति हेर्लुक् । अतनोत् । अतनुताम् । अतन्वन् । अतनोः । अतनवम् । अतन्व । अतनुव । तनुयात् । तनुयाताम् । तनुयाः । तनुयाम् । आशिषि तन्यात् । तन्यास्ताम् । अतनीत् । अतानीष्टाम् । अतनिष्टाम् । 'अतो हलादेरि' ति वा वृद्धिः । तनुते । तन्वाते । तन्वते । तनुषे । तन्वे । तनुवहे । तन्वहे । तेने । तेनाते । तेनिषे । तेनिवहे । तनिता । तनिष्यते । तनुताम् । तन्वाताम् । तनुष्व । तनवै । अतनुत । अतन्वाताम् । अतन्वत । अतनुथाः । तन्वीत । तन्वीयाताम् । तन्वीथाः । तन्वीय । आशिषि । तनिषीष्ट । तनिषीयास्ताम् । अतत । अतनिष्ट । अतनिष्ठाः । अतथाः, । अतनिध्वम् । 'तनादिभ्यस्तथासोरि' ति तथासोः पक्षे सिचो लुक् । थासा साहचर्यादात्मनेपदस्य तशब्दस्येह ग्रहणादतनिष्ट यूपमित्यत्र लुङ् भवति । तितनिषति, तितांसति । तितंसति । 'तनिपतिदरिद्राणामुपसंख्यानमिती' ड्विकल्पः । 'तनोतेर्विभाषे' ति झलि सनि वा दीर्घत्वम् । एवं तङ्यपि त्रैरूप्यं, तन्तन्यते । 'नुगत' इत्यभ्यासस्य नुक् । तन्तन्ति । तन्तान्तः । 'अनुनासिकस्ये'ति दीर्घः । लुकि 'अनुदात्तोपदेशे' त्यादिनानुनासिकलोपस्तनोत्यादीनामिति गणनिर्देशाच भवति । तानयति । अतीतनत् । तायते । तन्यते । 'तनोतेर्यकी'- ति वात्वम् । अवतनोतीत्यवतानः । 'तनोतेर्ण उपसंख्यानमि' ति णः । तनित्वा । तन्त्वा । 'उदितो वे' तीड्विकल्पः । 'अनुदात्तो-

पदेशे' त्यनुनासिकलोपः । ततं, 'यस्य विभाषे' त्यनिट्त्वं, पूर्ववदनुनासिकलोपः । सततं, 'समो वा हिततततयोरि' ति मलोपः, व्यात्र सातत्यमिति नित्यमलोप इष्यते । वितत्य । 'वा ल्यपी' त्यस्य व्यवस्थितविभाषात्वान्नित्यमनुनासिकलोपः । तन्तिः । 'न क्तिचि दीर्घश्चे'- ति क्तिचि दीर्घानुनासिकलोपयोर्निषेधः । ततिः । क्तिनि नलोपः । 'तितुत्रेती' ति निषेधः । परीतत् । 'गमः क्वावि' ति अत्र गमादीनामितिवचनादनुनासिकलोपे तुक्, 'नहिवृती' त्यादिना पूर्वपदस्य दीर्घः । तनुः । 'तनुभृमृशी 'त्यादिनोप्रत्ययः गुणवचनत्वेन 'वोतो गुणवचनादि 'ति वा ङीषि तन्वी, तनुशब्दः स्त्रीजातिवचनोऽपि, तत 'ऊङुत' इत्यूङि तनूः । तथा च प्रयुज्यते ननु सुतनूमनुपालयानुयान्तीं, वरतनु सम्प्रवदन्ति कुक्कुटा इति । केवलस्य त्वस्याप्रसिद्धत्वादप्रयोगः । तनूः शरीरम् । 'कृषिचमितनी' त्यूकारः । तनुः । तनुपी । 'अर्तिपृवपियजितनिधनितपिभ्यो नित्' ति उस् । तन्त्रम् । ष्ट्रन्, तातः । 'द्रुतनिभ्यां दीर्घश्चे' ति क्तप्रत्यय अनुनासिकलोपे पूर्वस्य दीर्घः । तितउः परिपवनम् । 'तनोतेर्डउः सन्वच्चे' ति डउप्रत्यये डित्वाट्टिलोपः । सन्वद्भावाद् द्विर्वचनादि, सूत्रे डउरितिव्यस्तोच्चारणान्न सन्धिकार्य्यम् ॥ तनु श्रद्धोपकरणयोरिति युजादौ ॥ १ ॥

षणु दाने ॥ सनोति । सनुते । इत्यादि तनोतिवत् । 'धात्वादेः षः सः' । णत्वन्तु निमित्तापायादपैति । विशेषस्तु 'जनसनखनां सन् झलोरि' ति झलादौ सनि तङि च नित्यमात्वम् 'ये विभाषे' ति यकारादौ क्ङिति वात्वं च । सिषासति । 'सनीवन्ते 'त्यादिनेड्विकल्पः । इट्पक्षे सिसनिषति । अत्र षणपरत्वात्स्तौति ण्योरेवे 'ति नियमात् प्रकृतेस्सस्य न षत्वं, सात्वा । उदित्त्वादिड्विकल्पः । इटि सनित्वा । सातः । सातवान् 'यस्य विभाषे' त्यनिट्त्वं, तादावनुनासिकलोपं बाधित्वा 'जनसनखने' त्यात्वं भवति । असात । असाथा इत्यत्र 'तनादिभ्यस्तथासोरि' ति सिचो लुकि तथासोर्ङित्त्वमाश्रित्य आत्वं भवति । सायते । सन्यते । संसन्यते, सासायते इति यकि यङि च 'ये विभाषे'-

त्यात्वं वा भवति । सन्यादित्यत्र तु 'ये विभाषे' त्यात्वं ये इत्यत्वतो-निर्देशाच्च भवतीति धातुपारायणे । सातिः, सतिः । सन्तिः 'सनः क्तिचि लोपश्चास्यान्यतरस्या'मित्याकारः, पक्षे तदभावे वा नलोपश्च । सातिः । 'ऊतियूती' त्यादिना क्तिनि निपात्यते ॥ २ ॥

क्षणु हिंसायाम् ॥ क्षणोति । क्षणुते । चक्षाण । चक्षणे । क्षणिता । क्षणितासे । क्षणिष्यति । क्षणिष्यते । क्षणोतु । क्षणुतात् । क्षणुतम् । क्षण्वाताम् । अक्षणोत् । अक्षणुत । क्षणुयात् । क्षण्वीत । क्षण्या-त् । क्षणिषीष्ट । अक्षणीत् । अक्षणिष्टाम् । 'ह्म्यन्ते' त्यादिना 'अतो हलादे' रिति वृद्धिनिषेधः । अक्षत । अक्षणिष्ट । अक्षथाः । अक्षणिष्ठाः । 'तनादिभ्य' इति वा सिचो लुक्, तदा तनोत्यादित्वा-दनुनासिकलोपः । चिक्षणिषति । चङ्क्षण्यते । क्षाणयति । अचिक्षणत् । 'सन्वल्लघुनी' ति त्वनेकहल्व्यवधानेपि भवति, 'अत्स्मृदृत्वरे' त्यादि-ना इत्वापवादादत्वविधानाज्ज्ञापकात् । अयमप्युपदेशे तवर्गीयान्तः । तत्रणत्वशात्तु णत्वं, तेन चक्षन्तीत्यत्रानुस्वारपरसवर्णौ भवतः । णत्वं त्वनुस्वारीभुतो णत्वमतिक्रामतीति तत्र तत्रोक्तत्वान्न भवति । क्षत्वा । क्षणित्वा 'उदितो वे' त्युदित्त्वादिड्विकल्पः । क्षतः । 'यस्य विभाषे'-त्यनिट्त्वम् । क्षन्तिरित्यत्र 'न क्तिचि दीर्घश्चे'ति दीर्घानुनासिकलोप-निषेधः ॥ ३ ॥

क्षिणु च ॥ हिंसायामित्यर्थः । क्षि[1]णोति । क्षिणुते । चिक्षेण । चिक्षिणे । क्षेणितासे । क्षेणिष्यति । क्षेणिष्यते । क्षिणोतु । क्षिणुताम् । अक्षिणोत् । अक्षिणुत । क्षिणुयात् । क्षिण्वीत । क्षिण्यात् । क्षि[2]णिषीष्ट । अक्षेणीत् । अक्षित । अक्षेणिष्ट । अक्षिणिष्ठाः । पूर्ववत्पाक्षिके सिज्लुक्यनुना-सिकलोपः, चिक्षिणिषति । क्षेणयति । क्षिणित्वा । क्षेणित्वा, 'रलो व्युप-धादि'ति क्त्वविकल्पः । क्त्वायामुदित्त्वादिडभावे तु क्षित्वा । तनोत्या-दित्वादनुनासिकलोपः । चेक्षिण्यते । चेक्षेणति । अयमपि तवर्गीयोपदेशः ॥

१ संज्ञापूर्वको विधिरनित्य इति न गुणः ।
२ क्षेणिषीष्टेति ३ पु० पा० ।

अपदेशो वा ऽर्थस्य विद्यमानत्वात् ॥ २ ॥

सिद्धान्ती शङ्कते । अपदेश इति । अप पश्चाद्दिश्यते ज्ञाप्यत इत्यपदेशः अनुवादः । अर्थस्य निवीतरूपस्य विद्यमानत्वात् । प्रमाणान्तरेण प्राप्तत्वात् । कार्यानुष्ठानवेलायां सौकर्यार्थं निवीतं लोकसिद्धमिति भावः ॥ २ ॥

विधिस्त्वपूर्वत्वात्स्यात् ॥ ३ ॥

पूर्वपक्षी पुनराक्षिपति । विधिरिति । विधिरेवायं कुतः अपूर्वत्वात् । लोकसिद्धं निवीतमिति पूर्वोक्तं न, तथा लोके नियमाभावादिति भावः ॥ ३ ॥

स प्रायात्कर्मधर्मः स्यात् ॥ ४ ॥

यच्चोक्तं विधिरिति तावन्मात्रमङ्गीकृत्य पुरुषार्थत्वमसहमानो ऽपरः शङ्कते । स प्रेति । स निवीतमिति विधीयमानो ऽर्थः कर्मधर्मो दर्शपूर्णमासाङ्गं स्यात् प्रायात्प्रकरणेन तदङ्गत्वप्रतिपादनात् ॥ ४ ॥

वाक्यस्य शेषवत्त्वात् ॥ ५ ॥

यच्चोक्तं प्रकरणात्क्रत्वङ्गमिति तदस्तु तथा ऽपि प्रयाजादिवन्न, किन्तु क्रतुक्रतुः अध्वर्योरयं धर्म इत्यपरः शङ्कते । वाक्यस्येति । वाक्यस्य निवीतमिति वाक्यस्य शेषवत्त्वाद् अध्वर्युकाण्डमितिसमाख्यावत्त्वात् । निवीतानुष्ठानमध्वर्योरेवेति शेषः । तथा च प्रकरणवत्समाख्या ऽप्यबाधिता भवतीति भावः ॥ ५ ॥

तत्प्रकरणे यत्तत्संयुक्तमविप्रतिषेधात् ॥ ६ ॥

निवीतमिति वाक्येन पुरुषाङ्गत्वं प्राप्तं तद् बाधित्वा दुर्बलाभ्यां प्रकरणसमाख्याभ्यां न क्रत्वर्थत्वं संभवति। किन्तु क्रतावेव मानुषं कर्मास्ति तत्र मनुष्याणामित्यस्य लक्षणा । तदङ्गमिदं निवीतमित्यपरः शङ्कते । तदिति । तत्प्रकरणे दर्शपूर्णमासप्रकरणे यदन्वाहार्यदक्षिणादानादि संयुक्तं पठितं तत्संयुक्तं तदङ्गमिति अविप्रतिषेधाद् वाक्यप्रकरणयोरस्त-

त्राविरोधाद् उभयमप्यनुगृहीतं भवति । तत्राप्यध्वर्युणा कृते समाख्या ऽप्यनुगृहीता भवतीति भावः ॥ ६ ॥

तत्प्रधाने वा तुल्यवत्प्रसंख्यानादितरस्य तदर्थत्वात् ॥ ७ ॥

मनुष्याणामित्यस्य मनुष्यप्रधाने कर्मणि लक्षणामभ्युपेत्य क्रतुसम्बन्धमसहमानः परः शङ्कते । तदिति । तत्प्रधाने क्रत्वसम्बद्धे केवलमनुष्यप्रधाने आतिथ्यादौ अङ्गं प्रकरणस्यात्यन्तं बाध एव । कुतः तुल्यवत्प्रसंख्यानात् । यथा उपवीतं देवानामित्यत्र देवकर्मणि दर्शपूर्णमासे उपवीतस्याङ्गत्वं तथैव निवीतं मनुष्याणामित्यनेन मनुष्यप्रधानकर्मण्यङ्गत्वबोधनात् । इतरस्य मनुष्याणामिति षष्ठ्यन्तस्य तदर्थत्वात् प्रकरणादिनिरपेक्षमानुषकर्मणः प्रधानार्थत्वात् ॥ ७ ॥

अर्थवादो वा ऽप्रकरणात् ॥ ८ ॥

सिद्धान्तमाह । अर्थवादो वेति । अर्थवादः उपव्ययतइतिविधिशेषः अर्थवादः अप्रकरणाद् आतिथ्यस्याप्रकृतत्वात् । अयं भावः मनुष्याणामित्येव श्रूयते, न तु मनुष्यकर्मणामिति लक्षणायां मानाभाव इति ॥ ८ ॥

विधिना चैकवाक्यत्वात् ॥ ९ ॥

उक्तार्थे साधकान्तरमाह । विधिनेति । विधिना उपवीतविधिना एकवाक्यत्वं संपद्यते अर्थवादपक्षे । अन्यथा निवीतं मनुष्याणामिति उपव्ययतइति भिन्नविषयत्वाद् वाक्यं भिद्येत । नन्वर्थवादरूपत्वे उपवीतस्तावकत्वं निवीतवाक्यस्य वक्तव्यं, तन्न संभवतीति चेदुच्यते । यतः निवीतधर्मो मनुष्याणामतो ऽयं जघन्यः उपवीतं देवधर्मः श्रेष्ठः अत उपव्ययतइति स्तुतिसंभवात् ॥ ९ ॥ इत उर्ध्वं षट् सूत्राणि पार्थसारथिमिश्रप्रभृतिभिः आदृतानि भाष्ये अनुपलब्धानि* त्यक्तानि ।

दिग्विभागस्यानुवादत्वम् । अधि· २ ।

दिग्विभागश्च तद्वत्संबन्धस्यार्थहेतुत्वात् ॥ १० ॥

ज्योतिष्टोमे श्रूयते, प्राचीनवंशं करोति देवमनुष्या दिशो

* अत्र वार्त्तिककाराः । "अतः परं षट् सूत्राणि भाष्यकारेण न लिखितानि तत्र व्याख्यातारो विवदन्ते । केचिदाहुर्विस्मृतानीति । लिखितो ग्रन्थः प्रलीन इत्य-

व्यभजन्त प्राचीं देवा दक्षिणां पितरः प्रतीचीं मनुष्या इति । अत्र प्रतीचीं मनुष्या व्यभजन्तेति पूर्ववृत्तान्तकथनेन मनुष्यैः प्रतीचीदिग्विभागः कार्य इति विधिः कल्प्य इति पूर्वपक्षे निवीताधिकरणपक्षाः सर्वे ऽप्यत्रोह्या इत्याह । दिगिति । तद्वत् । निवीताधिकरणवत् । अस्य पृथक्सूत्रकरणे बीजमाह । संबन्धस्यार्थेति । संबन्धस्य मनुष्याणां प्रतीचीदिक्संबन्धस्य अर्थहेतुत्वात् सुखसाधन-

---

परे । फल्गुत्वादुपेक्षितानीत्यपरे । अनार्षत्वादित्यन्ये । तथा च दिग्विभागश्च तद्वदिति निवीताधिकरणातिदेशस्तदानन्तर्यादुपपद्यते इति । वृत्त्यन्तरकारैस्तु सर्वं व्याख्यातानि । सन्ति च जैमिनेरेवंप्रकाराण्यपि अनत्यन्तसारभूतानि सूत्राणि । व्यवहितातिदेशाश्च पानव्यापच्च तद्वदित्यादिष्वाश्रिताः । तस्मात् सूत्रमात्रं व्याख्येयम् । तत्र कैश्चित् त्रीणि अधिकरणानि कल्पितानि । अपरैश्चत्वारि" इति । तानि च सूत्राणि वार्तिकमनुसृत्य संक्षेपेण व्याख्यायन्ते । उपवीतं लिङ्गदर्शनात्सर्वधर्मः स्यात् ॥ १ ॥ शास्त्रदीपिकाकारादिभिः अधिकरणचतुष्टयं कल्पयित्वैव व्याख्यातत्वात्तथैव व्याख्यायते । पूर्वाधिकरणे दर्शपूर्णमासयोर्विधीयमानत्वेनोदाहृतमुपवीतं दर्शपूर्णमासयोरेवावतिष्ठते उत सर्वकर्मार्थमिति संशये पूर्वपक्षमाह । उपवीतमिति । उपवीतं पूर्वोक्तं सर्वधर्मः स्यात् । लिङ्गदर्शनात् । लिङ्गं तावन्मृताग्निहोत्रे पितृदेवत्ये श्रूयते, प्राचीनावीति दोहयेद् यज्ञोपवीती हि देवेभ्यो दोहयतीति । अत्र देवाग्निहोत्रे यज्ञोपवीतानुवादेन सर्वकर्मार्थत्वमवगम्यते । दर्शपूर्णमासयोर्विप्रकृष्टत्वात्तत्र देवताबहुत्वाभावेन बहुवचनानुपपत्तेश्च न तत्स्योपवीतानुवादः संभवति । तस्मात् सर्वार्थमिति ॥ १ ॥ न वा प्रकरणात्तस्य दर्शनम् ॥ २ ॥ सिद्धान्तमाह । न वेति । न वा सर्वधर्मः प्रकरणाद् दर्शपूर्णमासप्रकरणात् । ननूक्तलिङ्गस्य का गतिस्तत्राह । तस्येति । तस्य दर्शपूर्णमासस्थस्यैव अग्निहोत्रे दर्शनमनुवाद इत्यर्थः । अनुवादस्य यथाप्राप्त्यपेक्षत्वाद्विप्रकृष्टस्यैव तस्यात्राश्रयणम् । बहुवचनं तु अविवक्षितम् । प्रकृतिविकृतिदेवतालोचनेनोपपत्स्यते वा । तस्माद्दर्शपूर्णमासार्थमेवेति सिद्धम् ॥ २ ॥ विधिर्वा स्यादपूर्वत्वात् ॥ ३ ॥ तस्मिन्नेवोपवीते संदेहः किमसौ विधिरनुवादो वेति । तत्र नित्योदकी नित्ययज्ञोपवीतीतिस्मृतिप्राप्तत्वादनुवाद इति बहिः पूर्वपक्षे सिद्धान्तमाह । विधिरिति । विधिरयमपूर्वत्वात् । स्मृत्या पुरुषार्थतया प्राप्तावपि क्रत्वर्थतया विधानस्यावश्यकत्वात् । न च वर्तमानापदेशाद्विधायकत्वानुपपत्तिः । पञ्चमलकाराश्रयणात् । अत एवेदं सार्थकम् । अनुवादमात्रत्वे तु कस्य चिद्विधेः शेषत्वाभावादानर्थक्यं स्यादिति भावः ॥ ३ ॥ उदक्त्वं चापूर्वत्वात् ॥ ४ ॥ मृताग्निहोत्रे श्रूयते, ये पुरोदञ्चो दर्भास्तान् दक्षिणाग्रांस्तृणीयादिति । तत्र ये पुरोदञ्च इति विधिरनुवादो वेति संशये पूर्वपक्षमाह । उदक्त्वमिति । चशब्दात्पूर्वसूत्रस्थं विधिरित्यनुकृष्यते । उदक्त्वमुदक्पदघटितवाक्यं विधिः । अपूर्वत्वाद् अप्राप्तार्थत्वात् । न च प्राप्तिमन्तरा ऽनुवादः संभवति । हिशब्दाद्यप्रयोगात्स्तुत्यर्थता ऽपि न युज्यते । अतो विधिरिति भावः ॥ ४ ॥ सतो वा लिङ्गदर्शनम् ॥ ५ ॥ सिद्धान्तमाह । सत इति । सतः आचार-

त्वात् । अयं भावः । निवीतकरणस्य दृष्टफलाभावेनानुवादासंभवे ऽपि मनुष्याणां पूर्वाह्णे संचरतां प्रतीचीं दिशं प्रति गमने आदित्यः पृष्ठभाग इति आदित्यजनितपीडाऽभावस्य क्लृप्तत्वाद् लोके अनुवादः संभवतीति ॥ १० ॥

परुषिदितादीनामनुवादत्वम् । अधि० ३ ।

परुषिदितपूर्णघृतविदग्धं च तद्वत् ॥ ११ ॥

महापितृयज्ञे श्रूयते । यत्परुषि दितं तद्देवानां यदन्तरा तन्मनुष्याणां यत्समूलं तत्पितॄणामिति । परुषि दितं पर्वणि छिन्नमित्यर्थः । तत्रैव यत्पूर्णं तन्मनुष्याणाम् उपर्यर्धो देवानाम् अर्धः पितॄणाम् अर्धउपमन्यतीति । ज्योतिष्टोमे घृतं देवानां मस्तु पितॄणां निष्पक्वं मनुष्याणामिति । तदुत्तरं नवनीतेनाभ्यङ्क्ते इति विधिः । मस्तु दधिभवं मण्डम् । निष्पक्वमीषल्लीनं नवनीतम् । दर्शपूर्णमासयोः यो विदग्धः स नैर्ऋतः यो ऽशृतः स रौद्रो यः शृतः स सदेवस्तस्मादविदहता शृतं कृत्य इति । अत्र सर्वत्र तद्वद् निवीतवत् । पृथक्कथनफलं विस्तरभयान्न लिख्यते ॥ ११ ॥

अनृतवदननिषेधस्य क्रतुधर्मत्वम् । अधि० ४ ।

अकर्म क्रतुसंयुक्तं संयोगाद् नित्यानुवादः स्यात् ॥ १२ ॥

दर्शपूर्णमासप्रकरणे नानृतं वदेदिति श्रुतम् । अयं नित्यानुवादरूपः उतापूर्वविधिर्वेति संशये पूर्वपक्षमाह । अकर्मेति । क्रतुसंयुक्तं क्रतु-

प्राप्तस्य उदगपवर्गत्वस्य द्योतकमात्रं ये पुरोदञ्च इति लिङ्गदर्शनं न विधिः । अयं भावः । यच्छब्दघटितत्वाद्विधिप्रत्ययायोगाद् "अपवर्गन्त्युदगग्रायणी" तिस्मृतिप्राप्तत्वाच्च नास्य विधित्वसंभवः । न चास्य स्मृतिमूलत्वं संभवति । स्मृतेः सर्वविषयत्वात् । अस्य चाग्निहोत्रमात्रविषयत्वात् । तस्मादस्यैव स्मृत्यनुवादकत्वमिति ॥ ५ ॥ विधिस्तु धारणे ऽपूर्वत्वात् ॥ ६ ॥ मताग्निहोत्रे एव श्रूयते, अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयतीति । जीवदग्निहोत्रे उपरि समिद्धारणं विधिः अथ वा ऽनुवाद इति संशये पूर्ववदनुवाद इति पूर्वपक्षे सिद्धान्तमाह । विधिरिति । तुरेवार्थे । धारणे विधिरेव अपूर्वत्वाद् अप्राप्तत्वात् । न च अभ्यर्हितद्रव्यस्य प्रच्छादनावश्यकत्वादाचाराद्धारणप्राप्तिः संभवति । हस्तादेरेव प्रच्छादने योग्यत्वेन समिधो ऽयोग्यत्वेन च तदनुपपत्तेः । तस्मादगत्या पञ्चमलकारमाश्रित्य विधित्वमङ्गीकार्यम् । विस्तरस्तु वार्तिके द्रष्टव्यः ॥ ६ ॥

प्रकरणे पठितम् अक्रर्मं नानृतं वदेदिति निषेधवाक्यं नित्यानुवादरूपं स्यात् । कुतः संयोगाद् उपनयनसमयएव सत्यं वद धर्मं चरेत्युपदेशेन नित्यमनृतनिषेधस्य प्राप्तत्वात् ॥ १२ ॥

विधिर्वा संयोगान्तरात् ॥ १३ ॥

सिद्धान्तमाह । विधिरिति । विधिरेवायं संयोगान्तरात् । उद्देश्यभेदात् । उपनयनकालिको विधिः पुरुषमुद्दिश्य अयं क्रतुमुद्दिश्येति भावः ॥ १३ ॥

जञ्जभ्यमानधर्माणां प्रकरणे निवेशः । अधि० ५ ।

अहीनवत्पुरुषधर्मस्तदर्थत्वात् १४ ॥

दर्शपूर्णमासयोः श्रुतं, जञ्जभ्यमानो ऽनुब्रूयान् मयि दक्षक्रतू इति प्राणापानावेवात्मन्धत्तइति । किमयं मन्त्रपाठः पुरुषमुद्दिश्य विधीयते उत क्रतुमुद्दिश्येति संशये पूर्वपक्षमाह । अहीनेति । पुरुषधर्मः केवलपुरुषार्थः तदर्थत्वात् । वाक्येन पुरुषार्थत्वावगमात् । तथा चाहीनवत् । यथा ऽहीनशब्दश्रवणाद् द्वादशोपसदां प्रकरणविच्छेदः तथा जञ्जभ्यमानो ऽनुब्रूयादिति पुरुषप्राधान्यश्रवणात् प्रकरणाद्विच्छिद्य वाक्येन पुरुषार्थत्वमिति भावः ॥ १४ ॥

प्रकरणाविशेषाद्वा तद्युक्तस्य तत्संकारो द्रव्यवत् ॥ १५ ॥

सिद्धान्तमाह । प्रकरणेति । प्रयाजादिवत् प्रकरणविनियोगस्य अविशेषात् विशेषाभावात् क्रत्वङ्गम् । ननु जञ्जभ्यमानो ऽनुब्रूयान्मयि दक्षक्रतू इति वाक्येन पुरुषप्राधान्यं बुध्यते तत्राह । तद्युक्तस्य क्रतुसंबद्धस्य पुरुषस्य संस्कारः दर्शपूर्णमासकर्तृपुरुषसंस्कारः । द्रव्यवत् । व्रीहीन् प्रोक्षतीत्यत्र व्रीहिवत् । इत्थं च वाक्येन श्रूयमाणपुरुषप्राधान्यं प्रकरणं चानुगृहीतं भवतीति भावः ॥ १५ ॥

व्यपदेशादपकृष्यते ॥ १६ ॥

नन्वहीने द्वादशोपसद इत्यत्रापि प्रकरणबाधो न स्यादत आह । व्यपेति । द्वादशाहीनस्येत्यत्रापकृष्यते । व्यपदेशात् । तिस्र एव साह्न-

स्योपसद इति ज्योतिष्टोमे त्रित्वविशिष्टोपसद उपदिश्य द्वादशाहीनस्येत्यत्राहीनशब्दस्य पृथग् निर्देशात् । तत्रोत्कर्षाभावे अहीनस्येति व्यर्थमेव स्यादिति भावः ॥ १६ ॥

अपगोरणादीनां पुमर्थत्वम् । अधि० ६ ।

शय्यौ च सर्वपरिदानात् ॥ १७ ॥

दर्शपूर्णमासयोः श्रुतं, शय्युं बार्हस्पत्यमब्रुवन्नित्युपक्रम्य यो ऽपगुरते शतेन यातयाद्यो निहनत् सहस्रेण यातयात्तस्माद्ब्राह्मणाय नापगुरेत न निहन्यादिति । अयं निषेधः क्रत्वर्थः किं वा पुरुषार्थः इति संशये प्रकरणपाठात्क्रत्वर्थ इति बहिः पूर्वपक्षे सिद्धान्तमाह । शय्याविति । शय्यौ शय्यूपक्रमवाक्यस्थनिषेधस्य प्रकरणादुत्कर्षः स्यात् सर्वपरिदानाद् ब्राह्मणाय नापगुरेतेति क्रतुसंबन्धितदितरसर्वब्राह्मणपरिग्रहात् । पूर्वाधिकरणे प्राणापानावेवात्मन् धत्तइति लटः श्रवणात् प्रकरणविच्छेदे फलकल्पनाप्रसङ्गः । इह तु यः अपगुरते इति अपगोरणस्य कारणत्वं शतसंवत्सरपर्यन्तं नरकयातनायाः कार्यत्वं प्रतीयते । हेतुहेतुमतोर्लिङिति विहितलिङः श्रवणात् । तथा चापगोरणाभावप्रयोज्यः यातनाभाव इत्यपि सिद्धौ यातनाभावः फलं क्लृप्तमतः प्रकरणादुत्कर्षे ऽपि किं बाधकमिति भावः ॥ १७ ॥

मलवद्वाससा संवादनिषेधस्य पुमर्थत्वम् । अधि० ७ ।

प्रागवरोधान्मलवद्वाससः ॥ १८ ॥

दर्शपूर्णमासयोः श्रूयते, तस्मान्म*लवद्वाससा न संवदेतेति । अयं प्रतिषेधः क्रत्वर्थः दर्शपूर्णमासाधिकृतएव प्रकरणे पाठादिति बहिः पूर्वपक्षे सिद्धान्तमाह । प्रागिति । मलवद्वाससः रजस्वलायाः प्राक् प्रारम्भात्प्रागेव अवरोधाच्च शालातो बहिः करणात् । अयं भावः । कर्ममध्ये अध्वर्योः पत्न्या सह संवादः पत्नि पत्न्येष ते लोक इति कर्माङ्गत्वेन विहितस्तस्य प्रतिषेधो वाच्यः । स न संभवति । यस्य व्रत्ये ऽहनि पत्न्यनालम्भुका भवति तामपरुध्य यजेतेति, तस्या आरम्भात् पूर्वमेव निरासेन कर्माङ्ग-

* मलवद्वासाः रजस्वला ।

संवादप्राप्त्यभावादतो ऽत्र संवादो रागप्राप्तः पुरुषार्थतया निषिध्यत इति ॥ १८ ॥

अन्नप्रतिषेधात् ॥ १९ ॥

उक्तार्थे हेत्वन्तरमाह । अन्नेति । नास्या अन्नमद्यादित्यत्र प्रतिषेधात् । अन्नं मैथुनं तस्य प्रतिषेधात् । क्रतौ तस्याप्रसक्तेः रागप्राप्तप्रतिषेध एव स वाच्यः । सहचरितत्वाद् अयमपि तथेति भावः । अभि आभिमुख्येन अञ्जनं मेलनमिति व्युत्पत्त्या अभ्यञ्जनं मैथुनम् । अभ्यञ्जनं वा स्त्रिया अन्नमिति अन्नशब्दव्याख्यानादुक्तार्थलाभः ॥ १९ ॥

सुवर्णधारणादीनां पुमर्थत्वम् । अधि॰ ८ ।

अप्रकरणे तु तद्धर्मः ततो विशेषात् ॥ २० ॥

अनारभ्य श्रूयते, तस्मात्सुवर्णं हिरण्यं भार्यं सुवर्ण एव भवतीति । अयं पुरुषार्थः क्रत्वर्थो वेति विचारे सिद्धान्तेनोपक्रमते । अप्रेति । अप्रकरणे पठितं सुवर्णधारणं तद्धर्मः पुरुषार्थः । ततः प्रकरणपठितेभ्यः विशेषाद् विलक्षणत्वात् ॥ २० ॥

अद्रव्यत्वात्तु शेषः स्यात् ॥ २१ ॥

पूर्वपक्षमाह । अद्रव्येति । शेषः स्यात् क्रतुशेषः स्यात् । अद्रव्यत्वात् । द्रव्यदेवतावाचकपदाभावात् । अयं भावः । यागस्यैव साक्षात्फलजनकत्वम् अत्र द्रव्यदेवताऽश्रवणेन फलसंबन्धासंभवादगत्या क्रत्वङ्गत्वमिति ॥ २१ ॥

वेदसंयोगात् ॥ २२ ॥

क्रत्वर्थत्वं गुणकर्मत्वेन न प्रधानकर्मत्वेनेत्याह । वेदेति । आध्वर्यवमितिसमाख्यायुक्तयजुर्वेदसंयोगात् । अध्वर्युं सुवर्णधारणेन संस्कुर्यादिति तदर्थः ॥ २२ ॥

द्रव्यपरत्वाच्च ॥ २३ ॥

पक्षान्तरमाह । द्रव्येति । द्रव्यं क्रतुसंबद्धमात्रेयाय हिरण्यं ददातीति हिरण्यं तत्परत्वाच्च् श्रूयमाणहिरण्यपदस्य । तथा च क्रतौ उपयोक्ष्यमाणसुवर्णं धारणेन संस्कुर्यादिति तदर्थ इति भावः ॥ २३ ॥

स्याद्वा संयोगवत्फलेन संबन्धः तस्मात्कर्मैतिशायनः ॥२४ ॥

पूर्वपक्षान् दूषयन् सिद्धान्तमुपसंहरति । स्यादिति । फलेनैव साक्षात्संबध इत्यैतिशायनाचार्यो मनुते । तस्मात् प्रकरणपाठाभावेन कर्तुर्वा द्रव्यस्य वा संस्कारद्वारा ऽसंभवेन संस्कृतस्य विनियोगाश्रवणात् पर्णमयीत्वे जुहूशब्दवदव्यभिचरितक्रतुस्मारकपदाभावाच्च । संयोगवत् । प्राजापत्यव्रतानामेतावता हैनसा ऽयुक्तो भवतीति फलसंयोगवत् । कर्म स्यात् । पुरुषार्थरूपं कर्म* स्यात् ॥ २४ ॥

जयादीनां वैदिककर्माङ्गत्वम् । अधि· ९ ।

शेषो ऽप्रकरणे ऽविशेषात्सर्वकर्मणाम् ॥ २५ ॥

अनारभ्य श्रूयते, येन कर्मणेर्त्सेत्तत्र जयाभ्यातानान् राष्ट्रभृतो जुहोतीति । ईर्त्सेद् वृद्धिमिच्छेत् । जयादिसंज्ञका होमविशेषाः । इमे होमा लौकिके कृष्यादावपि उत वैदिकएवेति संशये पूर्वपक्षमाह । शेष इति । यः अप्रकरणे अधीतः कर्मणः शेषः सः अविशेषाद् लौकिकानां वैदिकानां च सर्वकर्मणां शेषः स्यात् ॥ २५ ॥

होमास्तु व्यवतिष्ठेरन्नाहवनीयसंयोगात् ॥ २६ ॥

सिद्धान्तमाह । होमा इति । होमाः उक्तहोमाः श्रौतएव व्यवतिष्ठेरन् आहवनीयसंयोगाद् होमत्वावच्छेदेन आहवनीयविधानात् । लौकिके तदभावादिति भावः । अङ्गविध्यनुसारेण प्रधानविधिसंकोचस्य तिर्यगधिकरणे षष्ठे वक्ष्यमाणत्वादिति भावः ॥ २६ ॥

शेषश्च समाख्यानात् ॥ २७ ॥

हेत्वन्तरमाह । शेष इति । शेषः अध्वर्युकर्तृककर्मशेषः । समाख्यानात् । उक्तवाक्यस्य आध्वर्यवमिति समाख्यानात् । यदि कृष्यादिशेषः तर्हि तत्राध्वर्योरभावात् समाख्या बाध्येतेति भावः ॥ २७ ॥

वैदिकाश्वप्रतिग्रहे इष्टेः कर्तव्यत्वम् । अधि· १० ।

दोषात्त्विष्टिर्लौकिके स्याच्छास्त्राद्धि वैदिके न दोषः स्यात् ॥ २८ ॥

* दुर्वर्णो ऽस्य भातृव्यो भवतीत्यार्थवादिकं वा फलमिति माधवः ।

॥ श्रीः ॥

तत्त्वमुक्ताकलापः—सर्वार्थसिद्धियुतः ।

नमोबोधायनाय गुरुवराय । नमः पूर्वाचार्यपरम्पराभ्यः ।

श्रीमते रामानुजाय नमः ।

जयति सकलविद्यावाहिनीजन्मशैलो जनिपथपरिवृत्तिश्रान्तविश्रान्तिशाखी ॥ निखिलकुमतिमायाशर्वरीबालसूर्यो निगमजलधिवेलापूर्णचन्द्रो यतीन्द्रः ॥ १ ॥ ताराकल्पे स्फुरति सुधियां तत्त्वमुक्ताकलापे दूराद्वृत्त्या दुरधिगमतां पश्यतां सर्वसिद्धै ॥ नातिव्यासव्यतिकरवती नातिसंकोचखेदा वृत्तिस्सेयं विशदरुचिरा कल्प्यते ऽस्माभिरेव ॥ २ ॥ आरिप्सितस्य प्रबन्धस्याविघ्नपरिसमाप्त्यादिसिद्धै मङ्गलमाचरन्नर्थाद्वक्ष्यमाणं द्रव्याद्रव्यविभागप्रतितन्त्रविशेषांश्च संग्रहेण सूचयति । लक्ष्मीति ॥

सू० लक्ष्मीनेत्रोत्पलश्रीसततपरिचयादेष संवर्धमानो नाभीनालीकरि*ङ्खन्मधुकरपटलीदत्तहस्तावलम्बः ॥ अस्माकं सम्पदोघानविरलतुलसीदामसञ्जातभूमा कालिन्दीकान्तिहारी कलयतु वपुषः कालिमा कैटभारेः ॥ १ ॥

टी० यन्नविद्येत्यादिना सर्वविद्यानां तादधीन्योक्त्या सा ख्याप्येति लक्ष्मीरादौ संकीर्त्यते. नित्ययुक्तत्वंसूचनाय सततपरिचयोक्तिः । नाभीत्यादिना पद्मभुवः कार्यत्वकर्मवश्यत्वसूचनात्ततोऽर्वाचामनीश्वरत्वं कै†मुत्यसिद्धम्. अस्माकमिति । जीवानामीश्वरादन्यो-

* रिङ्खचिति पु. पा. । † कैमुतिकसिद्धमिति पु. पा. ।

न्यश्च भेदः प्रत्यक्षमहं—शब्दार्थत्वञ्च प्रख्याप्यते, तेन स्थालीपुलाकन्यायेन परमतनिरासमप्युदाहरति । सम्पदोघानिति । तत्त्वज्ञानादिकाः स्वप्राप्तिपर्यन्ताः सिद्धिपरम्परा अविरलेत्यादिना सत्त्वाधिकप्रशस्ततमद्रव्यार्चनीयतया ऽन्येभ्यो व्यावर्तनीयत्वमनुवर्ण्यते कालिन्दीकान्तिहारीत्यनेन तद्गुणानां परगुणतिरस्कारकत्वमुपलक्ष्यते कैटभारेर्वपुष इति व्यतिरेकविभक्त्या शुद्धसत्त्वमयविग्रहयोगस्त*-त्स्वरूपादन्यत्वञ्च स्थाप्यते वपुषः कालिमेति द्रव्याद्रव्यविभागप्रदर्शनार्थम् । एवं जडाजडाद्यपि यथास्थानमूह्यम् ॥ चिकीर्षितस्य श्रद्धेयत्वाय वक्तृसम्प्रदायवैलक्षण्यं दर्शयति । नानेति ।

मू० नानासिद्धान्तनीतिश्रमविमलधियोऽनन्तसूरेस्तनूजो वैश्वामित्रस्य पौत्रो विततमखविधेः पुण्डरीकाक्षसूरेः ॥ श्रुत्वा रामानुजार्यात्सदसदपि ततस्तत्त्वमुक्ताकलापं व्यातानीद्वेङ्कटेशो वरदगुरुकृपालम्भितोद्दामभूमा ॥ २ ॥

टी० सत् प्रामाणिकं मुमुक्षोरुपादेयञ्च तदन्यदसत् सतस्सत्त्वेनासतश्चासत्त्वेन श्रवणमिहेष्टम्, ततः=श्रवणादेव हेतोः ॥ २ ॥ प्रबन्धस्य स्वरूपातिशयादपि सुधीभिस्स्वीकार्यत्वमाह ॥ प्रज्ञेति ॥

मू० प्रज्ञासूच्याऽनुविद्धः क्षतिमनधिगतः कर्कशात्तर्कशाणाच्छुद्धो नानापरीक्षास्वशिथिलविहिते मानसूत्रे निबद्धः ॥ आतन्वानः प्रकाशं

* तस्य स्व० पु० पा० । † श्रीहरामानुजाचार्यैराकरादौ यदभिहितं तदेवेह मयोच्यते न किंचिदूतनमिति भावः ।

बहुमुखमखिलत्रासवैधुर्यधुर्या धार्याहेतुर्ज-
यादेः स्वहृदि सहृदयैस्तत्त्वमुक्ताकलापः ॥ ३ ॥

टी० ज्ञातस्यातिशयाधायिनी धीः प्रज्ञा, कलापस्यानुविद्धत्वादि प्रत्येकद्वारा । तत्त्वानां प्रज्ञया अनुविद्धत्वं सम्यङ्निर्धारितत्वं रत्नान्तरेषु शाणच्छतिसम्भवो न मुक्तासु प्रमाणतर्कैर्याथात्म्यान्वेषणं परीक्षा । तन्नानात्वं तर्कादिभेदात् । मुक्तासु स्वानुगुणपरिमाणयुक्तं सूत्रं मानसूत्रम् । अन्यत्र प्रमाणमेव सूत्रं तस्याशिथिलविहि*तनिर्बाधत्वेन विशेषतो धीस्थत्वम् । प्रकाशमालोकं बोधञ्च । बहुमुखं सर्वतोदिक्कं सर्वविषयञ्च । त्रासो मणिदोषः प्रतिपक्षाद्भीतिश्च । जयादेरित्यादिशब्देन क्वचिदैश्वर्यादेरन्यत्र तत्त्वनिर्णयस्य च सङ्ग्रहः हृच्छब्दो वक्षश्चित्तं च वदति । सहृदयैस्सारासारविवेचनार्हहृदयवद्भिः, धार्यः क्वचिदाभरणतया ऽन्यत्राप्रमोषेण ॥ ३ ॥ नन्वपवर्गसिद्धौ यदन्तरङ्गन्तदेव विशदं तदर्थिभिरवगन्तव्यं तावदेव शिष्यादिभ्योऽपि प्रवर्तितव्यं किमन्यैरिह कीर्त्यमानैरित्यत्राह ॥ शिष्टेति ॥

सू० शिष्टा जीवेशतत्त्वप्रमितियुतपरोपासना
मुक्तिहेतुश्शक्यस्तत्तत्प्रकारावगतिविरहि-
भिर्नैव याथात्म्यबोधः ॥ ते तेचार्था विदध्युः
कुमतिविरचितास्तत्त्वबोधोपरोधं तस्मान्नि-
र्धूतसर्वप्रतिमतविमतिं साधये सर्वमर्थम् ॥ ४ ॥

* यद्यपि वा सरूपोऽस्त्रियामिति पाणिनिस्मरणात् स्त्र्यधिकारस्थेन आतश्चोपसर्गे इत्यनुशिष्टेन अङैव भाव्यं न तु स्त्रियां क्तिना उभयोरपि स्त्र्यधिकारस्थत्वेन क्तिनोऽङा बाधावश्यम्भावात्तथाऽपि धानं हितिरिति क्तिनोऽनन्तरमुपसर्गयोग इति नोपसर्गनिमित्तकस्याङः प्राप्तिरिति । धाधातोर्भिदादिगणपाठस्तु संविधाश्रद्धादिसिद्ध्यर्थमिति सुसूक्ष्ममीक्ष्यताम् ।

टी० शिष्टा चोदितेत्यर्थः । जीवेशावेव तत्त्वे जीवेशतत्त्वे तयोः प्रमितिरिहागमजन्या । परोपास्तेस्तत्त्वज्ञानमितिकर्तव्यता न तु स्वयं साधनम् । प्रमितियुता प्रमितिजनिताऽनुस्मृतिपूर्विकेत्यर्थः तदभिप्रायेणोक्तं जीवपरमात्मयाथात्म्यज्ञानपूर्विकेत्यादि । परोपासनेति सर्वविद्याभिप्रायं परस्य ब्रह्मण उपासनेति वा शक्य इत्यादि न हि द्रव्याद्रव्यविभागाभावे शिष्टोपासनमूलकतत्त्वप्रतीतिसिद्धिः तत्त्वनिरूपणाभावे च तत्त्वनिर्णयोपयुक्तयोस्तर्कानुमानयोर्व्याप्तिः शङ्काकलङ्किता स्यात् परोक्तानुमानानामन्यतरासिद्धनैकान्तिकत्वाद्युद्भावनं च कथं स्यात् परो वा कथमस्मत्सिद्धान्तानभिज्ञः कथायामस्माभिरधिकुर्यात् । परकल्पितार्थभङ्गेन तदहङ्कारखण्डनञ्च तत्त्वाध्यवसायसंरक्षणार्थं । तत्तदिति प्रस्तुतौ जीवेशौ गृह्येते । अथवा तत्तत्प्रकृत्यादिप्रकारबोधाभावे तत्तत्प्रतिसम्बन्धिकं तयोरपि याथात्म्यं नावगम्येत ते ते चार्थाः ब्रह्मविवर्तपरिणामभिन्नाभिन्नत्वादयः कुमतिविरचिताः कुदृष्टिभिः कल्पिता भ्रान्तिविजृम्भिता इति वा अत एव कुमतिभिरर्थ्यन्त इत्यर्थाः न तु परमार्थाः प्रतिमतैर्विमतिर्विवादः तत्प्रसूता वा विरुद्धबुद्धिस्सर्वमर्थं मुमुक्षुभिर्ज्ञातव्यं परम्परयेत्यर्थः ॥ ४ ॥ तथाऽपि निर्धूतसर्वप्रतिमतविमतिं सर्वमर्थं साधये इत्यशक्योक्तिः त्रैकालिकसिद्धान्तभेदानन्त्यादित्याशङ्कोत्पाटनपूर्वकं प्रयोजकशिक्षया कृत्स्नानिष्टनिरासः कृत्स्नाभीष्टसाधनञ्च शक्यमिति स्थापयति ॥ आवापेति ॥

मू० आवापोद्वापतस्स्युः कति कति कविधी-
चित्रवत्तत्तदर्थेष्वानन्त्यादस्तिनास्त्योरनव-
धिकुहनायुक्तिकान्ताः कृतान्ताः ॥ तत्त्वा-

**लोकस्तु लोमृग्रभवति सहसा निस्समस्ता-
न्समस्तान्पुंस्त्वे तत्त्वेन दृष्टे पुनरपि न खलु
प्राणिता स्याणुतादिः ॥ ५ ॥**

टी० एकस्मिन्नेव हि दर्शने व्याख्यातृभेदात्क्वेशश्चित्प्रमेयानामावापोद्वापौ दृश्येते यत एकदेशिव्यपदेशः कविधीचिचवत् कवीनां धीभिः कृतं काव्यादिकं कविधीचिचं तद्वन्मतभेदा अप्यनन्तास्सम्भवन्ति तत्तदर्थेष्वस्तिनास्त्योरानन्त्यादित्यन्वयः अस्तिनास्त्योरिति प्रयोगपरं कुहना छद्म तत्सम्बन्धिन्यो युक्तयः कुहनायुक्तयो हेत्वाभासच्छलजातिरूपाः ताभिः क्रान्ताः सम्यक्त्वेनैव भाताः तत्त्वालोकः यथार्थाध्यवसायः *प्रस्तुतशङ्कानिरासार्थमपेक्षणीयान्तराभावात्सहसेत्युक्तम् । निस्सम इति निरवधिकत्वोपलक्षणं प्रतिरोधबाधरहित इत्यर्थः । उक्तस्यापकं चयन्तार्थविशेषव्यञ्जकमप्यर्थान्तरं न्यस्यति । पुंस्त्व इति । पुनर्न प्राणिता संशयविपर्ययसामग्रीलोपान्न भासेतेत्यर्थः ॥ ५ ॥ इति । तत्त्वज्ञानप्रयोजनम् । अथ निरूप्यमर्थजातं साधर्म्यवैधर्म्यभेदैस्संगृह्य विभज्य च निर्दिशति द्रव्येति ॥

मू० द्रव्याद्रव्यप्रभेदान्मितमुभयविधं तद्विदस्तत्त्वमाहुर्द्रव्यं द्वेधा विभक्तं जडमजडमिति प्राच्यमव्यक्तकालौ ॥ अन्त्यम्प्रत्यक् पराक् च प्रथममुभयथा तत्र जीवेशभेदान्नित्या भूतिर्मतिश्चेत्यपरमिह जडामादिमां केचिदाहुः ॥ ६ ॥

* प्रकृत० पु० पा ।

टी० अत्र तत्त्वमिति पदार्थमात्रोक्तिः मितं प्रमितं तथात्वं च सर्वसाधारणं तदपि हि सामान्यतः प्रमितमन्ततस्स्वपरनिर्वाहान्नानवस्था इदं च साधर्म्योक्तिमात्रं व्यवच्छेद्याभावेन लक्षणत्वासिद्धेरित्येके । निर्दिष्टव्यापित्वे सति तदन्यवृ*त्तित्वविरहाल्लक्षणमपि स्यादित्यन्ये । बाह्यकुदृष्टिव्यावृत्तास्तद्विदः अत्र तत्तदन्यरूपेण विभागेषु न नीलपीतादिवत्कोट्यन्तरावकाशः द्रव्यत्वात्यन्ताभाववत्त्वरूपेण तदन्यत्वस्य विवक्षितत्वाद्द्रव्यलक्षणं वक्ष्यति । जडमिह स्वगोचरज्ञानत एव प्रकाशमानमव्यक्तशब्देन व्यक्तमपि लक्ष्यते तदनन्यद्रव्यत्वज्ञापनार्थं प्रत्यक् स्वस्मै भासमानं पराक् परस्मा एव भासमानं भूतिर्विभूतिः स्वातिशयाधानार्थं नियन्तव्यद्रव्यम् । नित्या भूतिरिति नित्यप्राचुर्य्यतश्शुद्धसत्त्वमुपलक्ष्यते । इहादिमां नित्यभूतिं केचिज्जडामाहुरिति सयूथ्यमतभेदोक्तिः ॥ ६ ॥ इति द्रव्यविभागः ॥ प्रस्तुतस्य द्रव्यस्य द्रव्यावान्तरभेदानां च लक्षणमाह ॥ तत्रेति ॥

मू० तत्र द्रव्यन्दशावत्प्रकृतिरिह गुणैस्सत्त्वपूर्वैरुपेता कालोऽब्दाद्याकृतिस्स्यादणुरवगतिमाञ् जीव ईशोऽन्य आत्मा ॥ सम्प्रोक्ता नित्यभूतिस्त्रिगुणसमधिका सत्त्वयुक्ता तथैव ज्ञातुर्ज्ञेयावभासी मतिरिति कथितं सङ्ग्रहाद् द्रव्यलक्ष्म ॥ ७ ॥

टी० तत्र द्रव्याद्रव्ययोर्मध्ये द्रव्यं दशावत् विकारधर्मवदित्यर्थः । ईश्वरादावपि मूर्तसंयोगा आगन्तुकास्सन्ति संचरति हि

* वृत्तिरहितत्त्वा पु० पा० ।

मूर्त्तं तस्य विभुनश्च संयोगा विद्यन्त एव । प्रकृतिशब्दः प्राग्वद्विकृतीनामप्युपलक्षकः त्रिगुणशब्दाभिलप्यद्रव्यमित्यर्थः तत्स्वगुणैरेव लक्षयति· गुणैरित्यादिना । इहाव्यक्तकालयोर्मध्ये त्रिगुणस्य रजस्तमसी पृथग् लक्षणे· सत्त्वन्तु बन्धकत्वेन विशेषितं । कालोऽब्दाद्याकृतिरिति । उपाधिकृतविभागैरब्दादिव्यवहारविषय इत्यर्थः तत्तत्परिणामवान्काल इति पक्षोऽपि वक्ष्यते ईश्वरादचेतनादणोश्च व्यवच्छेदायाणुरवगतिमानित्युक्तम्, ईशो ऽन्य आत्मा अणुव्यतिरिक्तश्चेतन इत्यर्थः जीवे विभुत्वोक्तिरीश्वरे ऽणुत्वोक्तिश्चान्यपरेति सूत्राद्युक्तम् । सम्प्रोक्ता तत्परैश्शास्त्रैरिति शेषः त्रिगुणसमधिका त्रिगुणद्रव्यादन्या सत्त्वयुक्ता सत्त्वाख्यगुणविशेषवती त्रिगुणान्यत्वं कालादेरप्यस्तीति तद्व्यवच्छेदोनेन कृतः एतावन्मात्रेण त्रिगुणसाधर्म्यमित्यभिप्रायेण तथैवेत्युक्तं रजस्तमस्समानाधिकरणसत्त्वस्यापि तत्र सत्त्वात् सत्त्वं निर्मलत्वात्प्रकाशकमित्यादि समानमिति वा ज्ञातुर्ज्ञेयावभासो मतिः अहमिदं जानामीत्यहमर्थाश्रयतया सिध्यन्सकर्मकः प्रकाशो मतिरित्यर्थः तादृशावस्थयापि तद्विशिष्टं गृह्यते द्रव्यलक्ष्म सामान्यतो विशेषतश्चेति शेषः ॥ ७ ॥ इति द्रव्यतद्विशेषलक्षणम् ॥ ननु द्रव्यमद्रव्यमित्युभयमसिद्धं रूपादेराश्रयाभावात् रूपादितया विकल्प्यमानस्यैकस्यैवासत्त्वादिति पक्षद्वयमेकेनैव प्रतिक्षिपति ॥ एकार्थेति ॥

मू० एकार्थप्रत्यभिज्ञा भवति दृढतरा दर्शनस्पर्शनाभ्यां संघातादेरयोगादवगमयति सा वस्तुरूपादतो ऽन्यत् ॥ एकस्मिन्दूरतादेरविशदविशदप्रत्यभिज्ञादि तद्वन् नैकत्वेऽप्यक्षभेदाद्विदुरमिव मिथस्संश्रयादिप्रसङ्गात् ॥ ८ ॥

एवमाहुर्वैभाषिकाः निराधारा निर्धर्मकाश्च रूपादयश्चत्वारः पदार्थाः । ते चक्षुराद्येकैकेन्द्रियग्राह्या इति ।

वात्सीपुत्रास्तु शब्दादीन् पञ्च वैभाषिका विदुः ।
शब्दात्मानश्चतुर्ष्वेव केचिदित्यपरे ऽब्रुवन् ॥

तत्र निराधारत्वं तावत्प्रतिसन्धानविशेषेण निरस्यति· अस्ति हि दृष्टमेव स्पृशामीति द्वीन्द्रियग्रा*ह्या धीः सा तावन्न संशयात्मा विरुद्धानियतकोट्य†नवलम्बात्· न च विपर्ययः स्वारसिकबाधादृष्टेरनन्यथासिद्धेश्च तदेतदुभयं दृढतरेति संगृहीतं ग्रहणमिति वक्तव्ये प्रत्यभिज्ञेत्युक्तिर्ज्ञातृज्ञेयस्थैर्यस्यापि व्यक्त्यर्था सेयं न रूपमात्रगोचरा तस्य स्पर्शनविषयत्वाभावात् अन्यथाऽन्यस्यापि स्पर्शनेन रूपोपलम्भनप्रसङ्गात्· न च स्पर्शमात्रगोचरा तस्यापि दृग्विषयत्वाभावात्· तथात्वे चाऽस्पृशतोऽपि दृशा स्पर्शधीप्रसङ्गात्· न चोभयविषया दर्शनस्पर्शनयोः प्रत्येकविषयत्वादेव· अत इयं प्रत्यभिज्ञा रूपाद्यतिरिक्तं तदाश्रयभूतं वस्तु प्रकाशयति इदं रूपस्पर्शवदिति । ननु रूपस्पर्शयोर्नियताज्ञवेद्यत्वेऽप्यवस्थाभेदात् प्रतिसन्धानं स्यात्, न स्यात् न ह्यस्माकमिव स्थिरमवस्थान्तरभाक्किंचित्त्वन्मते विभज्य वैभाषिकपक्षस्त्वतिमन्दः तदिह संहतासंहतस्वलक्षणभेदमात्रन्तु स्यात् तत्र संघातस्वरूपन्तस्य प्रतिसन्धानविषयत्वं च न युज्यते इत्याह । सङ्घातादेरयोगादिति । सङ्घातोऽपि सङ्घातिस्वरूपस्तदन्यो वा· पूर्वत्र न प्रतिसन्धानपदं, द्वितीये सत्योऽसत्यो वा आद्ये द्रव्यवाद एव वरं संसर्गाख्यधर्मस्वीकारो वा तेन परस्परविशिष्टस्वरूपमेवेत्यपि निरस्तं विशेषणविशेष्यतत्सम्बन्धा-

* ग्राह्यविषयाधीरिति पु· पा· । † कोट्यनुपलम्भादिति पु· पा·

[*Page* 25.] This natural condition is two-fold—(1) the condition (inherent) in the object, and (2) the one optionally imposed upon it by the speaker. The former of these again is two-fold—(1) the one already established (the subject of the proposition), and (2) the one in the course of being established (the predicate). The former of these again is two-fold—(1) the one imparting (*a*) life to the meaning of the word, and (2) the means of the comprehension of the differentia of the object. Of these latter, (1) is the *class*, as is declared in the *Vākyapadīya* (of Bhartrihari)——"an ox essentially is neither an *ox*, nor *a non-ox*, but it is known as an *ox*, on account of being related (intimately) with the class *ox*," and (2) is the *property* which, in the form of *whiteness* &c., serves to differentiate an object known to be an *Esse*. The one in the course of being established (the predicate) is the *Action*, the different members of which occur in a serial order. The form of the words Dittha, &c., perceived on hearing the last letter (of the name), without taking into consideration the order in which the letters stand, is imposed optionally by the speaker, as a differentiating characteristic, on the objects (called) *Dittha*, &c. hence this optional imposition is the *Name* of things.

The divisions of Upādhi.

"In the sentence, 'the white ox Dittha is moving,' the application of words is (*b*) Four-fold,"—says Patanjali in his *Mahābhāshya*. (On the aph. "*Ṛlk*"). Atoms, enumerated as they are among qualities, are conventionally classed therein. Though Property, Action and Name respectively are essentially by themselves, one only [*i. e.* there is only one *white*, one *motion*, etc.]; yet they appear different on account of the difference of substrata (the objects they belong to); as a face, though single, appears manifold, when reflected severally in mirror, water, oil, etc. Since the word *whiteness* denotes equally all the different kinds of whiteness

(*a*) Thus explained by the commentators : " *Life* is the capability of a word, of application or use ; the *giver* of this is that which fulfils the necessary conditions of applicability,—and this is the *class*, including all the individuals."

(*b*) (1) The life-giver *class* ; (2) differentiating properties ; (3) The Action in the course of establishment ; and (4) the optional words Dittha, etc., the *name*.

existing in snow, milk, or conch; for which reason all these objects are called *white;* (therefore) it forms a class; as the class 'cooking' applies equally to the cooking of rice, and other things; and further since the quality of being Dittha resides in the Dittha uttered either by persons young and old, or by parrots, etc.; and also in the momentarily—changing meanings of the word [since the name Dittha can at any moment be given to any object];—such being the case, *class* alone forms a reasonable ground for the application of words [*i. e.* class alone forms the denotation]. Thus the *Mīmāmsakas.* (*a*)

The denotation of words again has been said by some (the Naiyāyikas) to consist in the subject of the class—*i. e.* the individual as qualified by the class—(without reference to any particular individual). And by others (the Bauddhas) again, the *Apōha* (*b*) is said to form the denotation.

These different views have not been dealt with at length since they are not quite germane to the present enquiry, and further for fear of being too prolix.

Denotation defined.

8. *contd.*—(*Page* 31.) This (the directly conventional, is the primary meaning of a word; and the action of the word, in this case, is called Denotation (*Abhidhā.*).

This—*i. e.* The directly conventional. *Of this*—of the word.

(*a*) See *Mim. Sūtra:* "आकृतिस्तु क्रियार्थत्वात्" [I—iii—33], on which Savara: "आकृतिः शब्दार्थः &c." [आकृतिः-जातिः] and Mandana Miçra: "गवादिशब्दो ऽभिदधाति जातिम्." ॥ Here a question is raised as to the view of the author himself, Narasinha Thakkura attributing—after rejecting the other theories—the Individualistic theory to him. But the author of the *Bālabodhinī* asserts that the author leans towards the view of Patanjali; and in support of this he quotes the Kārikā—
"जातिश्चतुर्भिर्जात्याद्यैर्विरुद्धा स्यात्." etc. (Kārikā 110). The latter is decidedly the more reasonable of the two. For besides the above quotation, the Individualistic theory is not even so much as mentioned in the Kārikā—in which only the quarternary theory of Patanjali, and the Class-theory of the *Mīmāmsakas* are mentioned; and the precedence given here to the former, shows the author's predilection for it.

(*b*) Thus explained by the commentators: "To say that the word applies to the *class* will not stand to reason; and the individual being transient, no convention can apply to it; consequently, the meaning of words, such as ox, is '*the exclusion of all that is not ox.*' And this is *Apōha.*

Indication defined.

9.—(*Page* 32.) When of a word the primary meaning is barred, and another meaning, in close affinity therewith, is implied, either though tradition, or for a special purpose —this process of imposed implication is called *Indication* (*Lakshaṇá*).

Examples of Indication.

(*Page* 34.) In such instances as कर्मणि कुशलः (expert in business), गङ्गायां घोषः (Ranch in the Gangā), —a secondary meaning is implied by the primary, since the primary meanings—'gatherer of *kusa*' in the former, and 'Gangā the stream, the position of the ranch' in the latter—are found incompatible, and hence are barred; and there is affinity with regard to 'discreetness' and 'proximity' respectively,—and this (secondary signification being brought about, by the traditional use of words (in the former) and (in the latter) by the particular motive of indicating sanctity, etc., as properties of the ranch, which could not be indicated by the phrase 'ranch on the bank of the Gangā.' This imposed mediate process (of implication) is called *Indication*.

The different kinds of Indication.

10.—Pure Indication is of two kinds—the Inclusive, and the Indicative. Of these, Inclusive Indication is that where the secondary meaning is conveyed by a word for the sake of (*i. e.* for the establishment of the logical connection of) the primary meaning; and Indicative Indication is that where the primary meaning surrenders itself for the sake of (*i. e.* for the establishment of the logical connection of) another (the secondary) meaning.

[*Page* 36.] In such instances as—"The lances enter" (कुन्ताः प्रविशन्ति), "The sticks enter" (यष्टयः प्रविशन्ति) — the words 'lances" and "sticks" imply "men" in relation to "wielding'—in order to establish their own logical connection with "entering."

Some—among others, Mandana Miçra—cites the sentence "The ox is to be killed"—as an instance of Inclusive Indication, where they urge that the *class* "ox" in order to establish its own logical connection with "killing" enjoined by the *Çruti*, implies the *individual* "ox," which latter cannot be signified by the word "ox"; for it is declared—"denotation having its power, (of signification) exhausted in the property (*class*) cannot extend itself to the subject (*individual*)."

But the above is not a proper example;—since in this there is no motive (for secondary signification), nor is it based on tradition. The fact is that the *class* implies the *individual*—because without the latter the former cannot exist—just as is implied *doer* by the sentence "let this be done" (an actor implied by the action), an *object* by "do this," and a certain quantity of rice by saying "eat"; and "house" by "enter."

[*Page* 38] The inference of eating at night from the statement—"Fat Devadatta eats not in the day"—is not a case of Indication, but is an instance of presumptive (disjunctive) inference. In the example—"Ranch in the Gangā,"—the word "Gangā," surrenders its own meaning ('the stream') in order to establish the fact of the "bank" being the position of the "ranch." This is *Indicative Indication*.

These two kinds (the Inclusive and the Indicative) of Indication are *Pure*, because, they have not their Connotation based upon similitude (between the primary and the secondary meanings.)

What is Pure Indication?

[*Page* 39.] In the above two instances (of Pure Indication) the characteristic is not the mutual independence of the indicator and the indicated [that is to say, it is not the independence that serves to distinguish the *Pure* from the *Mixed;* this distinguishing characteristic is that of *non-difference* between the two in the case of Pure Indication.] The purpose of the speaker is fulfilled only when between the word "Ganga" and its implied meaning the *bank*, is comprehended *non-difference* (based on the *sanctity* of both). If on the other hand, mere relation with *Gangā*

were comprehended, what would be the difference between the direct denotation of the word *bank* in the sentence "Ranch on the bank of the Gangā" and that indicated in the "Ranch in the Gangā?"

11.—[Page 40.] (Pure Indication) of another kind—called *Superimponent* Indication—is that in which are mentioned the object imposed upon as well as the one imposed.

Pure Indication of another kind.

That indication is called *superimponent* in which the meaning imposed as well as that on which it is imposed are both mentioned as co-extensive (identical)—though with their difference explicitly mentioned.

11. *contd.* *Intro-susceptive* Indication is that in which the sense imposed upon is merged into the one imposed.

Intro-susceptive Indication.

Where the sense imposed upon is swallowed by (*i. e.* not mentioned apart from) the one imposed, we have the Intro-susceptive Indication.

12.—[*Page* 41.] The last two divisions are to be understood as *Qualitative (Gauṇa)* when the relation is that of similitude, and *Pure* when it is other than that (*i. e.* other than similitude).

Qualitative Indication.

(*a*) These divisions—the *Superimponent* and the *Intro-susceptive*—based on similitude—are exemplified respectively as "That ox of the ploughman" (गौर्वाहीकः), and "He is an ox forsooth" (गौरेवायम्).

[*Page* 42.] (*b*) In this example, some say that the properties of the 'ox,' non-intelligence, dulness, etc., though implied by Indi-

(*a*) This view is thus explained in the *Prabhā* :—"The word *ox* having its primary meaning barred on account of the improbability of its co-extensiveness with 'ploughman'—denoting as they do two entirely different objects—first indicates its own properties, dulness, etc., as co-extensive with itself, and then through these properties as the ground of application, it denotes the ploughman."

(*b*) Since, according to the *Bhaṭṭamīmānsakas* the name as well as property have only the *class* as the common substrate.

cation, yet become the cause of the word 'ox' being applied to the *denotation of another word* (ploughman).

Others again assert that only the *properties*—existing in another (the ploughman), being identical with those of the object (ox) itself—are implied by indication, and no *different object* is denoted (as declared above).

Others again—(and among these, the author himself)—assert that *a different object*, being the substrate of analogous properties, is indicated by the word 'ox.' (*a*) As is declared elsewhere (in the *Tantravārtika*—"*Indication* consists in comprehension not unconnected with direct denotation; Qualitative Indication arises from the connection (applicability of one word to the object denoted by another) with the indicative properties (*i. e.* the analogous properties) forming the ground of Indication."

[*Page* 44.] In the above quotation, "*not unconnected with*" stands for *relation* in general, not in the sense of invariable concomitance (Vyāpti). For if the latter be the case (*b*) there would be no indication in such instances as, "The elevated shed calls out." Even if there were invariable concomitance, the matter would be settled by direct inference, and there would be no room for the round-about process of Indication—this we have already explained [when treating of the example, "The ox is to be killed."]

In such sentences as "butter is longevity," "it is longevity forsooth," the relation is other than that of similitude—viz causal

(*a*) Of this quotation different explanations are given by different commentators. The translation follows that given by the *Kāvyapradīpa* which thus explains:—"लक्ष्यमाणाः लक्ष्यतावच्छेदकाः जाड्यादयः, तैरेव यदि योगः तद्द्वारको यदि योगः शक्यसम्बन्धः तदा गौणीवृत्तिरित्यर्थः। गुणलक्ष्यतावच्छेदकिका लक्षणा गौणीति भावः"।

(*b*) Thus explained in the *Bālabodhinī*:—

"In the sentence "The elevated shed calls out" the 'calling' as applied to the insentient 'shed' being incompatible, the 'shed' is made to indicate the 'boy on the shed' in order to establish the logical connection with 'calling.' This process, the author asserts, would be impossible—because, the *shed* being on the grounds and the boy on the shed there is no special concomitance between the two; nor is there any of time, the perception of the shed being possible even without the boy on it."

relation. In such cases both Superimponent and Introsusceptive Indications are (invariably) preceded (and hence brought about) by the causal relation.

In the two kinds of Qualitative Indication, the purpose lies in the cognisance of similarity in dissimilarity (in the case of 'that ox of the ploughman'), and of absolute non-difference (in 'he is an ox forsooth'). In the different kinds of Pure Indication, on the other hand, the motive is the illustration of the causal relation—in one case, ('butter is longevity'), the causal energy being such as is peculiar to the particular cause mentioned (butter, in the present instance); and in the other ('it is longevity forsooth'), the causal energy consists merely in the capability of invariably producing (like diverse other causal energies) the mentioned effect.

Difference between Pure and Qualitative Indication.

[*Page* 46.] Sometimes Indication is based on the relation of subserviency (*i. e.* the relation subsisting between that which does a service and that to which the service is done)—e. g. "Indra" for "the pole for the sake (worship) of Indra;" sometimes on the relation of master and servant,—e. g. "The king" for "the king's servants;" sometimes on the relation of whole and its parts—*e. g.* in the phrase, "the foremost hand," the word "hand" standing for the foremost limb in general; sometimes on the relation of co-professionality—*e. g.* "Carpenters" of "Non-Carpenters" (Herdsmen, &c).

Indication of six kinds.

12 *contd.* Thus Indication is of six kinds.

Including the former divisions. (*vide Table* at the end).

13. [*Page* 48.] (Indication based on) tradition is without, and (that based on some) motive is with, suggested meaning.

Indication based on motive is with suggested meaning.

The motive (of Indication) is cognisable only through the process of *suggestion*.

Suggestion either Abstruse or Obvious.

13. *contd.* That too is either Abstruse or Obvious.

That—*i. e.* the suggested meaning.

[*Page* 49.] To exemplify the *Abstruse* :—

"O heavens! the first tide of youth rejoices in the body of this moon-faced one!—her face blooming with smile, glances oblique, movements graceful, mind wandering, bosom with budding breasts, and thighs thick and well-proportioned."

[Here the epithets—*rejoicing*, etc. applied to various objects are incompatible when taken in their direct sense; and hence suggest, through indication, the qualities of the objects mentioned.].

[*Page* 50.] To exemplify the *Obvious* :—

"Even dull persons, through connection with the Goddess of Wealth, become aware of the doings of clever people. The luxury of youth alone teaches a woman grace and elegance."

Here in the word "teaches" lies the obvious suggestion. [The intelligent act of *teaching* (in the ordinary sense) being barred with reference to youth, mere *manifestation* is indicated by the word, through which *the spontaneous knowledge of graceful gestures* is suggested].

Indication of three forms, in another way.

13. *contd.* [*Page* 51.] Thus this (kind of Indication) is said to be of three kinds.

That is (1) non-suggestive; (2) of abstruse suggestion, and (3) of obvious suggestion.

The Indicative word defined.

14.—(The word) forming the substratum of that (Indication), is called *Indicative*.

This is to be construed with '*the word.*'

Tadbhūh—*i. e.* being its substratum.

Suggestion, in the comprehension of the motive.

14 *contd.* [*Page* 52.] (*a*) There (*i. e.* in the comprehension of the motive, as of *sanctity* in "the ranch in the Gangā"), the procedure is that of *suggestion*.

(*a*) This Kārikā has been construed in two ways: The *Kāvyapradīpa* and the *Sudhāsāgara* interpret it as referring to suggestion *based on indication*. All other commentators are unanimous in referring it to the comprehension of the motive (of indication). This latter interpretation seems to be more germane to what follows; for the *regressus ad infinitum*, mentioned in Kārikā 17., is explicable only when the latter interpretation is accepted in this place.

तत्कल्पनस्यातस्त्वितरज्ज्याय इत्यनन्तरसूत्रविरोधादनाश्रमित्वनिषेधक-वचनान्तरविरोधाच्च लिङ्गाच्चेत्येतस्य अग्ने गृहपते सुगृहपतिः तेनेति ब्रह्मवित्पुण्यकृत्तैजसश्चेतिगार्हस्थ्यस्य प्राशस्त्यगमकश्रौतलिङ्गादनाश्रमनिन्दापरस्मृतिलिङ्गाच्चेत्यर्थमाहुः । तत्र ज्यायस्त्वप्रतितेरस्फुटत्वाच्छ्रौतलिङ्गानादरः ॥ विधुराधिकरणं समाप्तम् ॥

तद्भूताधिकरणम् । **सू० तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः ॥ ४० ॥**

म्यू० नैष्ठिकवैखानसपरिव्राजकाश्रमेभ्यः प्रच्युतानामपि ब्रह्मविद्यायामधिकारेऽस्ति नेति चिन्तायां विधुरादिवदनाश्रमैकान्तैर्धानाभिर्विद्यानुग्रहसम्भावदस्त्यधिकार इति प्राप्ते उच्यते "तद्भूतस्य तु नातद्भाव" इति, तु-शब्दः पक्षव्यावृत्त्यर्थः, तद्भूतस्य नैष्ठिकाद्याश्रमनिष्ठस्य नातद्भावः—अतथाभावोऽनाश्रमित्वेनावस्थानं न सम्भवति, कुतस्तद्रूपाभावेभ्यो नियमात् तद्रूपाणि तेषां नैष्ठिकादीनां रूपाणि वेषा. धर्मा इत्यर्थः, तेषामभावास्तद्रूपाभावाः तेभ्यः शास्त्रैर्नियमात् नैष्ठिकाद्याश्रमं प्रविष्टान्स्वाश्रमधर्मनिवृत्तिभ्योनियच्छन्ति हि शास्त्राणि, ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन्निति, अरण्यमियात्ततो न पुनरेयादिति च संन्यस्याग्निं न पुनरावर्त्तयेदिति च, अतो विधुरादिवन्नैष्ठिकादीनामनाश्रमित्वेनावस्थानासम्भवान्न तानधिकरोति ब्रह्मविद्या, जैमिनेरपीत्यविगानं दर्शयन्नुक्तं स्वाभिमतं द्रढयति । अथ स्यान्नैष्ठकादीनां ब्रह्मचर्य्यात् प्रच्युतानां प्रायश्चित्ताद-

धिकारः सम्भवति अस्ति च प्रायश्चित्तमधिकारलक्षणे निरूपितम् । अवकीर्णिपशुश्च तद्वदिति अतः प्रच्युतब्रह्मचर्य्यस्य प्रायश्चित्तसम्भवात् कृतप्रायश्चित्तो ब्रह्मविद्यायामधिकरिष्यतीति तत्राह—

सू० न चाधिकारिकमपि पतनानुमाना-त्तदयोगात् ॥ ४१ ॥

अधिकारलक्षणोक्तमपि प्रायश्चित्तं नैष्ठिकादीनां ततो भ्रष्टानां न सम्भवति कुतः पतनानुमानात् तदयोगात् नैष्ठिकादीनां प्रच्युतानां पतनस्मृतेस्तस्य प्रायश्चित्तस्यासम्भवात् "आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते द्विजः । प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महे"ति, अतोऽधिकारलक्षणोक्तं प्रायश्चित्तमितरब्रह्मचारिविषयम् ॥

टी० सू० तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः ॥ ४० ॥ विधुरादेर्विद्याधिकार उक्तः, अनाश्रमित्वसाम्यादाश्रमभ्रष्टानामपि विद्याधिकार इति शङ्कया सङ्गतिः, वैखानसः-वानप्रस्तः किं नैष्ठिकाद्याश्रमभ्रष्टानां ब्रह्मविद्याधिकारोस्ति ? ने ? ति किमेषां साङ्गविद्योपसंहारसामर्थ्यमस्ति ने ? ति, किमेषां प्रायश्चित्ताच्छुचित्वं सम्भवति ने ? ति, किं "योब्रह्मचारी स्त्रियमुपेया"दिति विहितं प्रायश्चित्तं सर्वब्रह्मचारिविषयम् ? उत नैष्ठिकादिव्यतिरिक्तविषयं ? प्रायश्चित्तं न पश्यामीति प्रायश्चित्ताभावस्मरणं किं प्रायश्चित्तस्य व्यतिरिक्तब्रह्मचारिविषयतामवगमयति ने ? ति' न चेत् प्रायश्चित्तस्य सर्वविषयतया शुद्धिसम्भवेन सामर्थ्यादधिकारः । अवगमयति चेत् प्राश्चित्तस्य उपकुर्वाणविषयतया शुद्धेरसम्भवेनासामर्थ्यात् ब्रह्मविद्याऽनधिकारः' ब्रह्मचारीत्यादिश्रुतिर्नैष्ठिकविषया । अनन्तरसूत्रमवतारयति "अथ स्या"दिति अधिकारलक्षणे

षष्ठेऽध्याये अवकीर्णिपशुर्गर्दभः "ब्रह्मचार्यवकीर्णी नैर्ऋतं गर्दभमालभे-ते"त्युक्तं, ब्रह्मचर्यभ्रष्टोऽवकीर्णी, ब्रह्मचर्यं—स्त्रीनियतिः सा गृहस्थव्यतिरिक्तानां त्रयाणामपि तुल्या, तस्मात्तेषामवकीर्णिप्रायश्चित्तं कर्तव्यमिति पूर्वपक्षिणोऽभिप्रायः । सू० न चाधिकारिकमपि पतनानुमानात्तदयोगात् ॥ ४१ ॥ तर्हि आधिकारिकप्रायश्चित्तं किंविषयमित्यत्राह "अत" इति, य उपकुर्वाणो ब्रह्मचारी भ्रष्टः तद्विषयमवकीर्णिप्रायश्चित्तमित्यर्थः ।

सू० उपपूर्वमपीत्येके भावमशनवत्तदुक्तम् ॥ ४२ ॥

सू० नैष्ठिकादीनां ब्रह्मचर्यप्रच्यवनमुपपूर्वमुपपातकं महापातकेष्वपरिगणितत्वादिति तच्च प्रायश्चित्तस्य भावं विद्यमानतामप्येके आचार्या मन्यन्ते, अशनवत् यथा मध्वशनादिनिषेधस्तत्प्रायश्चित्तं चोपकुर्वाणस्य नैष्ठिकादीनां च समानं, तदुक्तं स्मृतिकारैः "उत्तरेषां चैतदविरोधी"ति, गुरुकुलवासिनो यदुक्तं तत्स्वाश्रमाविरोध्युत्तरेषामप्याश्रमिणां सम्भवतीत्यर्थः, तद्वदिहापीति ब्रह्मचर्यप्रच्यवने प्रायश्चित्तसम्भवाद्ब्रह्मविद्यायोग्यताऽप्यस्ति ॥

सू० बहिस्तूभयथाऽपि स्मृतेराचाराच्च ॥ ४३ ॥

तु—शब्दोमतान्तरव्यावृत्त्यर्थः, उपपातकत्वे महापातकत्वेऽप्येते बहिर्भूता एव ब्रह्मविद्याऽधिकारिभ्यः, ब्रह्मविद्यायामनधिकृता इत्यर्थः, कुतः स्मृतेः पूर्वोक्तात् पतनस्मरणात्, यद्यपि कलु[1]षनिर्हरणाय कैश्चिद्वचनैः प्रायश्चित्ता-

[1] कल्मषेति पा० ।

धिकारो विद्यते तथाऽपि कर्माधिकारानुगुणशुद्धिहेतु-प्रायश्चित्तं न सम्भवति "प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महे"ति स्मृतेरित्यर्थः ॥

टी० सू० उपपूर्वमपीत्येके भावमशनवत्तदुक्तम् ॥ ४२ ॥ इदं चोद्य-सूत्रं ब्रह्मचर्यप्रच्यवनस्य महापातकेष्वपरिगणितत्वादुपकुर्वाणब्रह्मचारिणः स्त्रीनियमातिक्रमस्योपपातकान्तर्भूतस्य प्रायश्चित्तकथनात्तस्य च नैष्ठि-कादिष्वतिदेशाच्च प्रायश्चित्तं प्राप्तमित्यर्थः, उत्तरेषां चैतदविरोधीत्यत्रैत-च्छब्दः पूर्वोक्तधर्मान् प्रायश्चित्तं च परामृशति स्वाश्रमाविरोधिशब्दः स्त्रीसंसर्गादिनिमित्तप्रायश्चित्तादेर्गृहस्थादिष्वनापातार्थः । सिद्धान्तसूत्र-माह । सू० बहिस्तूभयथाऽपि स्मृतेराचाराच्च ॥ ४३ ॥ उभयथेति पदं व्याचष्टे "उपे"ति, अतिदेशवचनेन प्रायश्चित्तं प्राप्तं, पतनस्मृतिश्चास्ति तयोः कथं विरोधः परिह्रियते इत्यत्राह "यद्यपी"ति, कर्मशक्तिस्त्रिधा प्रत्यवायकरी 'वैदिककर्माधिकारप्रतिबन्धकरी' सजातीयकर्मरुचिकरी चेति तत्र कानिचित्प्रायश्चित्तानि शक्तित्रयविनाशकानि, कानिचिदन्यतम-शक्तिविनाशकानि, अत्रातिदेशपतनस्मृतिविरोधेऽतिदेशस्मृतिः प्रत्यवाय-जननशक्तिविनाशकं प्रायश्चित्तमाह, पतनस्मृतिस्तु वैदिककर्मानधिकार-शक्तिविनाशकप्रायश्चित्ताभावमाह 'येन शुद्ध्येदित्युक्तत्वात्तस्मादविरोधः । अतोऽतिदेशसिद्धप्रायश्चित्तेन नरकानुभवलाघवे सत्यपि पतनस्मृतिवच-नान्न ब्रह्मविद्याधिकार इत्यर्थः ॥

सू० आचाराच्च—शिष्टा हि नैष्ठिकादीन्भ्रष्टान् कृतप्राय-श्चित्तानपि वर्जयन्ति तेभ्यो ब्रह्मविद्यादिकं नोपदिशन्ति, अतस्तेषां नास्ति ब्रह्मविद्यायामधिकारः ॥ तद्भूताधिकरणं समाप्तम् ॥

स्वाम्यधिकरणम् ।

सू० स्वामिनः फलश्रुतेरित्या-त्रेयः ॥ ४४ ॥

कर्माङ्गाश्रयाण्युद्गीथाद्युपासनानि किं यजमानकर्त्तृकाणि? उतर्त्विक्कर्तृकाणी? ति चिन्तायां यजमानकर्तृकाणीत्याचेर्यो मन्यते, कुतः फलश्रुतेः, वेदान्तविहितेषु दहराद्युपासनेषु फलोपासनयोरेकाश्रयत्वदर्शनादिह च क्रतुफलाप्रतिबन्धरूपस्योद्गीथोपासनफलस्य यजमानाश्रयत्वश्रवणादित्यर्थः ॥

टी० आचाराच्चेति सूत्रखण्डोपादानं 'वर्जनफलमाह "नोपदिशन्ती"ति, अनाश्रमी न तिष्ठेदित्यनाश्रमित्वं निषिद्धम्, आश्रमभ्रंशोऽपि निषिद्धः, एवं निषेधे समाने कथमेकत्र विद्याधिकारोऽन्यत्रानधिकारः? उच्यते अनाश्रमिणामपि विद्याधिकारः श्लाघ्यत्वं च श्रुतम्, आश्रमप्रच्युतानां तु न तथेति विशेष इति । परे तु तद्भूतस्येत्येकं सूत्रं पृथगधिकरणं वदन्ति तत्र उर्द्ध्वरेतसामाश्रमप्रत्यवरोहः प्रामाणिको न वेति संशये ते ब्रह्मविद्याधिकारसिद्ध्यर्थं पूर्वाश्रमकर्मानुष्ठानचिकीर्षया रागादिना वा सम्भवतीत्युक्त्वा नियमश्रुत्या ते तदप्रामाणिकत्वं सिद्धान्तयन्ति' न चाधिकारिकमपि इत्यधिकरणान्तरं नैष्ठिकादीनामाश्रमभ्रष्टानां प्रायश्चित्तसम्भवासम्भवविषयं वदन्तोऽसम्भव इति सिद्धान्तयन्ति यदा आश्रमभ्रष्टानां प्रत्यवायवचनानि दृश्यन्ते प्रायश्चित्तासम्भवोऽपि संशयास्पदं भवति तदा कथं भ्रंशस्य सद्भावे प्रमाणविरुद्धत्वे च संदेहः, अतः, सन्देहाभावाद्विचारोऽनुपपन्नः, अतो नातद्भाव इति सूत्रमपि मूलविचारे हेतुगर्भमेकाधिकरणमिच्छतामपरेषामपि प्रच्युतिरस्ति नेति विचार उक्तन्यायादनुपपन्नः। अन्येषामपि तद्भूतसूत्रस्य पृथगधिकरणत्वं संशयाभावादयुक्तम् । आश्रमादाश्रमं गच्छेदित्यविशेषवचनात् पतनवचनस्यानाश्रमित्वरूपेण प्रच्यवनविषयत्वसम्भवाच्च विचार इति चेत् न संन्यस्याग्नीन्न पुनरावर्त्तयेदित्याश्रमप्रत्यवरोहनिषेधश्रुतेः स्फुटार्थतया सम्भावितार्थान्तरस्मृतिवचनेन सन्देहानुदयात्, अविदितनिषेधवाक्यस्य सन्देहोदय इति चेत् अविदि-

तत्स्मृतिवचनस्य सन्देहाभावादनारम्भः स्यात्, विदितस्मृतिवचनस्याविदितनिषेधवाक्यस्य सन्देह इति चेत् तर्हि तत्तदेकदेशाज्ञाननिमित्तसन्देहानन्त्यादनन्ताधिकरणकल्पनप्रसङ्गः, न चाधिकारिकमिति ऊर्ध्वरेतसामाश्रमभ्रष्टानां प्रायश्चित्ताभावस्मरणाद्विद्यायामनधिकार इति पूर्वपक्षसूत्रं कृत्वा वर्द्धुषिकत्वं व्रतात् च्युतिरिति व्रतच्युतेरुपपातकत्वात्, मध्यशनोपपातकप्रायश्चित्तस्यात्रापि प्राप्तिस्मरणात् श्रौतस्याप्यवकीर्णिप्रायश्चित्तस्य ब्रह्मचारित्वेन सामान्येन नैष्ठिकेऽपि प्राप्तत्वाद्दानप्रस्योदीत्ताभेदे कृच्छ्रं द्वादशरात्रं वर्द्धयेदित्यादिवचनात् प्रायश्चित्ताभावस्मृतेः प्रायश्चित्तगौरवाभिप्रायत्वसम्भवाच्च प्रायश्चित्ताभावस्मरणस्य मूलादर्शनात्तत्सद्भावस्मरणस्य ब्रह्मचारित्वादिरूपसामान्यन्यायमूलत्वेन शास्त्रसंस्पर्शसम्भवा"च्छास्त्रस्था वा तन्निमित्तत्वा"दिति न्यायेन शास्त्रसंस्पर्शवतः प्राबल्यात् प्रायश्चित्तेन ब्रह्मविद्याधिकार इत्युपपूर्वमिति सूत्रेण सिद्धान्तयन्त्यन्ये उपपूर्वमपि इत्येके बहिस्तूभयथाऽपीति सूत्रस्वारस्यविरोधात्तदयुक्तम्, एक इति पदेन पूर्वपक्षत्वं तु-शब्देन तद्व्यावृत्तिरुभयथा शब्देन पतनीयत्वे अपतनीयत्वे च बहिष्कार्यत्वं हि प्रतीयते, प्रायश्चित्ताभाव स्मरणस्य न शास्त्रसंस्पर्श इत्यप्ययुक्तं बाधकभावे श्रुतिमूलत्वसिद्धेः शास्त्रसंस्पृष्टं प्रायश्चित्तस्मरणं बाधकमिति चेत् न येन शुद्ध्येदिति प्रायश्चित्ताभाववचनस्य शुद्धिहेत्वभावविषयत्वात्, प्रायश्चित्तसद्भावचनस्य तु कल्मषनिर्हरणविषयत्वेनाप्युपपत्तेः, अधिकारापादकप्रायश्चित्तसद्भावानवगमकतया च विरोधाभावात् बाधकत्वानुपपत्तेः, अनन्यथासिद्धं हि बाधकं बहिस्तूभयथाऽपीति सूत्रमकृतप्रायश्चित्तानामाश्रमभ्रष्टानामनधिकारसमर्थनपरमधिकरणान्तरं वर्णयन्ति तदप्ययुक्तं संशयाभावात् प्रायश्चित्तेऽपि शुद्धौ संदिग्धायामकृतप्रायश्चित्ततया निर्णीताशुद्धीनां कथं ब्रह्मविद्याधिकारसम्भावना । ननु इन्धनार्थमशुष्काणां द्रुमाणामवशातनमित्यादेरुपपातकत्वात्तादृशं कुर्वतामितरैः संव्यवहारादिशास्त्रीयानुष्ठानादिदर्शनादाश्रमभ्रंशस्याप्युपपातकत्वाविशेषात् संशय इति चेत् तर्ह्यनधिकार इति सिद्धान्तोऽनुपपन्नः अशुष्कद्रुमशातनादिकारिषु कर्मान-

धिकारासंव्यवहाररूपहेत्वभावस्य भवद्भिरेवोक्तत्वात् उपपातकेष्वपि गुरुतरपापकारिषु हेतुसद्भाव इति चेत्तर्हि तेषु पूर्वोक्तन्यायेन संशयाभावादेवानादरणीयता ॥ तद्भूताधिकरणं समाप्तम् ॥ सू० स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४४ ॥ इदमधिकरणं प्रासङ्गिकम् उपासनानुष्ठात्रनुष्ठातृविभागप्रसङ्गेनोद्गीथोपासनादेरनुष्ठात्रनुष्ठातृविभागचिन्ता क्रियत इति सङ्गतिः, क्रत्वङ्गाश्रयाण्युपासनानि किं यजमानकर्तृकाणि? उत ऋत्विक्कर्तृकाणि? किं दहराद्युपासनानामिव फलिकर्तृकत्वं न्याय्य? मुत गोदोहन.देरिव ऋत्विक्कर्तृकत्वं किं गोदोहनादिषु ऋत्विक्कर्तृकत्वं यजमानेनाशक्योपादनतया? उत साङ्गप्रधानानुष्ठनाय ऋत्विक्परिक्रयश्रवणात्,? अशक्यतया चेत् तदभावात् फलिकर्तृकत्वोपपत्तेः, यजमानकर्तृकत्वं, परिक्रयश्रवणाच्चेत् गोदोहनादाविव ऋत्विक्कर्तृकत्वस्य न्याय्यत्वादृत्विक्कर्तृत्वम्, उद्गीथाद्युपासनानीत्युक्ते उपासनस्य कर्माङ्गत्वं माभूदिति कर्माङ्गाश्रयाणीत्युक्तम् ॥

सू० न च गोदोहनादिवदङ्गाश्रयत्वेन यजमानकर्तृकत्वासम्भवः, गोदोहनादिषु ह्यध्वर्युकर्तृकप्रणयनाश्रयगोदोहनोपादानमन्येनाशक्यम्, इह तूद्गातृकर्तृकेऽप्युद्गीथे तस्योद्गीथादेरसतमत्वानुसन्धानं यजमानेनैव कर्त्तुं शक्यत इति प्राप्तेऽभिधीयते ।

सू० आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते ॥ ४५ ॥

आर्त्विज्यमृत्विजः कर्मोद्गीथाद्युपासनमित्यौडुलोमिराचार्यो मन्यते, कुतः तस्मै हि प्रयोजनायर्त्विक् परिक्रियते फलसाधनभूतस्य साङ्गस्य क्रतोरुपादानायेत्यर्थः, कर्मेविधिषर्त्विजो वृणीते ऋत्विग्भ्यो दक्षिणां ददाती"ति

१ अनारम्भणियतेति पा० ।

ऋत्विक्कर्तृकत्वशास्त्रेण फलसाधनभूतं साङ्गं कर्म ऋत्विग्भिरनुष्ठेयमित्यवगम्यते, तदन्तर्गतानि कायिकानि मानसानि च कर्माणि ऋत्विक्कर्तृकाण्येव, न च शक्त्यशक्ती तस्य निबन्धनं यद्यप्युद्गीथाद्युपासनं पुरुषार्थस्तथाऽपि क्रत्वधिकृताधिकारत्वात् क्रतोश्च साङ्गस्य ऋत्विक्कर्तृकत्वात् यदेव विद्यया करोति तदेव वीर्य्यवत्तरमित्यृत्विक्कर्तृकक्रियोपयोगित्वेन विद्यायास्तदेककर्तृकत्वश्रवणादृत्विक्कर्तृकाण्येतानि दहरादिषूपासनेषु ऋत्विक्कर्तृकत्वाश्रवणा "च्छास्त्रफलं प्रयोक्तरी"ति न्यायाच्च फलिकर्तृकत्वमेव ॥ स्वाम्यधिकरणं समाप्तम् ॥

सहकार्यन्तरविध्यधिकरणम् ।

सू० सहकार्य्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ४६ ॥

"तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेद् बाल्यं च पाण्डित्यं च निर्विद्याथमुनि"रित्यत्र बाल्यपाण्डित्यवन्मौनमपि विधीयते? उतानूद्यत? इति विषये, मौनपाण्डित्यशब्दयोर्ज्ञानार्थत्वात्पाण्डित्यं निर्विद्येति विहितमेव ज्ञानमथ मुनिरित्यनूद्यते। विधि-शब्दो न ह्यत्र श्रूयते इत्येवं प्राप्ते ब्रूमः-सहकार्यन्तरविधिरिति, ।

टी० न चेत्यादि प्रणयनस्याध्वर्युकर्तृकत्वात् तदाश्रयस्य गोदोहनस्योपादानं यजमानेन फलाश्रयभूतेनापि कर्त्तुमशक्यम्, अत्र तु शक्यत्वात् फलाश्रय एव कर्तेत्यर्थः । सिद्धान्तसूत्रमाह सू० आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते ॥ ४५ ॥ तस्मै हि प्रयोजनायेति, चतुर्थीव्याख्यानं, फलसाधनेत्यादिना तच्छब्दव्याख्यानं, परिक्रियत इत्येतद्विवृणोति "कर्म-

म्पर्यायेण भवतीति, एवमप्युदात्तविषयमेव ज्ञापकं स्याच्च बहुव्रीहावन्तोदात्तत्वं पर्यायेण भवतीति, किं च स्याद् उदात्तस्वरितयोस्तु पूर्वोत्तरपदस्ययोः पर्यायप्रसङ्गः, न च स्वरिते य उदात्तस्तदाश्रयं ज्ञापकं युज्यते, अचो ह्युदात्तसंज्ञा, न च वर्णैकदेशो वर्णग्रहणेन गृह्यते, अथ वर्णत्वावर्णत्वकृतं भेदमुत्सृज्योदात्तश्रुतिपरं ज्ञापकं वर्ण्येत तदा बहुव्रीहिग्रहणं शक्यमकर्त्तुम् ॥

"तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः" ॥ 'सदृशशब्दोपीत्यादि'। कृदुत्तरपदप्रकृतिस्वरेणेत्येतदपेक्षते । 'कुमुदशब्दोपीत्यादि' । तत्र यदा कप्रत्ययान्तस्तदा थाथादिस्वरेणान्तोदात्तः, तथा चानुदात्तस्य च यत्रोदात्तलोप इत्यत्र कुमुद्वानित्युदाहृतमुक्तं च कुमुदादयोन्तोदात्ता इति, यदा त्वव्युत्पन्नं तदा 'नब्विषयस्यानिसन्तस्य'त्याद्युदात्त इत्युक्तम्, अपर आह, जलजे नपुंसकविषयः कुमुदशब्दः, यस्तु वानरविशेषे कुमुदशब्दः स पुल्लिङ्गस्तत्रेह जलजवाच्युदाहृतः, अनुदात्तस्य चेत्यत्र तु वानरवचन इति । 'दूर्वाकाण्डशरकाण्डशब्दावित्यादि'। आद्युदात्तप्राप्तिप्रदर्शनमेतत्, षट् च काण्डादीनीत्युत्तरपदाद्युदात्तत्वेन तत्र भाव्यम् । 'नञ्कुनिपातानामिति'। निपातत्वादेव सिद्धे नञ्ग्रहणमकरणिरित्यादौ परस्यापि कृत्स्वरस्य बाधनार्थं, तथा चाव्ययीत्यत्रापि कृता सह निर्दिष्टो यत्र नञ् तत्रापि नञ एव स्वरो भवति, तथा विभक्तिस्वरान्नञ्स्वरो बलीयान् भवति, कुग्रहणं तु चादिषु पाठाभावात्, पठितव्यस्त्वसौ, अन्यथाव्ययसंज्ञा न स्यात्, स्वरादिष्वपि पाठाभावात् । 'स्नात्वाकालक इति' । मयूरव्यंसकादिरयं, यद्येवं स तत्रैवान्तोदात्तः पठिष्यते, एवमपि परिगणनं कर्त्तव्यं, सामिकृतं स्वयंधौतमित्यादौ प्रकृतिस्वरो माभूदिति, इह कस्मान्न भवति, परमं कारकं परमकारकं, परमेण कारकेण परमकारकेण, परमे कारके परमकारके इति, नहि विशेषणसमासः प्रथमान्तानामेवेति नियमोस्ति, तेन द्वितीयाद्यन्तं पूर्वपदमिति चोद्यं, परिहारस्तु लक्षणप्रतिपदोक्तपरिभाषया तृतीयादीनां प्रतिपदं यः समासस्तत्रायं स्वरः, अयन्तु विभक्तिविशेषमनुपादाय विशेषणसमास इति ॥

"वर्णो वर्णेष्वनेते" ॥ अनेतइति प्रतिषेधाद्बहुवचननिर्देशाच्चो-त्तरपदे स्वरूपग्रहणं न भवति, तत्साहचर्यात्पूर्वपदेऽपि। 'कृष्णशब्दो नक्प्रत्ययान्तोऽन्तोदात्त इति'। फिषि तु कृष्णस्यामृगाख्या चेदिति छन्दस्य-न्तोदात्तत्वमन्यत्राद्युदात्तत्वं व्यवस्थितम् ॥

"गाधलवणयोः प्रमाणे" ॥ 'शम्बगाधमिति' । गाधृ प्रति-ष्ठायां, गाध्यतइति गाधः, अर्द्धर्चादिः, इयत्तायाः परिच्छित्तिरियत्तापरिच्छेदः, क्रियाशब्दोत्र प्रमाणशब्दो गृह्यते न त्वायाममाने रूढ इत्यर्थः ॥

"दायाद्यं दायादे" ॥ दातव्यो दायः, भागोंश इत्यर्थः । दाय-मादत्ते दायादः, मूलविभुजादित्वात्कः, दायादस्य भावो दायाद्यं, किं पुनस्तत्, दायस्यादानं तत्संबन्धो वा, इह तु लक्षणया ऽऽदीयमाने दायएव दायाद्यशब्दो वर्त्तते । 'अयेत्यादि' । वक्ष्यमाणोभिप्रायः । तमेवा-विष्करोति । 'यद्येवमिति' । 'शेषलक्षणैवेति'। सामान्यलक्षणैवात्र षष्ठी न प्रतिपदमित्येवशब्दस्यार्थः । यदि शेषलक्षणैवात्र षष्ठी किमर्थं पुन-स्तत्र विधानमित्याह । 'तस्यास्त्विति'। सप्तमी तावद्विधेया, अप्राप्त-त्वात्, तत्र यदि सैव विधीयेत ततोसौ विशेषविहितत्वात् षष्ठ्या बाधिका विज्ञायेत, मैवं विज्ञायीति पुनः सैव शेषलक्षणा षष्ठ्यभ्यनुज्ञा-यते न त्वपूर्वा विधीयतइत्यर्थः ॥

"प्रतिबन्धि चिरकृच्छ्रयोः" ॥ कार्यसिद्धिं प्रतिबध्नातीति प्रति-बन्धी, आवश्यके णिनिः । 'विशेषणसमास इति'। ननु च सामाना-धिकरण्ये सति स भवति, न चेह तदस्ति, गमनशब्दस्य गतिवाचि-त्वात् चिरशब्दस्य च कालवाचित्वात् । नैष दोषः । चिरकालभाविनि गमनेत्र चिरशब्दो वर्त्तते। 'मयूरव्यंसकादिर्वेव इति' । गमनमत्र विशेष्य-न्तद्विशेषणे तु चिरकृच्छ्रे, अतो विशेष्यस्य पूर्वनिपातार्थं मयूरव्यंसकादि-त्वमेष्टव्यमिति भावः । पूर्वपदस्य प्रतिबन्धिवाचित्वमुपप[1]त्रयति । 'गमनं हीत्यादि' । कारणवैकल्याद्धि चिरकालभावि गमनं कृच्छ्रयोगि च, कृच्छ्र-न्दुःखं तद्योगि च कार्यसिद्धेः प्रतिबन्धि जायते ॥

१ उपपादयतीति ३ पु॰ पा॰ ।

"पदेपदेशे" ॥ उच्चारः पुरीषक्रिया ॥

"निवाते वातत्राणे" ॥ 'झक्प्रत्ययान्तोऽन्तोदात्त इत्यपर इति'। कवतेर्झगिति सूत्रमधीयते, डकारस्येत्संज्ञा न भवति गुणप्रतिषेधार्थात्ककारानुबन्धात् ॥

"शारदे ऽनार्तवे" ॥ उदाहरणे रज्जूदृते रज्जुशब्दो दृषत्पिष्टेषु दृषच्छब्दः, ततः कर्मधारये ऽस्वपदविग्रहः, सृजेरसुम् चेत्यत्र स्कन्देः सलोपश्चेत्यतः सलोप इति वर्त्तते, तेन सृजेरन्त्यादचः परोयमसुम्, सलोपे यणादेशे ऽसुमः सकारस्य जश्त्वे च रज्जुरिति भवति ॥

"अध्वर्युकषाययोर्जातौ" ॥ 'नियतविषया इति'। वर्णविशेषनियता इत्यर्थः ॥

"सदृशप्रतिरूपयोर्जातौ" ॥ सदृशग्रहणमनर्थकं तृतीयासमासवचनात्, सदृशशब्देन तृतीयासमास उच्यते 'पूर्वसदृशसमोनार्थे' ति, तत्र तृतीयापूर्वपदं प्रकृतिस्वरम्भवतीत्येव सिद्धमत आह । 'षष्ठीसमासार्थञ्चेति'। तुल्यार्थयोगे षष्ठ्यपि विधीयते, तत्र यदा तस्याः षष्ठ्याः समासः क्रियते तदापि यथा स्यादित्येवमर्थं सदृशग्रहणम् । ननु चानभिधानात्षष्ठीसमासो न भविष्यति । त्रैशब्द्यं हि नः साध्यम्, मातुः सदृशो मात्रा सदृशो मातृसदृश इति, एतच्च विनापि षष्ठीसमासेन सिद्ध्यत्येवात आह । 'इहेत्यादि'। अलुकि सति रूपविशेषस्य विद्यमानत्वादवश्यकर्त्तव्यः षष्ठीसमासस्तदर्थं चेह सदृशग्रहणं कर्त्तव्यं, यद्येवं तृतीयासमासे सदृशग्रहणञ्च कर्त्तव्यं षष्ठीसमास एवास्तु, यत्र तर्हि षष्ठ्यर्थो नास्ति तदर्थन्तत्र सदृशग्रहणं यथा विद्यया सदृशो विद्यासदृश इति, नह्यत्र षष्ठ्यर्थोऽस्ति, किं तु तृतीयार्थः, विद्यया हेतुना सदृश इत्यर्थः, अन्यो देवदत्तादिरत्र प्रतियोगी, अपर आह । तृतीयासमासोप्यलुकि प्रयोजयति, मनसः संज्ञायां मनसासदृश इति । 'अत्रेत्यादि'। दशि दंशनस्पर्शनयोः, दंशेष्ट्रो न आ चेति टप्रत्ययो नकारस्य चाकारः, टित्त्वान्ङीप्, यस्येति लोपः, अनुदात्तस्य च यत्रोदात्तलोप इति ङीप उदात्तत्वं, वृषलशब्दाज्जातिलक्षणो ङीष् ॥

"द्विगौ प्रमाणे" ॥ 'कर्दमादीनाञ्चे'त्यत्र मकरकुक्कुटपारेवते-त्यादेः सूत्रादादिग्रहणमनुवर्त्तते, 'अथ द्वितीयं प्राग्गीषा'दित्यतो द्वितीयग्रहणम् । 'परमसप्तसममिति'। समाहारे द्विगुः, पात्रादित्वा-न्नपुंसकत्वम्, मूलोदाहरणे तु तद्धितार्थे द्विगुरुत्तरपदम् ॥

"गन्तव्यपण्यं वाणिजे" ॥ वणिगेव वाणिजः प्रज्ञादित्वादण् । 'सप्तमीसमासा एतद्इति'। सप्तमीति योगविभागात्, गोवाणिजादयस्तु षष्ठीसमासाः ॥

"मात्रोपज्ञोपक्रमच्छाये नपुंसके" ॥ फिषिति आदिमेन योगेन शान्तनवीयञ्चतुष्कं सूत्रमुपलक्षयति, तत्र समुद्रशब्दः सागरार्थत्वाद-न्तोदात्तः ॥

"सुखप्रिययोर्हिते" ॥ 'समानाधिकरणसमासा एतद्इति'। गमनादीनां विशेषणत्वात्पूर्वनिपातं मन्यते, अथ तु सुखप्रिययोर्विशेष-णत्वन्तदा मयूरव्यंसकादित्वमेष्टव्यम् । 'आयत्यामिति'। परिणामे आगामिकाले भाविकालइति यावत् ॥

"प्रीतौ च" ॥ इह तु सुखप्रिययोरित्येतावत्सूत्रं कृत्वा हिते चेति वक्तव्यम् । तत्राद्ये सूत्रे सुखप्रिययोः प्रीत्यव्यभिचारादेव प्रीतौ गम्यमानायां भविष्यति, तत्राह । 'सुखप्रिययोरित्यादि'। ब्राह्मण-शब्दोणन्तः, छात्रशब्द 'शब्दात्रादिभ्यो ण'इति णप्रत्ययान्तः । 'कन्या-शब्दः स्वरितान्त इति'। तिल्यशिक्यमर्त्यकाश्मर्यधान्यकन्याराजन्यमनु-ष्याणामन्त इति फिषि पाठात् ॥

"पत्यावैश्वर्ये" ॥ 'धान्यमन्तस्वरितमिति'। अनन्तरपठि-तेन फिट्सूत्रेण, गवादीनान्तु पूर्वमेव स्वरकथनम् ॥

"न भूवाक्चिद्दिधिषु" ॥ भूवादीनां समाहारद्वन्द्वे नपुंसक-ह्रस्वत्वम्, अत्र पूर्वपदप्रकृतिस्वरप्रतिषेधाद्वृत्तिकारेण पूर्वपदानां स्वरो व्याख्यातः, तत्रादितस्त्रयः क्विबन्ताः, अन्दूदृम्भूजम्बूकफेलूकर्कन्धूदिधि-षूरिति कूप्रत्ययान्तो दिधिषूशब्दो निपातितः ॥

"वा भुवनम्" ॥ भुवनशब्दो भाषायां बहुलवचनात्साधुः ॥

"आशङ्काबाधनेदीयस्सु संभावने" ॥ शकि शङ्कायां, बाधृ विलोडने, आङ्पूर्वाभ्याङ्कर्मणि घञ्, अतिशयेनान्तिको नेदीयः, 'अन्तिकबाढयोर्नेदसाधौ' अस्तित्वाध्यवसायोस्तित्वनिश्चयः, गमनाशङ्कादयो विशेषणसमासाः, मयूरव्यंसकादयो वा ॥

"पूर्वं भूतपूर्वे" ॥ 'आढ्यो भूतपूर्व इति' । यः पूर्वमाढ्य आसीत्स एवमुच्यते । 'अत्रेत्यादि' । 'परमश्चासौ पूर्वश्चेति' । सोयं वाक्यार्थः पूज्यमानतालक्षणः, तस्मिन्निह प्रत्युदाहरणे समास इत्यर्थः । 'न त्विति' । 'परमो भूतपूर्व इति' । योयं वाक्यार्थः पूर्वं परम आसीदित्येवंरूपः, न तस्मिन् तत्र समास इति यावत्, किं कारणमित्याह । 'तथा चेति' । चोह्यर्थे ॥

"सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये" ॥ उदाहरणेषु षष्ठीसमासः, मद्रादीनां पूर्वमेव स्वर उक्तः ॥

"विस्पष्टादीनि गुणवचनेषु" ॥ 'विस्पष्ट इति' । स्पशबाधनस्पशनयोरित्यस्य निष्ठायां वा दान्तेत्यादिना स्पष्टशब्दो निपातितः, विशब्देन गतिसमासः । चित्र चित्रीकरणे चुरादिस्तस्मादेरच्, विशेषेण चित्रं विचित्रं, प्रादिसमासः । चिती सञ्ज्ञाने, विगतञ्चित्तमस्य विचित्तः, अञ्जू व्यक्त्यादिषु, तस्य विपूर्वस्य निष्ठाया गतिस्वरः, तत्रेकारस्य यो यण् स उदात्तयण् भवति । 'संपन्नशब्दस्याथादिस्वरेणेति' । गतिस्वरस्तु न भवति, किं कारणम्, कर्मणीति तत्रानुवर्त्तते, अयं तु कर्तरि क्तः । 'पटुपण्डितशब्दौ प्रत्ययस्वरेणेति' । अन्तोदात्त इत्यपेक्षते, यदेकवचनान्तं प्रकृतन्तस्य वचनविपरिणामं कृत्वा ऽन्तोदात्ताविति संबन्धः कर्त्तव्यः, पाटयतेः 'फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च' त्युप्रत्ययः, पटिश्चादेश, इकार उच्चारणार्थः, पटुः, पडि गतौ, निष्ठा, पण्डितः, कुशान् लातीति कुशलः, ला आदाने । 'चपलशब्दश्चित्स्वरेणेति' । अन्तोदात्त इत्यपेक्षते । 'चिदिति वर्त्तत इति' । वृषादिभ्यश्चिदित्यतः । 'निपुणशब्द इत्यादि' । पूर्ववत्संबन्धः । पुण कर्मणि शुभे ॥

"अन्यावमकन्यापवत्सु भावे कर्मधारये" ॥ उदाहरणेषु मयूरव्यंसकादित्वाद्विशेष्यस्य पूर्वनिपातः, इष्ठेयसुनोः 'प्रशस्यस्य श्रः' 'ज्य च' 'युवाल्पयोः कनन्यतरस्याम्'। 'पापिष्ठ इति'। विन्मतोर्लुक्।

"कुमारश्च" ॥ 'कुमारश्रमणेति'। लिङ्गविशिष्टपरिभाषया कुमारीशब्दस्य समासे पुंवद्भावः। कुमार क्रीडायामित्यस्मात्पचाद्यच्, कुमारः। 'केचित्पुनरित्यादि'। चकारो ह्यत्र क्रियते, अस्यैव विधेः समुच्चयार्थः ॥

"आदिः प्रत्येनसि" ॥ 'प्रतिगत एनसेति'। अत्यादयः कुष्टाद्यर्थे तृतीययेति तत्पुरुषः, द्वितीये तु विग्रहे बहुव्रीहिः, कथं पुनरन्तरेणोदात्तग्रहणमुदात्तस्वरो लभ्यतइत्याह। 'उदात्त इत्येतदिति'। सामर्थ्यमेव दर्शयति। 'पूर्वपदेति'। प्रकृत्येति हि वर्त्तते, तत्रैवमभिसंबन्धः, पूर्वत्र कुमारशब्दे प्रकृतिभावेन यः स्वरः स्थापितः सोऽत्रादेर्भवतीति[1] ॥

"इगन्तकालकपालभगालशरावेषु द्विगौ" ॥ 'कृतणप्रत्ययलोपा इति'। कृतोणप्रत्ययलोपो येषान्ते तथोक्ताः। 'द्विगाविति किं परमशराव इति'। षष्ठीसमासोयं, बहुव्रीहौ तु पूर्वपदप्रकृतिस्वरेण भाव्यमेव, इगन्तप्रकृतिस्वरत्वे यणुगुणयोरुपसंख्यानं पञ्चारत्न्यो दशारत्नयः, यणुगुणयोः कृतयोरिगन्ते द्विगावित्येष स्वरो न प्राप्नोतीत्यत आह। 'यणुगुणयोरित्यादि'। प्राक् सुबुत्पत्तेः स्वरो भवन्नन्तरङ्गः, यणुगुणौ तु सुबपेक्षत्वाद्बहिरङ्गौ। 'स्थानिवद्भावाद्वेति'। न चात्र स्वरविधौ न स्थानिवत्त्वमल्लोपाजादेशत्वात्। 'पञ्चारत्न्य इति'। छान्दसोयं प्रयोगः, तत्र जसि चेति गुणो न भवति, जसादिषु छन्दसि वा वचनमिति वचनात् ॥

"बह्वन्यतरस्याम्" ॥ 'बहुशब्दोन्तोदात्त इति'। कुर्ह्रस्वश्चेति वर्तमाने लङ्घिबंह्योर्नलोपश्चेति कुप्रत्यये व्युत्पादितत्वात् ॥

"सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात्" ॥ 'ण्यप्रत्ययान्ताविति'। वुञ्छणादिषु संकाशादिभ्यो ण्यः, अवतेः कक्प्रत्ययः, ज्वरत्वरेत्यादिनोठ्,

१ सूत्रे आदिरिति षष्ठ्यर्थे प्रथमेति अधिकं ३ पु०।

ऊकः, कुम्भकलशशब्दाभ्याञ्जातिलक्षणो ङीष्, भ्राष्ट्रशब्दो भ्रस्जेष्ट्रनि वृद्धौ च व्युत्पादितः, चक्रशब्दः 'कृञः को द्वे च । 'सप्तमीस्वर इत्यादि' । 'तत्पुरुषे तुल्यार्थे' त्यादिना सप्तम्यन्तस्य यः प्रकृतिभावः परत्वात्थाथादिस्वरेण बाधित[1] इति, यत्र तु कृत्स्वरेण बाधित इति पाठस्तत्र कृदन्तस्य यः स्वरः थाथादिलक्षणस्तेनेत्यर्थः ॥

"परिप्रत्युपापावर्ज्यमानाहोरात्रावयवेषु" ॥ 'परित्रिगर्त्तमिति' । त्रिगर्त्तान्वर्जयित्वेत्यर्थः । 'अपपरी वर्जने'इति कर्मप्रवचनीयसंज्ञा, 'पञ्चम्यपाङ्परिभिरि'ति पञ्चमी । 'अपपरिबहिरञ्चवः पञ्चम्ये' त्यव्ययीभावः । सौवीरादयोपि जनपदविशेषाः । 'प्रतिपूर्वाह्णमिति' । 'लक्षणेनाभिप्रती आभिमुख्य' इत्यव्ययीभावः । 'उपपूर्वाह्णमिति' । 'अव्ययं विभक्ती' त्यादिना सामीप्ये, किं पुनः कारणमपपर्योरेव वर्ज्यमानमुदाहृतं नेतरयोस्तत्राह । 'तत्रेति' । अथाहोरात्रावयवा अपि इतरयोरपपर्योः कस्मान्नोदाह्रियन्तेऽत आह । 'अहोरात्रावयवा अपीति' । 'परिवनमित्यत्रेति' । 'परिप्रत्युपापे' त्यस्यावकाशः परित्रिगर्तमिति, वनं समासइत्यस्यावकाशः प्रवणमिति, परिवनमित्यत्र वनं समासइत्येतद्भवति विप्रतिषेधेन, अपवादत्वञ्चात्र हेतुर्न विप्रतिषेधः, समासस्येत्येव सिद्धे वनस्य पुनर्वचनएतत्प्रयोजनं येन्ये तदपवादास्तद्बाधनार्थं, सर्वैवाव्ययस्वरं बहुव्रीहिस्वरञ्च बाधते, एवमिदमपि बाधिष्यते ॥

"राजन्यबहुवचनद्वन्द्वेन्धकवृष्णिषु" ॥ 'श्वाफल्कचैत्रकरोधका इति' । प्रमादपाठोयमत्र त्रिपदे हि द्वन्द्वे यत्सर्वमपेक्ष्य पूर्वपदन्तस्यैव भवति, ततश्च चैत्रकशब्दस्य स्वरवचनमनुपपन्नं स्यात्, तस्मात् श्वाफल्कचैत्रकाश्चैत्रकरोधका इति पाठः, एकस्तु चैत्रकशब्दो लेखकैः पुनरुक्तिशङ्कया त्यक्तः । 'शिनिशब्द आद्युदात्त इति' । शीङो निन् ह्रस्वश्च बहुलवचनात् । 'तदपत्येष्विति' । यद्यपि शिनिशब्द इति प्रकृतं तथापि शब्दस्यापत्यास्यासंभवाच्छिनेः क्षत्रियस्यैव यान्यपत्यानि तेष्वित्यर्थः । अभेदेनाभेदोपचारेण । ननु च राज्ञोपत्ये जातिग्रहणमिति

१ तेन पुनर्विधीयतइति ३ पु० अधिकम् ।

वचनाद् राजन्यशब्दः क्षत्रियजातिवचनः, ततश्च द्वैप्य[1]भैमायना इत्युक्तं प्रत्युदाहरणं नोपपद्यते, तेषामपि क्षत्रियत्वादत आह । 'राजन्यग्रहणमित्यादि' । अन्धकवृष्णीनां क्षत्रियत्वाव्यभिचाराद् राजन्यग्रहणमुक्तविशेषपरिग्रहार्थमिति भावः ॥

"सङ्ख्या" ॥ 'एकादशेति' । 'सङ्ख्याया अल्पीयस्या' इत्येकशब्दस्य पूर्वनिपातः, 'प्रागेकादशभ्योऽछन्दसीति' निपातनाद्दीर्घः । 'द्वादशेति' । द्व्यष्टनः सङ्ख्यायामित्यात्वम् ॥

"आचार्योपसर्जनश्चान्तेवासी" ॥ आचार्य उपसर्जनं यस्य स आचार्योपसर्जनः, अन्तेवसतीत्यन्तेवासी, शयवासवासिष्वकालादित्यलुक्, गौणश्चायं निर्देशः, द्वन्द्वस्य यान्यवयवपदानि तान्याचार्योपसर्जनवचनत्वादन्तेवासिवाचित्वाच्च तथोच्यन्ते, तदवयवद्वन्द्वोऽप्यवयवधर्मेण तथोच्यते, पाणिनिशब्दादिञ् न भवतीति पूर्वमेवोक्तं, रौढिशब्दादपि न भवति, 'न द्व्यचः प्राच्यभरतेष्विति' निषेधात् । 'आचार्य्योपसर्जनग्रहणं द्वन्द्वविशेषणमिति' । न पूर्वपदविशेषणम् । प्रथमा तु सप्तम्यर्थे द्रष्टव्या, किमर्थं पुनर्द्वन्द्वविशेषणं विज्ञायतइत्याह । 'सकलो द्वन्द्व इति' । 'इह माभूदिति' । पूर्वपदविशेषणे त्वत्रापि स्यात् ॥

"कार्त्तकौजपादयश्च" ॥ 'प्रकृतिस्वरपूर्वपदा इति' । प्रकृतिशब्दः स्वाभाविके वर्त्तते, प्रकृतिः स्वाभाविकः स्वरो येषान्तानि प्रकृतिस्वराणि, एवं विधानि पूर्वपदानि येष्विति बहुव्रीहिः । 'कृतस्यापत्यं कुजस्यापत्यमिति' । 'अणन्तावेताविति' । ऋषिवाचित्वादाभ्यामण्, उत्तरपदस्य व्युत्पत्तिप्रदर्शनं प्रासङ्गिकं, पूर्वपदस्यैव तु स्वरसिद्धये प्रदर्शनीयम्, माण्डूकेयशब्दो ढक्च मण्डूकादिति ढगन्तः । 'आवन्त्यश्मका इति' । अवन्तिशब्दोन्तोदात्तस्तस्मा 'द्वृद्धेत्कोसलाजादाञ्ञ्यङ्,' तस्य तद्राजत्वाद्बहुषु लुक्, अवन्तीनां निवासो जनपदश्चातुरर्थिकस्याणो जनपदे लुप्, अश्मकशब्दात्साल्वावयवेत्यादिना इञ्, लुगादि पूर्ववत् ।

१ मुद्रितमूलपुस्तके हैमायना इति पाठः ।

'श्यापर्णीति'। 'शार्ङ्गरवाद्यञो ङीन्'। 'कपिरन्तोदात्त इति'। प्रातिपदिकस्वरेण, कमु कान्तौ क्तिच्, पृषोदरादित्वादत उत्वं, कुन्तिशब्दोन्तोदात्तोवन्तिवत्कुन्तयः, शोभनं राष्ट्रमस्य सुराष्ट्रस्तस्यापत्यानि बहूनि 'जनपदशब्दात्क्षत्रियादञ्,' लुगादि पूर्ववत्, चिति स्मृत्यां, क्तिच्, कुन्तिवच्चिन्तयः, तडि ताडने, तण्डः, तस्मादेवावपूर्वाद्वतण्डः, 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयो'रित्यकारलोपः, मदी हर्षे, विपूर्वात् क्तः, न ध्याख्येत्यादिना नत्वाभावः, न विमत्तोविमत्तः। 'शलङ्कु शलङ्कं चेति'। नडादिष्वेतत्पठ्यते, बभ्रोरपत्यं बाभ्रवः, अण्, दानाच्च्युतो दानच्युतः, तदपत्यमपि दानच्युत एव, कटशब्दः पचाद्यजन्तः, लोकेऽक्षि यस्य स लोकाक्षः, तस्यापत्यं लौकाक्षिः, तस्य छात्रा लौकाक्षाः। 'स्त्रीकुमारमिति'। समाहारद्वन्द्वः, मुद हर्षे, इगुपधलक्षणः कः, मुदः, पिप्पलमत्तीति पिप्पलादः, 'कर्मण्यण्, वदेः सः, वत्सः, जीर्यते रतृन्, जरन्, तयोः समाहारद्वन्द्वः 'षिद्भिदादिभ्योङ्', जरा, 'भुजिमृङ्भ्यां युक्त्युकौ, मृत्युः ॥

"महान् व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु" ॥ महच्छब्दोन्तोदात्त इति'। 'वर्तमाने पृषद्बृहन्महत्' दित्यत्र तथा निपातनात्। 'तस्येत्यादि'। एतच्च लक्षणप्रतिपदोक्तपरिभाषया लभ्यते, यद्येवं प्रवृद्धग्रहणमनर्थकं कर्मधारये निष्ठेति वक्ष्यमाणेनैव सिद्धत्वात्, क्तद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति प्रवृद्धशब्दस्यापि क्तान्तत्वादत आह। 'कर्मधारये निष्ठेत्ययमपीति'। तत्रापि लक्षणप्रतिपदोक्तपरिभाषया क्तान्तेन प्रतिपदोक्तो यः कर्मधारयस्तस्य ग्रहणमित्यर्थः ॥

"क्षुल्लकश्च वैश्वदेवे" ॥ क्षुधल्लातीति क्षुल्लः 'आतोनुपसर्गे कः' 'तोर्लि'ति परसवर्णः ॥

"उष्ट्रः सादिवाम्योः" ॥ 'उष्ट्रशब्दः ष्ट्रन्प्रत्ययान्त इति'। उष दाहइत्येतस्मात् ष्ट्रन् इति वर्तमाने उषिखनिभ्यां कित्येवं व्युत्पादितत्वात् ॥

"गौः सादसादिसारथिषु" ॥ 'गोसाद इति'। सदेर्घञ्, ततः षष्ठीसमासः। 'गां सादयतीति वेति'। सदेर्ण्यन्तात्कर्मण्यण्, तस्मादेव णिनिः, गोसादी, अत्र सादसादिनोः कृत्स्वरस्यापवादः, सारथौ तु समासस्वरस्य ॥

"कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपा पारेवडवा तैतिलकद्रूःपण्यकम्बलो दासीभाराणां च" ॥ अत्र कुरुगार्हपतेत्येवमादयः पण्यकम्बलपर्यन्ताः सप्त समासाः, तत्रादितो द्वावविभक्तिकौ इतरे प्रथमैकवचनान्ताः, सा च प्रथमा सुब्व्यत्ययेन षष्ठ्याः स्थाने द्रष्टव्या, दासीभाराणामिति बहुवचननिर्देशादाद्यर्थो व्याख्यायते, कुर्भश्च, कृयो रुच्च, कुरुः, वृजी वर्जने, निदित्यधिकारे इगुपधात्किः, वृजिः, फिषि त्विगन्तानाञ्च द्व्यचामिति पचेऽन्तोदात्तः। तस्यार्थः। जनपदशब्दानामिति वर्तते, अन्तः पूर्वो वेति च, जनपदवाचिनामिगन्तानां द्व्यचामादिरुदात्तो भवति अन्तो वा, काशयश्चेदयः, एतेन कुरुशब्दो व्याख्यातः, रिक्तपूर्वादयः कर्मधारयाः, श्रीर्यस्यास्तीति श्रीशब्दो लावण्यवचनः। 'कपिलकादित्वाल्लत्वमिति'। 'कृपो रो ल' इ त्यत्रैतदुच्यते, श्रीर्यस्यास्ति तच्छ्लीलशब्देनोच्यत इति, एतदेवोपपादयति। अश्लीलदृढरूपेति हीति'। 'संस्थानमात्रेण शोभनेति'। कुब्जत्वादीनामभावात् दृढत्वाच्च संस्थानस्य, मात्रशब्दव्यावर्त्यं दर्शयति। 'निःश्रीकेति'। अस्यैवार्थं विस्पष्टीकरोति। 'लावण्यरहितेति'। 'तितिलिनोपत्यमिति'। तिलशब्दान्मत्वर्थीय इनिः, पृषोदरादित्वात्तिशब्दस्य द्विर्वचनन्तत्र यदापत्येऽर्थेऽण् तदा 'नस्तद्धित' इति टिलोपो यदा तु छात्रे तदा नान्तस्य टिलोपइत्यादिनोपसङ्ख्यानेन टिलोपः। ये तु तत्र तैतिलिशब्दं पठन्ति तेत्रापि तैतिलिनोपत्यमिति विगृह्णन्ति, पृषोदरादित्वेनैव च रूपसिद्धिः, पण्यशब्दो ऽवद्यपण्येति यदन्तो 'यतोनाव' इत्याद्युदात्तः,। 'पण्यकम्बलः संज्ञायामिति'। नियतप्रमाणस्य नियतमूल्यस्य कम्बलस्यैषा संज्ञा। 'समासान्तोदात्तत्वमेवेति'। ननु च पण्यशब्दस्य कृत्यप्रत्ययान्तत्वात्तत्पुरुषे तुल्यार्थेति पूर्वपदप्रकृतिस्वरेण भाव्यमत

आह। 'प्रतिपदोक्ते हीति'। 'कृत्यतुल्याख्या अजात्ये'ति यः कृत्य समासः प्रतिपदोक्तस्तत्रैव स स्वरः, अयन्तु 'विशेषणं विशेष्येणे'ति सामान्यलक्षणविहितः, कम्बलशब्दस्य जातिशब्दत्वात् 'कृत्यतुल्याख्या अजात्ये' त्येतद्धि गुणक्रियावाचिनामनियते पूर्वनिपातप्रसङ्गे कृत्यान्तस्य पूर्वनिपातार्थन्न तु जातिप्रतिषेधार्थम्, अजात्येति तु वचनन्याय-सिद्धार्थानुवाद एवेति स्थितिः, चन्द्रे माङो डिच्चेति, मिथुनेसिः, पूर्ववच्च सर्वमित्यसिप्रत्ययः प्रकृतः, चन्द्रशब्दउपपदे माङ्मानइत्य-स्मादसिप्रत्ययो भवति डिच्च, डित्त्वाट्टिलोपः, चन्द्रमिव मीयते चन्द्रमाः, चन्द्रमिति रजतममृतञ्च, चन्द्र इति वा मीयते चन्द्रमाः, चन्द्रशब्दस्तु स्फायितञ्चीत्यादिना रक्प्रत्ययान्तः, यस्य तत्पुरुषस्येत्या-दिना दासीभारादेराकृतिगणत्वं दर्शयति॥

"चतुर्थी तदर्थे"॥ तस्माइदन्तदर्थन्तच्छब्देन चतुर्थ्यन्तार्थ उच्यते, यदाह। 'तदभिधेयार्थं यदिति'। तस्य चतुर्थ्यन्तस्य यदभिधे-यन्तदर्थमित्यर्थः। रमन्तेस्मिन्स्थिता इति रथः, 'हनिकुषिनीर-मिकाशिभ्यःक्थन्,' अनुदात्तोपदेशेत्यनुनासिकलोपः, वल्लीशब्दो गौरा-दिङीषन्तः, 'तदर्थइति किं,कुबेरबलिरिति'। अत्र तादर्थ्यस्य भावाद् गोसुखमिति प्रत्युदाहार्य्यम्मन्यन्ते। 'प्रकृतिविकारभावे स्वरोयमिष्यत-इति'। समासप्रकरणएवैतत्सम्यगुपपादितम्, अत्रापि ज्ञापकं वक्ष्यति॥

"अर्थे"॥ 'तदर्थविशेषा एव दारुहिरण्यादयो भवन्तीति'। दारुहिरण्यादयो विशेषा एव तदर्था भवन्तीत्यर्थः। तादर्थ्यं हि तच्छेषभा-वस्स च विशेषाणामेव भवति न सामान्यस्येति मन्यते। केचित्पुनरि-त्यादित एवम्मन्यते नेयं राजाज्ञा विशेषा एव तदर्था इति, तेन सामान्यवा-चिन्यप्यर्थशब्दे पूर्वणैव सिद्धमिति। 'अश्वघास इति'। ननु च तदर्थेन प्रकृतिविकारभावे समास इत्युक्तम्, अश्वघासादयः षष्ठीसामासा इति च, एवं मन्यते, यदात्र प्रकृतिविकारभावे स्वर इति स्थितन्तदा-श्वघासादौ चतुर्थीसमासेपि न दोष इति। 'श्वश्रूश्वशुरमिति'। विभाषा सेनेत्यादिना नपुंसकत्वम्॥

"क्तिच" ॥ 'गोभ्यो रक्षितं दीयत[१] इति संप्रदाने चतुर्थीति'। अथ तादर्थ्ये चतुर्थ्यां को दोषः, चतुर्थी तदर्थइत्येव स्वरस्य सिद्धत्वात्, नैतदस्योदाहरणमुपपद्यते, कथम्, प्रकृतिविकारभावे स्वर इत्युक्तम्, न चात्र प्रकृतिविकारभावः। सत्यं, समासविधौ तु रक्षितग्रहणस्येदं प्रयोजनं दर्शितम् ॥

"कर्मधारयेऽनिष्ठा" ॥ श्रिञ् सेवायाम्, औणादिके निन्प्रत्यये श्रेणिः, मुदि यो गगौ, बहुलवचनात्पूङोपि गक् पूगः। 'कृताकृतमिति'। 'क्तेन नञ्विशिष्टेनानञि'ति समासः, अनिष्ठेत्यनुच्यमाने ऽत्रैव स्यात्, अयं हि क्तसंशब्दनेन विहितत्वाच्छ्रेण्यादिसमासादपि प्रतिपदोक्तः ॥

"अहीने द्वितीया" ॥ हीनन्त्यक्तम्। 'अहीनवाचिनि समासइति'। पूर्वपदद्वारेण समासस्याहीनवाचित्वम्। 'द्वितीयानुपसर्गइति वक्तव्यमिति'। अहीनग्रहणमपनीय अनुपसर्गग्रहणं कर्तव्यं, व्यापकत्वादित्यर्थः। 'इह माभूदिति'। इहापि माभूदित्यर्थः। अनुपसर्गग्रहणे चेह क्रियमाणे प्रवृद्धादिषु खट्वारूढशब्दो न पाठ्यः, आरूढशब्दस्य सोपसर्गत्वात्, एतत्स्वराभावे थाथादिस्वरेणैवान्तोदात्तस्य सिद्धत्वात् ॥

"तृतीया कर्मणि" ॥ अयमपि थाथादिस्वरापवादः। 'अहिरन्तोदात्त इति'। आङ्पूर्वाद्धनो डिप्रत्ययः, आङश्च ह्रस्वः, आहन्ति परान् आहन्यते परैरिति वा अहिः। 'केचिदिति'। ते तत्रोदात्तग्रहणमनुवर्त्तयन्ति, तथा च अहन्नहिम्, अहिरिव भोगैरिति, आद्युदात्तमधीयते ॥

"गतिरनन्तरः" ॥ अनन्तर इति पुल्लिङ्गनिर्देशाद्गतिशब्दः क्तिजन्तः, निपातनाच्चानुनासिकलोपः। 'प्रकृतः प्रहृत इति'। अत्र समासान्तोदात्तत्वम्, अव्ययपूर्वपदप्रकृतिस्वरत्वम्, कृत्स्वरस्याथादिस्वरः, इत्येतेषु प्राप्तेषु पूर्वपदप्रकृतिभावो विधीयते। 'व्यवहितस्य गतेरयं स्वरो न भवतीति'। ननु च निर्दिष्टग्रहणमानन्तर्यार्थम्, प्रत्ययग्रहणपरिभाषया च हृतशब्दस्क्तान्तस्तत्कथं क्तान्ते परतो विधीयमानो

१ दीयतइति मुद्रितमूलपुस्तके नास्ति।

व्यवहितस्य प्रसज्यते, कृद्ग्रहणपरिभाषाया क्तान्तेनुप्रवेशादुच्छब्दस्य प्रसङ्ग इति चेत्, यद्येवम्, क्रियमाणेप्यनन्तरग्रहणे स्यात्, उद्धृतशब्दः क्तान्तस्तस्यानन्तर एव गतिरिति, नैष दोषः । अनन्तरग्रहणसामर्थ्याद्धान्तोरनन्तरो गतिराश्रयिष्यते, नन्वेवमप्यत्र परत्वाद्गतिर्गताविति निघातो भविष्यति, सति च तस्मिन् उदात्तस्वरिताधिकारादेव पूर्वपदप्रकृतिस्वरस्याप्रसंग इति व्यवहितनिवृत्त्यर्थमनन्तरग्रहणं न कर्त्तव्यम्, अनन्तरप्राप्त्यर्थन्तु, तत्र च यत्रैक एव गतिस्तत्र नार्थोऽनेन, यत्र त्वनेको गतिस्तत्रासौ न प्राप्नोति, तदनन्तर इत्यनेनानेकगतिसमवधानेनन्तरस्य प्राप्यते, अन्यथा ऽभ्युद्धृतमित्यत्रोद्धृतशब्दस्य कृद्ग्रहणपरिभाषया क्तान्तत्वे सति समासान्तोदात्तत्वे तदपवादे च कृत्स्वरे तदपवादस्याथादिस्वरः प्राप्नोति, ननु च यथा प्रथमे समासे गतिस्वरेण बाधितस्य थाथादिस्वरस्य पुनर्द्वितीये समासे प्राप्तिस्तथा तदपवादो गतिस्वरोऽप्यनेन पुनर्भविष्यति, नैतदेवम्, अपूर्वपदत्वात्, कुगतिप्रादय इत्यत्र निष्क्रान्तादौ पदकार्यप्रवृत्तये सुबित्यनुवर्त्तनीयम्, तत्रैकत्वस्य विवक्षितत्वात्सुबन्तसमुदायस्य चासुबन्तत्वान्न द्वयोर्युगपत्समासो लभ्यतइति क्रमेणासौ विधेयः, गतिकारकोपपदानामित्यनेनाप्युत्तरपदस्य प्राक् सुबुत्पत्तेः समास उच्यते न पूर्वपदस्यापि, नि[1]ष्क्रान्तचर्मकारादौ पदकार्यस्यासिद्धिप्रसङ्गात्, अत उच्छब्दस्य पूर्वं समासः पश्चादुद्धृतशब्देनाभिशब्दस्य, ततश्चाभिशब्द एव पूर्वपदं नोच्छब्द इति पूर्वपदस्य गतेः प्रकृतिस्वरो विधीयमानो ऽपूर्वपदस्योदो न स्यादतः कृत्तान्तरप्राप्तमपि थाथादिस्वरं बाधित्वा ऽपूर्वपदस्याप्यनन्तरस्य वाक्यभेदेन प्रकृतिभावो यथा स्यादित्येवमर्थमनन्तरग्रहणम्, तदाह । 'अनन्तरे पुनरिष्यतइति' । यद्येवं कारकपूर्वेऽतिप्रसङ्गः, दूरादागतो प्राप्तो देवदत्तेनेत्यत्राप्यागतशब्देन स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेनेति समासे कृते तस्यामवस्थायां थाथादिस्वर इष्यते तमपि बाधित्वा ऽपूर्वपदस्याप्युद एव स्वरः प्राप्नोति । नैष दोषः । थाथादिसूत्रे गतिग्रहणान्निवर्तिष्यते, ततः किं, प्रकृत-

१ निष्क्रीतेति २ पु॰ पा॰ ।

मित्यादौ कृत्स्वरस्यैव प्राप्तत्वात्तस्यैव गतिस्वरापवादो न तु थाथादिस्वरस्य, तत्र दूरादागत इत्यादौ यत्र कक्षान्तरे थाथादिस्वरस्य प्रसंगस्तत्र स एव भविष्यति, अभ्युद्धृतमित्यादौ तु यत्र कक्षान्तरेपि कृत्स्वर एव प्राप्तस्तत्रापि स एव भविष्यतीति, ततश्चापूर्वपदार्थमनन्तरग्रहणमपि न कर्त्तव्यं भवति, कथम्, उद्धृतशब्दे गतिस्वरे प्रवृत्ते पश्चादभिशब्दस्य समासे कृते गतिर्गताविति निघाते चोदात्तस्वरिताधिकाराद्गतिरित्यस्य पूर्वपदप्रकृतिभावस्याप्रवृत्तौ समासस्वरापवादः कृत्स्वरो भवन् कृद्ग्रहणपरिभाषयोद्धृतशब्दस्य कृदन्तत्वात्तत्स्वर उच्छब्दोदात्तत्वमेव भविष्यति, यदि थाथादिसूत्रेण गतिग्रहणन्निवर्त्तिष्यते प्रभेद इत्यत्र कृत्स्वरेण घञो ञित्त्वाद्धातोरुदात्तत्वं स्यादन्तोदात्तत्वं चेष्यते, एवं तर्ह्यनुवर्त्तते गतिग्रहणं क्तेन तु न संबध्यते तत्कथन्याथादिसूत्रात् क्तग्रहणमपनीय पृथक् कर्त्तव्यम्, तत्र च गतिग्रहणन्निवर्त्तिष्यते, एवमपि विशुष्क इत्यादौ यत्र कर्त्तरि क्तान्तमुत्तरपदं शुष्कधृष्टावित्यादिना चाद्युदात्तन्तत्र कृत्स्वरे सत्युत्तरपदमाद्युदात्तं स्यादन्तोदात्तं चेष्यते, अतः कृद्ग्रहणेनापि गतिग्रहणमवश्यं संबन्धनीयम्, ततश्च पूर्वोक्तदोषप्रसङ्गः, तत्राह । 'कारकपूर्वस्य त्विति'[1] । अयमभिप्रायः । अनन्तरशब्दोयमनन्तरमपेक्ष्य प्रवर्त्तते, तत्र चानन्तरो गतिरित्युक्ते अनन्तरोपि गतिरेव प्रतीयते सन्निधानात्, ततश्चापूर्वपदार्थमप्यनन्तरग्रहणं गतिद्वयसमवधानएवानन्तरस्य प्रकृतिस्वरत्वं प्रापयतीति दूरादागत इत्यादौ न दोष इति । अथ वा कारकाद्दत्तश्रुतयोरेवाशिषीत्यत्र कारकादिति विभज्यते, तत्र च क्तग्रहणमनुवर्त्तते, अन्तोदात्त इति गतिररिति च, कारकात्परं क्तान्तमुत्तरपदमन्तोदात्तं भवतीत्यर्थः, तत्र दूराद्गत इत्यादौ थाथादिसूत्रेणैवान्तोदात्तत्वस्य सिद्धत्वाद् दूरादागत इत्यादौ गतिरनन्तर इत्यनन्तरग्रहणेनैवापूर्वपदार्थेन प्राप्तस्य गतिस्वरस्यापवादः कारकादित्ययं योगो ज्ञायते, यद्येवमनन्तरग्रहणं न कर्त्तव्यं, कथम्, असत्यनन्तरग्रहणे दूरादागतः, अभ्युद्धृत इत्यादौ सर्वत्र द्वितीये समासे कृते

१ तथाहोति ३ पु॰ पा॰ ।

सतिशिष्टस्याथादिस्वर एव प्राप्तस्ततश्च कारकादित्ययं योगो नियमार्थो भवति, तत्र च गतिग्रहणमनुवर्त्तयितव्यन्ततश्चात्रायमर्थः, कारकादेव परं सगतिकं क्तान्तमुत्तरपदमन्तोदात्तमिति, ततश्चाभ्युद्धृत इत्यादौ नियमेन थाथादिस्वरे व्यावर्तिते कृत्स्वरो भवन् कृद्ग्रहणपरिभाषयोद्धृतादेः कृदन्तत्वात्तस्यैव यः स्वर आद्युदात्तत्वं स एव भविष्यति । ननु च विपरीतोऽपि नियमः सम्भाव्येत, कारकात्परं सगतिकमेवेति, ततश्च पूर्वाह्णशुष्क इत्यत्र थाथादिस्वरे व्यावर्त्तिते कृत्स्वरेण शुष्कधृष्टावित्याद्युदात्तत्वं श्रूयेत । नैष दोषः । आचार्यप्रवृत्तिर्ज्ञापयति न विपरीतो नियम इति, यदयं दत्तश्रुतयोरेवाशिषीत्याह, नहि विपरीते नियमे कारकात्परयोर्दत्तश्रुतयोरन्यस्य वा क्तान्तस्योत्तरपदस्यान्तोदात्तत्वं प्रसक्तमतो नार्थोऽपूर्वपदार्थेनानन्तरग्रहणेन, एवं तर्हि व्यवहितनिवृत्त्यर्थमेवानन्तरग्रहणम्, ननु चोक्तं परत्वाद्गतिर्गताविति निघाते कृते उदात्तस्वरिताधिकारादेव प्रकृतिभावस्याप्रसङ्ग इति, यत्र तर्हि गतिर्गताविति निघातो नास्ति तत्र प्रसङ्गः, क्व चासौ नास्ति, पादादौ, वक्ष्यति हि आ पादपरिसमाप्तेरपादादावित्यधिकार इति, तथा च उपप्रेतकुशिताश्चेतयध्वमिति पादादावुपशब्दं गतिपरमपि उदात्तमधीयते, तथाभ्युद्धृतमिति यदाभिशब्दः पादादौ वर्त्तते तदा निघाताभावादनेन व्यवहितस्यापि गतेः प्रकृतिभावः स्यात्, नैतदस्ति । यावता प्रत्ययग्रहणपरिभाषया हृतशब्दः क्तान्तो नोद्धृतशब्दः, एवं तर्ह्येतज्ज्ञापयति कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवतीति । ननु कृद्ग्रहणे गतिपूर्वस्य ग्रहणं ज्ञापितं कारकपूर्वस्य तु कथम्, उच्यते । पूर्वाचार्यैस्तावदेषा परिभाषा व्युत्पादिता इहाप्यनन्तरग्रहणेनैकदेशद्वारेण कृत्स्न एव परिभाषार्थो ज्ञाप्यते, यदि कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवति, कथं समुद्धृत इति प्रत्युदाहरणं, यावता उद्धृतशब्दः क्तान्तस्तस्य चानन्तर एव समित्यत आह । 'अनन्तरग्रहणसामर्थ्यादिति' । इह व्यवहितनिवृत्तिफलेनानन्तरग्रहणेन परिभाषाया ज्ञापनादत्यत्रैतत्फललाभ इति भावः । 'प्रकृतः कटमिति' । 'आदिकर्मणि क्तः कर्त्तरि चे'ति कर्त्तरि प्रत्ययः ॥

"तादौ च निति कृत्यतौ" ॥ 'प्रजल्पाक इति'। जल्पभिक्षेति षाकन्, इह गतेः स्वरो विधीयते, क्रियायोगे च गतिसंज्ञा, धातुश्च क्रियावाची, धातोश्च द्वये प्रत्ययाः कृतस्तिङश्च, तत्र तिङन्ते पूर्वपदस्यासंभवात्कृदन्तादेव भविष्यति, नार्थः कृद्ग्रहणेन, इदं तर्हि प्रयोजनं, यथा तादिग्रहणं कृद्विशेषणं विज्ञायते तकारादौ निति कृतीति, अन्यथा नितीत्यनेन प्रत्ययग्रहणपरिभाषया तदन्तस्योपस्थानात्तस्यैवोत्तरपदस्य तकारादित्वं विशेषणं स्यात्, ततश्चेहैव स्यात्प्रतरिता प्रतरितमिति, इह न स्यात् प्रकर्त्ता प्रकर्त्तु, नैतदस्ति प्रयोजनं, क्रियमाणेऽपि कृद्ग्रहणे ऽनिष्टं शक्यं विज्ञातुं तकारादावुत्तरपदे निति कृतीति, अक्रियमाणेऽपि चेष्टं निदप्रस्तकारादिस्तदन्तउत्तरपदेति, ततश्च यथोतश्च प्रत्ययादित्यत्रासंयोगपूर्वग्रहणेनोकारो विशेष्यते न प्रत्ययस्तथेहापि नित एव विशेषणं तादिग्रहणं भविष्यतीत्यत्राह। 'कृद्ग्रहणमुपदेशे ताद्यर्थमिति'। अयमभिप्रायः। कृद्ग्रहणेन कृत्संज्ञाप्रवृत्तिकालो लक्ष्यस्तेन कृत्संज्ञाप्रवृत्तिकाले यस्तादिस्तत्रेति, किमेवं सति सिद्धं भवति तत्राह। 'इहापीति'। असति कृद्ग्रहणे तादिग्रहणेन स्वरप्रवृत्तिसमये यस्तादिस्तत्रेति विज्ञायेत, ततश्च प्रलपितेत्यादौ इडागमे कृते न स्यात्, संप्रत्यतादित्वात्, कृद्ग्रहणात्तु भवति। आदिग्रहणं तु शक्यमकर्त्तुं, यस्मिन्विधिस्तदादावल्ग्रहणे ॥

"तवै चान्तश्च युगपत्" ॥ 'अन्त उदात्तो भवतीति'। कथं पुनरन्तरेणोदात्तग्रहणमुदात्तो भवतीत्ययमर्थो लभ्यते, एवं मन्यते प्रकृत्येति वर्तते, तत्रैवमभिसंबन्धः क्रियते, तवैप्रत्ययान्तस्य यः स्वरः प्रकृत्याश्रयः प्राप्तः सोऽन्तस्य भवतीति, स चोदात्त एवेति। युगपदिति पर्यायनिवृत्त्यर्थम् ॥

"अनिगन्तोऽञ्चतौ वप्रत्यये" ॥ 'वप्रत्ययइति'। वकारः प्रत्ययो यस्य स तथोक्तः। 'प्राङिति'। ऋत्विगित्यादिना क्विन्, स च वकारमात्र एव,ककारादीनामनुबन्धत्वात्। उगिदचामिति नुम्, हल्ङ्यादिसंयोगान्तलोपौ। 'क्विन्प्रत्ययस्य कु'रिति कुत्वं चकारस्य ङकारः। 'पराङिति'। पराशब्द आद्युदात्तः, तेनात्र स्वरितो वा ऽनुदात्ते

णत्वन्तु लाक्षणिकमितीह क्षणिवदनुस्वारीभूतो णत्वमतिक्रामति, क्षितः । 'यस्य विभाषे' त्यनिट्त्वम् । क्षितिः । 'तितुत्र' त्यनिट्त्वम्, अत्र सर्वत्र पिद्वचनेषु विकरणापेक्षो गुणः संज्ञापूर्वको विधिरनित्य इति न भवतीत्यात्रेयमैत्रेयौ । तथा चापिशलिः । शब्विकरणेषु धातुगुणमभिधाय करोतेश्च मिदेश्चेत्यसूत्रयत्, 'पुगन्तलघूपधस्य चे' त्यत्र रक्षितेन चोक्तम् । एवञ्च पञ्चवाणाः क्षिणोतीति सिद्ध्यति । शाब्दिकाभरणे तु गुण एवोदाहृतः । शाकटायनक्षीरस्वामिभ्यामयं धातुर्न पठ्यते । अत एवात्रेयमैत्रेयाभ्यामपि स्वादेशच्छान्दसेषु पठितस्य क्षेर्धातोर्भाषायामपि प्रयोगाङ्गीकारेण क्षेणोतीति साधितम् । शाकटायनः पुनस्तत्र छान्दसमेवाह । इहापि क्षिणुं न पपाठेति । तन्मते क्षिणोतिप्रयोगो भाषायामसाधुरेव ॥ ४ ॥

ऋणु गतौ ॥ अयमपि तवर्गीयान्तोपदेशः । लाक्षणिकं णत्वम् । अर्णोति । अर्णुतः, अर्ण्वन्ति । अर्णोषि । अर्णोमि । अर्णुते । अर्ण्वाते । अर्ण्वते । अर्ण्वे । आनर्ण । आनृणतुः । आनर्णिथ । आनृण । आनृणिव । आनृणे । आनृणिषे । आनृणिवहे । क्षिणोतिवल्लिट्प्रक्रिया । अर्णिता । अर्णिष्यति । अर्णिष्यते । अर्णोतु । अर्णुहि । गुणे कृते संयोगपूर्वत्वादुकारस्यो 'तश्च प्रत्ययाे' दिति हेर्लुग्न भवति । आर्णोत् । आर्णुताम् । ऋण्यात्, अर्णुयात् । सर्वत्र विकारणापेक्षो गुणः । आशिषि अर्णिषीष्ट । आर्णीत् । आर्णिष्टाम् । आर्त, आर्णिष्ट । आर्णिष्ठाः, । आर्थाः, तनादित्वात्सिज्लुक्यनुनासिकलोपः । अर्णिनिषति । गुणे कृते 'न न्द्राः' इति रेफवर्जितस्य द्विर्वचनम् । अत्रात्रेयो नान्तोपदेशत्वेऽपि द्विर्वचने कर्तव्ये णत्वस्य नासिद्धत्वम्, पूर्वत्रासिद्धीयमद्विर्वचनइति न्यायात् । तेन प्रकृत्यभ्यासयोर्द्वयोरपि णकारावित्याह । पारायणे तु णत्वस्यासिद्धत्वादणत्वस्य द्विर्वचने परस्य व्यवधानात् णत्वाभावो दर्शितः । प्राणिणद्दित्यादावनितेः साभ्यासस्य णत्वविधानाद् लिङ्गत्पूर्वत्रासिद्धमद्विर्वचने इत्यस्यानित्यत्व ज्ञापनाण्णत्वविषये तस्याप्रवृत्तेरूर्णोनूयते इत्यादिवदणत्वस्यासिद्धैव भवितव्यमिति पारायणिकपक्षो ज्यायान् । अत एव पारायणिकपक्षविरोधा-

णत्वोपदेशस्य पक्षे दूष्य एव । अर्णयति । आर्णयत्, माभवानर्णिनत् माभवानृणिनत् । उर्णृट्टा, माभवानृणिनेताम् । माभवानृणिनथाः । पूर्ववत्परस्य णत्वं न भवति । ऋत्वा । अर्णित्वा । उदित्त्वादिड्विकल्पः । अनिट्पक्षे 'ऽनुदात्तोपदेशे' त्यनुनासिकलोपः । ऋतः । ऋतवान् । ऋतिः । स्वर्णः । पचाद्यचि गुणः । उपसर्गस्य यण् । 'तनादीनां छन्दस्युपसंख्यानमि' त्युपसर्गस्योवङि सुवर्णं, संज्ञाशब्दत्वाद्भाषायामप्यस्य प्रयोगः साधुरित्यात्रेयमैत्रेयौ । शोभनो वर्णोस्येत्यपि शक्यते व्युत्पादयितुम् । द्वाभ्यां सुवर्णाभ्यां क्रीतं द्विसुवर्णम्, द्विसौवर्णिकम् । 'सुवर्णशतमानयोरुपसंख्यानमि' त्यार्हीयस्य ठकः पक्षे लुक् । लुगभावे 'परिमाणान्तस्ये' त्युत्तरपदवृद्धिः । अर्णः । असुन् । अर्णवः । 'अर्णसो लोपश्चे' ति मत्वर्थीये वप्रत्यये सलोपः । अत्रात्रेयमैत्रेयादिभिः शब्विकरणे गुणः, करोतेश्च मिदेश्चेत्यापिशलिस्मरणाद्विकरणापेक्षो गुणोऽन्यस्य धातोर्न भवतीति छिणोतीत्यादि[1] दर्शितम्, तथा च क्षीरस्वाम्यपि[2] क्षिणिप्रभृतीन्प्रस्तुत्य इमे सार्वधातुके संदिग्धगुणा इत्याह । सार्वधातुके परे उप्रत्यये इत्यर्थः । चन्द्रस्तु गुणाभावं न सहते । यदाह । अर्णोतीत्याद्युदाहृत्य क्षिणोर्धातोर्लघोरुपान्त्यस्य गुणो नेष्यतइत्येतस्यान्योभिप्रायो मृग्य इति । अतः काश्यपादयः 'करोतेश्च मिदेश्चे' ति सूत्रमन्यथाऽव्याख्यन् । करोतेः सम्बन्धिनि विकरणे धातोर्गुणो भवतीति । अत्र वर्द्धमानः । करोतेः सम्बन्धिनि गुण इति व्याख्यानं न्याय्यमिति, मुनित्रयाविरोधादस्य न्याय्यत्वम् ॥ ५ ॥

तृणु अदने ॥ तर्णोति । तर्णुते । ततर्णेत्यादि पूर्ववत् । तृणम् । घञर्थे कः । तृण्या । 'पाशादिभ्यो य' इति समूहे यः । कत्तृणं तृणजातिविशेषः, 'तृणे च जाता' विति कोः कद्भावस्तत्पुरुषे । स्वाभाविकमस्य धातोर्णत्वमिति केचित्, तेषां यङ्लुकि तरीतृणीति भाव्यम् । अन्येषां तु अनुस्वारीभूतो णत्वमतिक्रामतीति तरीतृन्तीति ॥ ६ ॥

१ ऋणोतीत्यादीति ४ पु॰ पा॰ ।
२ शिवस्वामीति ३ । ४ । पु॰ पाठः ।

घृणु दीप्तौ ॥ घर्णोति । घर्णुते । जघर्णेत्यादि पूर्ववत् । घृणा । भिदादेराकृतिगणत्वादङ्, शिवस्वामी वकारोपधं पपाठ । तनादय उदात्ताः स्वरितेतः ॥ ७ ॥

वनु याचने ॥ दन्त्योष्ठ्यादिः । वनुते । वनुषे, वन्वे, वनुवहे । ववने । ववनिषे । वादित्वादेत्वाभ्यासलोपनिषेधः । वनिता, वनिष्यते । वनुताम्, । अवनुत । वन्वीत । आशिषि वनिषीष्ट । अवनिष्ट । अवत । अवनिष्ठाः । अवथाः । विवनिषते । वंवन्यते । वंवन्ति 'ग्लास्नावनुवमां चे' त्यनुषक्तानां मित्त्वविकल्पे वनु च नोच्यतइति घटादिकस्याग्रह इत्येके । अन्ये ऽनन्तरस्य विधिरिति न्यायेन घटादिकस्य वनतेरेवेति । तेन वानयति । प्रवानयतीत्येव भवति । वनित्वा । वत्वा । उदित्त्वादिडभावपक्षे तनोत्यादित्वादनुनासिकलोपः । वतः । वतवान् । 'यस्य विभाषे' त्यनिट्त्वम् । वन्तिः । 'न क्तिचि दीर्घश्चे' त्यनुनासिकलोपस्य दीर्घस्य च निषेधः । वनी, वाञ्छा, तामिच्छतीति क्यजन्तात् ण्वुल्, वनीयकः । अर्थि[2]-पर्यायः । अन्ये तु वनीयेत्यकारान्तं पठन्ति । तेषां वनीयतीति वनीयः, ततः संज्ञायां कन् । चान्द्रास्त्विमं परस्मैपदिनमाहुः । तन्मते वनोति । ववानेत्यादि ॥ ८ ॥

मनु अवबोधे ॥ मनुते । मेने इत्यादि वनुवत् । उदात्तावनुदात्तेतौ ॥ ९ ॥

डुकृञ् करणे ॥ करोति । कुरुतः । कुर्वन्ति । करोषि । करोमि । कुर्वः । कुर्मः । कुरुते । कुर्वाते । कुरुषे । कुर्वे । कुर्वहे । 'अत उत्सार्वधातुक' इति[3] सार्वधातुकपरस्योप्रत्ययान्तस्य करोतेरकारस्योकारः । तपरकरणाल्लघूपधगुणो न भवति । 'नित्यं करोते' रिति वकारमकारादौ नित्यमुकारस्य लोपः । कृतेऽस्मिन् 'हलि चे' ति दीर्घो 'न भकुर्छुराम्' इति निषिध्यते । न चोदिति तपरत्वेनैव विकारनिवृत्त्यर्थेन गुणवृद्धी-

१ याचनेति २ । पु॰ पा॰ ।
२ अर्थिपर्याय इति ४ पु॰ नास्ति ।
३ किदित्यधिकं ४ पु॰ ।

र्घोऽपि न भविष्यतीति मन्तव्यम् । तस्मिन्हि विकारनिवृत्त्यर्थं प्रसक्ते दीर्घस्य पूर्वत्रासिद्धत्वात् । न चोकारलोपस्य स्थानिवद्भावेनेह हल्परत्वाभावः, दीर्घविधिं प्रति न स्थानिवदिति वा 'पूर्वत्रासिद्धे न स्थानिवद्वि'ति वा स्थानिवत्त्वस्य निषेधात् । चकार । चक्रतुः । चकर्थ । चकृव । क्रादिव्यतिरेकाभावाल्लिटीडभावः । चक्रे । चक्राते । चकृषे । चकृवहे । न चाजादावन्तरङ्गत्वात्पूर्वं यण्यनच्कत्वाद् द्विर्वचनाप्रसङ्गः शङ्क्यः । 'द्विर्वचनेची'ति यणः स्थानिवत्त्वात् । कर्ता । करिष्यति । 'ऋद्धनोः स्य'इतीट् । करोतु । कुरुतात् । कुरुताम् । कुरु । करवाणि । कुरुताम् । कुरुष्व । करवै । 'अत उत्सार्वधातुके'इत्यस्मिन्कर्तव्ये 'उतश्च प्रत्ययादि'त्यस्य हिलुको 'ऽसिद्धवदत्रे'त्यसिद्धत्वात्सार्वधातुकपरत्वेनोत्वं भवति । अकरोत् । अकरोः । अकरवम् । अकुरुत । अकुरुथाः । कुर्यात् । कुर्याताम् । कुर्याः । 'ये चेति' यकारादौ करोतेरुप्रत्ययस्य नित्यं लोपः । कुर्वीत । कुर्वीयाताम् । कुर्वीय । यणादेशः । आशिषि । क्रियात् । क्रियास्ताम् । 'रिङ् शयग्लिङ्क्षि'ति रिङादेशस्य रीङि प्रकृते रिङ्विधाना'दकृत्सार्वधातुकयो'रिति दीर्घो न भवति । कृषीष्ट, कृषीयास्ताम् । रिङादेशो यकारादाविति सीयुटि न भवति । 'उश्चे'ति लिङ्सिचोरात्मनेपदे कित्त्वाच्च गुणः । अकार्षीत् । अकार्ष्टाम् । सिचि वृद्धिः । अकृत । अकृषाताम् । 'ह्रस्वादङ्गा'दिति सिचो लोपः । 'तनादिभ्यस्तथासो'रिति विकल्पितो लुङ्भवति । तनादित्वादेवास्योप्रत्यये सिद्धे पृथग्विधानादन्यत्तनादिकार्यं न भवतीति ज्ञापनात् । यद्वास्तु विकल्पः, तथापि 'ह्रस्वादङ्गादि'ति लुगभावे लोपो भविष्यति । न च विकल्पेनास्य बाधोऽसिद्धत्वाल्लोपस्य । न च विकल्पविधानसामर्थ्यादसिद्धत्वेपि बाधः । तस्यान्यत्र अतत अतनिष्टेत्यादौ चरितार्थत्वात् । एवं च विकरणविधौ कृञ उपादानं प्रपञ्चार्थं भवति । कर्मणि क्रियते । अकारि । 'रिङ् शयग्लिङ्क्षि'ति रिङादेशो यक्ति । अत्रात्रेयः । कथं क्रियतीति पुरुषकारइत्युपादाय 'व्यत्ययो बहुलमि'ति कर्मण्यपि

१ वर्णादेश इति पु· पा· ।

परस्मैपदसिद्धिः। तथा च गुरुटीकायां कृताः पुरोडाशाः, करिष्यन्ति निर्वापा इति, अत्र कर्मण्येव लृटि प्रयोगो दृश्यते। प्रयोगमुखे तु तिङन्तप्रतिरूपको निपात इत्युक्तमित्याहुः। कर्मकर्तरि क्रियते कटः स्वयमेव, अकारि अकृत कटः स्वयमेव। 'अचः कर्मकर्तरी' ति तशब्दे त्रेर्वा चिण्। चिकीर्षति। 'इको झलि' ति कित्त्वान्न गुणः। 'अज्झनगमामि' ति दीर्घे 'ऋत इद्धातो' रितीत्वे रपरत्वे 'हलि चे' तिदीर्घः। चेक्रियते, रिङ्। चर्करीत्यादि, कारयति कटं देवदत्तं यज्ञदत्तः, देवदत्तेनेति वा, 'हृक्रोरन्यतरस्या' मिति वा प्रयोज्यः कर्म। संस्करोति। अलंकरोतीत्यर्थः। तत्र संस्कुर्वन्ति समवयन्तीत्यर्थः। समस्करोत्। सञ्चस्कार। सञ्चस्करतुः। सञ्चस्करिथ। सञ्चस्करिव। 'सुट् कात्पूर्वः'। 'अड्भ्यासव्यवायेपी' ति अधिकारे 'संपर्युपेभ्यः करोतौ भूषणे' 'समवाये चे' ति कात्पूर्वः सुट्, समवायः समुदायः। 'समः सुटी' ति समो मकारस्य रुः। तस्य 'खरवसानयो' रिति विसर्जनीये 'विसर्जनीयस्य स' इति सत्वम्। 'वा शरी' ति विसर्जनीयो न भवति, व्यवस्थितविभाषाविज्ञानात्। वार्तिके तु संपुंकानां सो वक्तव्य इति रोरपवादः स एव विहितः। भाष्ये तु 'समः सुटी' ति द्विसकारकनिर्द्देशात्सूत्रेणैव सविधिः सिद्ध इत्युक्तम्। 'अत्रानुनासिकः पूर्वस्य तु वे' ति पक्षे सात्पूर्वस्यानुनासिकः, अत्रग्रहणं रुप्रकरणोपलक्षणम्, अनुनासिकाभावे 'अनुनासिकात्परोऽनुस्वार' इत्यनुस्वार आगमः। क्रादिसूत्रे कृञोसुडिति वक्तव्यमिति वचनात्ससुट्कः क्राद्यन्यो भवतीति लिटीडागमः। भारद्वाजनियमोप्यसुट एवेष्यतइति वृत्त्यादौ स्थितं[2]मिति नेड्विकल्पः, सुटि कात्पूर्वग्रहणं सुटो ऽभक्तत्वज्ञापनार्थमिति व्यवस्थितत्वात्संस्क्रियतइत्यादावृकारान्तत्वेपि संयोगादित्वाभावात् 'गुणोर्तिसंयोगाद्योरि' ति गुणो न भवति। तथा संस्कृषीष्ट समस्कृषातामित्यादौ 'लिङ्सिचोरात्मनेपदेषु' इति 'ऋतश्च संयोगादे' रितीण्न भवति। 'ऋतश्च संयोगादेर्गुणः' इत्यत्र तु संयोगोपधग्रहणं कर्तव्यं कृञोर्थमिति उक्तत्वात्संयोगाद्यवयवत्वाभावेपि ऋकारस्य

१ ४ पुस्तके करिष्यन्तो निर्वपा इति कर्मण्येव लृटि शतृप्रत्ययो दृश्यते इति पाठ उपलभ्यते स तु प्रयोगमुखे तु तिङन्तप्रतिरूपको निपात इत्युत्तरग्रन्थासंगत्या ऽसंगतः।
२ स्थितत्वात्स्थलीति ४ पु॰ पा॰।

सञ्चस्करतुरित्यादौ क्किति लिटि गुणो भवति । एवमुपस्करोतीत्यादि, परिपूर्वत्वे तु 'परिनिविभ्य' इत्यादिना सुटः षत्वं भवति परिष्करोतीत्यादि । अड्व्यवाये तु 'सिवादिनां वाड्व्यवायेपी'ति विकल्पो भवति पर्यष्करोत्पर्यस्करोद् इत्यादि । परिचस्कारेत्यादौ 'स्यादिष्वभ्यासेने'ति न षत्वं, तत्र यतः प्राक् सितादित्यनुवर्तते, संपूर्वस्य क्वचिदभूषणेपि सुडिष्यते । तद्यथा: समस्कुरुतेति, सूत्रे च दृश्यते 'संस्कृतं भत्ता' इति । उपात्कृञः 'उपात्प्रतियत्नवैकृतवाक्याध्याहारे' ष्वित्येतेष्वपि कात्पूर्वः सुड् भवति । प्रतियत्नस्सतो गुणान्तराधानहेतुरीहा, ऽसावाधिक्याय वृद्धस्य वा तादवस्थ्याय, विकृतमेव वैकृतं प्रज्ञादित्वात्स्वार्थेण्, गम्यमानार्थस्य वाक्यैकदेशस्य स्वरूपेणोपादानं वाक्याध्याहारः । एधो दकस्योपस्कुरुते । 'कृञः प्रतियत्न' इति कर्मणि शेषे षष्ठी, 'गन्धनादि' सूत्रेण प्रतियत्ने तङपि, उपस्करोत्यन्नं विकरोतीत्यर्थः । उपस्करोति, वाक्यैकदेशमध्याहरतीत्यर्थः । उपस्कृतं भुङ्क्ते उपस्कृतं जल्पतीत्युदाहरणे हरदत्तेन क्रियाविशेषणं व्याख्यातम् । उत्कुरुते दोषं, श्येनो वर्तिकामपकुरुते, राजानं प्रकुरुते, परदारान्प्रकुरुते । एधो दकस्योपस्कुरुते । गाथाः प्रकुरुते । शतं प्रकुरुते । सूचयति, भर्त्सयति, सेवयते, सहसा प्रवर्तते, गुणान्तराधानाय ईहते, प्रकर्षेण कथयति, विनियुङ्क्ते इति क्रमेणार्थाः, 'गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञ' इत्येतेष्वर्थेषु वर्तमानात्कृञो ऽकर्त्रभिप्रायेपि तङ् । तमधिकुरुते । 'अधेः प्रसहन' इति तङ्, प्रसहनमभिभवः, अपराजयो वा, पराजयः शक्तस्य क्षमयैव यस्तदभावः सः, तथा च भारविः, भवादृशाश्चेदधिकुर्वते परा[1]निति । क्षमया न पराजयन्ते क्षमन्ते इत्यर्थः । क्रोष्टा विकुरुते स्वरान् । 'वेः शब्दकर्मण' इति तङ् । अत्र कर्मेति कारकं गृह्यते न क्रिया । अत्र सुधाकरः । 'वेः शब्दकर्मण' इति चेदनुवाकं श्लोकं वा विकरोतीत्यत्रातिप्रसङ्गः । नेह शब्दविषयो व्यापारो यस्य शब्दो निर्वर्त्यः ।

१ अद्यतनपुस्तकेषु रतिमिति पाठः, तत्र यद्यपि प्रसहनस्यासंगतेरधिपूर्वात्करोते 'रधेः प्रसहने' इत्यात्मनेपदं न प्राप्नोति तथापि कर्त्रभिप्रायविवक्षायां स्वरितञित इत्यात्मनेपदम् ।

अत्र हि करोतिर्विनाशतीत्यर्थो न निर्वर्तयतीति, विकुरुते सैन्धवः, साधु दान्तः, सा[१]धु वल्गतीत्यर्थः। 'अकर्मकाच्चे' ति पूर्ववत्तङ्। यदायं वल्गना-यां कृञ् तदा सौकार्यातिशयाद्वल्गनावचनस्तदा कर्तुः कर्मवद्भावेऽपि 'यक्-चिणोः प्रतिषेध' इत्यात्मनेपदाकर्मकत्वान्न यक्चिणाविति विकुरुते सैन्धवः स्वयमेव व्यकृत सैन्धवः स्वयमेवेति भवतः। अत्रात्मनेपदाकर्मकेत्य-नेनात्मनेपदविधावर्थान्तरबलादकर्मणामन्तर्भावितण्यर्थानां सकर्मकाणां सौकर्यातिशयविवक्षया पुनरकर्मकाणां कर्मकर्तृविषयाणां विग्रह इति येषां दर्शनं तेषां 'विकारहेतौ सति विक्रियन्त' इत्यत्र न यक्निषेधप्र-सङ्गः। यतोऽत्र स्वत एव सकर्मकस्य कर्माविवक्षया ऽकर्मकत्वम्, येषां त्वा-त्मनेपदाकर्मकेति धातूपक्षणं, तेषां विकरोतिरपि अर्थान्तरवृत्त्या क्वचिदा-त्मनेपदनिमित्तं दृष्टमिति विकारहेतौ सति विक्रियन्तइत्यत्रापि कर्म-कर्तरि यक्निषेधेन भाव्यम्। संस्कुरुते कन्या स्वयमेव, समस्कृत कन्या स्वयमेवेत्यत्रापि भूषाकर्मकत्वान्न यक्चिणौ। पदं मिथ्या कारयते स्वरा-दि दुष्टमसकृदुच्चारयतीत्यर्थः। 'मिथ्योपपदात्कृञोऽभ्यास' इति ण्यन्ता-त्तङ्। 'गन्धनादि' सूत्रचतुष्कमेव चाकर्त्रभिप्रायार्थम्। अनुकरोति। 'अनुपराभ्यां कृञ' इति परस्मैपदम्। इदं च कर्त्रभिप्राये गन्धनादौ च प्राप्तस्य तङोऽपवादः। अनेन च कृञस्तङ्निमित्तत्वमेव निषिध्यतइत्य-नुचिकीर्षतीत्यादौ 'पूर्ववत्सन' इति तङ् न भवति। अत्रात्रेयः। 'संज्ञा-पूर्वको विधिरनित्य' इति मा नः सर्वान्पराकृथा इति परस्मैपदाभावमाह। कृत्यम्। कार्यं, 'विभाषा कृवृषोरि' ति क्यब्ण्यतौ। वासरूपेण तव्यादयोऽपि, कर्तव्यं करणीयम्। विद्या यशस्करी। श्राद्धकर आस्तिकः, प्रेषकरो भृत्यः। 'कृञो हेतुताच्छील्यानुलोम्येष्वि' ति कर्मण्युपपदे टप्र-त्ययः। हेतुरैकान्तिकं कारणं, ताच्छील्यं तत्स्वभावता, आनुलोम्यमनु-कूलता। टित्त्वात्स्त्रियां ङीप्। शङ्करा नाम परिव्राजिका तच्छीला चेत्यत्र ताच्छीलिकं परमपि प्रत्ययं 'शमिधातोः संज्ञाया' मित्यच्प्रत्यय-स्तत्र धात्वधिकारेऽपि पुनर्धातुग्रहणाद्बाधते। तथा च वार्तिकं शमिसंज्ञा-

१ शोभनमिति ३। ४। पु० पाठः।

सञ्चस्करतुरित्यादौ क्ङिति लिटि गुणो भवति । एवमुपस्करोतीत्यादि, परिपूर्वत्वे तु 'परिनिविभ्य' इत्यादिना सुटः षत्वं भवति परिष्करोतीत्यादि । अड्व्यवाये तु 'सिवादिनां वाड्व्यवायेपी' ति विकल्पो भवति पर्यष्करोत्पर्यस्करोद् इत्यादि । परिचस्कारेत्यादौ 'स्यादिष्वभ्यासेन' ति न षत्वं, तत्र यतः प्राक् सितादित्यनुवर्तते, संपूर्वस्य क्वचिदभूषणेपि सुडिष्यते । तद्रूपिः समस्कुरुतेति, सूत्रे च दृश्यते 'संस्कृतं भत्ता' इति । उपात्कृञः 'उपात्प्रतियत्नवैकृतवाक्याध्याहारे' ष्वित्येतेष्वपि कात्पूर्वः सुड् भवति । प्रतियत्नस्सतो गुणान्तराधानहेतुरिहा, ऽसावाधिक्याय वृद्धस्य वा तादवस्थ्याय, विकृतमेव वैकृतं प्रज्ञादित्वात्स्वार्थेण, गम्यमानार्थस्य वाक्यैकदेशस्य स्वरूपेणोपादानं वाक्याध्याहारः । एधो दकस्योपस्कुरुते । 'कृञः प्रतियत्न' इति कर्मणि शेषे षष्ठी, 'गन्धनादि' सूत्रेण प्रतियत्ने तङपि, उपस्करोत्यन्नं विकरोतीत्यर्थः । उपस्करोति, वाक्यैकदेशमध्याहरतीत्यर्थः । उपस्कृतं भुङ्क्ते उपस्कृतं जल्पतीत्युदाहरणे हरदत्तेन क्रियाविशेषणं व्याख्यातम् । उत्कुरुते दोषं, श्येनो वर्तिकामपकुरुते, राजानं प्रकुरुते, परदारान्प्रकुरुते । एधो दकस्योपस्कुरुते । गाथाः प्रकुरुते । शतं प्रकुरुते । सूचयति, भर्त्सयति, सेवयते, सहसा प्रवर्तते, गुणान्तराधानाय ईहते, प्रकर्षेण कथयति, विनियुङ्क्ते इति क्रमेणार्थाः, 'गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञ' इत्येतेष्वर्थेषु वर्तमानात्कृञो ऽकर्त्रभिप्रायेपि तङ् । तमधिकुरुते । 'अधेः प्रसहन' इति तङ्, प्रसहनमभिभवः, अपराजयो वा, पराजयः शक्तस्य क्षमयैव यस्तदभावः सः, तथा च भारविः, भवादृशाश्चेदधिकुर्वते परा[1]निति । क्षमया न पराजयन्ते क्षमन्ते इत्यर्थः । क्रोष्टा विकुरुते स्वरान् । 'वेः शब्दकर्मण' इति तङ् । अत्र कर्मेति कारकं गृह्यते न क्रिया । अत्र सुधाकरः । 'वेः शब्दकर्मण' इति चेदनुवाकं श्लोकं वा विकरोतीत्यत्रातिप्रसङ्गः । नेह शब्दविषयो व्यापारो यस्य शब्दो निर्वर्त्यः ।

१ अद्यतनपुस्तकेषु रतिमिति पाठः, तत्र यद्यपि प्रसहनस्यासंगतेरधिपूर्वात्करोते 'रधेः प्रसहने' इत्यात्मनेपदं न प्राप्नोति तथापि कर्त्रभिप्रायविवक्षायां स्वरितञित इत्यात्मनेपदम् ।

अत्र हि करोतिर्विनाशतीत्यर्थो न निर्वर्तयतीति, विकुरुते सैन्धवः, साधु दान्तः, सा[1]धु वल्गतीत्यर्थः । 'अकर्मकाच्चे' ति पूर्ववत्तङ् । यदायं वल्गनायां कृञ् तदा सौकार्यातिशयाद्वल्गनावचनस्तदा कर्तुः कर्मवद्भावेऽपि 'यक्चिणोः प्रतिषेध' इत्यात्मनेपदाकर्मकत्वान्न यक्चिणाविति विकुरुते सैन्धवः स्वयमेव व्यकृत सैन्धवः स्वयमेवेति भवतः । अत्रात्मनेपदाकर्मकेत्यनेनात्मनेपदविधावर्थान्तरबलादकर्मणामन्तर्भावितण्यर्थानां सकर्मकाणां सौकर्यातिशयविवक्षया पुनरकर्मकाणां कर्मकर्तृविषयाणां विग्रह इति येषां दर्शनं तेषां 'विकारहेतौ सति विक्रियन्त' इत्यत्र न यक्निषेधप्रसङ्गः । यतोऽत्र स्वत एव सकर्मकस्य कर्माविवक्षया ऽकर्मकत्वम्, येषां त्वात्मनेपदाकर्मकेति धातूपलक्षणं, तेषां विकरोतिरपि अर्थान्तरवृत्त्या क्वचिदात्मनेपदनिमित्तं दृष्टमिति विकारहेतौ सति विक्रियन्तइत्यत्रापि कर्मकर्तरि यक्निषेधेन भाव्यम् । संस्कुरुते कन्या स्वयमेव, समस्कृत कन्या स्वयमेवेत्यत्रापि भूषाकर्मकत्वान्न यक्चिणौ । पदं मिथ्या कारयते स्वरादि दुष्टमसकृदुच्चारयतीत्यर्थः । 'मिथ्योपपदात्कृञोऽभ्यास' इति ण्यन्तात्तङ् । 'गन्धनादि' सूत्रचतुष्कमेव चाकर्त्रभिप्रायार्थम् । अनुकरोति । 'अनुपराभ्यां कृञ' इति परस्मैपदम् । इदं च कर्त्रभिप्राये गन्धनादौ च प्राप्तस्य तङोऽपवादः । अनेन च कृञस्तङ्निमित्तत्वमेव निषिध्यतइत्यनुचिकीर्षतीत्यादौ 'पूर्ववत्सन' इति तङ् न भवति । अत्रात्रेयः । 'संज्ञापूर्वको विधिरनित्य' इति मा नः सर्वान्पराकृथा इति परस्मैपदाभावमाह । कृत्यम् । कार्यं, 'विभाषा कृवृषोरि' ति क्यबण्यतौ । वासरूपेण तव्यादयोऽपि, कर्तव्यं करणीयम् । विद्या यशस्करी । श्राद्धकर आस्तिकः, प्रेषकरो भृत्यः । 'कृञो हेतुताच्छील्यानुलोम्येष्वि' ति कर्मण्युपपदे टप्रत्ययः । हेतुरैकान्तिकं कारणं, ताच्छील्यं तत्स्वभावता, आनुलोम्यमनुकूलता । टित्त्वात्स्त्रियां ङीप् । शङ्करा नाम परिव्राजिका तच्छीला चेत्यत्र ताच्छीलिकं परमपि प्रत्ययं 'शमिधातोः संज्ञाया' मित्यच्प्रत्ययस्तत्र धात्वधिकारेऽपि पुनर्धातुग्रहणाद्बाधते । तथा च वार्तिकं शमिसंज्ञा-

१ शोभनमिति ३ । ४ । पु॰ पाठः ।

यां धातुग्रहणं कृञो हेत्वादिटप्रतिषेधार्थमिति । अयं च टप्रत्ययो 'न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेष्वि'ति निषेधाच्छब्दादिषूपपदेषु न भवतीत्यणेव, शब्दकार इत्यादि । दिवा हि प्राणिनश्चेष्टायुक्तान्करोतीति दिवाकरः । 'दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुःष्विति' दिवादिषूपपदेषु कृञष्टः । अहेत्वाद्यर्थ आरम्भः । तत्र दिवाशब्दस्याधिकरणप्रधानत्वात्कर्मत्वं न भवतीति तत्र सुपीति संबध्यते । अन्येषु कर्मणीति, विभां करोतीति विभाकरः प्रभाकर इत्यादीनि उदाहार्याणि । भास्कर इत्यत्रात्रैव भास्कर इति करोतौ परे सकारस्य निर्द्देशात्सत्वम् । 'अतः कृकमी'ति सत्वं तपरनिर्देशान्न प्राप्नोति । कर एव कार इति प्रज्ञा[1]दिः । अत्रानन्तकरस्य नञ्समासेनैव सिद्धे ऽनन्तग्रहणं कृदुत्तरपदप्रकृतिस्वरार्थम् । अन्यथा 'तत्पुरुषे तुल्ये'त्याद्युदात्तत्वं स्यात् । बहुशब्दो वैपुल्यवचनः, अन्यस्य संख्यात्वादेव ग्रहः । अत्रेष्टिः । किंयत्तद्बहुषु कृञोऽज्विधानमिति । प्रयोजनं किंकरेत्यादौ स्त्रियां टाप् । किंकरीति तु पुंयोगे ङीषि । हेत्वादौ वा पूर्वसूत्रेणटप्रत्यये, तस्कर इत्यत्र 'तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्चे'ति सुट्तलोपौ, धनुष्करः, अरुष्करः । 'नित्यं समासेनुत्तरपदस्थस्ये'ति विसर्जनीयस्य नित्यं षत्वं, कर्मकरः । 'कर्मणि भृतावि'ति कर्मशब्दउपपदे भृतौ गम्यमानायां टप्रत्ययः, भृतिर्वेतनम् । अन्यत्र कर्मकारः । स्तम्बकरिर्व्रीहिः । शकृत्करिर्वत्सः । 'स्तम्बशकृतो'रितीन् । 'व्रीहिवत्सयोरिति वक्तव्यमि'त्युक्तत्वादन्यत्र स्तम्बकारः शकृत्कार इति, मेघंकरः । ऋतिंकरः । भयंकरः । 'मेघर्तिभयेषु कृञ' इति मेघादिषु कर्मसूपपदेषु खच् । खित्त्वान्मुम् । उपपदविधौ भयाद्यादिग्रहणं तदन्तविधिं प्रयोजयतीत्युक्तत्वादभयादिशब्देष्युपपदे खञ् भवति अभयंकर इति । क्षेमंकरः । क्षेमकारः । 'क्षेमप्रियमद्रेण् चे'ति खजणौ । खचो विकल्पनेनैव कर्मण्यणि सिद्धे ऽण्ग्रहणं हेत्वादिषु टप्रतिषेधार्थम्, एवं प्रियमद्रयोरप्युदाहार्यम् । अनाढ्य आढ्यः क्रियते येन तदाढ्यंकरणम् । 'आढ्यसु-

[1] कर एव कारः, प्रज्ञादित्वादण् । इति ४ पु॰ पाठः ।

भगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युनि'ति आढ्यादिष्वभूततद्भावविषयेषु अच्व्यन्तेषु कर्मसूपपदेषु करणकारके ख्युन् । स्त्रियामाढ्यंकरणी । 'टिड्ढाणञि' त्यादिना ङीप् । एवं सुभगंकरणमित्यादि, खित्त्वान्मुम् । उपपदविधौ भयाढ्यादिग्रहणं तदन्तविधिं प्रयोजयतीत्युक्तत्वादनाढ्यादिष्वप्युपपदेषु ख्युन् भवति । अनाढ्यंकरणमित्यादि । सुकृत् । शोभनं कृतवानित्यर्थः । 'सुकर्मपापमन्त्रपुण्येषु कृञ' इति स्वादिषु कर्मसूपपदेषु भूते कृञः क्विप्, एवं कर्मकृदित्यादि । राजानं कृतवान् राजकृत्वा । 'राजनि युधि कृञ' इति राजनि कर्मण्युपपदे भूते क्वनिप्, तुगागमः, स्त्रियां 'वनो र चे' ति ङीब्रेफौ, राजकृत्वरी । सहकृत्वा । 'सहे चे' ति भूते क्वनिप् । अलंकरिष्णुः । अलंकृञ्निराकृञि' ति ताच्छीलिक इष्णुच्, चक्रिः, 'भाषायां धाञ्कृञि' ति किकिनोरन्यतरः, लिड्वद्भावाद् द्विर्वचनं, चक्रं, घञर्थे कः । 'कृञादीनां के द्वे भवत' इति द्विर्वचनं, चक्रीवान्नाम राजा, 'आसन्दीवदष्ठीवच्चक्रीवदि' ति मतुपि चक्रीभावो निपातनात् । क्रिया । कृतिः । 'कृञः श चे' ति शक्तिनौ । कृञ इति योगविभागात्क्यप्, तुगागमः, कृत्येति, शस्य भावविषयत्वात्सार्वधातुकत्वाच्च यकि विकरणे 'रिङ् शयग्लिङ्क्षु' ति रिङादेशः । ईषदाढ्यंकरो देवदत्तः, दुराढ्यंकरः, 'कर्तृकर्मणोश्च भूकृञोरि' ति करोतेः कर्तृकर्मवाचिनि चकारादीषदादिषु चोपपदेषु खल् प्रत्ययः । 'कर्तृकर्मणोश्च्व्यर्थयो' रिति वचनादभूततद्भावविषयोऽयं प्रत्ययः । तदयमर्थः । अनाढ्योनायासेन दुःखेन सुखेन वा आढ्यः क्रियते इति । चोरंकारमाक्रोशति, 'कर्मण्याक्रोशे कृञः खमुञि' ति कर्मण्युपपदे आक्रोशे गम्यमाने खमुञ् । अत्र करोतिः स्वभावादुच्चारणक्रिय इति चोरशब्दोपि स्वरूपपरः, तदयमर्थः, चोरशब्दमुच्चार्याक्रोशतीति । अस्य धातुसंबन्धमात्रे विधानेपि णमुलन्तार्थानुरोधायाक्रोशार्थस्यैवानुप्रयोगः । स्वादुंकारं भुङ्क्ते । 'स्वादुमि णमुलि' ति णमुल् । स्वादुमित्यर्थग्रहणात् संपन्नंकारं भुङ्क्ते लवणंकारं भुङ्क्ते इत्यत्रापि णमुल् भवति । अत एव स्वादुमीतिनिर्देशादुपपदस्य मान्तत्वम् । ननु प्रकृतः खमुञ् विधीयतां खित्त्वान्मा[1]न्तत्वं

१ मुमिति ४ पु॰ पा॰ ।

भविष्यति किं निपातनेन, एवं तर्हि लिङ्गविशिष्टपरिभाषया 'वोतो गुणवचनादि'ति ङीषन्तस्य स्वाद्वीशब्दस्योपपदत्वं माभूदिति निपातनं, भावप्रत्ययविषये हि मान्तत्वनिपातने उकारान्तत्वाभावान्नास्ति ङीषः प्रसङ्गः । किं च ह्येतस्य स्वाद्वादेर्मान्ततार्थं, तस्य ह्यव्ययत्वात् खित्त्वनिबन्धनो मुम्नास्ति । अत्र णमुल्विषये वासरूपविधिना त्क्वापि भवति स्वादुंकृत्वा भुङ्क्ते। इत्यादि। अन्यथाकारं भुङ्क्ते। 'अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चे'दित्यन्यथादिषु उपपदेषु णमुल्, सिद्धशब्दः प्राप्तवचनः, प्राप्तप्रयोगश्चेत्करोतिरित्यर्थः, प्राप्तप्रयोगत्वं च निरर्थकत्वात्, तेनान्यथेति यावानर्थस्तावानेवान्यथाकारमिति । एवमेवंकारमित्यादि । अत्रापि वासरूपेण त्क्वापि भवति । तेनान्य[1]या कृत्वा परिहरतीत्यादि भवति । यथा[2]कारमहं भोक्ष्ये तथाकारमहं भोक्ष्ये किन्तवानेन । 'यथातथयोरसूयाप्रतिवचन'इति कृञः सिद्धाप्रयोगाद्यथातथयोरुपपदयोरसूयाप्रतिवचने गम्यमाने णमुल्, यत्र प्रश्ने प्रतिवचनमसूयायां भवति तदसूयाप्रतिवचनम्। अकृतकारं करोति, अकृतं करोतीत्यर्थः। 'समूलाकृतजीवेषु हन्कृञ्ग्रह' इति णमुल् । कषादित्वाद्यथाविध्यनुप्रयोगः । ब्राह्मण पुत्रस्ते जातः । किं तर्हि नीचैःकारमाचक्षे, नीचैःकृत्य नीचैःकृत्वेति वा । 'अव्ययेयथाभिप्रेताख्याने कृञः क्त्वाणमुलावि'ति क्त्वाणमुलौ । यथाभिप्रेतं न भवति तथा ऽऽख्याने गम्यमाने, अत्र हि पुत्रजन्मनि प्रियमुच्चैराख्येयं गोपनीयवत्केन चिन्नीचैराख्यायते, 'तृतीयाप्रभृतीन्यन्यतरस्यां' 'क्त्वा चे'ति समासविकल्पः, तिर्यक्कृत्य गतः तिर्यक्कृत्वा गतः, तिर्यक्कारमिति वा । समाप्य गत इत्यर्थः । 'तिर्यच्यपवर्गे'इति क्त्वाणमुलौ, । अपवर्गः समाप्तिः, पूर्ववत्समासविकल्पः, मुखतःकृत्य, मुखतःकृत्वा, मुखतःकारं गच्छति । 'स्वाङ्गे तस्प्रत्यये कृभ्वोरि'ति त्क्वाणमुलौ, पूर्ववदत्रापि समासविकल्पः। नानाकृत्य, नानाकृत्वा नानाकारं, विनाकृत्य विनाकृत्वा विनाकारम् । द्विधाकृत्य, द्विधाकृत्वा, द्विधाकारम् । द्वैधाकृत्य, द्वैधाकृत्वा, द्वैधाका-

१ तेनान्यथा चोदितमन्यथा कृत्वा परिहार इत्यादि भवतीति ४ पु॰ पा॰ ।
२ यथाकारमहं भाष्ये किं भवानिति ४ पु॰ पा॰ ।

रम्, एवं द्वैधंकृत्येत्यादि । 'नाधार्थप्रत्यये च्व्यर्थे' इति क्त्वाणमुलौ । पूर्ववत्समासः । सूत्रार्थो भवतावुक्तः । कृतः । कृतवान् । कृतं गृह्णाति कृतयति । 'मुण्डमिश्रे' त्यादिना णिच्, स्वभावाद्गृह्णात्यर्थे प्रत्ययः, कृतमनेन कृती । 'इष्टादिभ्यश्चे' तीनिः, कृतञ्च तदपकृतं च कृतापकृतं, 'कृतापकृतानामुपसंख्यान' मिति समासः । कृत्रिमम् 'ड्वितः क्त्रिः, 'क्त्रेर्मन्नित्य' मिति । कडति माद्यतीति कडः । अच् । कडं करोतीति कडंकरो माषमुद्गादिकाष्ठं, तदर्हतीति कडंकर्यः, कडंकरीयः, 'कडंकरदक्षिणाच्छ च' ति अर्हतीत्यर्थे यच्छौ । अत्रैव निर्देशादचि मुमागमः । कर्म । मनिन् । कर्म शीलोऽस्य कार्मः 'छत्रादिभ्यो ण' इति णः । 'कार्मस्ताच्छील्ये' इति निपातनाट्टिलोपः । 'नस्तद्धित' इति टिलोपे सिद्धे निपातनं णेपि क्वचिदणकृतं कार्यं भवतीति ज्ञापनार्थं, तेन तापसी चौरीत्यत्र णेप्यण्कृतो ङीब् भवतीति पूर्वत्रोक्तम् । कर्मणे प्रभवति कार्मुकम् । 'कर्मण उकञि' ति 'तस्मै प्रभवती'-त्यर्थे उकञ्, सर्वकर्म व्याप्नोति सर्वकर्मीणः । 'तत्सर्वादे' रित्यादिना खः, कर्मणि घटते कर्मठः । 'कर्मणि घटो ऽठजि' ति अठच् । कर्मी, व्रीह्यादित्वादिनिः । कार्मणम्, 'तद्युक्तात्कर्मणो' रिति व्याहृतार्थवाग्युक्तात्कर्मणः स्वार्थेण् । 'अनि' ति प्रकृतिभावः । कारुः । 'कृवापाजी' त्युण् । क्रतुः । 'कृञः कतु' रिति कतुप्रत्ययः । कार्पासः । 'कृञः पासण' ति पासण्, कृकः । 'कृदाधारार्चिकलिभ्यः क' इति कः, बाहुलकात्कलोपगुणयोरभावः । उरी[1]कृत्य, पटपटाकृत्य । 'ऊर्यादिच्विडाचश्चे' ति कृभ्वस्तियोगे ऊर्यादीनां गतिसंज्ञा । तथा च वृत्तिः । च्विडाचोः कृभ्वस्तियोगे विधानादूर्यादीनामपि तैरेव योगे गतिसंज्ञेति, वार्तिकमपि कृभ्वस्तियोग-इति वक्तव्यमिति । संज्ञाप्रयोजनं समासादि । ऊर्यादीनां प्रयोगोपि कृभ्वस्तियोगएवेति कैयटपदमञ्जर्योः । कथं तर्हि भवति आविश्चक्षुषोर्भवदसाविव राग इति । अभवद्युगपद्विलोलजिह्वा युगलीढोभयसृक्कभागमाविरिति च । स्वतन्त्राः कवय इति हरदत्तः । तत्राप्याविःप्रादुःशब्दौ मुक्त्वा

१ शुक्लीकृत्येत्यधिकं ४ पु० ।

अन्येषामूर्यादीनामर्थस्वभावात्करोतियोगएव प्रयोगः । अत एव वृत्तिकृता गणवृत्तिकृता अन्यैश्च शाकटायनादिभिः करोतियोगएवोदाहरणं दर्शितम् । श्रच्छब्दस्य दधातिनैव योग इत्यन्ये, श्रौषट् वषट् स्वाहा स्वधेत्येतेषां पञ्चानां चादिषु पाठादक्रियायोगेऽपि प्रयोगः । अन्येऽप्यूर्यादय उदाहार्य्याः । कारिकाकृत्य । क्रियां कृत्वेत्यर्थः । कारिकाशब्दस्योपसंख्यानमिति गतित्वं, 'धात्वर्थनिर्द्देशे ण्वुल्' इति ण्वुलन्तः कारिकाशब्द इति न्यासे, खाट्कृत्य 'अनुकरणं चानितिपर'मिति गतिसञ्ज्ञा, अनुकरणस्य इतिपरत्वे तु खाडिति कृत्वा । सत्कृत्य । 'आदरानादरयोः सदसती' इति गतित्वं, प्रीतिपूर्वकप्रत्युत्थानादिविषयत्वरा आदरः, अवज्ञया कर्त्तव्यं प्रत्युत्थानादिकं प्रत्युपेक्षा ऽनादरः । अन्यत्र सत्कृत्वा, असत्कृत्वा । शोभनमशोभनञ्च कृत्वेत्यर्थः । अलंकृत्य । 'भूषणे ऽल'मिति गतित्वं, भूषणादन्यत्रालं कृत्वा, करणेनालमित्यर्थः । अनुकरणमित्यादयस्त्रयो योगाः स्वभावात् कृञ्विषयाः, पुरस्कृत्य पूर्वदेशे कृत्वेत्यर्थः । 'पुरोऽव्यय'मिति गतिसंज्ञा, 'पूर्वाधरावराणामसिपुरधवश्चैषा'मिति सप्तम्यन्तात् स्वार्थे ऽसिप्रत्ययः पुरादेशश्च, 'तद्धितश्चासर्वविभक्ति'रित्यव्ययत्वं, 'नमस्पुरसोर्गत्यो'रिति विसर्जनीयस्य सत्वम् । अव्ययादन्यत्र, पुरः कृत्वा गतः । अस्तंकृत्य । 'अस्तञ्चे'ति गतिसंज्ञा, चकारोऽव्ययमित्यनुकर्षणार्थः, तेनात्रैव निर्द्देशादस्तंशब्दो मकारान्तो ऽव्ययमस्तीति ज्ञायते । अस्य त्वदर्शनमर्थः । अन्यत्रास्तंगतः क्षिप्तं कृत्वेत्यर्थः । द्वाविमौ योगौ करोत्यविषयावपि दृश्येते, यथा 'तुरासाहं पुरोधाय । 'अस्तंगत्य सविता पुनरुदेति' । अदःकृत्य । 'अदोऽनुपदेश' इति गतित्वम् । उपदेशः परार्थो वाक्यप्रयोगः । ततोऽन्योपदेशः, स्वयमेव बुद्ध्या परामर्श इति यावत्, परस्य कथने त्वदः कृत्वा गत इति, सूत्रे ऽद इति द्वितीयान्तानुकरणेनामुना कृत्वेत्यर्थेऽदः कृत्वेत्येव भवतीत्याशयः । तिरस्कृत्य 'विभाषा कृञी'ति तिरसो वा गतित्व,मन्तर्द्धौ 'तिरसोऽन्यतरस्या'मिति विसर्जनीयस्य वा सत्वम्, अन्यदा तु 'कुप्वोᳵकᳵपौ चे'ति जिह्वामूलीयविसर्जनीयौ द्रष्टव्यौ, अगतित्वे 'तिरसोऽन्यत-

रस्या' मिति सत्वं गतेरितीह न भवतीत्यात्रेयः। केचित्तु तत्र गति-ग्रहणं नानुवर्तयन्ति, तेन तिरस्कृत्येत्यत्रापि सत्वम् । अत एव पराभवेपि तिरस्कार इति, अयं पक्षो भाष्यवृत्तिन्यासपदमञ्जर्यादौ न दृश्यते । उपाजेकृत्य उपाजे कृत्वा । अन्वाजेकृत्य। अन्वाजे कृत्वा इति, 'उपाजे-न्वाजे' इति वा कृञि गतित्वम् । उपाजेन्वाजेशब्दौ विभक्तिप्रतिरूपकौ निपातौ दुर्बलस्य सामर्थ्याधाने वर्तेते। साक्षात्कृत्य । साक्षात् कृत्वा । 'साक्षात्प्रभृतीनि च' ति कृञि वा गतित्वम्, अत्र वार्तिकं साक्षात्प्र-भृतिषु च्व्यर्थग्रहणं, तत्र च्विप्रत्ययप्रतिषेध इति । तेन च्व्यन्तस्योर्या-दित्वाद् नित्यं गतित्वम् । अस्य च प्रयोजनमकारान्तेषु लवणीकृत्ये-त्यादौ । अत्र लवणमुष्णमुदकं शीतमार्द्रमिति पञ्च पठन्ते, एषा-मत्रैव निपातनाद्गतित्वसंनियोगेन मान्तत्वम् । अत्राग्नौवशेप्रभृतयः केचिदेजन्ताः पठ्यन्ते, ते विभक्तिप्रतिरूपका निपाताः, प्रादुस्आविस्-शब्दाविह पठ्येते, तयोरूर्यादित्वान्नित्ये प्राप्ते विकल्पार्थः पाठः, ऊर्यादि-पाठस्तु कृभ्वस्तियोगे नित्यार्थः। अत्र नमःशब्दः पठ्यते, स यदा गति-संज्ञकस्तदोपसर्गवद्वृत्त्या कृञः प्रणामवचनत्वं द्योतयतीति प्रणामापे-क्षया कर्मणि देवादौ 'नमःस्वस्तीत्ये' तद्बाधित्वोपपदविभक्तेः कारक-विभक्तिर्बलीयसीति नमस्यति देवानितिवन्नमस्करोति देवानिति द्विती-यैव भवति । अगतित्वे तु करोतिक्रियाकर्मभावापन्नं विशेष्यभूतं प्रणाममाचष्टइति देवादावकर्मणि 'नमःस्वस्ती' ति चतुर्थी । तथा च भट्टिः। नमश्चकार देवेभ्यो, रावणाय नमस्कुर्या इति, स्वयं भुवे नमस्कृ-त्येत्यत्र तु नमसो गतित्वे कृञो विशेषकत्वात्प्राप्तां कारकविभक्तिं द्वि-तीयां 'क्रियार्थोपपदस्ये' ति चतुर्थी बाधते, तदत्रायमर्थो वाच्यः, स्वयंभुवं प्रीणयितुं प्रणम्येति, वर्द्धमानस्तु आदाय निगृह्णते इतिवत्क्रियाग्रहणं कर्त-व्यमिति चतुर्थीमाह । उरसिकृत्य । उरसि कृत्वा मनसिकृत्य मनसि कृ-त्वा । बुद्धौ कृत्वेत्यर्थः । 'अनत्याधानउरसिमनसी' इति उरसिमनसी-त्यनयोर्वा गतित्वम् । अत्याधानमुपश्लेषस्तदभावो ऽनत्याधानम् । अत्या-धाने तु उरसि कृत्वा पाणिं शेतइति । सप्तम्यन्तप्रतिरूपकावेतौ मध्ये

कृत्वा मध्येकृत्य । पदे कृत्वा पदेकृत्य । निवचने कृत्वा निवचनेकृत्य, 'मध्येपदेनिवचने चे' ति वा गतित्वम् । अनत्याधाने मध्येपदेशब्दौ विभक्तिप्रतिरूपकौ, निवचनं वचनाभावः । सतृणमितिवदव्ययीभावः । उच्चारणसामर्थ्यात्सप्तम्या लुङ् न भवतीति न्यासे । हरदत्तस्तु निपातनादेकारान्तत्वं न पुनरेषा सप्तमी । वाचंनियम्येति व्याख्यानात् । निपातनं चाविशेषेण न तु संज्ञासंज्ञियुक्तं, निवचने कृत्वेत्युदाहृतत्वादित्याहुरिति । अत्याधाने पदे कृत्वा शिरः शेते, हस्तेकृत्य । पाणौकृत्य । 'नित्यं हस्तेपाणावुपयमने' इति नित्यं गतित्वं, निपातनादलुगिति न्यासे, सप्तम्यन्तप्रतिरूपकाविति हरदत्तादयः। उपयमनं दारकर्मेति वृत्तौ, अन्ये तु स्वीकरणमात्रमिच्छन्ति । हस्तेकृत्य महास्त्राणीति । आत्रेयस्तूपयमनमपरित्यागलक्षणं स्वीकरणं, तथा च भट्टिः । हस्तेकृत्य त्वमाश्वासीरिति, प्राध्वंकृत्य शकटं गतः, बन्धनेनानुकूलं कृत्वा गत इत्यर्थः। 'प्राध्वं बन्धन' इति गतित्वम् । प्राध्वंशब्दस्य मान्तस्याव्ययस्यानुकूल्यार्थत्वाद्बन्धनद्वत्यर्थद्वारेण बन्धने सति यदानुकूल्यमिति, अबन्धने तु प्राध्वं कृत्वा कटं गतः । विनापि बन्धनेनानुकूलं कृत्वेत्यर्थः, जीविकामिव कृत्वा जीविकाकृत्य, उपनिषदमिव कृत्वा उपनिषत्कृत्य,' जीविकोपनिषदावौपम्ये ' इति गतित्वम् । इवशब्दप्रयोगे जीविकोपनिषदौ स्वार्थे वर्त्तते नौपम्यइत्यगतित्वाच्च समासः । मामधिकृत्वा ईश्वरो भवेति, मां विनियुङ्क्ष्वेत्यर्थः । यथा स्वरितेनाधिकारः, ग्रामे ऽधिकृत इत्यनयोः प्रयोगयोर्विनियोगो ह्यर्थः । 'विभाषा कृञी' त्यधेरैश्वर्ये गम्यमाने कर्मप्रवचनीयसंज्ञा । अस्याः फलमाकडारादिति गतिसंज्ञाबाधः । द्वितीया त्वधिकृञो विनियोगार्थत्वात्कर्मणीत्येव सिद्धा । अगतित्वे तु प्रादिसमासस्य कर्मप्रवचनीयानां प्रतिषेध इति निषेधाद्वाक्यमेव भवति । कर्मप्रवचनीयत्वाभावे तु गतित्वात्समासे मामधिकृत्येति । अनुदात्त उभयतोभाषः ॥ ८ ॥

इति श्रीपूर्वदक्षिणपश्चिमसमुद्राधीश्वरकम्पराजसुतसंगममहाराजमहामन्त्रिणा मायणपुत्रेण माधवसहोदरेण सायणाचार्येण विरचितायां माधवीयायां धातुवृत्तौ उविकरणास्तनादयः संपूर्णाः ।

अथ क्र्यादयः ।

डुक्रीञ् द्रव्यविनिमये ॥ क्रीणाति । क्रीणीतः । क्रीणन्ति । क्रीणासि । क्रीणामि । क्रीणीवः । क्रीणीते । क्रीणाते । क्रीणते । क्रीणीषे । क्रीणे । क्रीणीवहे । इत्यादि । 'क्र्यादिभ्यः श्ना' इति शपोपवादः श्ना, 'श्नाभ्यस्तयोरातः' इति क्ङिति सार्वधातुकआलोपः । हलादौ 'ई हल्यघोः' इतीत्वम् । झिझयोः परत्वान्नित्यत्वादन्तरङ्गत्वादीत्वात्पूर्वमन्तादेशाद्भावयोरात्लोपः । चिक्राय । चिक्रियतुः । चिक्रयिथ । चिक्रेथ । चिक्रियथुः । चिक्रिय । चिक्राय । चिक्रय । चिक्रिये । चिक्रियाते । चिक्रियिषे । चिक्रियिध्वे । चिक्रिये । चिक्रियिवहे, क्रादिनियमादिट्, थलि तु भारद्वाजनियमाद्विकल्पः । अगुणवृद्धिविषये इयङ् । 'एरनेकाचः' इति यण् तु संयोगपूर्वत्वान्न भवति । क्रेता । क्रेष्यति । क्रेष्यते । क्रीणातु । क्रीणीतात् । क्रीणाताम् । क्रीणन्तु । क्रीणीहि । क्रीणानि । क्रीणाव । क्रीणीताम् । क्रीणाताम् । क्रीणताम् । क्रीणीष्व । क्रीणावहै । तातङः स्वतो ङित्त्वाद्धेश्चापित्त्वेन ङित्त्वादीत्वम् । उत्तमे त्वाटोपित्त्वेन ङित्त्वाभावादीत्वाभावः । अक्रीणात् । अक्रीणीताम् । अक्रीणाः । अक्रीणीतम् । अक्रीणीत । अक्रीणाम् । अक्रीणीव, अक्रीणीत, अक्रीणीथाः । अक्रीणाथाम् । अक्रीणीध्वम् । अक्रीणि, अक्रीणीवहि । क्रीणीयात् । क्रीणीयाताम् । क्रीणीयाः । क्रीणीयाम् । क्रीणीयाव । यासुटो ङित्त्वात्पिद्वचनेष्वपीत्वम् । क्रीणीत । क्रीणीयाताम् । क्रीणीथाः । क्रीणीय । क्रीणीवहि । क्रीणीमहि । सीयुटि [1]आलोपः । आशिषि क्रीयात् । क्रीयास्ताम् । क्रेषीष्ट । क्रेषीयास्तामित्यादि । अक्रैषीत् । अक्रैष्टाम् । अक्रैषम् । सिचि वृद्धिः । अक्रेष्ट । अक्रेषाताम् । अक्रेष्ठाः । अक्रेषि । चिक्रीषति । चिक्रीषते । चेक्रीयते । चेक्रेति । क्रापयति । अचिक्रपत् । 'क्रीङ्जीनां णौ' इत्यात्वे पुक् । शतेन शताय वा परिक्रीणीते । 'परिव्यवेभ्यः' इत्यकर्त्रभिप्रायेपि तङ् । एवं व्यवाभ्यामपि । इह पर्या-

१ 'आतो लोप' इत्यधिकं ४ पु० ।

दय उपसर्गा गृह्यन्ते इति बहु विक्रीणाति वनमित्यादौ न भवति । 'परिक्रयणे संप्रदानमन्यतरस्यामि' ति परिपूर्वस्य क्रीणातेः साधकतमस्य पक्षे संप्रदानत्वम् । परिक्रयणं वेतनादिना नियतकालं स्वीकरणम् । क्रीत्रिमं । 'ड्वितः क्त्रिः' । 'क्त्रेर्मम् नित्यम्' क्रीतः । क्रीतवान् । अश्वेन क्रीता अश्वक्रीती । धनेन क्रीता धनक्रीती । 'कर्तृकरणे कृता बहुलमि' ति तृतीयासमासः । स च 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेरि' ति क्रीतशब्देनेति 'क्रीतात्करणपूर्वादि'-त्यदन्तात् क्रीतान्तात्प्रातिपदिकाद्विधीयमानो ङीप् भवति । सा हि तस्य धनक्रीता प्राणेभ्योपि गरीयसीत्यत्र तु बहुलग्रहणादाबन्तेन समास इति अनदन्तत्वान्ङीपभावो वाच्यः । अन्तवद्भावेन टाबन्तोपि कृदन्त एवेति कृदन्तलक्षणसमासलाभः । क्रयः । एरच् । अवक्रियते व्यवह्रियतेऽनेनेति अवक्रयः । आयस्थानेषु वणिगादिभिर्दीयमानः स्वामिग्राह्यो भागः, यस्य पिण्डक इति प्रसिद्धिः । 'पुंसि संज्ञायामि' ति घः । क्रयार्थं प्रसारितं क्रय्यम् । अचो यति, 'क्रय्यस्तदर्थे' इत्ययादेशः । अत्र तच्छब्देन क्रयः परामृश्यते । अन्यत्र गुणे क्रेयः । क्रायकः, ण्वुल्, क्रियिकः । 'क्रिय इकन्नि' ति इकन् ॥ १ ॥

प्रीञ् तर्पणे कान्तौ च ॥ कान्तिः कामनेति एरूपकारे । प्रीणाति । प्रीणीते इत्यादि क्रीणातिवत् । प्रीणयति । अपिप्रीणत् । 'धूञ्-प्रीञोर्नुग्वक्तव्य' इति नुक् । प्रीणातीति प्रियः । 'इगुपधज्ञाप्रीकिरः क' इति कः । प्रेष्ठ इत्यादि दिवादावुक्तम् ॥ २ ॥

श्रीञ् पाके ॥ श्रीणाति । श्रीणाते इत्यादि क्रिणातिवत् । श्राययति । अशिश्रयत् । वृद्धायौ ॥ ३ ॥

मीञ् हिंसायाम् ॥ मीनाति । मीनीतः । मीनासि । मीनामि । मीनीवः । मीनीते । मीनाते । मीनीषे । मीने । मीनीवहे । ममौ, मिम्यतुः । ममिथ । ममाथ । मिम्यथुः । मिम्य । ममौ । मिम्यिव । 'मीनातिमिनोती' त्येज्विषये आत्वं ल्यपि च । अन्यत्र 'एरनेकाच' इति यण् । मिम्ये । मिम्यिषे । मिम्ये । मिम्यिवहे । माता । मास्यति । मा-

यावतो ऽश्वान् प्रतिगृह्णीयात् तावतो वारुणांश्चतुष्कपालान्निर्वपेदिति विहितम् । अत्र प्रतिग्रहो दानमित्यग्रिमे अधिकरणे सेत्स्यति । इयमिष्टिर्लौकिकदाने उत वैदिकदानइति संशये पूर्वपक्षमाह । दोषादिति । इयमिष्टिर्लौकिके स्वेच्छानिमित्तकदाने स्यात् । दोषात् । दानेन दोषश्रवणात्, स एवैनं वरुणपाशान्मुञ्चतीति । वरुणपाशाज्जलोदररोगात् । हि यतो वैदिके वारुणं यवमयं चरुमश्वो दक्षिणेति शास्त्रात्प्राप्तदाने न दोषः स्याद्दोषप्रसक्तिर्न स्याच्च शास्त्राच्च शास्त्रप्रतिपादितत्वात् ॥ २८ ॥

*अर्थवादानुपपातात् तस्माद्यज्ञे प्रतीयेत ॥ २९ ॥

सिद्धान्तमाह । अर्थेति । वरुणो वा एतं गृह्णाति यो ऽश्वं प्रतिगृह्णातीतिवाक्यरूपार्थवादस्य अनुपपातात् । सादृश्याद् वरुणपाशेन गृहीतस्य पुरुषस्य मोचने यावच्छ्रेयः तावच्छ्रेयः अनेन कर्मणेति सादृश्यादर्थवादस्यार्थकः । तस्माद्यज्ञे यज्ञसंबन्धिदानाङ्गं प्रतीयेत । यज्ञसंबन्धिदानाङ्गत्वकल्पने परम्परया क्रत्वपूर्वप्रयोजकतया फलकल्पनाभाव इति लाघवमिति भावः ॥ २९ ॥

दातुर्वारुणेष्टिः । अधि० ११ ।

अचोदितं च कर्मभेदात् ॥ ३० ॥

इयमिष्टिः दातुः प्रतिग्रहीतुर्वेति संशये पूर्वपक्षमाह । अचोदितमिति । कर्मणोः ददातिप्रतिगृह्णात्यर्थयोर्भेदात् प्रकृते प्रतिगृह्णीयादिति श्रवणेन दाने निमित्ते अचोदितमविहितमिदं कर्म अतः प्रतिग्रहीतुरिष्टिरिति भावः ॥ ३० ॥

सा लिङ्गादार्त्विजे स्यात् ॥ ३१ ॥

सिद्धान्तमाह । सेति । सा इष्ट्यधिकृतिः आर्त्विजे ऋत्विक्प्रेरके यजमाने दातरीति फलितं स्यात् । लिङ्गात् प्रजापतिर्वरुणायाश्वमनय-

* अर्थवादो वा ऽनुपपातादिति शाबरभाष्ये तन्त्रवार्त्तिके च पाठो युक्ततरः ।

दित्युपक्रमे दातुः पीडाश्रवणलिङ्गात् । उपक्रमानुसारेण यावतो ऽश्वान् प्रतिगृह्णीयादित्यस्य प्रतिग्राहयेदित्यर्थकरणमावश्यकमिति भावः* ॥ ३१ ॥

वैदिकपानव्यापदि सोमेन्द्रचरुविधानम् । अधि० १२ ।

पानव्यापच्च तद्वत् ॥ ३२ ॥

यः सोमं वमति यः सोमवामी स्यात् तस्माएतं सौमेन्द्रं श्यामाकं चरुं निर्वपेदिति । इयमिष्टिः वैदिकसोमपानोत्तरवमने उत लौकिकोत्तरइति संशये पूर्वपक्षमाह । पानेति । पानस्य सोमपानस्य व्यापद् वमनम् । तद्वत् । अश्वप्रतिग्रहेष्टिपूर्वपक्षवत् । लौकिकपानवमनमित्यर्थः । तस्माद्विशेषस्तु तत्र दानं लौकिकं वैदिकं च संभवति अत्र वमनं लौकिकमेव न वैदिकमिति ॥ ३२ ॥

दोषात्तु वैदिके स्यादर्थाद्धि लौकिके न दोषः स्यात् ॥ ३३ ॥

सिद्धान्तमाह । दोषादिति । वैदिके वमने दोषाद्दोषश्रवणात् । विवा एष इन्द्रियेण वीर्येण व्यृध्यते यः सोमं वमतीति । अर्थाद् वमने धातुसाम्यमिति वैद्यशास्त्रप्रसिद्धफलाद् हि यतः लौकिके न दोषः स्यादतः इयमिष्टिर्वैदिकसोमपानएव ॥ ३३ ॥

सोमेन्द्रचरोर्यजमानपानव्यापद्विषयत्वम् । अधि० १३ ।

तत्सर्वत्राविशेषात् ॥ ३४ ॥

पूर्वोदाहृतवाक्ये वमनकर्तृविशेषाश्रवणाद् ऋत्विजां वमने ऽपि इयमिष्टिरिति पूर्वपक्षसूत्रमाह । तदिति । तद् वमनं सर्वेषामृत्विजां यजमानस्य च इष्टिनिमित्तमविशेषात् ॥ ३४ ॥

स्वामिनो वा तदर्थत्वात् ॥ ३५ ॥

सिद्धान्तमाह । स्वामिन इति । स्वामिनो वमने इयमिष्टिः क्रतोः तदर्थत्वात् क्रतुजन्यफलभोक्तृत्वस्य यजमानएव सत्त्वात् । वमने क्रतु-

* ननु वेदो वा प्रायदर्शनादिति तृतीयाध्यायस्य तृतीयपादे प्रथमाधिकरणे एवोपक्रमस्य प्राबल्यं प्रदर्श्य ऋगादिशब्दानां वेदपरत्वं साधितं तत एवात्रापि प्रतिग्रह्यातेर्दानपरत्वं सिध्येदेवेति पुनरत्र तत्कथनमनुचितमिति चेन्न । तत्र ऋगादिशब्दानाम् ऋग्भिः प्रातरित्यादौ बहुत्र वेदपरत्वस्य दृष्टत्वेन उपक्रमस्योपसंहारात्प्राबल्यमित्यस्यासाधारणोदाहरणत्वाभावेन तदसाधारणोदाहरणप्रदर्शनार्थं पुनरुल्लेखात् ।

वैगुण्यमिष्टा तत्परिहार एव फलम् । यः वमति स स्वक्रतुवैगुण्यदोषपरिहारार्थं निर्वपेदिति वमनकर्तुः निर्वापकर्तुश्च ऐक्यं श्रूयते । अतो यष्टुरेवेति ॥ ३५ ॥

लिङ्गदर्शनाच्च ॥ ३६ ॥

सोमपानेनात्मनः संस्कारो भवति । स च यजमानस्यैव न ऋत्विजाम् । क्रयक्रीतत्वात्तेषां संस्कारो वमने जाते न भवतीति कथ्यते, सोमपीथेन व्यृध्यते यः सोमं वमतीति वाक्येन । इदं लिङ्गं यजमानवमनस्यैवेत्याह । लिङ्गेति ॥ ३६ ॥

आग्नेयाष्टाकपालचरोर्द्व्यवदानमात्रस्य होतव्यत्वम् । अधि० १४ ।

सर्वप्रदानं हविषस्तदर्थत्वात् ॥ ३७ ॥

यदाग्नेय इत्यनेन विहितः पुरोडाशः कृत्स्नः अग्नये देय उतैकदेश इति संशये पूर्वपक्षमाह । सर्वेति । सर्वस्य पुरोडाशस्य प्रदानम् अग्नये जुष्टं निर्वपामीति ग्रहणेन निखिलस्य तदर्थत्वात् ॥ ३७ ॥

निरवदानात्तु शेषः स्यात् ॥ ३८ ॥

सिद्धान्तमाह । निरिति । निष्कृष्य अवदानं निरवदानम् । द्विर्हविषो ऽवद्यतीति विधानाद् न सर्वहोमः किं तु शेषः स्यात् ॥ ३८ ॥

उपायो वा तदर्थत्वात् ॥ ३९ ॥

पूर्वपक्ष्याशङ्कते । उपाय इति । द्विरवदानमुपायः हविषः संस्कारः कल्प्यते । तथा च कृत्स्नहोमः कृत्स्नस्य तदर्थत्वात् । अन्यर्थत्वात् । अयं भावः अनेकवारं द्विर्द्विरवदाय होतव्यं कृत्स्नं, तावता न कस्यापि वाक्यस्य विरोध इति ॥ ३९ ॥

कृतत्वात्तु कर्मणः सकृत्स्याद् द्रव्यस्य गुणभूतत्वात् ॥ ४० ॥

सिद्धान्ती स्वमतं व्यवस्थापयति । कृतत्वादिति । कर्मणः होमस्य सकृत् कृतत्वाद् नावृत्तिः स्यात् । ननु द्रव्यस्य शिष्टत्वात् तदनुसारेण

यागाभ्यास इत्यत्राह । द्रव्यस्य यागं प्रति गुणभूतत्वाद् न गुणानुसारेण प्रधानावृत्तिरिति भावः* ॥ ४० ॥

शेषदर्शनाच्च ॥ ४१ ॥

साधकान्तरमाह । शेषदर्शनादिति । शेषकार्यस्य शेषात्स्विष्टकृते ऽवद्यतीति विधिदर्शनाच्छेष आवश्यकः ॥ ४१ ॥

सर्वशेषेण स्विष्टकृदनुष्ठानम् । अधि॰ १५ ।

अप्रयोजकत्वादेकस्मात् क्रियेरञ् शेषस्य गुणभूतत्वात् ॥४२॥

दर्शपूर्णमासे शेषकार्याणि स्विष्टकृदिडाप्राशित्रावदानरूपाणि । तानि यावद्धविषः कार्याणि किं वैकस्मादिति संशये पूर्वपक्षमाह । अप्रयोजकत्वादिति । अप्रयोजकत्वाच्च शेषकार्यं प्रति हविषो ऽप्रयोजकत्वात् । प्रधानयागप्रयुक्तत्वाद्धविषः शेषात्स्विष्टकृते ऽवद्यतीति शास्त्रमेकस्मादवदाने ऽपि चरितार्थमत एकस्मादवदानम् । यदि शेषकार्याणां हविः प्रधानं स्यात् तदा प्रतिप्रधानमितिन्यायप्राप्तिः । तदेवन । शेषकार्यं प्रत्यङ्गं हविः । अतः एकस्मादवदाने ऽपि कृतार्थमित्याह । शेषस्य गुणभूतत्वात् ॥ ४२ ॥

---

* ननु द्विरवत्तमात्रस्य प्रदाने आग्नेयो ऽष्टाकपालो भवतीत्युत्पत्तिशिष्टं सर्वस्य हविष आग्नेयत्वं नोपपद्यतेति चेन्न । अग्निदेवताकयागसाधनत्वस्यैव आग्नेयत्वेन तस्य च व्रीहीणामिव पुरोडाशद्वारा प्रदेयप्रकृतिततया ऽप्युपपत्तेः । वार्तिककारस्तु पुरोडाशस्योत्पत्तिशिष्टयागसाधनत्वादगत्या तत्र व्रीहीणां पुरोडाशद्वारा यागसाधनत्वोपगमे ऽपि अत्र परम्परया यागसाधनत्वोपगमे प्रमाणाभावादन्यथा अधिकरणमारचयति स्म । तथा हि । यागस्य सकलपुरोडाशद्रव्यकत्वे सिद्धे होमः सकलस्य पुरोडाशस्य कर्तव्य उत सशेषस्येति संशयः । प्रायेण हविषां होमदर्शनादग्निमुखा वै देवा इत्यर्थवादाच्च सकलस्य होम इति पूर्वपक्ष । चतुरवत्तं जुहोतीति वचनात्तावन्मात्रस्य होमः । सकलस्य देवतासंबन्धस्तु त्यागमात्रादेवोपपन्नः । एवं च शेषात्स्विष्टकृते इत्यादि आञ्जस्येनोपपद्यते । अन्यथा तैर्हविरन्तरापेक्षेण तत्साफल्यसिद्धावपि तेषां तत्प्रये.जकत्वात्कदाचिन्नष्टे हविषि हविरन्तरोत्पादापत्ति । प्रतिपत्तिकर्मत्वाभावादेकेनैव हविषा तत्सिद्धौ सर्वेभ्यो हविर्भ्यस्तदनुष्ठानानावृत्तिश्च । न च अग्नये दत्तस्य पुनः स्विष्टकृते दाने शिष्टाचारविरोधः त्यक्तस्य पुनः स्वीकारादिति वाच्यम् । प्रत्यक्षश्रुत्या आचारबाधे इष्टापत्तेरिति शास्त्रदीपिकादौ विस्तरः ।

संस्कृतत्वाच्च ॥ ४३ ॥

सकृच्चैवञ्जातीयकेन शेषकार्येण संस्कृतं प्रधानमिति नापरस्मादपि कर्तव्यमित्याह । समिति ॥ ४३ ॥

सर्वेभ्यो वा कारणाविशेषात्संस्कारस्य तदर्थत्वात् ॥ ४४ ॥

स्विष्टकृदाद्यवदानं हविषः प्रतिपत्तिसंस्कार इति चतुर्थे वक्ष्यमाणमर्थं सिद्धवत्कृत्य सिद्धान्तमाह । सर्वेभ्य इति । संस्कारस्य संस्काररूपस्य स्विष्टकृदवदानस्य तदर्थत्वाद् हविरर्थत्वात् । तथा च हविषः प्रधानत्वेन संस्काररूपकारणस्य अविशेषात्सर्वेभ्यो ऽवदानं प्रतिप्रधानमङ्गावृत्तिरिति न्यायात्* ॥ ४४ ॥

लिङ्गदर्शनाच्च ॥ ४५ ॥

सकृत्सकृदवद्यतीति वीप्सा सर्वेभ्यः अवदाने लिङ्गमित्याह । लिङ्गेति ॥ ४५ ॥

प्राथमिकशेषात्स्विष्टकृदाद्यनुष्ठानम् । अधि० १६ ।

एकस्माच्चेद् याथाकाम्यविशेषात् ॥ ४६ ॥

एकस्मादवदानमिति कृत्वाचिन्तयेदमधिकरणम् । एकस्मादवदानपक्षे इच्छैव नियामिका उत अन्यत्किं चन नियामकमस्तीति संशये पूर्वपक्षमाह । एकस्मादिति । स्पष्टम् ॥ ४६ ॥

मुख्याद्वा पूर्वकालत्वात् ॥ ४७ ॥

सिद्धान्तमाह । मुख्यादिति । मुख्यात्प्रथमाद् अवदानं प्रथमोपस्थितेः सर्वपूर्वकालत्वात् । प्रथमोपस्थितपरित्यागे मानाभावादिति भावः ॥ ४७ ॥

पुरोडाशविभागस्य भक्षार्थत्वम् । अधि० १७ ।

भक्षाश्रवणाद्दानशब्दः परिक्रये ॥ ४८ ॥

---

* चतुर्थे एतेषां प्रतिपत्तिकर्मत्वस्य व्यवस्थापयिष्यमाणत्वात्तेनैव सर्वेभ्यः शेषकार्यसिद्धेः नेदमधिकरणान्तरं किं तु पूर्वाधिकरणसिद्धान्तप्रयोजनप्रतिपादकानीमानि सूत्राणीति वार्तिककारः ।

दर्शपूर्णमासयोः श्रूयते चतुर्धाकरणे,इदं ब्रह्मण इदं होतुरिदमध्वर्योरिदमग्नीध इति । इदं दानमृत्विक्परिक्रयार्थमुत भक्त्यर्थमिति संशये पूर्वपक्षमाह । भक्तेति । वाक्ये भक्तपदाश्रवणाद्दानशब्दः चतुर्थ्यन्तदानशब्देन निर्देशः परिक्रयार्थः ॥ ४८ ॥

तत्संस्तवाच्च ॥ ४९ ॥

उक्तार्थे साधकान्तरमाह । तदिति । तस्य चतुर्थीनिर्देशस्य संस्तवात् । एषा वै दर्शपूर्णमासस्य दक्षिणेति दक्षिणात्वेन स्तुतेः दक्षिणायाः परिक्रयार्थत्वं सिद्धं तथा ऽस्यापीति भावः ॥ ४९ ॥

भक्त्यार्थौ वा द्रव्ये समत्वात् ॥ ५० ॥

सिद्धान्तमाह । भक्तेति । भक्त्यर्थ एष विभागः । द्रव्ये इत्यनन्तरं स्वत्वाभावस्य द्वयोरिति शेषः । समत्वात् तुल्यत्वात् । अयं भावः देवतार्थं परिगृहीतद्रव्यस्य देवतायै निवेदितत्वेन स्वत्वाभावस्य द्रव्ये ऋत्विग्यजमानयोः तुल्यत्वात् । न च स्वत्वाभावे निर्देशो ऽपि न संभवतीति शक्यते वक्तुम् । तुलापुरुषदानादौ त्यक्तस्यापि द्रव्यस्य परस्परं कलहनिवृत्त्यर्थं यजमानकर्तृकविभागस्य दृष्टत्वेन तथा ऽत्रापि संभवादिति ॥ ५० ॥

व्यादेशाद्दानसंस्तुतिः ॥ ५१ ॥

दक्षिणात्वेन संस्तवादिति हेतुं निरस्यति । व्यादेशादिति । व्यादेशाच्चतुर्थ्या संप्रदाननिर्देशसाम्याद् निर्देशस्य दक्षिणात्वेन स्तुतिः । एष वै दर्शपूर्णमासयोरवभृथ इतिवत् । नैतावता परिक्रयः सिध्यतीति भावः ॥ ५१ ॥

इति जैमिमिसूत्रवृत्तौ तृतीयस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥

ध्रुवाज्यादिभिः शेषकार्याननुष्ठानम् । अधि० १ ।

आज्याच्च सर्वसंयोगात् ॥ १ ॥

स्विष्टकृदवदानं सर्वेभ्यो हविर्भ्य इति पूर्वं सिद्धत्वाद् आज्य-

स्यापि सर्वंहविरन्तःपातित्वादुपांशुयागशेषाद् ध्रुवाज्यादप्यवदेयमित्याह पूर्वपक्षम् । आज्यादिति । स्पष्टो ऽर्थः ॥ १ ॥

कारणाच्च ॥ २ ॥

हेत्वन्तरमाह । कारणादिति । देवा वै स्विष्टकृतमब्रुवन् हव्यं नो वह सो ऽब्रवीद् वरं वृणै भागो मे ऽस्त्विति वृणीष्वेत्यब्रुवन् सो ऽब्रवीद् उत्तरार्धादेव मह्यं सकृद् अवद्यादिति । यद्दैवतासंबन्धिहविःशेषो वृतः उपांशुयागहविरपि वहतीति कारणात् तस्याप्यवदानम् ॥ २ ॥

एकस्मिन् समवत्तशब्दात् ॥ ३ ॥

हेत्वन्तरमाह । एकस्मिन्निति । प्रायणीयेष्टा एकस्मिन् आदित्यचरुरूपैकहविषि समवत्तशब्दात् समवत्तशब्दश्रवणात् । अयं भावः एकस्मिन् हविषि केवलमवद्यतीति प्रयोगः । अनेकेभ्यो ऽवदाने समवद्यतीति प्रयोगः । प्रायणीये यद्येकस्यैव हविषः अवदानं तदा प्रायणीयेष्टिसमीपे अग्नये स्विष्टकृते समवद्यतीति न स्यात् । केवलमवद्यतीत्येव स्यात् । समवद्यतीति श्रवणाद् ध्रुवाज्यस्यापि अवदानं सिध्यतीति ॥ ३ ॥

आज्ये च दर्शनात्स्विष्टकृदर्थवादस्य ॥ ४ ॥

साधकान्तरमाह । आज्यइति । आज्ये ध्रुवाज्ये च स्विष्टकृदवदानं कार्यमर्थवादस्य दर्शनात् । अयं भावः । अवदायावदाय ध्रुवां प्रत्यभिघारयति स्विष्टकृते ऽवदाय न ध्रुवां प्रत्यभिघारयति न हि ततः परामाहुतिं यक्ष्यन् भवतीति अर्थवादेन ध्रुवायां स्विष्टकृदवदानात् प्राक् प्रत्यभिघारणानि स्विष्टकृदर्थानीति ज्ञायते । अतो ऽवदानं ध्रुवाज्यस्य ॥ ४ ॥

अशेषत्वात्तु नैवं स्यात् सर्वदानादशेषता ॥ ५ ॥

सिद्धान्तमाह । अशेषत्वादिति । नैवं स्याद् उपांशुयागशेषस्यावदानं न स्यात् । अशेषत्वाद् उपांशुयागशेषस्याभावात् । ननु ध्रुवा-

यामाज्यशेषो ऽस्त्यत आह । सर्वदानाद् उपांशुयागार्थं चतुरवत्तं जुहोतीत्यनेन प्राप्तचतुरवत्तस्य सर्वस्य हवनादशेषता सिद्धा । ध्रुवायां शेषस्तु अन्ययागार्थ इति भावः ॥ ५ ॥

साधारण्यान्न ध्रुवायां स्यात् ॥ ६ ॥

अशेषत्वमेव पुनरुपपादयति । साधारण्यादिति । यथा ऽऽग्नेयपुरोडाशो ऽग्नेरेव नान्यस्य तथा ध्रुवायामाज्यं विष्णोरेव न स्यात् । सर्वस्मै वा एतद्यज्ञाय गृह्यते यद् ध्रुवायामाज्यमिति सर्वसाधारण्यात् । यथा यत्रैकस्यां स्थाल्यां बहूनामोदनः शृतः तत्रैकस्मिन् भुक्ते अन्येष्व भुक्तेषु स्थालीस्थशेषं न स्वदासाय दातुमर्हति तथेति भावः ॥ ६ ॥

अवत्तत्वाच्च जुह्वां तस्य च होमसंयोगात् ॥ ७ ॥

ननु जुह्वामस्तु शेषः तत्राह । अवत्तत्वादिति । देवतोद्देशेन जुह्वामवत्तत्वात् तस्य सर्वस्य चतुरवत्तं जुहोतीति होमसंयोगात् तत्रापि न शेषसंभवः ॥ ७ ॥

चमसवदिति चेत् ॥ ८ ॥

ननु ऐन्द्रवायवं गृह्णातीत्यादिविधिना चमसादौ एकदेवतोद्देशेन ग्रहणे ऽपि चमसस्थद्रव्येण अनुवषट्कारः अग्नये हूयते तद्वद्द्विगुणत्वाद्यर्थमवत्तेन जुहूस्थेन स्विष्टकृद्धोमो ऽस्त्विति शङ्कते । चमसवदिति ॥ ८ ॥

न चोदनाविरोधाद्धविष्प्रकल्पनत्वाच्च ॥ ९ ॥

चमसदृष्टान्तं परिहरति । नेति । चमसे चोदनाविरोधात् सोमस्याग्ने वीहीत्यनुवषट्करोतीतिचोदनाविरोधादन्योद्देशेनावत्तद्रव्येणान्यस्य होमः । उपांशुयागे तथा न वचनम् । अपि च ऐन्द्रवायवं गृह्णातीति, आग्नेयः पुरोडाश इतिवत्केवलहविष्प्रकल्पनमात्रपरः । न ह्यखिलद्रव्यं होमसंयुक्तम् । अल्पं जुहोतीति, वचनेन शेषसद्भावात् । उपांशुयाजे च चतुरवत्तं जुहोतीति होमसंयुक्तमतो ऽपि वैषम्यम् ॥ ९ ॥

तिरिक्तविशिष्टायोगात् । द्वितीये कथं प्रत्यभिज्ञात्मकार्थक्रियाका- रित्वं निरन्तरस्वरूपं संज्ञात इति पक्षेऽपि प्रत्येकपक्षवन्नेन्द्रियान्त- रेण प्र*तिसिद्धिः स्यात्. अन्यथा रसादिष्वपि संहतेषु तत्प्रस- ङ्गात्. एतेन देशैक्यमेव संघात इत्यपास्तम् एकदेशान्वयिनां—चै- कालिकानामेव संघातत्वप्रसङ्गात्. देशोऽपि तदा तदभिन्न एवेति चेन्न क्षणभङ्गस्य निरसिष्यमाणत्वात्. न च ते देशा आकाशादि- रूपास्तस्य युष्माभिरावरणाभावादिमात्रत्वज्ञापनात्. न चोपादानरूपः स्पर्शरूपादीनां भिन्नभिन्नक्षणोपादानत्वाभ्युपगमात् एकोपादानत्वे तु तदेव द्रव्यं पृथिव्यादिदेशैक्यात्संघातत्वे तु तत्संघातस्यापि संघा- तान्तरापेक्षायामनवस्था अन्योन्याश्रयो वा. । त्वन्मते पृथिव्यादिः रूपादिसंघातातिरिक्तो न तथा पृथिव्यादेरपि देशैक्यं पृथिव्यादि- संघातातिरिक्तं न अतिरिक्तं चेत्पृथिव्यादेर्देशैक्येऽपि तद्देशसंघाता- तिरिक्तं पृथिव्यादिदेशानां देशान्तरैक्यमेव प्रयोजकं स्यात् एवं सत्यनवस्थेत्यर्थः । एवं च पृथिव्यादिसंघातप्रयोजकैकदेशानपेक्षायां तु रूपादेस्संहतत्वे पृथिव्यादिसंहतत्वमेव प्रयोजकं स्यात् पृथि- व्यादेस्संहतत्व तु रूपादेस्संहतत्वमेवेत्यन्योन्याश्रय इत्यर्थः ॥ अथ स्यात् गृहीतेन रूपेण पूर्वमेव स्पर्शोऽनुमितः तत्र दृष्टरूपानुमित- मेव स्पृशामीत्येव प्रतिसन्धानमिति चेन्न । द्वयोरेकाश्रयत्वग्रहण- मन्तरेण व्याप्तिग्रहणासम्भवादनुमानासिद्धेः । दृष्टे रूपे स्पृष्टे च स्पर्शे भेदाग्रहात् दृष्टमेव स्पृशामीति बुद्धिशब्दाविति चेन्न. भेदेनैव तयोर्गृह्यमाणत्वात् रसादिष्वपि प्रसङ्गाच्च. । ननु निर्विषयैवेयं प्रत्य- भिज्ञा वासनावशात्स्यादिति चेन्न. योगाचारनीत्या रूपादेरपि निह्नवप्रसङ्गात्. बाधाबाधाभ्यां विशेष इति चेन्न. स्वारसिकबाधा-

* प्रतिसन्धिरिति पु॰ पा॰ ।

दृष्टैर्यौक्तिकबाधस्य समत्वाच्च अतो रूपस्पर्शवदिदमिति मिथो भिन्नाविशेषणमेकं विशेष्यं सर्वलोकसिद्धं दुरपह्नवम्। यत्तु मतान्तरं स्पर्शमात्रस्वरूपो वायुः स्वलक्षणः तैजसादयस्तु द्वित्रिचतुःस्वभावाः अतस्तेजःप्रभृतीनां द्वीन्द्रियग्राह्यत्वमिति तदप्यसत्· एकस्यानेकस्वभावत्वायोगात् तदभ्युपगमे च जैनमतावतारात्· अनेकधर्मत्वे त्वस्मन्मतसिद्धेः। एकस्मिन्नेव रूपादिस्वभावभेदकल्पनेति चेन्न। सर्वथासिद्धस्य कल्पनायोगात् क्वचित्सिद्धौ द्रव्यवाद सिद्धेश्च। एतेन भेदोपलम्भाभावादभेदसिद्धिरिति प्रत्युक्तं विपरिवर्तस्यैव सुवचत्वात् न हि रूपमिदमिति घटादौ*क्वचित्प्रत्येति किन्तु तद्वदिति सहोपलम्भनियमादिति हेतुचतुष्टयं च निरसिष्यामहे† न च रूपादेर्धर्मिणश्च सहोपलम्भनियमः पीतशङ्खादिभ्रमे रूपमन्तरेण रूपिणस्तदन्तरेण तस्य चोपलब्धेः। न चान्यश्शङ्खस्तदानीमुत्पन्नः, नापि शङ्खरूपोऽयं पित्तविवर्तः स्पर्शनेन स एवायं शङ्ख इति गृहीतेः। एवं स्पर्शादावपि। यदि चासौ हेतुरङ्गीक्रियते किमपराद्धं सहोपलम्भनियमादभेदो नीलतद्धियोरिति वदद्भिः, अतस्सहोपलम्भनियमाद्धर्मधर्मिभेद एव सिद्ध्यति। किंच रूपस्पर्शयोस्सहधीनियमस्त्वयापि दुस्साधः अतस्तयोरयुगपदुपलम्भादभेदच सिद्धावेकस्य प्रत्यभिज्ञाविषयस्य ततोऽन्यत्वं ‡स्पष्टम्। यत्तदन्यच युष्माभिरुक्तम्।

अनुपप्लवभूतार्थस्वभावस्य विपर्यये।
न बाधो यत्नवत्त्वेऽपि बुद्धेस्तत्पक्षपाततः॥

* कश्चित्स्वर्चिठिति पु· पा·।
† निरसिष्याम इति वक्तव्ये आत्मनेपदं चिन्त्यम्।
‡ प्रस्पष्टमिति पु· पा·।

तदिह प्रतिसन्धेयम्. बुद्ध्यन्तराणि च तद्बाधकान्यभिन्नेन्द्रियजन्यान्याह. एकस्मिन्निति. आसन्नदेशे दृष्ट्वा दूरं गतस्याविशदा प्रत्यभिज्ञा दूरे दृष्ट्वा समीपं गतस्य तु विशदा एवं क्रमात् बहलविरलालोकादिवशादप्युभयथा ग्राह्या अल्पधर्मविशिष्टतया ग्रहणम् अविशदग्रहणं भूयोधर्मविशिष्टतया तु विशदग्रहणं न तु न्यूनाधिकदर्शनमात्रं तथा सति घटपटदर्शने घटमात्रदर्शने च विशदाविशदव्यवहारप्रसङ्गात् न चात्र रूपमेवाविशदं विशदं च भाति पीतशङ्खादिभ्रमे रूपान्तरवत्तया भातस्यापि तथा प्रत्यभिज्ञानात्. नापि परिमाणं तस्यापरमार्थस्य त्वयाऽनभ्युपगमात्. दूरे च परिमाणान्तरवत्तया वस्तुनः स्फुरणात् । अत एव नैकत्वसंख्या. दूरासन्नयोरेकानेकत्वबोधे तद्देवेति दर्शनात्. अत्रोत्तरेणादिशब्देन संशयविपर्ययधियोर्ग्रहणं संशयविपर्ययौ तावदधिष्ठानग्रहे विशेषाग्रहात् समानधर्मग्रहाच्च भवतः तथा दृष्टिनियमश्च नान्यथयितुं शक्यः ।

अधिष्ठानस्य कार्त्स्न्येन भाने ऽभाने च न भ्रमः ।
भाताऽभाताकृतिभिदा कथं निर्धर्मके भवेत् ॥

बाधकधीश्चाधिष्ठानातिरिक्ततदसाधारणधर्मविषया तत्स्वरूपग्रहस्यारोपासहत्वात् जिज्ञासा च नात्यन्तानुपलब्धे अदर्शनात् न च निश्शेषविदिते वेद्याभावात् अतस्तद्विषये विदिताविदिताकारकत्वं सिद्धं, तदिदं सर्वमभिप्रेत्य भिन्नाभिन्नवादिभिरप्युक्तम् ।

आविर्भावतिरोभावधर्मकेष्वनुयायि यत् ।
तद्धर्मि यत्र वा ज्ञानं प्राग्धर्मग्रहणाद्भवेत् ॥ इति ।

अत्रागृहीताशेषधर्मधर्मिग्रहणन्तु न मृष्यामहे ।
यत्तु बौद्धैरुक्तम् ।

धर्मोपकारशक्तीनां भेदे तास्तस्य किं यदि ।
नोपकारस्ततस्तासां तथा स्यादनवस्थितिः ॥
नानोपाध्युपकाराङ्गशक्त्यभिन्नात्मनो ग्रहे ।
सर्वात्मनोपकार्यस्य को भेदः स्यादनिश्चित इति ॥

तदपि मन्दम् अन्वयव्यतिरेकसिद्धकारणवैचित्र्यनिबन्धनस्वभावभेदवतामुपाधीनां परस्परव्यभिचारिवृत्तिनियतसामग्रीबोध्यत्वेन ग्रहणाग्रहणयोरुपपत्तेरिति । नन्वस्तु प्रतिसन्धानबलाद् द्वीन्द्रियग्राह्यं किञ्चित् तत्तु रूपरसाद्यात्मकमिति वा तदाश्रय इति वा न मृष्यामहे तेषामेवाभावात् एकस्मिन्नेव ग्राहकभेदात्तत्तद्धर्मधीः यथा मणिकृपाणदर्पणादिव्यञ्जकभेदान्मुखादेरणुत्वपृथुत्वमलिनत्वविमलत्वादिधीः सव्यदक्षिणविपर्यासश्चेति तमिमं पक्षं प्रतिक्षिपति नैकत्वेऽप्यक्षभेदाद्विदुर्रामिवेति । इह तावत्सर्वेषामसिद्धस्य कल्पनाऽनुपपत्तिरुक्ता । बाधकान्तरमाह । मिथ इति । चक्षुरादिग्राहकवैजात्यं हि ग्राह्याकारभेदात्कल्प्यते तदसिद्धौ कथं तद्ग्राहकभेदक्लृप्तिस्तदभावे च कथन्तत एव ग्राह्याकारभेदक्लृप्तिरिति इह तु मध्ये बुद्धिभेदप्रवेशेचक्रकम् । अस्तु कारणभेदादिन्द्रियभेदक्लृप्तिरिति चेन्न इन्द्रियवैजात्यव्यवस्थापकस्य तस्यानुपलम्भात् तत एव तत्क्लृप्तौ तच्चापि मिथस्संश्रयात् । ननु दर्पणादिग्राहकभेदाद् ग्राह्ये सव्यदक्षिणविपर्यासः पृथुत्वाणुत्वविमलत्वमलिनत्वकल्पना च दृष्टेति चेत्सत्यं दर्पणादेस्तद्धर्माणां च भेदेन दृष्टत्वात्तदधीनाध्यासभेदो यथादर्शनमङ्गीक्रियतेऽत्र तु न तथा अक्षेषु च ते बहिः कल्पनीयानां रूपादीनामसम्भवात् उपाधिज्ञाननिरपेक्षेयमौपाधिकभेदधीरस्तु मण्डूकवसाक्तदृष्टेर्वंशोरगबुद्धिवदिति चेन्न तत्तद्दोषशक्त्या तत्तद्भ्रान्तिभेदसिद्धेः कल्प्याकारस्य क्वचित्सम्भवाच्च चक्षुरादिस्वभावा एवाक्षापि रूपादिभ्रान्तिहे-

तवो दोषा इति चेन्न । सर्वकल्पनाधारे स्वलक्षयोऽप्यनाश्वासप्रसङ्गात् ततश्चेन्द्रियस्वभावभेदोऽपि दुर्वचः अधिष्ठानाकाङ्क्षायामपि बुद्ध्यैव चरितार्थत्वात् तथा चेन्द्रियस्वभावभेदोऽपि नापेक्ष्यः पूर्वपूर्वबुद्धिशक्तिभेदादेवोत्तरोत्तरविचित्रभेदोपपत्तेः । ननु स्पर्शनेन्द्रियस्यात्वातैर्भागभेदैः करतलप्रकोष्ठादिवर्तिभिरेकस्यैव दुरालभाः स्पर्शस्योल्लेखभेदा भवन्तीति चेन्न । स्पर्शस्यात्र भेदेनानुल्लेखात् दुरालभावयवानान्तु वह्निकणवच्छरीरमाविशतान्तद्विकृतिजनकत्वमात्रप्रदेशभेदेन विकृतितारतम्यं च वह्न्यादिभिरिव नानुपपन्नम् । ननु मनुष्यपशुमृगादीन्द्रियभेदाद्वृत्त्यादिष्वानुकूल्यादिवैपरीत्यं तत्तारतम्यं च दृश्यते । न च वस्त्वेवानुकूलप्रतिकूलस्वभावं विरोधात् सर्वेषामविशेषेण सर्वदोभयविधानुपलम्भात् अनेकान्तवादानभ्युपगमाच्च । एवं चक्षुरादिभेदाद्रूपादिभेदभ्रमस्स्यादिति तदपि न तत्तत्कर्मशक्तिवैचित्र्यात्तत्तदनुकूलत्वादिव्यवस्थोपपत्तेः वस्तुषु चानुकूलत्वप्रतिकूलत्वे सुखदुःखजनकत्वे एव तथाऽपि सुखदुःखे बुद्धिभेदावेव भवद्भिरपि *स्वीक्रियेते ततश्चात्र विषयभेदाद्धीभेदस्तस्मादेव च स इति प्रसङ्गः स्यादिति चेन्न । विषयभेदस्य स्वकारणाद्यधीनत्वात् तदुत्पाद्यबुद्धिभेदस्य तत्कारणत्वाभावाद् द्वयोरपि परस्परप्रतीतिनिरपेक्षप्रमाणसिद्धत्वाच्च एवमुपाधिभेदैरेकस्मिन्नेव ह्रस्वत्वदीर्घत्वधीनिदर्शनान्यपि नेतव्यानीति अत्रादिशब्देन पूर्ववत् संशयाद्यसम्भवो नीलपीतशीतोष्णमधुराम्लादिभेदासम्भवश्च गृह्यते । न हि नीलादिभेदेष्विन्द्रियभेदोपाधिकत्वं शक्यं वक्तुं रूपादिभेदमिथ्यात्वे तदन्तःपातिनीलादिभेदोऽपि मरीचिकावीचिकान्यायेन मिथ्यैव स्यादिति चेन्न । असिद्धस्यासिद्धेन दुस्साधत्वात् । मिथो निदर्शनेन साधने मिथस्संश्र-

* स्वीकृतावीति पु० पा० ।

यात् निदर्शनमात्रेण निश्शेषनिह्नवप्रसङ्गाच्चेति । तथाऽप्येकमनेकस्वभावमिति व्याहतमिति चेन्न । स्वरूपभेदस्यानभ्युपगमात् धर्मभेदस्याविरुद्धत्वात् ।

वेद्यहेतुफलाकारैर्भिन्नैरेका समेति धीः ।
तथा बाह्योऽपि दृष्टत्वाद्युगपत्क्रमशोऽपि नः ॥
प्रतिसम्बन्ध्यनेकत्वं यथा नैकस्य बाधकम् ।
तथा सम्बन्ध्यनेकत्वं स्वाभीष्टे च समत्वतः ॥

॥ इति द्रव्यसिद्धिद्रव्याद्वैतभङ्गौ ॥

एवमेकाश्रयानेकदृष्टयन्यतरनिन्हवार्थिनौ पुनरपि धर्मधर्मिभावभङ्गमुखेन प्रवृत्तौ प्रतिहन्येते अन्यथा अन्तस्तद्धर्मापदेशादित्याद्यनिरूढप्रायं स्यात् । नन्वनुमानं प्रमाणमिच्छन्न धर्मधर्मिभावं बाधितुमर्हति तस्य हेतुसाध्यधर्माश्रयावश्यम्भावात् आह च धर्मकीर्तिर्हेतुबिन्दौ ।

पक्षधर्मस्तदंशेन व्याप्तो हेतुस्त्रिधैव सः ।
अविनाभावनियमाद्धेत्वाभासास्ततः परे ॥ इति ।

अन्योऽपि ग्राह्यधर्मस्तदंशेन व्याप्तो हेतुरिति सत्यम् काल्पनिकहेतुसाध्यधर्मद्वारा अनुमानप्रवृत्तिः पारम्पर्येण तु स्वलक्षणविश्रान्त्या भाक्तमनुमानप्रामाण्यमिति हि बौद्धानां रहस्यम् तत्त्वगत्या चतुर्विधानामपि तेषां धर्मधर्मिभावःचेप्यः अतस्तद्भङ्गमनूद्य प्रत्याह धर्म इत्यादिना ।

मू० धर्मानिर्धर्मकश्चेत्कथमिव भविता सोऽभिलापादियोग्यो धर्मेणान्येन योगे न च भवति तथेत्यव्यवस्थेति चेन्न ॥ कश्चिद्धर्मोऽपि धर्मी स्फुटमतिमथने स्वान्यनिर्वाहकत्वं

तन्निष्कर्षप्रयोगेष्वपि भवति पुनस्तस्य धर्मी विशेषः ॥ ९ ॥

अयमर्थः यस्त्वया कश्चिद्धर्म इष्यते स निर्धर्मकः सधर्मको वा आद्ये तस्य शब्दवाच्यत्वं न स्यात् अविशिष्टस्य व्युत्पत्त्याद्यगोचरत्वात् सर्वेषामी शब्दानां विशिष्टविषयत्वं च भवतां भाष्यादिषूक्तम् । द्वितीये तु येन धर्मेण धर्मः सधर्मकः सोऽपि पूर्ववद्धर्मान्तरेण धर्मी स्यादित्यपरापरापेक्षायामनवस्था द्वित्रादिपर्वमात्रे विश्रम इति व्यवस्थाभावात् धर्मत्वञ्च धर्माणामभावः अतस्तस्यापि धर्मत्वं वाच्यम् । न चेत्तस्यात्मैवात्माश्रयात् न चान्यत् अनवस्थानादेवेति चेत् तन्न सर्वेषां धर्माणां निर्धर्मकत्वानङ्गीकारात् कश्चिद्धर्मोऽपि धर्मी स्प*ष्टं स्फुटदृष्टं हि नापन्होतव्यम् त्वयाऽपि हेतुसाध्यादिधर्माणां पक्षधर्मत्वादिधर्माः स्वीकार्याः अन्यथाऽनुमानासिद्धौ क्षणभङ्गादिसाधनायोगात् । अतिमथने अत्यन्तचर्चायाम् । यद्वा स्फुटमतिमथने विशदबुद्ध्या सावधानं विमर्शे सतीत्यर्थः । स्वान्यनिर्वाहकत्वं स्वपरव्यवहारादिव्यवस्थापकत्वम् । यत्र ह्यनवस्थाभयाद्धर्मान्तरं नेष्यते तत्र निमित्तान्तरनिरपेक्षौ तद्व्यवहारौ यथा गोशब्दस्य व्यक्तिवृत्तावित्थम्भावभूतं गोत्वं निमित्तम् गोत्वे तु न निमित्तान्तरमपेक्षते आनन्त्यव्यभिचाररूपानुपपत्त्यभावात् एवं शुक्लादिशब्देष्वपि । ननु गोः शुक्ल इत्यादिविशेष्यपर्यन्तोक्तौ तथा स्यात् क्वचिद्गुणमात्रविषयेषु शुक्लादिशब्देषु भावप्रधानेषु द्व्येकयोरित्यादिषु त्वतलाद्यन्तेषु जातिर्गुणः क्रियेत्यादिषु च वाच्यानां तत्तद्धर्माणामिदन्त्वेन निर्देशादित्यम्भावसापेक्षत्वे ऽनवस्था अनपेक्षत्वे त्विदमित्थमिति हि सर्वा प्रतीतिरिति भाष्यादिवि-

* स्फुटमिति पु॰ पा॰ ।

रोध इत्यत्राह तन्निष्कर्षप्रयोगेष्वित्यादि। अयं भावः उदाहृतेषु नियतिनियतनिष्कर्षकशब्देषु जातिगुणादेः प्रधानतया निर्देशेऽपि सन्ति केचिद्यथाप्रमाणमित्थम्भावाः त्वयाऽपि हेतुसाध्या*दिधर्माणां पक्षधर्मत्वादिधर्माः स्वीकार्याः अनवस्था च कथञ्चिदुपशमनीया स्वीकृतञ्च संवेदनसंवेदने शब्दशब्दादौ स्वपरनिर्वाहकत्वम्। न चात्र कर्मकर्तृविरोधः स्वोत्पादकत्वादाविव पौर्वापर्यादिवैगुण्याभावात्। किञ्च स्वलक्षणादीनां जात्यादीनाञ्च संवृत्तिसिद्धानां निर्धर्मकत्वे ऽपि कथञ्चिदभिलापार्हत्वम् त्वयाऽपि ग्राह्यमन्यथा तत्तत्संव्यवहारेण कथादिप्रवृत्त्ययोगात् अतो निर्धर्मकं शब्दवाच्यं न भवतीति स्वसिद्धान्तविरोधः स्ववचनव्याघातश्च। आस्तामेतत् समानाधिकरणस्येव व्यधिकरणस्यापि व्यावर्तकत्वादित्थम्भावत्त्वं सिद्ध्यति तथा च नियतनिष्कर्षकप्रयोगेष्वप्येतेषु धर्मी धर्मं विशिनष्टि यथा पटस्य शौक्ल्यं खण्डस्य गोत्वमित्यादिषु धर्मिविशेषो धर्मस्य स्वेतरनिष्ठाद्व्यावृत्तिधीहेतुरित्यर्थः। न चात्र मिथः संश्रयः विशेषणविशेष्यधियोस्तद्व्यवहारयोश्च मिथो जन्यत्वाभावात् निष्कर्षानिष्कर्षव्यवहारयोश्च विवक्षाभेदायतत्त्वात् उभयथा व्यवहारस्य सर्वत्र सर्वैरपि दुरपह्नवत्वात्। यश्चात्र समानाधिकरणप्रयोगे विशिष्टत्वेनावस्थितोऽप्यर्थतः स्वधर्ममन्यनिष्ठाद् व्यवच्छिनत्ति स एव पटस्य शौक्ल्यमित्यादिप्रयोगे गुणीभवन् कण्ठोक्तेन स्वसम्बन्धेन विशिनष्टि गोत्वं शौक्ल्यमित्यादिपदेष्वपि तस्य भावस्त्वतलावित्यादिविहिततद्धिताश्रयवाच्यत्वेन धीस्थ एवार्थो निष्कृष्यमाणः स्वविशेषणनिरूपकतया ऽनुशिष्यते एवं विशेष्यस्यैव द्विधा विशेषणयोग इति व्यञ्जनाय पुनः शब्दो नि-

* साध्यादीनामिति पु॰ पा॰।

Because—

14—15. There is no other procedure save that of suggestion in an issue—cognisable through the (indicative) word alone (*i. e.* not by inference)—for the comprehension of which one has recourse to Indication.

Reasons given.

[*Page* 53.] Where, for the fulfilment of the motive, a word is indicatively used, there is no other knowledge save that from the word alone; and the procedure too is no other than that of suggestion.

Because—

15 *contd.* It cannot be *Denotation*, in the absence of convention.

It cannot be denotation.

In "the ranch in the Gangā," the properties of 'sanctity,' &c. are known to exist in the *bank* and to these properties, the word *Gangā* is not applied by convention.

15 *contd.* Nor can it be *Indication*, for want of causes.

It cannot

The three causes mentioned above (in Kārikā 9)—the preclusion of the primary meaning, &c.

[*Page* 54.] Because—

16.—The indicated (meaning, 'bank') is not the primary (meaning of the word 'Gangā')—nor is it (the 'bank') barred (with reference to the 'ranch')—nor is there any connection (of the indicated object, 'bank') with the issue (the motive, *sanctity*)—nor is in that (*i. e.* in the indication of the motive 'sanctity' by the indicated object, 'bank') any purpose—nor lastly is the word itself incapable (of giving sense).

Why not indication?

In the example, 'Ranch in the Gangā,' the word, 'Gangā' having its primary meaning of 'stream' barred, indicates the 'bank'; similarly if the meaning of 'bank' also were barred with

reference to me 'ranch,' then alone would the indicated object ('bank') again indicate the motive ('sanctity,' etc.). And again 'bank' is not the primary meaning (of the word 'Gangā') nor is it barred; and *secondly* there is no relation between 'bank,' the indicated meaning of the word 'Gangā,' and the motive, 'sanctity' (to be indicated); *thirdly* there is no motive for the indication of the motive ('sanctity'); *fourthly* and lastly the word 'Gangā,' by itself, is not incapable of signifying the motive 'sanctity', as it is, of signifying 'bank' (without the three causes of Indication above mentioned).

Indication leads to *regressus ad infinitum.*

17.—If such be the case, there would result the fault of *regressus ad infinitum*, which would strike at the very root of the theory.

'If such be the case, *i. e.* if motive also were indicated;—in that case we would require another motive (for the indication of the first motive)—for which again, we must have another; and so on *ad infinitum;* and this fault of *endlessness* would do away with the theory here propounded.

[*Page* 56.] *Objection.*—Let the 'bank,' together with the property of 'sanctity' be the meaning indicated,—the motive in this case being the greater amount of knowledge derived than that by saying 'ranch on the bank of the Ganga'; and as such the Indication would lie in the qualified object (*sacred bank*); and so leave no room for suggestion (with reference to 'sanctity'). The author replies—

Motive does not accompany the indicated meaning.

17 *contd.* It is not proper to make the motive accompany the indicated meaning.

He gives reasons—

Reasons.

18.—As the object (of cognition), so also its issue (or result), is different from the cognition itself.

The object of perception is *blue*; whereas the consequence of the perception is the cognisability (a property of the object cog-

nised—this according to the Mīmāmsakas), or the consciousness of the cognition as one's own (a property of the cogniser—this according to the Naiyāyikas). [Hence, as the fact of the object and issue of perception being different from the perception itself is clear enough; so from the knowledge derived through indication its issue, the knowledge of 'sanctity' is certainly distinct.]

Indication not applying to *qualified* objects.

18 *contd.* [*Page* 57.] Therefore Indication does not apply to the qualified object.

This is explicit.

Properties apply after indication.

18 *contd.* Special properties apply to the object only after it has been implied by indication.

The properties, 'sanctity,' etc. of the bank, are cognisable through a process (of comprehension) which is neither *Denotation* nor *Import*, nor *Indication*; and hence this process must necessarily be accepted as being that expressed by such words as *Suggestion, Echo, Illumination* and the like.

[*Page* 58]. Thus has been described the suggestion based on Indication.

The author next describes suggestion based on *Denotation*:

Suggestion based on Denotation defined.

19.—The expressiveness (i. e. the direct denotation) of a word with several meanings being barred through *connection* and other causes, the process which implies a meaning, not directly denotable by the word, is called *Suggestion*.

(As declared by Bhartrihari in his *Vākyapadīya*):

The different causes of suggestion.

"The causes, of the comprehension of special properties, when the denotation of the word is uncertain, are: *connection* (sañyoga), *separation* (viprayoga), *association* (sāhcharya), *enmity* (virodhita) *sense* (artha), *context* (prakaraṇa), *mark* or *power* (linga), *proxi-*

mity to another word, capability (sāmarthya), *propriety* (auchitī) *place* (desa), *time* (kāla), *gender* (vyakti) and *accent* (swara) and the rest."

To exemplify these in order: (1) In "Hari wielding the conch and the disc" (सशङ्खचक्रो हरिः,) *Hari* refers to Vishṇu, through *connection;* and hence does "Hari without the conch," etc., also refer to Vishṇu (through *separation,*—these being possible only of those between whom there has been connection). (2) In "Rāma and Lakshmana" *Rāma* refers to the son of Dasaratha (through *association* with Lakshmana). (3) In "Their behaviour towards each other is as between Rāma and Arjuna"—*Rāma and Arjuna* refer respectively (through *enmity*) to Parasurāma and Kārtavīrya. (4) In स्थाणुं भज भवच्छिदे ("Worship Sthāṇu for the removal of the myseries of metempsychosis"),—*sthāṇu* refers to Siva (through *sense,* for the said worship cannot apply to a pole). (5) In 'Deva knows everything'—'Deva' stands for the second person Pronoun (through *context*). (6) In "Angry Makaradhwaja"—the last word refers to Kāma (through the mark of anger). (7) In "Of God, the destroyer of cities"—'God' refers to Siva (through proximity to "the destroyer of cities"). (8) In "The Cuckoo intoxicated with madhu"—the last word refers to the *spring* (through *capability* belonging to spring alone of intoxicating the bird). (9) "In Drink the face of the beloved,"—the first word signifies *confrontation* (through *propriety*). (10) In "Parameswara shines here"—the first word refers to the king addressed (on account of the "place" spoken at, being the Capital of a King.) (11) In "Chitrabhānu shines"—the first word signifies the *Sun,* when the sentence is spoken in the day; and *fire* when at night (through *time*). (12) In "Mitra is glorious"—the first word having a neuter affix signifies *friend,* and having the masculine, it signifies the *Sun* (through *gender*). (13) In (*a*) "Indra-Çatru"—when occurring in the Veda, and not in general literature, *accent* is the means of the knowledge of special meanings.

(*a*)—The accent being on the first syllable, the compound becomes Bahuvrihi, meaning 'one whose killer is Indra'; but when the accent is on the second syllable, it becomes, the 6th Tatpuruṣa compound giving the meaning 'the killer of Indra.'

[*Page* 62.] "*The rest*" implies *gestures* and the like.

To exemplify—

"Her breasts are of this size (with the proper gesture); her lotus eyes so large; so tall her form; in so many days (*i. e.* years).

[*Page* 63.] Thus the diverse denotations of a word being barred by *connection* and the rest, the application of the word to a different meaning, is not through Denotation—this having been barred; nor through indication—since there is none of the three causes of Indication; consequently the procedure must be one of *suggestion.*

To exemplify (word—suggestion based on denotation):

Bhadratmanō duradhirōhatanorviçāla—
Vañçonnateh kṛtaçilīmukhavigrahaçca.
Yasyānupaplutagateh paravāraṇasya
Danāmbusekasubhagah satatañkaro' bhūt.

["The hand (the trunk) of the suppressor of foes (a gigantic elephant) becomes wet with the water of gifts (the flow of juice from the temples)—he the good-souled (belonging to the species of elephants called *Bhadra*), whose body is irrepressible (unmountably tall), of illustrious family (tall as a bamboo), skilled in archery (having quite a swarm of black-bees hovering round him), and possessed of a lucid intellect (of steady and unimpeded motion)]."

Suggestive Word.

20.—[*Page* 66.] The word with that is called *Suggestive*.

'With that'—*i. e.* with '*Suggestion*' (of the last Kārikā).

Meaning Auxiliary to Suggestion.

20. *contd.* Because a word, having a different meaning (from the denoted) is so, meaning also is said to be Suggestive, as being auxiliary to it (the word).

Is so—*i. e.* is suggestive.

Thus ends Chapter II of the *Kāvya-prakāça*, in which are determined the forms of Word and Meaning.

* The sense implied by suggestion is thus explained by the commentators: "Though the epithets 'Bhadrātmanah, etc.' have their denotations confined, through *context*, to the king, yet the recognition herein of the description of an elephant (logically quite compatible), is through *suggestion*."

CHAPTER III.

DETERMINATION OF THE SUGGESTIVENESS OF MEANING.

21.—[*Page* 67.] The Meanings of words have been mentioned before (in Kārikā 6.)

"*Meanings*"—viz. the Expressed, the Indicated, and the Suggested. "*Of words*"—viz. the Expressive, the Indicative, and the Suggestive.

The Suggestiveness of Meanings.

21. *contd.* Next is described the Suggestiveness of meanings.

This "Suggestiveness" is defined:

Suggestion defined.

21—22. Suggestion is the process (of implication) giving rise to the comprehension, by intelligent persons, of a signification of the meaning other than the direct one—such implication being based on the special character of (1) the Speaker, (2) the Object described (as well as the person spoken to), (3) Emphasis, (4) Occasion (or Context), (5) Place, and (6) Time, etc.

"*Meanings*"—being either the Exprêssed, or the Indicated or the Suggested.

The Suggestion due to the special character of the speaker, etc. exemplified. (1) Of the Speaker.

Examples of the above: (1) "Having walked fast to this place with this heavy water-jar, I am tired and weakened by profused perspiration and forced breathing."

In this, the speaker (a bad character tries to explain away the marks on her body (produced by secret dalliance), as being due to the hard physical work—the carrying of the heavy water-jar.

(2) Of the Object described.

(2) [*Page* 69] "Ah! My friend, thou art being troubled with sleeplessness, weakness, anxiety, lassitude and forced breathing, for the sake of me unfortunate!"

[*Page* 70]. Here, the dalliance of the go-between with the speaker lady's lover, is suggested.

(3) Of Emphasis.

(3) "Having seen the daughter of the *Pānchalas* so disgracefully molested in the Assembly of Kings,—(having had such hard time of) our life in the forest, in the company of fowlers, clad with the bark of trees,—and our residence at Virata's Court, rendered *incognito* by improper means—having witnessed all this, our Chief views with disfavour, not the Kurus, but—myself, distressed and stricken down as I am." [Veṇī-Sanhāra—Act. I].

[*Page* 71]. Here the meaning that 'disfavour is due towards the Kurus and not towards myself' is implied by emphasis, (i. e. the change of intonation towards the end of the sloka).

The Emphasis here does not form part of the full signification of the expressed meaning; and as such, the above cannot be said to be an example of subordinate suggestion. (*a*) Because, the expressed meaning could be got at merely by means of a question belonging to (i. e. suggested by) the Emphasis. [And as such the change in the intonation is not necessary for the denotation of the direct meaning.]

(4) Of Sentence.

(4) "Erewhile you never moved your eyes, fixed on my cheek; now though I am the same, and those the very cheeks, that look of thine has disappeared!"

[*Page* 72]. Here, the suggested meaning is this:—'Thy look bore quite another aspect when directed towards my friend's face reflected in my cheek; now that she is gone, it has altogether changed its character. Hence, thou art a wily lover (playing pranks with me).'

(5) Of Expressed Meaning.

(5) "This place on the banks of the Narmadá' is exuberant with lines of plantain trees, and is so situated as to enable the exquisite beauty

(*a*) The *Vivaraṇa* thus explains: "The Emphasis can be subordinated to the Expressed Meaning—not by a complete overthrow of the suggestion,—but by introducing a question—'does he bear, etc.?'—by which latter only, the Expressed Meaning could be got at; and the suggestion would then follow in due course. Where then is there any ground for subordinate suggestion?"

of the bower to add to the effects of the sportive graces of lovely women ; and in this place—O thou lovely and delicate one !—are blowing breezes favourable to dalliance, and in front of which is flitting the Mind-born (Cupid) flurried with causeless (spontaneous) excitement."

Here the meaning suggested is: 'Let us enter the bower for dalliance.'

(6) Of Proximity to another.

(6) [*Page* 74]. "My cruel mother-in-law is always directing me to manifold household duties ; if I get any respite at all, it is in the evening."

Here it is suggested to the paramour, not directly addressed that evening is the assigned time (of meeting).

(7) Of Occasion.

(7) "I hear your husband will be here within three hours ; such being the case, what are you waiting for ? You must make your preparations."

[*Page* 75]. Here, a woman is warned by her *confidant* that under the mentioned circumstance, it would not be safe for her to visit her paramour (to whom she had made engagements before the arrival of her husband was announced.)

(8) Of Place.

(8) "You, my friends ! collect your flowers in some other place, and let me have (my share) here ; I am unable to wander far, so please do me this favour, I beseech you with joined hands !"

Here, a certain woman implies to her *confidant* that the place being solitary, it was time for her to usher in the paramour *incognito*.

(9) Of Time.

(9) [*Page* 76] "My love ! subject as you are to the commands of your superior, what shall I tell you ! unhappy wretch that I am ! If you are determined to go to day, you may go. You will hear what is going to be done (by me)."

Here the meaning implied is : 'This being spring time, if you have to go away, I shall be no more, and as such shall know nothing of your whereabouts.'

विधिष्वि"ति, ततः किमित्यत्राह "तदन्तर्गतानी"ति, न च शक्त्यशक्ती तस्य निबन्धनमिति, न ह्यृत्विजाऽन्येन क्रियमाणमन्येन कर्त्तुमशक्यं, तस्माद्वचननिबन्धनं गोदोहने एककर्तृकत्वमित्यर्थः । अङ्गत्वे सति हि ऋत्विक्कर्तृकत्वं नेदमङ्गमित्याह "यद्यपी"ति, परिहरति "तथाऽपी"ति, ऋत्विक्कर्तृककर्मोपयोगित्वेन प्रोक्षणादिवदिदमपि ऋत्विक्कर्तृकम् अप्यप्रायन्यायादित्यभिप्रेत्याह "क्रत्वधिकृते"ति यदेव विद्ययेति ऋत्विक्कर्तृककर्मणो वीर्यवत्तरत्वसाधनभूताया विद्यायाः कर्त्रपेक्षायामन्तरङ्गबहिरङ्गन्यायेनासत्त्वर्त्विक्कर्तृकत्वं युक्तमिति न्याय्यमिति न्यायोपेता विद्यया करोतीति वाक्यस्वारस्याच्चोद्गीथाद्युपासनानि ऋत्विक्कर्तृकाणीत्यर्थः । एवं विद्ध वै ब्रह्मा यज्ञं यजमानं सर्वांश्च ऋत्विजोऽभिरक्षति तस्मादु ह वैवं विदुद्गाता ब्रूयात् कं ते काममगायानीत्यादिवाक्यैर्ऋत्विक्कर्तृकवेदनफलस्य यजमानगामित्वप्रतिपादनं च हेतुतयाऽनुसन्धेयं तस्य न्यायसिद्धार्थानुवादरूपत्वात्तन्मूलयुक्तिमात्रमेवोक्तं भाष्ये, दहरादिषु फलिकर्तृकत्वे कोविशेष इत्यत्राह "दहरादि"ष्विति, ऋत्विक्कर्तृकत्वाश्रवणं वैषम्यमित्यर्थः । तच्छ्रवणमन्यत्र फलिकर्तृकत्वस्यापवादकम् ॥ स्वाम्यधिकरणं समाप्तम् ॥ सू० सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ४६ ॥ पूर्वं यज्ञादिः शमादिश्च विद्यासहकारी निरूपितः, इदानीं सहकार्यन्तरं निरूप्यत इति सङ्गतिः, अधिकरणान्तराणि तु सङ्गतिविशेषप्राप्तानि मननस्य प्रवृत्तिरूपत्वेऽपि ध्यानालम्बनशुभाश्रयगोचरत्वेनातद्गोचरेभ्योयज्ञादिभ्यः शमादिभ्यश्च विलक्षणत्वादतद्गोचरत्वसाधर्म्येण यज्ञादीन् शमादींश्च निरूप्य पश्चान्मननं निरूप्यते शुभाश्रयगोचरत्ववैलक्षण्याद् यज्ञादेः शमादेश्च मध्ये निरूपणाभावः विद्यासहकारित्वसाम्यात् तदुभयतदनुबन्धिचिन्तानन्तरं निरूपणं प्राप्तमित्युक्तं भवति, किमस्मिन् वाक्ये मौनं विधीयते? उतानूद्यत इति? किं पाण्डित्यमेव मौनम्? उतार्थान्तरं मननरूपमिति, किं मननं विधातुं योग्यम्? उत नेति? किं मननस्य यज्ञादिश्रुतिविरोधोऽस्ति? उत नेति? किं मननं कर्मानुष्ठानप्रतिक्षेपकम्? उत नेति? स्वप्रकरणे प्रकरणान्तरे च कतिप-

याश्रमधर्मानुक्तिर्मननस्य कर्मानुष्ठानप्रतिक्षेपकत्वमुपोद्बलयति? उत ने?ति, किं कतिपयोक्तिरनुक्तानादरमूलैव स्यात्? उतानुक्तप्रदर्शनार्था च स्यादिति, यदा कतिपयोक्तिरनुक्तानादरमूलैव स्यात् तदानीं तत्तत्प्रकरणभेदेन सर्वाश्रमधर्माणामनुक्तत्वाविशेषादनादरगर्भा तदनुक्तिर्मननस्याश्रमधर्मप्रतिक्षेपकत्वमुपोद्बलयतीति तत्प्रतिषेधकत्वे मननस्य यज्ञादिश्रुतिविरुद्धतया विधातुमयोग्यत्वान्मौन-शब्दो मननपरत्वायोगेन प्राप्तपाण्डित्यानुवादीति मौनमनूद्यत इति फलं स्यात्, यदा कतिपयोक्तिरनुक्तप्रदर्शनार्थाऽपि भवेत् तदानीं तत्तत्प्रकरणभेदेनाश्रमधर्माणामनुक्तत्वाविशेषेऽप्यनुक्तेरनादरगर्भत्वाभावात् तदुक्तिर्मननस्याश्रमधर्मप्रतिक्षेपकत्वं नोपोद्बलयतीति मननस्य तदप्रतिक्षेपकतया यज्ञादिश्रुतिविरोधाभावेन विधातुं योग्यत्वान्मौन-शब्दो न वाक्यान्तरप्राप्तपाण्डित्यानुवादीति मौनस्य विधेयत्वं फलं स्यात् ॥

सू० तद्वतो-विद्यावतः विध्यादिवद्विधीयत इति विधिर्यज्ञादिः सर्वाश्रमधर्मः शमदमादयश्च विधि-शब्देनोच्यन्ते, आदि-शब्देन श्रवणमनने गृह्येते, सहकार्यन्तरविधिरित्यत्रापि विधीयत इति विधिः सहकार्यन्तरं विधिश्चेति सहकार्यन्तरविधिः, एतदुक्तं भवति यथा तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेनेत्यादिना शान्तो दान्त इत्यादिना च सहकारी यज्ञादिः शमदमादिश्च विधीयते, यथा च श्रोतव्यो मन्तव्य इति श्रवणमनने चार्थप्राप्ते विद्यासहकारित्वेन गृह्येते, तथा तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्येत्यादिना पाण्डित्यं बाल्यं मौनमिति त्रितयं विद्यायाः सहकार्यन्तरं विधीयत इति, मौनं च पाण्डित्यादर्थान्तरमित्याह-

टी० तद्वतो-विद्यावतः तृतीयं मौनं सहकार्यन्तररूपोविधिः सहकारित्वेन विधेयं यज्ञदानशमदमादिवत् पक्षेण प्रकृष्टमननशीले व्यासादौ

प्रयोगदर्शनादिति सूत्रार्थः । मौनपाण्डित्यशब्दयोर्ज्ञानार्थत्वादिति मौन-शब्दस्य मननार्थत्वान्मननस्य श्रवणप्रतिष्ठार्थज्ञानविशेषरूपत्वात् पण्डित-शब्दस्य तद्विषयतया प्रसिद्धेश्च मौनपाण्डित्यशब्दयोर्ज्ञानार्थत्वं तद्वत इति व्याख्येयं पदं, विधि-शब्दं व्याचष्टे "विधीयत"इति, पदार्था उक्ताः। अथ सूत्रस्य वाक्यार्थमाह "एतद्धि"ति, सू० कृत्स्नभावात्तु गृहिणोपसंहारः ॥ ४७ ॥ मौनवदितरेषामप्युपदेशात् ॥ ४८ ॥ एवंविधमौनोपदेशात् सर्वषणाविनिर्मुक्तस्य भिक्षाचरणपूर्वकमौनोपदेशवदित्यर्थः । परे तु विद्या-सहकारिणोमौनस्य बाल्यपाण्डित्यवद्विधिः गार्हस्थ्यम् आचार्यकुलं मौनं वानप्रस्थमिति प्रयोगात्, मुनि-शब्दस्य चतुर्थाश्रमपरत्वव्यवच्छेदायाह 'तृतीय"मिति, तृतीयमिदं मौनं ज्ञानातिशयरूपमित्यर्थः, विद्यावत्त्वे प्राप्तात्येवातिशयः किं विधिनेत्यत्राह–

सू० पक्षेणेति मुनि-शब्दस्य पक्षेण प्रकृष्टमननशीले व्यासादौ प्रयोगदर्शनान्मौनं पाण्डित्यबाल्ययोर्द्वयोस्तृतीयं यद्यप्यथ मुनिरित्यत्र विधिप्रत्ययो न श्रूयते तथाऽपि मौन-स्याप्राप्तत्वात् विधेयत्वमङ्गीकरणीयम्, अथ मुनिः स्यादिति इदं च मौनं श्रवणप्रतिष्ठार्थान्मननादर्थान्तरभूतमुपासनालम्बनस्य पुनःपुनः संशीलनं तद्भावनारूपं, तदेवं वाक्यार्थः ब्राह्मणो विद्यावान् पाण्डित्यं निर्विद्योपास्यं ब्रह्मतत्त्वं परिशुद्धं परिपूर्णं च विदित्वा श्रवणमननाभ्यां प्राप्तं वेदनं प्रतिलभ्येत्यर्थः, तच्च भगवद्भक्तिकृतसत्त्ववि-वृद्धिकृतं यथोक्तं नाहं वेदैरित्यारभ्य भक्त्या त्वनन्यया शक्यो ज्ञातुमिति, श्रुतिश्च "यस्य देवे परा भक्तिः, नायमात्मा प्रवचनेन लभ्य इत्यादिका, बाल्येन तिष्ठासेत् बाल्यस्वरूपं चानन्तरमेव वक्ष्यते, बाल्यं च पाण्डित्यं च

र्निर्विद्याथ मुनिः स्यात् बाल्यपाण्डित्ये यथावदुपादाय परिशुद्धे परिपूर्णे ब्रह्मणि मननशीलो भवेन्निदिध्यासनरूपविद्याऽऽवाप्तये एवं चिन्तयोपादानेनलब्धविद्यो भवतीत्याह अमौनं मौनं च निर्विद्याथ ब्राह्मण इति, अमौनं मौनेतरसहकारिकलापः तं च मौनं च यथावदुपाददानो विद्याकाष्ठां तदेकनिष्ठ्याख्यां लभतेत्यर्थः, स ब्राह्मणः केन स्यादित्युक्तादुपायात्किमन्योऽप्युपायोऽस्तीति पृष्टे येन स्यात्तेनेदृश एवेति येन मौनपर्यन्तेन ब्राह्मणः स्यादित्युक्तं तेनैवेदृशः स्यात् न केनाप्यन्येनोपायेनेति परिहृतम्, अतः सर्वेष्वाश्रमेषु स्थितस्य विदुषो यज्ञादिस्वाश्रमधर्म्मवत् पाण्डित्यादिकं मौनतृतीयं विद्यायाः सहकार्यन्तरं विधीयते। अथ स्यात् यदि सर्वेष्वाश्रमेषु स्थितानां विदुषां तत्तदाश्रमधर्म्मसहकारिणी मौनतृतीयसचिवा विद्या ब्रह्मप्राप्तिसाधनमुच्यते कथं तर्हि छान्दोग्ये अभिसमावृत्त्य कुटुम्बे शुचौ देश इत्यारभ्य स खल्वेवं वर्त्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्त्तत इति यावदायुषं गार्हस्थ्यधर्मेण स्थितिदर्शनमुपपद्यत इत्यत्राह—

सू० कृत्स्नभावात्तु गृहिणोपसंहारः ॥ ४१ ॥

तु—शब्दश्चोद्यं व्यावर्त्तयति ।

टी० "पक्षेणे"ति, यस्मिन् पक्षे भेददर्शनप्राबल्यात् विद्योपक्रमदशायामेकत्वज्ञानस्य नातिशयः तस्मिन्नेव विधिः दर्शपौर्णमासविध्यादावङ्गविधिवत् मोक्षाश्रमे बाल्यादिप्रधानेऽपि छान्दोग्ये गृहिणोपसंहारः कथमित्यत्राह—

सू० कृत्स्नभावात्-कृत्स्नेषु भावात् कृत्स्नेष्वाश्रमिषु विद्यायाः सद्भावात् गृहीणोऽप्यस्तीति तेनोपसंहारः, तस्मात्सर्वाश्रमधर्म्मप्रदर्शनार्थाग्रहिणोपसंहार इत्यभिप्रायः, तथैतस्मिन्नपि वाक्ये ब्राह्मणः पुत्रेषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथभिक्षाचर्य्यं चरतीति पारिव्रज्यैकान्तधर्म्मं प्रतिपाद्य तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्येत्यादिना पारिव्राज्यधर्म्मस्थितिहेतुकमौनतृतीयसहकारिविधानं प्रदर्शनार्थमित्याह-

सू० मौनवदितरेषामप्युपदेशात् ॥ ४८ ॥

सर्वैषणाविनिर्मुक्तस्य भिक्षाचरणपूर्वकमौनोपदेशः सर्वेषामाश्रमधर्म्माणां प्रदर्शनार्थः, कुतः एवं विधमौनोपदेशवदितरेषामाश्रमिधर्म्माणामपि त्रयोधर्मस्कन्धा इत्यारभ्य "ब्रह्मसंस्थोऽमृतत्वमेती"ति ब्रह्मप्राप्त्युपदेशादुपपादितश्च पूर्वमेव ब्रह्मसंस्थ-शब्दः सर्वाश्रमिसाधारण इति, अतः सुष्ठूक्तं यज्ञादिसर्वाश्रमधर्मवन्मौनतृतीयः पाण्डित्यादिविद्यासहकारित्वेन विधीयत इति, सहकार्यन्तरविध्यधिकरणं समाप्तम् ॥

अनाविष्काराधिकरणम् ।

सू० अनाविष्कुर्वन्नन्वयात् ॥ ४९ ॥

तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेदित्यत्र विदुषोबाल्यमुपादेयतया श्रुतं बालस्य भावः कर्म्म वा बाल्यं, बालभावस्य वयोऽवस्थादिविशेषस्यानुपादेयत्वात्

कर्म्मैवेह गृह्यते, तच्च किं बालस्य कर्म्म कामचारादि रूपं विदुषोपादेयम् ? उत दम्भादिरहितत्वमेवेति ? विशये विशेषाभावात्सर्वमुपादेयं, नियमशास्त्राणि च विशेषविधिनाऽनेन बाध्यन्त इत्येवं प्राप्तेऽभिधीयते—

टी० "कृत्स्नभावात्तु गृहिणोपसंहार"इति, गृहिषु यज्ञादिकर्माणि अहिंसेन्द्रियसंयमनादि च यथासम्भवं विद्यन्ते अतस्तेनोपसंहारः, न तु गार्हस्थ्यमात्रपर्यवसानादिति मौनगार्हस्थ्याश्रमद्वयोपन्यासादितराश्रमाभावशङ्कां व्युदस्यति "मौनवदितरेषामप्युपदेशादि"ति, यथा मौनगार्हस्थ्याश्रमौ प्रामाणिकौ तथा वानप्रस्थगुरुकुलवासावपि उपदेशाविशेषात्, बहुवचनं तत्तदवान्तरवृत्तिभेदापेक्षयेति वर्णयन्ति, तत्र तावत् षष्ठीसमासादपि सहकार्यन्तरं विधेयमिति युक्तं विध्यादिवदिति विधि—शब्दस्य विधेयवाचित्वात्तदैकरूप्यस्य उचितत्वाच्च तस्याऽपि विधानवाचित्वे षष्ठ्यन्ताध्याहारप्रसङ्गः तृतीयशब्दविधिशब्दयोः सामानाधिकरण्ये सत्येकवाक्यत्वं स्यात्, त्वत्पक्षे तु तस्मात्तृतीयं मौनं विधीयत इति वक्यभेदकल्पनं स्यात्, तच्च निष्प्रयोजनम् । किञ्च विध्यादिवदिति विधि—शब्दस्य विद्याङ्गभूतयज्ञादिशमादिपरत्वं युक्तम् अङ्गमात्रे दृष्टान्तसमर्पणादपि विद्याङ्गत्वे दृष्टान्तसमर्पणौचित्यात् पक्षेणेत्यत्राभेददर्शनप्राबल्यात् अतिशयोविधेय इत्यध्याहारादपि व्यासादौ प्रयोगादित्यध्याहारौचित्यात् ज्ञानार्थस्य मुनि—शब्दस्य तद्विशेषविषयत्वे हेतोर्वक्तव्यात् विद्यावतोऽतिशयप्राप्तेरविधेयत्वशङ्का चापाकरणीयेति चेत् न अतिशयमात्रवाचित्वाभावात् मुनि—शब्दस्य शुभाश्रयं मननं हि विधेयं तत्कारिषु प्रयोगात्, मौन—शब्दस्य ध्यानसमाधिपर्यायत्वाभावात् तत्तद्विषयविशेषसंशीलनं हि मननं, न तु निरन्तरस्मृतिः, न च समाधिः, तच्च विद्यावतः सिद्धमितिचेत् न तद्वत इतिपदस्यप्रारब्धविद्याविषयत्वात्,तच्चअनुक्तसहकारिसापेक्षत्वादवगम्यते ब्राह्मण—शब्दश्च न जातिवाची अथ ब्राह्मणः इत्युक्तेः जातिर्हि प्रागेव सिद्धा कृत्स्नभावादित्यनन्तरसूत्रस्य इतराश्रमसद्भावपरत्वमयुक्तं विधिर्वा

धारणवदित्यत्र आश्रमविधीनामुपपादितत्वात्, यदाऽऽश्रमान्तरस्य विद्याङ्गत्वे विरोधपरिहारपरं कृत्स्नभावादिति सूत्रं तदा प्रदर्शनार्थतया व्याख्याने समीचीनमुत्तरं स्यात्, न तु गृहस्थे कृत्स्नश्रौतस्मार्तब्रह्मचर्यमौनादिसद्भावपरत्वेनापि व्याख्याने, अत एव कथं गृहिणः कृत्स्नमित्याशङ्क्य मौनवत् शमादीनामपि गृहमेधिनि उपदेशादिति कार्त्स्न्योपपादकत्वेन तृतीयसूत्रव्याख्यानमप्ययुक्तं पूर्वसूत्रस्य गृहस्थे कृत्स्नधर्मपरत्वाभावात् । अन्ये तु एतमेव विदित्वा मुनिर्भवति इति वाक्यान्तरैक्यार्थ्यात् फलार्थवादः स्यात् ब्राह्मण्यसाहचर्याच्च अथ मुनिरिति विद्याफलकीर्तनमिति पूर्वपक्षं कृत्वा मौनं नाम पारिव्राज्यं विधीयते गार्हस्थ्यम् आचार्यकुलं मौनं वानप्रस्थमिति प्रयोगाद्भवतीत्यध्याहारादपि अपूर्वतया भवेत् इत्यध्याहारस्य युक्तत्वात् पूर्वत्रापि व्युत्थायाथ भिक्षाचर्यं चरति पारिव्राज्यप्रस्तावात् स्तुतेर्विध्यर्थत्वाच्च मुनिर्भवतीत्यत्रापि अयमेवार्थ इति ब्राह्मण्यमपि न विद्याफलं किं तु सहकार्यन्तरं विधेयं, तच्च सर्वाश्रमधर्मपरित्यागरूपं दुर्वासःसंवर्त्तादीनां नग्नचर्यादिदर्शनात्, नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च शीलं धृतिर्दण्डनिधानमार्जवं ततस्ततश्चोपरमः क्रियाभ्यः ॥ इति भारतवचनात्, इदं च न यतीनामेव संवर्त्तस्यैव आर्त्विज्यकरणदर्शनादिति सिद्धान्तयति बाल्यपाण्डित्यापेक्षया तृतीयं मौनं च न नित्यवदनुष्ठेयं किं तु पक्षेण इच्छया विकल्पेन विध्यादिवत् । अथ यद्यज्ञ इत्याचक्षते इत्यादिवाक्योक्तयज्ञेष्टसत्रायणानाशकायनारण्यायनादिवत् तेषु मौनस्य परस्तात् गार्हस्थ्यस्य आमरणं श्रवणात् छान्दोग्ये गृहिणोपसंहारः, तत्र विद्यापरिकरसद्भावात् न तु मौनब्राह्मण्ययोरविहितत्वादिति चाहुः । मौनवदित्यधिकरणान्तरं ब्रह्मचर्यवानप्रस्थयोर्न विद्याङ्गत्वम् अविधानादिति पूर्वपक्षं कृत्वा तमेतमित्यादिवाक्ये वेदानुवचनतपोनाशकशब्दैर्वाक्यान्तरैश्च ब्रह्मचारिणां वानप्रस्थानामप्युपदेशात् विद्याङ्गत्वमिति सिद्धान्तयन्ति, अत्र ब्रूमः फलकीर्तनमिति पूर्वपक्षोऽनुपपन्नः ज्ञानव्यतिरेकेण फलविशेषवाचित्वाप्रतीतेः, ज्ञानमेव चेत्फलं तर्हि पाण्डित्यानुवाद इति

पूर्वपक्षो युक्तः पारिव्राज्यविधिरिति सिद्धान्तोऽप्यनुपपन्नः व्युत्थाय भिक्षाचर्यं चरतीति पूर्वमेव विहितत्वात्, लिङ्गाद्यश्रवणमुभयत्र तुल्यं विधिकल्पनं च तत्रैवोचितं बह्वर्थसाधारणान्मुनिशब्दादपि तत्र पारिव्राज्यस्फुटप्रतीतेः, न च ब्राह्मण्यं नाम सर्वाश्रमधर्मपरित्यागः अशाब्दत्वात् ततस्ततश्चोपरमः क्रियाभ्य इति वचनं तु लौकिकव्यापारविषयतयोपपन्नं संवर्त्तादीनां नग्नचर्यावचनं न सर्वाश्रमधर्मत्यागे प्रमाणं जनावमानकृतयोगसिद्धये स्वप्रकर्षाच्छादनार्थतयाऽप्युपपन्नत्वात्, आर्त्विज्यकरणेन गार्हस्थ्यापरित्यागावगमात् आश्रमधर्माणामात्मध्यानस्यैव छन्नानुष्ठानसम्भवाच्च तथा हि स्मरन्ति "यत्र सन्तं न चासन्तं नाश्रुतं न बहुश्रुतम् । न सुवृत्तं न दुर्वृत्तं वेद कश्चित्स ब्राह्मणः ॥ गूढधर्माश्रितो विद्वान् अज्ञानचरितं चरेत् । अन्धवज्जडवच्चैव मूकवच्च महीं चरेत् ॥ इति द्वितीयसूत्रे गृहिणोपसंहारस्य निर्वाह्यत्वात् आद्यसूत्रे पक्षेणेति पारिव्राज्यस्य विकल्पेनोपादेयत्वं चासमर्थनीयं विद्याङ्गत्वेन गार्हस्थ्यप्रामाणिकत्वसिद्धौ सत्यां पारिव्राज्यनियमशङ्काऽनुपपत्तेः तद्वत इत्यस्य विद्यावत इति व्याख्यानमुचितं, न तु बाल्यपाण्डित्यवत इति विद्यायाः प्रकृतत्वात्, पारिव्राज्यानियमस्यासमर्थनीयत्वाच्च, यतो मौनब्राह्मणशब्दौ न पारिव्राज्यसर्वाश्रमधर्मत्यागपरौ किंतु शुभाश्रयमनननिदिध्यासनलाभपरौ, अत एव तयोरनियतत्वमपि अनुपपन्नं सर्वासु विद्यासु शुभाश्रयमननस्यापेक्षितत्वात् उपासनस्य निदिध्यासनरूपत्वाच्च द्वितीयसूत्रनिर्वाहो दत्तोत्तरः, ब्रह्मचर्यवानप्रस्थयोर्विद्याङ्गत्वनिरूपकतया अधिकरणान्तरत्वं च मौनवदिति सूत्रस्यायुक्तं सर्वापेक्षेत्यत्रैव तमेतमित्यादिवाक्येन विद्यायाः सर्वाश्रमधर्माङ्गकत्वस्य समर्थितत्वात् ॥ सहकार्यन्तरविध्यधिकरणं समाप्तम् ॥

सू० "अनाविष्कुर्व"न्निति, बालस्य यत्स्वभावोऽनाविष्काररूपं कर्म्म तदुपाददानो वर्त्तेत विद्वान्, कुतः अन्वयात्—तस्यैवान्वयात् बाल्येन तिष्ठासेदित्यस्मिन् विधौ तस्यैव ह्य-

पदादावित्येष विधिर्न भवति। 'प्रत्यङ्कृति'। ननु चात्रान्तरङ्गत्वा-द्यणादेशे कृते ऽनिगन्तत्वात्प्रकृतिभावेन भवितव्यम्, अनिगन्त इत्यस्य तु प्रतीच इत्यादिरवकाशः, तत्राच इत्यकारलोपाद्यणादेशाभावः। न च यणादेशस्य स्थानिवद्भावोऽस्ति, अपूर्वविधित्वात्, पूर्वपदस्य प्रकृतिस्वरविधानात्, यत्तर्हि न्यधीचेत्यधेः प्रकृतिभावं शास्ति तज्ज्ञाप-यति यण्विषये ऽयं स्वरो न भवतीति. यदि स्याद् अध्यञ्चित्यत्राप्य-ऽनेनैव सिद्धं स्यात्, नैतदस्ति ज्ञापकम्, अधीच इत्यादौ यत्र यण् नास्ति तदर्थमेतत्स्यात्, यत्तर्हि नेः प्रकृतिस्वरं शास्ति, निशब्दस्येकः। चत्वाद्, नीच इत्यादावुत्तरस्य प्रकृतिस्वरस्य च विशेषो नास्ति, एतदपि न ज्ञापकं वच-नसामर्थ्यादकृतएवान्तरङ्गे यणादेशे निशब्दस्य स्वरार्थमेतत्स्यात्, यणादेशे कृते स्वरभाजोऽभावात्, प्रत्यङ्ङादिषु तु यणादेश एवान्तरङ्गत्वात्प्राप्नोति, तस्माद्यण्विषये प्रतिषेधो वक्तव्यः, न वक्तव्यः, स्थानिवद्भावात्सिद्धं, ननु चोक्तं पूर्वपदस्य प्रकृतिस्वरो न यणः पूर्वस्येति, नैतदस्ति, उक्तमे-तत्, पूर्वपदशब्दः पूर्वपदस्योद उदात्ते स्वरिते वा वर्ततइति। 'चोरिति'। चाविति यत्पूर्वपदान्तोदात्तत्वं विधीयते तच्चुशब्देन लक्ष्यते, चोः चुस्व-रादित्यर्थः। 'एष स्वरो भवतीति'। विप्रतिषेधेनेति भावः। चुस्वरस्या-वकाशो दधीचः दधीचा यत्र गतिर्नास्ति, अनिगन्तस्वरस्यावकाशः पराङ्, पराञ्चौ पराञ्चः, पराच इत्यादावुभयप्रसङ्गे परत्वादनिगन्तस्वर एव भवति. नायं युक्तो विप्रतिषेधः, चुस्वरः सतिशिष्टः, कथं, चावित्युच्यते, यत्रास्यैतद्रूपं, भसञ्ज्ञानिमित्ते प्रत्यये ऽलोपे च कृते सम्भवति, एवन्तर्हि नायं विप्रतिषेध उपन्यस्तः किं तर्हि इष्टिरेषा चोरनिगन्तोऽञ्चतावप्र-त्ययइत्येष स्वर इष्यतइति॥

"न्यधी च"॥ 'अधीच इति'। अत्रापि कृत्स्वरादयमेव स्वर इष्यतइति दर्शयति॥

"ईषदन्यतरस्याम्"॥। 'ईषद्भेद इत्यादौ तु कृत्स्वर एव भव-तीति'। परत्वात्। अपर आह। ईषदकृतेति प्रतिपदोक्तस्य समासस्य ग्रहणादुपपदसमासेस्याप्रवृत्तिरिति॥

"हिरण्यपरिमाणं धने" ॥ 'हिरण्यपरिमाणवाचीति'। परिमाणविशिष्टहिरण्यवाचीत्यर्थः। तत्र सुवर्णशब्दः परिमाणे, उपपदादौ तत्परिच्छिन्ने हिरण्ये च वर्त्तते, यथा प्रस्थादिशब्दो दार्वादिनिर्मिते परिमाणे तत्परिमिते च व्रीह्यादौ वर्तते, 'पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश,' 'पलं सुवर्णाश्चत्वारः', द्वयोः सुवर्णयोः समाहारो द्विसुवर्णं पात्रादिः। 'द्विसुवर्णपरिमाणमिति'। अत्र सुवर्णशब्द उपले वर्तते। 'काञ्चनधनमिति'। परिमाणग्रहणमकृत्वा हिरण्यमित्युच्यमाने इहापि स्यात्, काञ्चनशब्दस्य हिरण्यवाचित्वात्, परिमाणवाची त्वेष न भवति ॥

"कतरकतमौ कर्मधारये" ॥ 'इह त्वित्यादि'। कतरकतमौ जातिपरिप्रश्नइति प्रतिपदसमासस्तस्येह ग्रहणं स कर्म्मधारय एव तस्मात्रेहार्थं कर्मधारयग्रहणमिति भावः ॥

"राजा च" ॥ 'राजब्राह्मण इति'। राजशब्दो ब्राह्मणे तादृग्धर्म्याद्वृत्तइति सामानाधिकरण्यात्कर्मधारयः, राजशब्दः कनिन्प्रत्ययान्तत्वादाद्युदात्तः। 'पृथग्योगकरणमुत्तरार्थमिति'। उत्तरो विधौ राजशब्दस्यैव यथा स्यात् आर्यशब्दस्य मा भूत्, यथासङ्ख्याभावेऽपि पृथग्योगकरणस्य प्रयोजनं तत्तु नोक्तमित्येतावत् ॥

"षष्ठी प्रत्येनसि" ॥ 'राज्ञःप्रत्येना इति'। षष्ठ्या आक्रोशइत्यलुक् ॥

"क्ते नित्यार्थे" ॥ नित्यशब्द आभीक्ष्ण्ये कौटस्थ्ये च वर्त्तते, इह त्वाभीक्ष्ण्ये, कुत एतत्, क्तइत्युच्यते, क्तश्च धातोर्विधीयते, धातुश्च क्रियावचनः, क्रियायाः क्षणिकत्वात्कौटस्थ्यं नोपपद्यते, तस्मादाभीक्ष्ण्ये नित्यशब्दः। 'द्वितीयासमासोयमिति'। द्वितीया पुनरत्यन्तसंयोगे, अथ वा कर्मणि कालभावाध्वगतव्याः कर्मसञ्ज्ञा ह्यकर्मणामिति। 'सततइति' 'भावे क्त इत्यादि'। यदा तु कर्मणि क्तस्तदा गतिरनन्तर इति पूर्वपदप्रकृतिस्वरेणाद्युदात्तो भवति, समासस्वरस्य द्वितीयापूर्वपदप्रकृतिस्वरो बाधकस्तस्य थाथादिस्वरस्तस्यायमपवादः ॥

"ग्रामः शिल्पिनि" ॥ ग्राम इति स्वरूपग्रहणम् ॥

"राजा च प्रशंसायाम्" ॥ 'षष्ठीसमासे चेति'। प्रशंसेत्यनुषङ्गः। 'राजयोग्यतया तस्येति'। स हि कर्मणि प्रवीणत्वाद्राजानं प्रति योग्यो भवति, राजार्ह इति चोक्ते प्रशंसा गम्यते ॥

"आदिरुदात्तः" ॥ पूर्वपदमित्यस्येहार्थात्षष्ठ्याविपरिणामः, सर्वत्र वात्र प्रकरणे पूर्वपदविषये षष्ठ्यर्थे प्रथमा ॥

"सप्तमीहारिणौ धर्म्ये ऽहरणे" ॥ हारीत्यावश्यके णिनिः, धर्म्य-इत्यर्थग्रहणं,हरणप्रतिषेधात्तत्साहचर्याद्धारीत्यर्थग्रहणम्। 'आचारनियत-मिति'। आचारेण नियतमाचारनियतम्, आचारवशादवश्यकर्त्तव्यमि-त्यर्थः। कथं पुनस्तद्धर्म्यन्तत्राह। 'धर्मो ह्यनुवृत्त आचार इति'। जनपदे ग्रामे चरणे कुले वा ऽनुवृत्तः परम्परायात इत्यर्थः। तस्मादनपेतं धर्म्यं, पथ्यर्थेत्यादिना यत्। 'तेन वा प्राप्यमिति'। नौवयोधर्मेत्यादिना यत्। या-ज्ञिकाश्वादौ षष्ठीसमासः, क्वचिदित्यादिना शाणादेर्दयस्याचारनियततां दर्शयति । 'याज्ञिकादीनामश्वादीति' । दातव्यमित्यनुषङ्गः । 'क्व चिदयमाचारो व्यवस्थित इति च'। वर्द्धितको नाम मूले स्थूलोग्रे सूक्ष्म ओदनपिण्डः, स कर्मकराय दीयते, अन्यथा कर्म न कुर्यादिति, न त्वयन्धर्मः। बीजावापः, बीजनिषेको गर्भाधानम्। 'वाडवहरणमिति'। क्वचिदयमाचारो व्यवस्थितः, वाडवाये बीजनिषेकादुत्तरकालं शरीरपुष्ट्यर्थं योग्यमशनादि दातव्यमिति, हरणशब्दः कर्मसाधनः, अत्रास्मिन्स्वरे निवृत्ते कृत्स्वरे प्राप्ते अनो भावकर्मवचनमित्युत्तरपदान्तोदात्तत्वं भवति। ननु च परत्वादेवायं स्वरो भविष्यति तत्किं हरणप्रतिषेधेन, तत्राह । 'परोपीत्यादि'। अत्र पूर्वपदानां स्वरो नाख्यातः, अप्रयोजनत्वात् ॥

"युक्ते च" ॥ वल्लवादयः शब्दा गवादीनां पालकवचनाः, मणिं ददातीति मणिदः पृषोदरादिः, गाः संचष्टे, समिख्य इति कः, गोसंख्यः, उपपदसमासः। नन्वत्र परत्वात्थाथादिस्वरःप्राप्नोति, अस्य तु गोव-

त्लवादिरवकाशः, सत्यं, पूर्वविप्रतिषेधस्त्वत्र पठितव्यः, चित्स्वराद्वारिस्वरः पितृगवः मातृगवः, कृत्स्वराच्च वाडवहार्यम्, युक्तस्वरश्च, कृत्स्वरादित्येव, कृतो यः स्वरस्याद्यादिसूत्रेण तस्माद्युक्तस्वरो भवति पूर्वविप्रतिषेधेनेत्यर्थः। 'युक्तः समाहित इति'। युज समाधावित्यस्यैतद्रूपमित्यर्थः॥

"विभाषाऽध्यक्षे"॥ अध्यक्षशब्दोपि समासे युक्तवाच्येवेति सूत्रे पूर्वेण नित्ये प्राप्ते विकल्पः॥

"पापं च शिल्पिनि"॥ पापमिति स्वरूपग्रहणं, शिल्पिनीति चार्थग्रहणं, व्याख्यानात्॥

"गोत्रान्तेवासिमाणवब्राह्मणेषु क्षेपे"॥ गोत्रान्तेवासिनोरर्थग्रहणमितरयोः स्वरूपग्रहणम्, अपत्याधिकारादन्यत्र लौकिकं गोत्रमित्यनेन लौकिकमपत्यमात्रं गोत्रं गृह्यते। 'जङ्घादानमहं ददानीति'। जङ्घादानं करवाणीत्यर्थः, ओदनपाकम्पचतीतिवत्, यत्र श्राद्धादौ वात्स्यानामेव पादप्रक्षालनं क्रियते तत्रावात्स्यः सन्वात्स्योहमिति ब्रूते तल्लाभाय स जङ्घावात्स्य इति क्षिप्यते, वत्सशब्दो गर्गादिः, सुप्सुपेतिसमासः, सुष्ठु शृणोति सुश्रुत्, तस्यापत्यं सौश्रुतः। 'भार्याप्रधानतयेति'। शाकपार्थिवादित्वादुत्तरपदलोपी समास इति दर्शयति। 'वशाब्राह्मकृतेय इति'। वशा वन्ध्या भार्या, सौश्रुतवत्समासः, दक्षेण प्रोक्तन्दाक्षं, तदधीते दाक्षः, दाक्षेश्छात्रो वा दाक्षः, चरशब्दो नडादिः, चारायणेन प्रोक्तमधीते तस्य वा शिष्यश्चारायणीयः, एवं पाणिनीयः। 'कुमार्यादिलाभकामा इति'। तत्प्रोक्ते ग्रन्थे श्रद्धायामसत्यामपि ये कुमार्यादिलाभकामास्तत्र प्रवर्त्तन्ते तएवं क्षिप्यन्ते। पूर्ववत्समासः, माणवब्राह्मणयोरपत्यवाचित्वेन प्रसिद्ध्यभावात्पृथग्ग्रहणम्। अपर आह। तस्येदमित्यणन्तयोर्ग्रहणं, निपातनाच्च माणवे णत्वमिति। 'भयब्राह्मण इति'। यो ब्राह्मण एव सन् राजदण्डादिभयेन ब्राह्मणाचारं करोति न श्रद्धया स एवं क्षिप्यते, कर्तृकरणे कृता बहुलमिति बहुलवचनादकृतापि समासः, दासीश्रोत्रियो दासीब्राह्मणवत्॥

"अङ्गानि मैरेये" ॥ अङ्गमारम्भकं, बहुवचनं स्वरूपविधिनिरासार्थं, सुराव्यतिरिक्तं मद्यं मैरेयम् । 'तदङ्गवाचिनीति' । मैरेयशब्दइति प्रकृतम्, इह तु तच्छब्देन तदर्थः परामृश्यते । 'पौष्पासवइति' । आसवो मद्यविशेषः, यत् पौष्पेण मधुना द्रव्यान्तरेण चारभ्यते तस्य पौष्पमङ्गं भवति । पुष्पासव इति तु युक्तः पाठः ॥

"भक्ताख्यास्तदर्थेषु" ॥ बहुवचननिर्द्देशादेव स्वरूपविधिनिरासे सिद्धे आख्याग्रहणं भक्तविशेषवाचिनां भिक्षादीनां ग्रहणार्थम्, अन्यथा पर्यायाणामन्नादीनामेव ग्रहणं स्यात्, भिक्षाकंसादयः षष्ठीसमासाः, येषां प्रकृतिविकारभावे चतुर्थीसमास इति पक्षः, अन्येषां चतुर्थीसमासाः ॥

"गोबिडालसिंहसैन्धवेषूपमाने" ॥ उपमानशब्दस्य सह गवादिभिः प्रत्येकं संबन्धादेकवचनम् । 'उपमानार्थोपीति' । यो यत्रोदाहरणे उपमानार्थः संभवति स तत्र योजयितव्यः । 'यथा प्रसिद्धं चे ति' । यस्योदाहरणस्य च यथा लोके प्रसिद्धिः स तथा योजयितव्यः, तत्र दिङ्मात्रं दर्शयति । 'गवाकृत्येत्यादि' । आकृतिः संस्थानं, संनिवेशितं व्यवस्थापितम्, एवमन्यत्रापि यत्किञ्चित्सादृश्यं योजनीयम् ॥

"अके जीविकार्थे" ॥ 'जीविकावाचिनीति' । प्रवृत्तिनिमित्तकथनमेतत्, जीविकारूपप्रवृत्तिनिमित्तइत्यर्थः । पर्यवसानभूमिस्तु तद्वान्, तदाह । 'दन्तलेखकादिर्विषयामिति' । 'रमणीयकर्त्तेति' । अत्रापि नित्यं क्रीडाजीविकयोरिति समासः, क्रीडायामेव हि तृजन्तं संभवति न पुनर्ज्जीविकायामिति तत्रार्थः[1] ॥

"प्राचां क्रीडायाम्" ॥ प्राचां क्रीडायामिति श्रुतयोरेवान्वयसंभवान्मतेनेत्यध्याहारो न युक्त इति मत्वाह । 'प्राग्देशवर्त्तिनां या क्रीडेति' ॥

"अणि नियुक्ते" ॥ नियुक्तइति' युजिर्योगइत्यस्यैतद्रूपमित्याह । 'नियुक्तोधिकृत इति' । 'स च कस्मिंश्चित्कर्त्तव्ये तत्परो न भवतीति' । कार्यान्तरेपि नियोगसंभवात् ॥

१ तत्रोक्तम् इति २ पु· पा· ।

"शिल्पिनि चाकृञः" ॥ युक्ते चेत्येव सिद्धे कृञः प्रतिषेधार्थं वचनम् । 'तन्तुवाय इति'। ह्वावामश्चेत्यण्, आतो युक् । 'अयस्कार इति'। अतः कृकमीत्यादिना विसर्जनीयस्य सत्वम् ॥

"गौतन्तियवं पाले" ॥ तनु विस्तारे, क्तिच्, तन्तिर्वत्सानां बन्धनरज्जुः ॥

"उपमानं शब्दार्थप्रकृतावेव" ॥ उष्ट्रक्रोशीत्यादौ कर्तर्युपमान इति णिनिः । 'उपमानग्रहणमित्यादि'। अन्यथा योगविभागेन नियमाश्रयणसामर्थ्याद्द्विशिष्टविषयो नियम इत्येतावद्गम्यते, न त्विष्टो विषयविभाग इति भावः । 'शब्दार्थप्रकृताविति किमिति'। सूत्रारम्भः किमर्थ इत्यर्थः । 'वृकवञ्चीति'। कृत्स्वर एव भवति । 'प्रकृतिरेवेत्यादि'। असति प्रकृतिग्रहणे शब्दार्थात्परो यो णिनिस्तदन्तउत्तरपद इति विज्ञायेत, ततश्च यत्रापि धातूपसर्गसमुदायात् शब्दार्थात्परो णिनिस्तत्रापि स्यात्, कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणाण्णिन्यन्तमेवोत्तरपदमिति कृत्वा, प्रकृतिग्रहणे तु न भवति, योऽत्र धातुर्नासौ शब्दार्थः, यश्च शब्दार्थो धातूपसर्गसमुदायो न ततो णिनिर्विहित इति, सिद्धे विधिरारभ्यमाणोऽन्तरेणाप्येवकारं नियमाय भवति, नार्थ एवकारेण, तत्राह । 'एवकारकरणमित्यादि'। असति हि तस्मिन्विपरीतो नियमः स्यात्, शब्दार्थप्रकृतौ यदि भवति उपमानएवेति । एवं च प्रकृतिर्नियम्यते नोपमानं, तस्मादुपमानावधारणार्थमेवकारः क्रियते, किं पुनःकारणमुपमानावधारणमाश्रीयते ऽत आह । 'शब्दार्थप्रकृताविति'। तुशब्दो हेतौ, उपमानेनियमे हि शब्दार्थप्रकृतेरनियतत्वात्तत्राप्यविशेषेण सर्वस्याद्युदात्तत्वं लभ्यते, नान्यथा । किं च प्रकृत्यवधारणेस्यानियतत्वाद्वृकवञ्चीत्यादावाद्युदात्तत्वप्रसंगः ॥

"युक्तारोह्यादयश्च" ॥ 'पूर्वोत्तरपदनियमार्थमिति'। यत्र युक्तादीन्येव पूर्वपदानि आरोह्यादीन्येव चोत्तरपदानि तत्रैव यथा स्यादित्यर्थः । आगतमत्स्यादिषु च बहुव्रीहिः कर्मधारयो वा । 'एकशितिपादिति'। संख्यासुपूर्वस्येति पादशब्दाकारस्य लोपः; सङ्ख्यासुपूर्वस्य समासस्य योऽन्ते

पादशब्दस्तस्य लोपो भवतीति तत्रार्थः । ननु चेहेणभीकापाशल्यतिमर्त्तिभ्यः कनिति कन्नन्त एकशब्द आद्युदात्तः, ततश्च बहुव्रीहौ प्रकृत्येत्येव सिद्धमाद्युदात्तत्वं तत्राह । 'एकःशितिः पादोस्येति त्रिपदो बहुव्रीहिरिति' । ततः किमित्याह । 'तत्रेति' । यद्युत्तरपदे परत एकशितिशब्दस्तत्पुरुषः, ततोपि किमित्याह । 'तस्येति' । तस्य तत्पुरुषसञ्ज्ञकस्यैकशितिशब्दस्य समासान्तोदात्तत्वं प्राप्तम् । ननु समासस्वरापवादो बहुव्रीहिस्वरस्तत्राह । 'निमित्तिस्वरबलीयस्त्वादिति' । समासस्वरस्येति शेषः । निमित्तमुत्तरपदं द्विगोस्त्रिपदो बहुव्रीहिस्तस्य यः स्वरस्तस्मात्समासस्वरस्य बलीयस्त्वादित्यर्थः । बलीयस्त्वं तु सतिशिष्टत्वात्सतिशिष्टत्वं तु बहुव्रीहौ सति पश्चात्तत्पुरुषे कृते प्राप्नोतीति । 'एवमपीत्यादि' । स्पष्टार्थम् । 'निमित्तिस्वरबलीयस्त्वस्यापीत्यादि' । तथा च समर्थसूत्रे वार्त्तिकम्, एकशितिपात्स्वरवचनं तु ज्ञापकं निमित्तिस्वरबलीयस्त्वस्येति । उभयमन्तरेणाप्यनुपपद्यमानमेकशितिपाद्ग्रहणमुभयमपि ज्ञापयति ॥

"दीर्घकाशतुषभ्राष्ट्रवटं जे" ॥ 'कुटीज इति' । सप्तम्यां जनेर्डः ॥

"अन्त्यात्पूर्वं बह्वचः" ॥ 'आमलकीज इति' । दीर्घान्तेपि बह्वचि परत्वादयमेव स्वरो भवति ॥

"ग्रामे ऽनिवसन्तः" ॥ निपूर्वाद्वसेर्[1]णादिकोधिकरणे सच्, निवसन्त्यस्मिन्निति निवसन्तः । 'देवग्रामइति' । प्राचीनपरिक्षिप्तदेशेयं ग्रामशब्दः, यद्येवं निवसन्तवाची भवति तत्राह । 'देवस्वामिकइति' । ततश्चायं न देवापेक्षया ग्रामो निवसन्त इति भावः । 'दास्यादयो निवसन्ति यस्मिन्नित्यादि' । अन्य निवसन्तु तत्र मा वा ऽवसन् ते तावद्वात्सुरित्येतावता तेषामिति व्यपदिश्यतइत्यर्थः ॥

"घोषादिषु च" ॥ 'यान्यत्रेति' । घोषकुटादीनि । 'अपरे पुनरिति' । येषां घोषकुटादिष्वपि शब्देषु तावद्भवति, न निवासनामधेयेषु ॥

१ वाटेति ३ पु० पा० ।

"छात्र्यादयः शालायाम्" ॥ 'यदा शालान्त इत्यादि'। विभाषा सेनासुरेत्यादिना शालान्तस्य तत्पुरुषस्य विभाषा नपुंसकत्वमुक्तं, तत्रास्यावकाशो यो नपुंसकलिङ्गो न भवति छात्रिशाला गोशालेति, तत्पुरुषे शालायामित्यस्यावकाशो यश्छात्र्यादिपूर्वपदो न भवति ब्राह्मणशालं क्षत्रियशालमिति, यश्छात्र्यादिपूर्वपदो नपुंसकलिङ्गश्च तत्रैकदेशविकृतस्यानन्यत्वादयमपि प्राप्नोति, तत्पुरुषे शालायामित्ययं च, तत्र पूर्वविप्रतिषेधादयमेव भवति ॥

"प्रस्थे ऽवृद्धमकर्क्यादीनाम्" ॥ मालादीनाञ्चेति वचनादवृद्धमिति पदच्छेदः, कर्क्यादिप्रतिषेधस्तु नामधेयार्थः स्यात्, वा नामधेयस्य वृद्धसंज्ञा वक्तव्येति ॥

"अर्मे चावर्णं द्व्यच्त्र्यच्" ॥ 'बृहदर्ममिति'। स्वरविधौ व्यञ्जनमविद्यमानवदित्येतदत्र नाश्रीयते, ऽनित्यत्वात्। 'महार्ममिति'। आत्वे कृते ऽवर्णान्तत्वादस्ति प्राप्तिः। 'नवार्ममिति'। नवशब्दः प्रत्ययवचनो ऽकारान्तः ॥

"न भूताधिकसञ्जीवमद्राश्मकज्जलम्" ॥ 'मद्राश्मग्रहणं सङ्घातविगृहीतार्थमिति'। मद्रशब्दस्य केवलस्य मद्राश्मशब्दस्य च सङ्घातस्य प्रतिषेधार्थमित्यर्थः। 'मद्राश्मार्ममिति'। 'अनोश्मायःसरसां जातिसंज्ञयो'रिति समासान्ते सत्यवर्णान्तमेतद्भवति, तदेवं मद्रार्मं मद्राश्मार्ममिति द्वे एवोदाहरणे, प्रायेण त्वश्मार्ममिति तृतीयमप्युदाहरणं पठ्यते, तदयुक्तम्, अश्मशब्दस्य नकारान्तत्वात्, न च लोपे कृते ऽवर्णान्तत्वं, स्वरविधौ नलोपस्यासिद्धत्वात्, तथा च वक्ष्यति पञ्चार्मं दशार्ममित्यत्रार्मे चावर्णं द्व्यच्त्र्यजित्ययं स्वरो न भवतीति। अपर आह। मद्राश्मग्रहणं संघातविगृहीतार्थमित्यस्य भाष्ये ऽदर्शनादनार्षो वृत्तौ पाठ इति। 'दिवोदासायेति'। दिवश्च दासइति षष्ठ्या अलुक् ॥

"अन्तः" ॥ अत्रापि प्रकरणे पूर्वपदविषया प्रथमा षष्ठ्यर्थे द्रष्टव्या ॥

१ वेदितव्येति ३ पु॰ ण॰।

"सर्वं गुणकार्त्स्न्ये" ॥ यत्र गुणान्तरस्याभावस्तत्र गुणकार्त्स्न्यं भवति । 'सर्वश्वेत इति' । पूर्वकालैकेत्यादिना कर्मधारयः । अत्र शुक्लेन गुणेन सर्वावयवानां व्याप्तिर्गम्यते । 'आश्रयव्याप्यापरमत्वमिति' । यद्यप्यौज्वल्यादिनापि परमत्वं सम्भवति, अत्र त्वेवंविधं परमत्वं विवक्षितमित्यर्थः । 'सर्वत्रैव गं इति' । विकारविषयमत्र कार्त्स्न्यम् । 'कार्त्स्न्येति किमिति' । गुणवाचिन्युत्तरपदे न सर्वशब्दस्य कार्त्स्न्यं व्यभिचरतीति प्रश्नः । 'सर्वेषां श्वेततरः सर्वश्वेत इति' । गुणिकार्त्स्न्ये सर्वशब्दो न गुणकार्त्स्न्ये, सर्वेषामिति च गुणसम्बन्धे षष्ठी, पटस्य शौक्ल्यमिति वद्, गुणवाचिन एव च प्रत्ययः, सर्वेषां पटानां द्रव्यान्तराधारो[1] यः श्वेतगुणस्तदपेक्षया सातिशयः श्वेतो गुण इत्यर्थः । 'गुणात्तरेणेति' । गुणाद्यस्तरप्प्रत्ययस्तदन्तेनेत्यर्थः, वचनमेवेदन्तेन पूरणगुणेति प्रतिषेधं बाधित्वा समासश्च भवति तरलोपश्च ॥

"संज्ञायां गिरिनिकाययोः" ॥ 'अञ्जनागिरिरिति' । वनगिर्योः संज्ञायामिति दीर्घत्वम् ॥

"कुमार्यां वयसि" ॥ 'वृद्धकुमारीति' । विशेषणसमासः । 'जरत्कुमारीति' । जरतीशब्दस्य पूर्वकालैकेत्यनेन, अत्रोभयत्र पुंवत्कर्मधारयेत्यादिना पुंवद्भावः । ननु च कुमारीशब्दः प्रथमे वयसि वर्त्तते, तथा च वयसि प्रथमइति ङीबत्र विहितस्तस्य कथं चरमवयोवाचिभ्यां वृद्धाजरतीशब्दाभ्यां सामानाधिकरण्यमत आह । 'कुमारीशब्द इत्यादि' । कुमार्यां हि द्वयं दृष्टं प्रथमं वयः पुंसा सहासंप्रयोगश्च, तत्र प्रथमार्थप्रहाणेन द्वितीयमर्थमसंप्रयोगमात्रमुपाददानस्य संभवति सामानाधिकरण्यमित्यर्थः । 'तच्चेति' । वृद्धादिशब्दान्तराभिधेयमित्यर्थः । 'कुमारत्वमेवेति' । यदेतत्कुमारीशब्दस्य प्रवृत्तिनिमित्तं न तद्वयो गृह्यतइत्यर्थः । एतच्च वयोग्रहणसामर्थ्याल्लभ्यते, अन्यथा कुमारीशब्दप्रयोगे नियमतः प्रथमवयो गम्यते इत्यनर्थकं तत्स्यात्, परमकुमारीत्यत्र कुमारत्वमेव प्रतीयते न वयोन्तरमिति भवति प्रत्युदाहरणम् ॥

१ द्रव्यान्तरे इति ३ पु॰ पा॰ ।

"उदके ऽकेवले" ॥ असन्देहार्थं केवलउदकइत्यवचनाद् अकेवल इति पदच्छेदः. मिश्रं द्रव्यान्तरसंयुक्तम् ॥

"द्विगौ क्रतौ" ॥ गर्गत्रिरात्रादयः षष्ठीसमासाः, तिसृणां रात्रीणां समाहारस्त्रिरात्रः, अहः सर्वैकदेशेत्यादिनाच् समासान्तः । 'अतिरात्र इति' । रात्रिमति क्रान्त इति प्रादिसमासः ॥

"सभायां नपुंसके" ॥ गोपालसभादावशाला चेति नपुंसकत्वम् । 'रमणीयसभमिति' । अत्राभिधेयवशान्नपुंसकत्वं न प्रतिपदोक्तम् ॥

"अरिष्टगौडपूर्वे च" ॥ 'पूर्वग्रहणं किमिति' । अरिष्टगौडयोरिति वक्तव्यमिति प्रश्नः । 'इहापि यथा स्यादिति' । पूर्वग्रहणे हि सति बहुव्रीहिर्लभ्यते, अरिष्टगौडौ पूर्वौ यस्मिन्समासइति, तेनारिष्टाश्रितपुरं गौडभृत्यपुरमित्यत्रापि पूर्वपदमन्तोदात्तं भवति । असति तु पूर्वग्रहणे श्रितभृत्यशब्दाभ्यां व्यवहितत्वादपूर्वपदत्वादरिष्टगौडयोस्तावन्न स्यात्, समुदाययोश्च सूत्रेनुपात्तत्वात् ॥

"न हास्तिनफलकमार्देयाः" ॥ 'मार्देयमिति' । ढ्रे लोपो ऽकद्र्वा इत्युकारलोपः ॥

"दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु" ॥ चानराटे स्वरूपग्रहणमितरेष्वर्थग्रहणम् । 'पूर्वेषुकामशमीति' । दिक्संख्ये संज्ञायामिति समासः । 'पूर्वपञ्चाला इति' । समुदाये हि वृत्ताः शब्दा अवयवेष्वपि वर्त्तन्तइति पञ्चालैकदेशे पञ्चालशब्दः, ततः पूर्वापरप्रथमेत्यादिना कर्मधारयः । 'शब्दग्रहणमित्यादि' । दिशि दृष्टः शब्दो दिक्शब्द इत्युत्तरपदलोपी समासः, तेन कालवाचिनोपि ग्रहणात्पूर्वया यातमित्यादावपि भवति ॥

"आचार्योपसर्जनश्चान्तेवासिनि" ॥ आचार्योपसर्जनग्रहणमन्तेवासिनो विशेषणं, सप्तम्यर्थे प्रथमा । 'आचार्योपसर्जनान्तेवासिवाचिनीति' । आचार्य उपसर्जनं[1] यस्य स आचार्योपसर्जनः, स चासावन्तेवासी च आचार्योपसर्जनान्तेवासी, तद्वाचिनि । 'पूर्वपाणिनीया इति' । पूर्व-

१ अप्रधानमित्यधिकं ३ पु॰ ।

वत्समासः, पाणिनेश्छात्राः पाणिनीयाः, अत्रान्तेवासिनः प्रधानमाचार्यस्तूपसर्जनं, काशकृत्स्निशब्दादितश्चेत्यण् । 'पूर्वपाणिनीयं शास्त्रमिति' । पाणिनीयं शास्त्रं पूर्वञ्चिरन्तनमित्यर्थः ।

"उत्तरपदवृद्धौ सर्वं च" ॥ वृद्धावित्येतावतैव तद्वदुत्तरपदपरिग्रहे सिद्धे उत्तरपदग्रहणात्तदधिकारो लक्ष्यते ॥

"बहुव्रीहौ विश्वं संज्ञायाम्" ॥ विशेः क्वनि विश्वशब्द आद्युदात्तः । 'विश्वामित्रइत्यादि' । अस्यावकाशः विश्वदेवः विश्वयशाः, संज्ञायां मित्राजिनयोरित्यस्यावकाशः, कुलमित्रः कुलाजिनः, विश्वामित्रो विश्वाजिन इत्यत्रोभयप्रसङ्गे संज्ञायां मित्राजिनयोरित्येतद्भवति विप्रतिषेधेन ॥

"उदरपदवृद्धौ सर्वं च" ॥ अयमपि पूर्वपदप्रकृतिस्वरस्यापवादः, वृकशब्दः प्राणिनां च कुपूर्वाणामित्याद्युदात्तः, वृकस्येवोदरं यस्य वृकोदरः, दाम उदरे यस्य दामोदरः, दामशब्दो मनिन्प्रत्ययान्तः, हरतेः सर्वधातुभ्य इनितीन्, हरिदश्वो यस्य हर्यश्वः, यौवनशब्दो ऽव्युत्पन्नं प्रातिपदिकं, लघावन्ते द्वयोश्च बह्वषो गुरुरित्याद्युदात्तः । 'यूनो भावो यौवनमिति' । युवादिअणन्तत्वे प्रत्ययस्वरेणान्तोदात्तत्वात्पूर्वपदप्रकृतिस्वरेणैव सिद्धम् । 'सुवर्णपुङ्खेषुरिति' । शोभनो वर्णो येषां ते सुवर्णाः, नञ्सुभ्यामित्यन्तोदात्तत्वं, सुवर्णा पुङ्खा येषां ते सुवर्णपुङ्खाः, पूर्वपदप्रकृतिस्वरेण मध्योदात्तत्वं, पुनरिषुशब्देन बहुव्रीहिः । 'महेषुरिति' । महच्छब्दोन्तोदात्त इति महान्व्रीह्यपराह्णेत्यत्रोक्तं, तस्मात्तत्पूर्वपदप्रकृतिस्वरेणैव सिद्धे सति तस्यान्यार्थआरम्भे ऽपवादत्वादनेनैवान्तोदात्तत्वं युक्तमित्यस्योपन्यासः ॥

"क्षेपे" ॥ कुण्डशब्दो नब्विषयस्यानिसन्तस्येत्याद्युदात्तः, घटशब्दः पचाद्यजन्तः, महेषुवदस्योपन्यासः, कटुशब्दात्संज्ञाया कन्, स्यन्दितशब्दो निष्ठान्तः, निहन्यतेनेनेति निघातः, ततोन्योऽनिघातः, अतोव्ययपूर्वपदप्रकृतिस्वरत्वं, चरिचलिपतिवदीनां वा द्वित्वमच्याक्चा-

भ्यासस्य, चलाचलः । 'अनुदर इत्यादि'। अस्यावकाशः कुण्डोदर इत्यादि, नञ्सुभ्यामित्यस्यावकाशः, अयशाः सुयशाः, एवं स्थिते विप्रतिषेधः ॥

"नदी बन्धुनि" ॥ बन्धुनीति शब्दरूपापेक्षया नपुंसकनिर्देशः, गर्गवत्सशब्दाभ्यां गर्गादियञन्ताभ्यां यञश्चेति ङीप्, गार्गीवात्सीशब्दौ ञित्स्वरेणाद्युदात्तौ, ब्रह्मशब्दो बृंहेर्मनि नुप्रत्यये निपातितः ॥

"निष्ठोपसर्गपूर्वमन्यतरस्याम्" ॥ 'प्रक्षालितपाद इति'। क्षल शौचकर्मणि चुरादिः, धावु गतिशुद्ध्योः, च्छ्वोः शूडित्यूठ्, एत्येधत्यूठ्स्विति वृद्धिः, प्रक्षालितप्रधौतशब्दौ गतिस्वरेणाद्युदात्तौ । 'मुखं स्वाङ्गमित्येतद्भवतीति'। विकल्पितमुत्तरपदान्तोदात्तत्वं, तेन स्वाङ्गवाचिनि मुखशब्दे स्वरत्रयं भवति, अनेन पूर्वपदान्तोदात्तत्वं, मुखं स्वाङ्गमित्येतत्, उभाभ्यां मुक्ते पूर्वपदप्रकृतिभावेन गतिरनन्तर इत्याद्युदात्तत्वं च । 'न भवेदिति'। स्वाङ्गवाचीति संबध्यते, यदि मुखशब्दः स्वाङ्गवाची न भवतीत्यर्थः प्रसेवकशब्दः कृदुत्तरपदप्रकृतिस्वरेण मध्योदात्तः, पुष्कशब्दः 'शुष्कधृष्टौ' वित्याद्युदात्तः ॥

"उत्तरपदादिः" ॥ उत्तरपदग्रहणमसमस्तं लुप्तषष्ठीकम्, अत्रापि प्रकरणउत्तरपदनिर्देशे षष्ठ्यर्थे प्रथमा ॥

"कर्णो वर्णलक्षणात्" ॥ 'दात्राकर्णः शङ्कुकर्ण इति' । दात्रं कर्णो यस्य, शङ्कुः कर्णो यस्येति विग्रहः, सप्तम्याः पूर्वनिपाते गड्वादिभ्यः परवचनमिति परनिपातः, 'कर्णे लक्षणस्याविष्टेत्यादिना' दीर्घ[3]त्वं, लक्ष्यते येन तल्लक्षणं, ततश्च स्थूलकर्ण इत्यत्रापि प्राप्नोति, स्थौल्येनापि हि लक्षणीयत्वादत आह । 'पशूनां विभागज्ञापनार्थमित्यादि'। एत च्चसामान्योक्तावपि वर्णग्रहणाल्लभ्यते, अन्यथा वर्णेनापि लक्ष्यमाणत्वात्तदनर्थकं स्यात् । 'श्वेत-

१ कृशोदरी घटोदर इति ३ पु० पाठः ।

२ बृहेरम् नलोपश्चेति मनप्रत्यये नलोपे अमागमे च निपातितः । इति ३ पु० पा० ।

३ कर्णे लक्षणस्येति दीर्घत्वमिति मूलमुद्रितपुस्तके पाठो दृश्यते स पदमञ्जर्यसंमतः ।

पाद इति'। श्वितावर्णे पचाद्यच्, दूङ् दाहे, इगुपधलक्षणः कः, शुभ शुम्भ शोभार्थे, अनुदात्तेतश्च हलादेरिति युच् शोभनः, प्रत्युदाहरणे सर्वत्र पूर्वपदप्रकृतिस्वर एव भवति । कण्ठकर्णादीनां समाहारद्वन्द्वे नपुंसकह्रस्वत्वम्[1] । 'सुग्रीव इति' । अत्र परत्वान्नञ्सुभ्यामित्यन्तोदात्तत्वेन भाव्यम्, अस्य तु दशग्रीवादिरवकाशः, यदि तु नेष्यते चकारस्यैव विधेः समुच्चयार्थे इति व्याख्यानं कर्तव्यम् । 'नाडीजङ्घ इति' । नाड्याकारे जङ्घे यस्य नाडीजङ्घः ॥

"नञो जरमरमित्रमृताः" ॥ जरणं जरः, ऋदोरप्, मरणं मरः, अस्मादेव निपातनादप् । ञिमिदा स्नेहने, अस्मात्क्तः, मित्रम् ॥

"सोर्मनसी अलोमोषसी" ॥ मँश्च अश्च मनसी । 'सुप्रथिमेति' । पृथोर्भावः, पृथ्वादिभ्य इमनिच्, रऋतो हलादेर्लघोरिति रादेशः । पीयतइति पयः, पिबतेरिच्चेत्यसुन्, अशेर्देवने युट् चेत्यसुन्, युडागमः, यशः । स्रुरिभ्यां तुट् स्रोतः । 'सुस्रत् सुध्वद् इति' । स्रंसुध्वंसुभ्यां क्विप्, वसुस्रंस्वित्यादिना दत्वं, तस्यासिद्धत्वाद्दत्रासन्तत्वम् । राजतक्षशब्दौ कनिन्युवृषीत्यादिना कनिप्रत्ययान्तौ, लुनातेर्मनिन् लोम, उष दाहे, मिथुनेऽसिरिति वर्तमाने उषः कित् । 'अनिनस्मन् ग्रहणानीति'। अन् इन् अस् मन् इत्येतानि गृह्यन्ते येषु सूत्रेषु तानि तथोक्तानि, तत्र तदन्तविधिं प्रयोजयन्तीति वचनादनर्थकानामप्यनिन्प्रभृतीनां ग्रहणं भवतीत्युक्तं भवति, तेन सुप्रथिमा सुस्रत् सुध्वदित्यादिकमप्युदाहरणमुपपद्यतइति भावः । 'कपि परत्वादिति' । सोर्मनसीइत्यस्यावकाशः, सुकर्म्मा सुशर्मा, कपि पूर्वमित्यस्यावकाशः, अयवकः, सुयवक इत्येकस्थले विप्रतिषेधः ॥

"आद्युदात्तं द्व्यच् छन्दसि" ॥ कुर्भ्रश्चेति वर्तमाने अर्जिदृशिकम्यमिपशिबाधामृजिपशितुग्धुग्दीर्घहकाराश्च, बाधते येन परानिति बाहुः ॥

१ ह्रस्वत्वमिति नास्ति ३ पु॰ ।

"वीरवीर्य्यौ च" ॥ वीर विक्रान्तौ चुरादिः, ततः पचाद्यचि वीरः, अचो यत्, वीर्यं, वीरेषु वा साधुरिति प्राग्घितीयो यत् । 'तत्रेत्यादि' । कथं पुनरेतज्ज्ञापकमित्याह । 'तत्र हि सतीति' । फिषि तु 'बिल्व-भक्ष्यवीर्याणि छन्दसीति' छन्दस्यन्तस्वरितत्वं भाषायां वाद्युदात्तत्वं शब्दस्य स्थितम् ॥

"कूलतीरतूलमूलशालाक्षसममव्ययीभावे" ॥ सुषममित्यादौ सुवि-निर्दुर्भ्यः सुपिसूतिसमा इति षत्वं, तस्यासिद्धत्वात्समशब्द एवायम् । 'तिष्ठद्गुप्रभृतिष्वेते पठ्यन्तइति' । तेनाव्ययीभावसंज्ञा । 'पर्यादिभ्य इत्यादि' । परिप्रत्युपापा इत्यास्यावकाशः, यत्र कूलादयो न सन्ति परि-त्रिगर्तमिति, कूलादीनामाद्युदात्तस्यावकाशः, यत्र पर्यादयो न भवन्ति अवकूलमतिकूलमिति, पर्यादिभ्यः परेषु कूलादिषु विप्रतिषेधः ॥

"कंसमन्थशूर्प्पपाय्यकाण्डं द्विगौ" ॥ 'द्विकंस इति' । द्वाभ्यां कंसा-भ्यां क्रीत इति तद्धितार्थे समासः, 'कंसाट्टिठन्' इति टिठन्, तस्या 'ध्य-र्द्धपूर्वेति' लुक् । 'द्विमन्थ इति' । 'आर्हादगोपुच्छेत्यादि' ना ठक्, शेषं पूर्ववत् । 'द्विशूर्पमिति' । 'शूर्पादञन्यतरस्याम्' । 'द्विपाय्यमिति' । 'पाय्यसान्नाय्येत्यादिना' परिमाणे निपातितः, 'प्राग्वतेष्ठञ्' । 'द्विका-ण्डमिति' । द्वे काण्डे प्रमाणमस्य 'प्रमाणे द्वयसजित्यादिना' मात्रजा-दयः, तेषां प्रमाणे लो द्विगोर्नित्यमिति लुक् ॥

"तत्पुरुषे शालायाञ्चपुंसके" ॥ 'दृढशालमिति' । बहुव्रीहिरयं, तत्र पूर्वपदप्रकृतिस्वर एव भवति, पूर्वपदञ्च निष्ठान्तत्वादन्तोदात्तं, ननु चात्र लक्षणप्रतिपदोक्तपरिभाषयैव भविष्यति, सत्यम् उत्तरार्थं तत्पुरुष-ग्रहणमवश्यं कर्त्तव्यं तदिहैव क्रियते, परिभाषाया अनाश्रयणाय ॥

"कन्था च" ॥ शोभनः शमो यस्य तस्यापत्यं सौशमिः, आङ्-पूर्वात् ह्वयते "रातश्चोपसर्गे" इति कः, चद सान्त्वने, औणादिकः षः, बहुलवचनादिडभावः चष्यः ॥

१ अन्यार्थमिति ३ पु॰ पा॰ ।

"आदिश्चिहणादीनाम्" ॥ चिनोतेः क्विप् चित्, हन्तेः पचाद्यच्, हनः, चिहणं, निपातनात्तलोपो णत्वं च । मल मल्ल धारणे, आभ्यां रप्रत्ययः, निपातनाल्लस्य डत्वं, मडरः मड्डुरः, विगततुलस्येदं वैतुलं, पटदिति कायति, पटत्कः । कै गै रै शब्दे । आतो ऽनुपसर्गे कः । बिडमादत्ते बिडालः । ला आदाने । सोपसर्गादप्यस्मादेव निपातनात्कः, तस्यापत्यं बैडालिः, तस्येव कर्णावस्य बैडालिकर्णः, अपरे[1] तु इकारान्तं पठन्ति, बैडालिकर्णिरिति, कुक्कु रटतीति कुक्कुटः, निपातनाद्रशब्दस्य लोपः, चिनोतेः क्विप् चित्, कणतेरच्, कणः, चिता कणः चिक्कणः, निपातनात्तकारस्य ककारः, तकारमेवान्ये पठन्ति, चिहणादयश्चैते गोत्रनामधेयानि स्मर्यन्ते । 'आदिरिति वर्तमानइति' । पूर्वं ह्यादिग्रहणमुत्तरपदाभिसंबद्धमिह पूर्वपदानां चिहणादीनामाद्युदात्तत्वमिष्यते अतस्तदर्थं पुनरादिग्रहणं कृतम् ॥

"चेलखेटकटुककाण्डं गर्हायाम्" ॥ 'पुत्रचेलमिति' । चेलवत्तुच्छमित्यर्थः । खेट इति तृणनाम, तद्वद् दुर्बला उपानत्, खेटं कटुकमस्वादु, तथा[2] दध्यपि गतस्वादुकत्वात् कटुकं, काण्डमिति शरनाम, तद्यथा सत्त्वपीडाकरमेवं भूतमपि ॥

"चीरमुपमानम्" ॥ 'वस्त्रचीरमिति' । वस्त्रं चीरमिवेति पूर्ववद्व्याघ्रादिसमासः ॥

"कूलसूदस्थलकर्षाः संज्ञायाम्" ॥ 'भाजीसूदमिति' । भाजीशब्दो जानपदादिसूत्रेण ङीषन्तः ॥

"अकर्मधारये राज्यम्" ॥ 'चेलराज्यादिस्वरादिति' । आदिशब्देन वर्ण्यादिस्वरपरिग्रहः, चेलराज्यादिस्वरस्यात्रकाशः भार्याचेलं, ब्राह्मणराज्यं, तत्पुरुषे तुल्यार्थेत्यादिना विहितस्याव्ययस्वरस्यावकाशो निष्कौशाम्बिः, कुचेलं, कुराज्यमित्यत्रोभयप्रसङ्गे पूर्वविप्रतिषेधः ॥

---

१ वैतालिकर्णिरित्यन्ये पठन्तीति मुद्रितपुस्तके पाठस्तत्र वैडालिकर्णिरित्यपेक्षितं, स च पाठः पदमञ्जर्यसम्मतः ।

२ तथा गतस्वादुकत्वादुदश्विदपि कटुकमिति ३ पु० पा० ।

"पुत्रः पुंभ्यः" ॥ कुनटस्यापत्यं कौनटिः, दामकमाहिषकशब्दौ संज्ञायां कचिति कवन्तौ ॥

"नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः" ॥ 'संयुक्ताः स्त्रीसम्बन्धिनः श्यालादय इति'। योगरूढिरेषा तेषां, यथा सम्बन्धिशब्दः। 'ज्ञातयो मातापितृसम्बन्धेन बान्धवा इति'। पितृसम्बन्धिष्वेव तु ज्ञातिशब्दो लोके प्रसिद्धः, आख्याग्रहणमाचार्यादिभिः प्रत्येकमभिसम्बध्यते। 'भ्रातुष्पुत्रइति'। कस्कादिषु पाठात् षत्वम् ॥

"चूर्णादीन्यप्राणिषष्ठ्याः" ॥ चूरी दाहे अस्मात्क्तः, चूर्णं, वा[1] गतिगन्धनयोः, पा रक्षणे, आभ्यां करिशब्द उपपदे आतोनुपसर्गे कः, करिवं करिपं, मद्देरिनण्, बहुलवचनात् शकेरपि भवति, शाकिनं, शकादिभ्योऽटच्, शकटं, तद्वहतीति शकटादण् शाकटं, द्राक् चरति द्राचा, पृषोदरादिः, तुस शब्दे ततो बहुलवचनात् क्तः, उपधादीर्घत्वं च। कुं दुनोति कुत्सितं वा दुनोतीति क्विप्, अस्मादेव निपातनात्तुगभावः पूर्वपदस्य च मुम्, कुन्दुं मिमीते कुन्दुमः, दलेः कपन्, दलपः, चमेरसच् चमसः, ततो जातिलक्षणे ङीष्, चमसी, कनी दीप्तिकान्तिगतिषु, अस्मात् पचाद्यच्, अस्मादेव निपातनाद् द्विर्वचनं, चकनः, चक्कन इत्यन्ये पठन्ति, तत्रापि निपातनादेव रूपसिद्धिः, चोलस्यापत्यं द्व्यच इत्यण्, चौलः। एते चूर्णादयः। 'पूर्वाचार्योपचारेणेति'। उपचारः प्रयोगः ॥

"कुण्डं वनम्" ॥ 'कुण्डशब्दोऽत्रेत्यादि'। जनविशेषाभिधायी कुण्डशब्दस्तस्य नान्तरेण सादृश्यं ततोऽन्यत्र वने वृत्तिः सम्भवतीति भावः, अन्ये तु वनेपि मुख्य एव कुण्डशब्द इत्याहुः। तत्र वनशब्देन विशेषणेन भाजनविशेषवाची निवर्त्यते, समुदायवाची चात्र वनशब्दो न तूदकवाची, आह हि कुण्डाद्युदात्तत्वे तत्समुदायग्रहणमिति, तच्छब्देन पूर्वपदार्थः परामृश्यते, अपर आह। वनसमुदाये इति वक्तव्यम्, न तु वनइति, तेन शरवणसमुदायः शरकुण्डशब्देनोच्यतइति ॥

[1] वा गतिगन्धनयोः, करिणं वातीति करिवः। पा रक्षणे, अस्मादपि आतोनुपसर्गे कः। करिप इति ३ पु॰ पा॰।

स्यते । मीनातु । मीनीतम् । अमीनात् । अमीनीत । मीनीयात् । मीनीत । आशिषि । मीयात् । यासुटः क्ङित्वादनेज्विषयत्वान्नात्वम् । मासीष्ट, अमासीत् । अमासिष्टाम् । अमास्त । अमासाताम् । आत्वे 'यमरमनमातामि'ति सगिटौ । सनि मित्सति । मित्सते । 'सनिमीमे'त्यच इस् । 'सः स्यार्द्धधातुके' इति तत्वम् । 'अत्र लोप' इत्यभ्यासलोपः । मेमीयते । मेमेति । 'मीनातीति' श्तिपा निर्देशाच्चात्वम् । मापयति । आत्वे पुक् । अमीमपत् । प्रमीणाति । 'हिनुमीने'त्युपसर्गस्थान्निमित्तात्परस्य मीनाशब्दनकारस्य णत्वं, प्रमीणीतः, प्रमीणन्तीत्यादौ परनिमित्तकस्येत्वस्याल्लोपस्य च पूर्वविधौ स्थानिवत्त्वादेकदेशविकृतस्यानन्यत्वाद्वा णत्वम् । मीत्वा । मीतः । मीतवान् । प्रमाय । 'मीनाती'ति ल्यप्यात्वम् । ईषत्प्रमयः । मयः । 'निमिमीलियां खलचोः प्रतिषेध' इत्यात्वनिषेधः ॥ ४ ॥

षिञ् बन्धने ॥ सिनाति । सिनीते । इत्यादि क्रीवत् । सिषाय । सेष्यतीत्यादि । 'आदेशप्रत्यययोरि'ति षत्वं, सिष्युरित्यादौ 'वेरनेकाच' इति यण् । सिसीषतीत्यत्र 'स्तौतिण्योरि'त्यषत्वम् । 'अज्झनगमे'ति दीर्घः । सितः । सितवान् ॥ ५ ॥

स्कुञ् आप्रवणे ॥ सौत्रोयमित्याचार्या इति । 'स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्चे'त्यत्र वृत्तिकारः, एते सौत्रा धातवः, स्कुञ् आप्रवणे क्र्यादिरिति । स्कुनाति । स्कुनीतः । स्कुनन्ति । स्कुनासि । स्कुनामि । स्कुनीते । स्कुनीषे । चुस्काव । चुस्कुवतुः । चुस्कविथ । चुस्कोथ । चुस्कुव । चुस्कुविव । चुस्कुवे, चुस्कुविषे । चुस्कुविवहे । 'शर्पूर्वा' इति खयः शेषः, स्कोता । स्कोष्यति । स्कोष्यते । स्कुनातु । स्कुनीताम् । स्कुनीहि । स्कुनानि । स्कुनाव । स्कुनीताम् । स्कुनाताम् । स्कुनीष्व । स्कुनै । स्कुनावहै । स्कुनोतु । स्कुनुताम् । स्कुन्वन्तु । स्कुनु । स्कुनवानि । स्कुनुताम् । स्कुन्वाताम् । स्कुन्वताम् । स्कुनीष्व । स्कुनवै । अस्कुनात् । अस्कुनीताम् । अस्कुनाः । अस्कुनाम् । अस्कुनीत । अस्कुनाताम् । अस्कुनीथाः । अस्कुनि । अस्कुनीवहि । स्कुनीयात् । स्कु-

नीथाः । स्कुनीयाम् । स्कुनीत । स्कुनीयाताम् । स्कुनीयाः । स्कुनीय । स्कुनुयात् । स्कुन्वीत । स्कुन्वीथाः । स्कुन्वीय । आशिषि । स्कूयात् । स्कूयास्ताम् । स्कोषीष्ट । स्कोषीय । अस्कौषीत् । अस्कौष्टाम् । अस्कोष्ट । अस्कोषाताम् । चुस्कूषति । चुस्कूषते । चोस्कूयते । चोस्कोति । स्कावयति । अचुस्कवत् । स्कुत्वा । स्कुतः, स्कुतवान् ॥ ६ ॥

युञ् बन्धने ॥ युनाति । युनीते, योता, इत्यादि स्कुनातिवत् । युयूषतीत्यत्र 'सनीवन्तर्द्ध' त्यादौ युग्रहणेन ऊर्णुञ्साहचर्यान्निरनुबन्धकत्वाच्च मिश्रणार्थस्यादादिकस्य ग्रहणादिड्विकल्पो न भवति । क्र्यादयोनुदात्ता उभयतो भाषाः ॥ ७ ॥

अथ सेट आह ॥

क्नूञ् शब्दे ॥ एतदादयो धूञन्ता उदात्ता उभयतो भाषाः । क्नूनाति । क्नूनीते, इत्यादि स्कूनातिवत् । चुक्नाव । चुक्नुवतुः । चुक्नुवे । चुक्नुवाते । आर्द्धधातुके त्विड्भवति । क्नविता । क्नविष्यति । क्नविषीष्ट । अक्नावीत् । अक्नविष्टाः, सनि तूगन्तत्वा 'त्सनि ग्रहगुहोश्चे' तीण्निषेधः । चुक्नूषति । चुक्नूषते, इत्यादि ॥ ८ ॥

द्रूञ् हिंसायाम् ॥ द्रूणाति, द्रूणीते, इत्यादि क्नूञ्वत्[1] ॥ ९ ॥

पूञ् पवने ॥ पवनं पूतीकरणं, सकर्मकोयम् । तथा च पुनात्यग्निं, पुनीते आत्मानं कर्षकेण, वल्लजं[2] पुपूषतइत्यादौ सकर्मकत्वं दृश्यते । पुनाति । पुनासि । पुनामि । पुनीते । पुनीषे । पुने । 'प्वादीनां ह्रस्व' इति शिति परे ह्रस्वः । पुपाव । पुपुवतुः । पुपविथ । पुपुविव । पुपुवे, पुपुविरे । पुपुविषे । पुपुवे । पविता । पविष्यति । पविष्यते । पुनातु । पुनीताम् । पुनीष्व । पुनै । अपुनात् । अपुनीताम् । अपुनाः । अपुनाम् । अपुनीव । अपुनीत । अपुनाताम् । अपुनीथाः । अपुनि । अपुनीवहि । पुनीयात् । पुनीयाः । पुनीयाम् । पुनीत । पुनीयाताम् । पुनीयाः । पुनीय । आशिषि । पूयात् । पूयास्ताम् । पविषीष्ट । अपा-

१ क्नूनातिवदिति ४ पु० पा० ।
२ शालजान् इति ४ पु० पा० ।

वीत् । अपाविष्टाम् । अपाविषुः । अपविष्ट । पुपूषति । पुपूषते । उगन्तत्वादनिट्त्वं । पोपूयते । पोपोति । पावयति । अपीपवत् । 'ओः पुयण्ज्यी' त्यभ्यासस्येत्वम् । 'दीर्घो लघो' रिति दीर्घः । पूत्वा । पूतः । पूना यवाः । विनष्टा इत्यर्थः । 'पूञो विनाश' इति निष्ठानत्वम् । शेषाः कृतः पवतिवत् ॥ १० ॥

'लूञ् छेदने ॥ लुनाति । लुनीते, इत्यादि पुनातिवत् । लवित्रम् । 'अर्तिलु'–इति इत्रः । लूत्वा । लूनः । 'ल्वादिभ्य' इति निष्ठानत्वम् । लूनिः । 'ऋल्वादिभ्यः क्तिन्निष्ठावदि' ति नत्वम् । लवकः । 'प्रसृल्वः समभिहारे वुन्' इति वुन् । अभिलावः । 'निरभ्योः पूल्वोः' इति घञ् । अपोपवादः । लोत्रं, करणे ष्ट्रन् । लोतः । 'हसिमृग्रिण्वामिदमिलूपूधूर्विभ्यस्तन्' इति तन् । उभयत्र 'तितुत्रे' तीणिनषेधः ॥ ११ ॥

स्तॄञ् आच्छादने ॥ स्तृणाति । स्तृणासि । स्तृणामि । स्तृणीते । स्तृणीषे । स्तृणे, तस्तार । तस्तरतुः । तस्तरिथ । तस्तरिव । तस्तरे । तस्तरिषे । तस्तरिवहे । 'ऋच्छत्यॄतामि' ति गुणः । वृद्धिविषये तु पूर्वविप्रतिषेधेन वृद्धिः । कृते वा गुणे वृद्धिरित्युक्तम् । स्तरिता । स्तरीता । स्तरिष्यति । स्तरीष्यते । स्तरीष्यति । स्तरिष्यते । 'वॄतो वे'- त्यलिटीटो दीर्घविकल्पः । स्तृणातु । स्तृणीहि । स्तृणानि । स्तृणाव । स्तृणीताम् । स्तृणीष्व । स्तृणै । अस्तृणात् । अस्तृणीताम् । अस्तृणाः । अस्तृणाम् । अस्तृणीत । अस्तृणीयातां, स्तृणीत, । स्तीर्यात् । स्तीर्षीष्ट । स्तरिषीष्ट । 'लिङ्सिचोरात्मनेपदेष्वि' तीड्विकल्पः । 'उश्चे' ति कित्त्वम् । इट्पक्षे 'वॄत' इति दीर्घस्य 'न लिङी' ति निषेधः । अस्तारीत् । अस्तरिष्टाम् । 'सिचि च परस्मैपदेष्वि' तीटो न दीर्घः । अस्तीर्ष्ट । अस्तरीष्ट । अस्तरिष्ट । 'लिङ्सिचोरि' तीड्विकल्पः, इटि 'वॄत' इति वा दीर्घः । अनिटि 'उश्चे' ति कित्त्वम् । तिस्तीर्षति । तिस्तरिषति । तिस्तरीषति । 'इट् सनि वे' ति वेट् । इटि पूर्ववद्दीर्घः । स्तारयति । अतस्तरत् । 'अत्स्मृदृत्वरे' त्यभ्यासस्यात्वम् । मणिप्रस्तारः । 'प्रे स्त्रो ऽयज्ञे' इति घञ् । यज्ञविषये त्वपि प्रस्तरः । विस्तारः ।

'प्रथने वावशब्दे' इति घञ्। शब्दविषये तु विस्तरः। विष्टारः। पङ्क्तिच्छन्दः। 'छन्दोनाम्नि चे'ति योगाभ्यां घञ्षत्वे। अवस्तारः। 'अवे तृस्त्रोर्घञि' ति करणाधिकरणयोर्घञ्। स्तीर्णः। स्तीर्णिः। 'ऋल्वादिभ्यः क्तिन्निष्ठावदि'ति नत्वम्॥ १२॥

कॄञ् हिंसायाम्॥ कृणाति। कृणीते। चकार। चकरतुः, चकरुः। इत्यादि स्तृणातिवत्॥ १३॥

वॄञ् वरणे॥ वृणाति। वृणीते। ववार। ववरे। वरिता। वरीता. वरिष्यति। वरीष्यति। वरिष्यते। वरीष्यते। वृणातु। वृणीताम्। अवृणात्। अवृणीत। वृणीयात्। वृणीत। आशिषि वूर्यात्। 'उदोष्ठ्यपूर्वस्ये' त्यगुणवृद्धिविषये उत्वे रपरत्वे च 'हलि चे' ति दीर्घः। वरिषीष्ट। वूर्षीष्ट। 'लिङ्सिचोरात्मनेपदेष्वि' तीडभावपक्षे 'उश्चे' तिकित्त्वादुत्वादि। इट्पक्षे पूर्ववच्च 'लिङी' ति अदीर्घत्वम्। अवारीत्। अवारिष्टाम्। पूर्ववत् 'वृत' इति दीर्घस्य 'सिचि च परस्मैपदेष्वि'ति निषेधः। अवरिष्ट। अवरीष्ट। अवूर्ष्ट। 'लिङ्सिचो' रितीड्विकल्पे 'वृत' इति दीर्घः। अनिटि 'उश्चे' ति कित्त्वादुत्वादि। वुवूर्षति। विवरिषति। विवरीषति। 'इट् सनि वे' तीड्विकल्पे 'वृत' इति दीर्घविकल्पः। अनिटि 'इको झलि'ति सनः कित्त्वे उत्वादि। वोवूर्यते। वार्वर्ति। 'ऋतश्चे' ति तपरनिर्देशाच्च रुगादीत्युक्तम्। वारयति। अवीवरत्। वूर्णः, वूर्णवान्। वूर्णिः॥ १४॥

धूञ् कम्पने॥ धुनाति। धुनीते। दुधाव। दुधुवतुः। दुधविथ, दुधुविव। दुधुविम। दुधुवे। दुधुविषे। दुधुविढ्वे। दुधुविध्वे। दुधुविवहे। 'स्वरत्या' दिसूत्रेण प्राप्तमार्द्धधातुकानिबन्धनमिड्विकल्पं पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यात् 'श्र्युकः क्किती' ति निषेधो बाधते, तमपि क्रादिनियमो बाधतइति नित्यमिडित्यादि तत्त्व[1] तत्रोक्तम्। धोता। धविता। धोष्यति। धविष्यति। धोष्यते। धविष्यते। 'स्वरत्यादि' नेड्विकल्पः।

१ तत्त्वमिति ४ पु॰ पा॰।

धुनातु । धुनीताम् । अधुनात् । अधुनीत । धुनीयात् । धुनीत । आशिषि धूयात् । धोषीष्ट । धविषीष्ट । अधावीत् । अधाविष्टाम् । अधोष्ट । अधविष्ट । 'स्तुसुधूञ्भ्यः परस्मैपदेष्वि' ति नित्यं सिच इट् । दुधूषति । दुधूषते । 'सनि ग्रहगुहोश्चे' तीण्निषेधः पूर्ववत्पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यात् 'स्वरत्यादि' विकल्पम्बाधते । दोधूयते । दोधोति । धूनयति । अदूधुनत् । 'धूञ्प्रीञोर्नुगि' ति नुक् । धूत्वा । पूर्ववत् 'श्र्युकः किती' तीण्निषेधः, धूतम् । 'यस्य विभाषे' त्यनिट्त्वं, धुनोति, धूनोतीति स्वादौ । धुवतीति कुटादौ । क्रूञादय उदात्ता उभयतो भाषाः ॥ १५ ॥

शॄ हिंसायाम् ॥ इतो गृणात्यन्ता उदात्ता उदात्तेतः । शृणाति । शृणीतः । शृणासि । शृणामि । शशार । शश्रतुः । शशरतुः । शश्रुः । शशरुः । शशरिथ । शश्र । शशार । शशिर । शश्रिव । शशरिव । 'असंयोगाल्लिडि' त्यपितो लिटः कित्त्वे 'शॄदॄप्रां ह्रस्वो वे' ति ह्रस्वपक्षे यणादेशः । अन्यदा 'ऋच्छत्यॄता' मिति गुणः । अपितो लिटः कित्त्वेन 'श्र्युकः किती' ति प्राप्तस्येण्निषेधस्य क्रादिनियमेन बाधः । शरिता । शरीता । शरिष्यति । शरीष्यति । शृणातु । शृणीताम् । शृणीहि । अशृणात् । अशृणीताम् । अशृणाः । अशृणाम् । अशृणीव । शृणीयात् । शृणीयाताम् । आशिषि शीर्यात् । शीर्यास्ताम् । 'ॠत इद्धातोरि' तीत्वे रपरत्वादि । अशारीत् । अशारिष्टाम् । इटो दीर्घस्य 'सिचि च परस्मैपदेष्वि' ति निषेधः । शिशरिषति । शिशरीषति । शिशीर्षति । 'इट् सनि वे' ति पाक्षिकस्येटो 'वॄत' इति दीर्घः । अनि टी 'को झलि'-ति सनः कित्त्वादित्वम्, शेशीर्यते, शाशर्ति । शारयति । अशीशरत् । शारो वायुर्वर्णश्च । नीशारः । अक्तप्रावरणः, ने 'रुपसर्गस्य घञी' ति दीर्घः । 'शॄवायुवर्णनिवृत्तेष्विति' घञ् । निव्रियतइति निवृत्तं प्रावारः । शारुकः । 'लषपतपदे' त्यादिनोकञ् । शरारुः । 'शॄवन्द्योरारुरि' त्यारुः । किंशारुः सस्यशूकं, 'किञ्जरयोः श्रिण' इति किंशब्दउपपदे उण् । शरुः, आयुधं, 'शॄस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्चे' त्यु-

प्रत्ययः । शरीरं 'कॄशॄपॄकटिपटिशौटिभ्य ईरन्' इति ईरन् प्रत्ययः । शरत् । 'शॄदॄभसोऽदिरि'त्यदिप्रत्ययः । शरदिजः । 'प्रावृट्शरत्कालदिवां जे' इत्यलुक् । शरदि भवं श्राद्धं शारदिकं, 'श्राद्धे शरद' इति ठञ् । ऋत्वणोपवादः । शारदो रोगः । शारदिको रोगः । 'विभाषा रोगातपयो'रिति वा ठञ् । अन्यदा ऋत्वण् । एवमातपेऽपि । शारदका मुद्गाः । शारदका दर्भाः । 'संज्ञायां शरदो वुञि'ति तत्र जात इत्यस्मिन्विषये वुञ् । दर्भविशेषस्य मुद्गविशेषस्य चेयं संज्ञा । परा शृणातीति परशुः । 'आङ्परयोः खनिशॄभ्यां डिच्चे'त्युप्रत्ययः । डित्वाट्टिलोपः । बाहुलकात्परोपसर्गस्य ह्रस्वः, परशवे हितं परशव्यम् । 'उगवादिभ्यो यदि'ति यत् । परशव्यस्य विकारः पारशवम् । 'कंसीयपरशव्ययोर्यञञौ लुक् चे'त्यञ्प्रत्ययः, यत्प्रत्ययस्य लुक्,[1] पराशृणाति पापानीति पराशरः, अच् । पाराशर्यः, गर्गादित्वादपत्ये यञ् । पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीयानाः पाराशरिणः । 'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोरि'ति प्रोक्ते णिनौ तदन्ता 'च्छन्दोब्राह्मणानी'त्यध्येतृवेदित्रोरणः 'प्रोक्ताल्लुगि'ति लुक् । सूत्रस्यापि छन्दस्त्वं तत्रेष्यते, णिनावल्लोपयलोपौ ॥ १६ ॥

पॄ पालनपूरणयोः ॥ पृणाति । पपार । पपरतुः । पप्रतुः । परिता । परीता । परिष्यति । परीष्यति । पृणातु । अपृणात् । पृणीयात् । आशिषि पूर्यात् । 'उदोष्ठ्यपूर्वस्ये'त्युत्वम् । अपारीत् । अपारिष्टाम् । पिपरिषति । पिपरीषति । पुपूर्षति । 'इट् सनि वे'तीडभावे 'इको झलि'ति कित्त्वादुत्वादि । पोपूर्यते । पापर्ति । पारयति । अपीपरत् । पूर्तः, पूर्तवान् । 'न ध्याख्यापॄमूर्छिमदामि'ति नत्वनिषेधः, 'उदोष्ठ्यपूर्वस्ये'त्युत्वम् । निष्ठानत्ववर्जं प्रक्रिया शृणातिवत् ॥ १७ ॥

वॄ वरणे ॥ वृणातीत्यादि वृञ्वत् । तेनैव वृणातीत्यादिसिद्धावपि पुनरस्योपादाने न प्रयोजनम् । नैतद्युक्तम् । वृञो ञित्त्वात्सिद्धेऽपि पदद्वये यदञितो वचस्तत्कर्त्रभिप्राये क्रियाफले परस्मैपदसिद्धय-

१ आशरः, पचाद्यजित्यधिकं ४ पु० ।

इति । आद्यं पवर्गतृतीयादिं बहवः पठन्तीति पुरुषकारेणोक्तम् । तत्राद्य-शब्देन जित् वृणातिरुच्यते, स्वामिशाकटायनावप्येवं पठित्वा भरणमर्थ-माहतुः ॥ १८ ॥

भॄ भर्त्सने ॥ भरणेप्येके । भृणाति । बभारेत्यादि वॄञ्वत् । भरः । 'ॠदोरप्' । भरणे न निर्वृत्तं भरिमं, 'भावप्रत्ययान्तादिमब्वक्तव्य' इतीमप् ॥ १९ ॥

मॄ हिंसायाम् ॥ मृणाति । ममारेत्यादि वॄवत् । म्रियतइति तुदादौ ॥ २० ॥

दॄ विदारणे ॥ दृणाति । ददार । ददरतुः । दद्रतुः । ददरुः । दद्रुरित्यादि शृणातिवत् । विशेषस्तु 'अत्स्मृदृत्वरे'त्यभ्यासस्य णौ चङ्यत्वमददरदिति । अयं घटादिपाठान्मित् । भये दरयति । अन्यत्र दारयति । दरः । अप्, दरी । गौरादित्वान्ङीष् । पुरंदरः । 'पूःसर्वयो-र्दारिसहोरि' ति खच् । भगंदरः । 'भगे च दारेरिति वक्तव्या'त्खच् । 'खचि ह्रस्व' इति उत्तरपदस्य ह्रस्वः । दारः । 'दारजारौ कर्तरि णिलुक् चे' ति घञि णिलुक् । दरत् जनपदः । 'शॄदॄभसोऽदि' रित्यदिप्रत्ययः । दृषत् । 'दृणातेः षुक् ह्रस्वश्चे'ति षुगागमो धातोर्ह्रस्वो ऽदिश्च प्रत्ययः । द्रियते इति तुदादौ ॥ २१ ॥

जॄ वयोहानौ ॥ श्नाविषये जृणातीत्यादि । अन्यत्र जारयतिवत् । यथा तु भाष्यवार्तिकवृत्तिन्यासपदमञ्जर्यादि तथायं धातुर्नास्तीति प्रतीयतइति जीर्यतावुपपादितम् । आत्रेयमैत्रेयदैवपुरुषकारादिषु दर्श-नादिहास्माभिर्लिखितः ॥ २२ ॥

धॄ इति त्वेके इति मैत्रेयः । धृणातीत्यादि ॥ २३ ॥

नॄ नये ॥ नृणाति । नीर्णम् । नीर्णवान् । नरः । पचाद्यच् । ना । 'नयतेर्डिच्चे' ति नयतेर्ऋन्प्रत्ययः स च डित् । नारी । 'नृन-रयोर्वृद्धिश्चे'ति शार्ङ्गरवादिपाठान्ङीन् वृद्धिश्च ॥ २४ ॥

कॄ हिंसायाम् ॥ कृणातीत्यादि कॄञ्वत् । तेनैव सिद्धे पुनः पाठः कर्त्रभिप्राये क्रियाफलेपि वृणातिवत्परस्मैपदार्थः ॥ मॄ हिंसायामित्येक इति मैत्रेयः, एवं वदतो ऽस्य पूर्वं मृणातेः पाठोऽनभिमत इति प्रतीयते ॥ २५ ॥

ऋ गतौ ॥ ऋणाति । ऋणीतः । ऋणासि । ऋणामि । अराञ्चकारेत्यादि, 'इजादेश्च गुरुमत' इत्याम् । अरिता । अरीता । अरिष्यति । अरीष्यति । ऋणातु । ऋणीताम् । ऋणीहि । ऋणानि । आर्णात् । आर्णीताम् । आर्णाः । आर्णाम् । आर्णीव । ऋणीयात् । ऋणीयाताम् । आशिषि ईर्यात् । ईर्यास्ताम् । इत्त्वरपरत्वा[1]दि । आरीत् । आरिष्टाम् । 'सिचि च परस्मैपदेष्वि'तीटो न दीर्घः । अरिरिषति । अरिरीषति । ईर्षिषति । 'इट् सनि वे' तीड्विकल्पः, इटि गुणः, पूर्ववद्वा दीर्घश्च, अनिटि सनः कित्त्वादित्त्वादि, 'न न्द्रा' इति रेफवर्जितस्य द्विर्वनम् । आरयति, माभवानरिरत्, ईर्त्वा, समीर्णः, समीर्णवान् । 'उदोष्ठ्यपूर्वस्ये' त्यत्र प्रत्यासत्त्याऽङ्गावयव एवोष्ठ्यो गृह्यतइत्युत्त्वमत्र न भवति । ऋच्छतीति शपि । इयर्त्तीति श्लौ ॥ २६ ॥

गॄ शब्दे ॥ गृणाति । जगारेत्यादि पूर्ववत् । 'अवाद्ग्र'ईति तङस्य न भवति । तथा च भाष्यम् । न चावपूर्वस्य गृणातेः प्रयोगोऽस्तीति । 'समः प्रतिज्ञान' इत्यत्र पूर्वसूत्रगृहीतस्यानुवृत्तिरिति सङ्गृणातीत्यत्र तङ् न भवति । होत्रेऽनुगृणाति, प्रतिगृणाति । 'अनुप्रतिगृणश्चे' त्यनुपूर्वस्य प्रतिपूर्वस्य च गृणातेः कारकं पूर्वस्याः क्रियायाः कर्तृभूतं सम्प्रदा[2]नमिति होतुः सम्प्रदानत्वम् । होता चात्र पूर्वक्रियायां शंसने कर्ता भवति । अनुगरः प्रतिगर इति हि शंसितुः प्रोत्साहनमुच्यते । तदयं वाक्यार्थः । प्रथमं शंसति होता तमन्यः[3] प्रोत्साहयतीति । जेगिल्यते । जागर्त्ति । जागीर्त्तः ।. 'लुपसदे' त्यादावकारविकरणैः साहचर्यात्तौदादिकस्यैव ग्रहणमिति क्रियासमभिहारएवायं यङ् । इत्त्वरपरत्वयोः 'पूर्वत्रासिद्ध'मिति पूर्वं 'ग्रो यङी' ति लत्वे रेफाभावाच्च 'हलि चे' ति दीर्घः । लत्वे हि गिरति गृणात्योर्द्वयोर्ग्रहणमुक्तम् । गृणातिप्रभृतय उदात्ता उदात्तेतः ॥ २७ ॥

ज्या वयोहानौ ॥ एतदादयो बध्नात्यन्ता अनुदात्ता उदात्तेतः । जिनाति । जिनीतः । जिनासि । जिनामि । जिनीवः । 'ग्रहिज्या' दिना सम्प्र-

१ दीर्घत्यधिकं ३ पु० । २ संज्ञकमिति ३ पु० पा० ।
३ अध्वर्युरिति ४ पु० पा० ।

सारणे पूर्वरूपत्वे 'हल' इति दीर्घे प्वादित्वाद्ध्रस्वः । जिज्यौ । जिज्यतुः । जिज्यिथ । जिज्याथ । जिज्यिव । क्रादिनियमादिट् । थलि भारद्वाजनियमाद्विकल्पः । क्ङिति परत्वात् पूर्वं सम्प्रसारणे द्विर्वचनम् । अक्ङिति 'लिट्यभ्यासस्योभयेषा'मित्यभ्यासस्य सम्प्रसारणम् । ज्याता ज्यास्यति । जिनातु । जिनीताम् । जिनीहि । जिनानि । जिनाव । अजिनात् । अजिनीताम् । अजिनाः । अजिनाम् । अजिनिव । जिनीयात् । जिनीयाताम् । जिनीयाः । जिनीयाम् । आशिषि । जीयात् । जीयास्ताम् । अज्यासीत् । अज्यासिष्टाम् । 'यमरमनमाता'मिति सगिटौ । जिज्यासति । जेजीयते । जाज्याति । ज्यापयति । अजिज्यपत् । जीत्वा । जीनः । 'ल्वादिभ्य' इति निष्ठानत्वं, 'हल' इति दीर्घः । प्रज्याय । 'ज्यश्चे'ति ल्यपि सम्प्रसारणनिषेधः । ज्यानिः । '[1]ग्लाम्लाज्याहाभ्यो नि'रिति निः ॥ २८ ॥

री गतिरेषणयोः ॥ रेषणं वृकशब्दः । रिणाति । रिणीतः । रिणासि । रिणामि । रिराय । रिरियतुः । रिरयिथ । रिरेथ । रिरयिव, क्रादिनियमादिट् । थलि तु भारद्वाजनियमाद्विकल्पः । अज्ञादावे 'रनेकाच' इति यणो ऽसिद्धत्वा'द्धलि च' 'उपधायाश्चे'ति दीर्घत्वञ्च भवति । रिणातु । रिणीहि । रिणानि । अरिणात् । अरिणीताम् । अरिणाः । अरिणाम् । रिणीयाताम् । आशिषि रीयात् । रीयास्ताम् । अरैषीत् । अरैष्टाम् । रिरीषति । रेरीयते । रेपयति । अरीरपत् । 'अर्त्तिह्रीव्ली'त्यादिना पुक् । शेषं रीयतिवत् ॥ २९ ॥

ली श्लेषणे ॥ लिनाति । लिनातु । अलिनात् । लिनीयात् । ललौ । लिलाय । लिल्यतुः । ललाथ । लिलेथ । लिलयिथ । लिल्यिव । 'विभाषा लीयते'रित्येज्विषये ल्यपि वाऽऽत्त्वविकल्पः । क्ङिति लिटि एज्विषयत्वाभावान्नात्त्वम् । लाता । लेतेत्यादि सर्वं लीयतिवन्नेयम् ॥ ३० ॥

[1] 'विज्याज्वरिभ्यो निः,' वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्' इत्येताभ्यां ज्यानिः, ग्लानिरिति संसाध्य बाहुलकात् म्लानिरित्युक्तमुणादिव्याख्याने भट्टोजीदीक्षितैः ।

ब्ली वरणे ॥ ब्लिनाति । ब्लिनीतः । ब्लिनासि । ब्लिनामि । बिब्लाय । बिब्लियतुः । बिब्लेथ । बिब्लयिथ । बिब्लियिव । ब्लेता । ब्लेष्यति । ब्लिनातु । ब्लिनीहि । ब्लिनानि । अब्लिनात् । ब्लिनीयात् । अब्लैषीत् । अब्लैष्टाम् । बिब्लीषति । बेब्लीयते । ब्लेपयति । अबिब्लिपत् । 'अर्त्तिह्री' त्यादिना पुक् । ब्लीत्वा, ब्लीनः । ल्वादित्वान्निष्ठानत्वम् । प्रहीणं ब्लीनाति, नैनं दक्षिणा ब्लीनाति, इत्यादौ दीर्घश्छान्दसः ॥ ३१ ॥

प्ली गतौ ॥ ओष्ठ्यादिः । प्लिनातीत्यादि ब्लिनातिवत् । के चिदमुं दन्त्योष्ठ्यादिं पठन्तो ब्ली वरणइत्यमुं न पेठुः, मैत्रेयस्तु वरणार्थं पठित्वा ऽमुं न पपाठ ॥ ३२ ॥

वृत् ॥ ल्वादिपरिसमाप्त्यर्थोऽयम् । अन्ये तु प्वादीनामपि परिसमाप्त्यर्थमिति, तत्रानन्तर्यात् 'ज्ञाजनोर्जा' इति दीर्घनिर्द्देशाच्च ल्वादिपरिसमाप्त्यर्थत्वमेव युक्तं, जेति ह्रस्वान्तादेशेऽपि जायते जानातीत्यादौ 'वतो दीर्घो यञीति' दीर्घेण सिद्धे प्वादित्वाज्जानातीत्यत्र ह्रस्वो माभूदिति हि दीर्घत्वम्, उक्तं चैवं हरदत्तादिभिरपि ॥

व्री वरणे ॥ व्रीणाति । व्रीणीतः । व्रीणासि । व्रीणामि । विव्राय । विव्रियतुः । विव्रेथ । विव्रियिव । व्रेता । व्रेष्यति । व्रीणातु । व्रीणीतात् । व्रीणीहि । व्रीणानि । अव्रीणात् । अव्रीणीताम् । अव्रीणाः । अव्रीणाम् । व्रीणीयात् । आशिषि व्रीयात् । अव्रैषीत् । अव्रैष्टाम् । विव्रीषति । वेव्रीयते । वेव्रेति । व्राययति । अविव्रयत् । स्वामिकाश्यपादयोऽर्तिह्रीव्रीतिपठन्तो व्रेपयतीति पुकं प्रतिपन्नाः ॥ ३३ ॥

भ्री भये ॥ भरणइत्येके । भ्रीणातीत्यादि व्रीवत् ॥ ३४ ॥

क्षीष् हिंसायाम् ॥ क्षीणाति । चिक्षायेत्यादि व्रीवत् । षित्त्वादङ्, क्षीयः । क्षीत्वा । क्षीतवान् । 'क्षियो दीर्घा' दिति निष्ठानत्वं ह्रस्वान्तस्य क्षियो 'निष्ठायामण्यदर्थे' इति कृतदीर्घस्य । क्षये क्षयतीति शपि । क्षियतीति निवासगत्योः । क्षिणोतीति तनोत्यादौ हिंसायाम् ॥ ३५ ॥

ज्ञा अवबोधने ॥ जानाति । जानीतः । जानन्ति । जानासि । जानामि । जानीवः । 'ज्ञा जनोर्जे' ति शित्प्रत्यये जादेशः । दीर्घनिर्देशसामर्थ्यात् 'प्वादीना' मिति ह्रस्वो नेति ल्वी गतावित्यत्रोक्तम् । जज्ञौ । जज्ञतुः । जज्ञिथ । जज्ञाथ । जज्ञिव । क्रादिनियमादिट् । थलि भारद्वाजनियमाद्विकल्पः । ज्ञाता । ज्ञास्यति । जानातु । जानीहि । जानानि । अजानात्, अजानीताम् । अजानाम् । जानीयात् । आशिषि ज्ञायात् । ज्ञायास्ताम् । ज्ञेयात्, ज्ञेयास्ताम् । 'वाऽन्यस्यसँय्योगादे' रित्येत्वविकल्पः । अज्ञासीत् । अज्ञासिष्टाम् । शतमपजानीते । अपलपतीत्यर्थः । 'अपह्नवे ज्ञ' इति तङ् । सोपसर्गोयमपह्नवे वर्त्तते । सर्पिषो जानीते । सर्पिषोपाये[१]न प्रवर्त्ततइत्यर्थः । 'अकर्म्मकाच्चे'ति तङ् । 'ज्ञोऽविदर्थस्यकरणे'इति शेषत्वेन विवक्षिते षष्ठी । मात्रा सञ्जानीते । मातरं सञ्जानीते, शतं प्रतिजानीते, 'सम्प्रतिभ्यामनाध्यान' इति तङ् । सम्पूर्वत्वे 'संज्ञोऽन्यतरस्यां कर्म्मणी' ति पक्षे तृतीया । आध्यानमुत्कण्ठापूर्वकं स्मरणं, ततोऽन्यदनाध्यानम् । आध्याने तु मातुः सञ्जानाति । 'अधीगर्थे' ति कर्म्मणि शेषे षष्ठी । अशेषे तु 'संज्ञ' इति द्वितीयातृतीये भवतः । मातरं सञ्जानाति । मात्रा सञ्जानाति । कृद्योगे तु मातुः संज्ञानम् । कृद्योगलक्षणा षष्ठी परत्वाद्भवति, धर्म्मञ्जानीते । 'अनुपसर्गाज्ज्ञ' इति कर्त्रभिप्राये तङ् । स्वयं जानाति जानीतइति वा, 'विभाषोपपदेन प्रतीयमाने' इति कर्त्रभिप्रायत्वे उपपदेन द्योत्यमाने तद्विकल्पः । धर्म्मञ्जिज्ञासते । 'ज्ञाश्रुस्मृदृशां सन' इति तङ् । सकर्मकार्थमिदमकर्मकात्तु 'पूर्ववत्सन' तङ् सिद्धः । अनुजिज्ञासति पुत्रं, 'नानोर्ज्ञ' इति तङ्निषेधः । अयं च मध्येपवादन्यायेन 'ज्ञाश्रुस्मृदृशामि' त्यस्यापवादः । तेनौषधस्यानुजिज्ञासते इत्यत्र 'पूर्ववत्सन' इत्यकर्मकत्वनिबन्धनस्तङ् भवति । औषधेन प्रवर्तितुमिच्छतीत्यर्थः । जाज्ञायते,जाज्ञाति । ज्ञापयति । अजिज्ञपत् । मारणादौ ज्ञपयति घटादित्वान्मित्त्वं प्रपञ्चोघटादावेवावगन्तव्यः । जानातीति ज्ञा, 'इगुपधे'ति 'श्याद्व्धे' ति णापवादे के आल्लो-

१ भूतेनेत्यधिकम् ४ पु० ।

पः । पन्थानं प्रजानातीति पथिप्रज्ञः । 'प्रे दाज्ञ' इति अणोपवादः कः, प्राज्ञा । 'आतश्चोपसर्गे' इत्यङ् । पाणिन्युपज्ञमकालकं व्याकरणम्, उपज्ञायत इत्युपज्ञा । प्रथमज्ञानं, पूर्ववदङ् । कालपरिभाषाशून्यं व्याकरणं पाणिनिना प्रथमं ज्ञातमित्यर्थः । 'उपज्ञोपक्रमन्तदाद्याचिख्यासाया'मित्युपज्ञोपक्रमान्तस्य तत्पुरुषस्य नपुंसकत्वं, तच्छब्देनोपज्ञोपक्रमयोरर्थः परामृश्यते । तेन यद्युपज्ञेयस्योपक्रम्यस्य च आदिराख्यातुमिष्यतइत्यर्थः । अत्र च कालपरिभाषाशून्यस्य व्याकरणस्य पाणिनिरादिराख्यातुमिष्यते । ज्ञप्तः, ज्ञापितः 'वा दान्ते'ति पक्षे णेर्लुक्यनिट्त्वम् ॥ ३६ ॥

बन्ध बन्धने ॥ बध्नाति । बध्नीतः । बध्नासि । बध्नामि । क्ङितीति 'अनिदिता'मिति नलोपः । बबन्ध । बबन्धतुः । बबन्धिथ । बबन्ध । बबन्धिव । क्रादिनियमादिट् । थलि तु विकल्पः । संयोगान्तत्वाल्लिटः कित्त्वाभावान्नलोपो न भवति । बन्द्धा 'झषस्तथो'रिति धत्वम्, 'झलां जश् झशी'ति पूर्वस्य दत्वम्, तस्य 'झरो झरी'ति पक्षे[1] लोपः । भन्त्स्यति । 'एकाच' इति भष्भावः । 'खरि चे' ति चर्त्वं तकारः । बध्नातु । बध्नीताम् । बधान । 'हलः श्नः शानज्झा' विति श्नः शानजादेशे हेर्लुक् । बध्नाव । अबध्नात् । अबध्नीताम् । अबध्नाः, अबध्नीतम् । अबध्नीत । अबध्नीव । बध्नीयात् । आशिषि बध्यात् । अभान्त्सीत् । अबान्द्धाम् । अभान्त्सुः 'वदव्रजे' ति वृद्धिः । 'पूर्वत्रासिद्ध'मिति भष्भावात्पूर्वं 'झलो झली'ति सिचो लोपः । कृते तस्मिन् प्रत्ययलक्षणेन सादिप्रत्ययमाश्रित्य भष्भावो न भवति, प्रत्ययलक्षणे सिज्लोपस्यासिद्धत्वात् । बिभन्त्सति । बाबध्यते । बाबन्धि । बन्धयति, अबबन्धत् । चक्रबन्धं बद्धः । चक्रे बद्ध इत्यर्थः । अट्टालिकाबन्धं बद्धः । बन्धविशेषस्यैषा संज्ञा । 'अधिकरणे बन्धः' 'संज्ञायामि'ति च सूत्राभ्यां णमुल् । कषादित्वात् यथाविध्यनुप्रयोगः । चक्रे बद्धः । चक्रबद्धः । दृषदि बद्धः । दृषद्बद्धः । सप्तमीति योगविभागात्समासः । 'तत्पुरुषे कृति बहुल'मित्यलुको 'नेन्सिद्धबध्नातिषु चे'ति निषेधः । चक्रे बन्धः ।

[1] वेति ३ । ४ । पु॰ पा॰ ।

चक्रबन्धः। दृषदि बन्धः। दषद्बन्धः। 'सिद्धशुष्कपक्वबन्धैश्चे' ति सप्तमीतत्पुरुषः। 'बन्धे च विभाषे 'ति हलदन्तात्[1]सप्तम्या घञन्ते बन्धशब्दे उत्तरपदे विभाषा ऽलुक्। पचाद्यजन्ते तु बन्धशब्दे उत्तरपदे 'नेन्सिद्धे 'ति निषेधो भवति चक्रबन्ध इति। इयं च विभाषा येननाप्राप्तिन्यायेन 'नेन्सिद्धे 'ति प्रतिषेधं बाधते परत्वा 'दमूर्द्धमस्तकादि' त्येतं, तेन स्वाङ्गपूर्वबन्धशब्दान्ते बहुव्रीहावपि लुग्विकल्पो भवति। हस्ते बन्धोस्य हस्तबन्धः, हस्तेबन्ध इति। बधिरः। 'इषिमदिमुदिखिदिच्छिदिभिदिहिमुचिरुचिरुधिशुषिबन्धेभ्यः किरजि 'ति किरच् प्रत्ययः। ब्रध्नः, आदित्यः, बुध्नः, मुलं, 'बन्धेर्ब्रधबुधौ चे 'ति बध्नातेर्नक्प्रत्ययो ब्रधबुधावादेशौ च भवतः। बन्धुः। 'शस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्चे 'त्युप्रत्ययः। कौमुद्गन्धीबन्धुः। 'बन्धुनि बहुव्रीहावि'- ति ष्यङः संप्रसारणे 'हल 'इति दीर्घः। बन्धुरः। 'मन्दिवाशिमथिचतिचङ्क्यङ्किभ्य उरजि 'ति बाहुलकादस्याप्युरच्। अस्याजन्तमध्ये पाठो नित्यपरस्मैपदानुरोधात्, ज्यादयोनुदात्ताः परस्मैभाषाः॥ ३७॥

वृङ् सम्भक्तौ॥ उदात्त आत्मनेपदी। वृणीते। वृणाते। वृणीषे। वृणे। वृणीवहे। वव्रे। ववृषे। ववृढ्वे। वव्रे। ववृवहे। वरिता। वरीता। वरिष्यते। वरीष्यते। वृणीताम्। वृणाताम्। वृणीष्व। वृणै। अवृणीत। अवृणाताम्। अवृणीथाः। अवृणि। वृणीत। वृणीयातामित्यादि वृणोतिवत्प्रक्रिया, प्रपञ्चस्तत एवावगन्तव्यः। वर्या। 'अवद्यपण्यवर्ये 'ति स्त्रियां यति निपात्यते। पुंसि ण्यति वार्या ऋत्विज इति भवति। वर्येति निपातनमस्येति स्थितम्। वरेण्यः। 'वृङ एण्य' इत्येण्यः॥ ३८॥

श्रन्थ विमोचनप्रतिहर्षयोः॥ एतदादयः खच्यन्ता उदात्ता उदात्तेतः, विष्णातिस्त्वनिट्। क्लिश्नातिस्तु विकल्पितेट्। दश्नातिरपि वार्त्तिककारमतेन तादौ। श्रथ्नाति। श्रथ्नासि। श्रथ्नीमः। श्रथ्नीवः। 'अनिदितामि 'ति नलोपः क्ङिति। शश्रन्थ। श्रेथतुः। श्रेथुः, शश्र-

[1] परस्या इत्यधिकं ४ पु॰।

न्थिथ । श्रेथुः । श्रेथ । शश्रन्थ । श्रेथिव । श्रेथिम । 'श्रन्थिग्रन्थिदम्भी'त्यादिना लिटः कित्त्वा 'दनिदितामि'ति नलोपः क्ङितिं । अत्र हरदत्तः । 'एत्वाभ्यासलोपावत्र वक्तव्यावि'ति । अन्यथा 'असिद्धवदत्रे'ति नलोपस्यासिद्धत्वादत एकहल्मध्यस्थत्वाभावान्न तौ स्याताम् । ये तु श्रन्थ्यादीनां कित्त्वविकल्पमिच्छन्ति तेषां शश्रन्थतुरित्याद्यपि । इदं च कित्त्वं पिद्वचनेष्वपीति सुधाकरः । तन्मते । शश्राथ । श्रेथिथ । शश्रथ । शश्राथेति । श्रन्थिता । श्रन्थिष्यति । श्रथ्नातु । श्रथ्नीताम्, श्रथान । 'हलः श्नःशानज्झौ'ति शानचि हेर्लुक् । श्रथ्नानि । अश्रथ्नात् । अश्रथ्नीताम् । अश्रथ्नाः । अश्रथ्नीव । श्रथ्नीयात् । श्रथ्नीयाताम् । आशिषि श्रथ्यात् । श्रथ्यास्ताम् । कित्त्वादनुनासिकलोपः, अश्रन्थीत् । अश्रन्थिष्टाम्, अश्रन्थिषुः, शिश्रन्थिषति । शाश्रथ्यते । शाश्रन्थीति । शाश्रन्ति 'झरो झरी'ति थलोपो विकल्पेन, लोपाभावे 'खरि चे'ति चर्त्वेन थकारस्य तकारः । श्रन्थयति । अशश्रन्थत् । कर्मकर्तरि 'णिश्रन्थी'त्यादिना यक्चिणोर्निषेधात् श्रथ्नीते मेखला स्वयमेव, अश्रन्थिष्ट मेखला स्वयमेवेति भवति । श्रन्थना । 'ण्यासश्रन्थो युजि'ति युच्प्रत्ययः । प्रश्रथः हिमश्रथः । 'अवोदैधौद्मप्रश्रथहिमश्रथा' इति निपातनाद् घञि नलोपो वृद्ध्यभावश्च । श्रन्थित्वा, श्रथित्वा, 'नोपधात्थफान्ताद्वे'ति कित्त्वविकल्पः । श्रन्थतइति शैथिल्ये शपि ॥ ३९ ॥

मन्थ विलोडने ॥ अयं द्विकर्मकः । मथ्नाति । ममन्थ । ममन्थतुरित्यादि श्रथ्नातिवत् । अस्य लिटः कित्त्वं नास्ति । कर्मकर्तरि यक्चिणौ स्तः । मथ्यते, अमन्थीति । ममन्थीति, विलोडने मन्थति, हिंसासंक्लेशनयोः शपि ॥ ४० ॥

ग्रन्थ सन्दर्भे ॥ ग्रथ्नाति । इत्यादि सर्वं श्रन्थिवत् । अत्रापि केचित् श्रन्थिं पठन्ति । पुनः पाठोऽर्थभेदात् । तथा च णिश्रन्थीत्यत्र न्यासे ग्रन्थ सन्दर्भे इति चुरादावित्युक्त्वा क्र्यादावपीत्युक्तम् । 'अवोदैधौद्मप्रश्रथे'त्यत्र तु श्रन्थ विमोचनप्रतिहर्षयोरिति । एवमुभयत्र पदमञ्जर्यामपि । पुरुषकारेऽपि श्रन्थ विमोचनप्रतिहर्षयोः, अन्ये तु श्रन्थ ग्रन्थ सन्दर्भे

इति क्र्यादौ पठन्ति । तथा च संदर्भे ग्रन्थनक्रियायां ग्रन्थिग्रन्थिधातू वर्तते इति क्षीरस्वामीत्युक्तम् । ग्रन्थिः, इन्प्रत्ययः ॥ ४१ ॥

कुन्थ संश्लेषणे ॥ संक्लेशे इत्येके । तथा च देवः । कुन्थ संक्लेशे इति । कुथ्नाति । चुकुन्थेत्यादि मन्थिवत् । कुथेति दुर्गः । तन्मते कुथ्नाति । चुकोथ । कोथितेत्यादि । कुन्थतीति शपि । कुथ्यतीति पूतीभावे श्यनि ॥ ४२ ॥

मृद क्षोदे ॥ मृद्नाति, मृद्नीतः, मृद्नासि । मृद्नामि । ममर्द । ममृदतुः । ममृदुः । ममर्दिथ । ममृदथुः । ममृद । ममृदिव । ममृदिम । मर्दिता । मर्दिष्यति । मृद्नातु । मृदान । 'हलःश्न' इति श्नः शानच् । मृद्नानि । अमृद्नात् । अमृद्नाः । अमृद्नाम् । अमृद्नीव । मृद्नीयात् । आशिषि मृद्यात् । अमर्दीत् । मिमर्दिषति । मरीमृद्यते । मर्मर्त्तीत्यादि । मर्दयति । अममर्दत् । अमीमृदत् 'उर्ऋद्वा' । मृत् । क्विप् । मृत्तिका । 'मृदस्तिकन्नि' ति स्वार्थे तिकन् । मृत्सा । मृत्स्ना । 'सस्नौ प्रशंसायामि' ति सस्नौ प्रत्ययौ । मर्दनम्, मृद्यः । 'ऋदुपधादि' ति क्यप् । मृदित्वा । 'मृडमृदे' ति सेटः क्त्वः कित्त्वम् ॥ ४३ ॥

मृड च ॥ मृड सुखे चेति केचित् । मृड सुखनइत्यपरे । मृडित्वेत्यादि मृदिवत् । 'ष्टुना ष्टुरि' ति ष्टुत्वं णकारः । मृडतीति शे ॥ ४४ ॥

गुध रोषे ॥ गुध्नाति । जुगोध । गुधित्वेत्यादि मृदिवत् । गुधितः, गुधितवान् । 'उदुपधादि' ति निष्ठायाः कित्त्वविकल्पो व्यवस्थितविभाषया शब्विकरणानामेवेत्युक्तम् । गुध्यतीति परिवेष्टने दिवादौ ॥ ४५ ॥

कुष निष्कर्षे ॥ निष्कर्षो बहिर्निःसारणम् । कुष्णाति कुष्णासि । कुष्णामि । कुष्णीवः । 'ष्टुना ष्टुरि' ति ष्टुत्वं, 'रषाभ्यामि' ति णत्वं, चुकोष । चुकुषतुः । चुकोषिथ । चुकुषिव । निष्कोषिता । निष्कोष्टा । निष्कोषिष्यति । निष्कोक्ष्यति, कुष्णातु । कुषाण । अकुष्णात् । कुष्णीयात् । आशिषि कुष्यात् । निरकोषीत् । निरकुक्षत् । 'निरः कुष' इति वलाद्यार्धधातुके इड्विकल्पः । अनिष्पूर्वत्वे तु नित्यमिडेव, लुड्यनिट्पक्षे 'शल

इगुपधा' दिति क्सः । निष्चुकोपिषति । निष्चुकुक्षति । पूर्ववदिड्विकल्पः । इटि 'रलो व्युपधा' दिति कित्त्वविकल्पः । कुष्यति पादः स्वयमेव । कुष्यते वा । अकुष्यत् पादः स्वयमेव । कुष्यतु कुष्यतां वा पादः स्वयमेव । 'कुषिरञ्जोः प्राचां श्यन् परस्मैपदं चे' ति श्यन् परस्मैपदे सार्वधतुके । अन्यत्र कोषिष्यते पादः स्वयमेव । अकोषि पादः स्वयमेवेत्यादि । निष्कुषितम् । 'इण् निष्ठाया' मिति नित्यमिट् । कुष्टः । 'हनिकुषी' त्यादिना क्थन् । कुक्षिः । 'प्लुषिकुषिशुषिभ्यः क्सि' रिति क्सिप्रत्ययः । सर्वत्र 'तितुत्रेती' ति निषेधः । कौक्षेयकः । 'कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेष्वि' ति असावभिधेये शैषिकष्ठक् । अन्यत्र कौक्षः कौक्षेयः । 'दृतिकुक्षी' त्यादिना भवार्थे ढञ् ॥ ४६ ॥

क्षुभ संचलने ॥ क्षुभ्नाति । क्षुभ्नीतः । चुक्षोभ, चुक्षुभतुः, चुक्षोभिथ । चुक्षुभिव । क्षोभिता । क्षोभिष्यति । क्षुभ्नातु । क्षुभाण । क्षुभ्नानि । अक्षुभ्नात् । क्षुभ्नीयात् । आशिषि क्षुभ्यात्, अक्षोभीत् । अक्षोभिष्टाम् । चुक्षुभिषतीत्यादि । क्षुभ्यतिवत् । क्षोभतइति भूवादौ । अक्षुभदिति क्षुभ्यतेः पुषादिपाठात् । 'क्षुभ्नादिषु चे' ति णत्वनिषेधो यत्रैतद्रूपं तत्रैवेति क्षोभणमित्यत्र रूपान्तरे न भवति । क्षुभ्नीतः, क्षुभ्नन्तीत्यादौ त्वेकदेशविकृतस्यानन्यत्वात्स्यानिवद्भावाद्भवत्येव ॥ ४७ ॥

णभ तुभ हिंसायाम् ॥ नभ्नाति । तुभ्नातीत्यादि पूर्ववत् । लुङ्यनभीत् । अनाभीत् । 'अतो हलादे' रिति वृद्धिविकल्पः । प्रणिनभ्नाति । प्रनिनभ्नाति । 'शेषे विभाषे' ति णत्वविकल्पः । नभ्यति तुभ्यतीति दिवादौ । नभते तोभतइति शपि ॥ ४८—४९ ॥

क्लिशू विबाधने ॥ क्लिश्नाति । क्लिश्नीतः । क्लिश्नासि । क्लिश्नामि । 'शादि' ति चुत्वनिषेधः । चिक्लेश, चिक्लिशतुः चिक्लिशिथ । चिक्लेष्ठ । चिक्लिशिव । चिक्लिश्व । ऊदित्त्वा 'त्स्वरती' त्यादिना वलाद्यार्धधातुकइड्विकल्पः, क्लेष्टा । क्लेशिता । क्लेशिष्यति । क्लेक्ष्यति । अनिटि 'व्रश्चादि' ना षत्वे यथायोगं ष्टुत्वकत्वे । क्लिश्नातु । क्लिशान । क्लिश्नानि । अक्लिश्नात् । क्लिश्नीयात् । आशिषि क्लिश्यात् । अक्लेशीत् ।

उत्पन्नाधिकारात्सति सर्ववचनम् ॥ १० ॥

ननु सर्वेषां हविषां स्विष्टकृदवद्यतीति सर्वपदस्य का गतिरत्राह । उत्पन्नेति । उत्पन्नं शेषमधिकृत्य पाठात् सति शेषवति सर्ववचनम् । सशेषेभ्यः सर्वेभ्यो हविर्भ्य इत्यर्थः ॥ १० ॥

जातिविशेषात्परम् ॥ ११ ॥

अथ प्रायणीये चरौ समवत्तशब्दप्रयोगो हेतुरुक्तः तदुपपत्तिं दर्शयति । परमिति । परमुक्तलिङ्गम् । आज्यशेषाच्छेषकार्ये सिद्धे जातिविशेषाद् ओदनजातिमाज्यजातिं च अपेत्य प्रकृतिस्थशब्देन अनुवादः । प्रकृतौ प्रयुक्तशब्द एवात्र प्रयुक्त इति भावः ॥ ११ ॥

अन्त्यमरेकार्थे ॥ १२ ॥

अन्त्यं हेतुं निरस्यति । अन्त्यमिति । अन्त्यमुक्तार्थवादरूपं लिङ्गमरेकार्थे ध्रुवायाः अरिक्तत्वार्थम् । अयं भावः स्विष्टकृदुपस्तरणाभिघारणपर्यन्तं ध्रुवाज्यस्य कार्यमस्ति । यदि ध्रुवायाः प्रत्यभिघारणं न कुर्यात्तर्हि ध्रुवा आज्यहीना स्याद् उत्तरकार्यं न भवेत् । स्विष्टकृदवदानोत्तरमग्रे कार्यं नास्त्यतो न पूरणमित्यर्थवादतात्पर्यमिति ॥ १२ ॥

साकंप्रस्थायीये स्विष्टकृदननुष्ठानम् । अधि० २ ।

साकंप्रस्थायीये स्विष्टकृदिडं च तद्वत् ॥ १३ ॥

साकंप्रस्थायीययागे स्विष्टकृदिडाद्यवदानं तद्वत् । उपांशुयागवच्छेषाभावाद् लुप्यते इति सिद्धान्तसूत्रम् ॥ १३ ॥

सौत्रामण्यां शेषाननुष्ठानम् । अधि० ३ ।

सौत्रामण्यां च ग्रहेषु ॥ १४ ॥

सौत्रामण्यामुत्तरे ऽग्नौ पयोग्रहाञ्जुहोति दक्षिणे ऽग्नौ सुराग्रहानिति । अत्र निखिलस्य होमसंयोगात् स्विष्टकृदिडे नेति सिद्धान्तमाह । सौत्रामण्यामिति । स्पष्टम् ॥ १४ ॥

तद्वच्च शेषवचनम् ॥ १५ ॥

उद्भिनष्टि न सर्वं जुहोतीति निषेधपूर्वकशेषवचनं तद्वत् कुम्भीवत् सर्वहोमं गमयति । सर्वहोमप्राप्तावेव शेषवचनस्य सार्थक्यात् । शेष-

वचनमपि न स्विष्टकृदाद्यर्थं, ब्राह्मणं परिक्रीणीयादुच्छेषणस्य पातारमिति कार्यान्तरश्रवणादिति भावः ॥ १५ ॥

सर्वपृष्ठेष्टौ स्विष्टकृदादीनां सकृदनुष्ठानम् । अधि० ४ ।

द्रव्यैकत्वे कर्मभेदात्प्रतिकर्म क्रियेरन् ॥ १६ ॥

इन्द्राय राथन्तरायेन्द्राय वैरूपायेत्यादिषड्देवताका सर्वपृष्ठेष्टिराम्नाता । तस्या निर्वापकाले षण्णां पृथग् निर्वापं कृत्वा अपणं कृत्वा द्वादशकपालमेकपुरोडाशं कृत्वा होमसमये समं तं पृथक् पृथग् अवदाय प्रधानयागाः षट् क्रियन्ते । ततः स्विष्टकृदवदानं षड्वारमुत सकृदिति संशये देशभेदात् षड्वारमिति पूर्वपक्षमाह । द्रव्येति । द्रव्यस्य पुरोडाशस्य एकत्वे ऽपि कर्मभेदात् प्रधानयागभेदात् प्रतिकर्म प्रतिप्रधानकर्म स्विष्टकृदवदानं क्रियेरन् ॥ १६ ॥

अविभागात्तु शेषस्य सर्वान्प्रत्यविशिष्टत्वात् ॥ १७ ॥

सिद्धान्तमाह । अवीति । अविभागाच् शेषस्य पुरोडाशस्यैक्यात् । सर्वान् प्रति सर्वप्रधानानि प्रति अविशिष्टत्वाद् एकत्वात् । अयं भावः प्रकृतौ हविषः उत्तरार्धः स्विष्टकृदवदानदेशः क्लृप्तः इहापि हविष ऐक्याद् अवदानं सकृदिति ॥ १७ ॥

ऐन्द्रवायवग्रहे द्विः शेषभक्षणम् । अधि० ५ ।

ऐन्द्रवायवे तु वचनात्प्रतिकर्म भक्षः स्यात् ॥ १८ ॥

ज्योतिष्टोमे ऐन्द्रवायवग्रहहोमोत्तरं सोमरसस्य एकत्वात् सकृदेव भक्षणमिति बहिः पूर्वपक्षे सिद्धान्तमाह । ऐन्द्रेति । ऐन्द्रवायवे प्रतिकर्म प्रतिवषट्कारं भक्षः वचनाद् द्विः ऐन्द्रवायवं भक्षयतीति वचनात् ॥ १८ ॥

सोमे शेषभक्षास्तित्वम् । अधि० ६ ।

सोमे अवचनाद्भक्षो न विद्यते ॥ १९ ॥

पुरोडाशवत् सोमद्रव्यस्य भक्षणमस्ति न वेति *संशये पूर्वपक्षमाह । सोमइति । सोमे भक्षो न विद्यते अवचनात् ॥ १९ ॥

---

* "सोमे च बहवो ग्रहाश्चमसाश्च पुरुषाश्च । तत्रसंशयः किं न क्व चित्कस्य चिद् भक्षणमुत सर्वत्र सर्वेषामविशेषेण भक्ष उत यस्य यत्र प्रत्यक्षवचनं तस्य तत्र भक्षणम् अथ वा समाख्यावषट्कारहोमाभिषवप्रत्यक्षवचनैर्भक्ष इति । वार्तिके तु

स्याद्वा ऽन्यार्थदर्शनात् ॥ २० ॥

सिद्धान्तमाह । स्याद्वेति । भक्षणं स्याद् अन्यार्थस्य भक्षणार्थस्य भक्षाङ्गस्येति यावत् । दर्शनात् । विधानात् । अयं भावः आश्विनग्रहभक्षमनूद्य सर्वतः परिहारमाश्विनमिति भ्रमणं विधीयते । यदि भक्षणं न स्यात् तर्हि भ्रमणविधानमनर्थकं स्यात् ॥ २० ॥

वचनानि त्वपूर्वत्वात् तस्माद्यथोपदेशं स्युः ॥ २१ ॥

ननु गुणविधानानुमेयो विधिर्न प्रत्यक्षो भक्षणविधिरित्यत्राह । वचनानीति । पुरस्तादैन्द्रवायवं भक्षयति पुरस्तान्मैत्रावरुणं सर्वतः परिहारमाश्विनमिति वचनानि तत्तद्गुणविशिष्टभक्षविधायकानि । अपूर्वत्वाद् भक्षणस्य त्वपूर्वत्वात् । अप्राप्तत्वात् । तस्माद्यतो विशिष्टभक्षणं विहितमतः यथोपदेशं यथा विहितं भक्षणं तथा विधेयम् ॥ २१ ॥

चमसिनां शेषभक्षणम् । अधि० ७ ।

चमसेषु समाख्यानात् संयोगस्य तन्निमित्तत्वात् ॥ २२ ॥

ज्योतिष्टोमे होतृचमसादिसंज्ञका दश चमसाः सन्ति । तेषु चमसिनां भक्षणं नास्ति प्रमाणाभावादिति बहिः पूर्वपक्षे सिद्धान्तमाह । चमसेष्विति । चमसेषु भक्षणमस्ति होतृचमस इति समाख्यानात् संज्ञावत्त्वात् । संयोगस्य होतृचमस इतिसंज्ञासंबन्धस्य निमित्तत्वात् । चमसभक्षणनिमित्तत्वात् । होत्रा अनेन पात्रेण चम्यते भक्ष्यतइति होतृचमस इति योगात् । भक्षणे ऽसति उक्तयोगानुपपत्तेरिति भावः ॥ २२ ॥

तस्माच्चाब्राह्मणस्य सोमं प्रतिषेधति ॥ २३ ॥

साधकान्तरमाह । तस्मादिति । तस्मात् समाख्यया भक्षणस्य सिद्धत्वादेव अब्राह्मणस्य क्षत्रियादेः सोमं सोमभक्षं प्रतिषेधति निषेधति । अयं भावः यजमानचमस इति समाख्यया यजमानस्य क्षत्रियादेः सोमभक्षणप्राप्तौ, यदि राजन्यं वैश्यं वा याजयेत् स यदि सोमं बिभक्षयिषेद् न्यग्रोधस्तिमिनीराहृत्य ताः संपिष्य दधन्युपमृज्य तमस्मै

सर्वत्र सर्वेषां भक्ष इति पक्षमतिमन्दत्वादनुपन्यस्य त्रयः पक्षा इत्युक्तम् । तदिदमतः प्रभृति होमाभिषवाभ्यां चेत्येतदन्तमेकमधिकरणम्" इति शास्त्रदीपिकायां स्थितम् ॥

भक्षं प्रयच्छेद् न सोममिति सोमभक्षणनिषेधः संगच्छते । निषेधस्य प्राप्तिपूर्वकत्वादिति ॥ २३ ॥

उद्गातृणां सुब्रह्मण्येन सह भक्षणम् । अधि० ८ ।

उद्गातृचमसमेकः श्रुतिसंयोगात् ॥ २४ ॥

ज्योतिष्टोमे प्रैतु होतुश्चमसः प्र ब्रह्मणः प्रोद्गातॄणामिति मन्त्रे उद्गातॄणां चमस इतिसमाख्यासिद्धम् उद्गातृचमसपानमेकस्य बहूनां वेति संशये पूर्वपक्षमाह । उद्गात्रिति । उद्गातृचमसमेकः उद्गातैव भक्षयेत् । श्रुतिसंयोगात् । उद्गातृशब्दस्य उद्गातृव्यक्त्यैव शक्तिसंयोगात् । बहुवचनं तु प्रयोगभेदेन उद्गातृभेदाद् उद्गातृव्यक्तिबहुत्वपरतया नेयमिति भावः ॥ २४ ॥

सर्वे वा सर्वसंयोगात् ॥ २५ ॥

व्यक्तिबहुत्वमादाय बहुवचनस्य अप्रयोजकत्वाद् बहुवचनश्रुतेः उद्गातृशब्दस्य तत्प्रभृतिषु लक्षणां स्वीकृत्य सर्वेषामृत्विजां पानमिति पक्षान्तरमाह । सर्वइति । सर्वसंयोगात् । सर्वान्वययोग्यबहुवचनसंबन्धाद्वाक्यस्य ॥ २५ ॥

स्तोत्रकारिणो वा तत्संयोगाद् बहुत्वश्रुतेः ॥ २६ ॥

उत्पूर्वकगायतिधातोः स्तोत्रसंबन्धिगानकर्तार इति क्रियानिमित्तं त्रिषु संभवति । त्रयश्च उद्गाता प्रस्तोता प्रतिहर्तेति त्रयाणां ग्रहणे प्रातिपदिकार्थः प्रत्ययार्थश्चेति शक्त्यैव संभवतीति पक्षान्तरमाह । स्तोत्रकारिण इति । तत्संयोगाद् उक्तत्रितयसंयोगात् ॥ २६ ॥

सर्वे तु वेदसंयोगात् कारणादेकदेशे स्यात् ॥ २७ ॥

सिद्धान्तमाह । सर्वइति । सर्वे तु सुब्रह्मण्येन सह चत्वारः भक्षयेयुः । वेदसंयोगात् सामवेदप्रतिपादितकर्मणा साकं संबन्धात् । अयं भावः उत्पूर्वकगायतिधातोर्न स्तोत्रगाने शक्तिः किं तु साम्नो द्वितीयभक्तिगाने तत्रैवोद्गीथशब्दव्यवहारात् । तत्कर्ता त्वेक एव तत्र बहुत्वान्वयानुपपत्तेर्न योगो रूढिर्वा प्रकृतार्थे संभवति । अतो ऽगत्या

लक्षणैव योज्या । तस्यां योज्यायां वेदोक्तकर्मकर्तृत्वरूपशक्यसंबन्धस्य कर्मकर्तृत्वापेक्षया ऽन्तरङ्गत्वात् तेनैव संबद्धाश्चत्वारः* पूर्वोक्ता इति । उद्गातृशब्दस्य केवलोद्गातरि प्रयोगस्तु योगेनेत्याह । एकदेशे केवलोद्गातरि कारणाद् उद्गीथरूपभक्तिगानकर्तृत्वाद् व्यवहारः स्यात् ॥ २७ ॥

ग्रावस्तुतो ऽपि सोमभक्षणम् । अधि· ९ ।

ग्रावस्तुतो भक्षो न विद्यते अनाम्नानात् ॥ २८ ॥

होतृगणमध्ये चतुर्थस्य ग्रावस्तुतः भक्षणं नास्तीति पूर्वपक्षमाह । ग्रावस्तुत इति । स्पष्टम् ॥ २८ ॥

हारियोजने वा सर्वसंयोगात् ॥ २९ ॥

सिद्धान्तमाह । हारीति । †हारियोजनग्रहे भक्षो ऽस्ति चमसाञ् चमसिनो भक्षयन्ति यथैतस्य हारियोजनस्य सर्वएव लिप्सन्तीति वाक्ये सर्वशब्दसंयोगात् ॥ २९ ॥

चमसिनां वा सन्निधानात् ॥ ३० ॥

सिद्धान्तमाक्षिपति । चमसिनामिति । सर्वपदेन चमसिनामेव ग्रहणम् उक्तवाक्ये चमसपदसन्निधानात् ॥ ३० ॥

सर्वेषां तु विधित्वात् तदर्था चमसश्रुतिः ॥ ३१ ॥

इमं पक्षं दूषयति । सर्वेषां त्विति । सर्वेषां प्रकृतयागसंबन्ध्यृत्विङ्मात्रस्य सर्वशब्देन ग्रहणम् । विधित्वात् सर्वकर्तृकभक्षणस्य विधित्वात् । अयं भावः । भक्षणमपूर्वं विधीयते तत्र कर्त्राकाङ्क्षायां प्रकरणादरे प्रकृतपुरुषेणैव निराकाङ्क्षत्वे ऽप्रकृतचमसिपुरुषांशविधिकल्पने वाक्यं भिद्येत प्रकृतपुरुषाः पानं कुर्युः ते चमसिन इति । अतो भक्षणं प्रकृतसर्वर्त्विक्कर्तृकमिति । ननु चमसाञ् चमसिनो भक्षयन्तीति तत्स-

* इदं भाष्यकारमतम् । "वार्तिककारस्तु सदसो भक्षणस्थानत्वात्सुब्रह्मण्यस्य सदस्यप्रवेशात्तेन विरहिता अवशिष्टाः सामगा भक्षयन्तीत्यमुमेव तृतीयं पक्षमङ्गीचकार" इति माधवः ।

† हरिरसि हारियोजन इति मन्त्रेण गृह्यमाणो ग्रहो हारियोजन इति माधवः ।

विधौ पाठः किमर्थमत्राह । तदर्थो हारियोजनभक्षस्तुत्यर्थो चमसश्रुतिः चमसघटितवाक्यश्रुतिः । स्तुतिरित्थं चमसांश्चमसिन एव भक्षयन्ति हारियोजनं सर्वं भक्षयन्त्यतः श्रेष्ठमिति ॥ ३१ ॥

वषट्कारस्य भक्षनिमित्तत्वम् । अधि० १० ।

वषट्काराच्च भक्षयेत् ॥ ३२ ॥

समाख्यैव भक्षणे निमित्तं न, किं तु वषट्कारकर्तृत्वमपीति सिद्धान्तमाह । वषडिति । वषट्कर्तुः प्रथमभक्ष इति वाक्येन वषट्कारकर्तारमुद्दिश्य प्रथमत्वविशिष्टभक्षणविधानादिति भावः* ॥ ३२ ॥

होमाभिषवयोरपि तन्निमित्तत्वम् । अधि० ११ ।

होमाभिषवाभ्यां च ॥ ३३ ॥

समाख्यावाक्यवषट्कारेभ्यो ऽन्यद्भक्षकारणं दर्शयति । होमेति । होमाभिषवाभ्याम् । पञ्चमी हेतौ । उभयहेतुकमपि भक्षणम् । अयं भावः ग्रावभिरभिषुत्य आहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षयन्तीति । अत्राभिषवहोमयोः वचनान्तरेण प्राप्तत्वान्निमित्तत्वेन अनूद्य यः अभिषवहोमकर्ता स भक्षयेदित्यपूर्वं भक्षणमात्रं विधीयतइति ॥ ३३ ॥

वषट्कर्त्रादीनां चमसे सोमभक्षः । अधि० १२ ।

प्रत्यक्षोपदेशाच्चमसानामव्यक्तः शेषे ॥ ३४ ॥

चमसेषु चमसिनामेव भक्ष उत होमाभिषवकर्तुरपीति संशये पूर्वपक्षमाह । प्रतीति । चमसानां भक्षस्य चमसाञ् चमसिनो भक्षयन्तीति प्रत्यक्षोपदेशाद्भक्षणकर्तुः, शेषे ग्रहादौ अव्यक्तः भक्षयन्तीति सामान्यतो यत्र कर्ता तत्राभिषवादिकर्ता योज्यः ॥ ३४ ॥

स्याद्वा कारणभावाद् अनिर्देशश्चमसानां कर्तुस्तद्वचनत्वात् ॥ ३५ ॥

* न च भक्षणमुद्दिश्य प्राथम्यं विधीयते लाघवात्, तथा च न वषट्कारस्य भक्षनिमित्तत्वं संभवतीति वाच्यम् । एकप्रसरताभङ्गापत्त्या समस्तपदे उद्देश्यविधेयभावाप्रतीतेरिति वार्तिके विस्तरः ।

सिद्धान्तमाह । स्याद्वेति । चमसेष्वितरेषां भक्षः स्यात् । कारणस्य भक्षकारणस्य समवधानात् । प्राप्तत्वात् । ननूक्तं सामान्यबाधकं विशेषशास्त्रमत्राह । अनिर्देश इति । समाख्याकल्पितचमसिकर्तृकभक्षणशास्त्रेण कर्तुश्चमसिनः अनिर्देशः प्रापणमात्रम् अयोगव्यवच्छेदमात्रमिति फलितम् । तद्वचनत्वात् तावन्मात्रबोधकत्वाच्च चमसिनां विधिमात्रं न त्वन्येषां निवर्तकमिति भावः ॥ ३५ ॥

चमसे चान्यदर्शनात् ॥ ३६ ॥

हेत्वन्तरमाह । चमसइति । चमसे अध्वर्युचमसे अन्यस्य वषट्कर्तुः दानदर्शनात् । चमसाञ् चमसाध्वर्यवे प्रयच्छति तान् स वषट्कर्त्रे प्रयच्छतीति दानश्रवणात् । दानस्य भक्षार्थत्वात् ॥ ३६ ॥

एकपात्रे होतुः प्रथमभक्षः । अधि० १३ ।

एकपात्रे क्रमादध्वर्युः पूर्वो भक्षयेत् ॥ ३७ ॥

एकस्मिन्पात्रे बहवो भक्षयन्ति कस्तत्र क्रम इति विचारे पूर्वपक्षमाह । एकपात्रइति । एकपात्रे बहूनां पानप्रसक्तौ अध्वर्युः पूर्वं भक्षयेत् । क्रमाद् होमद्रव्यस्य अध्वर्युसन्निधानात् । सन्निधिस्यानक्रमाणां पर्यायत्वात् ॥ ३७ ॥

होता वा मन्त्रवर्णात् ॥ ३८ ॥

सिद्धान्तमाह । होतेति । मन्त्रवर्णाद् होतुश्चित्पूर्वे हविरद्यमाशत इति मन्त्रलिङ्गात् ॥ ३८ ॥

वचनाच्च ॥ ३९ ॥

वचनाद् वषट्कर्तुः प्रथमभक्ष इति वचनाच्च होतुः प्राथम्यम् ॥ ३९ ॥

कारणानुपूर्व्याच्च ॥ ४० ॥

हेत्वन्तरमाह । कारणेति । प्रथमं वषट्कारः पश्चाद्धोम इति कारणक्रमः । यथा कारणक्रमः तथैव भक्षणक्रम इति भावः ॥ ४० ॥

भक्षणस्यानुज्ञापूर्वकत्वम् । अधि० १४ ।

*वचनादनुज्ञातभक्षणम् ॥ ४१ ॥

नानुपहूतेन सोमः पातव्य इति वचनादनुज्ञातस्यैव भक्षणमिति सिद्धान्तमाह । वचनादिति । स्पष्टम् ॥ ४१ ॥

वैदिकवचनेनानुज्ञापनम् । अधि० १५ ।

†तदुपहूत उपह्वयस्वेत्यनुज्ञापयेल्लिङ्गात् ॥ ४२ ॥

उपहूत उपह्वयस्वेतितत्तल्लिङ्गकमन्त्रसत्त्वाच्च लौकिकवाक्येनेति सिद्धान्तमाह । तदिति ॥ ४२ ॥

वैदिकवचनेन आर्थक्रमानुसारेण प्रतिवचनम् । अधि० १६ ।

तत्रार्थात्प्रतिवचनम् ॥ ४३ ॥

उपहूत उपह्वयस्वेत्यत्रोत्तररूपस्य पूर्वपाठे ऽपि अग्निहोत्रं जुहोति यवागूं पचतीत्यत्रेव अर्थक्रमेण उत्तरपठितं प्रश्नवाक्यं, पूर्वमुत्तरवाक्यमिति सिद्धान्तमाह । तत्रेति ॥ ४३ ॥

एकपात्राणामेवानुज्ञापनम् । अधि० १७ ।

तदेकपात्राणां समवायात् ॥ ४४ ॥

सा ऽनुज्ञा एकपात्राणामेव नान्येषां तेषामेव परस्परं कलहप्रसक्तौ तत्परिहारार्थत्वादस्या इति सिद्धान्तमाह । तदिति । तद् अभ्यनुज्ञानं समवायाद् एकत्र भक्षस्य प्राप्तत्वात् । अभ्यनुज्ञया सर्वेषामेकमत्ये न्यूनाधिकलाभप्रयुक्तो न कलह इति भावः ॥ ४४ ॥

याज्यापनये भक्षस्याप्यपनयः । अधि० १८ ।

याज्यापनये न अपनीतो भक्षः प्रवरवत् ॥ ४५ ॥

ज्योतिष्टोमे ऋतुग्रहप्रचारे यजमानस्य याज्या सो ऽभिप्रेष्यति होतरेतद् यजेति स्वयं वा निषद्य यजतीति । अत्र होतुर्याज्यापनये यदा स्वयं यजति तदा यजमानस्य भक्षो ऽस्ति न वेति तत्र पूर्वपक्षमाह ।

* "तस्मात्सोमो नानुपहूतेनेत्येतस्यार्थकथनार्थमुत्तरविवक्षार्थं चैतत्सूत्रम्" इति वार्त्तिककारः ।

† वार्त्तिके तच्छब्दरहितः पाठः । अस्य सूत्रस्य उत्तराधिकरणशेषत्वमेव वार्त्तिककारो ऽङ्गीचकार ।

ष्कर्षप्रयोगेषु विशेषं वा द्योतयति ॥ पुनरपि धर्मस्य धर्मिणि वृत्तिं विकल्प्य तदुभयमपन्हुवानमप्रत्याह ॥ तच्छून्ये इति ॥ ६ ॥

सू० तच्छून्ये तस्य वृत्तिः कथमिव घटते तद्विशिष्टे तु वृत्तौ स्वाधारत्वप्रसङ्गस्तत इह न गुणो नापि धर्मीत्ययुक्तम् ॥ तद्वृत्तिर्धर्मिमात्रे न भवति तत एवास्य तच्छून्यताऽतो नोक्तौ दोषौ स्वधीवाग्विहतिरितरथा तद्वदन्ये ऽपि जल्पाः ॥ १० ॥

टी० योऽयं रूपादिः द्रव्यस्य गुणतयेष्टस्स किं स्वशून्ये वर्तते स्वविशिष्टे वा नाद्यः व्याघातात् अन्यथा सर्वेषां सर्वत्र-वृत्तिः किं न स्यात् खपुष्पादीनामपि कथं निषेधः योग्यानुपलब्ध्येति चेन्न· तदुपलब्ध्यनुपलब्ध्योरपि विरोधाभावात्· किं चानुपलब्धिरभावोपस्थापनेन भावं विरुन्ध्यात् तदा कथं तच्छून्ये तस्य वृत्तिः । न द्वितीयः आत्माश्रयापातात् विशिष्टं विशेषणविशेष्यतत्सम्बन्धातिरिक्तं न किंचित् तस्मिन् प्रमाणाभावात् । न चोक्तेषु त्रिष्वन्यतममात्रं तावति विशिष्टधीव्यवहारयोरभावात् अतः सम्बन्ध्युभयं विशिष्टशब्दार्थं इति स्यात् । तथा च स्वविशिष्टे वर्तमानो गुणस्स्वविशेष्यमिव स्वात्मानमपि स्वाधारीकुर्यात् किमत्रानिष्टं स्वस्य स्वस्मादन्यत्वम् अभेदे कथमाधाराधेयभावः प्रतिसम्बन्धिभेदाभावात् न चात्र भिन्नाभिन्नत्वं दृष्टं युष्मदिष्टं वा· एवं वृत्त्यनुपपत्त्या वा गुणगुणिनोरन्यतरपरिशेषः स्यात् उभयपरित्यागो वेति परोक्तमयुक्तं । कथमित्यत्राह· तद्वृत्तिर्धर्मिमात्र इति । न वयं तच्छून्ये तद्विशिष्टे वा तस्य वृत्तिं ब्रूमः अपि तु वस्तुतस्तद्विशिष्टे विशेष्ये तद्विशि-

ष्टवृत्त्यभावे तच्छून्ये वृत्तिस्स्यादेवेति चेन्नत्राह । न भवति तत एवास्य तच्छून्यतेति । यत्र यद्वर्तते तस्य कथन्तच्छून्यत्वं न च तद्वति वर्तमानस्य तस्मिन्नपि वृत्तिरिति नियमः घटवति भूतले वर्तमानानां गुणादीनां घटे ऽपि वृत्तेरदृष्टेः । एवं घटस्याऽपि । ननु सर्वत्र वृत्तिविकल्पेन विशिष्टं दूषयतः किं निदा*नं किं क्वचिदपि विशिष्टप्रतीतिरेव नास्ति सत्यपि वा निष्कारणिका सकारणाऽपि वा दुर्निरूपकारणा निरूपितकारणापि वा निर्विषया सविषयापि वा बाधितविषयेति । नाद्यः लौकिकपरीक्षकबहिष्कारप्रसङ्गात् सर्वशून्यवादिना ऽपि हि संवृत्त्या विशिष्टधीरिष्यते । न द्वितीयः कार्यस्य कारणावश्यम्भावात् तदनभ्युपगमे तु लोकायतावतारात् । इष्यते चाविद्यावासनादिभ्रान्तेरपि निदानं भवद्भिः । अत एव न तृतीयः । नापि चतुर्थः स्वपरलोकव्यवहारविरोधादेव । कथं किलासौ विशिष्टप्रतीतिः कथं च निर्विषया । न पञ्चमः अद्यापि बाधस्याशामोदकायमानत्वात् । विकल्पप्रामाण्यं च वक्ष्यते । अतो यथादर्शनं क्वचित्किञ्चिद्वर्तते न स्वस्मिन्निति व्यवस्थिते त्वदुक्तौ व्याघातात्माश्रयदोषौ न स्त इत्याह । अतो नोक्तौ दोषाविति । अन्यथाऽनिष्टमाह । स्वधीवाग्विहतिरितरथेति । स्वधीविहतिः स्ववाग्विहतिः स्वधीवाग्विहतिरिति प्रत्येकसमुदायपरं योज्यम् । कथन्तवापि विशिष्टधीविरहे तद्विषयव्याहारव्यवहारौ उदाहरणोपनयौ च वस्तुतस्तद्धर्मविशिष्टविषयौ । बुद्धिस्स्वप्रकाशा अभिन्नदेशकालं स्वलक्षणं कल्पनापोढमभ्रान्तं प्रत्यक्षम् । प्रतिवादिवाक्यमसाधकं विशिष्टन्नास्तीत्यपि विशिष्टमात्थ तच्च विशिष्टविषयस्वधीविरुद्धमिति । सन्त्यन्ये ऽपि धर्मधर्मिभावभञ्जकाः परेषां सम्प्रसङ्गास्ते कथमुद्धार्या इत्यत्राह । तद्वद-

* निदर्शनमिति पा०

न्येऽप जल्पा इति । अन्ये ऽपि नित्यसमादिरूपाः शुष्कप्रलापा-स्तद्वन्निरस्तवाक्यैस्तुल्यं वर्तन्ते । उत्थानपरिहारप्रकारभेदेऽपि स्व-व्याघातादिदोषाविशेषादित्यर्थः ।

घटकुड्यवदन्यत्वेऽनन्यत्वे तु स्वरूपवत् ।
न गुणस्य गुणत्वं स्यादित्यसत्त्वोक्तिबाधतः ॥
दूष्यादन्यदनन्यद्वा दूषणं न तु दूषणम् ।
गर्दभादिवदन्यत्वे ऽनन्यत्व दूषणीयवत् ॥

एवं सम्बन्धत्वासम्बन्धत्वसमानकालत्वासमानकालत्वयुग-पद्ग्राह्यत्वायुगपद्ग्राह्यत्वादिविकल्पस्य बाधास्तद्द्वाराश्च विशुद्धबुद्धि-भिरवधातव्याः । दूष्येणापि सम्बन्धादिविकल्पदोषसाम्यात् । इति धर्मधर्मिभावः ॥

टी० एवं द्रव्याद्रव्ये सामान्यतः प्रसाध्य द्रव्येषु प्रथमोद्दिष्टं त्रिगुणमादौ परीक्ष्यते । तत्र कश्चिदाह धीमन्निदर्शनतया प्रसिद्ध-स्सुरगुरुर्लोकायतं शास्त्रमारभ्य पृथिव्यादीनि चत्वार्यैव तत्त्वान्याह अधिकानि तु तावन्मात्रविभागोद्देशादपोढानि अतिरिक्तचेतननि-षेधाच्चेति अत्र किं लोकायतसूत्राणि स्वयम्प्रमाणतयोपादीयन्ते तदु-पस्थापकतया वा । नाद्यः असम्मतेः गुरूक्तेश्च विरोचनोपदेशवद-सुरमोहनार्थत्वात् । न द्वितीयः उक्तेषु विवादाभावादधिकानां निषे-धस्य निष्प्रमाणकत्वात् अनुपलब्ध्या निषेध इति चेन्न । योग्यानुपल-ब्धेरभावादितरस्य निषेधकत्वायोगात् उपलब्ध्या चेच्चतुर्णामुपादान-माकाशेन किमपराद्धम् । अस्ति ह्यासंसारं तदुपलम्भः । न चास्प-र्शत्वादिभिर्बाधः अरूपवत्त्वादिना वाय्वादेरपि निह्नवप्रसङ्गात् शेषं च वक्ष्यामः । अथोपलम्भबलादस्त्वाकाशमपीति चेत् तथैव भिन्ना-भिन्नभवानुभूतार्थप्रतिसन्धाताऽप्यभ्युपगन्तव्यः । अस्तु तर्हि षड्घा-

तुवादः अध्वर्युभिस्तथाऽध्ययनादिति चेतर्ह्युद्गातृभिश्चतुर्णामध्ययनाच्चतुर्धातुवादः स्यात् । अनुक्तमविरुद्धमन्यतो ग्राह्यमिति चेत्समानं भूयसां च प्राबल्यादुपबृंहणप्राचुर्य्याच्च न चात्र मिथो विरोधान्निरर्थकार्थवादमात्रता सम्यग्न्यायानुग्रहमात्रेण बलाबलदृष्ट्या विरोधशान्तेः । केचित्तु प्रकृत्यादिशब्दैरदृष्टादिकं कथ्यत इत्याहुः यथाऽऽहोदयनः 'इत्येषा सहकारिशक्तिरसमा माया दुरुन्नीतितो मूलत्वात्प्रकृति' रित्यादि तदेतदपष्ठु । नियतक्रमानुपूर्वप्रकृतिविकृतिपरम्परोपदेशात् बाधाभावे भाक्तत्वायोगादन्यथा सर्वत्र श्रुतहान्यश्रुतकल्पनाप्रसङ्गाच्च । तदेतत्सर्वमभिप्रेत्याह ॥ स्वच्छन्देनेति ।

मू० स्वच्छन्देनागमेन प्रकृतिमहदहङ्कारमात्रा-
क्षसिद्धिर्नाध्यक्षेणाप्रतीतेर्न पुनरनुमया व्या-
प्तिलिङ्गाद्यसिद्धेः । सत्त्वाद्युन्मेषभिन्नान्महत
इह तथा स्यादहङ्कारभेदः प्राच्यादक्षाणि
मात्राः प्रजनयति परो मध्यमस्तूभया-
र्थः ॥ ११ ॥

टी० साधकबाधकप्रमाणाभावे विशिष्टार्थबोधनसामर्थ्यमागमस्य स्वाच्छन्द्यम् । आगम इह श्रुतिस्मृतीतिहासादिः करणदोषबाधकप्रत्ययविरहादस्मदाद्यतीन्द्रियविषयं शास्त्रमपि प्रत्यक्षवच्छ्रद्धेयमेव । अत आगमिकानामपि सद्भावनिश्चय इति सिद्धिशब्दाभिप्रायः । ननु प्रत्यक्षसिद्धं पृथिव्यादितत्त्वं तच्च कार्यावस्थं प्रकृतिद्रव्यमेवेति ब्रूथ तथा सति कारणावस्थमपि तदेवेति कथन्तस्याप्रत्यक्षत्वम् । अश्रुतागमैरप्रतिसंहितव्याप्तिभिश्च बालादिभिरपि चक्षुरादिकरणानि व्यवह्रियन्ते ऽतः कथन्तेषामागमिकत्वन्तत्राह । नाध्य-

क्षयेति । प्रत्यक्षविरुद्धेयं प्रतिज्ञेत्यत्राह अप्रतीतेरिति । न हि प्रकृत्याद्यवस्थस्य प्रत्यक्षतः प्रतीतिरस्ति अवस्थादिभेदैरेकस्यैव प्रत्यक्षत्वाप्रत्यक्षत्वे बहुलं लोकदृष्टे चक्षुरादिव्यवहाराश्च लौकिकानान्तत्तदधिष्ठानमात्रविषयाः । मनसा जानामीत्युक्तिरपि धीविशेषविषया अहमिति प्रत्यक्षन्तु न महत्तत्त्वविषयमहङ्कारविषयं वा प्रत्यगात्मन एवाहमिति भानात् । अध्यवसायादयोऽपि वस्तुत आत्मधर्माः करणभेदायत्ततया तु तत्तद्वृत्तित्वोपचाराः दृष्टेषु पृथिव्यादिष्वपि शास्त्रैकवेद्याः कति कति न सन्त्याकाराः किम्पुनरन्येषु अतो लोकोत्तीर्णाकारेण त्रिगुणस्य शास्त्रवेद्यत्वम् । एषां च तत्त्वानां तदवान्तरभेदानां च यथागमं यथादर्शनं च लक्षण ग्राह्यं केषुचित्क्षीरगुडादिरसभेदवद्दुर्वचा अपि भेदास्त्वनुभवादिसिद्धा दुरपन्हवाः । ननु सांख्योक्तैरनुमानैः प्रधानादिसिद्धिः स्यादित्यत्राह । न पुनरनुमयेति । न त्वनुमानैरित्यर्थः तत्र हेतुः व्याप्तिलिङ्गाद्यसिद्धेः यथासम्भवं व्याप्तिलिङ्गपक्षदृष्टान्तानामसिद्धेरित्यर्थः । तथा हि यत्तावदुक्तं कारणगुणात्मकत्वात्कार्यस्याव्यक्तमपि सिद्धमिति अयमर्थः यत्कार्यन्तत्कारणगुणात्मकं यथा तन्त्वादिगुणात्मकं पटादि तथा महदादि कार्यजातमपि सुखदुःखमोहात्मकतया स्वकारणगतसुखदुःखाद्यात्मकं भवति अतस्तत्कारणं सुखदुःखाद्यात्मकम्प्रधानमिति तत्र पटादेः किमिदं कारणगुणात्मकत्वं किं कारणगुणतादात्म्यमुत कारणं प्रति गुणभूतत्वम् । अथाप्रधानत्वं कारणगुणैर्गुणित्वं वा तत्सजातीयगुणवत्त्वं वा अन्यद्वा किञ्चित् । नाद्यः असिद्धेः । न खलु तन्त्वादिगुणैः शौक्ल्यादिभिः पटस्य तादात्म्यं दृष्टं तथा सति गुणवत्तन्तुनिष्पत्तिमात्रेण पटनिष्पत्तिप्रसङ्गात् न चायमिष्टः प्रसङ्गः अभिव्यक्तिवादादेरपाकरिष्यमाणत्वात् । अत एव न द्रव्यस्य गुणतादात्म्यं शुक्लः पट

इति च न पर्यायः । न द्वितीयः अदृष्टेरेव तन्तुसमवेतत्वात्पटस्य तन्तुगुणत्वोक्तिरिति चेन्न । अवयविसमवाययोस्त्वयाऽप्यनभ्युपगमात् । पटस्य तन्तुनिष्ठत्वमुपलब्धमिति चेत्किमतः कार्यावस्थानां कारणद्रव्यवर्तित्वमात्रसाधनापत्तेः । तथा च न कारणावस्थस्य सुखाद्यात्मकत्वसिद्धिः कारणमात्रन्तु सिद्धत्वान्न साध्यम् । तृतीयेऽपि किमिदं कार्यस्य कारणप्रत्यप्रधानत्वं तत्कार्यत्वमिति चेन्न । सिद्धसाधनात् साध्याविशेषाच्च । न ह्यकारणेन किञ्चित्कार्यमिच्छामः कारणसहकारित्वादिसाधनेऽपि न विवक्षितसिद्धिः । न चतुर्थः अवयविवादे तन्तुपटोदाहरणायोगात् तत्र हि तन्तुगुणैः पटगुणा जन्याः द्रव्यनित्यत्ववादे सिद्धसाधनात् कार्यावस्थस्य कारणावस्थानियतगुणसाधने विरोधात् । पञ्चमस्तु विलक्षणमहत्त्वाद्यधिकरणत्वान्निरस्तः । सजातीयगुणसद्भावमात्रे साध्ये सिद्धसाधनात् सर्वगुणसजातीयत्वसाधने कार्यकारणयोरविशेषप्रसङ्गात् मृत्सुवर्णादिवत्कार्यविशेषव्यवस्थापककारणस्वभावसाजात्यविवक्षायां गोमयमात्रिकाद्यारब्धवृश्चिकादिषु व्यभिचारात्तदभिप्रायं च सूत्रं दृश्यते त्विति । नापि षष्ठः तस्य त्वद्बुद्धिमात्रारूढस्यादूष्यत्वात् लोकदृष्टस्य तु कस्यचिदुक्तोत्तरप्रायत्वात् । अतःकर्मणां स्वविषयस्वरूपफलप्रदत्वानुमानवत्कार्याणां स्वगुणसरूपगुणकारणकत्वानुमानमप्यनैकान्त्यदुःस्थमिति । ये च भेदानाम्परिमाणादित्यादिना हेतव उक्तास्तत्र तावद्यत्परिमितं तत्सकारणकमित्यत्र न व्याप्तिर्जीवाणुत्वनित्ययोस्साधयिष्यमाणत्वात् महदादीनां स्वरूपमनुमानसिद्धं वा पक्षीक्रियते आगमसिद्धं वा । नाद्यः तल्लिङ्गासिद्धेः । ननु चिच्छक्तेरेव स्वतो विषयप्रवणतायामनिर्मोक्षप्रसङ्गात् अस्ति किञ्चिद् द्वारं तत्तु न चक्षुरादिमात्रं तदुपरमेऽपि संकल्पाद्युत्पत्तेः नापि मनोमात्रविश्रमः तत्प्रशान्ता-

वपि स्वप्ने मनुष्यस्य स्वात्मनि व्याघ्राद्यभिमानात्। नाप्यहङ्कारे पर्य-वसानं तद्विरामे सुषुप्तौ प्रश्वासनिश्वासहेतुभूतप्रयत्नाधारस्य महत-स्सिद्धेः न च तदवधिस्तत्त्वपङ्क्तिस्तस्यापि परिमितत्वेन कार्यत्वात्त-त्कारणत्त्वव्यक्तं न परिमितमित्यत्र प्रमाणमस्ति तत्कल्पनायान्त्व-नवस्थापातः, अतो ऽव्यक्तमपरिमितमादिकारणमिति वृत्तिभेदसिद्धे-र्महदादिभिरव्यक्तानुमानं स्यात् तदेतत्कथामात्रं स्वतस्सर्वग्रहण-योग्याऽपि हि पुंसां चिच्छक्तिस्संसारावस्थायां कर्मणा संकुचन्ती कर्मो-त्पन्नैरेव द्वारैर्यथाकर्म प्रसरतीति तु वक्ष्यन्तवृद्धाः । नापि सङ्कल्या-दिभिर्मनःक्लृप्तिः संस्कारप्रनाड्यापि तदुपपत्तेः अन्यथा मनसाऽपि तदुत्पादनायोगात् करणस्य च द्रव्यत्वन्नावश्यापेक्षितं न च स्वप्ने व्याघ्राद्यभिमानादहङ्कारक्लृप्तिः मनसैव तादृशसंस्कारसध्रीचा तदुप-पत्तेः । निश्वासादिहेतुभूतप्रयत्नाधारतया महत्क्लृप्तिरप्ययुक्ता अदृ-ष्टवशादेव बाह्यस्येवान्तरस्यापि मरुतस्स्पन्दोपपत्तेः न चादृष्टस्यापि महत्तत्त्वाश्रयत्वमितः पूर्वं सिद्धं यदा चेश्वरप्रयत्नाधीनत्वमुच्छ्वा-सादेस्सेत्स्यति तदा क्षेत्रज्ञस्यापि न जीवनपूर्वकः प्रयत्नः कल्प्यः किमुत कस्यचिदचिद्द्रव्यस्य परिमितत्वन्तु महतः कुतस्त्यमन्त-र्देहमेव तत्प्रवृत्त्युपलम्भादिति चेन्न त्वत्पक्षे विभोरप्यात्मनः शरी-रावच्छिन्नप्रदेश एव व्यापारावेशवद्विभोरपि महतस्सहकारिविशे-षसामर्थ्यात् क्वाचित्कप्रवृत्तिसम्भवात् न च वृत्तिभेदमात्रादन्तःकर-णभेदक्लृप्तिर्युक्ता कामस्सङ्कल्प इत्यादिना मनस्येव बहुविध-वृत्तिश्रुतेः कामादीनां मनस्सामानाधिकरण्य"मायुर्घृत"मितिव-द्युक्तं महतश्च त्वया मिथो मनस्येव विरुद्धभावाष्टकसुखदुःखा-द्याश्रयत्वस्वीकारात् बाह्येन्द्रियमनोऽहङ्काराणामालोचनादिवृत्ति-भेदाश्रयणमप्ययुक्तं महत एव सहकारिभेदात् सर्ववृत्त्यविरोधात् ।

अत एव शास्त्रतो महदादितत्त्वसिद्धावपि तेषां पृथक्करणत्वं वृत्त्याश्रयत्वं वा न कल्प्यम् । एवं चक्षुरादिष्वालोचनोक्तिरपि नेया । न द्वितीयः महदादीनामागमतस्सिध्यतां साक्षात्परम्परया वा प्रधानजन्यत्वसिद्धेः अनुमातव्याभावात् । एकप्रमाणवेद्यत्वे कार्यकारणयोर्मिथो बोध्यबोधकते न स्तः सहदृष्टाग्निधूमवत् । विप्रतिपन्नं प्रत्यनुमानं सार्थमिति चेत् न महदादीनभ्युपेत्यानभ्युपेत्य वा तेष्वव्यक्तकारणकत्वविप्रतिपत्त्ययोगात् यदप्याहुः कार्याणां स्वाधिकपरिमाणादुत्पत्तिर्नियतेति तदप्यसत् वस्त्रादिषु वैपरीत्यदृष्टेः । अव्यक्तस्य च परिच्छिन्नत्वं "तमसः परस्तान्मृत्युं भिनत्ती"त्यादिशास्त्रशतसिद्धम् । व्याप्तिवचनं तदनन्तमसंख्यातप्रमाणं चेत्यादिकमपि विभुत्वमन्तरेणापि स्यात् घटादीनामपि स्वन्यूनपरिमाणैः पिण्डाद्यवयवैरेवोत्पत्तिरिति समन्वयश्च कुत्र केषां कीदृशः सुखादिरूपेषु कार्येषु सत्त्वादीनां समनुगतिरिति चेत् किमतः । न हि यद्येनानुगतं तत्तेषां कारणमिति नियमः शौक्ल्यगोत्वादेरनेकानुगतस्य तत्कारणत्वाभावात् अन्यथा व्यक्ताव्यक्तसाधारणधर्माणां तदुभयकारणत्वप्रसङ्गात् तथा च तत्त्वाधिक्यप्रसङ्गः । एतेन विगीतं स्वानुगतकारणकं कार्यत्वात् घटशरावादिवदित्यपि निरस्तम् । घटादिष्वनुगतस्य मृत्त्वस्य तत्कारणत्वासिद्धेः मृद्द्रव्यस्य तु घटाद्यात्मना विभक्तस्याविभक्तस्य वा तेष्वनुगतत्वादृष्टेः । यदप्येकरूपान्वितत्वादेकोपादानत्वमिच्छन्ति । तदपि स्वपरमतनिर्धूतं सर्वथा सारूप्ये हेतौ तत्त्वभेदभङ्गप्रसङ्गात् यथाकथंचित्सारूप्ये तु व्यभिचारात् । साक्षादेकोपादानत्वसाधने सृष्टिक्रमादिशैथिल्यं स्यात् मृत्तत्त्वाद्युपादानभेदश्च निन्हूयते परम्परयेति तु मृद्घटादिनिदर्शनविरुद्धं नित्येषु च पुरुषेषु साक्षित्वादयो धर्मा-

By "*etc.*" in the Kārikā are meant *Gesture* and the like.

Example of suggestion due to the speciality of Gestures :—

(10) Of Gestures.

(10) "When I was at the door, she, resplendent with the very essence of beauty, having first dilated her thighs, pressed them together, drew the veil down to her face, cast unsteady glances, suppressed her voice, and lastly, folded her arms."

(*a*) Here a particular intention with regard to a disguised over is suggested by the various gestures.

Suggestiveness of the combination of the specialities.

As occasion presents itself, examples are repeated, with a view to render the matter clearer to the enquirer. The suggestiveness by means of the combination of the eight aforesaid specialities, formed by taking two or more of them together, may be similarly exemplified, as also the suggestiveness of meanings indicated and suggested. (*b*)

Words help the suggestiveness of meanings.

23.—[*Page* 79] Words are helps to the suggestiveness of meanings; since a meaning is able to suggest another only when it has its own signification based on the authenticity of the word.

" *Word*"—since suggestiveness does not belong to meanings authenticated by anything other than the word.

Thus ends Chapter III. of the *Kāvya-prakāça*, wherein is determined the Suggestiveness of Meanings.

(*a*) The pressing together of the thighs implies the inverted sexual intercourse in prospect ; the drawing down the evil, implies that he is to visit her *in camera* ; the downward glances signify evening as the proper time of meeting ; the suppression of the voice implies that he is to come stealthily at a time when all should be calm and quiet ; and lastly, the folding of the arms suggests that he would be rewarded with her embrace, for his visit.

(*b*) The suggestiveness of the combination of two of the specialities—speaker and the object addressed—is thus exemplified : "My aged mother-in-law lies here ; and I sleep here ; mark this while it is day or else blind at night you might tumble on our beds." Here it is suggested that the mother-in-law being too old is unable to hear or see anything ; and I long for your caresses ; so you are quite welcome to my bed.' This couplet together with this introductory sentence forms part of the text in some MSS., as Pandit Jhalkikara remarks : and I don't understand why he dropped it.

CHAPTER IV.

ON SUGGESTION.

Justification for taking up divisions of Poetry.

[*Page* 80]. Though after the determination of Words and Meanings, the proper course would be to consider the forms of Defects, Excellences and the Figures of Speech,—yet the author first treats of the various divisions of Poetry, because the rejectibility or acceptability of properties (defects &c.) is dependent on the previous ascertainment of the objects (the various classes of Poetry) possessing the properties.

Two kinds of Suggestive Poetry.

24. In Suggestive Poetry, where the direct (expressed) meaning is incompatible (with the context), it is either transferred to another meaning, or is altogether neglected.

(1) Suggestive Poetry based on Indication, where the direct meaning is transferred to another.

When the expressed meaning becomes incompatible, on account of the predominance of the abstruse suggested meaning based on indication,—the case becomes one of *Suggestive Poetry* (based on indication.)

The word "*Dhwani*" is to be supplied after "*yah;*" because of the following "*Dhwunau,*" which stands in need of an antecedent.

In poetry of this kind the direct meaning develops into another (more remote), e. g.

"I say, here sits an assembly of learned people, so take care and perform your part judiciously."

Here, mere "saying" changes into a form of advice. [Because mere 'saying' would be superfluous, therefore it assumes the signification of an exhortation.]

(2) Where the direct meaning is altogether neglected.

[*Page* 82.] In other cases the direct meaning, being incompatible, is altogether neglected, e. g.

"Thou hast acted quite benevolently towards me! What more is to be said? Thou hast exhibited extreme goodness. O friend! mayst thou live for a hundred years, always behaving as thou hast done in this case!"

(*a*) This is addressed by some one to his malefactor, in accordance with the law of contrary signification.

[The author now defines *suggestion based on denotation*:]

Suggestion based on denotation.

25. Where the direct meaning, though itself compatible, yet surrenders to (implies) another, (the case) is (one of) (*b*) another kind of suggestion.

"Implies another"—i. e. rests in the suggested meaning.

This (is divided into two kinds):

The two kinds of Vivakshitānya-para-vāchya.

25. *contd.* (1) The one having its suggested meaning such as to have its order of precedence (or sequence of the expressed meaning with reference to that suggested) imperceptible;—and (2) the other having the suggested meaning such as has its order perceptible.

[*Page* 83.] '*Imperceptible &c.*'—by this is meant that Poetic Sentiment does (*c*) not consist in (is not made up of) the excitant, the ensuant and the accessory Emotions, but is (manifested) through these (*d*). In this latter case, the order of pre-

(*a*) Here the Commentator: "The direct meaning being incompatible with a known malefactor, signifies the contrary."

(*b*) This another kind is the विवक्षितान्यपरवाच्य which is possible only on the predominance of abstruse suggestion based on denotation.

(*c*) Since in that case poetic sensibility will have to be attributed to the Vaidikas who possess a knowledge of the excitant &c.

(*d*) This statement is made in anticipation of the objection that the particle अलक्ष्य is superfluous, the definition being quite correct even with only अक्रम (without any order). But this objection is based on the idea that the suggesting meaning (the ensuant &c.) constitute the suggested (Poetic Sentiment), and as such there is no order of precedence or sequence. The author strikes at the very root of this objection by laying down the position that the ensuant &c. do not constitute Poetic Sentiment, but Poetic Sentiment is manifested through these, and as such there is an order, which is imperceptible in the first kind of suggestion defined.

cedence (*i. e.* the suggested meaning following the suggesting meaning, unction following excitant &c.) does exist, though it is unperceptible on account of the extreme subtlety (of the process of suggestion).

Of these two—

26. That in which the order of precedence is not perceptible—consisting in Poetic Sentiment, Emotions, semblances of these, allayment &c. of Emotions—stands as one to be embellished (i. e. predominating element), and as such is distinguished from the Figures of Speech called the Unctional (Sentimental) &c., (explained later on, which are the embellishers, the secondary element).

(1) That in which the order of sequence is not perceptible.

By *allayment &c.*, are meant the *allayment, manifestation, mixture* and *variegation* of Emotions.

Poetic Sentiment &c. (including, Emotions the semblances of Poetic Sentiment and Emotion and the allayment, manifestation, mixture, variegation of Emotion) are *alankārya* (*i. e.* the object to be embellished) when they occupy the most prominent position (*i. e.* in the suggestion of imperceptible order of precedence) as will be exemplified further on ("seeing the house empty &c.," p. 102 [text]); whereas in Poetry of Subordinate Suggestion where the direct meaning of the sentence forms the predominating element, and Poetic Sentiment and the rest (just mentioned) occupy only a subordinate position, the latter (*i. e.* Poetic Sentiment &c.) are *alankāras* (*i. e.* embellishments, the adorners, and as such, the subordinate elements) and are known as the Unctional or Sentimental (where the subordinate element is the Poetic Sentiment रस, the Agreeable (where the Emotions भाव are the subordinate elements), the Powerful (where the semblances of Poetic Sentiment and Emotion रसभावाभास are the subordinate elements),

and the Quiescent (where the allayment of Emotion भावशान्ति forms the subordinate element). Of these severally, examples will be given under Poetry of Subordinate Suggestion—[Chapter V. under Kārikās 45—46].

[*Page* 85.] The form of Poetic Sentiment is stated :—

Unction—*Rasa*—defined.

27—28. What are commonly known as the causes, effects and auxiliaries of permanent Emotions, Love and the rest, are in Poetry and Drama, spoken of as excitants, ensuants and accessories (respectively); and the permanent Emotion manifested through these, is called Poetic Sentiment (रस).

Bharata's Sutra.

[*Page* 86.] It is laid down by Bharata: "The *manifestation* or development of Poetic Sentiment is due to the correlation of the (*a*) excitant, the ensuant and the accessory."

Bhattalollata's Interpretation of Bharata.

(*b*) Bhattalollata and others interpret this *Sūtra* thus:—The permanent Emotion, Love and the rest ——generated by the Excitants, such as *women* and *gardens* and the like which are respectively the substrate and the intensifying causes,—rendered cognisable by the Ensuants, *i. e.* effects such as Amorous Glances, Embrace and the like,—and consummated by the accessories, *i. e.* auxiliaries in the shape of self-disparagement and the like ;—such a permanent Emotion, constitutes *Rasa*, (Poetic Sentiment) which though directly connected with Rāma and other heroes, is yet recognised (to exist) in subsequent actors, through imitation of form and dress, &c.

(*a*) An *excitant* is that which renders the extremely subtle permanent Emotion capable of being sensed ; an *ensuant* is that which makes them sensed ; and an *accessory* is that which gives an impetus to them. Woman and Season &c. are the Excitants; Embrace &c. the Ensuants; and Modesty, Joy, Anxiety are the Accessories.

(*b*) In his view the manifestation of *Rasa* is the manifestation of the permanent Emotion through Suggestion.

[*Page* 87.] Çri Çankuka (*a*) however interprets the *Sūtra* as follows: *Rasa* is that Emotion considered to be permanent, which, though really non-existent in the actor, is yet sensed by the eager fancy of the audience,—and which, though itself inferred through the relation of major and middle terms, is yet known to be different from the objects of ordinary Inference,—being inferred as it is, by the force of its exquisite charm, as something to be sensed (relished), on account of its connection with causes, effects and auxiliaries known as excitants, ensuants and accessories respectively, which though artificial are not recognised as such,—causes &c. illustrated by the actor by means of his acting brought about by instruction and practice by the help of a close inspection of the meaning of Poetry, of the following kind:—

Çankuka's interpretation of Bharata.

"The Lady of my life traversed the path of my sight,—She, a flow of nectar to my body, to my eyes a line of pure camphor, and the very embodiment of all my hopes and expectations!"

and

"Through ill-luck, I have been separated from her, of large and unsteady eyes; and this season too of continuously floating clouds has arrived;—"

Such Poetic Sentiment is inferred to exist in the actor, known as Rāma, (as a horse in a picture, is called a horse); and this knowledge is different from the true, the false, the doubtful as well as the knowledge of Similarity, respectively as—

'*Rāma is he*, or *he is Rāma*,' '*He is Rāma*' with a following negation, '*He is not Rāma*,' '*This may or may not be Rāma*,' and '*He is like Rāma*.'

[*Page* 90.] Thus Bhattanāyaka:—*Rasa* is (1) neither cognised (directly) (since there being no Rāma present before the audience, a perception

Bhattanāyaka's interpretation of Bharata.

(*a*) This Naiyāyika view may be thus briefly stated.—The Emotions, Love &c. are inferred to exist in the actor,—though not really existing in him—by means of the excitants &c. cleverly exhibited in the acting; the Emotion thus inferred, being sensed by the audience, through its exquisite beauty, adds to itself a peculiar charm, and thus finally develops into a state called *Rasa*. Thus the manifestation of *Rasa* is merely a process of Inference.

of his love &c. is not possible),—(2) nor produced (the causes, the excitants &c. being non-realities cannot bring about real effects)—(3) nor again manifested [since it is only an already established object that can be so *manifested*—as related either to (the actor or the real hero both of whom are) the unconcerned (as to the manifested *Rasa*) or to (the audience) knowing it as his own]; but *Rasa* consists in the permanent Emotion, *experienced in* poetry and drama, through the action of sentimentality, which (action), consisting in the generalisation (not considering the specific properties of an individual) of excitant &c., is different from Denotation (and Indication),—the permanent Emotion thus experienced, which constituting *Rasa* is enjoyed by a process of delectation similar to knowledge abounding in enlightenment and bliss, due to an excess of the attribute of Goodness (*Sattwa*) (having suppressed Foulness and Darkness, impediments to enlightening and blissful knowledge).

Abhinava-Gupta's interpretation.

[*Page* 91.] The revered Abhinava-Guptāchārya (*a*) however thus interprets:—

Poetic Sentiment (*Rasa*),—Erotic and the rest—exhibiting hyperphysical poetic charm, producing rapturous feelings akin to that attending an ecstatic contemplation of the Supreme Being (Parabrahma), eclipsing (screening from observation) everything else, inspiriting (enkindling) the body through and through, penetrating the inmost recesses of the heart (enrapturing the inmost Soul), emblazoning as if before the eyes, sensed (relished) as a delicious beverage, having its existence (or life) circumscribed by excitants &c.,

(*a*) This rhetorician view is thus stated by the Vivarana: Love etc. having been inferred from excitant, etc. become impressed on poetic hearts; after sometime, when the parts of Rāma and Sītā are cleverly acted, the Love, originally impressed, manifests itself in the poetic hearts by means of the impression hitherto lying latent and through excitants etc., cognised by means of woman and the like known to be generic causes of Love, etc., without any specific reference to Rāma and Sītā; and being thus elicited, the Emotion, is sensed by the audience and is then denominated *Rasa*. Bhattanāyaka attributes sensedness to the Emotion, itself a non-entity according to him. The rhetorician on the other hand attributes sensedness to the permanent Emotion already existing—though only latenty and hence unmanifested—in the shape of the Fancy or Imagination of the poetic audience.

and having *sensedness* for its one Soul—*Rasa* such as this, is the permanent Emotion, Love and the rest, constituted by the eager fancy or imagination of the audience, expert through practice, in the inference of permanent Emotions through the causes, excitant, etc., such as woman and the like; and though appearing as restricted to the particular audience, yet made an object of sensedness or relish,—though in fact (*a*) non-different from it (the sensedness) as a form of it—through generic properties, by the sensor (the audience) centering in himself the views of all men of poetic sensibility, having through general means (means not applying to a particular case only, but universally applicable) his unspecified (not peculiar to himself) feeling free from the contact of any other cognisable object, and brought about by the specific relation of the sensor and the sensed ignored (or rendered incognisable) at the time;—this permanent Emotion being cognised in poetry and drama among people through women etc, not designated as causes etc., but denoted by such superphysical appellations as Excitants (Ensuants and Auxiliaries) (since their work is to excite etc.,), and further the Emotion known as universal, being independent of any hard and fast rules based on any specific relation, such as—'These are mine,' 'These are my opponent's,' 'these are of some one unconcerned,' or 'these are not mine,' 'these are not my opponent's,' 'these are not of anybody unconcerned.'

[*Page* 94.] This *Rasa* is not an effect; for if it were so, it would exist even after the disappearance of its causes, the excitants etc., (for an effect always survives its cause); nor again is it cognisable (by means of Excitants etc.), since *Rasa* can never be an accomplished object, (and it is only such objects that can be cognised). But it is something to be sensed, elicited or manifested by the Excitants, Ensuants and Accessoris. If it were objected against this view—'where have you seen anything besides a cause (of an effect) and an indicator of a cognisable object';—we would reply that the fact of its having nowhere been seen is only an ornament,

(*a*) As according to Yogāchara, an object of knowledge is non-different from the knowledge itself; so here *Rasa* the object, so to say, of sensedness is non-different from it.

न्वयसम्भवः इतरेषां विद्याविरोधित्वश्रवणात्, "नाविरतो दुश्चरितान्नाशान्तो नासमाहितः । नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् । आहारशुद्धौ सत्त्वशुद्धिरित्यादिषु॥ अनाविष्काराधिकरणं समाप्तम् ॥

ऐहिकाधिकरणम् ।

सू० ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ५० ॥

द्विविधा विद्या अभ्युदयफला मुक्तिफला च, तत्राभ्युदयफला स्वसाधनभूतैः पुण्यकर्म्मभिः पुण्यकर्म्मानन्तरमेवोत्पद्यते ? उतानन्तरं ? कालान्तरे वेत्यनियम ? इति संशयः पूर्वोक्तैः पुण्यकर्म्मभिर्हि विद्वान् जायते यथोक्तं भगवता । "चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्ज्जुने"ति साधने निर्वृत्ते विलम्बहेत्वभावात् अनन्तरमेवेति प्राप्त उच्यते— ऐहिकमप्रस्तुतप्रतिबन्ध इति, ऐहिकमभ्युदयफलमुपासनम् अप्रस्तुतप्रतिबन्धे अप्रस्तुते प्रबलकर्मान्तरप्रतिबन्धे सत्यनन्तरं प्रतिबन्धे सति तदुत्तरकालमित्यनियमः, कुतः तद्दर्शनात्, दृश्यते हि प्रबलेन कर्म्मान्तरेण कर्म्मफलप्रतिबन्धाभ्युपगमः श्रुतौः, "यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्य्यवत्तर"मित्युद्गीथविद्यायुक्तस्य कर्मणः फलाप्रतिबन्धश्रवणात् ॥ ऐहिकाधिकरणं समाप्तम् ॥

मुक्तिफलाधिकरणम् ।

सू० एवं मुक्तिफलानियमस्तदवस्थाऽवधृतेस्तदवस्थाऽवधृतेः॥५१॥

मुक्तिफलस्याप्युपासनस्य स्वसाधनभूतैरतिशयितकर्म्मभि-

रुत्पत्तावेवमेव कालानियमः तस्याऽपि पूर्ववत्प्रतिबन्धाभावप्रतिबन्धसमाप्तिरूपावस्थावधृतेः, अत्रापि तस्य हेतोः समानत्वादित्यर्थः । सर्वेभ्यः कर्म्मभ्यो मुक्तिफलविद्यासाधनस्य कर्म्मणः प्रबलत्वात्प्रतिबन्धासम्भव इत्यधिकाशङ्का, तत्रापि ब्रह्मविदपचाराणां पूर्वकृतानां प्रबलानां सम्भवात् प्रतिबन्धसम्भव इति परिहारः, द्विरुक्तिरध्यायपरिसमाप्तिं द्योतयति ॥ मुक्तिफलाधिकरणं समाप्तम् ॥

इति श्रीभगवद्रामानुजाचार्य्यविरचिते शारीरकमीमांसाभाष्ये तृतीयाध्यायस्य चतुर्थः पादः ४ ॥ समाप्तश्चायमध्यायः । श्रीमते रामानुजाय नमः । नमः पूर्वाचार्येभ्यः ।

टी० सू० अनाविष्कुर्वन्नन्वयात् ॥ ४९ ॥ सङ्गतिः स्फुटा, बाल्योपादाने किं कामचारादिकमपि उपादेयम् ? उत माहात्म्यानाविष्करणमेव ? किं बाल्य–शब्दः सर्वबालककर्मपरः ? उत माहात्म्यानाविष्काररूपबालस्वभावविशेषपरः ? नाविरत इत्यादिश्रुतिः किं बाल्य–शब्दस्य अनाविष्कारपरतामवगमयति ने ? ति, न चेत्सर्वबालकर्मपरतया बाल्य–शब्दस्य कामचारादेरुपादेयत्वम्, अवगमयति चेत् अनाविष्कारपरतया बाल्य–शब्दस्य दम्भादिराहित्यमेव उपदेयं स्यात् । ननु कथं रागप्राप्तस्य कामचारादेर्विधेयत्वशङ्का, नैवं रागप्राप्तर्तुगमनादेर्नियमार्थं विधानदर्शनात्, ऋतुगमनं नान्यत्र निषिद्धं, रागप्राप्त निषिद्धं कथं विधेयमिति चेन्न पश्वालम्भनविधानवद् बाल्यविधानस्यापि सम्भावितत्वात्, नियमशास्त्राणि चेति ब्रह्मविद्व्यतिरिक्तविषयाणीति भावः । राद्धान्तमाह "एवं प्राप्ते"इति, बालस्येति स्वभावोऽभिजनशुद्ध्यादिः नियमशास्त्राणां ब्रह्मविद्व्यतिरिक्तविषयत्वं परिहृतम्, एतदाश्रमनिष्ठस्य विशेषतो नियमदर्शनादित्यर्थः । अनाविष्काराधिकरणं समाप्तम् ॥ सू० ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ५० ॥ अङ्गचिन्ता कृता, अङ्गिनिष्ठासिद्धिसमयो निरूप्यत इति सङ्गतिः किमैहि-

कफलोपासनं स्वसाधनपुण्यकर्मानन्तरमेवोत्पद्यते? उतानन्तरं कालान्तरे वेत्यनियमः? किं तदुत्पत्तेः प्रतिबन्धः संभवति? नेति? न चेदानन्तर्य-नियमः, सम्भवे त्वनियमः उद्गीथाद्युपासनरहितयज्ञादिसुकृतैर्विद्या-निष्पत्तावयं विचारः विद्यायाः पुण्यहेतुकत्वे सिद्धे हि अयं विचार इत्यत्राह "यथोक्तमिति, ॥ ऐहिकाधिकरणं समाप्तम् ॥ सू० एवं मुक्ति-फलानियमस्तदवस्थाऽवधृतेस्तदवस्थाऽवधृतेः ॥ ५१ ॥ सङ्गतिः स्फुटा, किं मुक्तिफलमुपासनं स्वसाधनकर्मानन्तरमुत्पद्यते? उतानन्तरं कालान्तरे वेत्यनियमः? किं परविद्यासाधनात्कर्मणः प्रबलकर्मान्तरं सम्भवति नेति? असम्भवे नियमः सम्भवे त्व नियम इति, मुक्तिफल-शब्दो बहुव्रीहिः उद्-गीथाद्युपासनरहितयज्ञादिनिष्पाद्यपरविद्यानिष्पत्तिविषयोऽयं विचारः । तस्य हेतोः-पूर्वत्रोक्तहेतोः, । अधिकाशङ्कामाह "सर्वेभ्य"इति, भगवत्प्रीत्य-तिशयहेतुत्वेन प्राबल्यात् न तत्प्रतिबन्धकमस्तीति शङ्का, ब्रह्मविदपचारः प्रतिबन्धक इति परिहारः । इतरे त्रयोऽपि इदमधिकरणद्वयं विद्यासाध-नानन्तरं विद्योत्पत्तिविषयं निष्पन्नायां विद्यायां तत्फलभूतमुक्तिविषयं च वर्णयन्ति । तत्र परे तु ऐहिकमित्यत्र विद्योत्पत्तिरप्रतिबन्धे अस्मिन् जन्मनि स्यात्, अन्यथा अन्यत्रेति सिद्धान्तयन्ति तत्र विचारस्य ऐहिको-पासनविषयत्वाभावमात्रे विरोधः, तत्त्वनन्तराधिकरणविचारानुपपत्तेरनु-पपन्नम् अनन्तराधिकरणस्य को विचारः मुक्तिरूपे फलेऽपि उत्कर्षनिकर्ष-कृतः कश्चिद्विशेषप्रतिनियमः फलत्वात्सम्भवति इत्याशङ्क्य परिह्रियते मुक्ते-रेकरूपत्वावधृतेः इति चेत् उच्यते उत्कर्षनिकर्षकृतविशेषप्रतिनियम इति, किं स्वरूपगतविशेषः? उत विलम्बाविलम्बरूपविशेषो विवक्षितः? न प्रथमः, इहासङ्गतत्वात्, चतुर्थस्य चतुर्थे पादे हि तस्य निरूप्यता, निरूप्यते च-"सं-पद्याविर्भाव"इति, द्वितीयेऽपि किं विद्यायामनिष्पन्नायां विलम्बाविलम्बवि-चारः? उत निष्पन्नायां? प्रथमे निवर्त्तकानिष्पत्तौ निवर्त्यनिवृत्तेः प्रसङ्गाभा-वेन विलम्बनिश्चयादनारम्भः, तृतीये वसिष्ठादीनामाधिकारिकाणां विद्यावतामपि विलम्बस्य पूर्वं समर्थितत्वात् इदानीन्तनानां ब्रह्मज्ञान-वतां देहपातविलम्बाच्च विलम्बाविलम्बरूपविशेषप्रतिनियमनिरासे,

ऽनुपपन्नः, अत उपासनभेदेनैव अधिकरणवर्णनं युक्तम् । अपरे तु विद्या फलमात्मापरोक्ष्यं किमिहैव जन्मनि? उत इह वान्यत्र वेत्यनियम? इति विचार्य पूर्वाधिकरणेनानियम इति सिद्धान्तयन्ति । अनन्तरे चापरोक्ष्ये सति तद्देहपाते मोक्षः दर्शनमात्रे कर्मक्षयश्रुतेरिति पूर्वपक्षं कृत्वा आपरोक्ष्ये तारतम्यसम्भवात् तत्रैवान्यत्र वेत्यनियमः, मोक्षस्त्वेकरूपः परमात्मवास्या हि मुक्तिरवधृतेत्याहुः तेषामपि मोक्षैकरूपत्वं सिद्धान्तश्चेत् पूर्ववदसङ्गतिः पुनरुक्तिश्च, विलम्बाविलम्बसम्भवे निरूप्ये यावदधिकारमित्युनेन गतार्थत्वादनारम्भणीयता । संशयाभावाच्चापरोक्ष्यमात्रे मुक्तिः कस्य केन सम्भाव्यते । अन्ये तु साक्षात्कारसाधनानि इहैव अप्रतिबन्धे सति तु प्रतिबन्धे अन्यत्र जन्मनि साक्षात्कारं जनयन्तीति पूर्वाधिकरणे निश्चित्य चरमाधिकरणे ब्रह्मसाक्षात्कारफलस्य मुक्तेस्तद्देहावसानभावित्वं स्वतः, सति तु प्रतिबन्धे जन्मान्तरे आधिकारिकेषु वसिष्ठादिषु मुक्त्यवस्थावधृतेः, अयं च न्यायः कर्मफलेषु स्वर्गादिषु च सूत्रकारेण प्रसङ्गादिह प्रतिपादित इत्याहुः । एषामपि चरमाधिकरणसिद्धान्तस्य प्रागेव सिद्धतया अधिकरणद्वयविभागानुपपत्तिः पूर्ववदनुसन्धेया । यज्ञादकर्मफलानामिह विचारस्तु न सूत्रविवक्षितः, मुक्तिफलशब्दोपादानात्, न हि "फलमत उपपत्तेरि"ति वत्साधारण–शब्देन निर्देशः, अनपेक्षितत्वादभिप्रायकल्पनं चानुपपन्नं यज्ञादीनां विद्याङ्गत्वादपेक्षितमिति चेत् तत्पूर्वसूत्रेण कृतमित्यनपेक्षितत्वम्, अत उपासनभेदविषयतयैव अधिकरणद्वयवर्णनं युक्तमिति ॥ मुक्तिफलाधिकरणं समाप्तम् ॥

इति श्रीहरितकुलतिलकवाग्विजयिसूनुना श्रीरङ्गराजदिव्याज्ञालब्धवेदव्यासापरनामधेयेन श्रीमद्वरदाचार्यपादसेवासमधिगतश्रीभगवद्रामानुजविरचितशारीरकमीमांसाभाष्यहृदयेन श्रीसुदर्शनसूरिणा विलिखितायां श्रुतप्रकाशिकायां तृतीयाध्यायस्य चतुर्थः पादः ॥ ४ ॥ समाप्तश्चायमध्यायः ।

श्रीमते रामानुजाय नमः । नमः पूर्वाचार्येभ्यः ।

समुदिताधिकरणसंख्या ॥ १२३ ॥ समुदितसूत्रसंख्या ॥ ४६८ ॥

पादेऽधिकरणसंख्या ॥ १५ ॥

श्रीमते रामानुजाय नमः ॥

अथ चतुर्थोऽध्याय आरभ्यते ।

आवृत्त्यधिकरणम् । सू० आवृत्तिरसकृदुपदेशात् ॥ १ ॥

भा० तृतीयेऽध्याये साधनैः सह विद्या चिन्तिता, अथेदानीं विद्यास्वरूपविशोधनपूर्वकं विद्याफलं चिन्त्यते, तत्र ब्रह्मविदाप्नोति परं तमेवं विदित्वाऽतिमृत्युमेति ब्रह्म वेद ब्रह्मैव भवति यदा पश्यः पश्यते रुक्मवर्णमित्यादिवेदान्तवाक्येषु ब्रह्मप्राप्तिसाधनतया विहितं वेदनं किं सकृत्कृतमेव शास्त्रार्थः ? उत असकृदावृत्तमिति ? संशयः, किं युक्तं, सकृत्कृतमिति, कुतः ब्रह्म वेद ब्रह्मैव भवतीति वेदनमात्रस्यैव विधानादसकृदावृत्तौ प्रमाणाभावात्, न चावघातादिवद्वेदनस्य ब्रह्मापरोक्ष्यं प्रति दृष्टोपायत्वात् यावत्कार्य्यमावृत्तिरिति शक्यं वक्तुं, वेदनस्य दृष्टोपायत्वाभावात् ।

टी० ॥ सू० आवृत्तिरसकृदुपदेशात् ॥ १ ॥ अध्यायसङ्गतिमाह "तृतीय" इति, तृतीये पादद्वयेन प्रथममुपासनोपयोगिबाह्यविषयवैतृष्ण्यभगवत्तृष्णाजननहेतोर्निरूपणीयं हि निरूपितं, तृतीये विद्याभेदाभेदचिन्ता चतुर्थेऽङ्गचिन्तेति तृतीयाध्याये विद्यैव निरूपितेत्यर्थः । चतुर्थे फलमेव प्रधानतः प्रतिपाद्यं, विद्याविषये पूर्वमनिरूपितांशश्च निरूप्यते, अस्य साध्यस्येदं साधनमिति साध्यसाधनभावसंबन्धज्ञापनार्थं भक्तिरूपापन्नज्ञानस्य प्रीतिरूपतया फलकोटिनिवेशज्ञापनार्थं च कर्मयोगापेक्षया च साध्यत्वमस्तीत्यत्र चिन्त्यते, तत्रेत्यादि किं वेदान्तविहितवेदनं सकृत्कृता शास्त्रार्थः ? उतासकृदावृत्त ? निति, किं ब्रह्म विदाप्नोतीत्या-

दिभिर्वेदनमात्रं विधीयते ? उत निदिध्यासनं ? किमत्र विदि–शब्दो ज्ञानमात्रपरः ? उतोपासनपरः ? उपक्रमोपसंहाराभ्यां वाक्यान्तराच्चोपासनपरत्वं विदि–शब्देऽवगम्यते ने ? ति, न चेदुपासनपरत्वाभावेन वेदनमात्रं विधीयत इति सकृत्कृतः शास्त्रार्थः । अवगम्यते चेद्विदि–शब्दस्योपासनपरत्वान्निदिध्यासनपरं वेदनं विहितमित्यसकृदावृत्तमेव शास्त्रार्थः, आवृत्तौ प्रमाणाभावेऽपि दृष्टोपयोगेष्वावृत्तिः क्रियत इत्यत्राह "न चे"ति, अदृष्टोपायत्वं सिद्धान्तिनैवोक्तमित्याह–

सू० ज्योतिष्टोमादिकर्माणि वेदान्तविहितं च वेदनं परमपुरुषाराधनरूपम्, आराधिताच्च परमपुरुषाद् धर्मार्थकाममोक्षाख्यपुरुषार्थावाप्तिरिति हि "फलमत उपपत्ते" रित्यत्र प्रतिपादिम् । अतो ज्योतिष्टोमादिवद्यथाशब्दं सकृत्कृतमेव शास्त्रार्थ इति प्राप्ते प्रचक्ष्महे–आवृत्तिरसकृदिति असकृदावृत्तमेव वेदनं शास्त्रार्थः कुतः उपदेशात् ध्यानोपासनपर्यायेण वेद[1]नोपदेशात् तत्पर्य्यायत्वं च विद्युपास्तिध्यायतीनामेकस्मिन् विषये वेदनोपदेशपरवाक्येषु प्रयोगादवगम्यते–तथा हि मनो ब्रह्मेत्युपासीतेत्युपास्तिनोपक्रान्तोऽर्थो "भाति च तपति च कीर्त्त्या यशसा ब्रह्मवर्चसेन य एवं वेदे"ति विदिनोपसंह्रियते, तथा यस्तद्वेद यत्स वेद स मयैतदुक्त इत्युपक्रमे विदिनोक्तं रैक्वस्य ज्ञानम् अनुम एतां भगवो देवतां शाधि यां देवतामुपास्से इत्युपास्तिनोपसंह्रियते ॥

टी० "ज्योतिष्टोमादी"ति, सिद्धान्तमाह "इति प्राप्त"इति, ध्यानोपासनपर्यायेण वेदनशब्देनेति, अत्र निमित्तभेदेऽप्येकार्थपर्य्यवसा-

१ वेदनशब्देनोपदेशादिति पुस्तकान्तरपाठो युक्तोभाति ।

यित्वं पर्य्यायत्वं विवक्षितं, पर्य्यायत्वं कथमित्यत्राह "तत्पर्य्यायत्वं चे"ति, कीर्त्तिः–परत्वविषयप्रथा, यशः–सौलभ्यप्रथा, ताभ्यां भाति ब्रह्मवर्चसेन तपतीत्यर्थः, यथा भक्तिस्नेहौ परत्वसौलभ्यविषयौ भिद्येते तथा कीर्त्तियशसी, "स्नेहो मे परमो राजन् । भक्तिश्च नियता वीरे"त्यत्र हि तथा दृश्यते, रञ्जनवाचिना राज–शब्देन वीर–शब्देन च स्नेहभक्ती सौलभपरत्वविषये अवगम्येते । नाथ योनिसहस्रेष्वित्यत्र तेषु तेष्वच्युता भक्तिरिति तत्रैव प्रकरणे या प्रीतिरविवेकानामिति च पठ्यते । तथा कीर्त्तियशसोर्भेदः यस्तद्वेद यो वेदिता यत्स वेद यच्च वेद्यं स मयैतदुक्तः स वेदिता रैक्व तद्वेद्यं ब्रह्म चोभयं मयोक्तमित्यर्थः "पुँल्लिङ्गनिर्द्देशो रैक्वाभिप्रायेण, अनुम इत्यादि, मे अनुशाधीत्यन्वयः, "व्यवहिताश्चे"ति सूत्रात्, उपसंह्रियते उपक्रमोक्तिः पश्चादनूद्यत इत्यर्थः । एकैकत्र विद्युपास्त्योरेकार्थविषययोः प्रयोगो दर्शितः । अथानेकत्र प्रदेशभेदेनैकैकस्य प्रयोगं दर्शयति–

सू० तथा ब्रह्मविदाप्नोति परमित्यादिवाक्यसमानार्थेषु वाक्येषु "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ततस्तु तं पश्यति निष्कलं ध्यायमान" इत्यादिषु ध्यायतिना वेदनमभिधीयते, ध्यानं च चिन्तनं तच्च स्मृतिसन्ततिरूपं न स्मृतिमात्रम्, उपास्तिरपि तदेकार्थः एकाग्रचित्तवृत्तिनैरन्तर्य्ये प्रयोगदर्शनात् तदुभयैकार्थ्यादसकृदावृत्तसन्ततस्मृतिरिह ब्रह्म वेद ब्रह्मैव भवति ज्ञात्वा देवं मुच्यते सर्वपाशैरित्यादिषु वेदनादिशब्दैरभिधीयत इति निश्चीयते ॥

सू० लिङ्गाच्च ॥ २ ॥

लिङ्गं–स्मृतिः स्मृतेश्चायमर्थोऽवगम्यते, स्मर्य्यते हि मोक्षसाधनभूतं वेदनं स्मृतिसन्ततिरूपम ।

टी० "तथे"ति, अत्र "छागो वा मन्त्रवर्णादि"ति न्यायोऽभिप्रेतः ध्यायमान-शब्दोपादानेन निदिध्यासितव्य इत्यत्र सन्प्रत्ययस्य इष्यमाण-प्रधानत्वं दर्शितं, ध्यायतिना वेदनमुच्यतां ततः किमसकृदावृत्तेरित्यत्राह "ध्यानञ्च चिन्तन"मिति, ध्यै चिन्तायामिति हि धातुः, असकृदावृत्तत्वं विच्छेदेऽप्युपपद्यते इति तद्व्यावृत्त्यर्थमाह "असकृदावृत्तसन्ततस्मृति"रिति, सू· लिङ्गाच्च ॥ २ ॥ लिङ्ग-शब्दं व्याचष्टे "लिङ्गं स्मृति"रिति, परे चापरे च श्रवणमनननिदिध्यासनानामावृत्तिरपेक्षिता वा नेति विचारयन्ति तद-युक्तं श्रवणमनननयोरागप्राप्तत्वेन यावदर्थनिश्चयं तदावर्त्तनस्य प्राप्त-त्वात् असकृत्पदं हेत्वंशविषयमाहुः । श्रोतव्यो मन्तव्यो निदिध्या-सितव्य इत्यसकृदुपदेशादिति तदयुक्तं श्रोतव्यादिशब्दैरेकैकस्यावृत्त्य-भावात्, उपदेशक्रियाया आवृत्तिर्विवक्षितेति चेत् तर्हि सकृच्छ्रवणेन सकृ-न्मननेन सकृन्निदिध्यासनेन च तस्योपदेशस्य सफलतया तेषां प्रत्येका-वृत्तौ प्रमाणत्वाभावात् तेषामात्मसाक्षात्कारार्थत्वात् । वैतुष्यार्थावघात-स्येव दृष्टार्थत्वादावृत्तिसिद्धिरिति चेत् तर्हि असकृदुपदेशादिति हेतुर-हेतुः स्यात्, दृष्टार्थत्वादित्येव सूत्रयितव्यम् असकृच्छब्दस्यावृत्तिविशेष-णत्वन्तु सफलम् आवृत्ति-शब्दस्य द्विस्त्रिःप्रत्ययमात्रेणापि कृतार्थत्वात् आवृत्तिश्चात्मापरोक्ष्ये दृष्टोपायः सकृच्छ्रुताद्वाक्यादप्रतीतस्यार्थस्यावर्त्तनेन सम्यक्प्रतिपत्तिदर्शनात् तदापरोक्ष्यं च बन्धनिवृत्तौ दृष्टोपायः रज्ज्वापरो-क्ष्येण सर्पभ्रमनिवृत्तिदर्शनादिति चायुक्तं धातुःप्रसादाद् वीतशोकः मद्भक्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यतीति श्रुतिस्मृतिविरोधात्, ज्ञानवेदनशब्दा-न्वितवाक्यान्येव विषयः न तु ध्यानादिशब्दान्वितानि ध्यानादिपदानामा-वृत्तप्रत्ययविषयत्वे संशयाभावात् आत्मनोनित्यापरोक्षत्वाभ्युपगमात् ॥

श्रु० तद्रूपप्रत्यये चैका सन्ततिश्चान्यनिःस्पृहा । तद्ध्यानं प्रथमैः षड्भिरङ्गैर्निष्पाद्यते तथे"ति, तस्मादसकृदावृत्तमेव वेदनं शास्त्रार्थः ॥ आवृत्त्यधिकरणं समाप्तम् ॥

"प्रकृत्या भगालम्" ॥ भगालमित्यर्थग्रहणमित्याह । 'भगालवाचीति'। अत्र च व्याख्यानमेव शरणम् । 'भगालादयो मध्योदात्ता इति'। लघावन्ते द्वयोश्च बह्वषो गुरुरिति वचनात् ॥

"शितेर्नित्याबह्वज्बहुव्रीहावभसत्" ॥ 'अंसोष्ठशब्दावित्यादि'। अम् रोगे, अमेः सन्, अंसः, उष दाहे, उषिकुषिगार्त्तिभ्यस्थन्, ओष्ठः, दर्शनीयशब्दोऽनीयर्प्रत्ययान्तो मध्योदात्तः, शितिशब्दो वर्णानां तणतिनितान्तानामित्याद्युदात्तः ॥

"गतिकारकोपपदात् कृत्" ॥ प्रकारक इत्यादौ कुगतिप्रादय इति समासः, इध्मप्रव्रश्चनादौ कर्मणि षष्ठ्याः समासः, करणे ल्युट्, इध्मं प्रवृश्च्यते येन सोऽत्र इध्मप्रव्रश्चनः, शद्लृ शातने, णिच्, शदेरगतौ तः, पलाशानि शात्यन्ते येन स दण्डः पलाशशातनः, श्मश्रु कल्प्यते येन स क्षुरादिः श्मश्रुकल्पनः, कृपू सामर्थ्ये ण्यन्तः केवलो वा । 'ईषत्कर इति'। एतदुपपदग्रहणस्य साक्षादुदाहरणं सुदुरोस्तु गतित्वादपि सिद्धं, स्तम्बेरमादौ च कारकत्वात्, उच्चैःकृत्य उच्चैःकारमित्यादिकमप्युपपदग्रहणस्यैवोदाहरणम् । 'देवदत्तस्येति शेषलक्षणा षष्ठीति'। न कर्मलक्षणा, तथा हि सति कारकमेव देवदत्तः स्यात्, तृजकाभ्यां कर्त्तरि चेति समासप्रतिषेधप्रसङ्गश्च, अथ कृद्ग्रहणं किमर्थं, निर्गतः कौशाम्ब्याः निष्कौशाम्बिरित्यत्र मा भूत्, नैतदस्ति प्रयोजनं, यत्क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञा भवन्ति, न च कौशाम्बीशब्दं प्रति क्रियायोगः, कारकमपि क्रियाया एव सम्भवति, उपपदमपि धात्वधिकारे सप्तमीनिर्दिष्टं प्रत्ययनिमित्तमुच्यते, तदेवं गत्यादिभिस्त्रिभिरपि क्रियावाच्युत्तरपदमाक्षिप्यते, धातुश्च क्रियावाची, धातोश्च द्वये प्रत्ययाः, कृतः तिङश्च, तत्र तिङन्ते समासाभावात्कृदन्तमेव संभवतीति, अनुव्यचलदित्यत्र तु न गतित्वनिबन्धनः समासः किं तर्हि सुबिति योगविभागनिबन्धनः, धातुप्रत्ययसमुदायपरिग्रहार्थं तु, अन्यथा यत्क्रियायुक्तास्तं प्रतीति वचनाद्धातुमेव प्रति गतित्वाद्धातावेवोत्तरपदे स्वरः स्यात् प्रणीरुन्नीरिति, इह न स्यात् प्रणायकः उन्नायक इति, एतदपि नास्ति

प्रयोजनं, यत्क्रियायुक्ता इति, नैवं विज्ञायते यस्य क्रिया यत्क्रिया यत्क्रि-
यया युक्तास्तं प्रतीति, एवं विज्ञायमाने त्वन्वयव्यतिरेकाभ्यां धातो-
रेव क्रिया वाच्येति तमेव प्रति गत्युपसर्गसंज्ञाप्रसंगः, कथं तर्हि विज्ञा-
यते या क्रिया यत्क्रिया तं क्रियालक्षणमर्थं प्रति गत्युपसर्गसंज्ञे
भवतः, केवलायाश्च क्रियाया वाचकमुत्तरपदं नास्तीति क्रियाविशिष्ट-
साधनवाचिनि प्राणीः प्रकारक इत्यादौ क्रियायां सिद्धताभिधायिनि
प्रभवनमित्यादौ च सर्वत्र भविष्यतीति नार्थ एतेन क्लृप्तग्रहणेनात आह ।
'क्लृप्तग्रहणं विस्पष्टार्थमिति'। य एवं प्रतिपत्तुमसमर्थस्तं प्रति विस्प-
ष्टार्थं क्रियत इत्यर्थः । यदि तर्हि विस्पष्टार्थमपि तावत्क्लृप्तग्रहणं क्रियते
आमन्ते तर्हि न प्राप्नोति प्रपचतितरां प्रपचतितमामिति, ततश्च समा-
सस्वरं बाधित्वाऽव्ययस्वर एव स्यादित्यत आह । 'प्रपचतितरामित्या-
दि'। अत्र हि प्रशब्दस्य तरबन्तेन समासो नामन्तेन, कथम्, अन्तर-
ङ्गत्वाद्धातुः पूर्वमुपसर्गेण युज्यते प्रपचिंत्यस्यामवस्थायां सुबभावात्
समासो न कृत इत्येतावत, ततस्तिङ्, तस्यामप्यवस्थायां सुबभावस्तत-
स्तरप्, तद्धितान्तत्वात्सुप्, तेन समासः, ततश्चाम्प्रत्ययः, तत आम्स्वरः
सतिशिष्टः, कथं पुनस्तरबन्तेन समासः, कथं च न स्यात्, गतिकारको-
पपदानां कृद्भिः सह समासवचनमिति वचनात्, नात्र कृद्भिरेव समास
इति नियम्यते किं तर्हि यदि गत्यादीनां समासो भवति तेनतेन लक्ष-
णेन तदा कृद्भिः प्राक् सुबुत्पत्तेरिति । ननु चैवमपि तरबन्तेन समासो
न लभ्यते, किङ्कारणम्, असुबन्तत्वात्, प्रातिपदिकाधिकाराद्धि तत एव
किमेत्तिङव्ययघादित्याम् भवति न सुबन्तात्, न च गतिकारकोपपदा-
नामित्येतदस्ति, अकृदन्तत्वात्, अत्राहुः । घकालतनेष्विति ज्ञापकात्
सुबन्तादेव सर्वे तद्धिताः, ङ्याप्प्रातिपदिकग्रहणं तु वृ[1]द्धाद्यर्थमेवाधि-
क्रियते, ततश्चामुत्पत्तये यः सुप् तदन्तेन समास इति । अपर आह । कुग-
तिप्रादय इत्यत्रातिङिति वक्ष्यमाणस्य प्रतिकर्षादुत्तरपदमसुबन्तमेव
समस्यते, ततश्च तरबन्तेन समासो लभ्यत इति । 'इत्येक इति'। अस्य[2]

१ विशेषणार्थमिति ३ पु॰ पा॰ ।
२ अस्य क्लृप्तग्रहणं विस्पष्टार्थमित्यादिना कृत्स्नेन संबन्धस्तदयमर्थ इत्यधिकं ४ पु॰।

छन्दोग्रहणं विस्पष्टार्थम्, न चामन्ते दोषप्रसङ्ग इत्येवं केचिद्व्याचक्षते, 'प्रपचतिदेश्याद्यर्थन्त्वित्यादि'। तुशब्दः पक्षं व्यावर्त्तयति, आदिशब्देन प्रपचतिकल्पं प्रपचतिदेशीयं प्रपचतिरूपमित्येतेषां ग्रहणं, प्रपचतिदेश्यादावर्थः प्रयोजनं यस्य तत्तथोक्तम्, एत दुक्तं भवति, न विस्पष्टार्थे छन्दोग्रहणम् अपि तु प्रपचतिदेश्यादौ यत्र सतिशिष्टस्वरान्तरं नास्ति तत्रायं स्वरो मा भूद् अव्ययपूर्वपदप्रकृतिस्वर एव यथा स्यादित्येवं सप्रयोजनं दृश्यत-इति। इदं तु वक्तव्यम्, प्रपचतितरामित्यादौ तरबन्तेन समासे पश्चादाम् भवन् प्रत्ययग्रहणपरिभाषया पचतितरशब्दस्यैव घान्तत्वात् तत एव स्यात्। तत्र को दोषः, सोपसर्गस्य सङ्घातस्यैकपद्याभावादाम्प्रपचतितरां देवदत्तेत्यादौ 'आम एकान्तरमामन्त्रितमनन्तिके' इत्येष विधिर्न स्यात्, शेषनिघातश्च प्रशब्दस्य न स्यात्, भिन्नपदत्वात्, तस्मात्प्रशब्दस्यामन्तेन समासोऽङ्गीकर्त्तव्यो न तरबन्तेन, तत्र समासत्वात् समुदायस्य प्रातिपदिकत्वे विभक्तावैकपद्यं भवति, स्वरे तु दोषप्रसङ्गात् छन्दोग्रहणमपि त्यक्तव्यमिति भाष्ये स्थितं, प्रपचतिदेशीयादौ का गतिरिति न विद्मः॥

"उभे वनस्पत्यादिषु युगपत्"॥ वनशब्दो नब्विषयस्यानिसन्तस्येत्याद्युदात्तः, पातेर्डतिः पतिः। 'तनुशब्दोन्तोदात्त इति'। केचित्तु तस्याप्याद्युदात्तत्वमत्र निपातयन्ति, तथा च तनूनपादुच्यते गर्भ आसुर इत्याद्युदात्तमधीयते। 'नरा अस्मिन्नित्यादि'। शंसेरकर्त्तरि च कारके संज्ञायामित्यधिकरणे कर्मणि वा घञ्। 'अबन्त इति'। कृत्यल्युटो बहुलमिति कर्त्तरि ऋदोरप्। 'शुनःशेप इति'। बहुव्रीहिः। 'शु[1]नःपुच्छशेपलाङ्गूलेष्विति' षष्ठ्या अलुक्। 'उभावाद्युदात्ताविति'। श्वन्शब्दः प्रातिपदिकस्वरेण, शेपशब्दः स्वाङ्गशिटामदन्तानामित्यनेन। शिडिति सर्वादीनां संज्ञा, स्वाङ्गवाचिनां शिटामदन्तानां चादिरुदात्तो भवतीत्यर्थः, शडि रुजायां, पचाद्यच् शण्डः, ग्रामादित्वादाद्युदात्तः, मर्चयतेरिणभीकापाशल्यतिमर्चिभ्यःकन्निति कन्, तितुत्रेत्यादिना इट्प्रतिषेधः,

१ शुनःशेपपुच्छेति ३ पु॰ पाठः। मुद्रितमूलपुस्तके शेपपुच्छलाङ्गूलेषु शुनः संज्ञायामिति षष्ठ्या अलुगिति पाठः स पदमञ्जर्यसंमतः।

कुत्वं, मर्कशब्द आद्युदात्तः । 'तृष्णाशब्द इति'। तृषेर्निष्ठायामस्मादेव निपातनादिडभावः, निष्ठा च द्व्यजनादित्याद्युदात्तत्वं, लबि अवस्रंसने, पचाद्यच्, अस्मादेव निपातनाल्लकारस्य बकारः, विश्वानि वयांस्यस्य विश्ववयाः, मृङो 'ऽन्येभ्योऽपि दृश्यत' इति विच्, मरिति, भुजिमृङ्भ्यां युक्त्युकौ, मृत्युः ॥

"देवताद्वन्द्वे च" ॥ उदाहरणेषु देवताद्वन्द्वे चेति पूर्वपदस्यानङ् । 'अत्र त्रय उदात्ता इति' । त्रयाणां पदानामादयः ॥

"नोत्तरपदे ऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु" ॥ अग्निशब्दोऽङ्गेर्नर्नलोपश्चेति निप्रत्ययान्तः । कृवापाजिमिस्वदिसाध्यशूभ्य उण्, युक्, वायुः । 'उत्तरपदग्रहणमित्यादि'। अन्यथा ऽस्मिन्प्रकरणे द्वन्द्वः सप्तम्या निर्दिष्टो नोत्तरपदं, तत्रानुदात्तादाविति सप्तम्यन्तं द्वन्द्वस्यैव विशेषणं स्यात्ततश्चन्द्रसूर्यावित्यादौ प्रतिषेधः स्यात्, उत्तरपदग्रहणे तु सति तस्यैव श्रुतस्यानुदात्तादावित्येतद्विशेषणं भवति । 'अनुदात्तादावित्यादि' । अन्यथा विधिप्रतिषेधयोः समानविषयत्वाद्विकल्पः प्रसज्येत । प्रथेः षिवन् सम्प्रसारणं च, शुक्रशब्दो ऽयम् ऋज्रेन्द्राग्रेत्यादिनान्तोदात्तो निपातितः ॥

"अन्तः" ॥ 'तत्र समासस्योत्तरपदस्येति'। क्वचित् समासस्यान्त उदात्तो भवति क्व चिदुत्तरपदस्येत्यर्थः, विषयविभागमुत्तरत्र दर्शयिष्यति ॥

"थाथघञ्क्ताजबित्रकाणाम्" ॥ 'आद्युदात्तमुत्तरपदं स्यादिति'। यदीदं नोच्येतेति भावः । 'दूरादागत इति' । अत्र कर्मणि क्तः, ग्रामादिरभिधेयः, कृता आङो गतिसमासे 'गतिरनन्तर' इति प्रकृतिभावे चागत इत्याद्युदात्तं, तेन स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेनेति समासः, 'पञ्चम्याः स्तोकादिभ्य' इत्यलुक्, तत्र कारकात्परमागतमित्येतत् कृदुत्तरपदप्रकृतिस्वरेणाद्युदात्तं स्यात् । 'विशुष्क इति' । शुषेरकर्मकत्वात् कर्त्तरि क्तः, शुष्कधृष्टाविद्युदात्तत्वं, ततो गतिसमासः । 'आतपशुष्क

इति'। नायं सिद्धशुष्केति सप्तमीसमासः, सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालादिति पूर्वपदप्रकृतिस्वरप्रसङ्गात्, तस्मात् कर्तृकरणे कृता बहुलमिति समासः। 'प्रज्ञयः प्रजय इति'। 'एरच्'। ननु च कृदुत्तरपदप्रकृतिस्वरेणैवाचान्तोदात्तत्वं सिद्धमत आह। 'क्षयो निवासइत्यादि'। 'प्रलवः प्रसव इत्यादि'। 'ऋदोरप्'। 'प्रलवित्रमिति'। 'अर्त्तिलूधूसूखनसहचर इत्रः'। 'गोवृष इति'। वृषु मृषु सेचने। 'सुस्तुतमिति'। सुःपूजायामतिरतिक्रमणे चेति कर्मप्रवचनीयसंज्ञा, स्वती पूजायामिति प्रादिसमासः॥

"सूपमानात् क्तः"॥ 'वृक्णावलुप्तमित्यादि'। लूञ् छेदने, च्युङ् प्रुङ् प्लुङ् गतौ, नर्द गर्द शब्दे, सर्वत्र कर्तृकरणे कृता बहुलमिति समासः। वृकैरिवावलुप्तमित्यादिर्विग्रहः। 'उपमानादपीत्यादि'। अत्रेतिशब्दस्यानन्तरं प्राप्त इत्यस्यानुषङ्गः॥

"संज्ञायामनाचितादीनाम्"॥ संभूतादयः शब्दा रामायणादीनां संज्ञाः, रामायणशब्दो नपुंसकलिङ्गः, प्रायेण तु पुल्लिङ्गः पठ्यते, 'उपहूतइति'। ह्वेञो निष्ठायां यजादित्वात् संप्रसारणम्। 'परिजग्ध इति'। अदो जग्धिरादेशः। 'प्राप्त्यर्थाद्भवतेरिति'। चुरादावाधृषाद्वेत्यधिकारे भू प्राप्तावात्मनेपदीति पठ्यते, किं पुनः कारणं प्रयत्नेन कर्मणि क्त उपपाद्यते ऽत आह। 'गतिरनन्तर इत्यत्र हीति'। 'तद्बाधनार्थश्चेदमिति'। प्रकृतोदाहरणाभिप्रायमेतद् न सूत्राभिप्रायम्। 'धनुष्खातेति'। नित्यं समासे ऽनुत्तरपदस्थस्येति षत्वम्। चिञ् चयने, ष्ठा गतिनिवृत्तौ, ण्यन्तः केवलश्च, ग्रह उपादाने, वच परिभाषणे, पद गतौ, श्लिष आलिङ्गने, डुधाञ् धारणपोषणयोः, सर्वत्र कर्मणि क्तः, एते आचितादयः। संहिताऽगवीतिगणसूत्रं तद् व्याचष्टे। 'यदा गोरन्यस्येति'॥

"प्रवृद्धादीनां च"॥ वृधु वृद्धौ, यु मिश्रणे, डुधाञ् धारणे, रुह बीजजन्मनि, शसु हिंसायाम्। 'खट्वारूढ इति'। खट्वा क्षेप इतिसमासः, नैतदिह पठितव्यमित्यहीने द्वितीयेत्यत्रावोचाम। कविभिः शस्तः, तृतीया कर्मणीत्यस्यापवादः। 'प्रायो वृत्तिप्रदर्शनार्थ इति'।

प्रायो बाहुल्येन या वृत्तिर्यानादिष्वर्थेषु तस्याः प्रदर्शनार्थ इत्यर्थः । 'पुनस्स्यूतमिति' । सीव्यतेश्छ्वोः शूडनुनासिके चेति ऊठ्, पुनश्चनसौ च्छन्दसीति गतिसंज्ञायां समासः ॥

"कारकाद्दत्तश्रुतयोरेवाशिषि" ॥ संज्ञायामनाचितादीनामिति विहितमन्तोदात्तत्वमनेन नियम्यते, देवा एनं देयासुरित्येवं प्रार्थितैर्देवैर्दत्तो देवदत्तः, आशिषि लिङ्लोटाविति वर्त्तमाने क्तिच् क्तौ च संज्ञायामिति क्तः, दोदद्घोः । 'सम्भूतो रामायण इति' । कारकादित्यनुच्यमाने गतिकारकोपपदादिति त्रितयाधिकाराद्यथैव कारकान्नियमो भवति तथा गतेरपि स्यात् । 'एवकारकरणं किमिति' । सिद्धे विधिरारभ्यमाणो ऽन्तरेणाप्येवकारं नियमार्थो भविष्यतीति प्रश्नः । 'कारकावधारणमित्यादि' । असति ह्येवकारे विपरीतोऽपि नियमः स्यात् कारकादेव दत्तश्रुतयोरिति, एवं चाकारकाद् दत्तश्रुतयोर्न स्यादिष्यते च, तथा कारकस्यानियतत्वाद्देवपालित इत्यादावन्तोदात्तप्रसङ्गो ऽतः कारकावधारणं यथा स्याद्दत्तश्रुतावधारणं माभूदित्येवमर्थं करणमित्यर्थः । 'अय[1]मपि नियम इष्यतइति' । एतच्च तन्त्रेण सूत्रद्वयोच्चारणादेक सूत्रे ऽपि आशिष्येवेति भिन्नक्रमत्वादेवकारस्य लभ्यते ॥

"इत्थंभूतेन कृतमिति च" ॥ 'सुप्तप्रलपितमित्यादि' । कथं पुनरेतान्युदाहरणानि, यावता कृतमित्युच्यते न च प्रलपितादीनि कृतानि, अभूतप्रादुर्भावएव हि करोतिर्वर्त्तते, ततश्च सुप्रकृतं सुप्रभाषितं सुप्रोत्थादितमित्यादिकमेवोदाहर्त्तव्यमत आह । 'कृतमिति क्रियासामान्ये करोतिर्वर्ततइति' । ततश्च यथा क्रियावचनो धातुः क्रियायां क्रियार्थायामित्यादौ विशेषाणामपि ग्रहणं भवति तद्वदत्रापि । अभूतप्रादुर्भावो निष्पादनम् ॥

"अनो भावकर्मवचनः" ॥ पयःपानादीनामुपपदसमासः, राजभोजनादौ षष्ठ्या समासः । 'सर्वेषु प्रत्युदाहरणेष्वित्यादि' । एतेन गतिकारकोपपदादित्यस्यायमपवाद इति दर्शयति ॥

---

१ एवमत्र नियमइष्यतइति मुद्रितमूलपुस्तकस्यपाठः पदमञ्जर्यसंमतः ।

"मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः" ॥ 'रथवर्त्मेति'। वृतेरधिकरणे मनिन्, कर्तरि षष्ठ्या समासः । 'पाणिनिकृतिरिति' । कर्मणि क्तिन्, पूर्ववत्समासः । व्याख्यानशब्दः करणसाधनः, शयनासनस्थानशब्दा अधिकरणसाधनाः। 'प्रकृतिः प्रकृतिरिति'। 'तादौ च निति कृत्यता' विति पूर्वपदप्रकृतिस्वर एवात्र भवति ॥

"सप्तम्याः पुण्यम्" ॥ 'उणादीनां त्विति'। अतः कृकमिकंसेत्यत्र कमिग्रहणेनैव सिद्धे कंसग्रहणादुणादिषु पाक्षिकव्युत्पत्तिकार्यमिति भावः । पूङो यत् णुक् ह्रस्वश्च, पुण्यम् । ह्रस्वविधानादगुणत्वम् । यतोनाव इत्याद्युदात्तत्वम् ॥

"ऊनार्थकलहं तृतीयायाः" ॥ उदाहरणेषु पूर्वसदृशेति तृतीयासमासः । 'अत्र केचिदित्यादि' । नन्वेवमूनशब्दस्यापि स्वरूपग्रहणं प्रसज्येत, ततश्च तदर्थानामन्येषां ग्रहणं न स्यादत आह । 'ऊनशब्देनैव त्विति' । अर्थनिर्देशार्थत्वं तु व्याख्यानादवसेयम् ॥

"मिश्रं चानुपसर्गसन्धौ" ॥ कथं पुनर्मिश्रशब्दस्य विधीयमानः संमिश्रशब्दस्य प्राप्नोति, कथं वा मिश्रशब्देन समास उच्यमानः सोपसर्गेण लभ्यते ऽत आह । 'इहेत्यादि'। प्रत्युदाहरणे संधिं दर्शयति । 'ब्राह्मणैरिति'। एतदेव स्पष्टयति । 'ऐकार्थ्यमापन्नइति'। कथं पुनः संधिशब्दस्यायमर्थ इत्याह । 'सन्धिरिति'। पणबन्धः परिभाषणं, यदि मे भावानेवं कुर्यादहमपि ते इदं करिष्यामीत्येवंरूपः । 'केचित्पुनरिति'। गृह्यमाणो विशेषो व्यावृत्तिर्यस्यां प्रत्यासत्तौ सा तथोक्ता। ततः किमित्याह । 'तत्रेति'। यद्यपि राज्ञोपि ब्राह्मणैस्सह प्रत्यासत्तिरस्ति तथापि सत्यामपि तस्यां परस्परमूर्तिविभागस्वरूपभेदो गृह्यतइति प्रत्युदाहरणोपपत्तिरित्यर्थः । उदाहरणेषु नैवमित्याह । 'उदाहरणेष्विति' ॥

"नञो गुणप्रतिषेधे संपाद्यर्हहितालमर्थास्तद्धिताः" ॥ संपादि शोभनम् । 'कार्णवेष्टकिकमिति' । 'संपादिनीति' प्राग्वतेष्ठञ्, 'छेदिक इति'। छेदादिभ्यो नित्यमिति आर्हादगोपुच्छेत्यादिना ठक् ।

'वत्सीय इति'। प्राक् क्रीताच्छः। 'सांतापिकइति'। तस्मै प्रभवति सन्तापादिभ्य इति प्राग्वतिष्ठञ्। 'नञ इति किमिति'। प्रतिषेधे प्रायेण नञ एव प्रवृत्तिदर्शनात्प्रश्नः। 'विगार्द्धभरथिकइति'। अव्ययपूर्वपदप्रकृतिस्वर एवात्र भवति। 'गार्द्धभरथिकादन्य इत्यादि'। उदाहरणादस्य विशेषं प्रदर्शयितुं गुणप्रतिषेधइति सूत्रावयवं व्याचष्टे। 'गुण इति'। तद्धितार्थः सम्पाद्यादिः, तस्य यत्प्रवृत्तिनिमित्तं सम्पादित्वादि, आदिशब्देन तदर्हत्वादेर्ग्रहणं, स गुण इत्युच्यते, उक्तं हि।

संसर्गभेदकं यद्यत्सव्यापारं प्रतीयते।
गुणत्वं परतन्त्रत्वात्तस्य शास्त्रउदाहृतम्॥

इति कथं तस्य गुणस्य प्रतिषेध उच्यतइत्याह। 'कर्णवेष्टकाभ्यां न सम्पादीति'। 'वोढेति'। अर्हार्थे तृच्, ढत्वधत्वष्टुत्वढलोपेषु सहिवहोरोदवर्णस्येत्योत्वम्॥

"यतोश्चातदर्थे"॥ पाशतृणशब्दाभ्यां समूहे पाशादिभ्यो यः, दन्तकर्णशब्दाभ्यां भवार्थे दिगादिभ्यो यत्, शरीरावयवाच्चेति यत्। 'पाद्यमिति'। 'पादार्घाभ्यां चेति' यत्। 'अदेयमिति'। अर्हार्थे 'अचो यत्', ईद्यतीतीत्वं, गुणः। 'निरनुबन्धकैकानुबन्धयोरिति'। एते च परिभाषे वामदेवाड् ड्यड्यावित्यत्र ज्ञापिते॥

"अचकावशक्तौ"॥ 'अविक्षिपइति'। वक्ष्यमाणैः कृत्योकेष्णुज्भिः साहचर्यादचकयोः कृतोरिदं ग्रहणन्तेन कृद्ग्रहणपरिभाषया विक्षिपशब्दस्य कान्तत्वम्, दीक्षितपरिव्राजकौ शास्त्रनिषेधान्न पचतो न त्वशक्तत्वात्, तेन तत्र व्रतं गम्यते न त्वशक्तिः॥

"आक्रोशे च"॥ 'अपचोयं जाल्म इति'। लोभोत्र विवक्षितो न त्वशक्तिः॥

"संज्ञायाम्"॥ 'अदेवदत्त इति'। यो देवदत्तः सन् तत्कार्यं न करोति स एवमाक्रुश्यते॥

"कृत्योकेष्णुच्चार्वादयश्च"॥ 'ट्वनुबन्धकस्यापि ग्रहणमिति'। भवतीति वक्ष्यमाणेन संबन्धः, अत्रैव हेतुः। 'इकारादेर्विधानसामर्थ्या-

दिति'। भवतेरुदात्तत्वात्ततः परस्य खिष्णुच इटैवेकारादित्वे सिद्धे इकारादेर्विधानमिह सामान्यग्रहणार्थमेवेति भावः । 'आचार्यरित्यादि'। चरेर्ञुण् चारुः, साधेरुण् साधुः, युधा चरति योधिकः 'एजेः खश्' अङ्गमेजयः, ततोऽन्योऽनङ्गमेजयः, वदेरान्यः, न कस्मादकस्मात् । वृतु वर्तने । वृधु वृद्धौ । जित्वरा संभ्रमे । रुच दीप्तौ । धृङ् अवस्थाने, एते शानजन्ताः गृह्यते, संज्ञायां कन्, ग्रहपतिकः, गृहपतिरित्यन्ये पठन्ति ॥

"बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने" ॥ प्रथमेति स्वरूपग्रहणं, पूरणशब्दस्य स्वरितत्वात्तदधिकारविहितानां प्रत्ययानां ग्रहणम्। 'अनेन प्रथम इति'। अत्र तृतीयापूर्वपदप्रकृतिस्वर एव भवति । 'यत्प्रथमा इति'। यः प्रथम एषामिति बहुव्रीहिः। अत्रापि पूर्वपदप्रकृतिस्वर एव भवति। 'इदंप्रधाना इत्यर्थ इति'। अनेन प्रधानवचनः प्रथमशब्दो न त्वेकसंख्यावचन इति दर्शयन् गणनाभावमाह । 'उत्तरपदस्येत्यादि'। सर्वत्रेह समासस्येति प्रकृतम्, उत्तरपदादिरित्यतः प्रभृति उत्तरपदस्येति च, तत्र चोत्तरपदं कार्यित्वेनाश्रीयते, तेन यदा कबुत्पद्यते तदा कपि परतो यत्पूर्वं प्रथमेति तदन्तोदात्तं भवति न तु कबन्तं, कप्प्रत्ययो हि समासस्यैवान्तो नोत्तरपदस्य, यदा च समासार्थादुत्तरपदादकृतएव समासे समासान्त इति पक्षस्तदापि प्रथमपूरणयोरिति विशिष्टरूपग्रहणात् कपश्च तत्रानन्तर्भावादुपात्तयोरेव स्वरः। ननु यदत्रोत्तरपदं कबन्तं न तदुपात्तं यच्चोपात्तं न तदुत्तरपदं, कपा सहोत्तरपदत्वादिति नात्र कपः स्वरप्रसंगो नापि ततः पूर्वपदस्य स्वरेण भवितव्यं, तस्मादस्मिन्पक्षे उत्तरपदग्रहणमुपात्तस्योपलक्षणम्, प्रायेण हि तदुत्तरपदम्, उत्तरपदस्य कार्यित्वा,-त्कार्यः, प्रायेणोत्तरपदभूतयोः प्रथमपूरणयोः कार्यित्वादित्यर्थः ॥

"विभाषा छन्दसि" ॥ द्विस्तनामित्यन्तोदादात्तं, चतुस्तनामित्याद्युदात्तम् ॥

"संज्ञायां मित्राजिनयोः" ॥ 'विश्वामित्र इति'। 'मित्रे चर्षाविति' दीर्घः, परत्वादनेनान्तोदात्तत्वं प्राप्तं प्रतिषिध्यते, ततो बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदान्तोदात्तं भवति ॥

"व्यवायिनोऽन्तरम्" ॥ उदाहरणे व्यवधानवाचिनोन्तराशब्दात्तत्करोतीति णिचि पचाद्यच्, प्रत्युदाहरणे त्वन्यवाच्यन्तरशब्दः ॥

"मुखं स्वाङ्गम्" ॥ 'दीर्घमुखा शालेति'। मुखशब्देनात्र द्वारप्रदेशः शालाया उच्यते, ननु च स्वमङ्गं स्वाङ्गं ततश्च भवितव्यमेवात्राप्यत आह। 'स्वाङ्गमद्रवादिलक्षणं गृह्यतइति' ॥

"नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः" ॥ उच्चैर्नीचैःशब्दौ स्वरादिष्वन्तोदात्तौ, प्राक्शब्दो निगतोऽञ्चताविल्याद्युदात्तः, प्रत्यङित्यत्र ऋदुत्तरपदप्रकृतिस्वरः, गोमहतोरुक्तः स्वरः, स्थूलशब्द ऋजेन्द्रेत्यादावन्तोदात्तो निपातितः, मुषेः क्तिच्, मुष्टिः, कुश्च प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्चेति पृथुः । वदेः सः, वत्सः । 'गोमुष्टिवत्सपूर्वस्येत्यादि'। अस्य प्रतिषेधस्यावकाशो यत्र गवाद्युपमानं न भवति गौर्मुखमिव यस्य मुष्टिर्मुखमिव यस्य वत्सो मुखमिव यस्येति, सर्वत्र गवाद्युपमेयञ्चोपमानं, विकल्पस्योत्तरस्यावकाशः, यत्र गवादिपूर्वपदं न भवति सिंहमुखो व्याघ्रमुखः, गवादावुपमानउभयप्रसंगे ऽयमेव भवति प्रतिषेधः पूर्वविप्रतिषेधेन ॥

"निष्ठोपमानादन्यतरस्याम्" ॥ हिंसेः पचाद्यच्, पृषोदरादित्वादाद्यन्तविपर्ययः सिंहः, व्याजिघ्रतीति व्याघ्रः, आतश्चोपसर्गइति कः, पाघ्राध्माधेट्दृश इति शो न भवति, जिघ्रतेः संज्ञायां प्रतिषेध इति वचनात् ॥

"जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्नाः" ॥ ननूदाहरणेषु प्रत्युदाहरणेषु च 'निष्ठेति' निष्ठान्तं[1] पूर्वं प्रयोक्तव्यं स्यादित्यत आह। 'एतेष्विति'। 'प्रत्युदाहरणेष्वित्यादि'। तत्र पुत्रशब्दोन्तोदात्तः, वसेष्ट्रन् वस्त्रं, तस्यैव ल्युट् वसनम्। कुण्डशब्दो नब्विषयस्यानिसन्तस्येत्याद्युदात्तः ॥

"वा जाते" ॥ दन्तस्तनशब्दौ 'स्वाङ्गशिटामदन्तानामि'त्याद्युदात्तौ, मासशब्दः 'ग्रामादीनां चे'त्याद्युदात्तः, संवत्सरशब्दो बहिष्ठव-

[1] निष्ठान्तस्य पूर्वनिपातः प्राप्नोतीति ३ पु॰ पा॰ ।

त्सरतिशत्यान्तानामित्यन्तोदात्तः, अस्यार्थः बहिष्ठवत्सरतिशत्थ इत्येवमन्तानामन्त उदात्तो भवति बहिष्ठः, संवत्सरः, सप्ततिः, अशीतिः, त्रिंशत्, चत्वारिंशत्, गूथं, पूथं, सुखदुःखशब्दौ खान्तस्याश्मादेरित्यन्तोदात्तौ, अस्यार्थः। खान्तस्य शब्दस्याशकारमकारादेरन्त उदात्तो भवति, नखः, उखा, अश्मादेरिति किं, शिखा, मुखं, तृपेःस्फायितञ्चीत्यादिना रक्प्रत्ययः। कृतेश्छ्र च, कृच्छ्रम्। असेर्बहुलवचनाद्रक्, अस्रम् अम्बिकादयश्चेति अम्बिकशब्द इकन् प्रत्ययान्तो निपातितः, प्रतिगता आपोऽत्र प्रतीपं, कृवापाजिम्य उण्, कारुः, क्षपेः क्युन् क्षपणः, सहेः क्ते सोढः, दश सुखादयः॥

"नञ्सुभ्याम्"॥ 'समासस्यैतदित्यादि'। यद्यपि समास उत्तरपदं चेति प्रकृतन्तथाप्यत्र समासस्यैव कार्यित्वमिष्यते, एतच्च कपि पूर्वमिति वचनादवसीयते, यदि ह्यनेनोत्तरपदस्यान्तोदात्तत्वं स्यात् ततोऽकुमारीक इत्यादावनेनैव सिद्धत्वात्कपि पूर्वमिति न वाच्यं स्यात्। 'समासान्ताश्च समा[1]सावयवा भवन्तीति'। समासान्ता इत्यत्रान्तग्रहणमेतदर्थं समासान्ताः समासग्रहणेन यथा गृह्येरन्निति, तेनानृच इत्यादौ कृते समासान्ते तस्यैव समासान्तस्योदात्तत्वं भवति। 'बहृचइति'। बहोर्नञ्वदित्यतिदेशादिदमत्रोदाहृतम्। एतच्च समान्ताः समासस्यैवावयवा नोत्तरपदस्येत्याश्रित्योक्तं, न कपीत्यत्र तु पूर्वे समासान्तेषु पश्चात्तदन्तेन समास इति वक्ष्यति॥

"कपि पूर्व्वम्"॥ पूर्वेण कप एवोदात्तत्वे प्राप्ते ततःपूर्वस्योदात्तत्वं विधीयते, ह्रस्वान्तेऽन्त्यात्पूर्वमिति वचनादिह दीर्घान्ता एवोदाहृताः। 'नद्यृतश्चे' ति कप्॥

"ह्रस्वान्तेन्त्यात्पूर्वम्"॥ ह्रस्वान्तइत्यस्य बहुव्रीहेरन्यपदार्थं उत्तरपदं समासो वेत्याह। 'ह्रस्वोऽन्तो यस्येत्यादि'। अत्र च कपि परत इति पृथग्वचनात्तद्रहितमुत्तरपदं समासश्च गृह्यते, पूर्वग्रहणमनर्थकं

१ मुद्रितमूलपुस्तके समासेति नास्ति।

कपि पूर्वमित्यनुवृत्तेरित्यत आह । 'पूर्वमिति वर्तमाने इत्यादि'। द्वितीये पूर्वग्रहणे सति प्रवृत्तिभेदो भवति, तत्रैकया प्रवृत्त्या ह्रस्वान्तेऽन्त्यात्पूर्वस्योदात्तत्वं विधीयते, अपरया तु नियम्यते, ह्रस्वान्तेऽन्त्यादेव पूर्वमुदात्तं भवति न तु कपि पूर्वमिति, तेन किं सिद्धं भवति तत्राह। 'तेनेति'। नास्त्यस्य ज्ञ इत्यज्ञकः, शोभनो ज्ञो ऽस्येति सुज्ञकः, तत्र यद्येष नियमो न स्यात् ततोऽन्त्यात्पूर्वं उदात्तभावी नास्तीति कपि पूर्वमित्ययमेव स्वरः स्यात्, अस्मिंस्तु नियमे सति न भवति। नञ्सुभ्यामिति कबन्तस्यैव भवति, यथा च कबन्तस्य भवति तथा तत्रैव प्रतिपादितम्, व्यक्तिपक्षाश्रयणे चैतत्पूर्वग्रहणं कृतम्, जातिपक्षाश्रयणे तु यथा हलादिः शेष इत्यत्र क्वचिदपि वर्तमानो हलादिरनादेः सर्वत्र निवृत्तिं करोति, ह्रस्वान्तेऽन्त्यात्पूर्वमित्यत्रापि ह्रस्वजातेराश्रयणात्सर्वत्र ह्रस्वान्ते तक्रकौण्डिन्यन्यायेन कपि पूर्वमित्यस्याप्रवृत्तिः सिद्ध्यति ॥

"बहोर्नञ्वदुत्तरपदभूम्नि" ॥ नञ इव नञ्वत्, अस्मादेव निपातानात्पञ्चमीसमर्थाद्वतिः, यद्वा सम्बन्धसामान्ये षष्ठी, तथा सर्वे द्विभक्त्यर्थाः संगृह्यन्त इति पञ्चम्यर्थेऽपि 'तत्र तस्येवे'ति वतिः षष्ठ्यन्तादेव, बहूनां भावो भूमा, 'बहोर्लोपो भू च बहोः,' उत्तरपदशब्देन तदर्थो गृह्यते स्वरूपेणोत्तरपदस्य बहुत्वासम्भवात् तदाह । 'उत्तरपदार्थबहुत्व इति'। किमर्थं पुनरतिदेश आश्रीयते न नञ्सुबहुभ्य उत्तरपदभूम्नीत्युच्येत, एवमपि ह्युच्यमाने उत्तरपदभूम्नीत्येतत्सम्भवव्यभिचाराभ्यां बहोरेव विशेषणं भविष्यति योऽपि न गुणादयो ऽवयवा इति प्रतिषेधः तत्राप्युत्तरपदभूम्नीत्यनुवृत्तेर्बहोरेव भविष्यति न नञ्सुभ्याम्, अगुणः सगुण इति । इदं तर्हि प्रयोजनं प्रकरणान्तरेऽपि यो नञाश्रयः स्वरस्तस्याप्यतिदेशो यथा स्यादिति तद्दर्शयति । 'नञोजरमरमित्रमृता इत्युक्तमित्यादि' ॥

"न गुणादयोऽवयवाः" ॥ गुण संख्याने चुरादेरदन्तादेरच्, अशेः सरः, अक्षरः छन्दो मीयते येन छन्दोमानम्, वचेः सुपूर्वात्क्तः, सूक्तम्, अधीयतेऽस्मादित्यध्यायः, इङश्चेति घञ्, एते गुणादयः ॥

"उपसर्गात् स्वाङ्गं ध्रुवमपर्शु" ॥ स्वाङ्गं प्रति क्रियायोगाभावाद् उपसर्गग्रहणं प्राद्युपलक्षणं, सततं यस्येत्यादिना पृष्ठस्य ध्रुवत्वं दर्शयति, तीर्थपृष्ठगूढयूथेति पृष्ठशब्दो निपातितः। 'उद्बाहुः क्रोशतीति'। अत्र क्रोशनसमयएवोद्बाहुत्वं न सर्वदेत्यध्रुवत्वं, स्पृशेः श्वण्शुनौ पृच, स्पृशेर्धातोः श्वण्शुन् इत्येतौ प्रत्ययौ भवतः, धातोश्च पृ इत्यादेशो बहुलवचनाच्छकारस्येत्संज्ञा न भवति, यथाक्रमं वृद्धिगुणौ, पार्श्वं, पर्शुः ॥

"परेरभितोभावि मण्डलम्" ॥ 'बहुव्रीहिरयमित्यादि'। यदा बहुव्रीहिस्तदा परितः कूलमस्येति विग्रहः, प्रादिसमासे तु परिगतं कूलमिति, यदा पुनरव्ययीभावस्तदा परिकूलादिति। 'अव्ययीभावपक्षेपि हीत्यादि'। अव्ययीभावेप्ययमेव स्वर एषितव्यो न समासस्वरेण सिद्धिरित्यर्थः। 'अभितो भावोऽस्यास्तीत्यभितोभावीति'। लौकिके योगे लाघवस्यासार्वत्रिकत्वाद्बहुव्रीहिरेव नाश्रित इत्याह। 'अभितोभावीति'। सुप्यजाताविति णिनिरिति। 'यच्चैवं स्वभावमिति'। अभितोभवनस्वभावम् ॥

"प्रादस्वाङ्गं संज्ञायाम्" ॥ प्रकोष्ठादिषु प्रादिसमासो बहुव्रीहिर्वा ॥

"निरुदकादीनि च" ॥ 'एषामित्यादि'। यदा प्रादिसमासस्तदा निर्गतमुदकं निर्गतं वोदकादिति विग्रहः, बहुव्रीहौ निर्गतमुदकमस्मादिति, अथाव्ययीभावार्थमप्येषां ग्रहणं कस्मान्न भवति अत आह। 'अव्ययीभावे त्विति'। 'निष्कालिक इति'। कालशब्दाज्जानपदादिसूत्रेण ङीप्, ततःस्वार्थे कन्, 'केण'इति ह्रस्वः, कालिका, ततः प्रादिसमासः। 'निष्पेषइति'। पिषेर्घञ्। 'कुत्सितस्तरीयइति'। दुः कुत्सायां वर्त्ततइति दर्शयति। 'अपरे निस्तरीकइति'। पठन्तीत्यनुषङ्गः, निष्पूर्वोजिनशब्दः स एवोदयपूर्वः। 'परेरित्यादि'। परेरुत्तरे हस्तादयोऽन्तोदात्ता भवन्ति। 'परिहस्तइत्यादि'। हरेरिव केशा यस्य हरिकेशः, कपेरिव कपिकेशः ॥

"अभेर्मुखम्" ॥ 'उपसर्गात्स्वाङ्गं ध्रुवमिति सिद्धइति'। मुखं स्वाङ्गमिति न सिद्ध्यति, नाव्ययदिक्शब्देति प्रतिषेधात् ॥

"अपाच्च" ॥ 'अव्ययीभावोऽप्यत्र प्रयोजतीति'। कुत इत्याह। 'तत्रापि हीति'। यस्मात्तत्रापि 'परिप्रत्युपापे'ति पूर्वपदप्रकृतिस्वरत्वमुक्तं तस्मात्सोपि प्रयोजयतीत्यर्थः। 'योगविभाग उत्तरार्थइति'। उत्तरत्रापादित्यस्यैवानुवृत्तिर्यथा स्यादभेर्माभूत् ॥

"स्फिगपूतवीणाञ्जोध्वकुक्षिसीरनाम नाम च" ॥ नामग्रहणं सीरशब्देनैव सम्बद्ध्यते न स्फिगादिभिः, स्फिगपूतकुक्षीणां पृथग्ग्रहणात्। 'उपसर्गादध्वन इति यदा समासान्तइत्यादि'। अत्र कारणमाह। 'तस्मिन् हि सतीति'। ननु चोपसर्गादध्वन इत्यत्र तु विकल्पः अतो नापि प्रकृतः, तत्किमुच्यते यदा समासान्तो नास्तीति, अत आह। 'अनित्यश्चेति'। यदि नित्यः समासान्तःस्यादध्वग्रहणमिह न कर्त्तव्यं स्याद्, अच्प्रत्ययस्य चित्त्वादेवान्तोदात्तस्य सिद्धत्वात्, कृतं तु ज्ञापयति समासान्तविधिरनित्य इति। 'स्फिगपूतकुक्षीणामित्यादि'। यदा ह्येतानि स्वाङ्गवाचीनि ध्रुवाणि च भवन्ति बहुव्रीहिश्च समासस्तदोपसर्गात्स्वाङ्गमित्येव सिद्धम् ॥

"अधेरुपरिस्थम्" ॥ उपरि तिष्ठतीत्युपरिस्थम्, 'सुपि स्थ' इति कः, दन्तस्योपरीत्यादिनोपरिस्थत्वं दर्शयति। 'अधिकरणमिति'। अत्र कृदुत्तरपदप्रकृतिस्वरेण ककाराकार उदात्तः ॥

"अनोरप्रधानकनीयसी" ॥ उदाहरणे उत्तरपदार्थस्याप्राधान्यं दर्शयति। 'पूर्वपदार्थप्रधानः प्रादिसमासोयमिति'। 'प्रधानार्थं च कनीयोग्रहणमिति'। अन्यत्राप्रधानग्रहणेनैव सिद्धत्वात्। 'अनुगतो ज्येष्ठ इति'। विग्रहविशेषेण प्रधानवाचित्वं ज्येष्ठशब्दस्य दर्शयति ॥

"पुरुषश्चान्वादिष्टः" ॥ अन्वाचितो प्रधानशिष्टः, यथा भिक्षामट गां चानयेति गोरानयनम्। 'कथितानुकथितो वेति'। कस्मिंश्चित्प्राक्कथिते यो ऽन्यः पश्चात्कथ्यते स कथितानुकथितः, अनुगतः पश्चाद्गतः ॥

"अतेरकृत्पदे" ॥ अकृच्च पदञ्च अकृत्पदे। 'अतिकारकइति'। शोभनः कारकः, 'स्वती पूजायामि' ति प्रादिसमासः। 'अतेर्धातुलोपइति वक्तव्यमिति'। अत्यङ्कुश इत्यादौ वृत्तिविषयेऽतिशब्दो ऽतिक्रान्तार्थवृत्तिरिति क्रमेरप्रयोग एव धातुलोपः। 'अतिगार्ग्य इति'। यथान्यासे त्वत्रापि प्राप्नोति गार्ग्यशब्दस्याकृदन्तत्वात्। 'अतिकारकइति'। यथा न्यासे त्वत्र न स्यात् कारकशब्दस्य कृदन्तत्वात्, तस्मादव्याप्त्यतिव्याप्तिपरिहारार्थमकृत्पदे इत्यपनीयातेर्धातुलोप इति वक्तव्यम्।

"नेरनिधाने" ॥ निधा[1]नमप्रकाशता, न निधानमनिधानं, निर्गतं मूलमस्य निर्गतं वा मूलान्निर्मूलम्। 'निधानार्थं ब्रवीतीति'। अप्रकाशतां ब्रवीतीत्यर्थः। कथं पुनर्निशब्दस्यायमर्थ इत्याह। 'प्रादयो हीति'॥

"प्रतेरंश्वादयस्तत्पुरुषे" ॥ अंशशब्दः कुश्चेतिवर्त्तमाने 'मृगय्वादयश्चेति' निपातितः, राजतेः कनिन् राजन्, उष दाहे, ष्ट्रन् उष्ट्रः। खिट्, खवुल्, खेटकः, अजिरशिशिरेति किरच्, अजिरम्। 'ध्रातेराङ्पूर्वादातश्चोपसर्गे' इत्यङ्, अस्मादेव निपातनादाङो रगागमः, आर्द्राः, शृणोतेर्ल्युट्, श्रवणम्, कृतिभिदिलतिभ्यः कित्, तिकन् प्रकृतः, कृत्तिकाः-ऋधेः पचाद्यच्, अर्द्धः। पुर अग्रगमने, इगुपधात्कः, पुरम्, एते अंश्वादयः॥

"उपाद् द्व्यजजिनमगौरादयः" ॥ गुरी उद्यमने, पचाद्यजन्तात्प्रज्ञाद्यण्, गौरं, तिष्येण युक्तः कालस्तैष्यः लेट् लोट् इति कण्ड्वादिपठिताभ्यां पचाद्यच्, लेटलोटौ, द्विहेर्जिह्वा उणादिः। कृषेर्वर्णइति नक्, टाप्, कृष्णा, कन्याशब्दोऽघ्न्यादयश्चेति निपातितः। गुध घनत्वे, इगुपधात्कः, गुधः। कृपिपदिभ्यां घञ्, कल्पः पादः॥

"सोरवक्षेपणे" ॥ उदाहरणे तु स्वती पूजायामिति कर्मप्रवचनीयस्य समासः, तेन सुप्रत्यवसिते थाथादिस्वरेण सिद्धिर्नाशङ्का, यदि सुशब्दोऽत्र पूजायामेव वर्त्तते कथं तर्हि क्षेपो गम्यते इत्याह। 'वाक्यार्थस्त्विति'। कथमित्याह। 'असूयया तथाभिधानादिति'। यः खल्वनर्थउपस्थिते सुखायमान आस्ते तं प्रकृत्यैवमुक्ते क्षेपो गम्यते॥

१ अत्र दर्शनान्मूले पाठो ऽपपाठः।

"विभाषोत्पुच्छे" ॥ 'सेयमुभयत्र विभाषेति'। आद्यप्रवृत्तावव्ययपूर्वपदप्रकृतिस्वरेण बाधितत्वात्समासस्यान्तोदात्तत्वमप्राप्तम्, द्वितीयायान्तु थाथादिस्वरेण नित्यं प्राप्तमिति कृत्वा ॥

"द्वित्रिभ्यां पाद्दन्मूर्द्धसु बहुव्रीहौ" ॥ द्वित्रिभ्यामिति दिग्योगलक्षणा पञ्चमी, पाद्दन्मूर्द्धस्विति सत्सप्तमी, बहुव्रीहिः कार्यीति, तदेतदाह। 'द्वि त्रि इत्येताभ्यामिति'। 'द्विपादिति'। 'संख्यासुपूर्वस्ये'-त्यकारलोपः समासान्तः। 'दन्निति'। वयसि दन्तस्य दतृ। 'मूर्द्धन्नित्या[1]दि'। नन्व[2]कृत्समासान्तस्य सम्भवोऽत आह। 'एतदेवेति'। यदि तर्ह्यकृतसमासान्तस्योपादानमेवं सति यदि समासान्तः क्रियते तदा न प्राप्नोति तस्य शब्दान्तरत्वादित्यत आह। 'यदापीति'। इह हि बहुव्रीहिः कार्यित्वेनोपात्तो न मूर्द्धशब्दः। 'तदेकदेशत्वाच्चेति'। तस्य बहुव्रीहेरेकदेशोऽवयवः समासान्तस्तद्भावस्तत्त्वम्, तस्मादित्यर्थः। तदेकदेशित्वादिति पाठे स बहुव्रीहिरेकदेशी अवयवी यस्य स तदेकदेशी, तस्य भावस्तत्त्वम्। तस्मादिति स एवार्थः, तदेवं बहुव्रीहेः कार्यित्वात्तदेकदेशत्वाच्च समासान्तस्य यदापि समासान्तः क्रियते तदाप्ययं विधिर्भवत्येव। अपर आह। यदाप्युत्तरपदस्य कार्यित्वं तदापि परत्वादन्तोदात्तत्वे कृते पश्चात्समासान्तः, तत्र टिलोपे सति उदात्तनिवृत्तिस्वरेणैव षप्रत्ययस्य सिद्धमुदात्तत्वमिति। 'कल्याणमूर्द्धेति'। पूर्वपदप्रकृतिस्वर एवात्र भवति, कल्याणशब्दो 'लघावन्त' इति मध्योदात्तः ॥

"सक्थं चाक्रान्तात्" ॥ 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्' इति समासान्ते कृते यः सक्थशब्दः सोऽत्र गृह्यते, क्रशब्दोऽन्तो यस्य स क्रान्तः, ततोऽन्योऽक्रान्त इति। 'गौरसक्थ इति'। गौरशब्दः प्रज्ञाद्यण-

१ 'अकृतसमासान्त एव मूर्धन्शब्द इति'। एतच्च मूर्धस्वितिनिर्देशादेवावसीयते। अन्यथा मूर्धष्विति निर्देश्यं स्यात्। किमर्थं तर्ह्यकृतसमासान्त एव निर्दिष्ट इत्याह। 'तस्येति'। कृतसमासान्तस्य निर्देशे सत्येव समासान्ते ऽन्तोदात्तत्वं स्यादसति न स्यादिति ४ पुस्तके पाठः।

२ ननु च 'द्वित्रिभ्यां ष मूर्ध्न' इत्यत्र न विकल्पः श्रुतस्तत्कथमकृतसमासान्तसम्भव इति ४ पा०।

अक्लेशिष्टाम्। अनिट्पक्षे 'शल इगुपधादि'ति क्सः, अक्लिक्षत्। चिक्लेशिषति। चिक्लिशिषति। चिक्लिक्षति, चेक्लिश्यते। क्लेशयति। अचिक्लिशत्। क्लिशित्वा। क्लिष्ट्वा, क्लिष्टः। क्लिशितः। 'क्लिशः क्त्वानिष्ठयो'रितीड्विकल्पः। क्त्वायामूदित्त्वाद्वा सेट्,क्त्वो 'रलो व्युपधा'दिति विकल्पं[1] बाधित्वा 'मृडमृदे'त्यादिना नित्यं कित्त्वं, क्लिष्टं च तदक्लिशितं च क्लिष्टाक्लिशितं, 'क्तेन नञ्विशिष्टेने'ति कर्मधारयः, क्लिश्यते इति दिवादौ॥ ५०॥

अश भोजने॥ अश्नाति। अश्नीतः। अश्नासि। अश्नामि। आश। आशिथ। आशिव। अशिता। अशिष्यति। अश्नातु। अशान। अश्नानि। आश्नात्, आश्नाम्। अश्नाः। अश्नीयात्। आशिषि अश्यात्। आशीत्। आशिष्टाम्। अशिशिषति। अशाश्यते। आष्टि[2]। 'सूचिसूत्री'-त्यादिना यङ्, आशयति। 'निगरणे'ति नित्यं परस्मैपदं, माभवा[3]नशिशत्। अनाश्वान्। 'उपेयिवाननाश्वानि'ति नञ्पूर्वादश्नातेर्भाषायां भूतसामान्ये लिट्, क्वसुरनिट् निपात्यते। इदमेवादेशवचनं भूतसामान्ये लिटः कल्पकं, स चादेशविषयः। इदं च निपातनमुत्तरत्रानुवृत्तेर्लङ्लिङ्-विषयं भवति, अस्य चोपादानं सदादौ कृतमिति तत एवावगन्तव्यम्[4]। अशनायति, बुभुक्षतीत्यर्थः, 'अशनायोदन्यधनाये'त्यादिना बुभुक्षाया-मीत्त्वापवाद आत्त्वम्, अश्नीत पिबतेति यस्यां क्रियायां सातत्येनोच्यते सा ऽश्नीतपिबता। मयूरव्यंसकादौ 'वाख्यातमाख्यातेन क्रियासातत्य'-इति पाठात्समासे टाप्, अश्नुतइति स्वादौ॥ ५१॥

उध्रस उञ्छे॥ ध्रस्नाति। दध्रास। दध्रसिथ। ध्रसिता। ध्रसिष्यति, ध्रस्नातु। ध्रसान। अध्रस्नात्। ध्रस्नीयात्। आशिषि ध्रस्यात्।

१ निषेधमिति ४ पु० पा०।
२ पुस्तकद्वयेऽप्यशाष्टीति पाठ उपलभ्यते स तु न युक्तः।
३ माभवानशिशदित्यस्याग्रे न तु क्तवतुरित्यधिकं ४ पुस्तके।
४ तत्र हि सदादौ भूतसामान्ये सावकाशस्यास्य लिटः पराभ्यां विशेषविहिताभ्यां लङ्लिङ्भ्यां बाधमाशङ्क्य तद्विधानेऽप्यस्यानुवर्तनादित्युत्तरितम्।

अधासीत् । अधसीत् । दिधसिषति । दाधस्यते । दाधस्ति । धासयति । अदिधसत् । धसित्वा, धस्त्वा । उदित्त्वादिड्विकल्पः, धस्तं, 'यस्य विभाषे' ति अनिट्त्वम् । अयं चुरादौ । अत्र क्षीरस्वाम्युकारं धात्ववयवमाह । तन्मते उधस्यतीत्यादि, उधसांचकार, औधसादित्याद्युदाहार्यम् । अनवयवत्वे स्वादिवद् धसु इति ब्रूयादिति तस्याभिप्रायः । स एव भूवादौ यदाह

दरिद्राजागृदेधीङ्गोनेकाचश्च चिरिर्जिरिः ।
चकास्त्यूर्णोतिवेवीङः स्मर्यन्ते णौ तथोलङिः ॥

इति, तदुदाहरणप्रदर्शनं न तु परिगणनम् ॥ ५२ ॥

इष आभीक्ष्ण्ये ॥ पौनःपुन्यं भृशार्थो वा ऽऽभीक्ष्ण्यं, तद्विषयायां क्रियायामित्यर्थः । सा च यथायोग्यं, तथा च श्रूयते 'पुर इष्णाति पुरुहूत' इति, अत्र भाष्यम् । आसुरीणां पुरो हननादिरर्थो गम्यते इति । इष्णाति । इष्णीतः, इयेष । ईषतुः । ईषुः । इयेषिथ । ईयेष । ईषिव । गुणविषये 'ऽभ्यासस्यासवर्णे' इतीयङ् । अन्यत्र सवर्णदीर्घः, एषिता । एषिष्यति । इष्णातु । इषाण । इष्णानि, ऐष्णात् । ऐष्णीताम् । ऐष्णाः । इष्णीयात् । आशिषि इष्यात् । ऐषीत् । ऐषिष्यत् । एषिषिषति । परत्वाद्गुणे द्वितीयस्यैकाचो द्विर्वचनम् । एषयति । माभवानिषिषत्, ऋदित्करणात्कृतह्रस्वे द्विर्वचनमिति तत्रैवोक्तम् । एषित्वा; इषितः । 'तीषसहे' तीड्विकल्पस्तौदादिकस्यैव न दैवादिकक्रैयादिकयोरेतदर्थमेव तौदादिकमुदितं पठित्वा सूत्रे तमुदितं पठन्तीति[^1] वृत्तौ स्थितम्, अनुदित्पाठिनां तौदादिकस्यैव ग्रहणे हेतुर्हरदत्तेनाकारमात्रविकरणेन सहिना साहचर्यमुक्तम्, एवं धनपालसंमतक्षीरतरङ्गिणीकारादयश्च तौदादिकस्यैव तीषसहेत्यत्र ग्रहणमाहुः । काश्यपस्तु 'इषेस्तकारे श्यन्प्रत्ययात् प्रतिषेध' इति वार्त्तिकप्रामाण्यादश्यन्विकरणयोस्तौदादिकक्रैयादिकयोर्द्वयोरपि इड्विकल्पमाह; हरदत्तोऽपि, 'यथा तु वार्त्तिकं तथा क्रैयादिकस्याप्यत्र ग्रहणमि-

१ अदन्तोर्णोतीति ४ पु· पाठः ।
२ कुर्वन्तीति ३ । ४ । पु· पा· ।

ष्यतइति, एवञ्च तौदादिकत्वं वार्त्तिकविरुद्धम्,' उक्तं च तत्र कैयटे पाठद्वयं प्रस्तुत्य 'तत्र वार्त्तिककारस्य मते त्रयोपीषयो निरनुबन्धकाः, इह च तीषसहेतिपाठस्तदाह, इषेरितीति' ॥ ५३ ॥

विष विप्रयोगे ॥ अनिट्कारिकायां विशिग्रहणेन जौहोत्यादिकोऽयं च गृह्यते इति न्यासे, विष्णाति । विवेष, विवेषिथ । विविषिव । क्रादिनियमादिट् । विष्णातु । विषाण । विष्णानि । अविष्णात् । वेष्टेत्यादि चेष्टिवत् ॥ ५४ ॥

प्रुष प्लुष स्नेहनसेवनपूरणेषु ॥ प्रुष्णाति । पुप्रोष । पुप्रोषिथ । पुप्रुषिव । प्रोषिष्यति । प्रुष्णातु । प्रुषाण । प्रुष्णानि । अप्रुष्णात् । प्रुष्णीयात् । आशिषि प्रुष्यात्, अप्रोषीत् । पुप्रुषिषति । पुप्रोषिषति । पोप्रुष्यते । पोप्रोष्टि । प्रोषयति । अपुप्रुषत् । प्रोषित्वा, प्रुषित्वा । प्रुषितः । एवं प्लुष्णातीत्यादि, प्रुष्ट्वा, प्रुष्टः, प्लुष्ट्वा, प्लुष्टः, इति भौवादिकयोर्दाहार्थयोरुदितोः, प्रुषिस्तु दिवादौ पुषादौ ॥ ५५–५६ ॥

पुष पुष्टौ ॥ पुष्णाति, पुष्णीतः । पुषाण । अपुष्णात् । पुष्णीयात् । पुपोष । पुपोषिथ । पोषितेत्यादि पोषतिवत् । पुष्यतीत्यनिट्, पूषा पुषतीति[1] पुष वृद्धावित्यस्य शपि ॥ ५७ ॥

मुष स्तेये ॥ मुष्णाति इत्यादि पूर्ववत्, अयं द्विकर्मक इत्युक्तं, तन्निबन्धनानि च कार्याणि तत्रतत्रोक्तानीति नेह प्रतायन्ते । मुषित्वा । मुमुषिषति । 'रुदविदमुषेति' क्त्वासनोर्नित्यं कित्वं 'रलो व्युपधादि' ति विकल्पापवादः ॥ ५८ ॥

खच भूतप्रादुर्भावे ॥ भूतप्रादुर्भावोऽतिक्रान्तोत्पत्तिः । खच्नाति । श्चुत्वेन ञकारः, चखाच । चखचिथ । चखचिव । खचिता । खचिष्यति । खच्नातु । चखान । खच्नानि । अखच्नात् । खच्नीयात् । खच्यात् । अखचीत् । अखाचीत् । 'अतो हलादे'रिति वा वृद्धिः । चिखचिषति । चाखच्यते । चाखक्ति । खाचयति । अचीखचत् । खचित्वा । खचितः ।

---

१ पोषतीति पाठो युक्तः । पुषतीति पाठे संज्ञापूर्वको विधिरनित्य इति गुणाभावः ।

खव इत्येकइति मैत्रेयः । स्वाम्यपि खच्नातीत्युक्त्वा खौनातिरिति सभ्या इति । खौनाति । खौनातु । खौनाहि । अनुनासिकादावूठ्, हौ च श्नः शानचः पूर्वं परत्वादूठि पश्चाद्धलन्तत्वाभावान्न शानच्, अखौनात् । खौनीयात् । आशिषि खव्यात् । शेषं खचिवत्, अत्र क्वचिद्धेठ् चेति पठ्यते, तत्र हेठतीत्यादि, हेठ विबाधायामिति शपि, अन्यादय उदात्ता पिषिवर्जम् । क्लिशिस्तु विभाषितेड् । इषिरपि तकारादौ वार्त्तिकमतेन, सर्वे परस्मैपदिनः ॥ ५९ ॥

ग्रह उपादाने ॥ उदात्तः स्वरितेत् । गृह्णाति । गृह्णीतः । गृह्णासि । गृह्णामि । 'ग्रहिज्या'दिना संप्रसारणं क्ङितोः । गृह्णीते । गृह्णीषे । गृह्णे । गृह्णीवहे । जग्राह । जगृहतुः । जगृहुः । जग्रहिथ । जगृहथुः । जग्राह । जग्रह । जगृहिव । जगृहे । जगृहाते । जगृहिषे । जगृहिढ्वे । जगृहिध्वे । जगृहिवहे । ग्रहीता । ग्रहीष्यति । ग्रहीष्यते । 'ग्रहोऽलिटि दीर्घ' इत्यलिटीटो दीर्घः । गृह्णातु । गृहाण । गृह्णानि । गृह्णीताम् । गृह्णाताम् । गृह्णीष्व । गृह्णै । अगृह्णात् । अगृह्णीताम्, अगृह्णीत, अगृह्णाताम्, । गृह्णीयात्, । गृह्णीयाताम् । गृह्णीयाः । गृह्णीत, गृह्णीयाताम्, । गृह्णीरन्, । आशिषि गृह्यात् । गृह्यास्ताम् । ग्रहीषीष्ट । ग्रहीषीयास्ताम् । अग्रहीत् । अग्रहीष्टाम् । 'ह्म्यन्ते'ति न वृद्धिः । अग्रहीष्ट । अग्रहीषाताम् । जिघृक्षति । जिघृक्षते । 'सनि ग्रहगुहोश्चे'तीण्निषेधः[1] 'रुदविदमुषग्रहीति' सनः कित्त्वात्संप्रसारणम् । 'हो ढः' भष्भावः । 'षढो'रिति कत्वे षत्वम् । जरीगृह्यते, यङि संप्रसारणे द्विर्वचनम् । 'रीगृदुत'इत्यभ्यासस्य रीक् । जाग्राढि, यङो लुका लुप्तत्वान्न संप्रसारणं, ढत्वधत्वष्टुत्वढलोपदीर्घाः । जागृढः । ढत्वादि दीर्घवर्जं, तत्र हि पूर्वाणो ग्रहणम् । प्रसारणं त्वपित्सार्वधातुकापेक्षम् । जाग्रहीति । झ[2]ल्परत्वाभावान्न ढत्वम् । जाग्रक्षि । ढत्वभष्भावकत्वषत्वादि । जागृहि । जागृहुः । जाग्रहांचकार । जाग्रहीता । जाग्रहीष्यति । 'ग्रहोलिटी'त्यत्र ग्रहेर्यद्विहितमार्धधातुकं तस्य य

१ तस्य बहिरङ्गत्वेनासिद्धत्वाच रोगादयः ।
२ अझल्परत्वादिति ४ पु॰ पा॰ ।

इडिति विहितविशेषणत्वेपि द्विःप्रयोगरूपत्वाद् द्विर्वचनस्य द्विरुक्तोऽपि स एव ग्रहिरिति दीर्घो भवति । विहितविशेषणाङ्गीकारस्य च प्रयोजनं जरिगृह्मशब्दाद्वुलाद्यार्धधातुके इत्यल्लोपयलोपयोर्जरिगृहितेत्यादौ दीर्घनिवृत्तिः । अत्र च न ग्रहेर्विहितमार्द्धधातुकं किं तर्हि यङन्तात् । जागृढु । जागृढाम् । जागृढि । अत्र हेरपित्त्वात्प्रसारणादौ ढत्वादि, अजाघट् । अजागृढाम् । अजागृहुः । अजागृहम् । अजाघट् । तिप्सिपोर्हल्ङ्यादिलोपे पदान्तत्वाड्ढत्वभषभावयोर्जश्त्वचर्त्वे । जागृह्यात् । जागृह्यातम् । जागृह्यास्ताम् । अजाग्रहीत् । 'स्यसिच्सीयुडि'त्यादिना चिण्वदिटि ग्राहिष्यतइत्यादि । 'ग्रहोलिटि दीर्घः' प्रकृतस्येट इतीह न भवति । प्रगृह्यं पदं, यस्य प्रगृह्यसंज्ञा विधीयते । गृह्यकाः शकुनयः, अस्वतन्त्रा इत्यर्थः, ग्रामगृह्या चाण्डालवाटिका । ग्रामाद्बहिर्भूतेत्यर्थः । अर्ज्जुनगृह्यः, अर्ज्जुनपक्षः । 'पदास्वैरिबाह्यापक्षेषु चे'ति गृहेः क्यप्, बाह्येति स्त्रीलिङ्गनिर्द्देशो लिङ्गान्तरे माभूदिति । तेन ग्रामग्राह्यश्चाण्डाल इत्यत्र ण्यदेव भवति । गृह्यका इत्यत्रानुकम्पायां कन् । पाणिगृहीती, 'पाणिगृहीती'ति ङीष् । ग्राहः, ग्रहः । 'विभाषा ग्रह' इति कर्तरि वा णः । अन्यदा च व्यवस्थितविभाषाविज्ञानात् जलचरे ग्राहः । ज्योतिषि ग्रहः । गृह्णात्युपादत्ते धान्यादिकमिति गृहं गेहम् । 'गेहे क'इति ग्रहेर्गेहे कर्तरि कः, संप्रसारणम् । यद्वायं तात्स्थ्यात्तद्वचनस्तदा स्वभावात्पुल्लिङ्गो बहुवचनान्तश्च । शक्तिं गृह्णातीति शक्तिग्रहः । अच्प्रकरणे 'शक्तिलाङ्गलतोमरयष्टिघटघटीधनुःषु ग्रहेरुपसंख्यान'मित्यच् । अणोपवादः । एवं लाङ्गलग्रह इत्यादि । सूत्रं धारयतीति सूत्रग्रहः । 'सूत्रे च धार्यर्थे'इति धारयत्यर्थाद् ग्रहेरच् । फलेग्रहिः । अवन्ध्यवृक्षादिरिति नैघण्टुकाः । 'फलेग्रहिरात्मंभरिश्चे'ति इन् प्रत्यय उपपदस्य चैकारान्तत्वं निपात्यते । भट्टिकाव्ये तु फलग्राहिमात्रे प्रयुज्यते । फलेग्रहीन् हंसि वनस्पतीनामिति । उद्ग्राहः । 'उदि ग्रह'इति घञ् । 'ग्रहवृदृनिश्ची'त्यपोपवादः । संग्राहो मल्लस्य, अङ्गुलिसंनिवेशस्य दार्ढ्यमित्यर्थः । 'समि मुष्टा'विति घञ्, अपोवादः पूर्ववत् । मुष्टाविति मुष्टिविषयश्चेद्धात्वर्थ

इत्यर्थः । अवग्राहो हन्त ते वृषलरूपात् । एवं निग्राहः । 'आक्रोशेवन्यो-र्ग्रह'इति घञ् । पूर्ववद् अपोपवादः । आक्रोशःशपनम् । अन्यत्रावग्रहः पदस्य निग्रहश्चोरस्य । 'ग्रहवृदृनिश्चिगमश्चे'त्यप् । पात्रप्रग्राहेण चरति भिक्षुः, लिप्सुः पात्रं गृहित्वा चरतीत्यर्थः । 'प्रे लिप्सायां'मिति घञ् लिप्सायां गम्यायाम् । परिग्राहो वेद्याः । 'परौ यज्ञे'इति ग्रहेर्घञ्, अन्यत्र परिग्रहो धनस्य, पूर्ववदप् । अवग्रहो देवस्य अवग्राह इति वा । 'अवे ग्रहो वर्षप्रतिबन्धे'इति घञपौ । वर्षस्य प्रतिबन्ध इत्यर्थः । तुला-प्रग्राहस्तुलाप्रग्रहः । तुलासूत्रमित्यर्थः । 'प्रे वणिजामि'ति वा घञ् । वणिजा-मित्यनेन तुलासूत्रं लक्ष्यते, तेषां तेन संबन्धात्, न तु वणिजस्तन्त्र-मिति वृत्त्यादौ स्थितम् । प्रग्राहोश्वादेः प्रग्रह इति वा । 'रश्मौ चे'ति वा घञ् । अश्वानां नियमनार्था रज्जुरिह रश्मिशब्देनोच्यते । जीवग्राहं गृह्णाति । 'समूलाकृतजीवेषु हन्कृञ्ग्रह' इति जीवशब्दे कर्मण्युपपदे ग्रहेर्णमुल् । कषादित्वाद्यथाविध्यनुप्रयोगः, जीवन्तं गृह्णातीत्यर्थः । हस्तग्राहं गृह्णाति । पाणिग्राहं गृह्णाति । हस्तेन गृह्णातीत्यर्थः । 'हस्ते वर्तिग्रहोरि'ति करणवाचिनि हस्तार्थे उपपदे णमुल् । पूर्ववदनुप्रयो-गः । नामग्राहमाह्वयति । नाम गृहीत्वा ऽऽह्वयतीत्यर्थः । 'नाम्न्यादि-शिग्रहो'रिति नाम्न्युपपदे णमुल् । तृतीयाप्रभृतित्वात्समासविकल्पः । धातुसंबन्धाधिकारादनुप्रयोगः । वासरूपेण त्क्वाप्यनुज्ञायतइति नाम गृहीत्वेति भवति । गर्हतइति ग्रहेर्यहणे शपि । कुत्सायां गल्हतइति शपि, एवं गर्हते इति ॥ ६० ॥

इति श्रीपूर्वदक्षिणपश्चिमसमुद्राधीश्वरकम्पराजसुतसङ्गममहाराज-माहमन्त्रिणा मायणसूतेन माधवसहोदरेण सायणाचार्येण विरचितायां माधवीयायां धातुवृत्तौ क्र्यादयः ।

अथ चुरादयः ।

चुर स्तेये ॥ अकार उच्चारणार्थः प्रयोजनान्तराभावात् । न च तङर्थोऽनुदात्तेत्त्वं स्यात् । 'सत्यापपाशे' त्यादिना चुरादिभ्यः स्वार्थे णिचो विधानादणिचः प्रयोगाभावात् । तथा च काश्यपः । कार्याभावादेकश्रुत्या पठ्यतइति । अत्राभरणे घुषिरविशब्दनइति ज्ञापका-दक्रियमाणेपि वाग्रहणे चुरादिभ्यो णिज्वेत्युक्त्वा 'ऽत एकहलि' त्यत्र वृत्तौ जगणतुः जगणुरिति प्रत्युदाहरणसमर्थनार्थमनित्यण्यन्ताश्चुरादय इति न्यासकारेणाभिधानद् इदं ज्ञापकं सामान्यापेक्षयेत्युक्त्वा ऽऽधृषाद्वे-ति गणकारवचनं चानुवाद इत्युक्तम् । ज्ञापकस्य स्वरूपमस्मा-भिर्घोषवतौ लिखितमिति नेह प्रदर्शितं, तस्य ज्ञापकस्य सामान्यापेक्षत्वं कैयटविरुद्धम् । यदाह 'गोरणा' वित्यत्र गणयति गणमिति भाष्य-व्याख्याने नित्यत्वाण्णिचः केवलानां चुरादीनां प्रयोगाभावादिति । भाष्यविरुद्धं च । तथाहि । किमर्थमविशब्दनइत्युच्यते, न विशब्दने घु-षेर्णिचा भवितव्यम् । एवं तर्हि सिद्धे सति यदविशब्दनग्रहणं करोति तज्ज्ञापयत्याचार्यो विशब्दने घुषेर्विभाषा णिज् भवतीति । किमे-तस्य ज्ञापने प्रयोजनं, महीपालवाचः श्रुत्वा जुघुषुः चत्रमालवा इत्येष प्रयोग उपपन्नो भवतीति विशिष्टविषयत्वेनाभिधानात्, 'ऋदुपधा-च्चाक्लृपिचृते' रित्यत्रानित्यण्यन्ताश्चुरादय इति सामान्येन यदुक्तं पदम-ञ्जर्यां तदपि मतान्तरापेक्षं न तु स्वमतेन, यद्वक्ष्यति । घुषिर-विशब्दनइत्यत्र घुषिविषयमेव ज्ञापकमुक्त्वा, अन्ये त्वाहुः । अनित्य-ण्यन्ताश्चुरादय इति सामान्येन ज्ञाप्यतइति । यापि ऋदुपधाच्चे-त्यादावनित्यण्यन्ताश्चुरादय इति न्यासकृतः सामान्योक्तिः सापि येषां लिङ्गेन वचनेन वा णिज्विकल्पस्तन्मात्रविषयैव । तथा च 'गोर-णावि' त्यत्र तेनैवोक्तं, चौरादिकानामप्यनित्यण्यन्तत्वाद्विभाषितणिचां केषां चिद्विद्यमानत्वादिति, यस्मात् णेः प्राक्कर्म कर्ता वा विद्यते न चैतस्माण्णेः प्राक्कर्म कर्ता वा विद्यते इति गणेर्नित्यण्यन्तत्वाभिधानं

विरुध्येत । तथा जगणतुरिति प्रत्युदाहरणे पदमञ्जर्यामपि चुरादित्वादत्र णिच् प्राप्नोति, यदि नेष्यते ऽनित्यण्यन्ताश्चुरादय इति । यदिना ह्यपरितोषः सूच्यते । अपरितोषश्च पूर्वोक्तो भाष्यविरोधः । तदेवं नित्ये णिचि स्वरितेत्त्वात् यहिः क्र्यादौ लक्षिश्चैकश्चुरादिष्विति वचनाल्लक्षेः स्वरितेत्त्वाल्लिङ्गादन्येभ्यश्चुरादिभ्यो 'णिचश्चे'ति कर्त्रभिप्राये तङ् नेत्युक्त्वा चन्द्रस्त्वत्राप्युभयपदित्वमास्थित। णिज्विकल्पमाह स्वामी। एवं देवो नन्दी चाहतुः। मैत्रेयस्तु स्वरितेत्त्वमस्य नेच्छति, यदाह स्वरितेत्त्वमस्य कश्चित्प्रतिपन्नतदिति । 'णिचश्चे'त्यत्र हरदत्तोपि लक्षेः स्वरितेत्त्वं प्रस्तुत्याह। नात्राप्तभाषितमस्ति, पारायणेपि चुरादिणिच आत्मनेपदमुदाहृतमिति । एवं च लक्षजिति पठित्वा ञित्करणादन्येभ्यश्चुरादिभ्यो 'णिचश्चे'ति तङ् भवतीति च श्रीभद्रवचनमपि प्रत्युक्तम् । प्रक्रियारत्ने च चितेरिदित्त्वात् ज्ञापकाच्चुरादिणिचो ऽनित्यत्वाच्चट स्फुट भेदनइत्यादौ चटतीत्याद्यपि यथादृष्टं द्रष्टव्यमित्येकीयमतमुक्त्वा तद्भाष्योक्तज्ञापकविरुद्धम् । एवं हि घुषिरविशब्दनइत्यस्याप्यण्यन्तस्य संभवात्तद्व्यावृत्त्यर्था ऽविशब्दनोक्तिः कथं ज्ञापिका स्यादिति तन्मतं दूषितम्। तस्माद्यत्र लिङ्गं वचनं चास्ति तत्र विकल्प इति सिद्धमिति । वचनं स्पष्टं, लिङ्गमपि तत्रतत्र धातावुपदर्शयिष्यते। यत्तु जगणतुः, जगणुरिति लिङ्गवचनयोरभावेप्यण्यन्तस्य प्रत्युदाहरण 'मत एकहलि'त्यत्र वृत्तौ तदनित्यण्यन्ता इति सामान्यवादिमतापेक्षया न तु सिद्धान्तबुद्ध्या। चोरयति। चोरयतः । चोरयन्ति । चोरयसि । चोरयथः । चोरयथ। चोरयामि। चोरयावः। चोरयामः । चोरयते । चोरयेते । चोरयन्ते। चोरयसे, चोरयेथे । चोरयध्वे। चोरये । चोरयावहे । चोरयामहे, चोरयां चकार। चोरयां चक्रे। चोरयामास । चोरयां बभूव। प्रत्ययान्तत्वादाम्प्रत्ययः। 'अयामन्ते'ति णेरयादेशः । चोरयिता । चोरयिष्यति। चोरयिष्यते। चोरयतु । चोरयताम् । अचोरयत्। अचोरयत । चोरयेत्। चोरयेत। चोर्यात्। 'णेरनिटी'ति णिलोपः । चोरयिषीष्ट । अचूचुरत् । अचूचुरत, 'णिश्री'त्यादिना चङ्, शत्रादिकार्यं भूवत् ज्ञेयम्।

चुचोरयिषति । चुचोरयिषते । चिण्वदिटि तस्यासिद्धत्वाण्णिलोपे चोरिष्यते । अचोरिषाताम् । एकवचने चिणिति सिचोभावः, चोरिषीष्ट । चोरितेति भवति । चोरः । पचाद्यच् । चौरः । प्रज्ञादित्वात्स्वार्थेण् । चोरणा । 'ण्यासश्रन्थे' ति युच्, चुरेति छत्रादिपाठादकारप्रत्ययो गुणाभावश्च । चुरा शीलमस्याश्चौरी । 'छत्रादिभ्यो ण' इति णेपि क्वचिदण्कृतमिति ङीप् । एतच्च करोतावुपपादितम् ॥ १ ॥

चिति स्मृत्याम् ॥ इदित्वान्नुम्, चिन्तयतीत्यादि । चिन्ता, 'चिन्तिपूजी' त्यादिना ऽङ्प्रत्ययः । अत्र मैत्रेयः । अकारे विधातव्येऽङो विधानं गुणाभावार्थं, तत्सामर्थ्यात्कदा चिण्णिलोपो नास्तीति तत्र चिन्तियेतीयङुदाहर्त्तव्यः । चिन्त स्मृत्यामिति सानुषङ्ग एव पठितव्ये इदित्पाठान्नलोपाभावार्थादस्य णिच् पाक्षिकः । नित्ये हि णिचि तस्य स्थानिवद्भावाद्व्यवधानाच्च क्वापि कित्परत्वमिति चिन्त इत्यादौ नलोपाप्रसङ्गः । तेन चिन्तति । चिचिन्त । चिन्तितेत्याद्यपि भवति । एवमन्यत्रापीदित्त्वं णिज्विकल्पार्थं द्रष्टव्यम् । चेततीति शपि संज्ञाने । चेतयतइत्याकुस्मीयः ॥ २ ॥

यत्रि संकोचने ॥ यन्त्रयति । यन्त्रणा । यन्त्रितः । अत्रापि पूर्ववदिदित्करणाद्यन्त्रतीत्याद्यपि भवति । अत्राभरणे यतृ इति पठित्वा ऋकारो 'नाग्लोपी' ति विशेषणार्थ इत्युक्तम् । अयं पाठश्चिरन्तनव्याख्यानेषु न दृश्यते, प्रत्युत यन्त्रणादिशब्दमस्मादेव मैत्रेयादयो व्युदपादयन्, अनेकविकरणविचारणे दैवे तद्व्याख्याने पुरुषकारे वा प्रयत्नार्थेनिकारार्थेवत्सङ्कोचार्थो नोपादीयतइति तस्य मूलं मृग्यम् ॥ ३ ॥

स्फुडि परिहासे ॥ स्फुण्डयति । स्फुण्डतीत्यादि[१] ॥ ४ ॥

लक्ष दर्शनाङ्कनयोः ॥ लक्षयतीत्यादि । लक्ष्मीः । 'लक्षेर्मुट् च' तीकारप्रत्ययो मुडागमश्च । लक्ष्मीवान् । लक्ष्मणः । 'लक्ष्म्या अच्चे' ति मत्वर्थीयो नकारप्रत्यय इकारस्य चाकारः । लक्ष्यं लक्षणम् । अचो यति ल्युटि च णेर्लोपः । लक्ष्यमधीते वेद वा लाक्ष्यिकः । लाक्षणिकोप्येवम् । उञ्छादौ लक्ष्य लक्षणे इति पाठाट्ठक् । शम लक्ष आलोचनइत्याकुस्मीयो भविष्यति ॥ ५ ॥

१ स्फुडानि प्रथमान्तं केचित्पठन्ति, तस्यार्थः परिहास इति दुर्ग इत्यधिकं ४ पुस्तके ।

कुद्रि अनृतभाषणे ॥ कुन्द्रयति । अचुकुन्द्रत् । कुन्द्रतीत्यादि । अत्र स्वामी ऋदिदित्येकइति । तत्र क्रोदयतीत्यादि । ऋदित्फलं तु अचुक्रोददित्यत्र ह्रस्वनिवृत्तिः ॥ ६ ॥

लड उपसेवायाम् ॥ लाडयतीत्यादि । लडतीति विलासे शपि ॥ ७ ॥

मिदि स्नेहने ॥ मिन्दयति । मिन्दतीत्यादि । अत्र क्षीरस्वाम्यनिदितं पठित्वा केश्चिदिदित् पठ्यतइत्याह । तथा कौशिकोप्यनिदितं पपाठ । स्नेहने मेदते मेद्यतीति शप्श्यनोः । ऋदितोपि शपि मेधाहिंसनयोः, मेदते ॥ ८ ॥

ओलडि उत्क्षेपणे ॥ ओलण्डयति । ओलण्डति । ओलिलण्डयिषति । अजादित्वाद् द्वितीयस्यैकाचो द्विर्वचनम् । अत्र स्वामिकाश्यपसंमताकाराः केचिदोदितं पठन्ति तेषां मते लण्डयति । लण्डतीति । अपरे तूकारादिं पठन्ति, तदोकारन्धात्ववयवमुदाहरतां मैत्रेयादीनामित्संज्ञकत्वमभिदधातामन्येषां च सर्वेषामनभिमतम् ॥ ९ ॥

जल अपवारणे ॥ जालयतीत्यादि । नन्दिसमन्ताकारावाद्यन्तौ विपर्यस्य पठतो लज इति, तन्माभूदिति मैत्रेयो जालमित्युदाजहार ॥ १० ॥

पीड अवगाहने ॥ पीडयति । अपीपिडत् । 'अपिपीडत् । भ्राजभासे' त्यादिना णौ चङ्युपधाह्रस्वविकल्पः । पीडा । भिदादिपाठादङ् । पाणावुपपीडं धारयति, पाण्युपपीडं धारयति । पाणिनोपपीडमिति वा । 'सप्तम्यां चोपपीडे' ति सप्तमीतृतीयान्तयोर्णमुल् । तृतीयाप्रभृतित्वात् समासविकल्पः । धनुरिभिरसह्यं मुष्टिपीडं दधान इति वदन् भट्टिकार उपोपसर्गग्रहणमतन्त्रं मन्यते ॥ ११ ॥

नट अवस्यन्दने ॥ अवस्यन्दनं नाट्यम् । नाट्यइत्येव चन्द्रः । चौरस्योज्जासनम् । 'जासिनिप्रहणे' ति कर्मणि शेषे षष्ठी । अनेकार्थत्वाद्धिंसार्थत्वमुत्पूर्वस्य, जास्यादीनां विकृतनिर्द्देशाण्णौ चङि ह्रस्वे नायं विधिरित्युक्तं न्यासे । तत्फलं चोरमनीनटदित्यत्र षष्ठ्यभावः । अयं पक्षो भवादौ दूषितः ॥ १२ ॥

अथ प्रयत्ने ॥ प्रस्थानइति मैत्रेयः । अतिहर्षइति बहवः । आथयति । क्रथिमपि केचिदत्र पठन्ति । स मैत्रेयादौ न दृश्यते । तथा क्रथश्रथौ हिंसायां, क्राथयेत्, क्रथते, क्रथेतेति घटादौ[1] च पठता देवेनापि न पठितः ॥ १३ ॥

बध संयमने ॥ बाधयति । बन्धेति चान्द्रः । बध्नातीति बन्ध बन्धनइति क्रैयादिकस्य । बीभत्सते इति भौवादिकस्य नित्यसनन्तस्य बधेर्वैरूप्ये ॥ १४ ॥

पॄ पूरणे ॥ पारयति । अत्र श्रीभद्रादयो दीर्घोच्चारणसामर्थ्यात्पक्षे णिज् नेति । तथाहि । दीर्घोच्चारणं परितेत्यादावदन्तमृदन्तमिति इट्सिद्धये, तस्मिणचो विकल्पस्य कल्पकं भवति । ननु परितेत्यादि पृणाति पिपर्त्योरन्यतरेणापि सिद्ध्यति किं विकल्पकल्पनया । सत्यम् । परितेत्यादि सिध्यति, परतीत्यादिसिद्धिस्तु प्रयोजनं भविष्यति ॥ १५ ॥

ऊर्ज बलप्राणनयोः ॥ प्राणनं जीवनम् । ऊर्जयति । और्जिजत् । ऊर्जिजयिषति । 'न न्द्राः' इति रेफवर्जस्य द्वितीयस्यैकाचो द्विर्वचनम् । ऊर्क् । 'भ्राजभासे'त्यादिना क्विप् । 'चोः कुरि'ति कुत्वं, णिलोपस्य 'पूर्वत्रासिद्धीये न स्थानिवदि'ति स्थानिवत्त्वनिषेधात्पदान्तता, संयोगान्तलोपस्तु 'रात्सस्ये'ति नियमान्न भवति ॥ १६ ॥

पक्ष परिग्रहे ॥ पक्षयति । अपपक्षत् ॥ १७ ॥

वर्ण चूर्ण प्रेरणे ॥ एवं मैत्रेयः । अन्ये तु वर्ण वर्णने । चूर्ण प्रेरणइति वर्णयन्ति । चूर्णयति । वर्णं गृह्णाति वर्णयति । चूर्णैरवध्वंसयत्यवचूर्णयति । 'सत्यापपाशे'त्यादिना वर्णचूर्णाभ्यां प्रातिपदिकाभ्यां ग्रहणावध्वंसनयोर्णिच् ॥ १८—१९ ॥

प्रथ प्रख्याने ॥ प्राथयति । अपप्रथत् । 'अत्स्मृदृत्वरप्रथे'त्यभ्यासस्याकारः, 'नान्ये मितो हेतावि'ति संभवद्धेतुमण्णिचां चुरादिणिचि मित्त्वाभावात्प्रथ प्रख्यानइति घटादिकं मित्त्वमस्य न भवति ॥ २० ॥

[1] युजादौमिति ४ पु॰ अधिकम् ।

पृथ प्रक्षेपे ॥ पार्थयति । अपपर्थत् । अपीपृथत् । उर्ऋदुा । पथ इत्येक इति स्वामी, पाथयति । अपीपथत् ॥ २१ ॥

षम्ब सम्बन्धने ॥ सम्बयति । अससम्बत् । शम्ब चेति मैत्रेयः । शम्बेत्येक इति स्वामी । शम्बयति । अशशम्बत् । शम्बरम् । बाहुलका-दरः । साम्ब इति केचिद्दन्त्यादिं दीर्घवन्तं च पठन्ति ॥ २२ ॥

भक्ष अदने ॥ भक्षयति पिण्डीं देवदत्तः । अतो हेतुमण्णिचि भक्षयति पिण्डीं देवदत्तेनेति 'गतिबुद्धिप्रत्यवसानार्थे'ति प्रयोज्यस्य कर्मत्वं 'भक्षेरहिंसार्थस्ये' ति वार्तिकेन निषिध्यते । अत्र 'चादिखाद्योः प्रति-षेध' इत्यतः प्रतिषेधग्रहोनुवर्तते । 'गतिबुद्धी'त्यादौ चाणिग्रहणेन हेतुमण्णिचो निषेधः । हिंसायां तु भक्षयति यवान् बलीवर्दानिति भवति । अत्र भक्षयतिर्हिंसाङ्गे भक्षणे वर्तते, हिंसा च सर्वे भावाः सचे-तना इति दर्शनेन यवानां सचेतनत्त्वादस्ति । दर्शनान्तरे यवानां भक्षणे स्वामिनो हिंसा भवतीति तदपेक्षं भक्षणस्य हिंसाङ्गत्त्वम् ॥ २३ ॥

कुट्ट छेदनभर्त्सनयोः ॥ एवं बहवः । छेदनपूरणयोरिति स्वामी, छेदनइत्येवं जिनेन्द्रदुर्गौ । कुट्टयति । अचुकुट्टत् । कुट्टाकः । 'जल्पभि-क्षकुट्टेति षाकन् । षित्त्वात् स्त्रियां कुट्टाकी, कुट्टनं कुट्टः । 'एरच्' । कुट्टेन निर्वृत्तं कुट्टिमं, भावप्रत्ययान्तादिमब्वक्तव्य इति 'तेन निर्वृत' मिति विषये इमप् ॥ २४ ॥

पुट्ट चुट्ट अल्पीभावे ॥ पुट्टयति । अपुपुट्टत् । चुट्टयति । अचुचु-ट्टत् ॥ २५—२६ ॥

अट्ट षुट्ट अनादरे ॥ अट्टयति, आट्टिटत् । अयन्दोपधो लक्षणवशेन टकार इति 'नन्द्रा' इति दकारवर्जस्य द्वितीयस्यैकाचो द्विर्वचने पश्चात् ष्टुत्त्वम् । सुट्टयति । असुषुट्टत् ॥ २७—२८ ॥

लुण्ठ स्तेये ॥ लुण्ठयति । अलुलुण्ठत् । लुण्ठतीति लुठि स्तेये इत्यस्य शपि । ननु लुण्ठतेरिदित्पाठेनापि लुण्ठयति लुण्ठतीति रूप-द्वयं भविष्यति, किं भ्वादीदित्पाठेन । सत्यम् । सिध्यतीदं रूपद्वयं,

लुण्ठतीति ताच्छीलिकस्तृन्न स्यात् । 'जल्पभिक्षकुट्टलुण्ठेति' षाकना बाधात् । लुठि पाठे तु प्रतिपदोक्तत्वादस्यैव तत्र ग्रहणमिति भैवादिकात्तृ[1]न लुण्ठितेति भवतीत्युभयत्र पाठः कर्तव्यः । अत एव न्यासे कुट्ट छेदे, लुण्ठ स्तेये चौरादिकावेतावित्युक्तम् । लुण्ठाकः । 'जल्पभिक्षे'त्यादिना षाकन्, षित्त्वान्ङीष् लुण्ठाकी ॥ २९ ॥

शठ श्वठ असंस्कारगत्योः ॥ शाठयति । श्वाठयति, अशीशठत् । अशीश्वठत् । इदिद् द्वितीय इति दुर्गः । मैत्रेयोपि श्वठीत्येक इति । श्वण्ठयति । अशश्वण्ठन् श्लाघायां शाठयतइत्याङ्कुस्मीयः । शठयति श्वठयतीति कथादौ, कैतवे शठतीति शपि गतम् ॥ ३०–३१ ॥

तुजि पिजि हिंसाबलादाननिकेतनेषु ॥ तुञ्जयति । अतुतुञ्जत् । पिञ्जयति । अपिपिञ्जत् । इदित्करणात्तुञ्जति पिञ्जतीत्यपि भवतः । तुजि हिंसायां तुजि पालने चेति भूवादिपाठादेव हिंसायां तुञ्जतीति सिद्धाविदित्त्वेन णिजनित्यत्वं बलादाननिकेतनयोरपि तुञ्जतीति रूपसिद्धये, एवं तर्ह्यनेनैव सिद्धे भूवादिपाठः किमर्थ इति चेत्, पालने तुञ्जतीत्यर्थः । तुञ्जयति पिञ्जयतीति भाषार्थावये भविष्यतः । शाकटायनस्तुज पिजेति पपाठ । पिज वर्णइत्यदादौ । इह लजि लुजि इत्यपि क्वचिद् दृश्येते । तौ मैत्रेयादिभिर्न पठ्येते ॥ ३२–३३ ॥

पिस गतौ ॥ पेसयति । अपीपिसत् । पेसतीति शपि ॥ ३४ ॥

षान्त्व सामप्रयोगे ॥ सान्त्वयति । असषान्त्वत् । सिषान्त्वयिषति ॥ ३५ ॥

श्वल्क वल्क परिभाषणे ॥ श्वल्कयति । वल्कयति । अशश्वल्कत् । अववल्कत् ॥ ३६–३७ ॥

ष्णिह स्नेहने ॥ षोपदेशः । स्नेहयति । असिष्णिहत् । स्निह्यतीति प्रीतौ दिवादिः । अत्र स्फिट स्नेहनइति क्वचित्कोशे दृश्यते । तद्धनपालशाकटायनमै[3]त्रेयदेवादिभिश्चिरन्तनैर्व्याख्यातृभिर्न लिख्यते ॥ ३८ ॥

१ लुण्ठीति ताच्छीलिको णिनिर्न स्यादिति ४ पुस्तके पाठः ।
२ णिनि लुण्ठीति ४ पु· पा· । ३· चैत्रेयेति ४ पु· पा· ।

स्मिट अनादरे ॥ स्मेटयति । असिस्मिटत्, ष्मिङ् इत्येक इति मैत्रेयः । स्माययते । अवयवे कृतं लिङ्गमिति न्यायेन णयन्तस्य ङित्त्वादात्मनेपदम् । आत्वं स्मयतेरिति निर्देशाद्धेतुमण्णौ विधानाच्च नास्य भवति । शाकटायनस्त्वट स्मिट गताविति टान्तप्रकरणे पपाठ । स्मयत इतीषद्धासे शपि ॥ ३९ ॥

श्लिष श्लेषणे ॥ श्लेषयति । अशिश्लिषत् । श्लेषतीति दाहे शपि । श्लिष्यतीत्यालिङ्गने श्यनि ॥ ४० ॥

पथि गतौ ॥ पन्थयति । अपपन्थत्, । पन्थति । अपन्थात्, इदित्वाण्णिज्विकल्पः । पथतीति पथे गतावित्यस्य शपि ॥ ४१ ॥

पिच्छ कुट्टने ॥ पिच्छयति । अपिपिच्छत् ॥ ४२ ॥

छदि संवरणे ॥ छन्दयति । अचछन्दत् । छन्दति । शाकटायनस्त्वात्मनेपदिष्वप्यमुं पपाठ । स्वाम्यादयश्छदेत्यनिदितं पठित्वा छादयतीत्युदाजह्रुः। तथा छादयतीति रूपस्य छद अपवारणइत्याधृषीयेणैव सिद्धत्वादिह पाठो व्यर्थः स्यात्। इदित्त्वाभावे छन्दःशब्दोऽपि न स्यादिति मैत्रेयाद्युक्त इदित्पाठ एव न्याय्यः । अत एव न्यासपदमञ्जर्यादौ छादयमित्यत्रोरश्छदादि छद अपवारण इत्यस्मादेव व्युत्पादितम् ॥ ४३ ॥

श्रण दाने ॥ प्रायेणायं विपूर्वः । विश्राणयति । व्यशिश्रणत् । घटादिपाठात् श्रणयति ॥ ४४ ॥

तड आघाते ॥ ताडयति । अतीतडत् ॥ ४५ ॥

खड खडि कडि भेदने ॥ खाडयति । अचीखडत् । खण्डयति । अचखण्डत् । खण्डति । अखण्डीत् । कण्डयति । अचकण्डत् । कण्डति । अकण्डीत् । खण्डतीति मन्थने शपि । तथा कण्डतइति भेदे । क्षीरस्वामी तु भूवादौ परस्मैभाषं कडतिमनिदितमपि कडीतीदितं पठित्वा कडति दुर्गे इत्याह । अस्य निर्णयस्तत्र कृतः ॥ ४६–४७–४८ ॥

कुडि रक्षणे ॥ कुण्डयति । कुण्डति । कुण्डतइति वैकल्यदाहयोः शपि गतं, वैकल्यार्थष्टान्त इति शाकटायनः । टान्तमेकइति स्वामी । इमावपि पाठभेदौ तत्रापि दर्शितौ ॥ ४९ ॥

गुडि वेष्टने ॥ गुण्डयति । गुण्डति । रक्षणइत्येके । प्रथमादिं द्वितीयान्तमेके पठन्ति । अवकुण्ठयति । अवकुण्ठति ॥ ५० ॥

खुडि खण्डने ॥ खुण्डयति । खुण्डति ॥ ५१ ॥

वटि विभाजने ॥ वडीति शाकटायनः । वण्टयति । अत्र मैत्रेयो भौवादिकस्य विभाजनार्थस्य वटेर्हेतुमण्णौ वण्टयतीति सिद्धे चुरादौ पाठः कर्त्रभिप्रायेपि परस्मैपदार्थ इति, असौ 'णिचश्चे'ति तङ् चुरादिण्यन्तस्य नेति मन्यते । अन्ये तु 'णिचश्चे'ति तत्रापीष्यतइति नेदं प्रयोजनं किन्तु चिन्तीत्यादिवदिदित्त्वबलाण्णिचो विकल्पो नेति, विभाजने तु तेनैव वण्टतीति सिद्धमिति । ये तु भूवादावपि विभाजनइति पठन्ति तेषां तु नैवास्य चोद्यस्यावतारः ॥ ५२ ॥

मडि भूषायां हर्षे च ॥ मण्डयति । मण्डतइति वेष्टने शपि । मडि भूषायामिति भूवादौ पाठादेव मण्डतीति सिद्धेरस्येदित्त्वं नुम्मात्रार्थं न तु णिज्विकल्पार्थमपि, तेन हर्षे मण्डतीति न भवति ॥ ५३ ॥

भडि कल्याणे ॥ भण्डयति । भण्डति । परिभाषणे भण्डतइति शपि । परिहासइत्येके तत्र ॥ ५४ ॥

छर्द वमने ॥ छर्दयति । अचच्छर्दत् ॥ ५५ ॥

पुस्त बुस्त आदरानादरयोः ॥ पुस्तयति पुस्तकम् । बुस्तयति बुस्तम् ॥ ५६–५७ ॥

चुद संचोदने ॥ संचोदनं प्रश्नः, प्रेरणा च । तत्र प्रश्ने द्विकर्मकत्वं, देवदत्तमर्थं चोदयति । चूडा । भिदादिपाठादङ् । उत्वं दीर्घत्वं च । चूडालः । 'प्राणिस्थादातो लजन्यतरस्यामि'ति मत्वर्थे लच् । चूडा नाम काचित्, तस्या अपत्यं चौडिः 'बाह्वादिभ्यश्चे'तीञ् 'द्व्यच' इति ठकोपवादः ॥ ५८ ॥

नक्क धक्क नाशने ॥ अयं तवर्गीयादिः । णोपदेशपर्युदासे नृतिनन्दीत्यादावुपादानात् । नक्कयति ॥ ५९–६० ॥

चक्क चुक्क व्यथने ॥ चक्कयति । चुक्कयति । चिक्केत्यपि क्वचित्पठ्यते ॥ ६१–६२ ॥

क्षल शौचकर्मणि ॥ क्षालयति । अचिक्षलत् ॥ ६३ ॥

तल प्रतिष्ठायाम् ॥ तालयति । अतीतलत् । तालं, तलम् । अच् । 'संज्ञापूर्वको विधिरनित्य' इति वृद्ध्यभावः । मैत्रेयस्तु 'घुषिरविशब्दने' इति ज्ञापकं सामान्यमित्युक्त्वा णिजभावे तलशब्दमाह ॥ ६४ ॥

तुल उन्माने ॥ तोलयति । अतूतुलत् । तुलेति णिचोऽनित्यत्वादिति मैत्रेयः । अन्ये तु णिजभावे प्रमाणाभावा 'त्तुल्यार्थैरि' त्यादौ तुलेति निपातनाद्वङि णिलुकि तुलेति । तुलयति अतूतुलदिति तुलाशब्दा 'त्प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्चे' ति णिचि, 'दीर्घो लघो-रि' ति णौ चङ्यभ्यासस्य दीर्घत्वमग्लोपित्वान्न भवति । तुला कृष्णस्य नास्ति । 'तुल्यार्थैरि' ति विधीयमाना तृतीया तत्रैवातुलोपमाभ्यामितिवचनान्न भवति, तुलया संमितं तुल्यम् । 'नौवयोधर्मे' ति यत् । तुलया संमितमिति व्युत्पत्तिमात्रं रूढशब्दस्त्वयं सदृशपर्यायः । तुल्यश्वेतः । 'कृत्यतुल्याख्या अजात्ये' ति समानाधिकरणसमासः । अयं च पूर्वनिपातनियमबाधनार्थः । तथा तुल्यमहानित्यत्र 'सन्महदि' ति महच्छब्दस्य प्राप्तपूर्वनिपातबाधार्थः । कृष्णस्य तुल्यः, कृष्णेन वा । 'तुल्यार्थैरि' ति षष्ठीतृतीये ॥ ६५ ॥

दुल उत्क्षेपे ॥ दोलयति । अदूदुलत् । दोला । भिदादेराकृतिगणत्वादङ् । दुलिः कर्मठः । 'अच इरि' तीप्रत्ययः । 'बहुलमन्यत्रापि संज्ञाच्छन्दसोरि' ति णिलुक् ॥ ६६ ॥

पुल महत्वे ॥ पोलयति । पोलतीति शपी[१]ति भूवादौ स्वामी ॥ ६७ ॥

चुल समुच्छ्राये ॥ चोलयति । चोलः । चोलस्यापत्यमपि चोलः । 'द्व्यञ्मगधेत्यण्' । तस्य 'कम्बोजादिभ्यो लुग्वचनञ्चोलाद्यर्थमि' ति लुक् ॥ ६८ ॥

मूल रोहणे ॥ मूलयति । मूलतीति प्रतिष्ठायां शपि ॥ ६९ ॥

१ पुलतीति शे इत्यधिकं ४ पु· ।

याज्येति । वचनेन होतुः याज्यापनये ऽपि भक्षो नापनीतः प्रवरवत् । यथा होतारं त्वा वृणे इति ऋतुयाजार्थवरणं याज्यापनये ऽपि नापैति तद्वत् ॥ ४५ ॥

यष्टुर्वा कारणागमात् ॥ ४६ ॥

सिद्धान्तमाह । यष्टुरिति । यष्टुर्वा कारणस्य वषट्कारकर्तृत्वरूपस्यागमात्* ॥ ४६ ॥

प्रवृत्तत्वात्प्रवरस्यानपायः ॥ ४७ ॥

प्रवरदृष्टान्तो विषम इत्याह । प्रवृत्तत्वादिति । प्रवरस्य वरणस्य प्रवृत्तत्वात् पूर्वमेव कृतत्वात् तस्यापायो न संभवति । अयं भावः । सर्वयाज्यार्थं होतुः तन्त्रेण वरणं तन्मध्ये एकयाज्यापनये ऽपि याज्यान्तरार्थं वरणस्य पूर्वमावश्यकत्वादिति ॥ ४७ ॥

फलचमसस्येज्याविकारत्वम् । अधि॰ १६ ।

फलचमसो नैमित्तिको भक्षविकारः श्रुतिसंयोगात् ॥ ४८ ॥

ज्योतिष्टोमे राजन्यवैश्यकर्तृके कश्चिद्विशेषः श्रूयते, यदि राजन्यं वैश्यं वा याजयेत् स यदि सोमं बिभक्षयिषेद् न्यग्रोधस्तिमिनीराहृत्य ताः संपिष्य दधन्युन्मृज्य तमस्मै भक्षं प्रयच्छेन्न सोममिति । अनेन प्राप्यमाणद्रव्यं भक्षविकार इज्याविकारो वेति संशये पूर्वपक्षमाह । फलेति । फलचमसः उक्तप्रकारः नैमित्तिकराजन्यादिकर्तृकत्वरूपनिमित्तप्राप्तः भक्षविकारः श्रुतिसंयोगात् । बिभक्षयिषेदिति तमस्मै भक्षं प्रयच्छेदिति श्रवणात् ॥ ४८ ॥

इज्याविकारो वा संस्कारस्य तदर्थत्वात् ॥ ४९ ॥

सिद्धान्तमाह । इज्येति । इज्याविकारः होमद्रव्यविकारः संस्कारस्य होमशेषप्रतिपत्तिसंस्कारस्य तदर्थत्वाद्धोमशेषार्थत्वात् । होमं विना

* भक्षकारणस्य वषट्कारकर्तृत्वस्य यजमाने एव प्रतीतेस्तस्यैव भक्ष इत्यर्थः । न च याज्यापनये वषट्कारकर्तृत्वं होतुः संभवति । अनवानं यजतीत्यनेन याज्यावषट्कारयोर्मध्ये श्वासनिषेधेन तयोरेककर्तृकत्वावगमात् । इत्थं च भक्षो ऽपि यजमानस्यैवेति सिद्धम् ।

होमशेषत्वासंभवात् पुरुषार्थभक्षणस्य विध्यभावाद् बिभक्षयिषेदित्यस्य होमशेषं बिभक्षयिषेदित्यर्थकतया होमार्थमेवेदं द्रव्यमिति भावः ॥ ४९ ॥

होमात् ॥ ५० ॥

किं च, अन्यांश्चमसाञ् जुहोत्यथैतस्य दर्भतरुणकेन उपहत्य जुहोतीति फलचमसहोममुद्दिश्य दर्भतरुणस्य गुणत्वेन विधानादपि होमसिद्धिरित्याह । होमादिति । होमानुवादादित्यर्थः ॥ ५० ॥

चमसैश्च तुल्यकालत्वात् ॥ ५१ ॥

अपि च, यदा ऽन्यांश्चमसानुन्नयन्त्यथैनं चमसमप्युन्नयन्तीति होमसाधनचमसैः सहोन्नयनकथनमपि होमसत्त्वे गमकमित्याह । चमसैरिति । तुल्यकालत्वाद् उभयोरुन्नयनस्य एककालत्वात् ॥ ५१ ॥

लिङ्गदर्शनाच्च ॥ ५२ ॥

लिङ्गस्य तमस्मै भक्षं प्रयच्छेन्न सोममिति सोमनिषेधरूपस्य दर्शनाद् सोमनिषेधपूर्वकोक्तद्रव्यविधानेन सोमस्यानीयत्वं गम्यते । सोमस्य तु हुतशेषस्यैव भक्षणादस्यापि तथात्वं सिद्धमिति भावः ॥ ५२ ॥

ब्राह्मणानामेव राजन्यचमसानुसर्पणम् । अधि० २० ।

अनुप्रसर्पिषु सामान्यात् ॥ ५३ ॥

राजसूये दशपेयनामकः सोमविकारः यागः । तत्र शतं ब्राह्मणाः सोमान् भक्षयन्ति दश दशैकैकं चमसमनुसर्पन्तीति । तत्र क्षत्रियस्यैव अधिकाराद् राजन्यचमसे दश राजन्या ब्राह्मणा वेति संशये पूर्वपक्षमाह । अन्विति । अनुप्रसर्पिषु राजन्यचमसानुसर्पिषु दश राजन्याः । सामान्यात् । एकजातीयत्वलाभात् । अयं भावः । प्रकृतितः चमसभक्षणं भक्षणे च एकजातीयकर्तृकत्वं प्राप्तं संख्याविशेषश्च प्राप्तः । तत्र दश दशेत्यनेन प्राकृतसंख्याबाधे ऽपि एकजातीयकर्तृकत्वबाधकं न किं चि द्वचनमस्ति । न च शतं ब्राह्मणा इति वचनं बाधकमिति शङ्क्यम् । दशचमसेषु दशविधौ शतमित्यनुवादवाक्यम् अत एव ब्राह्मणानां बहुत्वात् *स्पष्टिन्यायेन ब्राह्मणशब्द उभयपर इति ॥ ५३ ॥

* प्रथमाध्यायचतुर्थपादस्य षोडशाधिकरणोक्तेन न्यायेनेत्यर्थः ।

ब्राह्मणा वा तुल्यशब्दत्वात् ॥ ५४ ॥

सिद्धान्तमाह । ब्राह्मणा इति । राजन्यचमसे ऽपि दश ब्राह्मणा एव तुल्यशब्दत्वाद् दशस्वपि चमसेषु ब्राह्मणा इत्येकजातीयशब्दवत्त्वात् । अयं भावः उभयोर्वाक्ययोः विधायकत्वे संभवति एकस्यानुवादत्वकल्पनमन्याय्यम् । शतं ब्राह्मणा इति शतमनूद्य ब्राह्मणा इति विधिः । ब्राह्मणविधाने ऽपि चमसेषु न्यूनाधिकसंख्यया ऽपि शतसंख्यापूरणं माभूदित्येतदर्थं दश दशेति नियमविधिसंभवादेकजातीया एव शतम् । अतो राजन्यचमसे ऽपि दश ब्राह्मणा इति सिद्धमिति ॥ ५४ ॥

इति जैमिनिसूत्रवृत्तौ तृतीयस्याध्यायस्य पञ्चमः पादः ॥ ५ ॥

अनारभ्य विहितानां पर्णतादीनां प्रकृतिगामित्वम् । अधि॰ १ ।

सर्वार्थमप्रकरणात् ॥ १ ॥

यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीति अनारभ्य श्रुता पर्णता प्रकृतौ निविशतउत विकृतौ चेति संशये पूर्वपक्षमाह । सर्वार्थमिति । स्पष्टम् ॥ १ ॥

*प्रकृतौ वा ऽद्विरुक्तत्वात्† ॥ २ ॥

सिद्धान्तमाह । प्रकृताविति । प्रकृतौ दर्शपूर्णमासएवाद्विरुक्तत्वात् । विकृतावतिदेशशास्त्रेण एकदा उक्तवचनेन चैकदेति सर्वार्थत्वे द्विरुक्तता स्यादिति भावः ॥ २ ॥

तद्वर्जं तु प्रवचनं प्राप्ते ॥ ३ ॥

अनारभ्य वचनेन विकृतौ पर्णमयीत्वप्राप्तौ अतिदेशवचनं तद्वि-

---

* अत्र प्रकृतिशब्देन, विकृतिर्यतो ऽङ्गानि गृह्णाति सा प्रकृतिरिति लक्षिता न विवक्षिता । गृहमेधीये पर्णताया अप्राप्तिप्रसङ्गात् । तत्र पठितान्यमङ्गानां कुत्राप्यनतिदेशात् । किं तु अतिदेशेन यत्राङ्गाप्राप्तिस्तत्कर्म विवक्षितम् । तथा च गृहमेधीये क्लृप्तोपकारैराज्यभागादिभिस्तत्र पठितैरेव अङ्गैर्नैराकाङ्क्ष्यादतिदेशाप्रवृत्त्या प्रकृतिशब्दग्राह्यत्वात्तत्रापि पर्णता सिध्यति । एतादृशविवक्षायाः स्वीकारे बीजं तु अद्विरुक्तत्वादिति हेतुरेवेति बोध्यम् ।

† द्विरुक्तत्वादिति पाठे विकृताविति पदमध्याहृत्य तत्र द्विरुक्तत्वात्प्रकृतावेवानारभ्याधीतानां निवेश इत्यर्थो बोध्यः । पाठद्वयं वार्त्तिककारेण प्रदर्शितम् ।

चप्राकृतधर्मान् प्रापयतीति न द्विरुक्तिरित्याह । तदिति । प्राप्ते उक्तवचनेन विकृतावपि प्राप्ते ॥ ३ ॥

दर्शनादिति चेत् ॥ ४ ॥

नन्वेवं चोदकशास्त्रादनारभ्यशास्त्रं यदि बलवत् तदा तेन शास्त्रेण पर्णमयीत्वरूपवैकृतधर्मप्राप्तौ गृहमेधीयवच् चोदकशास्त्रं सर्वमनाकाङ्क्षं स्यात् । न चेष्टापत्तिः । प्रयाजे प्रयाजे कृष्णलं जुहोतीति प्राकृतप्रयाजदर्शनादिति सिद्धान्ती शङ्कते । दर्शनादिति । विकृतौ प्रयाजादिदर्शनात् ॥ ४ ॥

न चोदनैकार्थ्यात् ॥ ५ ॥

उक्ताशङ्कां निवारयति पूर्वपक्षी । नेति । अनारभ्यशास्त्रेण चोदकशास्त्रमनाकाङ्क्षं न । यस्य पर्णमयी जुहूर्भवतीति चोदनाया ऐकार्थ्यात् । एकस्य पर्णमयीत्वमात्रस्य विधानात् । यदि पर्णमयीत्वं जुहूं चेदं वाक्यं विदध्यात्तदा चोदकशास्त्रं निराकाङ्क्षं भवेत् । तदेव न । लाघवात् पर्णमयीत्वमात्रविधिरयं चोदकशास्त्रेण प्राप्तजुहूमुद्दिश्य । तथा च जुहूप्राप्त्यर्थं चोदकशास्त्रं साकाङ्क्षमिति भावः ॥ ५ ॥

उत्पत्तिरिति चेत् ॥ ६ ॥

पुनः सिद्धान्त्याशङ्कते । उत्पत्तिरिति । उत्पत्तिः जुहूत्पत्तिरपि अनारभ्याधीतेति शेषः । यस्यैवंरूपाः स्रुचो भवन्तीति स्रुचां प्राप्तौ पर्णमयी जुहूरिति विशेषविधिः । तथा च जुहूप्राप्त्यर्थं न चोदकाकाङ्क्षेति भावः ॥ ६ ॥

न तुल्यत्वात् ॥ ७ ॥

न, चोदकापेक्षा नास्तीति न । तुल्यत्वात्तुल्यत्ववाचकपदघटितत्वात् । अयं भावः । यस्यैवंरूपाः स्रुचो भवन्तीति प्रथमं स्रुक्प्राप्तिर्वाच्या । सा न संभवति । एवंरूपा इति पूर्वक्लृप्तनिर्देशात् । अतः चोदकशास्त्रादेव जुहूप्राप्तिरिति ॥ ७ ॥

चोदनार्थकार्त्स्न्यात्तु मुख्यविप्रतिषेधात्प्रकृत्यर्थः ॥ ८ ॥

चरमसिद्धान्तमाह । चोदनेति । प्रकृत्यर्थः प्रकृतिमात्रार्थः अयं विधिः । विकृतौ चोदनार्थकार्त्स्न्यात् कृत्स्नधर्माणामेव चोदकेन प्राप्तेः पर्णताया अपि प्राप्तत्वेन मुख्यस्यानारभ्यपठितशास्त्रस्य विप्रतिषेधादाकाङ्क्षाऽभावात् । यद्यपि अनारभ्यशास्त्रं प्रत्यक्षं चोदकमानुमानिकं विलम्बेन प्रवर्तते तथा ऽपि उक्तयुक्त्या जुहूप्राप्त्यर्थं प्रत्यक्षशास्त्रात् पूर्वमेव प्रवृत्तिरङ्गीकार्या । जुहूप्राप्तिवेलायामेव पर्णताया अपि प्राप्तौ प्रत्यक्षशास्त्रमेव निराकाङ्क्षमिति भावः ॥ ८ ॥

सामिधेनीनां सप्तदशसंख्याया विकृतिगामित्वम् । अधि॰ २ ।

प्रकरणविशेषात्तु विकृतौ विरोधि स्यात् ॥ ९ ॥

अनारभ्य श्रुतं, सप्तदश सामधेनीरन्वाहेति । इदं पूर्वन्यायेन प्रकृतौ पाञ्चदश्येन सह विकल्पेन निविशतइति बहिः पूर्वपक्षे सिद्धान्तमाह । प्रकरणेति । प्रकरणे दर्शपूर्णमासप्रकरणे विशेषात् पञ्चदश सामिधेनीरन्वाहेति विशेषाद् विरोधि पाञ्चदश्यविरोधि साप्तदश्यं विकृतौ* स्यात् । प्रकरणसहकृतपाञ्चदश्यस्य पक्षे ऽपि प्रकृतौ बाधासंभवादिति भावः ॥ ९ ॥

गोदोहनादीनां प्रकृतिगामित्वम् । अधि॰ ३ ।

नैमित्तिकं तु प्रकृतौ तद्विकारः संयोगविशेषात् ॥ १० ॥

दर्शपूर्णमाससन्निधावेव श्रूयते, गोदोहनेन पशुकामः प्रणयेदिति । प्रकृतौ चमसेन प्रणयनस्य अवरुद्धत्वात् पूर्वन्यायेन विकृताविति पूर्वपक्षे सिद्धान्तमाह । नैमित्तिकमिति । नैमित्तिकं गोदोहनं प्रकृतौ निविशते तद्विकारः सञ्चमसबाधकः सन् संयोगस्य पशुकाम इतिपदसंबन्धरूपस्य विशेषात् पूर्वोक्तसाप्तदश्यापेक्षया विशेषात् । अयं भावः । चमसः गोदोहनं चेत्युभयं दर्शपूर्णमाससन्निधौ पठितं तुल्यं, तथा ऽपि चमसशास्त्रं सामान्यं पशुकामेतरप्रयोगे सावकाशमिदं विशेषं निरवकाशं

* विकृतावपि न सर्वत्र किं तु मित्रविन्दादिष्वेवेति दशमे वक्ष्यते ।

सत् प्रबलमतः यमसस्य गोदोहनेन बाधसंभवात्प्रकृतावेव निविशत-इति ॥ १० ॥

आधानस्य पवमानेष्ट्यनङ्गत्वम् । अधि० ४ ।

इष्ट्यर्थमग्न्याधेयं प्रकरणात् ॥ ११ ॥

अग्नये पवमानाय अग्नये पावकायेत्यादिवाक्यैः पवमानेष्टिर्विहिता । तत्सन्निधौ, वसन्ते ब्राह्मणो ऽग्निमादधीतेति श्रुतमाधानं पवमानेष्ट्यङ्गं सन्निधिपाठादिति पूर्वपक्षमाह । इष्टीति ॥ ११ ॥

न वा तासां तदर्थत्वात् ॥ १२ ॥

सिद्धान्तमाह । न वेति । तासां पवमानेष्टीनां तदर्थत्वाद् अग्निसंस्कारार्थत्वाद् नाधानमिष्ट्यङ्गम् । अयं भावः अग्नीनामिष्ट्यर्थत्वे आधानं पवमानेष्ट्यङ्गं भवेत् । तदेव न, इष्टीनां फलाश्रवणेन फलवत्सन्निधावफलं तदङ्गमितिन्यायाप्रसरात् । किं तु आधानपवमानेष्ट्योरग्न्यर्थत्वम् अग्नीनां च निखिलक्रत्वर्थत्वमिति ॥ १२ ॥

लिङ्गदर्शनाच्च ॥ १३ ॥

जीर्यति वा एष आहिताग्निः संवत्सरस्य परस्तादेतानि हवींषि संवत्सरे निर्वपेत् तेनैव न जीर्यतीतीष्टीनामग्न्यर्थत्वे लिङ्गमाह । लिङ्गेति ॥ १३ ॥

आधानस्य सर्वार्थत्वम् । अधि० ५ ।

तत्प्रकृत्यर्थं यथा ऽन्ये ऽनारभ्यवादाः ॥ १४ ॥

आधानं प्रकृत्यर्थं पर्णमयीत्वन्यायादिति पूर्वपक्षमाह । तदिति । तद् आधानं शेषं स्पष्टम् ॥ १४ ॥

सर्वार्थं वा ऽऽधानस्य स्वकालत्वात् ॥ १५ ॥

सिद्धान्तमाह । सर्वेति । सर्वार्थम् अग्निद्वारा सर्वक्रत्वर्थं स्वकालत्वाद् वसन्तऋतुरूपस्वकालस्य स्वातन्त्र्येण विधानात् । अयं भावः । दर्शपूर्णमासाङ्गत्वे प्रधानस्य यः कालो दर्शः पूर्णिमा च, स एव तदङ्गानां कालः न स्वतन्त्रः कालो ऽङ्गानाम् । इह तु स्वतन्त्रः कालः श्रूयते । अत

आधानं केवलाग्न्यर्थं तेनोत्पन्नाग्नीनां सर्वक्रत्वर्थत्वं यदाहवनीये जुहोतीति वाक्येनेति * ॥ १५ ॥

पवमानेष्टीनामसंस्कृतेऽग्नौ कर्तव्यत्वम् । अधि॰ ६ ।

तासामग्निः प्रकृतितः प्रयाजवत् ॥ १६ ॥

पवमानेष्टिषु पवमानेष्टिसंस्कृता अग्नयः अपेक्षिताः इति पूर्वपक्षमाह । तासामिति । तासां पवमानेष्टीनामग्निहोमार्थमग्निः प्रकृतितो दर्शपूर्णमासादतिदिश्यते प्रयाजातिदेशवत् । प्रकृतौ संस्कृताग्निसत्त्वाद् अत्रापि तथेति भावः ॥ १६ ॥

न वा तासां तदर्थत्वात् ॥ १७ ॥

सिद्धान्तमाह । न वेति । न तत्र पवमानेष्टिसंस्कृतोऽग्निः इष्टीनां तदर्थत्वाद् अग्न्यर्थत्वात् । यदि पवमानेष्टौ तत्संस्कृताग्न्यपेक्षा पूर्वं पवमानेष्टिः कार्या तत्राप्यग्न्यपेक्षायां तत्पूर्वमिष्टिरित्यनवस्थाभयेन यत्र क्व चिदसंस्कृताग्नौ विश्रामः कार्यः अग्रे क्रियमाणः प्रथमत एव क्रियतइति भावः ॥ १७ ॥

उपाकरणादीनामग्नीषोमीयपशुधर्मत्वम् । अधि॰ ७ ।

तुल्यः सर्वेषां पशुविधिः प्रकरणाविशेषात् ॥ १८ ॥

ज्योतिष्टोमे अग्नीषोमीयः सवनीयः अनूबन्ध्यश्चेति पशुत्रयम् । तत्सन्निधावेव पशुधर्मा आम्नाताः । अतः ज्योतिष्टोमप्रकरणाविशेषात् त्रयाणां पशुधर्मा इति पूर्वपक्षमाह । तुल्य इति । पशुविधिः पश्वङ्गविधिः । शेषं स्पष्टम् ॥ १८ ॥

स्थानाच्च पूर्वस्य ॥ १९ ॥

* स्यादेतत् । यथा अनारभ्याधीतमपि पर्णमयीत्वं जुहूस्वरूपपरत्वे आनर्थक्यात्क्रतुसाधनांशे लक्षणया विधीयमानं वाक्यादेव क्रत्वर्थं भवति एवमाधानमपीति। मैवम् । जुह्वादयो ह्याकृतिविशेषाः विनाऽपि पर्णमयीत्वेन तदाकारसंभवात् तत्स्वरूपार्थत्वं विध्यानर्थक्याद् युक्ता तत्र साधनांशलक्षणा, इह तु आहवनीयादिस्वरूपस्यादृष्टत्वाच्छ्रुत्यवगततत्स्वरूपार्थत्वेऽपि विध्यानर्थक्याभावाद् न साधनांशलक्षणया क्रत्वर्थत्वं युक्तमिति विशेष, इति शा॰ दी॰ ।

ननु न सर्वपश्वर्थाः पशुधर्माः किं तु सवनीयपश्वर्थाः चतुर्थे ऽह्नि आग्नेयः पशुरग्निष्टोमआलभ्यते इति सवनीयपशूत्पत्तिः। अग्नीषोमीयपशूत्पत्तिवाक्यं सोमक्रयसन्निधौ यदग्नीषोमीयं पशुमालभतइति। अवभृथोत्तरं मैत्रावरुणीं गां वशामनूबन्ध्यामालभतइति। तेषां मध्ये आग्नेयपशूत्पत्तिवाक्यसमीपे पशुधर्माम्नानात्तस्यैवावान्तरप्रकरणं युक्तम्। अवान्तरप्रकरणेन महाप्रकरणबाधादभिक्रमणस्य प्रयाजार्थत्ववत्सवनीयार्थत्वमेवेत्याशङ्कायामिमं पक्षं निरस्यति। स्थानादिति। स्थानाद् अग्नीषोमीययागस्थानात् पूर्वस्य च अग्नीषोमीयस्यापि। अयं भावः। यथा ऽवान्तरप्रकरणात् सवनीयाङ्गत्वं तथा स एव उपवसथीये ऽहन् द्विदेवत्यः पशुरालभ्यतइति वचनेन चतुर्थदिने अग्नीषोमीययागः तत्सन्निधौ पशुधर्मपाठात् स्थानक्रमेण तदङ्गत्वमपीत्युभयार्थाः पशुधर्मा इति ॥ १९ ॥

श्वस्त्वेकेषां तत्र प्राक् श्रुतिर्गुणार्था ॥ २० ॥

सिद्धान्तमारभते। श्व इति। तु इति सिद्धान्तज्ञापकम्। एकेषां शाखिनां शाखायां श्वः सुत्याहे आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं पशुमुपाकरोतीति श्रुतम्। इदं सवनीयपशूत्पत्तिवाक्यम्। ननु तस्यामेव शाखायां चतुर्थदिवसे आग्नेयं पशुमालभतइति श्रूयते तस्य का गतिरत्राह। तस्यां शाखायां प्राक् चतुर्थदिवसे श्रुतिः उक्तवाक्यश्रवणं गुणार्था अङ्गविधानार्था। कीदृशाङ्गविधानार्थमिति चेदित्यम्। आग्नेयः पशुरग्निष्टोमआलभ्यते ऐन्द्राग्नः पशुरुक्थ्यऐन्द्रो वृष्णिः षोडशिन्यां सारस्वती मेष्यतिरात्रे इति उत्तरसंस्थासाधारणपशूञ्चतुर्थदिने प्रतिपाद्य, तत्रैव, यथा वै मत्स्यो ऽविदितः जनमवधूनुते एवं वा एते ऽप्रज्ञायमाना जनमवमानत इति। अस्यार्थः। यथा जलचरो मत्स्यः अविदितः स्वविरोधिजनस्थितिज्ञानशून्यः स्वप्रेक्षकजनमवधूनुते इतो गतो न वेतिसंशयोत्पत्तिपूर्वकं तिरस्करोति, एवम् एते पशवः अप्रज्ञायमानाः स्वविनियोगस्थानमजानन्तः जनं स्वविनियोजनकर्तारम् ऋत्विजम् अवमानतः तिरस्कुर्वन्तीति स्थलाज्ञाने दोषमभिधाय एभिः सवनानि कथं पशुमन्तीति

स्साधारणा युष्माभिरेव पठ्यन्ते न तु तेषां हेतव इष्टाः । व्यक्ता-व्यक्तयोश्च "त्रिगुणमविवेकी"त्यादिसाधर्म्यपाठादेकोपादानत्वप्र-सङ्गः । कार्यत्वे सतीति विशेषणेऽपि मृत्पिण्डद्वयारब्धघटादिभिः गोमयादिनानोपादानवृश्चिकादिभिश्चानैकान्त्यं *तन्त्वारब्धपटा-दिभिश्च तेषामपि पक्षीकरणे दृष्टान्तासिद्धिः †व्यतिरेकिहेतुविवक्षा-यामपि न दृष्टः कारणभेदोऽपन्होतुं शक्यः । नापि कारणान्तरमेकं विधातुं दृष्टैरेव हेतुभिरदृष्टघटितैः कार्याणां चरितार्थत्वात् न च शास्त्रमन्तरेण जगतस्सत्त्वादिगुणसमन्वयसिद्धिः येन तन्मयं कारण-मुन्नीयेत । ननु सुख्यामि दुःख्यामि मुह्यामीति स्वानुभवसिद्धास्ता-वत्सुखादयस्ते च कार्यभूताः स्वानुरूपं कारणमाक्षिपन्ति तथा तथा तेषु तेषु विषयेषु कालभेदेन पुरुषभेदेन च प्रीत्यप्रीतिविषाद-जनकत्वं दृष्टं तदपि तत्तद्गतविचित्रगुणविशेषहेतुकं युक्तमिति तन्न । सम्प्रतिपन्नदृष्टादृष्टहेतुशक्त्यैव सर्वोपपत्तौ तदतिरिक्तत्रैगुण्यक्लृ-प्त्ययोगात् गुणानां कार्यैकनिरूपणीयत्वभाषणमपि शास्त्रोपज्ञम् । अन्यथा त्रैगुण्योन्मेषभेदस्याप्यतिरिक्तनिर्वाहकत्रैविध्यक्लृप्त्यावनवस्था-प्रसङ्गात् साम्यनवस्था तु सिद्धा न क्वापि दोषाय प्रत्युत गुणायेति सर्वैरेष्टव्या गुणत्रयात्मकं च कारणमिच्छतस्ते विश्वस्यैकोपादा-नत्वं दुर्वचम् । ननु साम्यावस्थानां सत्त्वरजस्तमसां सङ्घातः प्रकृतिः अतः कारणैकत्वं स्यात्तन्न । चित्रपटारम्भकशुक्लकृष्णरक्ततन्तुसङ्घा-तन्यायेन सूक्ष्मदृष्टौ कार्याणां यथास्वं कारणभेदस्यैवाङ्गीकारात् ततश्च भेदानां भिन्नत्वे सति विकारत्वादभिन्नहेतुकत्वक्लृप्तिश्च निरस्ता सत्त्वादीनां भिन्नत्वाद्विकारित्वाच्च । अथ तत्राभिन्नकार-

* बह्वा पु॰ पा॰ ।
† अविदितेति पु॰ पा॰ ।

णान्तरकॢप्तिः तथा सति स्वाभीष्टतत्त्वसंख्याविरोधः सत्त्वादिद्रव्यभेदाभ्युपगमाच्च "शक्तितःप्रवृत्तेश्चे"त्येतदपि मन्दं यदि कारणशक्तितः कार्यं प्रवर्तते कथमव्यक्तसिद्धिः। ननु कारणशक्तिर्नाम सत्कार्यपक्षे न कार्यस्याव्यक्तत्वादन्या यथा हि तिले तैलस्यातस्सर्वकार्योपादानाव्यक्तसिद्धिरिति मैवम्। यदि तैलाश्रयतिलवदव्यक्तावस्थाश्रयस्वीकारः तदा पूर्ववत्स्वेष्टतत्त्वसंख्याविरोधः। अथ न विषमस्तिलदृष्टान्तः नोदाहरणमादर्तव्यं क्षीराद्दधिवत् सूक्ष्मावस्थात्स्वस्मादेव जगदुत्पत्स्यत इति। तथाऽपि सम्प्रतिपन्नावधिस्तत्त्वपङ्क्तिरस्तु। यद्वा तदपि सूक्ष्मं सूक्ष्मान्तरादिति कथं तत्त्वेयत्ता एतेन सांख्यानां सूक्ष्मशरीरकॢप्तिश्च निरस्ता। यदाहुः पूर्वोत्पन्नमसक्तमित्यादिना तन्न। न ह्यत्र लिङ्गशब्दोक्तसूक्ष्मशरीरसद्भावे प्रमाणमस्ति स्थूलवत्प्रत्यक्षं कैश्चिदप्यनुपलम्भात्। विभोरात्मनस्स्वर्गादिगत्युपदेशान्यथानुपपत्त्या तत्कॢप्तिरिति चेन्न। तत्कॢप्तावपि युष्मन्मते तद्गतेरात्मन्युपचारात् ततो वरमदृष्टशक्त्या तत्रतत्र देहोत्पत्तिमात्रेण तत्तद्देशगत्युपचारः। ननु स्थूलदेहद्वयान्तरालवर्ती क्षेत्रज्ञस्तत्कालीनदेहवान् क्षेत्रज्ञत्वात् यस्तथा स तथा यथा कालान्तरवर्तीत्यनुमीयेत। मैवं। विपक्षे बाधकाभावात् गत्युपदेशानुपपत्तेः परिहृतत्वात्। अशरीरत्वे मुक्तत्वप्रसङ्ग इति चेन्न। प्रलयवदविरोधात्। तत्रापि सूक्ष्माचिद्विशिष्ट एव पुरुष इति चेन्न। अत्रापि तावन्मात्रसाधने सिद्धसाधनात् आगमस्तु गत्यवस्थायां पूर्वशरीराकृष्टसूक्ष्मावयवसङ्घातमात्रेणापि गतार्थः "सूक्ष्मम्प्रमाणतश्च तथोपलब्धे"रिति सूत्रमपि तावन्मात्रविषयम्। पुर्यष्टकशरीरोक्तिश्च न शरीरान्तर्वर्तिसूक्ष्मदेहसद्भावपरा। कारणकार्यविभागादविभागादिति हेतुश्च महदादिपक्षसिद्धासिद्धिविकल्पेन

निरस्तः । किंच कार्याणां सतां क्वचित्कारणे विभागाविभागौ नियताविति कृत्वा विचित्रस्य कार्यवर्गस्य विभागाविभागस्थानतया प्रधानं सिषाधयिषितं न त्वयं नियमः यथा मृदादिषु । घटादीनामेतौ दृष्टौ न तथा तन्त्वादिषु पटादीनां न हि तन्त्वेकदेशात्मकः पटः येन घटादिन्यायः स्यात् एकस्मादनेकोत्पत्तिनियमश्चानेन भग्नः त्वयाऽपि संहतैस्तन्त्वादिभिर्जगदारम्भोक्तेश्च । यत्र कार्याणां विभागाविभागदृष्टिः न तत्र सर्वत्रोपादानत्वं निमित्तेऽपि क्वचित्तद्दृष्टेः अरणेरिवारणेयस्य न हि काष्ठे पार्थिवांशो वन्हेरुपादानम् । न च वन्ह्यंशो धूमस्य एवं सति नाव्यक्तस्यैव सिद्धिः । विश्वनिमित्तस्यापि कस्यचिदेवमनुमातुं शक्यत्वात् तस्य च विजातीयस्यापि संभवात् । किंच यथा मृदवयवसंघाते घटादेरविभागादिः तथा पार्थिवाद्यणुसंघाते तत्तद्भूतभौतिकानां स किं न स्यात् ततश्च का कथा तदतिरिक्तत्त्वकल्पनायां कृत्स्नैकदेशसंयोगानुपपत्त्याणुसङ्घातस्य कारणत्वक्लृप्तिरयुक्तेति चेन्न । सत्त्वादिविभुद्रव्यसङ्घातस्यापि तत्रैव संयोगविकल्पावतारात् अणूनां मिथः कार्त्स्न्येन संयोगे पृथुकार्यानुपपत्तिस्स्यात् न तु विभूनामिति चेन्न । तेषामपि मिथः कार्त्स्न्येन संयुक्तानां स्वापेक्षयाऽल्पपरिमाणबहुकार्योत्पत्तौ प्रतिकार्यं कारणस्य कृत्स्नैकदेशविनियोगविकल्पे कार्यान्तराणामनुत्पत्तिर्वा कारणस्य सावयवत्वं वा स्यादिति चर्चा स्यात् । श्रौते तूपादाने श्रुतेस्तु शब्दमूलत्वादिति समाधानं सूचितम् । अपि च क्षीरदधिरुचकस्वस्तिकादिन्यायेन स्वस्यैव पूर्वावस्थाविशेषवतस्स्वोपादानत्वे सिद्धे किमन्यत्र कुत्रचिदविभागादिगवेषणया । घटादयोऽपि मृत्पिण्डादिषु तत्तदंशैरेवोपादीयन्ते न तु पिण्डादिभिः कूर्मावयवदृष्टान्तश्चात्र मन्दः तत्र ह्याकुञ्चनप्रसारणाभ्यामवयवान्त-

रावृतानावृतत्वसिद्ध्या भवत्यव्यक्तव्यक्तावस्थाभेदः न तूपादानोपादेयभावात् न च तत्र कस्यचिदवयवनाशोत्पत्तिव्यवहारः अतो न कथंचिदप्यनुमानादव्यक्तादिसिद्धिः ।

आगमेन विना सिद्धिस्तन्मात्राणां च दुर्वचा ।
उद्भवानुद्भवाद्योस्तु लोके सूक्ष्मादिकल्पना ॥

अत्रेषु वचनादीनामनुपहतैस्सहकारिमद्भिस्तदवयवविशेषैरेवोपपत्तौ न तावत्कर्मेन्द्रियक्लृप्तिः रूपादिज्ञानादीनां च तत्तदधिष्ठानभेदैरेव तदनुगुणदशाविशेषितैस्सम्भवात् तदतिरिक्तकल्पनेऽपि काणादादिकल्पितन्यायेन स्मृतिविशेषानुगृहीतेन भौतिकत्वोपपत्तेराहङ्कारिकेन्द्रियसिद्धिरनागमतो न भवति ॥

कल्पनागौरवभयात्कलाकाष्ठाद्यकल्पयन् ।
अविशेषात्प्रधानादिकल्पनामप्यपास्य तु ॥
षड्विंशतत्त्ववादश्च यदि युक्त्या समर्थ्यते ।
सांख्यवत्प्रतिवक्तव्यो न विस्रम्भस्तदागमे ॥
तं षड्विंशकमित्याहुस्सप्तविंशमथापरे ।
इत्यत्र न विरोधस्स्याच्छ्रुतिमात्रानुसारतः ॥

एवमागमिकेषु महदादिषु कालभेदनियतविकारभेदाधीनं विशेषमाह । सत्त्वादीति । गुणत्रयाश्रयात्प्रधानात्सत्त्वादिगुणोन्मेषभेदेन सात्त्विको राजसस्तामसश्चेति त्रिधा महानुत्पद्यते त्रिभ्यश्च महद्भ्यस्तत्रैव त्रिविधो ऽहङ्कारः तत्र प्राच्यादेकादशेन्द्रियाणि परस्तु भूतादिसंज्ञस्तन्मात्राः क्रमाज्जनयति मध्यमस्तैजसाख्यः पूर्वापरयोरनुग्राहकतया तदुभयसाध्यसृष्टिद्धयार्थः । तुशब्दो मतान्तराद्व्यवच्छिनत्ति । कल्पितं हि कैश्चित्तन्त्रान्तरनिष्ठैः कर्मेन्द्रि-

याणाम्प्रवृत्तिशीलतया राजसाहङ्कारजन्यत्वं तच्चायुक्तं शब्दैकगम्येऽर्थे युक्तिभिरन्यथा करणायोगात् ॥ ११ ॥ इति प्रकृतिमहदाद्यागमिकता-सृष्टिप्रकारौ ॥ एवम्प्रकृत्यादीनामागमगम्यत्वं सृष्टिप्रकारं च संजगृहे । अथ तेषु तन्मात्रसृष्टौ श्रुतिस्मृतिविप्रतिपत्तेस्संशयं विपर्ययं वा निरस्यति । तत्रेति ॥

सू० तत्राहङ्कारजन्यं भजति परिणतैः शब्दमात्रं नभस्त्वं तद्वत्तन्मात्रपूर्वास्तदुपरि मरुदग्न्यम्बुभूम्यः क्रमात्स्युः ॥ सूक्ष्मस्थूलस्वभावस्वगुणसमुदयप्रक्रियातारतम्यात्तन्मात्राभूतभेदः कललदधिनयात् कल्पितस्तत्त्वविद्भिः ॥ १२ ॥

श्रूयते हि तन्मात्राणि भूतादौ लीयन्त इति । न च श्रुतिविरुद्धा स्मृतिरुदीर्येत अतः पञ्चानामपि तन्मात्राणां तामसाहङ्कारादुत्पत्तिः बहुवचनात् बहुत्वस्य च प्रसिद्धितो नियमः भूतानां तु यथास्वं तन्मात्रेभ्यः क्रमादुत्पत्तिरिति कश्चिन्मन्यते तम्प्रति ब्रूमः न ह्यनुपबृंहणा श्रुतिराप्ततमा अन्योन्यघटितानेकोपबृंहणविरोधे तदनुगुणं नेतव्या । अतः पाशवद्बहुवचनमनादरणीयम् । अंशभूयस्त्वव्यक्त्यर्थं वा तस्माच्छब्दतन्मात्रमेकमहङ्कारजन्यं तच्च परिणतिविशेषादाकाशत्वं भजते एतेन सर्वत्र सृष्टौ द्रव्यानुवृत्तिस्सूच्यते । तद्वत् । आकाशवत् । तन्मात्रपूर्वाणि वाय्वादिभूतानि स्युः । ननु यदि शब्दाद्याश्रयतया तत्तद्भूतत्वं तर्हि कथन्तत्र पञ्चकद्वयक्लृप्तिरित्यत्राह । सूक्ष्मेति । स्वगुणा इह शब्दादयः तेषां समुदय उत्पत्तिः तत्प्रक्रियातारतम्यं सूक्ष्मस्थूलस्वभावतयैव तच्च शास्त्रगम्यं कललशब्दोऽत्र दुग्धदधिमध्यावस्थाविषयः तत्र हि निवृत्तभूयिष्ठमाधुर्यमी-

षदम्लत्वमुपलभ्यते तथा स्यात् ॥ १२ ॥ इति तन्मात्रभूतसृष्टिप्रकारः । एवं तन्मात्रभूतसृष्टिप्रकार उक्तः । तत्र तोयतेजसोः सृष्टौ प्रमाणविप्रतिपत्तिं शमयति । अद्भ्योऽग्निरिति ॥

सू० अद्भ्योऽग्निस्तैजसस्ता इति न हि वचसो-बाधितुं युक्तमेकं निर्वाहः कल्पभेदाद्यदि न दृढमितात्तत्त्वसृष्ट्यैकरूप्यात् ॥ सृष्टौ ताभ्यः कदाचित्तदुपजनिरतो व्यत्ययस्तत्समष्टौ आदावप्सृष्टिवादश्श्रुतिमितमितरं न प्रति-क्षेप्तुमीष्टे ॥ १३ ॥

अबाधेन गतिमत्त्वे श्रुतिविरोधप्रतीतावपि स्मृतिस्तद्वदबाध्येति भावः । गत्यन्तरं निवारयति निर्वाह इति । स्वेष्टां गतिमाह । "व्यष्टाविति" । निमित्तभूताभ्य इति भाव्यम्, अतश्शब्दो हेतुमवधिं वा ब्रूते । ननु आपो वा इदमग्रे अप एव ससर्जादावित्यादिश्रुतिस्मृतिदर्शनादग्न्यादेस्सर्वस्यादद्भ्यस्सृष्टिस्स्यादित्यत्राह । आदाविति । महदादीनामिवाग्नेरप्यद्भ्यः पूर्वभावित्वं बहुश्रुतिस्मृतिसिद्धमतस्तदविरुद्धं दुर्निवारमित्यर्थः । श्रुतिषु च न्यूननिर्देशेषु अनुक्तमधिकमन्यतो ग्राह्यं श्रुतहानायोगात् अव्यवस्थितन्यूनाधिकसृष्टिकल्पने गौरवाच्च ॥ १३ ॥ इति अप्तेजसोर्व्यष्टिसृष्टिविशेषः ॥ ननु कथमेवं तोयतेजसोर्व्यष्टिसमष्टिसृष्टिव्यवस्था विचित्रपरिणामशालिनस्त्रिगुणस्य कालभेदेनानियतपरिणामोपपत्तेः । उक्तं च जैनैः पुद्गलाख्यमेकमेकजातीयद्रव्यं तत्तत्सामग्रीभेदैरव्यवस्थितक्रमान् भिन्नाभिन्नस्वभावान् विचित्रपर्यायान् भजत इति यथा काणादप्रभृतीनां एकैकभूतपरमाणवः यथा च सांख्यादीनामेकैकं भूतम् ।

अतो न शाश्वतभूतभेदक्लृप्तिः । वाय्वादिचातुर्विध्योक्तिरपि पर्यायभेदनिबन्धना नियतक्रमभूतसृष्टिकल्पना च लाघवयुक्तिविहता तदेतदनुभाषते । पृथ्व्या इति ॥

सू० पृथ्व्यास्स्पर्शादिभेदो द्रवमृदुकठिनीभावभेदश्च दृष्टस्तद्वत्पृथ्वीजलाग्निश्वसनपरिणतिर्लाघवायेति जैनाः ॥ तत्र द्रव्यैक्यमिष्टं क्रमजनिविलयौ त्वागमादप्रकम्प्यौ तर्ककालम्बिगोष्ठ्यां भजतु बहुमतिं तादृशी लाघवोक्तिः ॥ १४ ॥

दूष्यांशव्यक्त्ये शेषमनुमनुते । तच्च द्रव्यैक्यमिति । त्रिगुणद्रव्यमेव हि वाय्वाद्यवस्थमिति भावः । नियतक्रमत्वे कल्पनागौरवमागमबलादपनयति । क्रमेति । लाघवतर्कस्य का गतिरित्यत्राह । तर्केति । गुरुकल्पनाप्रवृत्तं प्रति हि लाघवोक्तिः शोभत इति भावः ॥ १४ ॥ इति पुद्गलानामनियतपृथिव्यादिपरिणामवादभङ्गः ॥ ननु तत्त्वसृष्टौ क्रमनियमो न सम्भवति आकाशमिन्द्रियेष्विन्द्रियाणि तन्मात्रेष्विति सुबालोपनिषदाम्नानात् । अव्यवस्थिताश्च सृष्टिव्यवहाराः पृथ्व्यादिषु दृश्यन्ते अतो यथाश्रुतं कल्पभेदात् सृष्टिभेदस्स्यादित्यत्राह । तत्त्वेष्विति ।

सू० तत्त्वेष्वाथर्वणेष्टौ प्रकृतय उदिताः षोडशान्ये विकारा निष्कर्षैदम्परेऽस्मिन् वचसि तदितरत्सर्वमावर्जनीयम् ॥ दृष्ट्वा सांख्यं पुराणादिकमपि बहुधा निर्वहन्त्येतदेके चिन्तासाफल्यमान्द्याच्छ्रमबहुलतयाऽप्यत्र तज्ज्ञैरुदासि ॥१५॥

अधीयते हि केचिदाथर्वणिकाः "अष्टौ प्रकृतयः षोडश विकारा इति" अत्र तावदव्यक्तमहदहङ्कारतन्मात्राणां प्रकृतित्वमविगीतम् । इन्द्रियेभ्यस्तत्त्वान्तरोत्पत्तिः श्रुत्यन्तरेषु पुराणेषु वा न क्वचिद्दृश्यते सौबाले च लयानुक्रमे पूर्वापरवाक्यवदिन्द्रियतन्मात्रवाक्ययोर्न लीयत इति पदमावृत्तम् एवं वाक्यवैरूप्ये सत्यनुषङ्गात् वरमधिकरणविभक्त्याऽपि संसर्गमात्रग्रहणमिति स्थिते प्रकरणान्तरैकपाठ्यं भवतीति केवलविकृतित्वमिन्द्रियाणां युक्तं भूतानां चाकाशादीनां चतुर्णां साक्षात् तन्मात्रद्वारेण वा तत्त्वान्तरोपादानत्वे प्रकृतयोविकृतयश्च पृथग् द्वादश स्युः । ननूपबृंहणविशेषानुसारादिन्द्रियाणि शब्दादिगुणाश्च षोडशविकाराः भूततन्मात्रभेदानादरेण प्रकृतयश्चाष्टावभ्युपगम्यन्तां मैवं द्रव्यतत्त्वप्रकरणे गुणपरिगणनाऽनौचित्यात् गुणशब्देन च क्वचिद्गुणाश्रयविवक्षा स्यात् गत्यभावे गुणविवक्षायामप्यत्र द्रव्यविवक्षोपपत्तेः आकाशाद्वायुरित्यादीन्यपि स्थूलसूक्ष्मभेदानादरेणेति समाधानम् । एवं स्थिते तामसाहङ्कारोत्पन्ने तन्मात्रपञ्चके भूतान्येकद्वित्रिचतुःपञ्चभिस्तन्मात्रैरारभ्यन्त इति सांख्याः पूर्वपूर्वतन्मात्राणि उत्तरोत्तरतन्मात्रमेकैकं भूतं जनयन्ति इति पौराणिकाः तत्राप्युत्तरोत्तरभूतसृष्टौ पूर्वपूर्वेषां तन्मात्राणां भूतानां वा सहकारित्वमिति पक्षभेदः । एवमन्योऽपि यथामति तदिदमाह दृष्टेति । एतत् इतरत्सर्वं वाक्यजातमित्यर्थः किमिति पूर्वाचार्यैरुपेक्षितं तत्राह "चिन्तेति ।

न प्रधानविरोधस्स्यादीदृशानवधारणे ।

इति निश्च*यितुं शिष्यान्प्राचां क्वचिदनिश्चयः ॥ १५ ॥

* निश्चेतुमिति प्राप्ते निश्चययितुमिति नामधातुद्वारा निर्वोढव्यम् अथवा शिक्षयितुमित्येव पाठः ।

not a defect, in its hyperphysical character. It may be called an effect in as much as its manifestation is the manifestation of the sensing or relishing. And it may be called cognisable also, in-as-much as it is knowable by one's own unique cognition which is different from all empirical knowledge, analytic or dialectic, as well as from the knowledge of imperfect Yogis possessed of such knowledge, and lastly from the knowledge of perfect Yogis, existing independently of itself, free from any other cognisable object.

The cognition of *Rasa* is not an unqualified (or abstract) one *(knowledge devoid of all speciality of genus, property and the like) because the recognition and cognition* of the Excitant etc. are the predominating elements; nor is it a qualified one; because the sensed *Rasa* consisting in super-physical bliss is manifested by itself (without any intervening process as in the case of sense-perception.)

[*Page* 96.] The fact of its being neither the one nor the other, and yet partaking of the nature of both, shows as before its unique hyperphysical character, and is not a contradiction.

Tiger, &c. are excitants of the Heroic, the Marvellous and the Furious; as also of the Terrible; Tears are the ensuants of the Pathetic and the Terrible, as of the Erotic; Painful Reflection, &c. are accessories of the Heroic, the Pathetic, and the Terrible, as of the Erotic. Thus the excitants, &c. (ensuants and accessories not being severally restricted to each of the *Rasas* severally), are mentioned together in the above Sūtra (of Bharata). (*a*)

[*Page* 97]. In such instances as the following:—

"The sky is dark as the black bee, with clouds impregnated with water; the atmosphere has acquired loveliness through the warbling of the black bee and the cuckoo; the earth has in her lap, as it were, stone weapons in the shape of newly grown sprouts;

(*a*) A single excitant can belong to different *Rasas*, and as such no suggestiveness (of a particular *Rasa*) can be attributed to one only (*i. e.* excitant alone, not considering the ensuant &c.); because a single excitant can suggest more than one *Rasa*. This however is not possible if excitants and ensuants and accessories taken *collectively* are said to be the cause of the manifestation of *Rasa*. No two *Rasas* can have all the three (excitant, ensuant, and accessory) common between them.

(seeing these) be reconciled to your lover, O thou lovely young woman!;"

"Her body is withered and languid like the squeezed lotus-stalk; her (apparent) activity due only to the (pressing) expostulations of attendants; her cheek, lovely as a piece of fresh ivory, bears the beauty of the stainless moon;" [*Mālatīmādhava*, Act I.]

and

"Her lover having been in fault, the eyes of the self-respecting woman became an expert in giving expression to various emotions,—Anxiety when looking at her lover at a distance, turning away from him when he was at her side; blooming (with suppressed joy) on being freely spoken to; blushing (with modesty) on embrace; curving the brows slightly on the cloth being touched; brimming with tears, on the lover falling on her feet;—" [*Amarūçataka*]

in these though the excitants and ensuants—anxiety, modesty, &c.—in each stand by themselves; yet such cases are not very common; hence these do not form instances against the statement with regard to the collective suggestive form of excitant, ensuant and accessory; and the above cases can be explained by making the one mentioned (excitant or ensuant) to imply the other two.

He now states the specific forms of *Rasa*.—

The Eight Unctions enumerated.

29. The *Erotic*, the *Comic*, the *Pathetic*, the *Furious*, the *Heroic*, the *Terrific*, the *Abhorent or Disgustful*, and the *Marvellous*—thus are named the eight *Rasas* in dramatic poetry.

Divisions of the Erotic.

[*Page* 101]. Of these, the Erotic is of two kinds—Enjoyment (union) and Privation (separation). Of these again the former is counted only one, being undividable on account of the innumerability of mutual glances, embrace, kissing, &c.

(1) Erotic in Enjoyment.

[*Page* 102.] To exemplify the Erotic in Enjoyment.—

"Perceiving the house empty, gently rising from her couch and having for a long time gazed steadfastly on the face of her husband feigning sleep, the girl kissed him confidently,—on this, seeing his cheeks quiver, with her face downcast through modesty she was long kissed by her smiling lover." [*Amarūçataka.*]

And

"'O thou of beautiful eyes, you look lovlier without the bodice,' when the lover having said this had touched the knot (of the bodice), her companions, rejoiced at the liveliness of the eyes of their smiling companion seated on the couch, went away on various pretexts." [*Amarūçataka*]

(2) Of Privation.

[*Page* 105]. The other, Privation, is five-fold as founded on—Longing, Separation, Jealousy, Foreign Residence and Curse. To exemplify these severally—

Of Longing.

[*Page* 106]. "May those naturally sweet loving and affectionate gestures of the fair-eyed one, be mine (directed towards me)!—Gestures in which love has been intensified by our frequent interviews, on the slightest thought of which, my heart dissolves as it were, in a flood of joy; so much so that the action of my external organs is suspended." [*Mālatīmādhava*, Act V.]

Of Separation.

"There is no question of his going elsewhere,—he has got no such friends. Then (to think) that desires not (my company)? Yet, Ah! he has not come! Oh! what an irony of fate! being thus clouded with various doubts, the girl lies rolling about in her bed, and gets not sleep."

Here the girl is anxious in separation.

Of Jealousy.

"On the occasion of her husband's first fault,—not having as yet been instructed by her friends, the girl knows not how to make graceful and

poignant assertions and gestures; and consequently, with her eyes turned aside, she weeps with clear tear-drops flowing down the cheeks and rolling over her ruffled tresses." [*Amarūçataka.*]

Foreign Residence.

"The bangles have already started (from their place); the dear friends, the Tears have copiously gone away; Firmness and Equanimity stayed not for a moment; Reason prepared to start before all;—my beloved having determined to leave, all have started collectively; then O Life! if you have to go, why lose the company of your dear friends?" [*Amarūçataka.*]

Of Curse.

[*Page* 109]. "Having painted thee in a mood of affectionate anger, on a piece of stone with mineral paint, no sooner do I think of representing myself (therein) as falling on your feet, than my vision is blurred by the frequent rush of tears,—the cruel Death-God brooks not our union even there!" [*Mēghadūta*]

[*Page* 110]. The Comic and the rest are severally exemplified.—

The Comic.

"Having clenched her dirty hands, the prostitute hit, with great noise, accompanied by a peculiar sound (thū), on my head sanctified by being washed with water concecrated by incantations,—ah! I am killed!" Thus cries Vishnu Çarmā."

The Pathetic.

"'Oh mother! whereto hast thou hastened away? What means this! Oh Gods! Where be the blessings! Fie on our lives! Fire and thunder on your body! Eyes burnt!' these loud lamentations of the city women with their voice cracked, moves even the (inanimate) statues to weeping and shatters even the walls into a hundred pieces!"

The Furious.

"You beastly and dishonourable men, wielding weapons, by whom has been done, permitted or connived at, this evil deed, the death of the Preceptor! *this I* shall sacrifice to the Quarters with the fat and

flesh of you all including the foe of hell (Krishna), Bhīma and Arjuna." [*Vēṇīsaṅhāra*, Act III.]

"Poor monkeys! Give up your fears! My arrows having once shattered the forehead of Indra's elephant, are put to great shame by falling on your (puny) bodies! O Son of Sumitrā (Lakshmaṇa), thou keep thine place, thou art not the proper object of wrath! (being yet a child)! I, Meghanāda, am looking for Rāma, who by a mere contraction of his eye-brows, has obstructed the passage of the Ocean!" [*Hanumannāṭaka*, Act XI.]

The Heroic.

[*Page* 114]. 'Behold! The deer, owing to the great speed with which it is running, moves more in the sky than on the earth—the deer, casting with a lovely twist of the neck frequent glances at the pursuing chariot, having, through fear, of a shot of arrow, much of the hinder part swallowed up, as it were, by the fore-part; and scattering on the road, the half masticated morsels of grass falling from the mouth opened in panting." [*Çakuntalā*, Act I.]

The Terrible.

[*Page* 115]. 'Having first torn and stripped off the skin, then having devoured the swollen and horridly stinking lumps of flesh that were easily available from such parts of the body as, the shoulders buttocks and the back,—casting his eyes within (the skeleton), with his teeth displayed, the beggarly ghost is eating at his ease from the skeleton placed in his lap, what flesh remains upon the bones and is to be found at the joints!' [*Mālatīmādhava*, Act V.]

The Disgustful.

"What a peculiarly superb Incarnation, this! Whence this lustre! This altogether unprecedented gait of walking! Uncommon equanimity! what a grandeur! what a figure! Quite a novel creation this!"

The Marvellous.

[*Page* 116]. The permanent emotions of these (*Rasas*) are stated :

30. Love, Mirth, Sorrow, Anger, Courage, Fear Aversion, and Wonder are said to be the Permanent Emotions.

This is clear.

[*Page* 117]. He now states the Accessories :—

31—34 (*a*).

The Thirty-three Accessories enumerated.

(1) Self-disparagement, (2) Debility, (3) Apprehension, (4) Envy, (5) Intoxication, (6) Lassitude, (7) Indolence, (8) Depression, (9) Painful Reflection, (10) Distraction, (11) Recollection, (12) Equanimity, (13) Shame, (14) Unsteadiness, (15) Joy, (16) Flurry, (17) Stupefaction, (18) Arrogance, (19) Despondency, (20) Longing, (21) Drowsiness, (22) Dementedness, (23) Dreaming, (24) Awaking, (25) Resentment or Animosity, (26) Concealment (through modesty, etc. of a feeling), (27) Sternness, (28) Resolve, (29) Sickness, (30) Madness, (31) *Rigor mortis* (or moribundness), (32) Alarm, and (33) Doubt or Reasoning,—these are named the thirty-three Accessory Emotions.

The mention of Self-disparagement though improper in the beginning, on account of its inauspicious character, is yet made in order to show that though an accessory, it is also Permanent (Emotion) whence,—

The Ninth Rasa—the Quietistic.

35. The ninth *Rasa* is the Quietistic, founded on self-disparagement for its Permanent Emotion.

[*Page* 123]. As for Example—'My days pass somewhere in a sacred forest, in uttering Siva! Siva!—days during which I have an equal eye for, the serpent as for the necklace, for a flower-bed, as for a block of stone, for a jewel as for clay, for a strong enemy as for a friend, for women as for straw.' [*Bhartrihari-Vairāgyaçataka*]

(*a*) All these are severally defined and exemplified in the *Bālbodhini*.

Bhāva (Emotion) defined.

35-36. [*Page* 124] Love (*a*) *having* (*b*) *for its object the Gods*, etc., and also the suggested Accessory—are called, Emotion (Bhāva)

[*Page* 125]. By the term '&c.' are meant Sages, Preceptor King, Son, etc. The one having for its object a beloved woman when developed by means of excitant, etc. becomes the Erotic.

Example, (sentiment towards God): "O Lord! Even poison when located in your throat, is nectar to me! whereas even nectar though accepted by you, yet separated from your body, is not acceptable to me."

'Your visit to all embodied beings bears testimony to their capability in the three times—in-as-much as, it does away with present sins, is the cause of future good, and is acquired through previous good deeds.' [*Çiçupālavadha* I.]

Similarly others may be exemplified.

[*Page* 127]. To exemplify a Suggested Accessory,—

'My beloved one was seen by me to-day in a dream, having her face turned aside through anger, weeping and saying "Don't, don't touch me with your hand" and trying to get away; no sooner had I thought of embracing her and pacifying her with sweet and loving words, than O brother! was I robbed of sleep by deceitful Fate—(this I know.)"

Here Envy is pointed towards Fate.

The Semblance of Unction and Sentiment.

36. *(contd.)* [*Page* 128]. Their semblance (occurs) when they are improperly employed.

"Their semblance" *i. e.* the semblance of *Rasa* and that of Emotion.

(*a*) *Love* stands for all Permanent Emotions.

(*b*) This means 'as long as the Permanent Emotions have not developed into a perfect *Rasa*.'

[*Page* 129]. Of these, the semblance of *Rasa*,—

'O thou of beautiful eyes! which is the man whom I should adore, whose absence thou endurest not for a moment? Whom dost thou look for, who gave up his life in the sacrifice of battle? Who was born in an auspicious moment, whom, moon-faced one! dost thou embrace firmly? Whose glory of penance is this, of whom thou, O *Chateau* of Cupid! thinkest for a moment?

[*Page* 130]. Here the 'Adore' and the following terms expressing the manifoldness of her actions, suggests her longing for many lovers.

[*Page* 131]. The semblance of Emotion:

'She has a face like the full moon; eyes unsteady and large, and body elegant through graces in the form of waves, due to her sprouting youth. Under such circumstances what am I to do? How should I win her favour? What could be the means of her accepting me?

Here 'painful reflection' is (*a*) improperly employed. Others may be similarly exemplified.

The Allayment, Manifestation, Mixture and Variegation of Sentiments.

36 (*concld.*)—[*Page* 132]. To Emotion belongs **Allayment, Manifestation, Mixture and Variegation.**

Respective examples:—

(1) Of Allayment of Sentiment.

"Why are you concealing, under the pretence of falling on my feet, your breast bearing the marks of the embrace of her sandal painted breasts? After she had said this, I having said 'Where is it?' embraced her suddenly and firmly in order to wipe off the mark, and the tender one forgot all about it under the influence of the luxurious gusto of pleasure (ensuing from by embrace)." [*Amarūçataka*].

Here we have (the Allayment) of Anger.

(*a*) Because the proper course would be the expression of the woman's affection and that the man's following it, the dramatic dictum being "आदौ वाच्यः स्त्रिया रागः पश्चात् पुंसस्तदिंगितैः" ।

टी० न तदावृत्तिसाध्यं बन्धनिवर्त्तकसाक्षात्कारस्तु न वाक्यजन्यप्रत्ययावृत्त्या भवति ज्योतिष्टोमादिवाक्यार्थप्रत्ययावृत्तेस्तदर्थापरोक्षहेतुत्वाभावात्, एकश्चन्द्र इति वाक्यजन्यप्रत्ययावृत्त्या चन्द्रैकत्वापरोक्षाभावाच्च तिमिराद्यपगमे जायत इति चेत् तत्तु चक्षुषा जायते न तु चन्द्रैकत्वप्रत्ययावृत्तिमात्रात् तदनुगृहीतादेकश्चन्द्र इति वाक्याद्वा तिमिरादिस्थानीयदोषो भेदवासना चेत्तत्र वक्तव्यं सर्वं प्रागेवोक्तं निर्गुणब्रह्मणोवेद्यत्वाभावात् ब्रह्म वेदेत्यादिवाक्यानां क्लिष्टता तत्र कल्पनापोहेन सम्यङ् निश्चयोदयाय श्रवणाद्यावृत्तिर्विधेया तदनुष्ठाननान्तरीयकतया निर्गुणब्रह्मप्रत्ययावृत्तिरिति पक्षोऽप्ययुक्तः ध्रुवानस्मृतिविरोधात्, विजातीयप्रत्ययाव्यवहितप्रत्ययसन्तानं हि ध्रुवाऽनुस्मृतिः, भेदो मिथ्या निर्विशेषज्ञप्तिमात्रं सत्यमिति भावनाया विजातीयप्रत्ययसम्पर्क्कान्न ध्रुवानुस्मृतिसिद्धिः, समाधिविधिश्चानुपपन्नः समाधौ मनसः प्रलयोनाम बहिर्व्यापारानर्हत्वं न तु विनाशः, अनुपपन्नत्वाद् बन्धनिवर्त्तकं वाक्यार्थज्ञानं मनोविनाशरूपसमाधिजन्यं वा जनकं वा, न प्रथमः, मनसोनाशे वाक्यस्य ज्ञानजनकत्वयोगात्, शब्दो हि मनसा गृह्यमाण एवार्थज्ञानं जनयति, न द्वितीयः, वाक्यार्थज्ञानस्य कृत्स्नप्रपञ्चमिथ्यात्वविषयस्य देहे स्थिते मनोमात्रप्रलयहेतुत्वानुपपत्तेः पुनर्मन उत्पत्त्यनुपपत्तेश्च, न हि ज्ञाननिवृत्तस्य बन्धस्य पुनरुदयः पूर्वं ज्ञाननिवृत्तस्यापि रज्जुसर्पस्येव पश्चादुदयोपपत्तिरिति चेत् तर्हि बन्धस्यापि पुनरुदयप्रसङ्गः, दोषानिवृत्त्या रज्जुसर्पस्य पुनरुदयः सम्भवेत् तदभावात् बन्धस्य पुनरुदयाभाव इति चेत् मनोनिवर्त्तकस्यापि वाक्यार्थज्ञानस्य दोषनिवर्त्तकत्वात् पुनर्मनस उत्पत्तेरनुपपत्तिः क्रियाविशेषेण मनःप्रलयः न तु वाक्यार्थज्ञानेनेति चेन्न उत्पादकक्रियाविशेषाभावेन मनउत्पत्त्यनुपपत्तेः । किञ्च मनःप्रलयस्य वाक्यार्थज्ञानोत्पत्तिविरोधित्वान्मुमुक्षोः समाधिरकर्त्तव्यः स्यात्, मुक्तस्य सर्वज्ञत्वे प्राक्तनभयवदलाभानुसन्धानेनानन्तदुःखित्वमिति चेत् न स्वसंसरणस्य भगवल्लीलात्वानुसन्धानस्य सुखरूपत्वात् । ननु मुक्तस्यानन्दाधिक्ये सार्वज्ञ्यं हीयेत अतिशयितानन्दस्य मोहनत्वदर्शनादिति चेन्न तमोगुणसम्मिश्रणप्रयुक्तत्वान्मोह-

नत्वस्य, मनो हि गुणत्रयात्मकम्, इतरे त्रयोऽपि लिङ्गाच्चेति सूत्रमेवं व्याचक्षते रश्मिबहुत्वं पर्यावर्त्तयेदिति बहुपुत्रतायै रश्मिबहुत्वोपासनपरे वाक्ये आवृत्तिशब्देनोपासनानुवादश्चावृत्तौ लिङ्गमिति एकस्मिंश्च दिने सङ्कुचिन्तनेऽपि दिनभेदेनावृत्तिमात्रेणाप्यावृत्तिशब्दव्यपदेशोपपत्तेर्विरन्तरावृत्तौ लिङ्गत्वायोगात् तदनादर इति । अन्ये त्विमं विचारमहङ्ग्रहोपासनव्यतिरिक्तविषयमाहुः तस्य ध्यानफलसाक्षात्कारपर्यन्तत्वादावृत्तिसिद्धेरिति तदयुक्तं तस्य साक्षात्कारपर्यन्तत्वेऽन्येषामतत्पर्यन्तत्वे च नियामकाभावात्, द्रष्टव्यताश्रुतिर्हि सर्वोपासनस्य साधारणी । किञ्च अहमर्थमात्रसाक्षात्कारो नित्यसिद्ध इति हि नोपास्तिसाध्यता, ईश्वरतादात्म्यं घटस्य शरावत्ववदताात्त्विकमिति शाब्दप्रतीतिमात्रसिद्धस्य न साक्षात्कार उपपद्यते ॥ आवृत्त्यधिकरणं समाप्तम् ॥

आत्मत्वोपासनाधिकरणम् ।

सू० आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ३ ॥

भा० इदमिदानीं चिन्त्यते, किमुपास्यं ब्रह्मोपासितुरन्यत्वेनोपास्यम् ? उतोपासितुरात्मत्वेनेति ? किं युक्तम्, अन्यत्वेनेति, कुतः उपासितुः प्रत्यगात्मनोऽर्थान्तरत्वात् ब्रह्मणः, अर्थान्तरत्वं चा"धिकन्तु भेदनिर्देशात्" "अधिकोपदेशात्" "नेतरोऽनुपपत्ते"रित्यादिषूपपादितं, यथावस्थितञ्च ब्रह्मोपास्यम् अयथावस्थितोपासने हि ब्रह्मप्राप्तिरप्ययथाभूता स्यात् ।

टी० सू० आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ३ ॥ उक्तस्यासकृदावृत्तस्योपासनस्योपास्यं ब्रह्म किमुपासितुरन्यत् ? उत तस्यैवात्मेति ? शङ्कायां व्यतिकरोपदेशज्ञापनाय पूर्वप्रकृतवाक्यस्यात्मशब्दार्थो निरूप्यत इति सङ्गतिः, आत्मत्वेनेति आत्म-शब्दः स्ववाची आत्मत्वेन अहमर्थसामाधि-

करण्येन अन्यत्वेन वैयधिकरण्येनेत्यर्थः । अथवा आत्मशब्दः शरीरप्रतिसंबन्धिपरः आत्मत्वेन जीवं प्रति शरीरित्वेन, अन्यत्वेन शरीरशरीरिभावसंबन्धशून्यत्वेनेत्यर्थः । एवं सति ब्रह्मोपासनविधिः किं दृष्टिविधिः ? उत नेति ? फलफलिभावः, मुमुक्षोः किं ब्रह्मवैयधिकरण्येनोपास्यम् ? उत सामानाधिकरण्येन ? किमुपास्यं ब्रह्मोपासितुरन्यत्वेनोपास्यम् ? उतात्मत्वेन ? किमात्मत्वेनोपासने पृथगात्मानमिति विहितपृथक्त्वानुसन्धानविरोधः प्रसज्यते नेति ? प्रसज्यते चेदन्यत्वेनोपासनं न चेदात्मत्वेनोपासनमिति । ननु अंशो नानेत्यादिषु जीवपरयोः शरीरशरीरिभावे शरीरवाचिशब्दानां शरीरिपर्यन्ताभिधाने च सिद्धे यथावस्तूपासने च कर्तव्ये कथं संशयः उच्यते अहमर्थसामानाधिकरण्येन वैयधिकरण्येन च ब्रह्मोपासनानि विहितानि शाण्डिल्यविद्यादिषु समानाधिकरणोपासनेषु व्यधिकरणोपासनेष्वप्ययं विचारोऽनुपयुक्तः स्यात्, यत्र सामानाधिकरणोपासने दृष्टिविधित्वशङ्का सम्भवति येऽचं ब्रह्मोपासते ये प्राणं ब्रह्मोपासते विज्ञानं ब्रह्म चेद्वेदेत्यादिषु जीवे ब्रह्मदृष्टिविधिदर्शनादात्मेत्येवेति वाक्ये इति–करणदर्शनाच्च तस्य दृष्टिविधित्वशङ्काव्युदासार्थमारम्भणीयत्वमिति ।

सू० यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवतीति" न्यायात्, अतोऽन्यत्वेनोपास्यमित्येवं प्राप्तेऽभिधीयते "आत्मेति त्वि"ति, तु–शब्दोऽवधारणे उपासितुरात्मत्येवोपास्यम् उपासिता प्रत्यगात्मा स्वशरीरस्य स्वयं यथाऽऽत्मा तथा स्वात्मनोऽपि परं ब्रह्मात्मेत्येवोपासीतेत्यर्थः कुतः एवमभ्यु[१]पगच्छन्ति पूर्वे उपासितारः, त्वं वा अहमस्मि भगवो देवतेऽहं वै त्वमसी"ति उपासितुरर्थान्तरभूतं ब्रह्मोपासितारो हऽमिति कथमभ्युपगच्छन्तीत्यत्राह "आ-

१ एव ह्युपगच्छन्ति ।

दयन्ति चे"ति, इममर्थमविरुद्धमुपासितॄन् आदयन्ति शास्त्राणि तान्प्रत्युपपादयन्तीत्यर्थः, य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृत इति यथा सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः ऐतदात्म्यमिदं सर्वमिति सर्वं खल्विदं ब्रह्म तज्जलानिति च

टी० अयथाभूता स्यादिति, संसारित्वप्राप्तिः स्यादित्यर्थः राद्धान्तमाह "एवं प्राप्त" इति, सामानाधिकरण्यफलितमर्थमाह "स्वशरीरस्य स्वय"मिति उपगच्छन्ति गत्यर्था बुद्ध्यर्थाः उपासत इत्यर्थः । त्वं वा अहमस्मि अहंबुद्धिरहंशब्दश्च त्वत्पर्य्यवसायिनौ, अहं–शब्दयोगादुत्तमपुरुषः अहं वै त्वमसि अहंबुद्धिशब्दपर्य्यवसानभूमिस्त्वं–शब्दयोगान्मध्यमपुरुषः उभयस्मिन्वाक्ये अहं त्वं–शब्दप्रयोगे सत्यपि अहं–शब्दार्थतात्पर्य्यविवक्षयोत्तमपुरुषः त्वं–शब्दार्थतात्पर्य्येण मध्यमपुरुषः, अहंत्वं त्वमहमिति सामानाधिकरण्येनार्थेलब्धे किमर्थमस्म्यसीति पदप्रयोगः इति चेत् उच्यते अस्तिधातोस्सत्ता ह्यर्थः तेनेदं तादात्म्यं युक्तमिति दर्शितं भवतीति उपपादकशास्त्राणि दर्शयति "य आत्मनी"ति, सन्मूला इत्यादावपि सदायतनत्वतदनत्वाभ्यामात्मत्वसिद्धिः । सन्मूला इत्यादिवाक्योपेतस्य य आत्मनीत्यादिवाक्यस्यार्थमाह–

सू० सर्वस्य चिदचिद्वस्तुनः तज्जत्वात्तल्लत्वात्तदनत्वात्तन्नियाम्यत्वात्तच्छरीरत्वाच्च सर्वस्यायमात्मा, अतः स त आत्मा, अतो यथा प्रत्यगात्मनः स्वशरीरं प्रत्यात्मत्वाद्देवोऽहं मनुष्योऽहमित्यनुसन्धानं तथा प्रत्यगात्मनोऽप्यात्मत्वात्परमात्मनस्तस्याप्यहमित्येवानुसन्धानं युक्तमिति, एवं

शास्त्रैरुपपादितं सर्वबुद्धीनां ब्रह्मैकनिष्ठत्वेन सर्वशब्दानां ब्रह्मैकनिष्ठत्वमभ्युपगच्छन्तस्त्वं वा अहमस्मि भगवोदेवते अहं वै त्वमसि भगवोदेवते" इति व्यति[1]हारेणोक्तवन्तः, एवं चाथ योऽन्या देवतामुपास्तेऽन्योसावन्योऽहमस्मीति न सवेद अकृत्स्नो ह्येष आत्मेत्येवोपासीत सर्वं तम्परादाद्योऽन्यत्रात्मनः सर्वं वेदे[2]त्यन्यत्वानुसन्धाननिषेधः "पृथगात्मानं प्रेरितारं च मत्वे"ति पृथक्त्वानुसन्धानविधानं चाविरुद्धम्, अहमिति स्वात्मतयाऽनुसन्धानादन्यत्वानुसन्धाननिषेधो रचितः, स्वशरीरात् स्वात्मनोऽधिकत्वानुसन्धानवत्स्वात्मनोऽपि परमात्मनोऽधिकत्वानुसन्धानात्पृथक्त्वानुसन्धानविधानं च रचितम् ।

टी० "सर्वस्ये"ति, कार्य्यकारणभावः कार्य्यकारणभूतजगद्ब्रह्मसामानाधिकरण्योपयोगी, अत्र तु शुद्धस्वरूपजीवसामानाधिकरण्योपयोगी शरीरशरीरिभाव एव, नियाम्यत्वं हि शरीरलक्षणत्वेनोक्तं, युक्तमिति उपपादयन्तीत्यन्वयः, एवं चेत्यादिना एकत्वपृथक्त्वश्रुत्योरविरोधमाह तद्विविच्य दर्शयति "अह"मिति, गुणगुणिरूपार्थद्वयसद्भावाभिप्रायः भेदश्रुतयः । तत्र द्वयोःरपि स्वनिष्ठत्वं नास्तीत्यन्यतरस्य प्रकारिनिष्ठत्वात् गुणभूतवस्तुनः स्वनिष्ठत्वनिषेधपरा अभेदश्रुतय इति विभाग इत्यर्थः तदुपपादयति ।

सू० अधिकस्य ब्रह्मणः प्रत्यगात्मन आत्मत्वात्तस्य च ब्रह्मशरीरत्वान्निषेधवाक्येऽकृत्स्नोह्येष इत्युक्तम् अत उपासितुरात्मत्वेन ब्रह्मोपास्यमिति स्थितम् । आत्मत्वोपासनाधिकरणं समाप्तम् ॥

१ व्यतिकरेणोक्तवन्त इति पा० ।
२ सर्वं वेदेत्यात्मत्वाननुसंधाननिषेधः इति पा० ।

"अधिकस्ये"ति, अङ्गत्वः-अपूर्णः गुणमात्रपरत्वे च न पूर्तिः विशिष्ट एव पूर्णः, ईदृशापूर्त्तिवचनं गुणगुणिभेदे सत्येवोपपद्यते इत्यर्थः । एवं शरीरात्मभावगोचरस्यसमानाधिकरण्यस्याप्रामाणिकत्वानुपपन्नत्वयो रभावान्मोक्षफलश्रवणाच्च न दृष्टिविधित्वम् इत्युक्तम्भवति, अधिकरणार्थमुपसंहरति "अत"इति । परे तु जीवपरयोरैक्यं सिद्धान्तयन्ति, तत्र विरुद्धधर्मयोगादैक्यानुपपत्तिरीश्वरस्य जीवत्वे ईश्वराभावप्रसङ्गः जीवस्येश्वरत्वे शास्त्रस्याधिकारिविरहः, अहं दुःखीत्यादिप्रत्यक्षविरोधश्चेति परिचोद्येश्वराभावं तस्य प्रामाणिकत्वात् परिहरन्ति,तदयुक्तं प्रामाणिकपरित्यागप्रसङ्ग इति चोदिते प्रमाणिकत्वादिति परिहारायोगात्, न हि प्रसञ्जनीयविपर्ययप्रतिज्ञानेन प्रसञ्जकधर्मः परिह्रियते, सर्वतर्कोच्छेदप्रसङ्गात् प्रसञ्जकप्रसञ्जनीयव्याप्तेरभग्नत्वाच्च, तत्त्वावबोधात् प्रागधिकारिलाभ इत्यधिकारिविरहं परिहरन्ति तदप्ययुक्तम् ईश्वरस्य सर्वज्ञत्वाचिर्विशेषचिन्मात्रस्य ज्ञातृत्वाभावात्, ज्ञातुश्च स्वनाशस्यापुरुषार्थत्वेनशास्त्रप्रसि[1]द्धत्वेन च त्रयाणामप्यधिकारानुपपत्तेः, श्रवणात्पूर्वं स्वनाशानभिज्ञत्वाद्दस्युभूयिष्ठमार्गे मार्गानभिज्ञवदवतरतीति चेन्न अश्रुतेऽपि शास्त्रे सौगतानां सर्वक्षणिकत्ववत् मायावादिनः मुक्तेर्ज्ञातृनाशत्वस्य प्रसिद्धिप्राचुर्य्येण शास्त्रभीरुत्वाल्लोकस्य प्रत्यक्षादीनां संसार्यात्मविषयत्वादविरोध इति चायुक्तं नियमेन हेयानर्हतदर्हयोर्निंयमेन शङ्कानर्हतदर्हयोः शशमहिषयोरिवैक्यविरोधस्यावर्जनीयत्वात्, दुःखयोगस्य मिथ्यात्वात् अविरोध इति चायुक्तं मिथ्याभूतहेयानर्हदतर्हयोर्विरोधस्यावर्जनीयत्वात् महिषविषाणमपि त्वन्मते मिथ्या तथाहि शशमहिषयोः स्वरूपविरोधोऽभ्युगतः । ननु स्वाप्नशशमहिषयोः स्वप्नावस्थायामेव विरोधो न प्रबोधे विषाणस्य निवृत्तत्वात्, एवमविद्यानिवृत्तौ दुःखनिवृत्तेर्जीवपरयोर्न स्वभावविरोध इति चेत् । तर्हि स्वाप्नशशमहिषयोरिव जीवेश्वरयोरुभयोरपि विनाश एवाविरोधनिर्वाहकः स्यात् ततश्चेश्वरनित्यत्वश्रुतिविरोधः स्वभावविरोधश्चापरिहृतः, यावत्सत्ताकं विरोधस्यावस्थितत्वात्, यदि प्रबोधेऽपिपरस्य हेयानर्हत्वं तिष्ठत्येव

१ शास्त्रप्रद्वेषवत्त्वेनेति पा० ।

जीवस्य हेयार्हत्वमेव निवर्त्तेत इत्युच्येत तथाऽपि जायदनुभूतशशस्वाप्नमहिषयोरिव न तयोरैकत्वसम्भवः, सत्तया हेयानर्हं ईश्वरः, विनाशात्तदनर्हो जीव इति विद्यमानदशायां हेयार्हत्वतदनर्हत्वयोर्विनाशित्वाविनाशित्वयोश्च विरोधस्यावस्थितत्वात्, ईश्वरत्वं परमार्थश्चेन्निर्विशेषत्वहानिः न चेदीश्वराभावः ऐश्वर्य्यादिगुणाभावेऽपि स्वरूपमवतिष्ठत इति चेत् रजतत्वनिवृत्तावप्यधिष्ठानमवतिष्ठत इति शुक्तिरूप्येश्वरयोरवैषम्यमेव स्यात्, जीवेश्वरैकत्वविधीनां दृष्टिविधित्वं पूर्वपक्षे आशङ्क्य भेदनिषेधात्तदयुक्तमिति परिहृतं तदप्ययुक्तं दृष्ट्युपासननिष्ठस्य भेदानुसन्धाने प्रत्यवायपरतयाऽपि भेदनिषेधश्रुत्युपपत्तेर्भेदतात्त्विकत्वाबाधकत्वात्, न हि गरुडात्मनोर्भेददृष्टौ विषञ्च नश्यतीति गरुडनरेन्द्रैकत्वं तात्त्विकं स्यात् हेयानर्हत्वतदर्हत्वरूपस्वभावविरोधस्यावर्जनीयत्वादपरेषां पक्षोऽप्यनुपपन्नः, अन्येषान्तु गरुडोऽहमितिवदीश्वरोऽहमिति ज्ञानस्यातत्त्वविषयत्वात् अतत्त्वज्ञानान्मोक्षः स्यात् यथोपासनं फलमिति मुक्तावपि भ्रान्त्यनुगमः स्यात् यदि सदहमिति सदैक्योपास्तिर्विधीयते तदयुक्तम् आत्मसत्त्वस्य लोकसिद्धत्वात् सदैक्यानुसन्धानस्याविधेयत्वात् नियन्त्रंशेन भोक्त्रंशस्य सदाकारेणैकत्वमनुसन्धेयमिति चेत् घटेनापि तादृशैक्यं समानमिति जीवस्य परमात्मात्मकत्वं घटात्मकत्वतुल्यं स्यात् जगतो ब्रह्मणैकत्वं नाम जात्यैक्यं स्यात् ॥ आत्मत्वोपासनाधिकरणं समाप्तम् ॥

प्रतीकाधिकरणम् । **सू० न प्रतीके न हि सः ॥ ४ ॥**

भू० मनो ब्रह्मेत्युपासीत स यो नाम ब्रह्मेत्युपास्त इत्यादिप्रतीकोपासनेष्वप्यात्मत्वानुसन्धानं कार्य्यं? मुत नेति? चिन्तायां मनो ब्रह्मेत्युपासीतेति ब्रह्मोपासनत्वसाम्याद् ब्रह्मणश्चोपासितुरात्मत्वादात्मेत्येवोपासीतेत्येवं प्राप्तेऽभिधीयते न प्रतीक इति, प्रतीके नात्मत्वानुसन्धानं कार्य्यं, न हि सः न ह्युपासितुरात्मा प्रतीकः ।

टी० सू० न प्रतीके न हि सः ॥ ४ ॥ आत्मत्वेनोपासनमुक्तं तत्प्रतीकोपासनेऽस्ति नेतीति शङ्कया सङ्गतिः, किं मनो ब्रह्मेत्यादिप्रतीकोपासनेष्वात्मत्वेनानुसन्धानं कर्त्तव्य? मुत नेति तेषूपास्यं किमुपासितुरात्मा नेति किं ब्रह्मणः प्रतीकोद्दृष्टिविशेषणम्? उत प्रतीकस्य ब्रह्मदृष्टिविशेषणमिति? प्रतीकस्य दृष्टिविशेषणत्वे ब्रह्मण उपास्यत्वात्तस्य चात्मत्वात्तत्राप्यात्मत्वेनानुसन्धानं कार्यं स्यात्, ब्रह्मणः प्रतीके दृष्टिविशेषणत्वे प्रतीकस्यैवोपास्यत्वात्तस्य चोपासकं प्रत्यात्मत्वाभावात् आत्मधीर्न कार्या स्यात्, मन इत्यादिब्रह्मोपासनत्वसाम्यादिति ब्रह्मशब्दनिर्देशाद् ब्रह्मैवोपास्यमतोब्रह्मोपासनत्वसाम्यमित्यर्थः, एवं प्राप्त इति प्रतीकोपासनेऽप्युपास्यं ब्रह्म तच्चोपासितुरात्मा अतो ब्रह्मोपासनत्वसाम्यादात्मेत्युपास्यमित्यत्राह—

सू० प्रतीकोपासनेषु प्रतीक एवोपास्यः, न ब्रह्म, ब्रह्म तु तत्र दृष्टिविशेषणमात्रं, प्रतीकोपासनं हि नाम अब्रह्मणि ब्रह्मदृष्ट्याऽनुसन्धानं, तत्रोपास्यास्य प्रतीकस्योपासितुरात्मत्वाभावान्न तथाऽनुसन्धेयम्। नन्वत्रापि ब्रह्मैवोपास्यं ब्रह्मण उपास्यत्वसम्भवे मनआदीनामचेतनानामल्पशक्तीनां चोपास्यत्वाश्रयणस्यान्याय्यत्वात्, अतो मन आदिदृष्ट्या ब्रह्मैवोपास्यमिति तत्राह—

सू० ब्रह्मदृष्टिरुत्कर्षात् ॥ ५ ॥

मनआदिषु ब्रह्मदृष्टिरेव युक्ता, न ब्रह्मणि मनआदिदृष्टिः, ब्रह्मणो मनआदिभ्य उत्क र्षा त्, तेषाञ्च विपर्ययात्, उत्कृष्टे हि राजनि भृत्यदृष्टिः प्रत्यवायकरी, भृत्ये तु राजदृष्टिरभ्युदयाय। प्रतीकाधिकरणं समाप्तम् ॥

न्तत्वादन्तोदात्तः । शिलपेरच्चोपधायादिति शलल्यशब्दोन्तोदात्तः । 'षचश्चित्त्वादिति' । एतेन चित्स्वरस्यायमपवादः, प्राप्तविभाषेयमिति दर्शयति ॥

"परादिश्छन्दसि बहुलम्" ॥ 'परादिरिति'। 'परशब्देनात्र सक्थशब्द एव गृह्यतइति'। तस्यैव पूर्वसूत्रे सन्निहितत्वात्, यद्येवं परग्रहणमनर्थकं प्रकृतो हि सक्थशब्दो ऽनुवर्तिष्यते, नैतदस्ति, बहुव्रीहेरपि प्रकृतस्यानुवृत्तिः स्यात्, तस्याद्युदात्तत्वं शङ्क्येत, विभाषाग्रहणे प्रकृते बहुलग्रहणस्य प्रयोजनमन्यदपि यथा स्यादिति । 'ऋजुबाहुरिति'। बहुव्रीहिः। 'वाक्पत्तिश्चित्पतिरिति'। षष्ठीसमासौ । अत्र भाषाविषये पत्यावैश्वर्यइत्यस्य न भूवाक्चिद्दिधिष्विति प्रतिषेधे समासान्तोदात्तत्वं भवति । बहुलग्रहणसिद्धमर्थं श्लोकेन दर्शयति । 'परादिश्च परान्तश्चेति'। पूर्वपरशब्दाभ्यां पूर्वोत्तरपदयोर्ग्रहणं, यत एवं परादिप्रभृतिरुदात्तश्छन्दसि दृश्यते ततो हेतोर्बहुलं स्वरव्यत्यय उक्तः, स्वरव्यत्ययार्थं बहुलग्रहणं कृतमित्यर्थः ॥

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां षष्ठस्य द्वितीयः पादः ॥

"अलगुत्तरपदे" ॥ 'अलुगिति चेत्यादि'। प्रत्येकं स्वरितत्वप्रतिज्ञानं दर्शयति, अस्य प्रयोजनमेकस्य निवृत्तावपरस्य निवृत्तिर्माभूदिति । 'स्तोकान्मुक्त इति'। करणे च स्तोकाल्पकृच्छ्रेत्यादिना पञ्चमी, स्तोकान्तिकेत्यादिना समासः। 'उत्तरपदइति किमिति'। लुक्तावत्समासएव प्राप्तः प्रतिषिध्यतइति सामर्थ्यादुत्तरपदइत्येतल्लभ्यते, न लोपो नञ इत्यादौ च न समासइत्यतो हि समासग्रहणानुवृत्तेरुत्तरपदलाभावतरामित्यादौ नञो नलोपाद्यभावः सिद्ध इति प्रश्नः। 'निस्तोक इति'। अत्रोत्तरपदभूतेभ्योपि स्तोकादिभ्यः परस्याः पञ्चम्या अलुक्प्रसङ्गः, ननु च लक्षणप्रतिपदोक्तपरिभाषया स्तोकादिभ्यः प्रतिपदं या पञ्चमी विहिता यश्च तेषां प्रतिपदोक्तः समासस्तस्या एव तत्रैव वा लुक् भविष्यति तत्किमेतन्निवृत्त्यर्थेनोत्तरपदग्रहणेनेत्यत आह। 'अन्यार्थमित्यादि'। आन-

ङ्तौ द्वन्द्वे उत्तरपदे परतो यथा स्यादुत्तरपदस्य माभूद्धोतापोतारौ, अन्यथा परमपि सर्वनामस्थानापेक्षत्वेन बहिरङ्गमृतो ङि गुणं बाधित्वा द्वन्द्व-क्रियानन्तरप्राप्त आनङ् स्यात्, होतापोतृभ्यामित्यादौ च स्यादेव। तथा इको ह्रस्वोऽङ्यो गालवस्येति उत्तरपदे यथा स्यात् ग्रामणीरित्यादावुत्तरस्य पदस्य माभूदित्येवमाद्यर्थमुत्तरपदाधिकारोऽवश्यं कर्त्तव्यः स इहैव क्रियते समासानुवृत्तिर्लक्षणप्रतिपदोक्तपरिभाषा नाश्रयितव्या भवतीति, आ कुत इमावधिकारावित्यपेक्षायामाह। 'अलुगधिकार इत्यादि'। ऋकारान्तस्य ह्युत्तरपदेनन्तरे पितृपुत्र इत्यादौ आनङा भवितव्यं, यदि चात्रालुक् स्याद्विभक्त्या व्यवधानं स्यात्। यद्वा साक्षान्निर्दिष्टमानङादिकार्यं प्रकरण-प्राप्तस्यालुको निवर्त्तकमिति अलुगधिकारः प्रागानङः, तथाङ्गस्य विधी-यमानं कार्यं यत्राङ्गमित्येतद्भवति तत्रैव भवति, कस्मिंश्चैतद्भवति, प्रत्यये न तूत्तरपदइति सामर्थ्यादुत्तरपदाधिकारः प्रागङ्गाधिकारात्॥

"पञ्चम्याः स्तोकादिभ्यः"॥ स्तोकादीनां प्रातिपदिकगणे ऽपा-ठात्सूत्रपठितानां ग्रहणमित्याह। 'स्तोकान्तिकदूरार्थकृच्छ्राणि स्तोकादी-नीति'। करणे च स्तोकाल्पकृच्छ्रेत्यादीनि तु स्तोकादीनि न गृह्यन्ते ऽव्याप्तेः, स्तोकान्तिकेत्यत्रत्यानि भूयिष्ठानि अर्थग्रहणात्। 'अलुग्भवती-ति'। लुग्न भवतीत्यर्थः। 'सुपो लुकि प्राप्तइति'। सुपो धातुप्रातिपदि-कयोरित्यनेन। 'प्रतिषेधः क्रियतइति'। अलुगिति प्रसज्यप्रतिषेध इति दर्शयति, उत्तरपदाधिकारोपजीवनाय तु नाव्ययीभावादित्यस्या-नन्तरमिदं प्रकरणं नारब्धम्, एकवच्च, सर्वस्यालुक्प्रकरणस्य शेषभूतो ऽयमर्थातिदेशः, यस्या विभक्तेरलुग्विधीयते तदर्थो द्व्यात्मको बह्वात्म-कश्चैकवद्भवतीति वक्तव्यं, तेन स्तोकाभ्यां मुक्तः स्तोकेभ्यो मुक्त इत्य-पि विग्रहे स्तोकान्मुक्त इत्येव भवति, अन्यथा द्विवचनबहुवचनयोरप्य-लुकि सति स्तोकाभ्यां मुक्तः स्तोकेभ्यो मुक्त इत्यत्राप्यैकपद्यमैकस्वर्यं स्यात्। नैष दोषः। स्तोकादिभ्यः प्रतिपदं या पञ्चमी करणे च स्तोका-ल्पेति तस्या अलुक्, सा चासत्त्ववचनेभ्यो द्विबह्वर्थे संभवतीति स्तो-काभ्यां स्तोकेभ्य इत्यपादानएषा पञ्चमीत्येव न भविष्यति। एवमपि

दूराभ्यामागतौ दूरेभ्य आगत इत्यत्र प्रसंगः, अत्र हि दूरान्तिकार्थेभ्यो द्वितीया चेति प्रतिपदमेव पञ्चमी, तथा ऽन्तिकाभ्यां कृतमन्तिकेभ्यः कृतमित्यादावपि अलुक्प्रसंगः, तस्मादेकवच्चेति वक्तव्यम् । ननु वृत्तावुपसर्जनपदानि एकादिसङ्ख्यां विहायाभेदैकत्वसङ्ख्यां प्रतिपद्यन्ते, का पुनरियमभेदैकत्वसङ्ख्या, विशेषाणामविभागेनावस्थानं यथा मधुन्योषधिरसानां, नहि तत्रास्या ओषधेरयं रसो ऽस्या अयमिति विभागो दृश्यते, अथ च तत्र विशेषा अनुभूयन्ते न पुना रससामान्यं तद्वत्, अत्रापि राजपुरुष इति राजार्थो नैकत्वादिविशेषाः, उक्तं च

यथौषधिरसाः सर्वे मधुन्याहितशक्तयः ।
अविभागेन वर्त्तन्ते तां सङ्ख्यां तादृशीं विदुः ॥

इति । यद्वानुपात्तसङ्ख्याविशेषमेकत्वादिष्वनुगतं सामान्यमभेदैकत्वसङ्ख्या यथा संतमसे रूपमात्रं गृह्यते न पुनः शुक्ल इति वा कृष्ण इति वा, तद्वदत्रापीति सङ्ख्यावान् राजार्थो न चाव्ययार्थवन्निःसङ्ख्य इत्येतावत्प्रतीयते, उक्तं च ।

भेदानां वा परित्यागात्सङ्ख्यात्मा स तथाविधः ।
व्यापाराज्जातिभागस्य भेदापोहेन वर्त्तते ॥
अन्तर्हितविशेषेण यथा रूपेण रूपवान् ।
प्रख्यायते न शुक्लादि भेदो रूपस्य गम्यते ॥

इति, तदेवमभेदैकत्वसङ्ख्योपादानाद् द्विवचनबहुवचनान्तानां सर्वा वृत्तिर्न भवति किं पुनः समास एव, ततश्च समासाभावादलुङ्न भविष्यतीति किमेकवद्भावेन । उच्यते । किं पुनः कारणं वृत्तावभेदैकत्वसङ्ख्या प्रतीयते संङ्ख्याविशेषप्रतिपादकाभावात्, विभक्तिर्हि तस्य प्रतिपादिका, सा च वृत्तौ निवृत्ता, निवृत्तायां च तस्यां त्रिकः प्रातिपदिकार्थ इति पक्षे संख्यासामान्यस्यापि तावत्प्रतिपादकाभावः, यदि परं गुड इत्युक्ते माधुर्यादिवदव्यभिचारात्सङ्ख्या प्रतीयते, अव्यभिचारश्च सामान्यस्यानिय-

१ अगृहीतेति ४ पु॰ पा॰ । २ आख्यायतइति ४ पु॰ पा॰ ।
३ असमासादिति ४ पु॰ पा॰

तस्य वा विशेषस्येति, सैवाभेदैकत्वसङ्ख्या, पञ्चकपक्षेपि सङ्ख्याविशेषप्रतिपत्तौ द्योतकत्वेनापि तावद् विभक्त्या ऽपेक्ष्यतइति तदभावात्सामान्योऽनियतो वा विशेषः प्रतीयतइति सैवाभेदैकत्वसङ्ख्या, यत्र ह्यर्थप्रकरणादिकं विशेषावगतौ प्रमाणं भवति भवत्येव तत्र वृत्तिः, तद्यथा। अर्थात्, मुद्गैः क्रीतं मौद्गिकं नह्येकेन मुद्गेन क्रयः सम्भवति, कारकमध्यइति च, नह्येकस्य मध्यं सम्भवति, प्रकरणात्, भवद्भिरामवसरप्रदानायेति, आदेशात्, तावकीनो मामकीन इति शैषिकः, माससजातइत्यादौ तु प्रातिपदिकार्थस्यैवाक्तपरिमाणत्वात्, द्विपुत्र इत्यादौ तु सङ्ख्याशब्दसंनिधानात् तदेवं यत्र विशेषे प्रमाणाभावस्तत्राभेदैकत्वसङ्ख्या। यद्येवमत्रालुकि सति विभक्तिरेव प्रमाणमिति द्विवचनबहुवचनान्तानां समासः स्यादेव, यदा त्वर्थप्रकरणादिना विशेषावगतौ द्विवचनबहुवचनान्तानां वृत्तिर्भवति तदा का शङ्का विभक्तावेव सत्यां, यदि चाभेदैकत्वसंख्योपजननाद् द्विवचनबहुवचनयोरलुगभावः, एकवचनस्यापि न स्यात्. तस्यापि हि शुद्धमेकत्वं वाच्यं नाभेदैकत्वसङ्ख्या, अथ विभक्त्यभावे सङ्ख्यासामान्यस्य प्रतीतस्य विशेषपर्यवसानापेक्षायां यो हि बहून् कल्पयति कल्पयत्यसावेकमिति न्यायेन वृत्तावपि शुद्धमेकत्वं प्रतीयतइत्युच्येत अभेदैकत्वसङ्ख्येत्यनुपपन्नं स्यात्, तस्मादेकवचनान्तस्य द्विवचनान्तस्य बहुवचनान्तस्य वा यथेष्टं वृत्तिः, वृत्तौ चाभेदैकत्वसङ्ख्या, अर्थप्रकरणादिना विशेषावगतिरिति वाच्यमेवं च पूर्वोक्तेन न्यायेन द्विवचनबहुचनयोरलुक्प्रसङ्गादतिदेश आश्रयितव्यः, यद्येवं गोषुचरः अप्सुयोनिः अप्सव्य इति ये नित्यबहुवचनान्तास्तेषामप्यलुकि एकत्वातिदेशादेकवचनप्रसङ्गः, एवं तर्ह्यनभिधानमत्र हेतुः तदाह। 'द्विवचनबहुवचनान्तानां त्व[2]नभिधानादिति'। वाक्यमपि तर्हि न प्राप्नोति, न च वाच्यं समासे नास्त्यभिधानं वाक्ये पुनरस्तीति, नहि समाससञ्ज्ञा ऽर्थाभिधानउपयुज्यते, यत्पुनरुपयुज्यते प्रातिपदिकं विभक्तिश्च तत्सर्वमविकलमिति किमत्रानभिधानं

१ प्रातिपदिकस्यैवाक्तपरिमाणवाचित्वादिति ४ पु॰ पा॰।
२ मुद्रितमूलपुस्तके स्तोकादीनामित्यधिकम्।

करिष्यति, तत्राह। 'तेनात्रेत्यादि'। स्वरस्याप्यर्थाभिधानउपयोगात्, पृथक्स्वरयुक्तस्य वाक्यस्य प्रतिपादकत्वमेकस्वर्ययुक्तस्य समासस्याप्रतिपादकत्वं च युक्तमित्यर्थः। 'ब्राह्मणाच्छंसिन इत्यादि'। किं पुनरत्रोपसङ्ख्यायते, द्वितीयार्थे पञ्चमी, ब्राह्मणानि शंसति ब्राह्मणाच्छंसी, अलुक् तु तत्पुरुषे कृति बहुलमित्येव सिद्धः, ननु शस्त्राण्यसौ शंसति न ब्राह्मणानि, नैष दोषः, ब्राह्मणविहितेषु शस्त्रेषु ब्राह्मणशब्दो द्रष्टव्यः, अपर आह युक्त एवात्र पञ्चम्यर्थः, आहरणपूर्वके शंसने शंसतिर्वर्त्तते ब्राह्मणादाहृत्य सूक्तानि शंसतीति ब्राह्मणाच्छंसी, एवमपि होतृप्रभृतिष्वपि ब्राह्मणाच्छंसीति प्राप्नोति तत्राह। 'ऋत्विग्विशेषस्य रूढिरियमिति'। 'तस्या इति'। ब्राह्मणाच्छंसीत्यस्या रूढेरित्यर्थः। 'सतेति'। ब्राह्मणाच्छंसीत्यत्र पक्षे पञ्चम्यर्थो न सम्भवति पक्षान्तरे तु सम्भवति।

"ओजःसहोम्भस्तमसस्तृतीयायाः" ॥ उदाहरणेषु कर्तृकरणे कृता बहुलमिति समासः। इह कस्मान्न भवति सततनैशतमोवृतामिति। उच्यते। उत्तरपदेन पूर्वपदमाक्षिप्यते, तेनोपात्तमोजःप्रभृति विशेष्यते पूर्वपदभूतेभ्य ओजःप्रभृतिभ्य इति, न चात्र तमःशब्दः पूर्वपदं किं तर्हि सततनैशतमःशब्दः, यत्र तदन्तविधिरिष्यते तत्रोपात्तेनाक्षिप्तं पूर्वपदं विशेष्यते, तेन तस्य तदन्तस्य च भवति। 'इष्टकचितं पक्वेष्टकचितमिति'। क्वचित्तु यदेवोपात्तं तस्यैवोत्तरपदे ऽनन्तरे तत्कार्यं भवति न तूपात्तस्य तदन्तस्य वा पूर्वपदत्वमपेक्ष्यते, यथा ऽऽनङ् ऋतो द्वन्द्वे, होतृपोतृनेष्टोद्गातार इति, अत्र नेष्टृशब्दश्च न पूर्वपदं नापि तदन्तं पूर्वपदं किं तर्हि होतृशब्दः, न तस्योत्तरपदमनन्तरम्। अञ्जसा आर्जवेन, यस्य पुमानग्रजः स पुंसानुजः, [1]पुंसा हेतुना ऽनुज इति कृत्वा, जनुषान्धो जात्यन्धः, जनुर्जन्म।

---

१ अत्र मुद्रितमूलपुस्तके 'पुंसा हेतुनानुजः। जनुषान्धः। जनुषा हेतुना ऽन्धः, तृतीयेति योगविभागात्समासः। जनुरिति जन्मनो नामधेयम्' इत्युल्लिख्य तत्र टिप्पणे पुंसा हेतुनेत्यारभ्य नामधेयमित्यन्तो ऽपपाठः पदमञ्जर्यां सत्त्वादित्युक्तं, परं तूपलब्धपुस्तकेष्वयं पाठो नोपलभ्यते।

"आत्मनश्च पूरणे" ॥ वार्त्तिकमेवेदं सूत्ररूपेण पठितं, पूरणशब्दस्य स्वरितत्वात्तदधिकारविहितानां प्रत्ययानामत्र ग्रहणं न स्वरूपस्य ग्रहणमित्याह । 'पूरणप्रत्ययान्तइति' यद्यप्युत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविधिर्न भवतीति हृदयस्य हृल्लेखेत्यत्र ज्ञापयिष्यते तथाप्यात्मन्शब्दात्पूरणप्रत्ययस्यासम्भवात्सामर्थ्यादत्र तदन्तविधिः । 'आत्मना वा कृत इति' । वृत्तौ कृतार्थस्यान्तर्भावात्कर्त्तरि करणे वा तृतीया, तृतीया तत्कृतार्थेनेति समासः, यथा कुङ्कुमलोहितादाविव्यर्थः । 'आत्मा चतुर्थो यस्येति' । एकस्यापि वस्तुनो बुद्धिपरिकल्पितवि[1]भेदस्य वर्त्तिपदार्थत्वमन्यपदार्थत्वं चाविरुद्धम् ।

"वैयाकरणाख्यायां चतुर्थ्याः" ॥ 'वैयाकरणानामित्यादि' । यदि तु व्याकरणे भवा वैयाकरणी, ऋगयनादिभ्य इत्यण्, वैयाकरणी चासावाख्या चेति वैयाकरणाख्येत्येवं व्याख्यायेत, आत्मनेभाषः परस्मैभाष इत्यत्र न स्यात्, अनयोरष्टाध्याय्यामपठितत्वात्, तस्माद्यथोपदर्शितमेव व्याख्यातं, यद्येवं कुबेरबलिरित्यादौ लौकिकसञ्ज्ञाशब्दे प्रसङ्गः, वैयाकरणानामपि तेन व्यवहारात्, अत आह । 'ययेति' । विशेषणसामर्थ्यादवधारणमाश्रीयतइति भावः । यदा तु धातुसूत्रगणोणादिवाक्यात्मकं पञ्च स्थानं व्याकरणं तदा वैयाकरणी चासावाख्या चेत्यस्मिन् व्याख्याने ऽपि न दोषः । 'आत्मनेपदमिति' । अन्वर्थत्वमस्य समासविधौ दर्शितम् ।

"परस्य च" ॥ किमर्थमिदमुच्यते, अलुग् यथा स्यात् परस्मैपदं परस्मैभाषः, सिद्धो ऽत्रालुक् पूर्वेणैव, न सिद्ध्यति, आत्मन इति तत्र वर्त्तते, निवर्त्तिष्यते, यदि निवर्त्तेत तेभ्यो हितास्तद्धिता इत्यत्रापि प्राप्नोति, तस्मादात्मन इति तत्रानुवर्तते, तस्मिंश्चानुवर्त्तमाने परस्य चेति वक्तव्यम् ॥

"हलदन्तात्सप्तम्याः संज्ञायाम्" ॥ उदाहरणेषु संज्ञायामिति समासः । 'गविष्ठिर इत्यादि' । अन्यथान्तरङ्गानपि विधीन्बहिरङ्गो

१ विभागस्येति ४ पु॰ पा॰ ।

लुग्बाधतइत्यवादेशस्याकरणादहलदन्तत्वान्न स्यात्, यथा भूम्यां पाशो भूमिपाश इत्यत्रेति भावः । 'हृद्द्युभ्यामिति' । असंज्ञार्थमिदम् । 'हृदिस्पृक्, दिविस्पृगिति' । द्वितीयार्थे चैषा सप्तमी । तथाहि भाष्यम् । अन्यार्थे एषा सप्तमी द्रष्टव्या, हृदयं स्पृशतीति हृदिस्पृक्, दिवं स्पृशतीति दिविस्पृग् इति, आख्याग्रहणस्योपसमस्तत्वादिह संज्ञाग्रहणं, तत्रैव त्वसमस्तमाख्याग्रहणं कर्त्तव्यम् ॥

"कारनाम्नि च प्राचां हलादौ" ॥ वणिग्भिः पशुपालैः कर्षकैश्च कल्पितो राजग्राह्यो भागः करः, कर एव कारः, प्रज्ञादित्वादण् । 'नियमविकल्पा इति'। नियमविशेषा इत्यर्थः। तानेव दर्शयति। 'कारनाम्नश्चेत्यादि' । प्राचां देशे हलादौ यदि भवति कारनाम्न्येवेति प्रथमो नियमः, अप्राग्देशवर्तिनि तु त्वचिसारादावकारनाम्न्यपि भवत्येव, तथा कारनाम्नि हलादौ यदि भवति प्राचामेवेति द्वितीयः, प्राचां कारनाम्नि च यदि भवति हलादावेवेति तृतीयः, अवीनां समूहोऽविकटं, संघाते कटच्, कथं पुनरेकस्मिन्वाक्ये नियमत्रयं लभ्यते, कः पुनराह एकमिदं वाक्यमिति, अगृह्यमाणविशेषत्वेन प्रत्येकमेवकाराध्याहारात्त्रीण्येव वाक्यानि, संज्ञाग्रहणे प्रकृते ऽपि नामग्रहणं क्रियते नियमार्थत्वं विस्पष्टयितुम् । अन्यथा ऽसंज्ञायां विध्यर्थता ऽपि संभाव्येत, कथं पुनरसंज्ञायां सप्तमीसमासः, एतदेव ज्ञापकं स्यात् प्राचां कारे हलादिनोत्तरपदेनासंज्ञानामपि भवति समास इति। यस्मिन्विधिरित्येव सिद्धे आदिग्रहणं विस्पष्टार्थम् ॥

"अमूर्द्धमस्तकात् स्वाङ्गादकामे"॥ उदाहरणेषु प्रत्युदाहरणेषु च व्यधिकरणपदो बहुव्रीहिः । 'अक्षशौण्ड इति' । सप्तमी शौण्डैरिति तत्पुरुषः ॥

"बन्धे च विभाषा" ॥ स्वाङ्गादिति निवृत्तं, सामान्येनायं विधिः । बन्ध इति धातुरेवात्र सहाकारेणा ऽनुकृतः, नेन्सिद्धबध्नातिषु चेति धातावेव प्रतिषेध उक्तस्ततश्च बहुव्रिहिरेवास्य विकल्पस्य विषयस्तत्रापि हस्तबन्धादौ स्वाङ्गे प्राप्तविभाषा चक्रबन्धादावस्वाङ्गे

त्वप्राप्तविभाषेत्युभयत्र विभाषा संपद्यते, तत्पुरुषे तु नैवास्य प्रवृत्तिरितीमां शङ्कामपनयति । 'बन्धइति घञन्तो गृह्यतइति' । ततश्च तत्पुरुषेपि घञन्तस्य वृत्तिर्विरुद्धा, प्रतिषेधस्य बन्धनादौ चरितार्थत्वादिति भावः । 'उभयत्र विभाषेयमिति' । कथमित्याह । 'स्वाङ्गबहुव्रीहाविति' । 'तत्पुरुषे त्विति' । यद्यपि बहुव्रीहावेवास्वाङ्गादप्राप्तइति शक्यं वक्तुं तथाप्यस्य तत्पुरुषे प्रवृत्तिं दर्शयितुं तत्पुरुषे त्वित्युक्तं, तत्पुरुषे चास्य प्रवृत्तिः पूर्वविप्रतिषेधेन, अन्यथा बहुव्रीहिरस्यावकाशः, बध्नातिप्रतिषेधस्य च बन्धनादिरवकाशः, घञन्ते तु तत्पुरुषे उभयप्रसङ्गे परत्वात्प्रतिषेध एव स्यात् ॥

. "तत्पुरुषे कृति बहुलम्" ॥ अत्रापि कृदन्तस्य ग्रहणं न कृन्मात्रस्य, तत्र परतः सप्तम्या असम्भवात्, इह कस्माच भवति परमे कारके परमकारकइति । उच्यते । अन्तरङ्गा कृत्प्रतिपाद्यक्रियानिमित्ता सप्तमी, इह तु क्रियान्तरनिमित्ता परमे कारके निधेहीति, तेन बहिरङ्गत्वान् नास्या ग्रहणम् । 'कुरुचर इति' । हलदन्तादित्यधिकारमनाश्रित्यैतदुदाहृतं, विभाषाग्रहणे प्रकृते बहुलग्रहणं क्वचित् प्रकृत्यादीनामुपसंग्रहार्थं, तेन कर्णेजपादावलुगेव, मद्रचरादौ लुगेव, ब्राह्मणाच्छंस्यादौ असप्तम्या अप्यलुक्, एवं च सर्वमेवालुक्प्रकरणमस्यैव प्रपञ्चः ॥

"प्रावृट्शरत्कालदिवां जे" ॥ प्रावृट्शरदोः पृथग्ग्रहणात्कालेति स्वरूपग्रहणम् ॥

"घकालतनेषु कालनाम्नः" ॥ घेति तरप्तमपोर्ग्रहणं, कालेति स्वरूपग्रहणं, तनेति ट्युट्युलोरादेशस्य सतुट्कस्य ग्रहणम् । 'पूर्वाह्णेतनमिति' । सप्तम्यर्थप्रकर्षे प्रत्ययः, तस्याद्रव्यप्रकर्षत्वादलुक्पक्षे, किमेत्तिङव्ययघादित्यामुप्रत्ययः, लुक्पक्षे तु निमित्ताभावादद्रव्यप्रकर्षेप्यामभावः, तरबन्तात् सप्तमी, क्व चित्त्वलुक्पक्षेऽपि सप्तमी समुदायात्पठ्यते, तत्र प्रकृत्यर्थविवक्षया ऽद्रव्यप्रकर्षइति प्रतिषेधो व्याख्येयः । 'पूर्वाह्णेतन इति' । विभाषा पूर्वाह्णापराह्णाभ्यामिति ट्युट्युलौ, अनादेशस्तुट् च, कथं पुनर्घतनप्रत्ययमात्रे ऽलुक् उदाहृतो यावता प्रत्ययग्रहणपरिभाषया तद-

न्तउत्तरपदे ऽलुगुदाहर्त्तव्यो ऽत आह । 'उत्तरपदाधिकारइति' । कुत इत्याह । 'लेखग्रहणादिति' । यदयं हृदयस्य हृल्लेखयदणलासेष्वित्यण्ग्रहणे क्रियमाणे लेखग्रहणं करोति तज्ज्ञापयति नोत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविधिर्भवति, यदि स्याल्लेखग्रहणं न कुर्यात्, अणन्त इत्येव सिद्धत्वात् । ननु च घञर्थं लेखग्रहणं स्यात्, न वै घञन्तइष्यते । 'कालेति न स्वरूपग्रहणमिति' । नामग्रहणात् । क्वचिचञ् न पठ्यते, तत्र घकाले स्वरूपग्रहणमित्यर्थः ॥

"शयवासवासिष्वकालात्" ॥ अत्राकाल इत्यर्थग्रहणं व्याख्यानात् तदाह । 'अकालवाचिन इति' । 'खशय इति' । अधिकरणे शेतेरित्यच् । 'वास इति' । घञ् । ग्रामेवासीति' । सुप्यजातौ णिनिः । 'अपो योनीत्यादि' । शब्दप्रधानत्वादप इत्येकवचनं, योनि रुत्पत्तिः, अप्सु योनिर्यस्य सो ऽप्सुयोनिः । 'अप्सव्य इति' । ओर्गुणः, वान्तोयि प्रत्यये । 'अप्सुमन्ताविति' । सप्तम्यन्तान्मतुपो ऽसम्भवादप्स्वितिशब्दो ययोरस्ति तावप्सुमन्तौ कारीयामाज्यभागौ, तयोर्हि अप्स्वग्ने सधिष्टव, अप्सु मे सोमो अब्रवीत्, इत्यनुवाक्ययोरप्सुशब्दो ऽस्ति, यद्येवमनुकरणत्वादस्य वामीयादिवल्लुङ् भविष्यतीति किं मतुब्ग्रहणेन, अन्ये तु मतिशब्दं पठन्ति, उदाहरन्ति, अत्र सोमो वाप्सुमतिरिति, तत्तु भाष्ये न दृष्टम् ॥

"नेन्त्सिद्धबध्नातिषु च" ॥ तत्पुरुषे कृति बहुलमिति प्राप्तं प्रतिषिध्यते, सप्तम्याः परस्य केवलस्येनो ऽसम्भवादुत्तरपदाधिकारे ऽपि प्रत्ययग्रहणे तदन्तविधिरित्याह । 'इन्नन्तउत्तरपदइति' । 'स्थण्डिलवर्त्तीति' । व्रतइति णिनिः । उपपदसमासः । 'साङ्काश्यसिद्ध इति' । सिद्धशुष्कपक्वबन्धैश्चेति समासः । 'चारबद्ध इति' । बद्धशब्दो निष्ठान्तः, 'योगविभागात् समास इति' । बद्धशब्देन । 'तर्हीति' । बन्ध इत्येव शब्दरूपम्, अथ घञन्तः कस्माच भवति तत्राह । 'घञन्ते हीति' । अथ वा पचाघजन्ते घञन्ते च बन्धे च विभाषेत्ययं विकल्पः कस्माच भवतीत्यत आह । घञन्ते हीति ॥

त्वप्राप्तविभाषेत्युभयत्र विभाषा संपद्यते, तत्पुरुषे तु नैवास्य प्रवृत्तिरितीमां शङ्कामपनयति । 'बन्धइति घञन्तो गृह्यतइति' । ततश्च तत्पुरुषेपि घञन्तस्य वृत्तिर्विरुद्धा, प्रतिषेधस्य बन्धनादौ चरितार्थत्वादिति भावः । 'उभयत्र विभाषेयमिति' । कथमित्याह । 'स्वाङ्गबहुव्रीहाविति' । 'तत्पुरुषे त्विति' । यद्यपि बहुव्रीहावेवास्वाङ्गादप्राप्तइति शक्यं वक्तुं तथाप्यस्य तत्पुरुषे प्रवृत्तिं दर्शयितुं तत्पुरुषे त्वित्युक्तं, तत्पुरुषे चास्य प्रवृत्तिः पूर्वविप्रतिषेधेन, अन्यथा बहुव्रीहिरस्यावकाशः, बध्नातिप्रतिषेधस्य च बन्धनादिरवकाशः, घञन्ते तु तत्पुरुषे उभयप्रसङ्गे परत्वात्प्रतिषेध एव स्यात् ॥

"तत्पुरुषे कृति बहुलम्" ॥ अत्रापि कृदन्तस्य ग्रहणं न कृन्मात्रस्य, तत्र परतः सप्तम्या असम्भवात्, इह कस्माच्च भवति परमे कारके परमकारकइति । उच्यते । अन्तरङ्गा कृत्प्रतिपाद्यक्रियानिमित्ता सप्तमी, इह तु क्रियान्तरनिमित्ता परमे कारके निधेहीति, तेन बहिरङ्गत्वान्नास्या ग्रहणम् । 'कुरुचर इति' । हलदन्तादित्यधिकारमनाश्रित्यैतदुदाहृतं, विभाषाग्रहणे प्रकृते बहुलग्रहणं क्वचित् प्रकृत्यादीनामुपसंग्रहार्थं, तेन कर्णेजपादावलुगेव, मद्रचरादौ लुगेव, ब्राह्मणाच्छंस्यादौ असप्तम्या अप्यलुक्, एवं च सर्वमेवालुक्प्रकरणमस्यैव प्रपञ्चः ॥

"प्रावृट्शरत्कालदिवां जे" ॥ प्रावृट्शरदोः पृथग्ग्रहणात्कालेति स्वरूपग्रहणम् ॥

"घकालतनेषु कालनाम्नः" ॥ घेति तरप्तमपोर्ग्रहणं, कालेति स्वरूपग्रहणं, तनेति ट्युट्युलोरादेशस्य सतुट्कस्य ग्रहणम् । 'पूर्वाह्णेतनमिति' । सप्तम्यर्थप्रकर्षे प्रत्ययः, तस्याद्रव्यप्रकर्षत्वादलुक्पक्षे, किमेत्तिङव्ययघादित्यामुप्रत्ययः, लुक्पक्षे तु निमित्ताभावाद्द्रव्यप्रकर्षेप्यामभावः, तरबन्तात् सप्तमी, क्व चित्त्वलुक्पक्षेऽपि सप्तमी समुदायात्पठ्यते, तत्र प्रकृत्यर्थविवक्षया ऽद्रव्यप्रकर्षइति प्रतिषेधो व्याख्येयः । 'पूर्वाह्णेतन इति' । विभाषा पूर्वाह्णापराह्णाभ्यामिति ट्युट्युलौ, अनादेशस्तुट् च, कथं पुनर्घतनप्रत्ययमात्रे ऽलुक् उदाहृतो यावता प्रत्ययग्रहणपरिभाषया तद-

न्तउत्तरपदे ऽलुगुदाहर्त्तव्यो ऽत आह । 'उत्तरपदाधिकारइति' । कुत इत्याह । 'लेखग्रहणादिति' । यदयं हृदयस्य हृल्लेखयदणलासेष्वित्यणग्रहणे क्रियमाणे लेखग्रहणं करोति तज्ज्ञापयति नोत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविधिर्भवति, यदि स्याल्लेखग्रहणं न कुर्यात्, अणन्तइत्येव सिद्धत्वात् । ननु च घञर्थं लेखग्रहणं स्यात्, न वै घञन्तइष्यते । 'कालेति न स्वरूपग्रहणमिति' । नामग्रहणात् । क्वचिचञ् न पठ्यते, तत्र घकाले स्वरूपग्रहणमित्यर्थः ॥

"शयवासवासिष्वकालात्" ॥ अत्राकाल इत्यर्थग्रहणं व्याख्यानात् तदाह । 'अकालवाचिन इति' । 'खशय इति' । अधिकरणे शेतेरित्यच् । 'वास इति' । घञ् । ग्रामेवासीति' । सुप्यजातौ णिनिः । 'अपो योनीत्यादि' । शब्दप्रधानत्वादप इत्येकवचनं, योनि रुत्पत्तिः, अप्सु योनिर्यस्य सो ऽप्सयोनिः । 'अप्सव्य इति' । ओर्गुणः, वान्तोयि प्रत्यये । 'अप्सुमन्ताविति' । सप्तम्यन्तान्मतुपो ऽसम्भवादप्स्विविति शब्दो ययोरस्ति तावप्सुमन्तौ कारीर्यामाज्यभागौ, तयोर्हि अप्स्वग्ने सधिष्टव, अप्सु मे सोमो अब्रवीत्, इत्यनुवाक्ययोरप्सुशब्दो ऽस्ति, यद्येवमनुकरणत्वादस्य वासीयादिवल्लुङ् भविष्यतीति किं मतुब्ग्रहणेन, अन्ये तु मतिशब्दं पठन्ति, उदाहरन्ति, अत्र सोमो वाप्सुमतिरिति, तत्तु भाष्ये न दृष्टम् ॥

"नेन्त्सिद्धबध्नातिषु च" ॥ तत्पुरुषे कृति बहुलमिति प्राप्तं प्रतिषिध्यते, सप्तम्याः परस्य केवलस्येनो ऽसम्भवादुत्तरपदाधिकारे ऽपि प्रत्ययग्रहणे तदन्तविधिरित्याह । 'इचन्तउत्तरपदइति' । 'स्थण्डिलवर्त्तीति' । व्रतइति णिनिः । उपपदसमासः । 'साङ्काश्यसिद्ध इति' । सिद्धशुष्कपक्वबन्धैश्चेति समासः । 'चारबद्ध इति' । बद्धशब्दो निष्ठान्तः, 'योगविभागात् समास इति' । बद्धशब्देन । 'तर्दिति' । बन्ध इत्येव शब्दरूपम्, अथ घञन्तः कस्मान्न भवति तत्राह । 'घञन्ते हीति' । अथ वा पचाद्यजन्ते घञन्ते च बन्धे च विभाषेत्ययं विकल्पः कस्मान्न भवतीत्यत आह । घञन्ते हीति ॥

"स्ये च भाषायाम्" ॥ 'आखरेष्ठ इति'। स्थः क चेति कः ॥

"षष्ठ्या आक्रोशे" ॥ 'पश्यतोहर इति'। षष्ठी चानादर इति षष्ठी, पश्यन्तमनादृत्य हरतीत्यर्थः। 'शुनःशेप इति'। अकारान्तोऽप्यस्ति शेपशब्दः न केवलं सकारान्तः, शुन इव शेपमस्येति बहुव्रीहिः एवं पुच्छलाङ्गूलाभ्यामपि बहुव्रीहिः, ऋषिविशेषाणामेताः संज्ञाः ॥

"ऋतो विद्यायोनिसम्बन्धेभ्यः" ॥ विद्या च योनिश्च विद्यायोनी, अभ्यर्हितत्वाद्विद्यायाः पूर्वनिपातः, तत्कृतः सम्बन्धो येषां ते विद्यायोनिसम्बन्धाः, कृतशब्दो गम्यमानत्वान्न प्रयुज्यते। 'पितुःपुत्र इति'। प्रख्यातात्पितुरुत्पन्न इत्यर्थः। 'विद्यायोनिसम्बन्धेभ्यः पूर्वोत्तरपदग्रहणमिति'। सूत्रे पञ्चमीनिर्देशात्पूर्वपदानामेव विद्यायोनिसम्बन्धवाचित्वं लभ्यते नोत्तरपदानाम्, अथ सप्तमीनिर्देशः क्रियते उत्तरपदानामेव लभ्यते न पूर्वपदानां, तस्मादुभयेषामपि तद्वाचित्वेऽयं विधिरिति वक्तव्यमित्यर्थः। अन्यनिवृत्तिपरत्वाच्चास्य तेषां परस्परव्यतिकरे ऽपि भवति, होतुःपुत्रः, पितुरन्तेवासीति ॥

"आनङ् ऋतो द्वन्द्वे" ॥ अत्र यद्यृकारस्य द्वन्द्वे आनङ् भवतीत्येवं विज्ञायेत पितृपितामहादप्यानङ् स्यात्, ऋत इत्येतच्चानर्थकं प्रकृतत्वात्तस्माद् द्वन्द्वविशेषणमृत इति। जातौ चेदमेकवचनमिति मन्यमान आह। 'ऋकारान्तानामित्यादि'। इह कार्यार्थः श्रवणार्थो वा वर्णानामुपदेशः, नकारश्चायं न क्वचिच्छ्रूयते सर्वत्र न लोपः प्रातिपदिकान्तस्येति नलोपेन भवितव्यं, कार्यमपि चास्य न किं चिदुपदिश्यते तस्मात्तदर्थं एतेनेत्यत आह। 'नकारोच्चारणमित्यादि'। असति नकारे उः स्थाने ऽणेव शिष्यते इति उरण् रपर इति रपरत्वं स्यात्, तस्मिंश्च नायमणेव शिष्यते किं तर्ह्यण् चान्यच्चेति नास्ति रपरत्वप्रसङ्गः, तस्माद्रपरत्वनिवृत्त्यर्थं नकारोच्चारणं, ङकारो ङिच्चेत्यन्त्यादेशार्थः, यत्र च निर्दिश्यमानं कार्यिणो विशेषणं तत्र निर्दिश्यमानस्यादेशा भवन्तीत्येतद्भवति, नात्र ऋत इति कार्यिणो विशेषणं, किं तर्हि

द्वन्द्वस्य विशेषणम् । 'पुत्रइत्यत्रा[१]नुवर्त्ततइति' । पुत्रेऽन्यतरस्यामित्यतः । यद्यत्र पुत्रइति वर्त्तते विभाषा स्वसृपत्योरित्यत्राप्यनुवर्त्तेत, ततश्च भ्रातुष्पुत्र इत्यादावनाक्रोशेऽपि विकल्पप्रसङ्गः, एवं तर्हि व्याख्यानादत्रैव सम्बध्यते, अत एव ह्यत्रेत्युक्तम्, एवमपि पुत्र उत्तरपदे पूर्वपदमात्रस्यानङ् प्राप्नोति कार्यिणोऽनिर्देशात्, ऋत इति श्रुतस्य द्वन्द्वविशेषणत्वादत आह । 'ऋत इति चेति' । अनुवर्त्ततइत्यनुषङ्गः, ऋतो विद्यायोनीत्यत ऋत इत्यनुवर्त्तते तत्कार्यिणं विशेषयिष्यतीत्यर्थः, यद्यपि तत् पञ्चम्यन्तं तथापि तदिह व्याख्यानात्षष्ठ्यन्तं विपरिणम्यते ॥

"देवताद्वन्द्वे च" ॥ अनृकारान्तार्थमविद्यायोनिसम्बन्धार्थं वचनम् । 'द्वन्द्वइति वर्त्तमानइत्यादि' । प्रकृतं द्वन्द्वग्रहणं समासविशेषप्रतिपत्त्यर्थमिदं तु प्रसिद्धं साहचर्यं यस्य युगलस्य तत्परिग्रहार्थं, कथं पुनर्न परिग्रह इत्यत आह । 'अत्यन्तसहचरित इत्यादि' । द्वन्द्वं रहस्येत्यत्राभिव्यक्तिग्रहणेनात्यन्तसहचरितयुगले द्वन्द्व इति निपात्यते, तस्यात्र ग्रहणं देवतापदेन, समस्तञ्चेदमप्रकृतस्य द्वन्द्वस्यार्थद्वारकं विशेषणमत्यन्तसहचरितयुगलाभिधायिनि द्वन्द्वइति यावत्, साहचर्यमेव विशिनष्टि । 'तत्रेति' । सहवापः, सहनिर्वापः । अग्नीषोमाभ्यां जुष्टं निर्वपामीत्यादि । 'उभयत्रेति' । पूर्वपदत्वेनोत्तरपदत्वेनेत्यर्थः ॥

"इद्वृद्धौ" ॥ अत्र वृद्धिमदुत्तरपदं वृद्धिशब्देनोच्यते, वृद्ध्यात्मकस्योत्तरपदस्यासम्भवात्, अग्नीवरुणौ देवते अस्य, अग्नामरुतौ देवते अस्येति विग्रहः, पूर्वत्रेत्वमुत्तरत्रानङ् । 'द्व्यधिष्ठानं देवतात्वमिति' । देवतेत्येकवचनम् । 'आनङमीत्वं च बाधितुमिति' । वरुणे हीत्वस्य प्रसङ्गः, अन्यत्रानङः, यद्यपि प्राग् वृद्धेर्विग्रहवाक्यएवानङीत्वयोः प्रसङ्गस्तथाप्यपवादविषयत्वात्प्रक्रियावाक्ये न क्रियेते, लौकिके तु वाक्ये भवत एव, इद्वृद्धौ विष्णोः प्रतिषेधः, आग्नावैष्णवमेकादशकपालं निर्वपेत् ।

"दिवसश्च पृथिव्याम्" ॥ दिवस इति प्रथमान्त, मकारोच्चारणं किमर्थं, यावता प्रयोजनाभावात्सकारस्येत्सञ्ज्ञा न भविष्यति तत्राह ।

१ मुद्रितमूलपुस्तके पुत्रइत्यनुवर्ततइति पाठस्स पदमञ्जर्यसंमतः ।

'अकारोच्चारणमिति'। असति तस्मिन् पृथिवीशब्दे परतः सकारस्य रुत्वं विसर्जनीयः कुप्वोः ᳲक ᳲपौ चेत्येते विकाराः प्राप्नुवन्ति, अकारे सति सकारस्योच्चारणं भवति, तेन प्रयोगे ऽस्याविकृतस्यैव ग्रहणं भवति। 'कथमित्यादि'। द्वन्द्वइत्यनुवृत्तेर्वाक्ये नैव प्राप्नोत्तीति प्रश्नः। 'कर्त्तव्यो ऽत्र प्रयत्न इति'। छान्दसो ऽयं प्रयोगः। दृष्टानुविधिश्छन्दसीत्येषो ऽत्र यत्नः।

"उषासोषसः"॥ 'उषासानक्तेति'। छान्दसो ऽयं प्रयोगः। उषाश्च नक्तं चेति द्वन्द्वः, प्रथमाद्विवचनस्य डादेशः, अत्र पदकाले पदकाराः उषसानक्तेति ह्रस्वमधीयते॥

"स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु"॥ अत्र त्रयः पक्षाः सम्भवन्ति, स्त्रिया इति स्त्रीप्रत्ययग्रहणम्, अर्थग्रहणं, शब्दग्रहणं चेति, तत्र यदि स्त्रीग्रहणं स्वर्यते स्वरितेनाधिकारावगतिर्भवतीति स्त्र्यधिकारविहिताष्टाबादयो गृह्यन्ते, यथा गोस्त्रियोरुपसर्जनस्येत्यत्र, तदा चायमर्थो भवति, भाषितपुंस्कात्परे टाबादिस्त्रीप्रत्यया यथा पुंसि न भवन्ति तथा उत्तरपदे न भवन्तीति. नन्वश्रुतक्रियापदेषु वाक्येषु भवतीत्यध्याहारो ऽन्यत्र दृष्टः, उच्यते। वतिनिर्द्देशेषूपमाने सत्ता ऽसत्ता वा या प्रसिद्धा सोपमेये ऽतिदेश्या यथोशीनरवन्मद्रेषु यवाः सन्ति, न सन्तीति, ततः पुंसि स्त्रीप्रत्ययस्याभावात्स्त्रियामप्यभावोतिदिश्यतइति न भविष्यतीत्येव वाक्यशेषः परिकल्पनीयस्तदा त्वनूङित्यनेन सामानाधिकरण्यात्स्त्रिया इति प्रथमार्थे षष्ठी, पुंवदिति सप्तमीसमर्थाद्वतिः, तत्र च प्रागेव समासाद्विग्रहवाक्यएव स्त्रीप्रत्ययस्य कृतत्वात्र तस्योत्तरपदे परतो न क्रोडादिबह्वच इतिवत् प्रागभावः शक्यः प्रतिपादयितुमिति लुक् तद्धितलुकीत्यादिवत्कृतस्य निवृत्तिरेव प्रतिपाद्या, विग्रहवाक्यएव कृताः स्त्रीप्रत्यया उत्तरपदे परतो निवर्तन्ते लुप्यन्तइत्यर्थः। यदा तु पुंवत् स्त्रीत्वयुक्तं द्रव्यं स्त्रीशब्देनोच्यते तदार्थग्रहणं भवति स्त्रियाः स्त्र्यर्थस्य पुंस इव पुमर्थस्येव कार्यं भवतीत्यर्थः, तदा च षष्ठीसमर्थाद्वतिः। यदा तु

स्त्र्यर्थवाची शब्दः स्त्रीशब्देनोच्यते तदा शब्दग्रहणं, स्त्रीयाः स्त्रीलिङ्गस्य शब्दस्य पुंवद् रूपं भवतीति रूपातिदेशः, वृत्तिविषये पुंशब्दसम्बन्धिनः कार्यस्यातिदेष्टव्यस्याभावात्, तत्र च प्रत्यासत्तेः पुंभावभाजः स्त्रीशब्दस्य प्रयोगान्तरे पुमांसमाचक्षाणस्य यद्रूपं तदेवातिदिश्यते न यस्य कस्य चित्, अनूङिति षष्ठ्यर्थे प्रथमा, तत्रार्थग्रहणे स्त्रीशब्दो मुख्यः, अर्थस्य तूत्तरपदेन पौर्वापर्यमनूङस्त्वं च स्वतोनुपपन्नमिति शब्दद्वारकमाश्रयणीयम्, इतरयोस्तु पक्षयोः स्त्रीशब्दो गौणः, पौर्वापर्यादिकं तु समञ्जसमिति न प्रमाणतः पक्षविशेषपरिग्रहः सम्भवतीति निर्दोषतः पक्षः परिग्राह्यः, तत्राद्ये पक्षे एतभार्य इत्येतशब्दाद्वर्णादनुदात्तादिति ङीपि तकारस्य च नकारे एकदेशविकृतस्यानन्यत्वादेतशब्दाद्भाषितपुंस्कात्पर ईकार इति तन्निवृत्तावप्यर्थस्य स्त्रीत्वमनिवृत्तमिति नकारः श्रूयेत, न च सन्नियोगशिष्टत्वादीकारनिवृत्तौ नकारस्य निवृत्तिः, उत्तरपदनिमित्तायाः स्त्रीप्रत्ययनिवृत्तेर्नकारनिवृत्त्याख्ये पूर्वविधौ स्थानिवद्भावे सत्यन्यतराभावस्यासिद्धेः, न च नकारस्यापि अधिकारविहितत्वादीकारवत्पुंवद्भावेनैव निवृत्तिः, तस्य भाषितपुंस्कात्परत्वाभावात्, अप्रत्ययत्वेनोङ्सादृश्याभावाच्च, तथा पट्वी भार्यास्य पटुभार्य इति निवृत्तस्यापि स्त्रीप्रत्ययस्य स्थानिवद्भावाद्यणादेशः स्यात्, अथ तूत्तरपदे परतोऽनूङ् स्त्रीप्रत्ययो भाषितपुंस्काच्च भवतीति न क्रोडादिबह्वच इतिवत् प्रागभाव एवात्र विधेयः, तत्सामर्थ्याच्च विग्रहवाक्यएव प्राप्तोन्तरङ्गोपि स्त्रीप्रत्ययो न क्रियते इत्युच्येत तदैतद्दोषाभावेपि लुगलुगस्त्रीविषयद्विस्त्रीप्रत्ययेषु दोषः । लुक्, वतण्डस्यापत्यं स्त्री वतण्डाच्च लुक् स्त्रियां, शार्ङ्गरवादिपाठान्ङीन्, वतण्डी चासौ वृन्दारिका च वातण्ड्यवृन्दारिकेति पुंवत् कर्मधारयेति ईकारस्य निवृत्तावपि अर्थगतस्य स्त्रीत्वस्यानिवृत्तत्वाल्लुक् स्त्रियामिति यञो लुक् प्राप्नोति । स्यादेतत् । स्त्री ई स्त्रीति ईकारप्रश्लेषेण स्त्रियां य ईकारस्तत्र परतो लोपः, अत्र तु पुंवद्भावेनेकारस्यानुत्पन्नत्वाल्लुङ् न भविष्यतीति, तन्न, इतरेतराश्रयप्रसङ्गात्, कथं, शार्ङ्गरवादिषु वतण्डशब्दः कृतयञ्लुक् पठ्यते,

ततश्चाकृते लुकि ईकारो नास्ति, अकृते चेकारे लुको ऽप्रसङ्गः । अलुक्, गर्गस्यापत्यं स्त्रियः, गर्गादिभ्यो यञ्, यञश्चेति ङीप्, गार्ग्यः स्त्रियः, गार्ग्यश्च ता वृन्दारिकाश्च गर्गवृन्दारिका इति ङीपि निवृत्ते ऽपि स्त्रीत्वस्यानिवृत्तत्वाद्यञञोश्च स्त्रियामिति लुङ् प्राप्नोति, वाक्यवदलुगेव स्यात्, अस्त्रीविषयः, कुञ्जस्यापत्यं स्त्री गोत्रे कुञ्जादिभ्यश्च्फञ्, गोत्रं चरणैः सहेति जातित्वात् ङीष्, कौञ्जायनी चासौ वृन्दारिका च कौञ्जायनवृन्दारिका, ङीषि निवृत्तेपि स्त्रीत्वस्यानिवृत्तेव्रातच्फञोरस्त्रियामित्यस्त्रीविषयो न स्यात्, द्विस्त्रीप्रत्ययः, गर्गस्यापत्यं स्त्री गर्गादिभ्यो यञ्, प्राचां ष्फ तद्धितः, षिद्गौरादिभ्यश्चेति ङीष्, गार्ग्यायणी चासौ वृन्दारिका च गार्ग्यवृन्दारिकेत्यादौ यत्र द्वौ स्त्रीप्रत्ययौ तत्र यो भाषितपुंस्कात्परः ष्फो नासावुत्तरपदे, ङीषा व्यवधानात् यश्चोत्तरपदे ङीष् नासौ भाषितपुंस्कात्परः, ष्फेण व्यवधानात्, तस्य च स्त्रियामेव विहितत्वात् इति पुंवद्भाव एव न स्यात्, तथा इडविडोपत्यं स्त्री जनपदशब्दात्क्षत्रियादञ्, दरदोपत्यं स्त्री द्व्यञ्मगधेत्यण्, तयोरतश्चेति लुक्, इडविड्दरत्स चासौ वृन्दारिका च ऐडविडवृन्दारिकात्र पुंवद्भावो न स्यात् अधिकारविहितस्य कस्यचित्प्रत्ययस्याभावात्, द्वितीये तु पक्षे ऽर्थस्य पुमर्थत्वेऽतिदिष्टे तद्वाची शब्दः प्रवर्त्तत इति नैते दोषाः किं तु खित्यनव्ययस्येति ह्रस्वत्वस्यास्य पुंवद्भावस्य विप्रतिषेधो नोपपद्यते भिन्नविषयत्वात्, अचो ह्रस्वत्वमर्थस्य पुंवद्भावः, ततः कालिंमन्येत्यत्र विप्रतिषेधे परमिति ह्रस्वत्वमिष्टं तन्न प्राप्नोति, शब्दपक्षे तु द्वयोरप्येकविषयत्वाद्विप्रतिषेधोस्ति, पुंवद्भावस्यावकाशः, यत्र खिदन्तं नास्ति दर्शनीयभार्यः, ह्रस्वत्वस्यावकाशः पुंवद्भावो नास्ति, कालिंमन्यः पुमानिति, कालिंमन्या स्त्रीत्यत्रोभयप्रसङ्गे परत्वाद् ह्रस्वत्वं भवति, न च कृतेपि ह्रस्वत्वे पुनः प्रसङ्गविज्ञानात्पुंवद्भावप्रसङ्गः, सकृद्गतिन्यायस्याश्रयणात्, न चार्थपक्षेप्यसत्यप्येकविषयत्वेऽसम्भवाद्विप्रतिषेधः, असम्भवादित्यस्यैवासिद्धेः, यद्यपि हि पुंवद्भावे सति स्त्रीप्रत्ययस्य निवृत्तौ दीर्घान्तत्वाभावाद्ध्रस्वस्याप्रवृत्तिः, तथापि ह्रस्वे प्रवृत्तेप्यर्थस्यानिवृत्तत्वात्पुंवद्भावः प्राप्नोत्येव, तदेवमाद्ययोर्दुष्टत्वात्तृतीयं पक्ष-

माश्रित्याह । 'भाषितःपुमान्येनेत्यादि' । भाषितःपुमान्येन शब्देनेति शब्देन्यपदार्थे बहुव्रीहिराश्रीयते, ततः स्त्रियां पुंसि च वर्त्तमानस्य यस्य प्रवृत्तिनिमित्तं भिद्यते तस्यापि प्राप्नोति द्रोणीभार्यः पात्रीभार्य इति, द्रोणशब्दः परिमाणे पुल्लिङ्गः, गवादन्यां स्त्रीलिङ्गः, पात्रशब्दोऽर्द्धर्चादित्वात्परिमाणे पुंल्लिङ्गः भाजनविशेषे तु स्त्रीलिङ्गः, सर्वत्राप्यत्र प्रवृत्तिनिमित्तभेदेपि य एव प्रयोगान्तरे पुमांसमाख्यत् स एव संप्रति स्त्रियं वर्ततइति स्यादेव पुंवद्भाव इति मत्वा विशिनष्टि । 'समानायामाकृताविति' । भाष्यग्रन्थोयमतो व्याचष्टे । 'एकस्मिन्प्रवृत्तिनिमित्तइति' । स भाषितपुंस्कः शब्दः, अयन्तावदर्थो विवक्षित इत्यर्थः । यथा पुनरयमर्थः सूत्राक्षरैरेव लभ्यते तथा पृच्छति । 'तदेवमित्यादि' । तदेतदर्थरूपम् एवं प्रकारं कथं भवतीत्यर्थः । प्रवृत्तिनिमित्तलक्षणेन्यपदार्थे संप्तम्यर्थे बहुव्रीहिरित्युत्तरम् । एतदुक्तं भवति, यस्मिन्प्रवृत्तिनिमित्ते पुमान् भाषितः पुमांसमाचक्षाणस्य यत्प्रवृत्तिनिमित्तं तेन युक्तं स्त्र्यर्थमाचक्षाणो भाषितपुंस्क इति, नन्वेवमपि द्रोणीभार्य इत्यादौ दोषः स्यादेव, कथं, यस्यां गवादन्यां द्रोणीशब्दो वर्तते सोपि यदा अर्थ इत्युच्यते तदा भाषितपुंस्केन प्रवृत्तिनिमित्तेन युज्यते, तत्र चार्थे शब्दप्रवृत्तिनिमित्तमप्यर्थ्यमानत्वाद्गवादन्यां संनिहितमिति तत्र वर्त्तमानो द्रोणीशब्दः स्वयं तत्प्रवृत्तिनिमित्तमनभिदधानोपि वस्तुतस्तद्युक्तमर्थमाह । नैतदस्ति । एवं हि भाषितपुंस्कग्रहणमनर्थकं स्यात् सर्वत्र सुलभत्वात्, अतो यः शब्दो भाषितपुंस्केन प्रवृत्तिनिमित्तेन युक्तं स्वार्थं तेनैव रूपेणाह न रूपान्तरेण स भाषितपुंस्को गृह्यते, द्रोणीशब्दस्तु द्रोणीत्वजातियुक्तेन रूपेण गवादन्यां वर्त्तते नार्थ्यमानतया, एवमपि द्यौर्भार्या यस्य द्युभार्य इत्यत्र दिव्शब्दस्य स्त्रीलिङ्गस्य स्वर्ग इति पुंल्लिङ्गः प्राप्नोति, येनैव रूपेण स्वर्गशब्देनोच्यते तेनैव रूपेण दिव्शब्देनापीति कृत्वा, एवं तर्हि प्रत्यासत्तेर्यस्य पुंवद्भावो विधीयते तेनैव यत्र पुमान् भाषित इति विज्ञायते, आत्मनः प्रयोगान्तरे पुमांसमाचक्षाणस्य यत्प्रवृत्तिनिमित्तं तद्युक्तं स्वार्थं सम्प्रत्याचक्षाणस्य स्त्रीशब्दस्य पुंभाषणदशायां यद्रूपं तदेवाद्यापि भव-

तीत्यर्थः । आतिदेशिकभेदाच्च पुंवदिति वतिनिर्देशः । अनूङिति पर्युदासे सति नञिवयुक्तन्यायेन ऊङ्सदृशस्य टाबादेर्ग्रहणादिडविडवृन्दारिकेत्यादौ स्त्रीप्रत्ययाभावान्न स्यादिति प्रसज्यप्रतिषेधं दर्शयति । 'ऊङोभावोनूङिति' । 'भाषितपुंस्कादनूङिति' । यद्ययमसमासः स्यादनूङिति तदा प्रथमास्यात् लुप्तषष्ठीकं वा, षष्ठीपक्षे ऽयमर्थो भवति भाषितपुंस्कात्परस्य स्त्रीशब्दस्य पुंशब्दस्येव रूपं भवति ऊङन्तस्य तु नेति, ततश्च पुंवद्भावभाजः स्त्रीशब्दस्य भाषितपुंस्कत्वं विशेषणं नस्यात्, तत्र को दोषः, इह च प्रसज्येत अङ्गारका नाम शकुनयः तेषां कालिकाः स्त्रियः तत एताः कलिकावृन्दारिका इति, एतच्छब्दाद्भाषितपुंस्कात्परः कालिकाशब्द इति तस्य स्त्रीविषयस्याप्यङ्गारकशब्दता स्यात्, शक्यन्ते हि ताः साहचर्यादङ्गारकशब्देनाभिधातुं तथाश्वस्य वडवा पुरुषस्य योषित् हंसस्य वरटा कच्छपस्य डुलीत्यादावपि प्रसङ्गः, दर्शनीयभार्य इत्यादौ च न स्यात्, नह्यत्र दर्शनीयशब्दो भाषितपुंस्कात्परः, प्रथमायां तु भाषितपुंस्कादित्यनेन सामानाधिकरण्यात्स्त्रिया इति पञ्चमी, षष्ठ्यां कस्य चिदर्थस्यासम्भवात्, ततश्च भाषितपुंस्कात् स्त्रीलिङ्गात्पर ऊङोऽन्यः प्रत्ययः पुंवदित्यर्थो भवति तत्र स एव दोषो यः प्रथमपक्षे । तदेवं समासे दोषप्रसङ्गाद्व्यधिकरणपदो बहुव्रीहिराश्रयणीय इत्याह । 'भाषितपुंस्कादनूङित्यादि' । 'अलुक्च निपातनात्पञ्चम्या इति'। अलौकिकत्वादस्य निपातनादित्यपरिहारः, लुगपि तर्हि न प्राप्नोति अलौकिकत्वादेवेति यत्किंचिदेतत् । अनूङिति षष्ठ्यर्थे प्रथमा, तदयमर्थोवस्थितः, भाषितपुस्कात्स्वस्मादूङोभावो यस्मिन्, कोर्थः यस्मिन् स्त्रीशब्दे भाषिपुंस्कात्पर उङ् कृत इत्यर्थ इति, अपर आह भाषितपुंस्कादिति षष्ठ्यर्थे पञ्चमी, सर्वमन्यत्पूर्ववत्, भाषितपुंस्कस्य स्त्रीशब्दस्य पुंशब्दस्येव रूपं भवति ऊङन्तस्य तु नेति, नन्वेवमाश्रीयमाणे यत्र भाषितपुंस्कस्यैवानन्तरमुत्तरपदं तत्रैव स्यात् दर्शनीयभार्य इत्यादौ, अत्र हि भाषितपुंस्कस्य दर्शनीयशब्दस्य टापश्चैकादेशः पूर्वं प्रत्यन्तवद्भावाद्भाषितपुंस्कग्रहणेन गृह्यते, गार्गी चासौ वृन्दारिका च

कल विल क्षेपे ॥ कालयति । वेलयति । वेला । कलयतीति गतिसंख्यानयोः कथादौ भविष्यति । कलतइति शब्दसंख्यानयोः शपि । वेलते इति वेलेरपि चलने, विलतीति संवरणे शे । क्वचित् क्रिलेत्यप्यत्र पठ्यते, मैत्रेयादिभिस्तु न पठ्यते, श्वैत्यक्रीडनयोः क्रिलतीति शे ॥ ७०—७१ ॥

बिल भेदने ॥ बेलयति । बेलतीति शपीत्यात्रेय इत्युक्तम् ॥ ७२ ॥

तिल स्नेहने ॥ तेलयति । तिलतीति शे । तेलतीति गतौ शपि ॥ ७३ ॥

चल भृतौ ॥ चालयति । चलतीति विलसनकम्पनयोः शशपोः ॥ ७४ ॥

पाल रक्षणे ॥ पालयति । अपीपलत् । पातेरपि हेतुमण्णौ 'पातेर्लुग्वक्तव्य' इति लुगागमे पालयति ॥ ७५ ॥

लूष हिंसायाम् ॥ लूषयति । अलूलुषत् ॥ ७६ ॥

शुल्ब माने ॥ शुल्बयति । अशुशुल्बत् । शूर्प मानइति श्रीभद्रमैत्रेयादयः । शूर्पयति । शूर्पा, एरचि पचाद्यचि वा णिलोपः । शूर्पेण क्रीतं शौर्पं, शौर्पिकं, 'शूर्पादञन्यतरस्यामि' त्यार्हीयेष्वर्थेष्वञ्ठञौ । द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पमित्य 'चाध्यर्धपूर्वे' ति ठञञोर्वा लुक् ॥ ७७ ॥

चुट छेदने ॥ चोटयति । चुटतीति शे गतम् ॥ ७८ ॥

मुट संचूर्णने ॥ मोटयति । मोटतीति मर्दने शपि । मुटतीति प्रमर्दनाक्षेपयोः शे ॥ ७९ ॥

पडि पसि नाशने ॥ पण्डयति । पण्डति । पंसयति । पंसति । पांसुः । 'अर्जिदृशी' त्यादिनोप्रत्ययो दीर्घश्च । पण्डतइति गतौ शपि ॥ ८०—८१ ॥

व्रज मार्ग संस्कारगत्योः । व्राजयति । व्रजि मार्गसंस्कारयोर्गतौ चेति मैत्रेयादयः । अत्र धनपालो मार्गे चेति पठति । स्वामी तु व्रजस्थाने वर्जिं पठित्वा मार्गेति द्वितीयं धातुमाह । तन्त्रान्तरे तु वजिव्रजी द्वौ पठित्वा मार्गसंस्कारगती अर्थौ उक्तौ । व्राजयति । मार्गयति ।

व्रजति वजतीति शपि । वाजयतीति वातेर्णौ 'वो विधूनने जुगि' ति जुगागमे । मृग अन्वेषणे कथादौ । मार्ग अन्वेषणे इति युजादौ ॥ ८२—८३ ॥

शुल्क अतिस्पर्शने ॥ शुल्कयति ॥ ८४ ॥

चपि गत्याम् ॥ चम्पयति । चम्पति ॥ ८५ ॥

क्षपि क्षान्त्याम् ॥ क्षम्पयति । क्षम्पति । क्षपयतीति प्रेरणार्थस्य कथादित्वेन ॥ ८६ ॥

क्षजि कृच्छ्रजीवने ॥ क्षञ्जयति । क्षञ्जति । क्षञ्जतइति गतिदानयोर्घटादौ ॥ ८७ ॥

श्वर्त गत्याम् ॥ श्वर्तयति ॥ ८८ ॥

श्वभ्र च ॥ श्वभ्रयति ॥ ८९ ॥

ज्ञप मिच्च ॥ ज्ञापने मारणादिषु चाभिधानमस्यैवेति मैत्रेयादयः । अन्ये तु शाकटायनानुसारिणो ज्ञप मारणतोषणनिशामनेषु मिच्चेति पठन्ति, तथे 'को भ्फलि' त्यत्र न्यासे ज्ञप मिच्चेति पठि[1]त्वा अन्येतु ज्ञप मारणतोषणनिशामनेष्विति पठन्तीति । घटादिवदत्रापि केचिन्निशामनस्थाने निशानशब्दं पठन्ति । घटादिषु मारणादिसूत्रस्य पाठादेव मित्त्वे सिद्धे पुनर्मारणादिषु मित्त्ववचनं ज्ञपयमादिवर्जमन्ये स्वार्थण्यन्ता न मित इति ज्ञापनार्थमिति पुनःपाठफलं चाहुः काश्यपादयः । ज्ञपादीननुक्रम्य 'नान्ये मितोहेता' विति ज्ञपादिव्यतिरिक्तानामेवाहेतुमण्णौ मित्त्वाभावस्य वक्ष्यमाणत्वान्नेदं फलम् । किं चार्थविशेषपरिगणनमप्ययुक्तं, प्रच्छ ज्ञीप्सायां, ज्ञप्तिः, 'श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमान' इत्यत्र ज्ञीप्स्यमानो ज्ञपयतुमिष्यमाणो बोधयितुमभिप्रेत इत्यादौ ज्ञानमात्रे ज्ञापने च प्रयोगदर्शनात् । न चैवं शक्यते वक्तुं निशामनं ज्ञानमात्रं तदर्थादस्मादहेतुमण्णौ चुरादित्वेन प्रच्छ ज्ञीप्सायां ज्ञप्तिरिति भविष्यति, स्थाशपां ज्ञीप्स्यमान इत्यादिस्तु हेतुमण्णौ घटादित्वेनेति । एवं तर्हि घटादिर्ज्ञापनविषयो ऽयं तु ज्ञानविषय इत्यर्थभेदस्य विद्यमानत्वात्

१ उक्त्वेति ४ पु० पा० ।

घटादित्वादेव मित्त्वे सिद्धे पुनर्मारणादिषु मित्त्ववचनं ज्ञापनार्थमिति स्वोक्तेन विरोधःस्यात् । अथ मतं घटादित्वादेव मित्त्वे सिद्धे पुनर्मारणादिषु मित्त्ववचनं ज्ञापनार्थं, निशामनस्य ग्रहणं विध्यर्थमितरयोस्तु नियमार्थमिति । एवमपि मारणादिष्वितिवचनमयुक्तं, मारणतोषणयोरिति तु वक्तव्यम् । किं चास्य ज्ञानमात्रार्थत्वे श्लाघह्नुङित्यत्र न्यासकारहरदत्तादिभिश्चौरादिकाद् व्युत्पादनं विरुध्येत । सर्वथा तज्ज्ञापयत्याचार्यः,विज्ञापना भर्तृषु सिद्धिमेति,ज्ञापकं स्यात्तदन्तत्व,इत्यादिस्तु न सिध्यति । अथ मारणतोषणनिशामनेष्विति घटादाविह च पाठाज्ज्ञापयत्यादि सिध्यति, ज्ञीप्स्यमानो ज्ञप्तिरिति न सिध्यति । यदि तु मतं घटादौ निशामनमिति पाठ, इह तु निशानमिति घटादेर्ज्ञापयति, अस्माज्ज्ञपयतीति भविष्यतीति, एवमपि 'स्थाशपां ज्ञीप्स्यमान' इत्यादि न सङ्गच्छते । अत्र हि बोधनार्थो धातुस्तत्र तु बोधनं निशामनशब्दार्थो न तु बोधनेति । अथ तत्रापि बोधनार्थः, प्रच्छ ज्ञीप्सायां, ज्ञीप्स्यमानः ज्ञप्तिर्न सिध्यति । तस्माज्ज्ञप मिच्चेत्येव युक्तः पाठः । अत एव- 'को भलि' त्यादौ 'ज्ञप मिच्चे' ति न्यासकारहरदत्तादयः पठन्ति । तेनास्य यथाप्रयोगमर्थ इति ज्ञापने ज्ञानमात्रे च वृत्तिरिति प्रच्छ ज्ञीप्सायां, ज्ञीप्स्यमानः, ज्ञपयितुमिष्यमाण, इत्यादि सर्वमुपपद्यते । ज्ञापयत्यादिप्रयोगस्तु ज्ञानमात्रवचनाज्जानातेः । घटादिमित्त्वं तु चानुपज्ञानार्थकनिशामनार्थस्य चेतीह न भवति, निशामनं चाक्षुषज्ञानमित्यवोचाम । पुरुषकारेप्यस्मदुक्तरीत्या 'ज्ञप मिच्चे' त्येव पाठो युक्त इति सिद्धान्तितम् । एवं च चुरादिणिचो 'णिचश्चे' ति कर्त्रभिप्राये तङ् नास्तीति दर्शनाश्रयणेनोक्तस्योक्तिः, 'णिचश्चे' त्युदितं विहितं यदिति कर्त्रभिप्रायेपि मारणादौ परस्मैपदसिद्धिः पुनः पाठफलमिति यद्दैवेनोक्तं तदपि मतं, जानातीति ज्ञःसिध्येत्, ज्ञपयति तु पुनर्मारणादौ घटादेश्च मित्त्वेपीदमेव ज्ञपमिदितिपदं ज्ञापने मारणादौ, तेनार्थात् ज्ञापनार्थे ज्ञपयतिपदवत् ज्ञापयेदित्यपि स्यादिति स्वेनैव ज्ञपमिदित्यर्थविशेषोपादानरहितं पाठमङ्गीकृत्य तस्य च प्रयोजनं मारणादिव्यतिरिक्ते ज्ञपयत्यर्थे ज्ञपयतीति सिद्धि-

रित्युक्तत्वादुक्तस्योक्त्यसंभावाच्चिराकृतम् । ज्ञपयति । संज्ञपयति । निज्ञपयति, प्रज्ञपयति । स्वभावान्मारणादावप्यस्य वृत्तिरित्युक्तं, तत्र कौमारमतेन सोपसर्गः प्रदर्शितः । जिज्ञपयिषति । ज्ञीप्सति । 'सनीवन्तर्' त्यादिना पक्षे इडभावः । 'आप्ज्ञप्यृधामि' ति झलादौ सन्यच ईकारः । 'अत्र लोप' इत्यभ्यासलोपः । 'णेरनिटी' ति णिलोपः । 'वा दान्त' त्यत्र ज्ञप्त इति निपातनं ज्ञपेरिति 'निष्ठायां सेटी' त्यत्र कैयटपदमञ्जर्योरुक्तत्वादिह ज्ञप्तः ज्ञपित इति मैत्रेयेणोदाहरणस्य प्रदर्शनमयुक्तम् ॥ ९० ॥

यम च परिवेषणे ॥ चकारेण मिदित्यपेक्ष्यतइति मैत्रेयादयः । इह परिवेषणं परिवेष्टनं, न तु भोजना, नापि वेष्टना । तत्र हि घटादित्वात्सिद्धम् । न च वेष्टनेपि घटादित्वेन मित्त्वसिद्धिः । हेतुमद्ण्यन्तस्य तद्विधानात्, तस्य च वेष्टना ऽर्थो न तु वेष्टनमिति । यमयति चन्द्रं, परिवेष्टतइत्यर्थः । अन्यत्र नियामयति । क्वचिद्यमो ऽपरिवेषणइति पठ्यते । तदनार्षम् । चकारेण मिदित्यपेक्ष्यतइति मैत्रेयादिविरोधात् । किं च घटादौ यमो ऽपरिवेषणइति परिवेषणादन्यत्र मित्त्वं निषिध्यते, अनेन तु तत्र च विधीयतइति विधिनिषेधयोर्विषयविभागो न प्रकल्पेत । येषां तु दर्शनं घटादावपरिवेषणे मित्त्वं विधीयतइति तेषान्तु तत्रैवानेनापि मित्त्वं विधीयतइति वैयर्थ्यमेव प्रसज्येत । इदं च घटादावपरिवेषणे मित्त्वविधानदर्शनं च तत्रैव दूषितम् ॥ ९१ ॥

चह परिकल्कने ॥ चहयति । मैत्रेयस्तु चपेति पठित्वा चपयतीत्युदाजहार । चहेत्यूष्मान्तमेव चन्द्रोपि । अयं कथादावपि पठिष्यते, तस्य फलमग्लोपित्वा 'त्सन्वल्लघुनी' ति इत्वस्य 'दीर्घो लघोरि' ति दीर्घस्य चाभावः । तेनाचचहदिति भवति । इह पाठादचीचहदितीत्वदीर्घौ भवतः । तथास्य मित्त्वादचहि । अचाहि । चहंचहं, चाहंचाहमिति 'चिण्णमुलो' रिति दीर्घविकल्पो भवति । चहतीति भूवादिः ॥ ९२ ॥

रह त्यागे ॥ इतीह केचित्पठन्ति । रहयति । कथादावयं पठिष्यते, तत एव सिद्धेरिह पाठो व्यर्थ इति स्वामी । तन्न, चहिवत्कथादेरग्लोपित्वादित्वदीर्घयोरभावादररहदिति भवति, इह पाठादरीरहदिति, तथा अरहि, अराहि, रहंरहं, राहंराहमिति मित्त्वा 'चिण्णमुलोरि' ति दीर्घविकल्पोऽस्य भवतीति प्रयोजनसद्भावात् । रहतीति शपि । रंहतीति तत्रैव रहि गतावित्यस्य ॥ ९३ ॥

बल प्राणने ॥ ओष्ठ्यादिः । बलयति ॥ ९४ ॥

चिञ् चयने ॥ ञित्करणात्कर्त्रभिप्राये तङ्विध्यर्थो णिजस्य विकल्पेन भवति, णिचि 'चिस्फुरोर्णौ वि' त्यात्वं पक्षे भवति । तत्र पुकि मित्त्वात्तस्य ह्रस्व इति । चपयति । चययति । अणिचि चयति, चयते इति भवति । अत्र काश्यप इकारोच्चारणसामर्थ्यादात्वं नेति तच्चिन्त्यम्, आत्वस्य वैकल्पिकत्वात्तदभावे वृद्ध्यायूह्रस्वेषु चययतीति रूपसिध्यर्थत्वात्तस्य, तथा णिजभावे गुणायोश्चयतीति रूपार्थत्वाच्च । रहत्यादयो यद्यप्यत्र मैत्रेयादिभिर्न पठितास्तथापि काश्यपादिप्रामाण्यादस्माभिः पठिताः । चिनोतीति स्वादेः । 'नान्ये मितोऽहेतौ' ज्ञपादिव्यतिरिक्ता अहेतुमण्णौ मितो न भवन्ति । तेन ज्ञपादिव्यतिरिक्तानां चौरादिकानां शमादीनां 'जनीजॄष्क्नसुरञ्जोऽमन्ताश्चे' त्यादिना सामान्यलक्षणेन प्राप्तं मित्त्वं न भवति ॥ ९५ ॥

घट्ट चलने ॥ घट्टयति । घट्टते इति शपि ॥ ९६ ॥

अस्त संघाते ॥ अस्तयति । क्वचिदयं वक्ष्यमाणस्य पुंसेरनन्तरं पठ्यते ॥ ९७ ॥

खट्ट संवरणे ॥ खट्टयति ॥ ९८ ॥

षट्ट स्फिट्ट चुबि हिंसायाम् ॥ सट्टयति । स्फिट्टयति । चुम्बयति । चुम्बतीति वक्त्रसंयोगे शपि । केचिद् द्वितीयं षुट्टेत्युकारवन्तमनोष्ठ्यं च पठन्ति । अस्माभिस्तु मैत्रेयादीनामनुसारेण पूर्वमेव षुट्टिःपठित इतीह न लिखितः, तदनुरोधादेवेह स्फिट्टिश्च पठितः । इह व्यय चय इति नन्दी पठति । व्ययेत्यपरे, मैत्रेयदेवादयस्तूभयमपि न पठन्ति ॥ ९९–१००–१०१ ॥

पूल संघाते ॥ पूलयति । पूलतीति शपि । पुरुषकारे तु पुर्णोति क्षीरस्वामी, पुणोति शाकटायन इत्युक्त्वा कोशशुद्धिस्त्वौदृशेर्थे कीदृशीति न विद्म इत्युपहसितम् ॥ १०२ ॥

पुंस अभिवर्द्धने ॥ पुंसयति ॥ १०३ ॥

टकि बन्धने ॥ टङ्कयति । टङ्कति । टङ्का, विटङ्कः ॥ १०४ ॥

धूस कान्तिकरणे ॥ दन्त्योष्मान्त इति श्रीभद्रमैत्रेयादयः । मूर्धन्योष्मान्त इति स्वामी । तथा च मैत्रेयोपि धूष इत्येकइति । काश्यपस्तु तालव्योष्मान्तमाह । धूसयति । धूसरः । बाहुलकादरप्रत्ययः ॥ १०५ ॥

कीट वर्णे । कीटयति ॥ १०६ ॥

चूर्ण संकोचने ॥ चूर्णयति । पुनः पाठोर्थभेदज्ञतः ॥ १०७ ॥

पूज पूजायाम् ॥ पूजयति । पूजा । चिन्तिपूजीत्यङ्,ण्यासेति युचोपवादः । पूजितो राज्ञां, 'मतिबुद्धिपूजार्थेभ्यश्चेति' वर्तमाने क्तः । सनि- 'क्तस्य च वर्तमान' इति कर्तरि षष्ठी । 'क्तेन च पूजाया' मिति समासनिषेधः । पूजितो यः सुरासुरैरित्यार्षः प्रयोग इत्याहुः ॥ १०८ ॥

अर्क स्तवने ॥ अर्कयति, तपनइत्येके । अर्चयत्यर्कमर्किण इति दर्शनात् स्तवनपाठो युक्तः ॥ १०९ ॥

शुठ आलस्ये ॥ शोठयति । शोठतीति गतिप्रतिघाते शपि ॥ ११० ॥

शुठि शोषणे ॥ शुण्ठयति । शुण्ठति । अत्र क्षीरस्वामी । केचिदेनमकारान्तं पठन्ति, लक्ष्यतस्तदपि प्रमाणमिति, एवं तु आलस्ये इति पूर्वत्रैव शोषणमपि निर्दिशेत् । शोषणे शोठयतीति प्रयोगो दृष्टश्चेत् शोठयतेरनेकार्थत्वेन निर्वाह्यः, तस्माच्छुठि शोषणइति युक्तः पाठः । अस्येदित्त्वादेव शुण्ठतीति सिद्धे भ्वादौ शुण्ठेः पाठः प्रपञ्चार्थः ॥ १११ ॥

जुड प्रेरणे ॥ जोडयति । बन्धने जुडतीति शे ॥ ११२ ॥

गज मार्ज शब्दार्थौ ॥ गाजयति । गाजयते । गञ्जतीति शपि, गर्जति रञ्जतीति च । मार्जयति । शौचालङ्कारयोः, मार्जतीति युजादौ

भविष्यति। मृजूष् शुद्धावित्यस्य मार्ष्टीत्यदादौ। अत्र मर्चिमपि केचित्पठन्ति। मर्चयति। शपि मर्चति॥ ११३–११४॥

घृ संप्रस्रवणे॥ घारयति। अत्र क्षीरस्वामी स्रावणइति पठित्वाऽभिघारयतीत्युदाजहार,घरतीति शपि। जघर्तीति श्लौ। छान्दसौ चैतावित्युक्तम्॥ ११५॥

पचि विस्तारवचने॥ पञ्चयति। पञ्चति, पञ्चतइति व्यक्तार्थस्य शपि॥ ११६॥

तिज् निशामने॥ तेजयति। तितिक्षते इति भौवादिकस्य तिजेर्नित्यसनन्तस्य क्षमायाम्। तेजतीति शपि पालनार्थस्य॥ ११७॥

कृत संशब्दने॥ कीर्तयति। 'उपधायाश्च' तीत्त्वरपरत्वयो 'र्हलि च' ति दीर्घः। अचिकीर्तत्। अचीकृतत्। उर्ऋद्वा। अन्यदा णौ कृतं स्थानिवदितीत्त्वस्य स्थानिवत्त्वं न भवति। यत्र द्विरुक्तौ परभागस्याद्योऽजवर्णस्तत्रैवेयं परिभाषेत्येवं 'द्विर्वचनेऽची' त्यादौ भाष्यकैयटयोः स्थितम्। एवमेवोर्ऋदित्यादौ पदमञ्जर्यादिष्वपि। यत्तु 'स्तौतिण्योरेवे'-त्यत्रास्य सिषेवयिषत्यादौ सिचेर्हेतुमण्णौ गुणे सनीटि गुणायादेशयोरुत्तरखण्डस्याज्वर्णाभावेऽप्यनया परिभाषया गुणस्य स्थानिवत्त्वेन सिचशब्दस्य द्विरुक्तेर्वचनं तदस्याः परिभाषायाः सामान्यताश्रयणेन स्थानिवत्त्वेपि रूपसिद्धौ विशेषो नास्तीत्येतावता न तु सिद्धान्तस्थित्या। कथन्तर्हि 'लोपः पिबते' रित्यत्र वृत्तावपीप्यदित्यत्र पिबतेर्णौ युकि चङि 'लोपःपिबतेरीच्चाभ्यासस्ये' त्युपधालोपे तस्यानया परिभाषया स्थानिवत्त्वमाश्रित्य पाय्शब्दस्य द्विरुक्तिरुक्ता, नह्यत्रोत्तरखण्डस्याद्यमचमवर्णं पश्यामः। यद्यपि प्रयोगे न पश्यामः स्थानिवत्त्वेन पाय्शब्दे द्विरुक्ते प्रक्रियायामुत्तरखण्डेवर्णं पश्याम इति न दोषः। तस्य च 'लोपः पिबते' रित्यस्य पुनः प्रवृत्त्या प्रयोगे दर्शनम्। एवमौजढदित्यत्राप्यूढशब्दाण्णिचि टिलोपे तस्य स्थानिवत्त्वे ढत्वादीनामसिद्धत्त्वे हतशब्दस्य द्विरुक्तिः,प्रक्रियावाक्ये उत्तरखण्डस्याजवर्णं इति न क्व चिद्दोषः। एवं चौजिढदपीप्यदित्यादिसिद्ध्यर्थमस्याः परिभाषायाः सामान्यत्त्वमाश्रित्यात्र 'लोपः पिबते' रित्यत्र वृत्तिकारवचनं

'स्तौतिण्योरेवे' त्यत्र न्यासकारवचनं च संवादयन्नचिकीर्ततदिति सिद्ध- र्थमनित्यत्त्वं चास्या वदन् सीरदेवोऽपि प्रत्युक्तः । प्रकृतमनुसरामः । कीर्तिः । 'ऊतियूती' त्यादिना युजपवादः क्तिन् । कालापास्तु युचमपी- च्छन्ति कीर्तनेति । 'ऋदुपधाच्चाक्लृपिचृते' रित्यत्र तपरकरणाद् ॠका- रोपधकीर्तयतिव्यावृत्त्यर्थादस्माण्णिचो ऽनित्यत्त्वं ज्ञाप्यते । नित्ये णिच्य- नुपधात्त्वादेव ॠकारस्यात्र क्यब् न भविष्यतीति किं तपरकरणेनैतद्व्या- वृत्त्यर्थेन, तेन कीर्ततीत्यादि च भवति ॥ ११८ ॥

वर्ध छेदनपूरणयोः ॥ वर्धयति,अववर्धत् ॥ ११९ ॥

कुबि छादने ॥ कुम्बयति कुम्बति । कुम्बा । 'चिन्तिपूजी' त्या- दिना युचोपवादोऽकारः । एवं स्वामिकाश्यपमैत्रेयादयोबशन्तं पठन्ति । अपरे तु भकारान्तं पठन्ति, कुम्भयतीत्यादि ॥ १२० ॥

लुबि तुबि अदर्शने ॥ अर्दनइति मैत्रेयः । लुम्बयति । तुम्बयति । अनयोरिदित्त्वादेव लुम्बति तुम्बतीति सिद्धेरर्दनेर्थे भ्वादौ पाठो व्यर्थः स्यात् । इहादर्शनेऽर्थे त्वर्थभेदात्सोपि सार्थकः ॥ १२१–१२२ ॥

ह्लप व्यक्तायां वाचि ॥ ह्लापयति । क्लपेत्येके । क्लापयति ॥ १२३ ॥

चुटि छेदने ॥ चुण्टयति । चुण्टति । अत्र क्वचिन्मृडि तुडीति तृतीयान्तौ पठ्येते तावाद्येषु व्याख्यानेषु न दृश्येते, अतो ऽप्रामाणिकः पाठो ऽनयोः ॥ १२४ ॥

इल प्रेरणे ॥ एलयति । ऐलिलत् । इलतीति तुदादौ ॥ १२५ ॥

म्रक्ष म्लेच्छने ॥ म्लेच्छनमपशब्दनम् । म्लेच्छो हवा एष यदपशब्द इति श्रुतेः । म्रक्षयति । म्रक्षतीति संघाते शपि । म्लक्ष म्रक्ष अदनइत्यपि क्वचित्पठ्येते ॥ १२६ ॥

म्लेच्छ अव्यक्तायां वाचि ॥ इहाव्यक्तवागपशब्दनम् । म्लेच्छयति । म्लेच्छतीति भूवादौ ॥ १२७ ॥

ब्रूस बर्ह हिंसायाम् ॥ ब्रूसयति । बर्हयति । बर्हतीति बृह वृद्धावि- त्यस्य शपि । बर्हतइति च प्राधान्ये, वृद्धये बर्हयेदिति, भाषार्थीये भवि- ष्यति । अत्र गर्ज गर्द शब्दे, गर्ध अभिकाङ्क्षायामिति क्व चित्पठ्यन्ते ।

गर्जयति। गर्दयति। गर्द्धयति । शप्यपि गताबाद्यौ। गृध्यतीति श्यनि गृधेः ॥ १२८-१२९ ॥

गुर्द पूर्व निकेतने ॥ अत्र क्षीरस्वामी। पूर्वनिकेतनमासाद्याभ्यवहारः। पारायणे द्वौ धातू इति। पुरुषकारे तु पूर्वनिकेतनइति पठित्वा तच्च निवासपूर्वकमित्युक्त्वा पूर्वयतीत्यत्रोपधायां चेति दीर्घउक्तः। गूर्दयति। पूर्वयति। पूर्वतिस्तु शपि। गुर्दस्तु कुर्दखुर्देत्यत्र प्रपञ्चितः। पूर्वयतीति कथादिरित्युक्तं दैवे, तच्च भूवादौ पूर्वतौ दूषितम् ॥ १३०-१३१ ॥

जसि रक्षणे ॥ मोक्षणइति दैवः। जंसयति। जंसति। जस्यतीति श्यनि मोक्षणे। इहैव हिंसायां जासयतीति भविष्यति। तथा ताडनेऽपि ॥ १३२ ॥

ईड स्तुतौ ॥ ईडयति। ऐडिडत् ॥ ईट्ट इत्यदादौ ॥ १३३ ॥

जसु हिंसायाम् ॥ जासयति चोरस्य चोरमिति वा। 'जासिनिप्रहणे'ति कर्मणि शेषे षष्ठी। जासीति निर्देशाच्चोरमजीजसदित्यत्र न षष्ठीति न्यासे। इदमपि दूषितं प्रागेव। क्त्वायामिड्विकल्पार्थादूदित्करणादस्य णिजनित्य इति जसतीति भवति। जसित्त्वा। जस्त्वा। जस्तम् ॥ १३४ ॥

पिडि संघाते ॥ पिण्डयति, पिण्डति ॥ १३५ ॥

रुष रोषे ॥ रोषयति। शपि रोषति। हिंसायां श्यनि रुष्यति। रोषे रुड् इत्येकइति मैत्रेये रक्षितः ॥ १३६ ॥

डिप क्षेपे ॥ डेपयति। डप डिप संघातइत्याकुस्मीयः। क्षेपे डेपयति,डिपयतीति गतौ ॥ १३७ ॥

ष्टूप समुच्छ्राये ष्टूपयति ॥ १३८ ॥

आ कुस्मादात्मनेपदिनः ॥ कुस्मनाम्नो वेति वक्ष्यति। आ एतस्मादात्मनेपदिनोऽकर्त्रभिप्रायेपि। आङभिविधौ, मर्यादायामसंदेहार्थं प्रागित्येव ब्रूयात् ॥

चित संचेतने ॥ संचेतनं संज्ञानम्। चेतयते। अचीचितत्। चिन्तयति। चिन्ततीति स्मृत्यामिह गतम्। शपि चेतति संज्ञाने ॥ १३९ ॥

दशि दंशने ॥ दंशयते । आकुस्मीयमात्मनेपदं णिच्सन्नियोगेनेति व्याख्यातारः । तेनेदित्करणसामर्थ्याण्णिजभावे दंशतीति शपि ॥ १४० ॥

दसि दर्शनदंशनयोः ॥ दंशनदर्शनयोरिति प्रायेण दृश्यतइति पुरुषकारे । दंसयते, दंसति । पूर्ववदणिचि परस्मैपदं, देसतीति रक्षणे गतमैत्रेयमतेन । दस्यतीत्युपक्षये श्यनि, दासतइति दाने शपि । दासः, दासी । 'दंसेष्टटनौ न आ चे'ति टटनौ नकारस्य चाकारः । टित्त्वात् स्त्रियां ङीप्, टटनोः स्वरे विशेषः । अत्र दसेत्यनिदितमपि केचित्पठन्ति । यदाह, पितेव पुत्रं दसये वचोभिरित्यत्र भट्टभास्करः । दसये संगृह्णामि । दंशनदर्शनयोः चौरादिक उदात्तेत्, व्यत्ययेन वृद्ध्यभाव इति । दासीदासम् । गवाश्वप्रभृतित्वादेकवद्भाव एकशेषाभावश्च ॥ १४१ ॥

डप डिप संघाते ॥ डापयते । डेपयते । डेपयतीति क्षेपे गतः ॥ १४२–१४३ ॥

तत्रि कुटुम्बधारणे ॥ तन्त्रयते । तन्त्रति । तन्त्रम् ॥ चान्द्राः कुटुम्बेति पृथग्धातुं पठित्वा कुटुम्बयतइत्याहुः ॥ १४४ ॥

मत्रि गुप्तभाषणे ॥ मन्त्रयते ॥ मन्त्रयति ॥ १४५ ॥

स्पश ग्रहसंश्लेषणयोः ॥ स्पाशयते । अपस्पशत । 'अत् स्मृदृत्वरे'त्यादिना ऽभ्यासस्याकार इत्त्वापवादः । स्पशति । स्पशतइति स्पश बाधनस्पर्शयोरित्यस्य हि भ्वादेः ॥ १४६ ॥

तर्ज भर्त्स संतर्जने ॥ तर्जयते । भर्त्सयते । तर्जयन्निव केतुभिरिति भौवादिकस्य तर्जयतेर्णिचि ॥ १४७–१४८ ॥

बस्त गन्ध अर्दने ॥ वस्तयते, गन्धयते ॥ १४९–१५० ॥

विष्क हिंसायाम् ॥ क्वचित्कोशे हिष्केति पठ्यते । हिष्कयते ॥ १५१ ॥

निष्क परिमाणे ॥ निष्कयते । निष्कः, अच् । निष्केण क्रीतं नैष्किकम् 'असमासे निष्कादिभ्य' इति क्रीताद्यर्थे ठक्, द्वाभ्यां निष्काभ्यां क्रीतं द्विनैष्किकः द्विनिष्कम् । 'द्वित्रिपूर्वान्निष्का'दिति पक्षे प्राग्वतीयस्य ठको लुक् । एवं त्रिपूर्वस्यापि । 'परिमाणान्तस्ये'त्युत्तरपदवृद्धिर्लुगभावे ॥ १५२ ॥

लल ईप्सायाम् ॥ लालयते । अलीललत् । कुं लालयतइति कुलालः । कर्मण्यण् । कुलालेन कृता कौलालिका । 'कुलालादिभ्यो वुञि' ति वुञ् ॥ १५३ ॥

कूण संकोचने ॥ कूणयते । कूणिः । अन्ये तु कुणतिहृस्वोपधं पठन्ति। वयन्तु कूणितादिदर्शनान्मैत्रेयाद्युक्तं दीर्घोपधत्वमेव बहु मन्यामहे । हृस्वोपधस्तु कथादौ भविष्यति । शब्दोपकरणयोः कुणतीति शे ॥ १५४ ॥

तूण पूरणे ॥ तूणयते । तूणः, तूणीरः । बाहुलकादीरन् ॥ १५५ ॥

भ्रूण आशायाम् ॥ भ्रूणयते । भ्रूणः ॥ १५६ ॥

शठ श्लाघायाम् ॥ शाठयते ॥ १५७ ॥

यक्ष पूजायाम् ॥ यक्षयते ॥ १५८ ॥

स्यम वितर्के ॥ स्यामयते । स्यमतीति शब्दार्थः शपि ॥ १५९ ॥

गूर उद्यमने ॥ गूरयते । क्वचिदयं लघूपध ईदिच्चेह पठ्यते । तदात्रेयमैत्रेयविरोधादुपेक्ष्यम् । चुरादौ दीर्घोपध इति भिदादावात्रेयः, दिवादौ च तेनायमर्थः स्फोरितः। मैत्रेयस्तु चुरादौ दीर्घोपधमनीदितं पठित्वा गूरयतइत्येवोदाजहार । तथा च दैवपुरुषकारयोरयमनीदिद्दीर्घोपधः ॥ १६० ॥

शम लक्ष आलोचने ॥ शामयते, लक्षयते, दर्शनाङ्कनयोर्लक्षयति, लक्षयते इति गतम् ॥ १६१–१६२ ॥

कुत्स अवक्षेपणे ॥ कुत्सयते । कुत्सेति णिदि कुत्सायामिति निर्देशादङ् ॥ १६३ ॥

त्रुट छेदने ॥ त्रोटयते । अयं तुदादौ च । कुटेत्येकइति स्वामी ॥ १६४ ॥

गल स्रवणे ॥ गालयते । गलतीति शपि ॥ १६५ ॥

भल आभण्डने ॥ भालयते ॥ १६६ ॥

कूट आप्रदाने ॥ अवसादनइत्येके । कूटयते । अत्र पुरुषकारे कुट प्रतापनइत्यप्येकइति । मैत्रेयरक्षितयोः स एव तु पाठः प्रायेण दृश्यते। तदा कोटयते ॥ १६७ ॥

कुट्ट प्रतापने ॥ कुट्टयतइति क्षीरस्वामी । अयं कथादावपि । कुटतीति शे ॥ १६८ ॥

वञ्चु प्रलम्भने ॥ वञ्चयते । क्त्वायामिड्विकल्पार्थं णिजस्यानित्य इति वञ्चतीत्यपि भवति । वञ्चित्वा, वचित्वा, वक्त्वा, 'वञ्चिलुञ्च्यृतश्चे'ति सेटः क्त्वः कित्त्वविकल्पनात्पक्षे नलोपः । इडभावे तु नित्यम् । अत्र सूत्रे वञ्चु गताविति भौवादिकस्य चास्य ग्रहणमाह हरदत्तः । तत्र च तेन चौरादिक ऊदित्पठितः, तन्मते वलाद्यार्धधातुकमात्रे इड्विकल्पेन भाव्यं, पाठद्वये ऽपि निष्ठायां वक्तव्यं, 'गृधिवञ्च्योः प्रलम्भन'इत्यत्र भौवादिकस्यैव ग्रहो नास्यः । आकुस्मीयत्वादेवाकर्त्रभिप्राये ऽपि तङः सिद्धत्वात् । पूर्वोत्तरयोगसाहचर्याद्गृधिसाहचर्याच्च कारितण्यन्तस्यैव वञ्चेस्तत्र ग्रहणस्य युक्तत्वाच्च, अत एव तत्र वृत्तौ वञ्चु गताविति भौवादिक एवोपात्तः । यद्याप्ययं कारितण्यन्तस्तदापि प्रलम्भनार्थो न तु प्रलम्भनमिति नास्य तत्र ग्रहणप्रसङ्गः । आकुस्मीयनिबन्धनत्वं तत्र स्वार्थेण्यन्तस्येति प्रागेवोक्तमिति स्वार्थण्यन्तादस्मात्कारितणौ वञ्चयति वञ्चयतइत्युभयं भवति । अत्र सुधाकरः ।

इन्द्रनीलदृषदः प्रथीयसीराश्रिताः कथममी जिघांसतः ॥
उन्नतश्रवणबालनिस्वनाद्वञ्चयन्ति शरभान् करेणवः ॥

इति प्रयोगस्य चौरादिकोप्यात्मनेपदीत्युक्त्वा वञ्चयन्ति अन्यपथं गमयन्तीति प्रतीतेः प्रलम्भनाभावान्न तङिति निर्वाहात्कारितण्यन्तादस्मादपि 'गृधिवञ्च्यो'रिति तङा भाव्यमिति न मन्तव्यम् । यतः कारितण्यन्तस्यात्र प्रयोज्यान्तराभावादर्थो न सङ्गच्छते । स्वार्थण्यन्तस्याकुस्मीयत्वात्तङा भाव्यमित्येव तस्याभिप्रायः । वनीवच्यते । 'नीग्वञ्चु'त्यादिना नीगभ्यासस्य ॥ १६९ ॥

वृष शक्तिबन्धने ॥ शक्तिबन्धनं प्रजननसामर्थ्यमिति केशवस्वामी । शक्तिसंबन्ध इति मैत्रेयः । वर्षयते । वर्षतीति वृष सेचनइत्यस्य शपि, वर्षतइति वर्ष स्नेहनइत्यस्य ॥ १७० ॥

मद तृप्तियोगे ॥ एवं मैत्रेयादयः । अन्ये तृप्तिशोधनइति पठन्ति । यदाह क्षीरस्वामी तृप्तिशोधने तर्पणशुद्धाविति । मादयते । हर्षे माद्यतीति श्यनि । इदितस्तुन्यादौ शपि मन्दते ॥ १७१ ॥

दिवु परिकूजने ॥ देवयते । परिदेवकः । 'देविक्रुशोश्चोपसर्गइ'ति ताच्छीलिको वुञ् । अत्र दिव्यतेर्ण्यन्तस्यास्य ग्रह इति हरदत्तः । संपृचादौ नानयोः । यदाह वृत्तिकारः । परिदेविर्भ्वादिर्गृह्यतइति । अत्र हरदत्तः । क्रीडाद्यर्थस्य हेतुमण्ण्यन्तस्य दिवु परिकूजनइत्यस्य चुरादिण्यन्तस्य ग्रहणं न भवति लाक्षणिकत्वादण्यन्तैः साहचर्याच्चेति । अत्र मैत्रेयः । वञ्चुप्रभृतिमुदितं पठति, स एवायं धातुरर्थान्तरे चुरादिरित्येवं बोधनार्थमिति, तन्मतउदित्त्वं प्रत्यभिज्ञानार्थत्वात् णिचो विकल्पाय न प्रकल्पते, प्रत्यभिज्ञामात्रएव फलेनुदित एव पठेरन् ॥ १७२ ॥

गॄ विज्ञाने ॥ गारयते ॥ गिरतीति निगरणार्थस्य शे । गृणातीति शब्दार्थस्य श्नि । गरतीति ह्रस्वान्तस्य सेवनार्थस्य शपि ॥ १७३ ॥

विद चेतनाख्याननिवासेषु ॥ विदु चेतनइत्येके । विद चेतनाख्यानपरिवादेष्वित्यपरे । वेदयते ॥

सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे ॥
विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नम्शेषु च क्रमात् ॥ १७४ ॥

मन स्तम्भे ॥ मानयते । मन्यते ज्ञाने । अवबोधने मनुते ॥ १७५ ॥

यु जुगुप्सायाम् ॥ यावयते । युनाति च युनीते च बन्धने, यौतीति मिश्रणे ॥ १७६ ॥

कुस्मनाम्नो वा ॥ कुस्ममिति दृष्टं 'कुस्मयतिरकारितमिति'। कोर्नित्यसमासत्वादुपसर्गस्य च बाह्यत्वात् कारितमेव । कुत्सितस्मयनेऽस्य वृत्तिरिति मैत्रेयदुर्गादयः । कुस्मयते । नाम्नो वेत्यस्यायमर्थः । यद्वा कुस्मप्रातिपदिकात् तत्करोतीति णिचि कुस्मयतइति भविष्यति, कुस्म-

धातोरेवाभावात् कुतो नामायमनूद्यतेत्याह । कुस्ममिति दृष्टमिति । कु-शब्दपूर्वात्स्मयते 'रन्येष्वपि दृश्यत' इति डप्रत्यये 'कुगतिप्रादय' इति समासे समा[1]सत्त्वान्नाम प्रातिपदिकमिति लक्षणेन निर्णीतमित्यर्थः । ननु किमनेन प्रातिपदिकात्कारितात्, यतः कुपूर्वात्स्मयतेः कुस्मयत-इति सिद्धमित्याह । कुस्मयतिरकारितमिति चेत् । कोर्नित्यसमासत्त्वा-दुपसर्गस्य च बाह्यत्वात् कारितमेवेति । कुपूर्वःस्मयतिरेव कुस्मयतइ-त्यत्र भविष्यति प्रकृतिः, तेनाकारितं कारिताभावोऽस्त्विति चेत्तन्न । कोत्र नित्यसमासत्त्वात्, यदि तिङन्तेन कोरन्वयः स्यात्, 'कुगतिप्रादय' इत्य-त्राप्यतिङिति सम्बन्धात् समासो न स्यात्, ततश्च वाक्यत्त्वादैकपद्यं न स्यात्, पूर्वप्रयोगवत्परप्रयोगश्च स्यात्, तथा तदुपसर्गस्य बाह्यत्त्वात् प्रकु-स्मयतइति स्मयतेः प्राक् प्रयोगः स्यात्, क्रियमाणे च कुस्मनाम्नइति कुश-ब्दादप्युपसर्गस्य बाह्यत्त्वस्येष्यमाणत्त्वात् न तिङन्तेन कोरन्वयः । यदि हि स्यात् 'ते प्राग्धातो' रिति कुप्रस्मयतइति स्मयतेः प्राक् प्रयोगः स्यात् । क्रियमाणे च कुस्मनाम्नो वेत्यस्मिन्नेतत्करणसमार्थ्यान्न कुपदस्य स्मयतेर्नापि व्यवहितस्य प्रयोगः । उपसर्गस्य चेति चकारेणान्येऽपि दोषाः सूच्यन्ते, तत्र तावत्कुस्मयांच[2]क्रुरिति आम् न स्यात्, चुकुस्मयिषतीत्यत्र कोर्द्वित्वं न स्यात् । अचुकुस्मयत इत्यत्र चङ् न स्यात्, अट् च कोःपरः स्यात् । कुस्मनेति युज्नस्यात् । कुस्मितोरिति च स्यात्, कुस्मयितेत्यादाविड् न स्यात् । कुस्मयित्त्वेत्यत्र ल्यप् स्यात्, क्विपि च णिसंयोगान्तलोपयोः सका-रस्य च रुत्त्वे 'र्वो' रिति दीर्घे कूरिति सिध्यति । तथा ण्वुलि णिलोपे कुस्मक इति सिध्यति, अन्यदा कुस्मायक इति स्यात् । किं च कुस्मतीति न स्यात्, कुस्मायतइत्यादौ क्यङादयोऽपि न स्युः । एषां प्रातिपदिकादाचारे विधानादतो धात्वन्तरं प्रातिपदिकं वा ऽश्रयणीयमिति । निगमयति । कारितमेवेति । ननु धातुपक्षे कथमाचारे क्विबादयः स्युः, सत्यम् । कारि-तान्ताद् णिचि णिलोपः, कुस्मप्रातिपदिकात् क्विबादयो भविष्यन्तीति न दोषः ॥ १८७ ॥

१ समासभूतं नाम प्रतिपादिकं, नाम घटेतेतिचेद् घटेतेत्याह इत्यधिकं ४ पु॰ ।
२ चक्रे इति ३ पु॰ पा॰ ।

चर्च अध्ययने ॥ चर्चयति । चर्चतीति हिंसादौ गतम् । चर्चा । 'चिन्तिपूजी' त्यादिना युचोपवादो ऽङ् । चिन्त्यादयः सर्वे चौरादिका गृह्यन्ते ॥ १७८ ॥

बुक्क भाषणे ॥ बुक्कयति । बुक्कतीति शपि । अत्र स्वामी । शब्द उपसर्गादाविष्कारे चेति पठित्वोपसर्गपूर्वाच्छब्द इत्यस्मादाविष्कारे चकाराद्भाषणे च णिचमुक्त्वा प्रतिशब्दयतीत्युदाहृत्य प्रतिश्रुतमाविष्करोतीत्यर्थ इत्याह । पुनश्चानुपसर्गाच्चेति पठित्वा आविष्कारे शब्दयतीत्याह । मैत्रेयस्तु द्वावेवात्रापठत् । शब्द शब्दक्रियायामिति पठित्वा शब्दयतीत्याह । अत्र पाठे प्रातिपदिकाद्धात्वर्थ इति णौ प्रतिशब्दयति शब्दयतीति वाविष्कारे सिद्धं, स्वामिपाठे तु शब्दकरणे शब्दयतीति न सिद्ध्यति, 'शब्दवैरेति क्यङा 'तत् करोती' ति णिचो बाधात् । तस्मान्मैत्रयपाठो ज्यायान् । येषां तु क्यङा न णिचो बाधस्तेषां न विशेषः । शब्दतीति शपि ॥ १७९ ॥

कण निमीलने ॥ काणयति । अचीकणत् । अचकाणत् । 'काण्यादीनां वे' ति ह्रस्वविकल्पो णौ चङ्युपधायाः । काणः । स्वभावादयमेकनेत्रनिमीलनवचनः । कणतीति शब्दे ॥ १८० ॥

'जभि नाशने ॥ जम्भयति । इदित्त्वाज्जम्भति । चन्द्रस्तु जभेति पठित्वा जम्भयतीत्युदाजहार । 'रधिजभोरची' ति नुमं मन्यते । अत्र मते नाशने न जम्भतीत्यस्ति । अयं चानिदित्पाठो न्यासकारहरदत्तादीनामनभिमतः । अन्यथा रधिजभोचीत्यत्र जभजृभीतिवदमुमप्युपाददीरन् । जम्भतइति शपि जृम्भणे ॥ १८१ ॥

षूद क्षरणे ॥ केचिदास्रवणइति पठन्ति । सूदयति । असूषुदत् । सूदतइति शपि ॥ १८२ ॥

जसु ताडने ॥ जासयति चोरस्य । 'जासिनिप्रहणे' ति कर्मणि शेषे षष्ठी । हिंसायां पठितस्यास्य पुनः पाठो ऽर्थभेदात् । नहि ताडनं हिंसा, तज्जन्यत्त्वात्तस्याः । उदित्त्वादस्यापि णिज्विकल्पितः । तेन जसतीति भवति ॥ १८३ ॥

पश बन्धने ॥ पाशयसि ॥ १८४ ॥

अम रोगे ॥ चोरस्यामयति । आमयतः । 'रुजार्थानामि' ति कर्मणि शेषे षष्ठी । 'नान्ये मितो ऽहेता' विति मित्त्वनिषेधः । आमः । घञि अचि वा णिलोपः । आमय[1]* शब्दार्थादेतस्मादनन्तरा निष्ठा नेति किं प्रतिषेधेन । इदञ्च घोषतावित्युक्तम् । मन्दबुद्ध्यनुग्रहायेह स्मारितम् । एवं चेरित्त्वमघुषदघोषीदित्यत्र पक्षे ऽङर्थत्त्वेनावयवे चरितार्थमिति अजूघुषदित्यत्र 'णिश्री' ति चङ् न बाध्यते । घोषयति । घोषति । अवघुषितमिति, इट्प्रतिषेधो भौवादिकस्येत्युक्तम् ॥ १९१ ॥

आङः क्रन्द सातत्ये ॥ अत्र काश्यपमैत्रेयौ, आङः परः क्रन्दः सातत्ये णिचमुत्पादयतीति । इदञ्च सातत्यं कुस्मयतेरनन्तरं मैत्रेयेण गणान्तरात् धातूननूद्य पुनर्द्वितीयं परस्मैपदप्रकरणमधुनोच्यतइत्युक्त्वादयमपि भौवादिकस्यानुवाद इति । तच्च क्रन्देर्यो ऽर्थ आह्वानादिस्तदपेक्षमिति बोद्धव्यम् । आक्रन्दयति । आक्रन्दतीत्याह्वानादौ शपि गतम् । वैक्लव्ये घटादौ । स्वामी तु आङ्पूर्वो घुषिः क्रन्द सातत्ये चुरादिः, आघोषयतीत्युक्त्वा मैत्रेयाद्युक्तमपरमाहुरित्याह ॥ १९२ ॥

लस शिल्पयोगे ॥ अत्र स्वामी शिल्पोपयोगइति पठित्वा केचिन्मूर्धन्यान्तं पठन्तीत्याह । लासयति । श्लेषणक्रीडनयोर्लसतीति शपि ॥ १९३ ॥

तसि भूष अलङ्कारे ॥ अवतंसयति । भूषयति । भूषतीति शपि । तसेरिदित्त्वाण्णिचो विकल्पे वतंसति । 'वष्टि भागुरिरल्लोपमित्यल्लोपः ।

---

[1]* एवमेव पाठः पुस्तकद्वयेऽप्युपलभ्यते परन्तु आमयेत्यस्याग्रे शब्दस्त्वामपूर्वान्माधातोर्घञर्थे के मीधातोरचि वा ॥ १८५ ॥ चट फुट भेदने ॥ चाटयति । स्फोटयति । विकाशे स्फोटते इति शपि । स्फुटतीति शे ॥ १८६–१८७ ॥ घट संघाते ॥ घाटयति ॥ १८८ ॥ हन्त्यर्थाश्च ॥ नवगणयामुक्ता अपि हन्त्यर्था स्वार्थे णिचं लभन्तइत्यर्थः । घातयति । 'हनस्त' इति तः ॥ दिवु मर्दने ॥ देवयति । उदित्त्वाद्देवतीत्यपि ॥ १८९ ॥ अर्ज प्रतियत्ने ॥ अर्जयति । द्रव्यमर्जयतीत्यादिप्रयोगदर्शनादयमर्थान्तरेऽपि ॥ १९० ॥ घुषिर् विशब्दने ॥ विशब्दनं प्रतिज्ञा । 'घुषिरविशब्दन' इति सूत्रे ऽविशब्दनइति निषेधाल्लिङ्गादनित्योऽस्य णिच् । 'घुषिरविशब्दने' इत्यनेनाविशब्दने निष्ठाया इण्णिषिध्यते । इति ग्रन्थोऽपेक्षितः । शब्दार्थादित्यत्र च विशब्दनार्थादित्यपेक्षितमिति प्रतिभाति ।

तत्रैव प्रश्नवाक्यम् । एकेन पशुना सर्वाणि सवनानि कथं पशुयुक्तानि भवेयुरिति प्रश्नार्थः । तदुत्तरं वपया प्रातःसवने प्रचरति, पुरोडाशेन माध्यन्दिने सवने, अङ्गैः तृतीयसवनइति प्रचारविप्रकर्षविधिः । तदित्यमाश्विनं ग्रहं गृहीत्वेति पञ्चमदिने श्रुतेन वाक्येन उत्पन्नकर्मणा आग्नेयः पशुरालभ्यतइत्यनुवादो निन्दार्थे, निन्दया प्रश्नवाक्योपस्थितिः ततः प्रचारविप्रकर्षविधिः इति साकाङ्क्षं सत्तावत्पर्यन्तमेकं वाक्यमिति भावः ॥ २० ॥

तेनोत्कृष्टस्य कालविधिरिति चेत् ॥ २१ ॥

पुनः पूर्वपक्षी स्वकोटिं चालयति । तेनेति । तेन वपाप्रचारोत्कर्षेण उत्कृष्टस्य कालविधिः आश्विनं ग्रहं गृहीत्वेति वाक्यम् । अयं भावः प्रधानस्योत्कर्षे प्रातःसवने अङ्गानामुपाकरणादीनामप्युत्कर्षे प्रातःसवने कुत्र कर्तव्यमिति विशेषजिज्ञासायाम् आश्विनग्रहग्रहणोत्तरमिति विशेषकालविध्यर्थमुत्पत्तिवाक्यमाग्नेयः पशुरित्येवेति पुनरवान्तरप्रकरणं सिद्धमिति सवनीयार्था एते धर्मा इति ॥ २१ ॥

नैकदेशत्वात् ॥ २२ ॥

इमं पक्षं सिद्धान्ती दूषयति । नैकेति । न कालविधिसंभवः । उत्कर्षस्यैकदेशत्वाद् वपाप्रचारमात्रोत्कर्षात् । अयं भावः । यदि चतुर्थदिनवाक्यमुत्पत्तिवाक्यं तर्हि अङ्गान्यपि चतुर्थदिनपठितानि उपाकरणादीनि पुनः कालाकाङ्क्षाशून्यानि । न च वपाप्रचारोत्कर्षादुपाकरणोत्कर्षः, तदादि वा ऽभिसंबन्धात्तदन्तमपकर्षे स्यादिति पञ्चमे वक्ष्यमाणत्वेन वपाप्रचाराद्युत्कर्ष एव भवेन्न तत्पूर्वतनानामुत्कर्षः संभवति येन तेषां कालाकाङ्क्षा स्यादिति ॥ २२ ॥

अर्थेनेति चेत् ॥ २३ ॥

ननु मुष्टिना पिधाय वपोद्धरणमासीतावपाहोमादिति श्रवणात् । न हि पूर्वदिने वपोद्धरणं मुष्टिना पिधायासीन उत्तरदिने तावत्कालपर्यन्तं स्थातुं शक्तोत्याहारविहारादिरहितः । अतो ऽर्थसिद्धः पूर्वाङ्गोत्कर्ष इति पूर्वपक्ष्याशङ्कते । अर्थेनेति । उत्कर्षः पूर्वाङ्गानामिति पूरणीयम् ॥ २३ ॥

नाश्रुतिविप्रतिषेधात् ॥ २४ ॥

सिद्धान्ती समाधत्ते। नेति। नोक्तयुक्त्या ऽङ्गानामार्थिक उत्कर्षः। अश्रुतिविप्रतिषेधात्। तृणमुष्टिना पर्णमुष्टिना वा पिधाने ऽपि उक्तश्रुत्यविरोधात्। तस्मादाश्विनं ग्रहं गृहीत्वेति सवनीयोत्पत्तिविधिः तत्सन्निधावङ्गपाठाभावेन न सवनीयावान्तरप्रकरणं सम्भवतीति भावः॥ २४॥

स्थानात्तु पूर्वस्य संस्कारस्य तदर्थत्वात् ॥ २५ ॥

एवं चतुर्थदिने श्रूयमाणवाक्यं पूर्वोक्तगुणविधानार्थम्। आश्विनं ग्रहं गृहीत्वेति पञ्चमदिनश्रुतं सवनीयोत्पत्तिवाक्यमिति पूर्वोक्तयुक्तिभिः सिद्धौ उत्पत्तिवाक्यसमीपे ऽङ्गकलापाभावात्सवनीयस्य अवान्तरप्रकरणं नास्तीति सिद्धम्। अत एव द्वितीयतृतीयपूर्वपक्षौ निरस्ताविति सिद्धान्तमुपसंहरति। स्थानादिति। स्थानात् पूर्वोक्तवचनेन उत्कृष्टाग्नीषोमप्रचारस्थानादङ्गकलापपाठस्य पूर्वस्याग्नीषोमीयस्य धर्माः। ननु अवान्तरप्रकरणासिद्धावपि महाप्रकरणस्य जागरूकत्वाद् दुर्बलसन्निधिप्रमाणेन च प्रकरणस्य कथं बाधः तत्राह। संस्कारस्य पशुधर्मकलापस्य तदर्थत्वाद् अग्नीषोमीयपश्वर्थत्वात्। अयं भावः आकाङ्क्षारूपं यत्प्रकरणं तत्साक्षात् प्रधानार्थत्वेन पशुधर्मान् ग्रहीतुं न शक्नोति, पशुधर्माणां सोमयागे आकाङ्क्षाविरहात्। अतः तद्विषये पराङ्मुखं प्रकरणं पुनश्च धर्म्माम्नानानर्थक्यभिया सप्तदशारत्निन्यायेन* तदङ्गेषु पशुषु परम्परया सन्मुखम्। तत्रापि स्थानसहितस्य प्रकरणस्य बलवत्त्वादग्नीषोमीयपश्वर्थत्वमेवेति॥ २५॥

लिङ्गदर्शनाच्च ॥ २६ ॥

उक्तार्थे लिङ्गमप्यस्तीत्याह। लिङ्गेति। लिङ्गदर्शनात्पूर्वोक्तवचने पुरोडाशेन माध्यन्दिने सवनइति लिङ्गम्। तथा हि यदि त्रयाणां महाप्रकरणेन पशुधर्माः तर्हि अग्नीषोमीयवपया प्रचर्य अग्नीषोमीयेन पुरोडाशेन प्रचरतीति श्रुतत्वात् पुरोडाशः सवनीस्य नास्त्येव पुरोडाशेन माध्यन्दिने सवने इत्युक्तम्। अग्नीषोमीयमात्रधर्मत्वे पुरोडाशयागस्य पशु-

* तृतीयाध्यायस्य प्रथमपादे नवमाधिकरणे उक्तेन न्यायेनेत्यर्थः।

यागाङ्गत्वाद् अतिदेशेन प्राप्तौ तस्य माध्यंदिनसवनकालविधानं संगच्छतइति लिङ्गम् ॥ २६ ॥

अचोदना गुणार्थेन ॥ २७ ॥

ननु अथो पशोरेवच्छिद्रमपिदधातीति श्रुत्या पशोर्वपोद्धरणे यच्छिद्रं तत्पिधानार्थतया सवनीयपशावपि पुरोडाशो ऽतिदेशं विना प्राप्नोतीति न पूर्वोक्तलिङ्गं स्वसमीहितसाधकमत्राह । अचोदनेति । गुणार्थेन छिद्रपिधानार्थेन अचोदना विधिर्न, किं त्वर्थवादः पुरोडाशस्तावकः ॥ २७ ॥

शाखाहरणादीनामुभयदोहधर्मत्वम् । अधि॰ ८ ।

दोहयोः कालभेदाद् असंयुक्तं श्रुतं स्यात् ॥ २८ ॥

दर्शपूर्णमासे सायंदोहः प्रातर्दोह इति द्वयमस्ति तत्र दोहधर्माः* सायंदोहार्थाः उतोभयार्था इति संशये पूर्वपक्षमाह । दोहेति । श्रुतप्रातर्दोहः असंयुक्तं दोहधर्मैणासंयुक्तं द्वयोः कालभेदात् । पूर्वन्यायेन सायंदोहस्य धर्मसन्निधानादिति भावः ॥ २८ ॥

प्रकरणाविभागाद्वा संयुक्तस्य कालमात्रम् ॥ २९ ॥

सिद्धान्तमाह । प्रकरणेति । प्रकरणस्य महाप्रकरणस्य अविभागाद् उभयोरभेदाद् उभयोरङ्गम् । कालशास्त्रमैन्द्रं दध्यमावास्यायाम् ऐन्द्रं पयो ऽमावास्यायामिति कालशास्त्रं संयुक्तस्यैव अङ्गसंयुक्तस्य प्रधानस्यैव । अयं भावः । न सायंदोहस्य पूर्वद्युराम्नानं, किं तु उत्तरस्मिन्नेव ऐन्द्रं दधीत्यादिवाक्येन प्रधानसिद्धौ अङ्गानामपि स एव कालः । दधि सद्यो न भवतीति पूर्वद्युरनुष्ठानमर्थापत्त्या न वचनेनेति पूर्वस्माद्वैधर्म्यमिति ॥ २९ ॥

संमार्गादीनां ग्रहधर्माणां सवनत्रयार्थत्वम् । अधि॰ ९ ।

तद्वत्सवनान्तरे ग्रहाम्नानम् ॥ ३० ॥

ऐन्द्रवायवादयो दश ग्रहाः प्रातःसवने श्रुताः । तेषां धर्मा अपि दशापवित्रेण ग्रहं संमार्ष्टीत्यादयः । ते ऽग्नीषोमीयपशुधर्मवत्प्रातःसव-

* पलाशशाखाच्छेदनवत्सापाकरणादयो दोहधर्माः ।

नार्थाः सन्निधेरिति बहिः पूर्वपक्षे सिद्धान्तमाह । तद्वदिति । दोहधर्मवत् सवनान्तरे ऽपि ग्रहाम्नानं ग्रहधर्माम्नानं सोमयागस्य अभ्यासरूपत्वेन यागपृथक्त्वाभावात्सर्वार्थमिति ॥ ३० ॥

रशनात्रिवृत्त्वादीनां सर्वपशुधर्मत्वम् । अधि० १० ।

रशना च लिङ्गदर्शनात् ॥ ३१ ॥

अग्नीषोमीयपशौ यूपं परिव्ययतीति श्रुतम् । यूपं रशनया वेष्टयतीत्यर्थः । तत्रैव रशनाधर्मा अप्याम्नाताः । दर्भमयी भवति त्रिवृद्वतीत्यादयः । एवं सवनीयपशावपि त्रिवृता यूपं परिवीयेति परिव्याणान्तरमाम्नातम् । रशनाधर्मा उभयार्था उताग्नीषोमीयार्था एवेति संशये सन्निधानादग्नीषोमीयरशनार्था इति बहिः पूर्वपक्षे सिद्धान्तमाह । रशनेति । रशना धर्मसहिता रशना उभयार्था । लिङ्गदर्शनात् । सवनीयपरिव्याणे त्रिवृत्त्वगुणविशिष्टरशनानुवादात् । अन्यथा यूपं परिवीयेत्येतावतैव चारितार्थ्ये रशनाया अतिदेशेन धर्मविशिष्टस्य प्राप्तौ त्रिवृतेति विशेषणं व्यर्थं स्यादिति भावः ॥ ३१ ॥

अंश्वदाभ्ययोरपि सादनादिधर्मवत्त्वम् । अधि० ११ ।

आराच्छिष्टमसंयुक्तमितरैरसन्निधानात् ॥ ३२ ॥

ज्योतिष्टोमसन्निधौ पठिता ऐन्द्रवायवादिग्रहाः । अनारभ्य पठिता अदाभ्यादिग्रहाः । एवं सति संमार्गादयो ये ग्रहधर्माः ते सर्वार्थाः उत प्रकरणपठितग्रहार्था इति संशये पूर्वपक्षमाह । आरादिति । आरात्प्रकरणपठितग्रहसमीपे शिष्टं यत् संमार्गादि इतरैः अनारभ्य पठितग्रहैः असंयुक्तमसन्निधानाद्दूरवृत्तित्वात् ॥ ३२ ॥

संयुक्तं वा तदर्थत्वाच्छेषस्य तन्निमित्तत्वात् ॥ ३३ ॥

सिद्धान्तमाह । समिति । ग्रहमात्रेण संयुक्तं दूरपठितानामपि तदर्थत्वाज् ज्योतिष्टोमापूर्वार्थत्वात् । शेषस्य ग्रहधर्मस्यापि ग्रहद्वारा तन्निमित्तत्वाज् ज्योतिष्टोमापूर्वकारणत्वात् । संमार्गाद्युद्देश्यतावच्छेदकं न ग्रहत्वम् आनर्थक्यात् किं तु प्रकृतापूर्वसाधनत्वं तच्च दूरस्थे ऽपि तुल्यमिति भावः ॥ ३३ ॥

निर्देशाद्व्यवतिष्ठेत ॥ ३४ ॥

ननु मैत्रावरुणं पयसा वृणातीत्यत्रापि पयसा योगः तुल्ययुक्त्या सर्वत्र स्यादत्राह । निर्देशादिति । निर्द्देशाद् मैत्रावरुणमिति उद्देश्यनिर्देशाद् व्यवतिष्ठेत तत्रैव ॥ ३४ ॥

चित्रिण्यादीष्टकानामग्न्यङ्गत्वम् । अधि॰ १२ ।

अग्न्यङ्गमप्रकरणे तद्वत् ॥ ३५ ॥

महाग्निचयने अखण्डा अकृष्णा इष्टका इति इष्टकाधर्माः अनारभ्य पठितचित्रिण्यादीष्टकाङ्गानि न, असन्निधानादिति बहिः पूर्वपक्षे सिद्धान्तमाह । अग्नीति । अप्रकरणे श्रुतम् अग्न्यङ्गं चित्रिण्यादयः तद्वद् अदाभ्यादिग्रहवद्धर्मान् लभते । हेतुः पूर्व एव तद्वदित्यनेन दर्शितः । ननु पूर्वन्यायेनैव गतार्थत्वात् पृथगधिकरणं व्यर्थमिति चेत् । उच्यते । क्व चिच्छाखान्तरे ज्योतिष्टोमप्रकरणे अदाभ्यग्रहपाठः, यस्यैवं विदुषो ऽदाभ्यो गृह्यतइति, इह तु तदपि नास्तीति विशेषः पूर्वपक्षः । निराकरणं तस्यापि पूर्ववदेव बोध्यम् ॥ ३५ ॥

क्रयाभिषवादीनां सोममात्रधर्मत्वम् । अधि॰ १३ ।

नैमित्तिकमतुल्यत्वाद् असमानविधानं स्यात् ॥ ३६ ॥

पूर्वोक्तफलचमस इज्याविकार इति साधितत्वादिज्याविकारसोमधर्माः क्रयादयः फलचमसार्था इति बहिः पूर्वपक्षे सिद्धान्तमाह । नैमित्तिकमिति । नैमित्तिकं *फलचमसद्रव्यम् असमानविधानं सोमतुल्यविधानं न स्यात् । अतुल्यत्वात् सोमस्य नित्यत्वेन फलचमसस्य राजन्यादिकर्तृकत्वनिमित्तकत्वेन अतुल्यत्वात् । यदि फलचमसार्थमपि क्रयादिधर्माः तर्हि नित्यत्वेन श्रुतिर्विरुध्येत । †तस्मादतिदेशेनैव धर्मप्राप्तिस्तत्रेति भावः ॥ ३६ ॥

---

* न्यग्रोधमुकुलरूपस्य फलस्य पिष्टं चम्यते यत्र स फलचमस इति माधवः ।

† नित्या अभिषवादिसंस्कारा नित्यं सोमं संस्कार्यं लब्ध्वा चरितार्थाः सन्तो नान्यं संस्कार्यमपेक्षन्ते । फलचमसस्तु सोमविकारत्वात्पश्चाद्भावी । ततो निरपेक्षाः संस्कारविधयो न तत्र प्रवर्तन्ते इति माधवः ।

प्रतिनिधिष्वपि मुख्यधर्मानुष्ठानम् । अधि· १४ ।

प्रतिनिधिश्च तद्वत् ॥ ३७ ॥

व्रीह्यभावे नित्यं प्रतिनिधिना ऽनुष्ठेयमिति षष्ठे वक्ष्यति । तथा च मुख्यप्रतिनिध्युभयसाधारणाः प्रोक्षणादयः उत मुख्यार्था एवेति संशये पूर्वपक्षमाह । प्रतीति । तद्वत् सोमधर्मवत् प्रतिनिधेरनित्यत्वादिति भावः ॥ ३७ ॥

न तद्वत्प्रयोजनैकत्वात् ॥ ३८ ॥

सिद्धान्तमाह । नेति । न तद्वत्, सोमधर्मवन्न प्रयोजनैकत्वात् पुरोडाशनिष्पत्तिरूपप्रयोजनैकत्वात् । अयं भावः । व्रीहिभिर्यजेतेत्यत्र शक्यार्थस्य व्रीहित्वजातेः होमकरणत्वं न संभवति अमूर्तत्वात् । नापि व्रीहीणाम् अवहननपेषणादिना तन्नाशात्, किं तु व्रीह्यवयवे लक्षणा वाच्या । मुख्याभावे क्रियमाणः प्रतिनिधिः सदृशतम इत्यपि षष्ठे वक्ष्यति । व्रीहीणामुत्पादकाः नीवाराणां च परमाणव एकजातयः । तैरेव परमाणुभिः संयोगविशेषेण कदा चिद् व्रीहयः कदा चिन्नीवाराः । यदा व्रीहिसंबन्धिनस्तदा मुख्या यदा व्रीह्यसंबन्धिनस्तदा अमुख्याः प्रतिनिधिरूपा इति व्रीहिपदतात्पर्यविषयत्वमुभयोरित्युभयार्था धर्माः ॥ ३८ ॥

अशास्त्रलक्षणत्वात् ॥ ३९ ॥

व्रीहिनीवारयोः प्रकृतिविकृतिभावो नास्तीत्यत्र हेत्वन्तरमाह । अशास्त्रेति । व्रीहिभिरिति श्रवणाद् व्रीहिरूपफलोपधायकाः परमाणवो हि परम्परया व्रीहित्वसंबद्धाः शास्त्रीयाः यागाङ्गभूताः । ये स्वरूपयोग्याः तत्रअशास्त्रीयाः । अतो न तयोः प्रकृतिविकृतिभाव इति भावः ॥ ३९ ॥

श्रुतेष्वपि प्रतिनिधिषु मुख्यधर्मानुष्ठानम् । अधि· १५ ।

नियमार्था गुणश्रुतिः ॥ ४० ॥

सोमाभावे पूतीकानभिषुणोतीति पूतीकानां शास्त्रविहितत्वात् तत्र प्रकृतिविकृतिभावः संभवतीति बहिः पूर्वपक्षे सिद्धान्तमाह । नियमेति । गुणश्रुतिः पूतीकश्रवणं पूर्वन्यायेन प्रधानसोमसादृश्येन अन्यद्रव्य-

स्यापि प्राप्तौ पूतीकानिति नियमविधिः । तथा च अशास्त्रीयत्वं तुल्यमिति भावः ॥ ४० ॥

दीक्षणीयादिधर्माणामग्निष्टोमाङ्गत्वम् । अधि० १६ ।

संस्थास्तु समानविधानाः प्रकरणाविभागात् ॥ ४१ ॥

ज्योतिष्टोमस्य संस्थाश्चतस्रः अग्निष्टोम उक्थ्यः षोडश्यतिरात्र इति । संस्था समाप्तिः । येन साम्ना क्रतुः समाप्यते तन्नाम्ना क्रतुव्यवहारः । अत्यग्निष्टोमाप्तोर्यामवाजपेयानां चतुर्ष्वेवान्तर्भावः तथा व्यक्तमाकरे । ज्योतिष्टोमेन स्वर्गकामो यजेतेति क्रतुफलं श्रूयते । तथा तत्तत्साम्ना क्रतुसमाप्तिरूपगुणफलान्यपि ज्योतिष्टोमाश्रयाणि श्रूयन्ते, पशुकाम उक्थ्यं गृह्णीयात्, षोडशिना वीर्यकामः स्तुवीत, अतिरात्रेण प्रजाकामं याजयेदिति । एवं सति दीक्षणीयादिधर्माः संस्थासाधारणाः उत ज्योतिष्टोमस्यैवेति संशये पूर्वपक्षमाह । संस्था इति । संस्था उक्ता ज्योतिष्टोमेन समानविधानाः प्रकृतिविकृतिभावशून्या इति यावत् । प्रकरणस्य ज्योतिष्टोमप्रकरणस्य अविच्छेदात् ॥ ४१ ॥

व्यपदेशश्च तुल्यवत् ॥ ४२ ॥

इतो ऽपि समानविधाना इत्याह । व्यपदेशेति । आज्यशेषप्रतिपत्तिं वदति शास्त्रम् । यद्यग्निष्टोमो जुहोति, यद्युक्थ्यः परिधौ निमार्ष्टि, यद्यतिरात्रो यजुर्वदन् प्रपद्यते यज्ञक्रतूनां व्यावृत्त्याइति । व्यपदेशः अङ्गैर्लक्षण्यं तुल्यवदङ्गानि दर्शयति। यथा यदि रथन्तरसामा सोमः स्याद् ऐन्द्रवायवाग्रान् गृह्णीयादितिवत् । अपि च आग्नेयमजमग्निष्टोमआलभते, ऐन्द्राग्नं द्वितीयमुक्थ्ये, ऐन्द्रं वृष्णिं तृतीयं षोडशिनि। द्वितीयस्य तृतीयस्य च दर्शनं सामानविध्ये घटते । उक्थ्ये हि द्वे निमित्ते स्तः अग्निष्टोमस्तोत्रमुक्थ्यस्तोत्रं चेति । तत्र द्वौ नैमित्तिकावाग्नेय ऐन्द्राग्नश्च । तेन द्वितीयदर्शनं नोपपद्येत, भवति तु तस्मात्सर्वार्थावस्थस्य ज्योतिष्टोमस्य दीक्षणीयादिधर्माः ॥ ४२ ॥

विकारास्तु कामसंयोगे सति नित्यस्य समत्वात् ॥ ४३ ॥

सिद्धान्तमाह । विकारा इति । संस्था ज्योतिष्टोमस्य विकाराः । कामसंयोगे सति पशुकामादिसंयोगे सति नित्यसमत्वात् । पूर्वं फलचमसस्थले दर्शितनित्यचमसानित्यगोदोहनतुल्यत्वात् । दीक्षणीयादयस्तु नित्यवच्छ्रुतामग्निष्टोमसंस्थां गृह्णीयुः । स्वस्य नित्यवच्छ्रुतत्वात् । नोक्थ्यादिकं तस्य कामनायां सत्यामेव प्रवृत्तेरनित्यत्वेन नित्यानित्यसङ्गविरोधस्य तुल्यत्वादिति भावः ॥ ४३ ॥

वचनात्तु समुच्चयः ॥ ४४ ॥

ननु पूर्वोक्तं द्वितीयतृतीयवचनं समानविधाववकल्पतइति तदुत्तरं किमत्राह । वचनादिति । इदं समुच्चयविधायकं वचनमपूर्वं न ज्ञापकमिति भावः ॥ ४४ ॥

प्रतिषेधाच्च पूर्वेषाम् ॥ ४५ ॥

इतो ऽपि ज्योतिष्टोमविकारा उक्थ्यादय इत्याह । प्रतिषेधादिति । पूर्वलिङ्गानां होमानां प्रतिषेधाद् होमनिषेधपूर्वकापूर्वगुणविधानात् । ज्योतिष्टोमस्यायं विकारः इति सिध्यतीति । अयं भावः । उक्थ्ये आज्यशेषेण होमो न कार्यः किं तु परिधौ मार्जनं कार्यमिति प्रतीयते । यदि प्रकृतिविकृतिभावो न स्यात् तदा होमस्यात्यन्तमप्राप्तत्वान्निषेधपूर्वकगुणविधानं न स्यादिति ॥ ४५ ॥

गुणविशेषादेकस्य व्यपदेशः ॥ ४६ ॥

ननु यद्यङ्गजातं ज्योतिष्टोममनुसरेत् तर्हि यद्यग्निष्टोमो जुहोतीत्यत्राग्निष्टोमशब्देन विशेषतया व्यपदेशः किमर्थः प्रकरणेन नित्ये ज्योतिष्टोमे होमस्य निवेशादत्राह । गुणेति । एकस्य ज्योतिष्टोमाधिकृतस्य गुणविशेषात् । अग्निष्टोमसाम्ना समाप्तेः फलाभावेन फलविशेषानधिकृतादग्निष्टोमसाम्ना समाप्तिरूपगुणविशेषाद् व्यपदेशः अनुवाद इति शेषः । पूर्वोक्तनित्यानित्यविरोधरूपदोषाद् नित्यस्वरूपाग्निष्टोमार्थत्वे सिद्धे ऽग्निष्टोमशब्दो ऽनुवाद इति भावः ॥ ४६ ॥

इति जैमिनिसूत्रवृत्तौ तृतीयस्याध्यायस्य षष्ठः पादः ॥ ६ ॥

इति प्रकृतिविकृतिविभागचिन्ता ॥ प्रक्रान्तेषु प्रकृत्यादिकारणेषु पुरुषार्थं एव हेतुर्न केनचित्कार्यते करणमिति वदतस्सांख्यस्यानन्यथासिद्धेश्श्रुत्यादिभिर्बाधमाह । "निश्शेषमिति" ।

सू० निश्शेषं कार्यतत्त्वं जनयति स परो हेतुतत्त्वैश्शरीरी तत्तत्कार्यान्तरात्मा भवति च तदसौ विश्रुतो विश्वरूपः । तेजोऽबन्नाभिधेयैर्बहुभवनमभिध्यानलिङ्गं च दृष्टं तस्मादीशाननिघ्नाः प्रकृतिविकृतयस्स्वस्वकार्यप्रसूतौ ॥ १६ ॥

यत्किंचित्सृज्यते येन जगत्सर्वं शरीरं ते इत्यादिभिरेतत्सिद्धम् । तत्सृष्ट्वा तदेवानुप्राविशदित्यादेश्चार्थमाह । तत्तदिति । अन्तर्यामिब्राह्मणसुबालोपनिषदादिप्रसिद्धमपि संवादयति तदसाविति विश्रुतः प्रधानपुरुषविलक्षणत्वेन विश्वशरीरकतया प्रत्यक्षश्रुतिसिद्धः क्वचिद्विश्वरूपशब्देनापि तत्तेज ऐक्षत बहु स्यां ता आप ऐक्षन्त बह्व्यः स्यामेति वाक्यविशेषाभिप्रेतं तद्व्यनक्ति । तेज इति । न ह्यचेतनमात्रस्य अनुत्पन्नकरणकलेवरस्य कर्मिणो वा तदानीं बहुभवनसंकल्पाश्रयत्वं युक्तं, गौणत्वं चात्रापि गौणश्चेन्नात्मशब्दात् इति सूत्रन्यायेन निरस्तं, प्रकृतं हि मुख्यमीक्षणमत्रापि तत्सम्भवे नान्यथा गतिर्युक्तेति भावः । उक्तनिगमनव्याजेन ।

विकारजननीमज्ञामष्टरूपामजां ध्रुवाम् ।
ध्यायते ध्यासिता तेन तन्यते प्रेर्यते पुनः ॥
सूयते पुरुषार्थश्च तेनैवाधिष्ठिता जगत् ।
मयाऽध्यक्षेण प्रकृतिस्सूयते सचराचरम् ॥

यत्किंचिद्वर्तते लोके सर्वन्तन्मद्विचेष्टितम् ॥

इत्यादिकमपि प्रख्यापयति । तस्मादिति ॥ १६ ॥

इति सर्वतत्त्वानामीश्वराधिष्ठानत्वेन कार्यकरत्वम् । तत्त्वान्तराणामीश्वराधीनत्वं व्यष्ट्याद्यारम्भवृत्तान्तैरपि व्यनक्ति ॥ द्वेधेति ॥

मू० द्वेधा भूतानि भित्त्वा पुनरपि च भिनत्त्यर्द्धमेकं चतुर्धा तैरेकैकस्य भागैः परमनुकलयत्यर्धमर्धं चतुर्भिः । इत्थं पञ्चीकृतैस्तैर्जनयति स जगद्धेतुरण्डादिकार्याण्यैदम्पर्यन्त्रिवृत्त्वश्रुतिरधिकगिरामक्षमैका निरोद्धुम् ॥ १७ ॥

स खल्वादिकर्ता स्वसृष्टानि पञ्च भूतानि द्विधा कृत्यैकैकं भागं स्थापयित्वाऽर्द्धान्तराणि चतुर्धा विभज्य तत्तद्भागैश्चतुर्भिर्भूतान्तराणामविभक्तान्यर्द्धान्तराण्यनुकलयति यथोक्तम् ॥

एवं जातेषु भूतानि प्रत्येकं स्युर्द्विधा ततः ।
चतुर्धा भिन्नमेकैकमर्धमर्धन्ततः स्थितम् ॥
व्योम्नोऽर्धभागाश्चत्वारो वायुतेजःपयोभुवाम् ।
अर्धानि यानि वायोस्तु व्योमतेजःपयोभुवाम् ॥ इति ।

ततः पञ्चधा विभक्तानां भागानां पञ्चस्वर्द्धान्तरेषु योजनमिति परोक्तं निरस्तम् । एवं पञ्चीकृतानां व्यष्टिकार्येषु विनियोगमाह । इत्थमिति । महदादिभिश्चेति भाव्यं महदाद्या विशेषान्ता इत्याद्युक्तेः । ननु हन्ताऽहमिमास्तिस्रोदेवता इत्याद्यारभ्य तासां त्रिवृतन्त्रिवृतमेकैकां करवाणि त्रिवृतन्त्रिवृतमेकैकामकरोत् इति त्रिवृत्करणे श्रुते पञ्चीकरणादिस्मृतिरन्यपरा स्यादित्यचाह ।

ऐदम्पर्यमिति । तात्पर्यमित्यर्थः अत्रानन्यपराणां भूयसां च बलीयस्त्वमनुक्तानामविरुद्धानामपेक्षितानामन्यतोऽपि ग्राह्यत्वं स्थापितम् । अभाष्यत च त्रिवृत्करणं पञ्चीकरणप्रदर्शनमिति ॥ १७ ॥

इति पञ्चीकरणप्रक्रिया ॥

ननु पञ्चीकरणाभिधानात्पञ्चसु भूतेषु स्वतस्सभागत्वं व्यष्टिसमष्टिभावो भूतांशानां चात्यन्तभिन्नत्वं समानन्यायतया प्रकृतिपर्यन्तेषु तत्त्वान्तरेष्वपि तत्सर्वं सिद्धम् । भूतभागानां चात्यन्तभेदो वेणुरन्ध्रश्लोके भाष्यत एवं सत्यणुसमाहार एव प्रकृतिरिति स्थिते महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्यामित्यौलूक्योपालम्भो न युक्त इत्यत्राह ॥ कार्यमिति ॥

मू० कार्यं नैवारभेरन्समधिकमणवस्सर्वतस्सम्प्रयुक्ता दिक्संयोगैकदेश्यान्न घटत इह ते दिक्कृतोऽप्यंशभेदः । बुद्धेस्त्वंशानपेक्षा स्फुरति विषयिता विश्रमस्त्वस्तु दृष्टेर्नो चेदारम्भकांशप्रभृतिषु नियता दुर्निवाराः प्रसङ्गाः॥१८॥

अयम्भावः अनन्यपरशास्त्रसिद्धेष्वर्थषु श्रुतेस्तु शब्दमूलत्वादिति न्यायेन गत्यन्तराभावे काचिद्गमनिका स्वीकार्या अनुमेयेषु तु यथादृष्टान्तं सिद्धिः अन्यथाऽतिप्रसङ्गात् । ततश्चावयविवादिनामवयवास्स्वभागैर्मिथस्संयुज्यावयविनमारभन्त इति सिद्धान्तः एतच्च द्व्यणुकावधि निर्विघातं द्व्यणुकारम्भे तु निरवयवा अणवोऽवयवा इति कल्पितं तत्रैवम्प्रसङ्गावतारः । यदि परमाणवस्स्वांशतस्संयुज्यावयविनमारभेरन् तदा तदंशो ऽवयवरूपस्तदन्योवा आद्ये तस्यापि तथेत्यनवस्था । अन्यस्तु स्वाभाविक औपाधिको वा पूर्वेच

भिन्नाभिन्नता स्यात् उत्तरत्रोपाधिसंबन्धेऽप्यंशभेदो दुर्वचः परिशेषात्तन्निरपेक्षसंयोगैरन्योन्यानाघ्रातभागभेदरहितैरणुभिरारम्भः स्यात् त्यक्तस्तर्हि सप्रतिघत्वविरोधः । सर्वेषु च परमाणुष्वेकपरमाणुप्रदेशमात्रावस्थितेषु स्वाधिकदेशव्यापिकार्यारम्भो* न स्यात् न खल्ववयवास्पृष्टे कुत्रचित् प्रदेशे ऽवयवी तिष्ठेत् अदृष्टेरनिष्टेश्च, अवयवनाशादवयविनाशे त्वाश्रमनाधारोऽवयवीति चेत् तथा कल्पयताऽपि त्वया पूर्वं तन्तुसंघातनवच्छिन्नप्रदेशे पटस्य वृत्तिर्न कल्पिता एवमधिकारम्भानुपपत्तौ मेरुसर्षपादिविचित्रभेदासिद्धिः सेयमसिद्धं सिषाधयिषतस्सिद्धहानिस्तथा चासिद्धसाधनं निर्मूलम् । ननु परिमितानां सर्वेषां दिग्भेदेन भागभेदे दृष्टे परमाणुष्वपि तथाऽङ्गीकारो दुर्वार इत्यत्राह । दिक्संयोगेति दिक्संयोगायत्तोऽपि हि भागभेदस्सावयवेष्वेव दृष्टः त्रसरेणोरपि त्वया सावयवत्वक्लृप्तेः निरवयवेषु तु विश्वव्याप्तैकदिक्तत्त्ववादिनस्ते तन्निबन्धना भागक्लृप्तिरशक्या तदुपाधिसंयोगात्तु स्यादपि यदि तत्राप्यंशानंशविकल्पद्वोभौ ऽतिलङ्घ्येतातस्सर्वदिगुपाधिसंयोगानां परमाणुषु पृथक् प्रदेशरहितानां कथमौपाधिकभागभेदापादकत्वं यदि चानंशभेदेन संयुक्ता उपाधयः क्वचिद्भागभेदकास्तर्हि परमाणव एव तथा किं न स्युः वृथा चैवमंशक्लृप्तिरभागेन संयोगावस्थितेरिति तदिदं सर्वमभिप्रेत्याहुः :

षट्केण† युगपद्योगात् परमाणोष्षडंशता ।
षण्णां समानदेशत्वे पिण्डः स्यादणुमात्रकः ॥ इति ॥

ननु बुद्धिः तावत्सर्वतन्त्रसिद्धा सांवृतीत्यपि हि ताम्माध्यमिको मन्यते सा चैकाऽप्यनेकविषया दृष्टेष्टाच निरंशा सा प्रत्येकं

* न सिध्येदिति पु॰ पा॰ ।
† षट्केनेति पा॰ ।

कात्स्न्येनांशतोवा विषयीकुर्यात् नाद्यः अन्यानुल्लेखप्रसङ्गात् । न द्वितीयः निरंशत्वादेव । तत्र चेत् कश्चित्समाधिः अणुष्वपि तथा स्यात् तत्राह । बुद्धेस्त्विति । तुश्शङ्कानिवृत्त्यर्थः विषयित्वं ह्यंशानपेक्षतयैव दृष्टं न ह्यन्यतोऽपि तस्यान्यथादृष्टिरतो यथोपलम्भमेकवदनेकोऽपि विषय एकस्या बुद्धेः । एवमेकस्य निरंशस्यानेकबुद्धिविषयत्वमपि निरूढम् । अवयव्यारम्भकसंयोगस्तु त्वयाऽपि न क्वचिदंशनिरपेक्ष उक्तः क्वचिद्विशेषाङ्गीकारे नियामकाभावः । अथ संघातारम्भकसंयोगेऽपि समः प्रसङ्ग इति न समः संयोगसाध्यसंघाताभावात् तत्स्वीकारे ह्यवयविवाद एव वरं संयोगस्तर्ह्येको ऽनेकवृत्तिस्सन्नंशानंशविकल्पदौस्थ्यं नातिक्रामेत् । न ह्यसौ नास्त्येव सिद्धयोस्साध्यतया दृष्टेरिति तदपि न विषयित्ववन्निस्तारात् सोऽपि हि द्वयोर्न स्वांशाभ्यां वर्तत इति दृश्यते एवं स्वामित्वादयोऽपि न प्रतिबन्दिः । अस्तु तर्हि संयुक्तप्रतिबन्दिः मूर्तैर्विभूनां संयोगोऽस्ति न वा न चेदन्यतरकर्मजसंयोगलोपः अविशेषात् । अस्ति चेत् यदि कात्स्न्येन विभुद्रव्यमेकेन स्पर्शवता संयुज्यते कथं स्पर्शवदन्तरेण तस्य संयोगः स्यात्, अंशतश्चेत् सावयवत्वप्रसङ्गः । न हि विभुद्रव्यस्यावयवित्वं संघातत्वं वा सुवचं पूर्वत्र स्पर्शवत्त्ववृतत्वकार्यत्वानित्यत्वादिप्रसङ्गात् । उत्तरत्र नानात्वभेदाभेदयोरन्यतरापातात् तत्र च विभुद्रव्यांशानां मिथस्संयोगोऽस्ति न वा अस्ति चेत् तत्रापि स एव प्रसङ्गः नास्ति चेदसंहतरूपता स्यात् । औपाधिको विभूनामंशभेद इति चेन्न । उपाधिसंयोगेऽपि अंशादिविकल्पानपायात् । निरंशेऽपि संयुज्यमानं स्वरूपेण तद्भेदोपाधिरिति चेन्न । स भेद उपाधिनाच्छिन्ने चेदवयवविश्लेषात्मा स्यात्, अच्छिन्नेतु भेदाभेदवाद एव शरणम् । अत एव स्वसमानपरिमाणेषु विभुप्रदेशेषु तत्तदुपाधिसम्ब-

न्यव्यवस्थेति निरस्तं तत्प्रदेशभेदस्यैव मृग्यमाणत्वात् । विभुद्रव्यमेव तत्तन्मूर्ततुल्यपरिमाणं जायत इति चेन्न । विरोधादुक्तदोषानतिक्रमाच्च । काल्पनिकांशभेदेन मूर्तसंयोग इति चेत्तर्हि वस्तुतस्त्वखण्डेनेत्युक्तं स्यात् । अंशभेदकल्पना च किं विभुद्रव्यस्वरूपमात्रे उत तदंशे एवेति दुस्तरो गर्तः निरंशानामपि स्वभावत एव विभूनामनेकमूर्तसंयोगक्षमत्वमिति चेदणूनामपि एतदस्तु अविशेषात् एवन्त्रसरेणुप्रतिबन्दिश्च भाव्येति । अत्रोच्यते यदि वयं प्रदेशवर्तिगुणनिन्हवाय प्रवर्त्स्यामस्तदा विभुप्रतिबन्द्या ऽणुष्वपि तत्सम्भवः प्रदर्श्येत किन्त्ववयव्यारम्भकाणामवयवैरेव संयोग इति नियमस्य त्वयैवान्येषु सर्वेष्वङ्गीकारात् कल्प्येष्वपि तत्प्रसङ्गो दुर्वार इति ब्रूमः न चान्यत्रैवायं नियम इति स्थाप्यं तादृशानामणूनामदृष्टेः अनन्यथासिद्धलिङ्गाभावाच्च । यदि विभज्यमानेष्वभावपरिशेषायोगात् परमाणुरपि सत्त्वरजस्तमसां सर्वापकृष्टस्संघात इति सांख्यमतस्य निर्मूलत्वात् महत्परिमाणतारतम्यविश्रान्तिवत् परिमाणतारतम्यत्वादणुपरिमाणतारतम्यविश्रान्तिरपि क्वचित्कल्प्येत तत्राह । विश्रमस्त्वस्तु दृष्ट इति । दृष्टे त्रसरेणौ विश्रमसम्भवे न मृग्यं ह्यन्यत् तथा च सिद्धसाध्यता । यदि त्रसरेणुरेव परमाणुस्स्यादप्रत्यक्षस्तर्हि स्यादिति चेत् । हन्त कुत्रैषा व्याप्तिः ।

सा*ध्यो ह्यन्यत्र दृष्टान्तस्साध्ये त्वन्योन्यसंश्रयः ।
त्रसरेणुः पराणुस्सन् किं नाध्यक्षो पराणुवत् ॥

चाक्षुषत्वप्रकर्षनिकर्षयोर्महत्त्वप्रकर्षनिकर्षानुविधानात् द्रव्यस्य चाक्षुषत्वं महत्त्वनियतमिति चेत् चाक्षुषावयवकस्यैव द्रव्यस्य

* सिद्धोह्यन्यद्दति पु॰ पा॰ ।

चाक्षुषत्वनियमदर्शनादचाक्षुषावयवकस्य त्रसरेणोरप्यचाक्षुषत्वप्रसङ्गे कस्ते निस्तारः अगत्येति चेत् भवतु कुतश्चिन्महत्त्वाभावेऽपि क्वचिदेवम् अत एव मूर्तत्वे सति महत्वात् त्रसरेणुः कार्यद्रव्यारब्ध इति कल्पनाऽपि निरस्ता अस्तु बाह्येन्द्रियग्राह्यत्वादेव तत्साध्यमिति चेन्न । विपक्षे बाधकाभावात् । अन्यथा त्रसरेण्वारम्भकस्यापि कार्यद्रव्यारब्धत्वकल्पनायां निवारकाभावात् । तत्र विपक्षे बाधकं नास्तीति चेत् अत्रापि तथेत्युक्तमेव अतो न द्व्यणुकमित्यपि किञ्चित् एवमारम्भकपरम्परायास्सावयवत्वं तद्व्यापकतयाऽभिमतमनित्यत्वं कुतश्चिन्महत्त्वं च प्रसज्यमानमनिवारणीयं स्यात् एतत्सर्वमभिप्रेत्याह । नो चेदिति । अणुषु स्वाभावसमानाधिकरणासंयोगसिद्धैरौपाधिकांशवत्त्वस्वीकारात् इष्टप्रसङ्गतां परिहर्तुमारम्भकशब्दः ॥ १८ ॥ नन्वेवं सर्वत्रावयवानन्त्यप्रसङ्गे सर्षपमहीधरादिपरिमाणवैचित्र्यं न स्यादिति शङ्कते ॥ स्यादिति ॥

सू० स्याद्भागानन्त्यसाम्ये परिमितिसमता सर्षपक्ष्माभृतोश्चेन्नैवं भागेष्वनन्तेष्वपि समधिकता स्थौल्यहेतुर्गिरेः स्यात् । व्यक्त्यानन्त्येऽपि जात्योः परतदितरतापक्षमासाद्यनन्तं श्रौतोपादानसौक्ष्म्यं न भवदभिमतं तत्प्रथिम्नश्श्रुतत्वात् ॥ १९ ॥

प्रसञ्जकस्याप्रयोजकत्वमित्यभिप्रायेण प्रतिवक्ति । नैवमिति । आनन्त्यसाम्येऽप्यवयवानां न्यूनाधिकभावेन परिमाणवैषम्योपपत्तिमाह ॥ भागेष्विति ॥ तच्चोत्तरमनन्तभागाभ्युपगन्तॄणां तत्प्रसञ्जकानां च समानम् ।

अथवंशानामनन्तत्वे गन्तॄणां तदतिक्रमः ।
कदाऽपि न स्यात्किं न स्याद्वेगातिशयवैभवात् ॥
द्युमणेरातपस्सर्पन्नुदयाद्रिशिखामणेः ।
तत्क्षणं किं न निर्भाति पश्चिमाद्रिशिखण्डकः ॥

आनन्त्याविशेषे कथं न्यूनाधिकभाव इत्यत्राह । व्यक्तीति । सत्ताप्रभृतिघटत्वादिपर्यन्तानां सर्वासां जातीनां त्रैकालिकानन्तव्यक्तिवृत्तित्वमविशिष्टं तथाऽपि न्यूनाधिकवृत्त्यैव परापरभावो युष्माभिः कल्पितः तद्वदिहापि स्यादिति भावः । निदर्शनान्तराण्यप्याह । पक्षेति । अनन्ताः पक्षा मासाश्च तथाऽपि मासापेक्षया द्वैगुण्यं पक्षाणामेष्टव्यम् आदिशब्देन क्षणप्रभृति परार्धादिसंग्रहः । अन्यच्च घटसमुदायाद् घटपटसमुदायोऽधिकः हिमवद्दक्षिणदेशान्मेरुदक्षिणदेशः एकात्मदुःखजातादनन्तात्मदुःखजातमित्यादि स्वयमूह्यम् नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीरा इति जगदुपादानं निरतिशयसूक्ष्मं श्रूयते अस्मदाद्यग्राह्यो दुस्त्यजः परमाणुरित्यत्राह । श्रौतेति । न हि सर्वन्यूनपरिमाणत्वं तत्सूक्ष्मत्वं पूर्वोक्तसर्वगतशब्देन श्रुत्यन्तरैश्च विरोधात् न च जात्यभिप्रायो ऽसावेकस्य सर्वोपादानत्वोक्तेस्सर्वव्यापित्वतस्सर्वज्ञजगत्कर्तृविषयत्वाच्च वाक्यस्य सूक्ष्मशब्दश्च न परिमाणविशेषनियतः । उक्तं च विभ्वीं प्रकृतिं महीयसश्च महदादीन् प्रक्र*म्य सांख्यैस्सौक्ष्म्यात्तदनुपलब्धिरिति । ननु त्रसरेणोरष्टमः षष्ठोवा भागः परमाणुरिति सर्वानुमतैश्शिल्पिनां शास्त्रैर्धर्मशास्त्रैस्तन्मूलस्मृत्या च परमाणुसिद्धिः स्यात् तत्र शिल्पादिशास्त्राणां परमाणावतत्परत्वात् मानोन्मानादिविशेषनिर्धारणं हि तत्र विधित्सितं ततोहे-

* प्रकृत्येति पु॰ पा॰ ।

(2) Of Manifestation.

"The lover finding his advances accompanied with loving assurances all indignantly declined by the young girl lying on the same bed, having her indignation roused on his naming her rival—the lover lying silent for a moment, the girl frequently looked back on him, fearing lest he should go to sleep." [*Amarūçataka*].

Here we have the Manifestation of Longing.

(3) Of Mixture.

[*Page* 134.] (3) "From one side attract me my love for good company and a sudden outburst of heroism on seeing this receptacle of penance and prowess; and from the other, this luxuriant embrace of the daughter of Videha cooling and lovely as sandal and the moon, slackens my vitality and withholds me (from going to meet Paraçurāma)."

Here we have a Mixture of Flurry and Joy.

(4) Of Variegation.

[*Page* 135.] (4) "On one hand this untainted lunar dynasty and on the other this improper deed! Oh, may she be seen again! The existence of people like me is said to be for the removal of evil! A face lovely even in anger! What shall the wise and sinless say? Ah, I cannot get at her even in a dream! O heart, be calm and pacified. Ah, who will that lucky young man be, who will kiss her?"

[*Page* 136]. Here we have a Variegation of Reasoning, Longing, Resolve, Doubt, Depression, Equanimity and Painful Reflection.

Emotion, pure and simple, has been described (in *Kārikā* 35 and exemplified. (*a*)

(*a*) Emotion without Variegation:—

"जाने कोपपराङ्मुखी प्रियतमा स्वप्नेऽद्य दृष्टा मया
मा मां संस्पृश पाणिनेति रुदती गन्तुम् प्रवृत्ता पुरः।
नो यावत् परिरभ्य चाटुकशतैराश्वासयामि प्रियाम्
भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृतः"—इत्यत्र विधिमत्यसूया ॥

Allayment &c sometimes the predominating factor.

37. Though *Rasa* is the principal object, yet these also sometimes attain predominance.

"*These*"—Allayment &c. of Emotion, "*Predominance*"—as the marriage procession of his servant is accompanied by the king—[where the king, though the naturally principal object, becomes subservient for the nonce to the bridegroom, his servant].

Suggestive Poetry of perceptible order of sequence is three-fold.

37-38.—[*Page* 137.] The Suggestive Poetry, wherein the order of sequence in the suggestion is perceptible and resembles the reverberating echo of sound, is said to be three-fold: (1) arising from the power of words, (2) from that of meaning, and (3) from that of both.

That in which the suggested meaning is similar to the reverberated echo, and arises from (1) the power of words, (2) the power of meaning, and (3) the power of both word and meaning.

[*Page* 138.] Of these—

38-39. The one arising from the power of word is two-fold, according as a Figure or Matter is predominantly signified by the word.

"*Matter*"—*i. e.* matter pure and simple—without any Figure of Speech.

The first kind is exemplified:

उल्लास्य कालकरवालमहाम्बुवाहं देवेन येन जरठोर्जितगर्जितेन ।
निर्वापितः सकल एव रणे रिपूणां धाराजलैस्त्रिजगति ज्वलितः प्रतापः ॥

(1) Suggestion of Embellishment arising from the power of word.

["You, roaring fiercely and brandishing your terrible and sharp (cloud-like) sword, extinguished in battle by means of your sword edge (torrents of water) all the glory (heat) of your enemies, emblazoning the three worlds."]

[*Page* 139.] Here in order to avoid irrelevancy in the denotation of the sentence, we must assume the relation of similarity to subsist between the objects, direct and indirect, (the former here being the action of the sword of the victor king, and the latter the action of cloud) ; hence the Figure 'Simile' (उपमा) is here suggested. (Similarly of other Figures of Speech, *e g.*):

[*Page* 140.] तिग्मरुचिरप्रतापो विधुरनिशाकृद्विभो मधुरलीलः ।
मतिमानतत्त्ववृत्तिः प्रतिपदपक्षाग्रणीर्विभाति भवान् ॥

["You shine—being as you are of an intense and an amiable glory, a killer of foes, of pleasing actions, and whose doings testify to real pride and resolve—ever the leader of your followers."]

[*Page* 141.] Here we find the 'Semblance of Contradiction' (विरोधाभास) suggested by (*a*) breaking up the words into two.

And again :

अमितः समितः प्राप्तैरुत्कर्षैर्हर्षद प्रभो ! ।
अहितः सहितः साधुयशोभिरसतामसि ॥

["O Lord, you are a source of joy to us, great as you are with the glorious victories obtained in war ; and associated with good fame, you are an enemy of the wicked."]

[*Page* 142.] Here (*b*) also 'Semblance of Contradiction.'

Again :

निरुपादानसम्भारमभित्तावेव तन्वते ।
जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने ॥

(*a*) To explain :—तिग्मरुचिरप्रतापवान्=तिग्मरुचिः (Sun) and अप्रतापवान् (without brightness). विधुरनिशाकृत्=विधुः (Moon) and अनिशाकृत् (not *the doer of night*, another name of the Moon). विभः=विगता भा यस्य, one whose brightness has disappeared. मधुरलीलः=मधुः (Spring) and अलीलः (without sportiveness). मतिमानतत्त्ववृत्तिः=मतिमान् (intelligent) and अतत्त्ववृत्तिः (whose subject is unreal) ; and similarly प्रतिपदपक्षाग्रणीः=प्रतिपत् (first day of each Paksha) and अपक्षाग्रणीः (not the beginning of Paksha).

(*b*) अमित (immeasurable) and समित (with measure) and अहितः (without a friend), सहितः (with friend). Here, the Pradipa—"The contradiction would have been expressed by the use of the particle अपि, without which it is simply suggested.

["Reverence to that Holder of the Trident, praiseworthy on account of the digit of the moon (he wears), who paints the Mundane picture without a board and without any accessories in the shape of instruments, colours, etc."]

Here 'Contrast or Dissimilitude (व्यतिरेक) is suggested.

[*Page* 143.] (*a*) The Embellished is also called an Embellishment (Figure), as we say 'a Brāhmaṇa-mendicant.'

Of matter by word.

[*Page* 144]. To exemplify the Suggestion of Matter, pure and simple:

पंथिअ ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे ।
उण्णअ पओहरं पेक्खिउण जइ वससि ता वसु ॥

["O traveller, there is not even a single bedding in this village, an abode of stones; but seeing the clouds very high (gathering) if thou stayest, thou mightst stay."]

Here the suggested meaning is, you may stay if you are able to enjoy my company.

[*Page* 145.] Again:

शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र यस्मै त्वम् ।
यत्र प्रसीदसि पुनः, स भात्युदारो ऽनुदारश्च ॥

["O King! one on whom you are angry, him kills Sa[illegible] as well as the thunder. With whom, on the other hand, you are pleased, he shines lofty, and has his wife obedient to himself."

(*a*) Here the Sāhityadarpaṇa [257 Com.]:—

"The suggested meaning though strictly what is ornamented, is figuratively spoken of here as the ornament (with reference to its being an ornament in another condition; *i. e* when it is expressly used, and not hinted through the suggestive power of words) just as we use the word 'Brāhmaṇa-mendicant,' etc., etc. *Trans.* p. 144. With this cf. the following from the Pradipa.—" It is objected—in the above example are similarity, etc. the principal things or not? If they are, whence their character of Embellishment, they embellishing nothing else; if they are not then the suggestion having become subordinate, it cannot be called Poetry suggestive. To this it is replied—At first, *i. e.* in these expressive state, these were Embellishments, and hence they are even now called the same, as the Bauddha, formerly a Brāhmaṇa, is called a Brāhmaṇa.........Thus Similarity, etc. are Embellishments in-as-much as they are subservient to Unction, and they are predominant, with reference to their expressiveness."

Here the meaning suggested is—

(*a*) 'Even contradictory agencies unite to fulfil your desires.'

39-41 (*contd.*)—[Page 146]. The suggestive meaning arising from the power of meaning is three-fold—(1) Self-possible; (2) Established by the poet's bold assertion; and (3) (Established by the assertion) of some character portrayed by him. This becomes sixfold, inas-much as each of the above is either a Figure of Speech or simple Matter. And as each of these six suggests either a Figure or simple Matter, this (suggestion arising from the power of meaning) becomes twelve-fold.

—Suggested meaning arising from power of word is three-fold.

(1) *Self-possible*—*i. e.* not due to mere assertion, but owing its existence even in the external world, (to say nothing of the internal), to its own inherent capability.

(1) The Self-possible.

(2) *Established by the poet's bold assertion*:—*i. e.* a pure creation of the poet's imagination, not existing in the external world.

(2) That established by the poet's imagination.

And (3) *Created by a speaker figured by the poet.* These two with the first make the three. And each of these being either simple Matter or Figure, the *Suggestive* becomes sixfold. The suggested of each of these six, being either simple Matter or Figure, the suggested meaning arising from the power of meaning becomes twelve-fold.

(3) Created by a character figured by the poet.

These are exemplified as under:—

"He is a first-rate *lazzarone*, foremost among the cunning, and 'O Child! he has an immense fortune,' this being said, she had her face cast down, and her eyes bloomed."

I. Self-possible—(*a*) Matter suggested by Matter.

(*a*) शनि and अशनि (no Çani) and उदार and अनुदार.

[*Page* 148.] Here the matter suggested by matter is: 'He is just the man for my embraces.'

(*b*) Figure by Matter.

"O happy woman thou must be, who can'st sweetly and coquettishly converse even in the intervals of dalliance. As for myself my friends! I swear if I remember anything after my beloved brings his hand to the knot of my waist-cloth."

[*Page* 149.] Here the Figure suggested by Matter is "Contrast or Dissimilitude,' (व्यतिरेक), the meaning being—'thou art not happy and fortunate, but I am so!'

[*Page* 150.] "In whose hand the sword was seen in battle by heroes, to resemble Kāli's wrath-red glance,—the sword reddened and corroded with blood on striking at the (enemy's) gate, like the fore-head of elephants blind through intoxication."

(*c*) Matter by Figure.

Here the Matter that 'this will destroy the whole force of the enemy in a trice, is suggested by the Figure Simile.

[*Page* 151.] "Who, biting his under-lip with rage in battle, freed the coral lips of his enemies' wives from the trouble of the deep wounds caused by the teeth of their lords."

(*d*) Figure by Figure.

Here by the Figure 'Contradiction' (*virodha*) is suggested the Figure 'Equal Pairing' (*Tulyayogitā*). The meaning being—'The enemies were killed as soon as the lips were bitten.' Or 'Poetical Fancy' (*utprekshā*) may be said to be suggested; in this case, the king's idea that 'let others profit by my loss,' being hinted. In these examples the suggestive is *self-possible.*

[*Page* 153.] "Hearing whose fame being sung by the goddesses on Kailāça's highest peak, accompanied by the melody of the flute, the Elephants of the Quarters, casting side-long glances, take it to be the stem of sweet lotus (from its pure whiteness), and hence extend their trunks to their ear."

II. Established by the poet's bold assertion—(*a*) Matter by Matter.

Here, by Matter is suggested Matter, the sense being—your fame is wonderful, in-as-much as it produces such ideas, even in beasts devoid of any idea of the meaning of the song.

(*b*) Figure by Matter.

[*Page* 154.] 'Victory was so forcibly held by her locks by the king that his enemies were drawn to the neck (*i. e.* embraced) by the caves.'

Here the 'Poetic Fancy' (*utprekshā*) is that the caves having, as it were, their lust aroused by seeing the holding of the locks, catch hold of the necks of the king's enemies;' and the Figure 'Poetic Reason' may be said to be suggested; the sense in this latter case being 'that his enemies, seeing the unimpeded and continuous course of his victory in battle, flew and took shelter in the caves.' And lastly we may have the Figure 'Concealment' (अपह्नुति), the sense in that case being—'they did not fly away, but fearing trouble from him (probably) they took shelter in the caves.'

(*c*) Matter by Figure.

[*Page* 155.] "The lover being on the point of embracing strongly, the (wounded) sense of honour of indignant women slowly moves away, being afraid, as it were, of the firm embrace."

[*Page* 156.] Here by the Figure 'Poetical Fancy' (उत्प्रेक्षा) is suggested the matter that 'they return each other's embraces, &c.'

(*d*) Figure by Figure.

"The eloquence of the poet is even triumphant, mimicking Brahmā, as it were, seated as it is in the lotus-like mouth of the poet, and exhibiting a universe of quite a unique character."

Here by 'Poetical Fancy' is suggested the Figure 'Contrast or Dissimilitude,'—the sense then being that 'the eloquence of the poet, having an animate (intelligent) seat, is the author of a unique and charming creation.'

Among these the *suggestive* owes its existence only to the poet's bold assertions.

III. Created by a speaker figured by the poet.

(*a*) Matter by Matter.

[*Page* 157.] "The wind from the Malaya Mountains though yet only new-born, has become strong as if full of youth, by contact with the hot breath of wives suffering from pangs of separation—the wind which had fallen on the lower portion of Hēmakūta and had been thinned by the chewing (inhalations) of the large and rising hoods of female serpents exhausted in dalliance."

[*Page* 158.] Here Matter is suggested by Matter, the sense being—'the wind strengthened by the breath is capable of doing everything.'

(*b*) Figure by Matter.

"Steadiness, having consoled my feeling of self-respect, suddenly vanished at the exciting moment of my lover's visit."

[*Page* 159.] Here the Figure 'Peculiar Causation' (विभावना) is suggested by matter, the sense being—'She became reconciled even before the lover had made any requests.' Or the suggested Figure may be 'Poetical Fancy' (उत्प्रेक्षा), the sense in this case being—'Steadiness could not bear the exciting charm of the lover's visit.'

(*c*) Matter by Figure.

"This (redness) is the reward in the form of a red dress given to my eyes by the fresh marks of nails and teeth on your body; and these are not seized with wrath."

[*Page* 160.] Here, on the question—'Why do you bear angry eyes?' being put, the Figure "Reply" (उत्तर) suggests the Matter that 'it is not that you are only hiding the fresh marks of nails, &c., but that I have also become an object of their favour.'

(*d*) Figure by Figure.

"O thou happy one! being unable to get a place in your heart, filled, as it is, with thousands of women, she devotes herself exclusively to making her body thinner every day."

टी० "प्रतीकोपासने"ष्विति, तर्हि ब्रह्म-शब्दनिर्देशः कथमित्यत्राह "ब्रह्म त्वि"ति, अनन्तरसूत्रशङ्कामाह "नन्वि"ति, । सू० ब्रह्मदृष्टिरुत्कर्षात् ॥ ५ ॥ अचेतनमनःप्रभृतेरुपास्यत्वासम्भवोऽभिमानिदेवतोपास्यत्वेन परिहृत इति भावः । इतरे त्रयोऽपि ब्रह्मदृष्टिरिति सूत्रमधिकरणान्तरमाहुः नियामकाभावात् पूर्वपक्षमुत्कर्षात् सिद्धान्तमाहुः, तदयुक्तं तादर्थ्यनैरन्तर्य्याभ्यामेकाधिकरण्यसिद्धेः । परे तु न प्रतीक इत्यत्र सिद्धान्तयुक्तिमेवमाहुः प्रतीकानां ब्रह्माभिन्नत्वात्, तस्याऽप्यात्मत्वमिति चेत् विकारस्वरूपोपमर्द्देन ब्रह्मत्वं स्यात् यथा जीवस्य जीवभावप्रविलयेन ब्रह्मत्वं स्वस्तिकस्य तदाकारोपमर्दन स्वर्णात्मकत्वम्, एवं स्वरूपोपमर्दे सति प्रतीकस्यैवाभावात् तस्यात्मत्वमेव न स्यादिति तदप्ययुक्तं जीवस्य ब्रह्मशरीरतया तत्पर्य्यन्तत्वेन जीवभावप्रविलयेन विना ब्रह्मतादात्म्यसिद्धिवत् प्रतीकानामपि ब्रह्मशरीरत्वोपपत्तेस्तदभावप्रसङ्गाभावात् । अपरे तु वासो ददाति अन्नो ददातीत्यत्र तन्तुकाष्ठादीनामिव स्नन्नाद्युपासने ब्रह्मणश्चोदितत्वाभाधादनुपास्यत्वमिति तदयुक्तं तत्र तन्तुकाष्ठादिनिर्द्देशाभावादिह तु ब्रह्मसामानाधिकरण्याच्च दृष्टान्तवैषम्यात् अतोऽनादरः । ननु दृष्टिविधित्वे सिद्धे हि ब्रह्म वा मनो वा दृष्टिविशेषणमिति विशयः प्रतीकस्यापि ब्रह्मशरीरतया तत्त्वोपासनपरत्वे सम्भवति कथमतत्त्वोपासनपरताऽङ्गीकारेण ब्रह्मणोदृष्टिविशेषणत्वपरं द्वितीयसूत्रं घटते? उच्यते इति-करणवैयर्थ्यं हेतुः उद्देश्यत्वज्ञापकेन प्रथमनिर्देशेन विशेष्यतावगमश्च क्वचित्प्रतीकगतद्वितीयाविभक्तिरपि हेतुः ॥ प्रतीकाधिकरणं समाप्तम् ॥

आदित्यादिमत्यधिकरणम् ।

सू० आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥

भू० "य एवासौ तपति तमुद्गीथमुपासीते"त्यादिषु कर्माङ्गाश्रयेषूपासनेषु संशयः किमुद्गीथादौ कर्माङ्गे आदित्यादिदृष्टिः कर्त्तव्या? उतादित्यादिषूद्गीथादिदृष्टिरिति, उत्क-

ष्टदृष्टिर्निकृष्टे कर्त्तव्येति न्यायात् उद्गीथादीनां च फल-साधनभूतकर्माङ्गत्वेनाफलेभ्य आदित्यादिभ्य उत्कृष्टत्वादादित्यादिषूद्गीथादिदृष्टिरिति प्राप्तेऽभिधीयते "आदित्यादिमतयश्चाङ्ग" इति, च-शब्दोऽवधारणे क्रत्वङ्ग उद्गीथादावादित्यादिदृष्टय एव कार्याः, कुतः ॥

टी० सू० आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥ देवताया उत्कर्षाद् दृष्टिविशेषणत्वमुक्तं, तदुत्कर्षाक्षेपेण कर्मण एवोत्कर्षशङ्कयाऽवान्तरसङ्गतिः, क्रत्वङ्गाश्रयोपासनेषु किमादित्यादावुद्गीथदृष्टिः? उतोद्गीथादावादित्यादिदृष्टिः? फलसाधनतयोत्कर्षः किमादित्यादेरुतोद्गीथादेः? उद्गीथादेश्चेदादित्यादावुद्गीथादिदृष्टिः, आदित्यादेश्चेदुद्गीथादावादित्यादिदृष्टिः कार्य्या स्यात्। ननु फलसाधनत्वं देवताया इति पूर्वमेव सिद्धं स एवैनं भूतं गमयतीति तत्कथमुद्गीथादेः फलसाधनत्वशङ्कया पूर्वपक्षोत्थानं, सत्यं फलसाधनतया विहितत्वात् प्रधानस्य कर्मणः काष्ठानां ज्वालावद्देवताप्रीतिरवान्तरव्यापारमात्रमित्यप्रधान्यामाशङ्क्यते ब्रह्ममतिवदादित्यादिमतयोऽपीति च-शब्दार्थः मनोब्रह्मेत्युपासीतेत्यत्रोपास्यं प्रथमं निर्दिष्टं दृष्टिविशेषणं चरमनिर्दिष्टम्, एवमत्रापि य एवासौ तपति तमुद्गीथमित्युद्गीथस्य चरमनिर्द्देशात् स दृष्टिविशेषणं देवतायां गदृत्तयोगात् प्राथम्याच्चोद्देश्यत्वमित्यपि पूर्वपक्षयुक्तिरभिप्रेता । अफलेभ्यः— अफलसाधनेभ्यः, राद्धान्ते तु आदित्यादिदेवताराधनाद्वारेणेति "अर्यम्णे चरुं निर्वपेदित्यादि द्रष्टव्यं देवतायाः स्थिरत्वेनाव्यवहितसाधनतया लोकदृष्टसेव्यसेवान्यायेनाराधनस्याराध्यदेवताप्रधानत्वाच्च देवतोत्कर्षसिद्धेर्यदृत्ताद्यस्वारस्यं सोढव्यमिति भावः । परे तु उद्गीथादित्यादीनां दृष्टिविशेषणत्वमनियमेन स्यात् नियामकाभावादिति च पूर्वपक्षमाहुः नियामकसद्भावात् तदनादरः, एवं च पूर्वपक्षान्तरमाहुः उद्गीथादीनां कर्मसमवायितया क्रियारूपाणां फलसाधनतयोत्कर्षः इयमेवर्गग्निः सामेत्यत्र तदेतदस्यामृच्यध्यूढं सामेत्यृक्साम-शब्देन पृथिव्यग्न्यभिधा-

नञ्च ऋक्सामाध्यासनिबन्धनं, इतरत्र हि राजाध्यासाद्राजशब्दो न राज्ञि तत्र-शब्दः, तत्र तत्रध्यासाभावात् लोकेषु पञ्चविधं सामोपासीतेति लोकानामधिकरणत्वश्रवणात् तत्र कृत्वङ्गाध्यासः पृथिवी हिङ्कार इति प्रथमनिर्देशाच्च पृथिव्याद्युद्देशेन हिङ्कारत्वादिदृष्टिविधिरिति पूर्वपक्षहेतव उपन्यस्ताः । यदेव विद्यया करोति तदेव वीर्य्यवत्तरमिति विद्यया कर्मणो वीर्य्यवत्तरत्वं श्रुतं न सिद्धरूपद्रव्यस्य, अत आदित्यादिमतिभिरुद्गीथादिकर्मस्वतिशय उपपद्यते न तूद्गीथादिमतिभिरादित्यादीनां कर्मणो ह्यपूर्वसन्निकर्षः, न त्वादित्यादीनामसाधितस्य करणत्वायोगात्, अतः कर्मस्वतिशयावहत्वादादित्यादिप्रधानकर्मफलस्यादित्यादिप्राप्तिलक्षणत्वात् फलात्मकतया चादित्यादीनां प्राधान्यम्, ओमित्येतदक्षरमुद्गीथमुपासीतेत्युपक्रमे द्वितीयाश्रुत्योद्गीथादिरुपास्यत्वेनावगतः, इयमेवर्गिति एव कारोपश्लेषादृचि पृथिवीत्वं विधेयमवगतं, य एवं विद्वान् साम गायतीत्यङ्गाश्रयविज्ञानमुपसंहृतम्, अत आदित्यादेर्दृष्टिविशेषणत्वं पृथिव्यामृक्-शब्दो लाक्षणिकः संबन्धमात्रमपेक्षते न तूत्कर्षमिति न तन्निबन्धनः सामात्मना लोकमुपासीतेति विभक्तिद्वयविपरिणामादपि लोकात्मना सामोपासीतेति सप्तमीमात्रविपरिणामो वरं, पृथिवी हिङ्कार इत्यादि-

सू० उपपत्तेः—आदित्यादीनामेवोत्कृष्टत्वोपपत्तेः, आदित्यादिदेवताराधनद्वारेण हि कर्मणामपि फलसाधनत्वम्, अतस्तद्दृष्टिरुद्गीथाद्यङ्गे । आदित्यादिमत्यधिकरणं समाप्तम् ॥

क्रमो बहूपपत्त्यनुरोधेन नेयः, अतोऽङ्गेष्वादित्यादिदृष्टिविधिरिति सिद्धान्तयन्ति, उपपत्तेरिति कस्योपपत्तिरित्यपेक्षायामुत्कर्षस्य पूर्वसूत्रप्रकृतत्वात् तस्योपपत्तेरिति व्याख्यानमुचितं न त्वर्थान्तरस्य, उत्कर्षश्च प्रागुक्तलक्षणः कर्मस्वतिशयाधायकत्वेन फलात्मकत्वेन च प्राधान्यमुत्कर्षान्तर्गतम् उद्गीथेनोपक्रमः साम्नोपसंहारश्च सर्वेषु देवतादृष्टिविधिष्वननुगताविति व्यापक एव हेतुर्भाष्येऽभिहितः, लोकेषु पञ्चविधं साम सप्तविधं साम-

त्यादिषु विभक्तिद्वयविपरिणामाभावादेव लोकस्य दृष्टिविशेषणत्वोपपादनं मन्दं, न हि द्वितीयाविभक्त्यार्थोऽनन्वितः लोकादिशब्दानां देवतापरत्वे प्रामाणिके सत्युत्कर्षादेव देवताया दृष्टिविशेषणत्वं न चेदन्यथाप्रतिपन्नस्वीकारेऽप्यविरोधः पृथिवी हिङ्कार इत्यादिरप्येतेन व्याख्यातः अतोभाष्योक्तप्रकारेण सारतरयुक्त्यभिप्रायं सूत्रम् । अन्ये तु फलसाधनतयोत्कर्षादेव पूर्वपक्षं कृत्वा एवं सिद्धान्तमाहुः उद्गीथादिष्वादित्यादिदृष्टिः कर्मसमृद्ध्यर्थेषूपासनेष्वधिकृताकारोपपत्तेः, आदित्यादीनां कर्माङ्गदृष्ट्योपास्यत्वे हि क्रत्वधिकृतेनैव कर्त्तव्यत्वनियमो न स्यात् तन्नियमश्च यदेव विद्यया करोतीति श्रुत्याऽवगम्यते "य एवासौ तपति तमुद्गीथमुपासीत य एवायं मुख्यप्राणस्तमुद्गीथमुपासाञ्चक्रिर" इत्यादिषु यच्छब्दयोगप्राथम्याभ्यामुद्देश्यत्वावगमादादित्यादीनामुपास्यत्वमिति चेत् न ओमित्येतदक्षरमुद्गीथमुपासीतेत्युद्गीथोपास्यताया उपक्रमसिद्धत्वात् क्रत्वधिकृताकारोपपत्तेश्च कर्म्मसमृद्धिव्यतिरिक्तफलेष्वङ्गाश्रितेषूपासनेषु लोकेषु पञ्चविधं सामोपासीतेत्यादिषु क्रत्वधिकृताधिकारसम्बन्धे प्रमाणाभावात् न क्रत्वङ्गेषु देवतादृष्टिरिति नियमः, तत्रैवं निर्वाहः त्रिविधमुपासनं भूतार्थमध्यासः सम्पदिति, भूतार्थं यथार्थविषयं न तत्र किं चिन्निरूप्यम्, अध्यासोऽन्यस्मिन्नन्यधर्माध्यासः, यथोद्गीथेऽसुरपाप्मविध्वंसनादयः प्राणधर्मा भयतमोपहत्यादयः आदित्यधर्माः, अन्यसादृश्यानुसन्धानं सम्पत्, यथा पञ्चविधत्वसप्तविधत्वाद्यनुसन्धानं, तच्च वाक्येनैवोपपादनादवगम्यते, अध्याससम्पत्तौ च निकृष्टगतधर्मतत्सादृश्यविषये चेदुपास्य निकृष्टं कृतं स्यात्, उत्कृष्टगतधर्मतत्सादृश्यविषये चेदुपास्यमुत्कृष्टं कृतं स्यात्, ततो महत्कृतमेवोपास्यं तत्र दृष्टिविशेषणनिर्णयस्तु उपक्रमोपसंहारवाक्यशेषप्राथम्ययच्छब्दयोगमहत्त्वाद्यनुरोधेन वर्णनीयः लोकेषु पञ्चविधं सामोपासीतेत्यादिषु सामप्रतियोगिकं सादृश्यं लोकेषु विधीयते प्रथमनिर्दिष्टत्वात् सप्तम्याऽञ्जस्याच्च साम-शब्दः सामसादृश्यपरः लोकसामशब्दयोरन्यतरस्य लक्षणाया अवर्जनीयत्वेऽपि साम्नि लोकसादृश्ये विधित्सिते सप्तमी न घटते इयमेवर्गग्निरित्यत्रापि पृथिव्या ऋगात्म-

क्रत्वं विधित्सितं निर्द्देशप्राथम्यात् एवकारान्वयस्य उत्तर एव वेदिरित्यत्र व्यभिचारात् पृथिव्येव नान्यगस्तीति वाक्याशेषश्चेत् पृथिव्या ऋगात्मकत्वं विधेयं स्यात्, ऋक् पृथिव्येव न पृथिव्या अन्येति वाक्यशेषश्चेदृचः पृथिवीत्वविधानं स्यात् कर्मसमृद्ध्यर्थोपासनव्यतिरिक्तेषु न कर्माङ्गेषु देवतादृष्टिनियमः कर्मसमृद्ध्यर्थेषु तूपासनेषू क्रत्वङ्गेषु देवतादृष्टिरिति स्थितिरिति, अत्रापि क्रत्वङ्गव्यतिरिक्तेषु देवतादृष्टिनियमाभावोऽनुपपन्नः अध्याससम्पत्त्योर्विक्रष्टधर्मसादृश्यविषयत्वानुपपत्तेः स्वयमेव प्रतिपादितत्वात्, अतः क्रत्वङ्गविषयेष्वतद्विषयेषु चोपासनेषु देवताविवक्षायाः सुव्यक्तत्वे देवताया उत्कर्षादेव दृष्टिविशेषणत्वं, विवक्षाविरहे यथाश्रुताङ्गीकारश्च युक्त इति उत्कर्ष एवोपपत्तिशब्दैर्विवक्षितो हेतुर्भवितुमर्हति । अर्थस्वाभाव्यात् प्रकृतत्वाच्च, अतः सर्वत्रोत्कर्षस्यैव दृष्टिविशेषणत्वे प्रयोजकत्वात् क्रत्वधिकृतानुष्ठेयत्वमप्रयोजकमित्युपपत्तिशब्दस्योत्कृष्टतोपपत्तिपरत्वमुक्तं भाष्ये, क्रत्वङ्गविषयेषु क्रत्वधिकृतानुष्ठेयत्वमप्यभ्युच्चयहेतुः स्यात्सर्वत्राप्युत्कर्षानुगुणमेव दृष्टिविशेषणत्वनिर्णयो युक्तः । आदित्यादिमत्यधिकरणं समाप्तम् ॥

आसीनाधिकरणम् । **सू० आसीनः सम्भवात् ॥ ७ ॥**

भा० मोक्षसाधनतया वेदान्तशास्त्रैर्विहितं ज्ञानं ध्यानोपासनादिशब्दवाच्यम् असकृदावृत्तं सन्ततस्मृतिरूपमित्युक्तं, तदनुतिष्ठन्नासीनः शयानः तिष्ठन् गच्छंश्च विशेषाभावात् अनियमेनानुतिष्ठेदिति प्राप्ते उच्यते "आसीन इति, आसीन उपासनमनुतिष्ठेत् कुतः सम्भवात् आसीनस्यैव ह्येकाग्रचित्ततासम्भवः स्थितिगत्योः प्रयत्नसापेक्षत्वात्, शयाने च निद्रासम्भवात् पश्चाद्वधारणप्रयत्ननिवृत्तये साश्रय आसीनः कुर्यात् ॥

सू० ध्यानाच्च ॥ ८ ॥

निदिध्यासितव्य इति ध्यानरूपत्वादुपासनस्यैकाग्रचित्तताऽवश्यम्भाविनी, ध्यानं हि विजातीयप्रत्ययान्तराव्यवहितमेकचिन्तनमित्युक्तम् ॥

टी० सू० आसीनः सम्भवात् ॥ ७ ॥ अवान्तरसङ्गतिमाह "मोक्षे"ति, अनन्तराधिकरणयोः प्रासङ्गिकत्वात् परमप्रकृतेन प्रधानभूतेन ब्रह्मोपासनेन सङ्गतिरुक्ता। यद्वा द्रष्टुपासनानामप्यासनसापेक्षत्वेऽप्यासनसमर्थनहेतोरैकाग्र्यस्याद्याधिकरणसमर्थितत्वात् तेन सङ्गतिरुक्ता किमासीनः न्तये ?उतासीनः शयानस्तिष्ठन् गच्छन् वे? ति, किं गमनादिषु ध्यान सम्भवति न वेति सम्भवति चेदासनानियमः न सम्भवति चेत्तनियमः, उपासनसम्भवादित्यतोऽप्यैकाग्रतासम्भवादित्युचितम्, उपासनसम्भवादित्युक्तेऽपि कथमित्यपि शङ्काया एकाग्रताभिप्रायेण शमयितव्यत्वात्, यत्रैकाग्रता तत्र काग्रतायाः सन्निहितत्वात् योग्यत्वाच्च, उपविश्यासने युञ्ज्यादिति स्मृतिवचनस्य मनोऽनुकूलताभिप्रायतां मत्वा पूर्वपक्षी प्रत्यवतिष्ठते तदवश्यं भावात्तत्परिहारः। सू० ध्यानाच्च ॥ ८ ॥ ध्यानादिति भावप्रधाननिर्देश इत्यभिप्रायेणोक्तं ध्यानरूपत्वादिति, स्थितिगत्योर्विजातीयप्रत्ययसम्भवात्तदैकाग्र्यविरोधिगत्यादिकर्मिन्त्यर्थः ॥

सू० अचलत्वं चापेक्ष्य ॥ ९ ॥

भा० निश्चलत्वं चापेक्ष्य पृथिव्यन्तरिक्षादिषु ध्यानवाचोयुक्तिर्दृश्यते "ध्यायतीव पृथिवी ध्यायतीवान्तरिक्षं ध्यायतीव द्यौः ध्यायन्तीवापो ध्यायन्तीव पर्वताः", इति, अतः पृथिवीपर्वतादिवदेकाग्रचित्ततया निश्चलत्वमुपासकस्यासीनस्यैव सम्भवेत् ॥

सू० स्मरन्ति च ॥ १० ॥

स्मरन्ति चासीनस्यैव ध्यानं "शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः । नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् । तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः । उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये" इति, ॥

सू० यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥

एकाग्रतातिरिक्तदेशकालविशेषाश्रवणादेकाग्रतानुकूलो यो देशः कालश्च स एवोपासनस्य देशः कालश्च, "समे शुचौ देशे शर्करावन्हिवालुकादिविवर्ज्जित" इति वचनमेकाग्रतैकान्तदेशमाह न तु देशं नियच्छति, मनोऽनुकूल इति वाक्यशेषात् ॥ आसीनाधिकरणं समाप्तम् ॥

टी० सू० अचलत्वं चापेक्ष्य ॥ ९ ॥ आप इति स्थिरं तटाकादिजलं विवक्षितं निश्चलत्वमात्रं साम्यं विवक्षितं निश्चलत्वमैकाग्र्याद् भवति, तच्चासीनस्यैव गत्यादौ विजातीयप्रत्ययेन चलनसंसम्भवादित्यर्थः । सू० स्मरन्ति च ॥ १० ॥ न केवलमर्थसामर्थ्याद्वचनादपि तत्सिद्धिरित्यर्थः । सू० यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥ स एवोपासनस्य देशः कालश्चेति, तिथिनक्षत्रादिनियमो नास्तीत्यर्थः, वर्णाश्रमधर्मविरुद्धकालविशेषसम्भवात् आसनसहपठितो देशादिरप्यैकाग्र्यसिद्ध्यर्थमपेक्ष्यते किं पुनरासनमिति सूत्राभिप्रायः । इतरे त्रयोऽपि यत्रैकाग्रतेति सूत्रमधिकरणान्तरमाहुः वैदिककर्मसु देशकालादिनियमदर्शनादुदगयनादिपरिग्रह इति पूर्वपक्षं कृत्वा न नियम इति सिद्धान्तयन्ति, उक्तप्रकारेण पूर्वाधिकरणशेषत्वोपपत्तेर्नाधिकरणान्तरत्वं युक्तम् ॥ आसीनाधिकरणं समाप्तम् ॥

आप्रयाणाधिकरणम् ।

सू० आप्रयाणात्तत्रापि हि दृष्टम् ॥ १२ ॥

भा० तदिदमपवर्गसाधनमुक्तलक्षणोपासनमेकाह एव सम्पाद्यम्? उताप्रयाणात्प्रत्यहमनुवर्त्तनीय? मिति विशये एकस्मिन्नेवाहनि शास्त्रार्थस्य कृतत्वात्तावतैव परिसमापनीयमिति प्राप्ते उच्यते—आप्रयाणादिति, आमरणादनुवर्त्तनीयं, कुतः तत्रापि हि दृष्टम्—उपासनोद्योगप्रभृत्याप्रयाणान्मध्ये यः कालस्तत्र सर्वत्रापि "दृष्टमुपासनं स खल्वेवं वर्त्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यत"इति । आप्रयाणाधिकरणं समाप्तम् ॥

टी० सू० आप्रयाणात्तत्रापि हि दृष्टम् ॥ १२ ॥ सङ्गत्यादि स्पष्टम्, उक्तलक्षणमुपासनं किमेकस्मिन्नहनि कर्त्तव्य? मुताप्रयाणादि? ति किमेकदिनानुष्ठानेन शास्त्रार्थस्य कृतत्वं नेति? कृतत्वं चेदेकस्मिन्नहनि कर्त्तव्यं न चेदाप्रयाणात् कर्त्तव्यमिति । परे तु साक्षात्कृतात्मतत्त्वस्यानियोज्यत्वात् अनुवर्त्तयेदिति शासनमशक्यम् अतोऽभ्युदयफलोपासनविषयेयं चिन्तेति, तदयुक्तं यावदायुषमेवं वर्त्तयन् ब्रह्मलोकमभिसंपद्यते न च पुनरावर्त्तते प्रायणान्तमोङ्कारमभिध्यायीतेत्यत्रापुनरावृत्तिलक्षणमोक्षसाधनविद्यास्वेवाप्रयाणादनुवृत्तेः श्रुतत्वात्, यावच्छरीरपातं शास्त्रवश्यत्वादनियोज्य इति चायुक्तम् अन्तिमप्रत्ययस्य मोक्षहेतुत्वदर्शनात् तदौपयिकाहारशुद्ध्यादिसापेक्षत्वाच्च शास्त्रवश्यत्वमवर्जनीयं, न चान्तिमप्रत्ययशास्त्रममुमुविषयं मुमुक्षुविषयतयैव प्रतिपादितत्वात्, प्रयाणकाले मनसेत्यारभ्य स तम्परम्पुरुषमुपैति दिव्यमिति ह्युच्यते, न च साक्षात्कृततत्त्वस्य भेददर्शनाभावाचान्तिमप्रत्ययापेक्षेति वाच्यं देहपोषणादिषु प्रवृत्तिदर्शनात् तेषु मिथ्यात्वज्ञानमस्तीति चेत् तथाऽप्यन्तिमप्रत्ययः कार्य्य एव तद्वैकल्येन ह्यादिभरतस्य मृगत्वप्राप्तिः न च तस्य देहादिषु मिथ्यात्वधीर्नास्तीति वाच्यं विप्रजन्मनि पूर्वार्जितज्ञानातिरिक्तज्ञानाभावात्, अतः शास्त्रवश्यत्वमस्त्येव । किञ्च किमिदमशास्त्रवश्यत्वं नाम किमुच्चार्य्यमाणमपि शास्त्रं भेद-

गार्ग्यवृन्दारिकेत्यादौ न स्यात्, योऽत्र भाषितपुंस्को गार्ग्यशब्दो न तस्यानन्तरमुत्तरपदं, ङीपा व्यवधानात्, यस्य चानन्तरं गार्गीशब्दस्य नासौ भाषितपुंस्कः, स्यादेतदेवं, यदि प्रयोगान्तरे भाषितपुंस्कस्य सम्प्रति स्त्रियां वर्त्तमानस्य पुंवद्भाव उच्येत, स्त्रियां वर्त्तमानस्य तदैव भाषितपुंस्कस्य पुंवद्भावं ब्रूमः, सम्भवति च स्त्रियां वर्त्तमानस्य तदैव भाषितपुंस्कत्वं भाषितपुंस्केन प्रवृत्तिनिमित्तेन युक्तां स्त्रियमाहेति कृत्वा, एवं च स्त्रीशब्दस्यैवानन्तरउत्तरपदे पुंवद्भाव इति सर्वत्र सिद्ध्यति । 'ग्रामणि दृष्टिरस्येति'। अत्र ग्रामणिशब्दो ऽपरित्यक्तस्वलिङ्ग एव दृष्टिशब्देन समानाधिकरणो भवति, अत्र यदि पुंवद्भावः स्यान्नपुंसकह्रस्वत्वं निवर्त्तेत । 'कथमित्यादि' । अनवयवभूतगर्भसंबन्धः स्त्रियां गर्भिणीशब्दस्य प्रवृत्तिनिमित्तं, पुंसि त्ववयवभूतगर्भसंबन्धः, प्रसूतप्रजातशब्दयोरपि स्त्रियां गर्भमोचननिमित्तं, पुंसि तु गर्भाधानम् । 'कर्त्तव्योऽत्र यत्न इति'। अन्तर्वर्त्तिवस्तुसंबन्धमात्रं गर्भिणीशब्दस्य प्रवृत्तिनिमित्तमवयवत्वानवयवत्वेन तन्त्रम्, एवं प्रसूतप्रजातशब्दयोरपि आधानविमोचनत्यागेनापत्यसंबन्धमात्रं निमित्तमाश्रीयतइत्ययमत्र यत्नः । 'ब्रह्मबन्धूभार्य इति'। ऊङो निवृत्तिर्न भवति । न कोपधाया इत्यत्रैवोङ्ग्रहणे कर्त्तव्ये पृथक्प्रतिषेधादस्य वैलक्षण्यं ज्ञायते । तेन ब्रह्मबन्धूवृन्दारिकेति पुंवत्कर्मधारयेति निषेधविषये विधीयमानो ऽपि पुंवद्भावो न भवति, एष चार्थो ऽनूङित्यस्य तत्रानुवृत्तेर्लभ्यते, अपूरणीप्रियादिष्वित्ययं तु प्रतिषेधस्तत्रैव कर्त्तव्यः, नह्यस्य पुंवत्कर्मधारयेत्यत्रानुवृत्तिरिष्यते, महानवमी महाद्वादशी अक्षयतृतीया कृष्णचतुर्दशीत्यादौ पूरण्यामपि कर्मधारये पुंवद्भावस्येष्टत्वात् । 'प्रधानपूरणीग्रहणं कर्त्तव्यमिति'। प्रधानं या पूरणी तस्यामेव प्रतिषेधो भवतीति वक्तव्यमित्यर्थः । एतच्च प्रधाने कार्यसम्प्रत्ययाल्लभ्यते । 'कल्याणपञ्चमीकः पक्ष इति'। अत्र तिरोहितावयवभेदः पक्षो ऽन्यपदार्थ इति तत्र पूरण्या अननुप्रवेशान्नास्ति प्राधान्यं, कल्याणपञ्चमा रात्रय इत्यादावुद्भूतावयवभेदा रात्रयो ऽन्यपदार्थस्तत्र यथा प्रथमाद्या रात्रयः समासाभिधेया एवं पञ्चम्यपीति

पूरण्याः प्राधान्यम्, अथ दृढभक्तिः शोभनभक्तिरित्यत्र कथं पुंवद्भावः यावता प्रियादिषु भक्तिशब्दः पठ्यते ऽत आह । 'दृढभक्तिरित्येवमादिष्विति' । स्त्रीवाचित्वं पूर्वपदस्याविवक्षितमतो दृढभक्तिरित्येवमादिसिद्धिरित्येवं चोद्यसमाधानं कर्त्तव्यमित्यर्थः । दृढशब्दोऽत्र दार्ढ्यनिवृत्तिपरस्तत्र दार्ढ्यनिवृत्तिपरायां चोदनायां स्त्रीलिङ्गोपादानमकिञ्चित्करमिति भावः । न चैवं सूत्रस्यानादरणीयत्वं[1], लिङ्गविशेषविवक्षायां दर्शनीयभार्य इत्याद्यनिष्टप्रसङ्गात् । अथेह कथं भवितव्यं पट्वीमृद्व्यौ भार्ये अस्येति, पट्वीमृदुभार्य इति भवितव्यं, यस्योत्तरपदमनन्तरं तस्य पुंवद्भावो नेतरस्येति ।

"तसिलादिष्वाकृत्वसुचः" ॥ अनुत्तरपदार्थमारम्भः । 'ततस्तत्रेति'। प्राग्दिशो विभक्तिरिति विभक्तित्वात्त्यदाद्यत्वं टाप्, अनेन पुंवद्भावः, इह के चित्तसिलादिषु पठ्यन्ते येषु पुंवद्भावो नेष्यते, के चिच्चान्यत्र पठ्यन्ते येषु पुंवद्भाव इष्यते, तस्मादाह । 'परिगणनमिति' । त्रलतसोरुदाहृतं, तरप्तमपोर्दर्शनायतरा दर्शनीयतमा, चरट्जातीयरोः, पटुचरी, पटुजातीया, कल्पदेशीयरोः, दर्शनीयकल्पा दर्शनीयदेशीया, देश्यप्रत्ययस्य नास्ति पाठः । रूपप्पाशपोः, दर्शनीयरूपा, पटुपाशा, थम्थालोः, इदमस्थमुः, किमश्चेति विहितस्थमुः, प्रकारवचने थाल्, अनया प्रकृत्या इत्थं, कया प्रकृत्या कथं, तया तथा, दार्हिलोः, तस्यां वेलायां तदा तर्हि, तिल्थ्यनोः, वृकज्येष्ठाभ्यां तिल्तातिलौ च्छन्दसि, वृकी प्रशस्ता वृकतिः, तातिलो नास्ति पाठः, अजाविभ्यां थ्यन्, अजाभ्यां हिता अजथ्या, अत्र घरूपकल्पेषु ङ्यन्तस्य परत्वात् ह्रस्वः, पट्वितरा, पट्वितमा, पट्विकल्पा, पट्विरूपा । 'शसि बह्वल्पार्थस्येति' । बह्वल्पार्थादित्ययमपि शस् तसिलादिषु द्रष्टव्य इत्यर्थः । 'हास्तिकमिति' । यद्यत्र पुंवद्भावो न स्यात् तदा हस्तिनीशब्दस्य यस्येति लोपे कृते तस्य स्थानिवत्त्वादसिद्धवदत्राभादित्यसिद्धत्वाच्च नस्तद्धितइति टिलोपो न स्यादिति पुंवद्भावो विधीयते, ठक्छसोश्चेत्यनेन पुंवद्भावो न लभ्यते

१ रमणीयत्वमिति ४ पु॰ पा॰ ।

छसा सहचरितस्य ठको ग्रहणात् । 'श्यैनेयो रौहिणेय इति'। श्येतरो-हिताभ्यां वर्णादनुदात्तादिति ङीन्नकारौ, अत्र पुंवद्भावे सति श्यैतेयो रौहितेय इति स्यात् । 'कथमित्यादि'। यदि ढे पुंवद्भावः प्रतिषिध्यते ततो ऽग्नेः स्त्री वृषाकप्यग्निकुसितकुसिदानामुदात्त इति अग्निशब्दान् ङीपि कृते ऐकारे आयादेशे च अग्नायी, सा देवतास्य अग्नेर्ढगिति, सर्वत्रा-ग्निकलिभ्यां ढगिति ढकि पुंवद्भावनिषेधादाग्नायेय इति प्राप्नोति, तत्क-थमाग्नेय इति। 'कर्त्तव्योत्र यत्न इति'। केचिदाहुः । अढइत्यपनीयान-पत्यइति वक्तव्यम् । इदमपि सिद्धं भवति, कुण्डिन्या अपत्यमिति गर्गा-दिभ्यो यञ्, तत्र पुंवद्भावाभावाद्यस्येति लोपे तस्य स्थानिवद्भावान्नस्तद्धित-इत्यसति टिलोपे कौण्डिन्य इति भवति, पुंवद्भावे तु सति कौण्ड्य इति प्राप्नोति, तथा सपत्न्या अपत्यं शिवादित्वादण्, तत्र पुंवद्भावाभावात् सापत्न इति भवति, पुंवद्भावे तु सति नित्यं सपत्न्यादिष्विति विहि-तयोर्ङीन्नकारयोर्निवृत्तयोः सापत इति स्यात् तदेवमनपत्यइतिवचनाड्ढ ढेप्यनपत्ये पुंवद्भवति स आग्नेय इति, अपत्येतु न भवति श्यैनेयो रौहिणेय इति, यद्यनपत्यइत्युच्यते गर्गस्यापत्यं स्त्री गार्ग्यायणी तस्या अपत्यं गोत्रस्त्रियाः कुत्सने ण चेति णप्रत्यये कृते पुंवद्भावो न प्राप्नोति ततश्च गार्ग्यायणो जाल्म इति स्यात्, गार्ग्यो जाल्म इति चेष्यते, तस्मा-दनपत्य इति न शक्यं वक्तुं, कथं कौण्डिन्यः, आगस्त्यकौण्डिन्ययोरिति निपातनात् सिद्धं, कथं सापत्नः, शत्रुपर्यायः सपत्नशब्दोस्ति व्यन्सपत्न-इतिलिङ्गात्, स शार्ङ्गरवादिषु पठितव्यः, ततः शिवाद्यण्, तस्मात् स्त्रीभ्यो ढगित्यत्रैव पुंवद्भावप्रतिषेध इति, व्याख्यानमेवात्र शरणम् । 'ठक्छसोरिति'। छसः सित्त्वात् सिति चेति पदसञ्ज्ञाविधानाद्भत्वा-भावाद् वचनं, ठग्रहणं किमर्थम् । इकादेशे कृते भस्याढे इत्येव सिद्धे ठा-वस्थायामेव यथा स्यात्, किमेवं सति भवति, इसुसुक्तान्तात्क इति कादेशः सिद्धो भवति, अन्यथा यदीकादेशे कृते पुंवद्भावः स्यात्ततो यथा माथितिक इत्यत्रेकादेशे कृते कादेशो न भवति एवं भावत्क इत्यत्रापि न स्यात् ॥

"क्यङ्मानिनोश्च" ॥ अयमस्या इयमस्या इति वैयधिकरण्य-प्रदर्शनार्थमिदमुक्तम् । 'पूर्वेणैव सिद्धमिति' । एकस्या एव कर्मत्वात्कर्तृत्वाच्च सामानाधिकरण्यस्याभावात् ॥

"न कोपधायाः" ॥ मद्रेषु भवा मद्रिका, वृजिका, मद्रवृज्योः कन् । 'वैलेपिकमिति' । अण्महिष्यादिभ्यः, अत्र भस्याढे तद्धितइति च्चौपसंख्यानिकी प्राप्तिः प्रतिषिध्यते, पूर्वेषु तु सौत्री । 'तद्धितवुग्रहणमिति' । तद्धितस्य यः ककारः वोश्च यः ककारः तस्येति वक्तव्यमित्यर्थः । 'पाकभार्य इति' । पाकशब्दः प्रथमवयोवाची, ततो ङीबपवादो ऽजादित्वाट्टाप् ॥

"सञ्ज्ञापूरण्योश्च" ॥ सञ्ज्ञाशब्दा ये दानादिक्रियानिमित्ताः पुंसि च स्त्रियां च लोके प्रयुज्यन्ते तदर्थः सञ्ज्ञाप्रतिषेधः, ये त्वेकद्रव्यनिमित्ता देशनिमित्ता वा सञ्ज्ञाशब्दास्तत्राभाषितपुंस्कत्वादेवाप्रसङ्गः । 'दत्तायते गुप्तायतइति' । अत्र यद्यपि सत्यसति वा प्रतिषेधे विशेषाभावस्तथापि वस्तुतः प्रतिषेधस्य विषय इत्येतावता ऽस्योपन्यासः ॥

"वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे" ॥ वृद्धेर्निमित्तं णकारः, इह निमित्तग्रहणं न कर्त्तव्यं, वृद्धेस्तद्धितस्येत्येव वक्तव्यं, वृद्धेर्यस्तद्धितः, कश्च वृद्धेस्तद्धितः, यस्तस्या निमित्तमेवं सिद्धे निमित्तग्रहणाद्व्यधिकरणपदो बहुव्रीहिः, अपर आह, षष्ठीसमासादर्शआद्यच्प्रत्यय इति, यद्वा निमित्तग्रहणाद्बहुवचनान्तस्य समासः, वृद्धीनां तिसृणामपि निमित्तं वृद्धिनिमित्तमिति, वतुस्त्वाकारस्यैव निमित्तम् । इह तु सर्वस्मै हिता सार्वा सा भार्या यस्य स सार्वभार्य इति यद्यपि सर्वपुरुषाभ्यामिति णप्रत्यये आकार एवं वृद्धिर्भवति तथापि नासौ स्वरूपेण वृद्धेर्निमित्तं किं तर्हि णित्त्वेन, तच्च तिसृणामपि निमित्तं, मध्ये भवा मध्यमा, मध्यान्मः, काण्डं लुनातीति काण्डलावी, कर्मण्यण्, टिड्ढाणञिति ङीप्, यत्तदेतेभ्यः परिमाणे वतुप्, आ सर्वनाम्नः, उगितश्चेति ङीप्, तावती, तत्पुरुषाश्रयणे ऽस्यापि प्रतिषेधः स्यात्, बहुव्रीहौ तु णकारादेरभावान्न भवति ।

'काषायीति'। तेन रक्तं रागादित्यण्। 'लौहीति'। प्राणिरजतादिभ्योऽञ्, खदिरशब्दः पलाशादिः, ईषा रथावयवविशेषः॥

"स्वाङ्गाच्चेतोऽमानिनि"॥ अमानिनीति वार्त्तिके दर्शनात्सूत्रे प्रक्षिप्तं, स्वाङ्गाच्चोपसर्जनादिति ङीष्, दीर्घकेशी, सहनञ्विद्यमानपूर्वाच्चेति प्रतिषेधादकेशा॥

"जातेश्च"॥ कठबह्वृचयोर्गोत्रं च चरणैः सहेति जातित्वान् ङीष्। 'अयमित्यादि'। व्याख्यानमत्र शरणम्॥

"पुंवत् कर्मधारयजातीयदेशीयेषु"॥ ननु कर्मधारये स्त्रियाः पुंवदित्यादिना सिद्धः पुंवद्भावः, जातीयदेशीययोरपि तसिलादिष्विति, किमर्थोऽयमारम्भ इत्यत आह। 'प्रतिषिद्धार्थोऽयमिति'। प्रतिषिद्धोऽपि पुंवद्भावो यथा स्यादित्येवमर्थमित्यर्थः। प्रतिषेधार्थोऽयमिति पाठे प्रतिषेधविषयः प्रतिषेधशब्देनोक्तः। निवृत्तिवचनो वार्थशब्दः। 'कुक्कुट्यादीनामित्यादि'। अस्त्र्यर्थमसमानाधिकरणार्थं वचनम्। 'न वेत्यादि'। उपसंख्यानं प्रत्याचष्टे, एवं न वा वक्तव्यं, किं कारणं, स्त्रीपूर्वपदस्याविवक्षितत्वात्, नात्र स्त्रीलिङ्गं पूर्वपदं विवक्षितम्, उभयोरण्डमुभयोः पदं, तत्र प्रकरणादिना स्त्रीत्वावसायः, आरभ्यमाणेऽपि पुंवद्भावे समाश्रयणीयः, अनारम्भेऽपि तथा भविष्यति, यदि तर्हि स्त्रीलिङ्गेन समासः क्रियते तदा स्त्रीप्रत्ययस्य श्रवणं प्राप्नोति, एवं तर्ह्यनभिधानात् स्त्रीलिङ्गेन समासो न भविष्यति, यद्यपि तावदत्रैतच्छक्यते वक्तुम्, इह तु कथं मृग्याः क्षीरं मृगक्षीरमिति, नहि पुंसः क्षीरेण सम्बन्धोऽस्ति, अत्रापि जात्यन्तरनिवृत्तिपरत्वाच्चोदनायाः स्त्रीत्वमकिञ्चित्करत्वादविवक्षितं, यत्र तु लिङ्गविशेष उपकारकस्तत्रासौ विवक्षित एव यथाऽजामूत्रेण पर्युक्षितं दातव्यमिति। 'पूर्वपदार्थोऽत्र जातिरिति'। कुक्कुटाण्डादौ पूर्वपदार्थो जातिः, स च सामान्येन स्त्रीत्वादिविशेषरहितेन रूपेण विवक्षित इत्यर्थः। 'खिद्घादिष्विति'। तत्र खिति विप्रतिषेधः स्त्रियाः पुंवदित्यत्रैवोदाहृतः, घादिषु नद्या ह्रस्वो भवतीत्यस्यावकाशः, नर्त्तकितरा नर्त्तकितमा नर्त्तकिरूपा, नर्त्तकिकल्पा,। यत्र पुंव-

द्भावः प्रतिषिध्यते न कोपधाया इति । 'तसिलादिष्विति' । पुंवद्भावस्यावकाशः यद् इयन्तं न भवति दर्शनीयतरेत्यादि । पट्वितरेत्यादावुभयप्रसङ्गे विप्रतिषेधः, केणो ह्रस्वो भवतीत्यस्यावकाशः नर्तकिका, पुंवद्भावस्यावकाशो दरदो पत्यं स्त्री, द्व्यञ् मगधेत्यण्, तस्यातश्चेति लुक्, ततः प्रागिवत्कः, तसिलादिष्विति पुंवद्भावाद्दारदशब्दः, प्रत्ययस्यादितीत्वं दारदिका। ननु च परिगणितास्तसिलादयः, न च कप्रत्ययस्तेषु समस्ति, एवं तर्हि विप्रतिषेधादेव कप्रत्ययेऽपि तत्राभ्युपगम्यतइति अनुमीयते, पट्विका मृद्विकेत्यादावुभयप्रसङ्गे परत्वाद् ह्रस्वः, सर्वत्र चात्र सकृदित्याश्रयणाद् पुंवद्भावाभावः । अनूङिति यदुक्तं तस्य प्रयोजनं दर्शयति । 'इहेत्यादि' । 'तद्राजप्रत्ययस्येति' । ये द्व्यचस्तेषु द्व्यञ्मगधेत्यण्, शेषेषु जनपदशब्दादित्यञ्, पृथ इति थकारान्तः ॥

"घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः" ॥ चेलादीनां वृत्तिविषये कुत्सनवचनत्वात्तैः कुत्सितानि कुत्सनैरिति समासः, ङ्य इत्यत्र ङ्याश्छन्दसि बहुलमित्यादिवदागमः प्राप्तः सौत्रत्वान्न कृतः । 'दत्तातरेति' । ननु च स्वाङ्गाच्चेत इत्यत ईत इत्यनुवर्तिष्यते, एवमपि ग्रामणीतरः, अत्रापि प्राप्नोति, स्त्रियामिति वर्त्तते, एव मपि ग्रामणीतरा अत्रापि प्राप्नोति, स्त्रियामिति वर्त्तते, स्त्रिया ईतः स्त्रीवाचिन ईकारस्येत्यर्थः, ग्रामणीशब्दे त्वनर्थक ईकारः, शेषप्रक्लृप्त्यर्थं तर्हि ङीब्ग्रहणं, क्रियमाणे हि ङीब्ग्रहणे ङ्योनेकाच इति श्रुतत्वात्तदपेक्षः शेषो लभ्यते, अङीब् या नदी इयन्तं च यदेकाजिति, अन्तरेणापि ङीब्ग्रहणं प्रक्लृप्तः शेषः । कथमीत इति वर्त्तते, अनीच्च या नदी ईदन्तं च यदेकाजिति तदेन्ङीब्ग्रहणं तिष्ठतु तावत् ॥

"नद्याः शेषस्यान्यतरस्याम्" ॥ भाषितपुंस्कादनूङिति निवृत्तम् । 'कश्च शेष इति' । यदि च यत्र पूर्वसूत्रेण ह्रस्वो न विवक्षितः स शेषः, ततो यदभाषितपुंस्कं यच्च भिक्षायामाकृतौ भाषितपुस्कमनेकाज्ङ्यन्तं तस्यापि ह्रस्वत्वं प्रसज्यते । 'आमलकीतरा द्रोणीतरेति' । अत्रापि पूर्वेण विहितत्वादिति प्रश्नः । पूर्वसूत्रे यत्साक्षाच्छ्रुतं तदपेक्षः शेष इत्युत्तरं, शेष-

ग्रहणं शक्यमकर्त्तुं, कथं, नद्या अन्यतरस्यां ह्रस्व इत्युत्सर्गः, तस्यानेकाच ईतो नित्यह्रस्वत्वमपवादः, तस्मिन्नित्ये प्राप्ते उगितश्चेति विभाषा ऽऽरभ्यते, यद्येवं नद्या अन्यतरस्यामित्यत्र भाषितपुंस्कादित्यनुवर्त्यते वा न वा, यद्यनुवर्त्यते स्त्रितरास्त्रितमात्र न प्राप्नोति, अथ नानु वर्त्यते द्रोणीतरा ऽत्रापि प्राप्नोति, तस्मात्कर्त्तव्यं शेषग्रहणं, तस्मिंश्च क्रियमाणे श्रुतापेक्षं शेषत्वं यथा विज्ञायेतेति पूर्वसूत्रे ङीग्रहणमपि कर्त्तव्यम् । 'लक्ष्मीतरेति' । अवितृस्तन्त्रिभ्य ईः, लक्षेर्मुट् चेतीकारप्रत्ययान्तो लक्ष्मीशब्द इति ङ्यवद्यन्तो भवति, स तर्हि प्रतिषेधो वक्तव्यः, न वक्तव्यः, कथं, स्त्रिया इत्यनुवर्त्तते तेन नदीं विशेषयिष्यामः, स्त्रिया नद्या इति, न च ङ्यवदी स्त्रीवाचिनी, नदीसंज्ञा ऽपि तर्हि न प्राप्नोति, उक्तोत्र परिहारो नदीसंज्ञाप्रकरणे ॥

"उगितश्च" ॥ 'पुंवद्भावो ऽप्यत्र पक्षे वक्तव्य इति' । भाष्ये नैतद् दृष्टं, प्रकर्षयोगात्प्रागित्यादिना वक्तव्यं प्रत्याचष्टे, विवक्षा हि शब्दव्युत्पत्तेः प्रधानं कारणं, न चेह प्रकर्षयोगात्प्राक् स्त्रीत्वं विवक्ष्यते, तस्मादस्त्रीप्रत्ययान्तादेवातिशायनप्रत्ययः क्रियते, तदन्तस्य तु स्त्रीत्वविवक्षायां स्त्रीप्रत्यय इति मन्यते ॥

"आन्महतः समानाधिकरणजातीययोः" ॥ 'महतः पुत्रो महत्पुत्र इति' । ननु चात्रान्महत इत्येतावानेव योगः कर्त्तव्यः, ततो जातीये चेति द्वितीयः, तत्र पूर्वस्मिन् योगे उत्तरपदेन समासः संनिधाप्यते, स च लक्षणप्रतिपदोक्तपरिभाषया सन्महदित्यादिना यो विहितः स एव ग्रहीष्यते, स च समानाधिकरण एवेति अनर्थकं समानाधिकरणग्रहणं तदेतदाशङ्कते तावत् । 'लक्षणोक्तत्वादिति' निराकरोति । 'बहुव्रीहावपीति' । 'तदर्थमिति' । बहुव्रीहावपि यथा स्यादित्येवमर्थमित्यर्थः । लक्षणप्रतिपदोक्तपरिभाषाया निवृत्त्यर्थमिति वा । इह अमहान् महान्सम्पन्नो महद्भूतश्चन्द्रमा इति, महच्छब्दो भूतशब्दश्चैकस्मिन्नर्थे चन्द्रमसि वर्त्तते इति सामानाधिकरण्यादात्वं प्राप्नोति । स्यादेतत् । अभूततद्भावे च्विर्विधीयते, अभूततद्भावश्च कः, कारणस्य विकारात्मना ऽभूतस्य तदात्मना भावः, तत्र प्रकृतिः कर्त्री न विकृतिः, तथा

च सङ्घीभवन्ति ब्राह्मणाः पटीभवन्ति तन्तवः अत्वं त्वं संपद्यते त्वद्भवतीति प्रकृत्याश्रयेण बहुवचनप्रथमपुरुषौ दृश्येते न विकृत्याश्रयेणैकवचनमध्यमपुरुषौ, ततश्च भूत इति क्तप्रत्ययो भवन् क्रियायाः कर्त्तर्यमहत्युत्पन्नो न तु विकारे महति, ततः किं, अमहतो भूतेन सामानाधिकरण्यं न तु महतः, नह्यवस्थावत एकत्वेप्यवस्थयोः सामानाधिकरण्यं संभवति, नहि भवति बालश्चासौ स्थविरश्चेति, भवति तु बालश्चासौ देवदत्तश्चेति, अतो वैयधिकरण्यादात्वाभाव इति, यद्येवममहती महती सम्पन्ना ब्राह्मणी महद्भूता ब्राह्मणीति पुंवद्भावोपि न स्याद्वैयधिकरण्यादेव, यथा प्रकृतेः कर्तृत्वं दृष्टं तथा विकृतेरपि दृश्यते, तथा च पस्पशायां भाष्यं सुवर्णपिण्डः खदिराङ्गारवर्णे कुण्डले भवत इति, तथा क्लृपि सम्पद्यमाने चतुर्थी वक्तव्येति सम्पद्यकर्त्तरि विधीयमाना चतुर्थी विकाराद्भवति मूत्राय कल्पते यवागूरिति न प्रकृतेः, तथा असङ्घो ब्राह्मणसङ्घो भवति अपटस्तन्तवः पटो भवतीति विकाराश्रयं वचनं दृश्यते, तत्र यदि विकृतेः कर्तृत्वमाश्रित्य सामानाधिकरण्याश्रयः पुंवद्भावो विधीयेत आत्वमपि स्यात्, अथ प्रकृतेः कर्तृत्वाद्वैयधिकरण्यादात्वं न स्यात् पुंवद्भावो पि न स्यात्, उच्यते, दर्शितं तावदिदं यथा च्विविषये द्वयोरपि प्रकृतिविकृत्योः कर्तृत्वमिति, युक्तं चैतत्, यदि विकृतेः कर्तृत्वमाश्रित्य प्रत्ययः, यदा चैकोर्थः प्रकृतिविकारात्मक आश्रीयते तदा प्रतिपत्तृमव्यवहारः, उक्तं च

जहद्धर्मान्तरं पूर्वमुपादत्ते यदापरम् ।
तत्त्वादप्रच्युतो धर्मः परिणामस्स उच्यते ॥

इति, यदा त्वन्यतरव्यवस्था न विवक्ष्यते तदा च्वेरभावः तन्तवो भवन्ति पटो भवतीति, तत्र योयं पूर्वकं धर्मं जहदुत्तरं चोपाददत्संमूर्च्छितोर्थः सञ्जायमानः सम्पद्यकर्त्तेति चोच्यते तदभेदाच्च पूर्वोत्तरावस्थयोरपि कर्तृत्वमत एतदपि निरस्तम्, असत्या उत्तरावस्थाया उत्पत्तौ शशविषाणमप्युत्पद्येत सत्याश्च पूर्वावस्थाया उत्पत्तौ सर्वे एव पटादयः सर्वदोत्पद्यमाना एव भवेयुरिति, कथं निरस्तं, किं सदुत्पद्यते

किञ्चासत्, पूर्वोत्तरयोरवस्थयोरनुवर्त्तमानं वस्तु तस्मान्न भिन्नेन नाप्यभिन्नेन केन चिद्रूपेणोत्पद्यते यथा मृद्वस्तु घटरूपेण। यद्येवं पूर्वावस्थयी किमपराद्धं, यत्सैव नोत्पद्यते, न किंचिदपराद्धम्, असती तु सा कथं कर्त्री स्यात्, विनष्टायां हि तस्यामुत्तरावस्थोत्पद्यते, यथा घटः पिण्डावस्थायाम्, अतो मृद्वस्त्वेव तेनतेन पिण्डादिरूपेण परिणमतइति युक्तम्, एवमा मूलप्रकृतितः, सा तु प्रकृत्यन्तरनिरपेक्षैव तेनतेन पृथिव्यादिरूपेण परिणमतइति, तदेवं स्थितमेतत्संमूर्च्छितोर्थात्मा सम्पद्यकर्त्ता तदभेदाच्च पूर्वोत्तरावस्थयोरपि कर्तृत्वमिति। उक्तं च

पूर्वावस्थामभिजहत्संस्पृशन् धर्ममुत्तरम्।
संमूर्च्छितइवार्थात्मा जायमानोऽभिधीयते॥[1]

इति। तदेवं सति च्व्यर्थे वाक्ये क्वचित्प्रकृतेरेव कर्तृत्वम्, च्व्यन्तस्य गतित्वाद्गतीनां च क्रियाविशेषणत्वादन्यद्धि भवनम् अन्यद्धि सङ्घीभवनं तत्र केवले भवने सङ्घः कर्त्ता सङ्घीभवने तु ब्राह्मणः, यथा व्याकरणस्य सूत्रं करोतीति सूत्रं तद्विशेषणं, व्याकरणं सूत्रयतीत्यत्र विशिष्टकरोतेर्व्याकरणं कर्म तद्वदत्रापि। तत्र महद्भूतश्चन्द्रमा इति च्व्यन्तोयं महच्छब्दो भूतशब्दस्य प्रवृत्तिनिमित्ते भवने पर्यवस्यति, भूतशब्दस्तु महत्त्वेनासंस्पृष्टश्चन्द्रमः स्वरूपे वर्त्ततइति वैयधिकरण्यादात्वाभावः। महद्भूता ब्राह्मणीत्यत्र तु मृगक्षीरादिवत्स्त्रीपूर्वपदस्याविवक्षितत्वात्सिद्धं, यत्र तु स्त्रीत्वं विवक्षितं न भवत्येव तत्र पुंवद्भावः, अगोमती गोमती सम्पन्ना गोमतीभूता ब्राह्मणीति। वृत्तिकारस्तु विकृतेः कर्तृत्वाश्रयेण सामानाधिकरण्ये सत्यपि परिहारमाह। 'गौणत्वान्महदर्थस्येति'। गौणमुख्ययोर्हि मुख्ये संप्रत्ययो भवति, तद्यथा, गौरनुबन्ध्योऽजोऽग्नीषोमीय इति न वाहीकोऽनुबध्यते, स्वशास्त्रेपि स्वंरूपमित्यत्र रूपग्रहणेन ज्ञापितरूपवदर्थोपि तन्त्रमिति मुख्यार्थस्य महच्छब्दस्यात्र ग्रहणाद्गौणार्थस्यात्वाभावः, च्व्यन्तेषु हि एकस्य वस्तुनः प्रकृति-

१ सहाभिधीयमान इति ४ पु॰ पा॰।

विकारात्मकतया द्व्यात्मकत्वं गम्यते, पटीभवन्तीति ह्युक्ते प्रागपटः संप्रति पटात्मना परिणमन्तइति प्रतीयते, पटो भवतीत्युक्ते नैवं प्रतीयते किं तु पटो रक्तादिरूपेण भवतीत्यपि गम्यते, तत्र केवलविकारावस्थावाचकस्य पटशब्दस्य प्रागवस्थायामनुगतावस्थायां च वृत्तिर्न लक्षणामन्तरेणोपपद्यते, अपर आह। महत्त्वेन परिणामोन्मुखे ऽमहति महच्छब्दस्य वृत्तिः, अत्र च प्रमाणं पटो भवतीति वाक्ये रक्तादिरूपेण भवतीत्यपि गम्यते, पटीभवतीत्यत्रापटः पटो भवतीत्येव गम्यते, एवमर्थे प्रवृत्तिरुपचारमन्तरेण नोपपद्यते इति गौणार्थत्वादात्वाभाव इति मन्तव्यम्। यदि तर्हि पुंवद्भावस्तु विशेषमनुपादाय विधीयमानो गौणार्थस्यापि भवति, शब्दविशेषोपादाने हि गौणमुख्यन्यायः, एवं तु गोमतीभूतेत्यत्र तु पुंवद्भावनिवृत्तये यतितव्यं, यदि तर्हि शास्त्रेषु मुख्यार्थस्य ग्रहणं, कथं तर्हि वाहीके वृद्ध्यात्वे भवतः, गौर्वाहीको गां वाहीकमिति, उच्यते, पदान्तरसंबन्धे सति पदस्य गौणार्थत्वाभिव्यक्तिः, विभक्त्यन्तं च पदान्तरेण संबद्ध्यते, ततश्च पदस्य पदान्तरसंबन्धे सति यत्कार्यं प्राप्तं तत्रैवासौ न्यायः, न प्रातिपदिककार्येष्विति मुख्यएव स्वार्थे साक्षादिमति वृद्ध्यात्वे अनुभूय गोशब्दो वाहीके वर्त्तिष्यते, इह तु महच्छब्दस्योत्तरपदे परतो विधीयमानमात्वं तस्यामवस्थायां मुख्यार्थस्यैव भवितुमर्हति, अनेनैव न्यायेन च तस्य गोशब्दस्य गोभवदित्यत्र ओदिति प्रगृह्यसंज्ञा न भवति, अग्निसोमौ माणवकावित्यत्राग्नेस्तुस्तोमसोमा इति षत्वं न भवति, ईदग्नेरितीत्वं च। 'महदात्वइत्यादि'। समुच्चये चशब्दो नान्वाचये, तेन यत्रैव पुंवद्भावस्तत्रैवात्वम्। 'अष्टाकपालमिति'। अष्टसु कपालेषु संस्कृतमिति तद्धितार्थे समासः, संस्कृतं भक्षा इत्यण्, तस्य द्विगोरिति लुक्। 'अष्टकपालमिति'। समाहारे द्विगुः। पात्रादित्वात्स्त्रीत्वाभावः। 'अष्टागवेनेति'। अष्टौ गावो युक्ता अस्मिन्निति त्रिपदो बहुव्रीहिः, पूर्वयोर्द्वयोरुत्तरपदे द्विगौ गोरतद्धितलुकीति टच्समासान्तः, तत्र दीर्घत्वेन युक्तार्थसंप्रत्ययाद्युक्तशब्दस्य निवृत्तिः, समाहारद्विगोर्वा साहचर्यादभेदोपचाराद्युक्तार्थे वृत्तिः। 'तपरकरणं विस्पष्टार्थमिति'। न भिन्नकालानां

निवृत्त्यर्थमनण्त्वात्, नापि गुणभिन्नानां तत्कालानां ग्रहणमभेदकत्वाद्गुणानाम् । आनङ्प्रकरणएवास्मिन्वक्तव्येत्रादिति वचनं योगविभागार्थं तेनाष्टाकपालादावात्वसिद्धिः, एवं चैकादशेन्यत्राप्यात्वं भवति, तथा च प्रागेकादशभ्योछन्दसीति प्रयोगः ॥

"द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः" ॥ अत्र संख्यातानुदेशो न भवति, यदि स्याद् अष्टनोशीतौ प्रतिषेधः स्यात्, तथा च तस्य वैयर्थ्यं प्रतिषिद्धेप्यात्वे सवर्णदीर्घत्वेन भवितव्यं, द्वादश द्वाविंशतिरित्यादौ समाहारे द्वन्द्वः, स नपुंसकमित्येतत्तु न भवति लोकाश्रयत्वाल्लिङ्गस्य । 'द्वित्रा इति'। द्वौ वा त्रयो वेति वार्थे संख्ययाव्ययासन्नेति समासः, बहुव्रीहौ संख्येये डच्, द्विर्दश द्विदशाः, सुजर्थे समासः ॥

"त्रेस्त्रयः" ॥ संन्धिवेलादिषु त्रयोदशशब्दस्य पाठात्सकारान्तोयमादेशः ॥

"विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम्" ॥ 'सर्वेषांग्रहणमित्यादि'। असति हि तस्मिन् अनन्तरस्य त्रेस्त्रय इत्यस्यैव विकल्पः स्यात् ॥

"हृदयस्य हृल्लेखयदण्लासेषु" ॥ 'अणन्तस्य ग्रहणमिष्यत इति'। व्याख्यानात्, अत्र व्यावर्त्यं दर्शयति । 'घञि त्विति'। यदा चाणन्तस्य ग्रहणं न घञन्तस्य तदा लेखग्रहणस्य ज्ञापकत्वमुपपद्यते ॥

"वा शोकष्यञ्रोगेषु" ॥ हृदयशब्देनेत्यादि यदुक्तं तन्नानुमन्यन्ते, अत एव विकल्पविधानात्, एट्टचोमास्हृदित्यत्र हृदादेशविधानाच्च ॥

"पादस्य पदाज्यातिगोपहतेषु" ॥ आकारान्तोयमादेशो ऽविभक्तिकः । 'अज्यतिभ्यामिति'। अज गतिक्षेपणयोः, अत सातत्यगमने । 'पदगइति'। डप्रकरणे ऽन्यत्रापि दृश्यत इति डः । 'उपदेशएवेति'। समसनक्रियानन्तरमेव प्रागेव समासस्य प्राप्तस्वरादित्यर्थः । 'अन्तोदात्तो निपात्यतइति'। अन्यथा ऽऽन्तर्यत आद्युदात्तः स्यात् । तेनेत्यादिना ऽन्तोदात्तनिपातस्य प्रयोजनमाह । पदाजिरित्यादिनोपदेशग्रहणस्य, यदि कृत्स्वरे कृते सत्युत्तरकाले पदशब्दोन्तोदात्त आदेशः स्यात्तदा सतिशिष्टत्वात्तेन कृत्स्वरो बाध्येत उपदेशएव त्वन्तोदात्ता-

देशे कृत्स्वर एव सति शिष्टो भवति, न चान्तोदात्तनिपातनस्य वैयर्थ्यं, पदोपहत इत्यत्र श्रूयमाणत्वादिति पिण्डार्थः ॥

"पद्यत्यतदर्थे" ॥ 'इके चरताविति'। चरत्यर्थे य इक् प्रत्ययः कृत्प्रयत्यस्तत्रेत्यर्थः, एतद्वार्त्तिकादर्शनात्पर्पादिषु पादः पच्चेति पठितम्। 'शरीरावयवस्येति'। व्याख्यानमत्र शरणम्। अपर आह। पूर्वत्र तावच्छरीरावयवस्य ग्रहणं तस्यैवाज्यादिषु करणत्वसम्भवात्, इहापि स एवानुवर्त्तते, ऋचः श इत्यत्र ऋग्विषये शरीरावयवस्यासम्भवाच्चतुर्थभागवचनस्य ग्रहणमिति। 'तेनेत्यादि'। पणपादमाषशतादित्यत्र हि परिमाणवचनैः पणादिभिः साहचर्यात्परिमाणस्य पादस्य ग्रहणं न शरीरावयवस्य। 'द्विपाद्यमिति'। तेन क्रीतमित्यत्रार्थे यत्प्रत्ययः, इदमप्यत्र शक्यं वक्तुं, पादेन यद्विशेष्यते, पादस्य यो यत्कश्च पादस्य यत्, यस्ततो विहितः, द्विपाद्यमित्यत्र तु पादशब्दान्ताद् द्विगोर्यद्विहित इति ॥

"हिमकाषिहतिषु च" ॥ पादस्य हिमं शीतं पद्धिमम्, पादौ कषन्तीति पत्काषिणः, पादचारिणः सुप्यजातार्विति णिनिः, पदाभ्यां हन्यतइति पद्धतिः ॥

"ऋचः शे" ॥ शे इति शस्प्रत्ययस्येदमेकदेशानुकरणमन्यस्य शशब्दस्यासम्भवात्। ननु च सम्भवत्ययं पादेशेते अधिकरणे शेतेरित्यच्, पादशइति, नास्त्यस्य सम्भवः, नहि ऋक्पादे कश्चिच्छेते, यच्च लोमादिभ्यः शस्तस्याप्यसम्भव एव, लोमादिषु पादशब्दस्याभावात् ॥

"वा घोषमिश्रशब्देषु" ॥ 'पन्निष्क इति'। निष्कशब्दः सुवर्णजातिवचनः, पादशब्दः परिमाणवचनः कर्मधारयः समासः ॥

"उदकस्योदः संज्ञायाम्" ॥ 'उदमेघइति'। षष्ठीसमासः, सादृश्यात्पुरुषस्य संज्ञा, पितुरप्रसिद्धत्वात्पुत्रेण व्यपदेशः। उदकं वहतीति कर्मण्यण्, उदवाहः। क्षीरोदइति बहुव्रीहिः। अत्र केचिदाहुः। उदकशब्देन समानार्थ उदशब्दोऽस्ति तथा च संज्ञायामपि प्रयुज्यते। अप्रसंनोदइति, इदं वचनं संज्ञायामुदकशब्दस्य प्रयोगनिवृत्त्यर्थमिति। एवं तु वक्ष्यमाणो विकल्पोऽनर्थकः स्यात् ॥

"पेषंवासवाहनधिषु च" ॥ असंज्ञार्थमिदम् । 'उदधिरिति'। कर्मण्यधिकरणे चेति किप्रत्ययः, घटादिरत्रोदधिः, [1]समुद्रे पूर्वेणैव सिद्धेः ॥

"एकहलादौ पूरयितव्येऽन्यतरस्याम्" ॥ 'एकोऽसहायइति'। यद्ययमेकशब्दः संख्यावचनः स्यात्तर्ह्येकेत्यनर्थकं स्यात्, नहि द्वौ च बहवो वा आदिभूता क्वचित्सम्भवन्ति, तस्मादसहायवचन एकशब्दः। नन्वेवमप्यस्य व्यावर्त्त्यं न सम्भवति, कथम्, एकैकवर्णवशवर्तित्वाद्वाचः, यदि ह्यनेकस्य वर्णस्य युगपदुच्चारणं स्यात्तदा स्थालीशब्दोऽनेकहलादिः, यदि वा क्रमेणोच्चारिता अपि वर्णा अवतिष्ठेरन् तदापि युगपद्वर्णयोरुपलम्भादादित्वं स्यात्, यतस्तु नोच्चारणे युगपदुपलब्धौ वा वर्णानां यौगपद्यं, तस्मादेकस्यैवादित्वमिति न किञ्चिदेकग्रहणेन शक्यं व्यवच्छेत्तुम्, एवं तर्ह्येकग्रहणसामर्थ्याद्विशिष्टमसहायत्वमाश्रीयते, किं पुनस्तत्, आनन्तर्यं, तदेतदाह । 'तुल्यजातीयेनानन्तरेणेति'। हल्त्वेन तुल्यजातीयत्वेन तुल्यस्थानादिभिर्भिन्नजातीये व्यवहिते च सहायत्वाप्रसिद्धेरेवमुक्तम्, ॥

"मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च" ॥ द्रवद्रव्यसंयुक्ताः सक्तवो मन्थाः । 'उदकेन मन्थइति'। तृतीयेति योगविभागात्समासः, अथ तु मथ्यतइति क्रियाशब्दस्तदा कर्तृकरणे कृता बहुलमिति समासः, सक्त्वौदनाभ्यामन्नेन व्यञ्जनमिति, बिन्दुवज्रवीवधैः षष्ठीति, भारहारगाहैः कर्मण्यणन्तैरुपपदमिति समासः, उदकस्य वज्रं क्रूरं, यदपां क्रूरमिति दर्शनात्, अन्येपि यथासम्भवं समासा भवन्त्येव उदकं वज्रमिव भिन्दानो हृदयमसाहिनोदवज्रः ॥

"इको ह्रस्वो ऽङ्यो गालवस्य" ॥ 'ग्रामणिपुत्रइति'। सत्सुद्विषेत्यादिना क्विप्, अग्रग्रामाभ्यान्नयतेरिति णत्वम् । गार्गीपुत्र इति । गार्ग्यशब्दाद्यञश्चेति ङीप्, यस्येति च, हलस्तद्धितस्य । 'कारीषगन्धीपुत्रइति'। ष्यङः संप्रसारणं, संप्रसारणस्येति दीर्घः । 'काण्डीभूतमिति'। ऊर्यादि-

[1] न समुद्र इति ३ । ४ पु० पा० ।

च्विडाचश्चेति निपातसंज्ञायामव्ययत्वं, स्त्रीवेषधारी नर्त्तकः पुरुषो भ्रुकुंसः, इहालाबुकर्क्कन्धुजम्बुफलमिति फलशब्द उत्तरपदे जम्ब्वा ह्रस्वत्वं, द्वन्द्वे जम्ब्वां मुत्तरपदे कर्क्कन्ध्वा ह्रस्वत्वम्, अलाब्वास्तु न प्राप्नोति, कर्क्कन्ध्वा अनुत्तरपदत्वात्, एवं तर्ह्येवं विग्रहः करिष्यते अलाबूश्च कर्क्कन्धूश्च अलाबुकर्क्कन्ध्वौ ते च जम्बूश्च अलाबुकर्क्कन्धुजम्ब्वस्तासां फलमलाबुकर्क्कन्धुजम्बुफलमिति, एवमपि जम्ब्वाः पूर्वनिपातः प्राप्नोति, एवं कर्क्कन्धुजम्ब्वोरपि द्वन्द्वे द्रष्टव्यं, जम्बुशब्दो राजदन्तादिषु द्रष्टव्यः ॥

"एक तद्धिते च" ॥ एकेत्यविभक्तिको निर्द्देशः, समानाधिकरणे हि स्त्रियाः पुंवद्भावेनैव सिद्धत्वात्। व्यधिकरणार्थमिदम्। 'एकत्वमिति'। असहायादिवचनोयमेकशब्दः संख्यावचनस्य तु त्वतलोर्गुणवचनस्येति पुंवद्भावेनैव सिद्धं, किं पुनः कारणं स्त्रीलिङ्ग एवोदाह्रियते न पुनर्यथाश्रुतः पुल्लिङ्गो नपुंसकलिङ्गो वेति तत्राह। 'लिङ्गविशिष्टस्येति'। स्त्रीलिङ्गस्यैव ह्रस्वविधानमर्थवद् भवति नेतरस्य, तस्य स्वत एव ह्रस्वान्तत्वात्। ननु चास्तु स्वत एवान्तो ह्रस्वो यस्त्वसावादिरेकारस्तदर्थमितरस्यापि ग्रहणमर्थवत्, अत आह 'अचेति'। स्यादेतदेवं यदि गृह्यमाणेनैकशब्देनाचश्चेत्युपस्थापितोऽज्विशेष्येत एकशब्दस्य योच् यत्र क्वत्र स्थितइति, इह तूपस्थापितेनाचा गृह्यमाण एकशब्दो विशेष्यते एकस्य ह्रस्वो भवति किंविशिष्टस्य अचः, अजन्तस्येति, तत्रालोन्त्यस्येत्यन्त्यस्य ह्रस्वेन भाव्यं तच्च टाबन्तस्यैवार्थवत् नेतरस्य, इतिकरणो हेतौ ॥

"ङ्यापोः संज्ञाछन्दसोर्बहुलम्" ॥ बहुलग्रहणात्क्वचिदनुत्तरपदेपि भवति, अनुगायन्ति नयो गर्भिणयइति, एवं कृत्वा फाल्गुनी पौर्णमासीति प्रत्युदाहरणोपपत्तिः, कर्मधारये पुंवद्भावः प्राप्नोति। 'ऊर्णम्रदा इति ऊर्णावन् म्रदीयसीति यावत्, छान्दस ईयसीशब्दस्याकारः, तैत्तिरीयास्तु दीर्घमधीयते ऊर्णाम्रदसं चास्तृणामीति ॥

"इष्टकेषीकामालानां चिततूलभारिषु" ॥ 'इष्टकचितमिति'। कर्तृकरणे कृता बहुलमिति समासः। 'इषीकतूलमिति'। षष्ठीसमासः। मालाम्बिभर्तीति मालभारिणी, सुप्यजातौविति णिनिः, प्रायेण तु

हरितिमधीयते, प्रयोगस्तु बिभर्तेः, मल्लिका मालभारिण्य इति । 'इष्टकादिभिस्तदन्तस्यापि ग्रहणं भवतीति'। यथा तु भवति तथा ऽलुक्प्रकरणएवोक्तम् ॥

"खित्यनव्ययस्य" ॥ इह ह्रस्वग्रत्याच इत्युपस्थाप्यते, तत्र यदि पूर्वपदेनाज्विशेष्येत पूर्वपदस्याचो ह्रस्वो भवति यत्र तत्र स्थितस्येति, ततो वाङ्मन्यइत्यादावपि प्राप्नोति, तस्मादचा पूर्वपदं विशेष्यते, अजन्तस्य पूर्वपदस्येति, तत्र कालिंमन्येत्यादावपि मुमि कृतेऽजन्तत्वाभावाद् ह्रस्वाभाव इत्यत आह । 'मुमा ह्रस्वो न बाध्यतइति'। कुत इत्यत आह । 'अन्यथा हीति'। उच्यते चेदमजन्तस्य ह्रस्व इति, यदि पूर्वं मुम् स्याद्वचनमिदमनर्थकं स्यात्तस्मान्मुमा ह्रस्वो न बाध्यते, कथं पुनर्मुमा ह्रस्वबाधः शङ्कितः, यावता स्तनन्धयादौ चरितार्थस्य मुमः कालिंमन्येत्यादौ ह्रस्वेनैव बाधः शङ्कनीयः, तस्मादयमस्यार्थः, यथा पूर्वं मुमा ह्रस्वो न बाध्यते तथा सूत्रस्यार्थो वर्णनीयः, अजन्तस्य ह्रस्वो विधेयः न तु पूर्वपदसम्बन्धिनोचो ह्रस्व इति तस्मिन्पक्षे मुमि कृतेऽपि ह्रस्वप्रवृत्तिसम्भवादनवकाशत्वाभावात् मुमि कृते पश्चाद्ध्रस्वः स्यात्, पूर्वं तु मुमा बाध्येतेति, यत्पुनरुक्तं मुम एव ह्रस्वेन बाधः शङ्कनीय इति, अत्र परिहारमुत्तरसूत्रे वक्ष्यति, कथं पुनरत्र खिदन्तस्य ग्रहणं यावता ज्ञापितमेतदुत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविधिर्न भवति तत्राह । 'अनव्ययस्येत्येतदेवेति'। धातोरेव खितो विधानान्नाव्ययात्परःखित्प्रत्ययः सम्भवति, तस्मादव्ययप्रतिषेधादत्र तदन्तग्रहणमित्यर्थः ॥

"अरुर्द्विषदजन्तस्य मुम्" ॥ 'अरुन्तुदइति'। विध्यरुषोस्तुदइति खश्, तुदादित्वाच्छः, सकारात्पूर्वं मुमि कृते सकारस्य संयोगान्तलोपः । 'द्विषन्तपइति'। द्विषत्परयोस्तापेरिति खच्, खचि ह्रस्वः, मुमादि पूर्ववत् । 'विद्वन्मन्यइति'। वसुस्रंसुध्वंस्वितिदत्वं, यरोऽनुनासिकेऽनुनासिको वा, अन्तग्रहणमनर्थकं वर्णग्रहणे सर्वत्र तदन्तविधेर्भावादित्यत आह । 'अन्तग्रहणमित्यादि'। समीपवचनोन्तशब्दः, अच्चासावन्तश्चेति अजन्तः, निपातनाद्विशेषणस्य परनिपातः, कः पुनरसौ पूर्वसूत्रे विहितो ह्रस्वस्तेन

च्विडाचश्चेति निपातसंज्ञायामव्ययत्वं, स्त्रीवेषधारी नर्त्तकः पुरुषो भ्रुकुंसः, इहालाबुकर्कन्धुजम्बुफलमिति फलशब्द उत्तरपदे जम्ब्वा ह्रस्वत्वं, द्वन्द्वे जम्ब्वां मुत्तरपदे कर्कन्ध्वा ह्रस्वत्वम्, अलाब्वास्तु न प्राप्नोति, कर्कन्ध्वा अनुत्तरपदत्वात्, एवं तर्ह्येवं विग्रहः करिष्यते अलाबूश्च कर्कन्धूश्च अलाबुकर्कन्ध्वौ ते च जम्बूश्च अलाबुकर्कन्धुजम्ब्वस्तासां फलमलाबुकर्कन्धुजम्बुफलमिति, एवमपि जम्ब्वाः पूर्वनिपातः प्राप्नोति, एवं कर्कन्धुजम्ब्वोरपि द्वन्द्वे द्रष्टव्यं, जम्बुशब्दो राजदन्तादिषु द्रष्टव्यः ॥

"एक तद्धिते च" ॥ एकेत्यविभक्तिको निर्देशः, समानाधिकरणे हि स्त्रियाः पुंवद्भावेनैव सिद्धत्वात्। व्यधिकरणार्थमिदम्। 'एकत्वमिति'। असहायादिवचनोयमेकशब्दः संख्यावचनस्य तु त्वतलोर्गुणवचनस्येति पुंवद्भावेनैव सिद्धं, किं पुनः कारणं स्त्रीलिङ्ग एवोदाह्रियते न पुनर्यथाश्रुतः पुल्लिङ्गो नपुंसकलिङ्गो वेति तत्राह। 'लिङ्गविशिष्टस्येति'। स्त्रीलिङ्गस्यैव ह्रस्वविधानमर्थवद् भवति नेतरस्य, तस्य स्वत एव ह्रस्वान्तत्वात्। ननु चास्तु स्वत एवान्तो ह्रस्वो यस्त्वसावादिरेकारस्तदर्थमितरस्यापि ग्रहणमर्थवत्, अत आह 'अचेति'। स्यादेतदेवं यदि गृह्यमाणेनैकशब्देनाचश्चेत्युपस्थापितोऽज्विशेष्येत एकशब्दस्य योच् यत्र कुत्र स्थितइति, इह तूपस्थापितेनाचा गृह्यमाण एकशब्दो विशेष्यते एकस्य ह्रस्वो भवति किंविशिष्टस्य अचः, अजन्तस्येति, तत्रालोन्त्यस्येत्यन्त्यस्य ह्रस्वेन भाव्यं तच्च टाबन्तस्यैवार्थवत् नेतरस्य, इतिकरणो हेतौ ॥

"ङ्यापोः संज्ञाछन्दसोर्बहुलम्" ॥ बहुलग्रहणात्क्वचिदनुत्तरपदेपि भवति, अनुगार्यन्ति नद्यो गर्भिणयइति, एवं कृत्वा फाल्गुनी पौर्णमासीति प्रत्युदाहरणोपपत्तिः, कर्मधारये पुंवद्भावः प्राप्नोति। 'ऊर्णम्रदा इति ऊर्णावन् म्रदीयसीति यावत्, छान्दस ईयसीशब्दस्याकारः, तैत्तिरीयास्तु दीर्घमधीयते ऊर्णाम्रदसं चास्तृणामीति ॥

"इष्टकेषीकामालानां चिततूलभारिषु" ॥ 'इष्टकचितमिति'। कर्तृकरणे कृता बहुलमिति समासः। 'इषीकतूलमिति'। षष्ठीसमासः। मालाम्बिभर्तीति मालभारिणी, सुप्यजातौविति णिनिः, प्रायेण तु

हरितिमधीयते, प्रयोगस्तु बिभर्तेः, मल्लिका मालभारिण्य इति । 'इ-ष्टकादिभिस्तदन्तस्यापि ग्रहणं भवतीति'। यथा तु भवति तथा ऽलुक्-प्रकरणएवोक्तम् ॥

"खित्यनव्ययस्य" ॥ इह ह्रस्वग्रत्याच इत्युपस्थाप्यते, तत्र यदि पूर्वपदेनाज्विशेष्येत पूर्वपदस्याचो ह्रस्वो भवति यत्र तत्र स्थित-स्येति, ततो वाङ्मन्यइत्यादावपि प्राप्नोति, तस्मादचा पूर्वपदं विशे-ष्यते, अजन्तस्य पूर्वपदस्येति, तत्र कालिंमन्येत्यादावपि मुमि कृतेऽजन्त-त्वाभावाद् ह्रस्वाभाव इत्यत आह । 'मुमा ह्रस्वो न बाध्यतइति'। कुत इत्यत आह । 'अन्यथा हीति'। उच्यते चेदमजन्तस्य ह्रस्व इति, यदि पूर्वं मुम् स्याद्वचनमिदमनर्थकं स्यात्तस्मान्मुमा ह्रस्वो न बाध्यते, कथं पुन-र्मुमा ह्रस्वबाधः शङ्कितः, यावता स्तनन्धयादौ चरितार्थस्य मुमः कालिं-मन्येत्यादौ ह्रस्वेनैव बाधः शङ्कनीयः, तस्मादयमस्यार्थः, यथा पूर्वं मुमा ह्रस्वो न बाध्यते तथा सूत्रस्यार्थो वर्णनीयः, अजन्तस्य ह्रस्वो विधेयः न तु पूर्वपदसम्बन्धिनोचो ह्रस्व इति तस्मिन्पक्षे मुमि कृतेऽपि ह्रस्वप्रवृ-त्तिसम्भवादनवकाशत्वाभावात् मुमि कृते पश्चाद्ध्रस्वः स्यात्, पूर्वं तु मुमा बाध्येतेति, यत्पुनरुक्तं मुम एव ह्रस्वेन बाधः शङ्कनीय इति, अत्र परिहार-मुत्तरसूत्रे वक्ष्यति, कथं पुनरत्र खिदन्तस्य ग्रहणं यावता ज्ञापितमेतदुत्तर-पदाधिकारे प्रत्ययग्रहणे तदन्तविधिर्न भवति तत्राह । 'अनव्ययस्येत्येत-देवेति'। धातोरेव खितो विधानान्नाव्ययात्परःखित्प्रत्ययः सम्भवति, तस्मादव्ययप्रतिषेधादत्र तदन्तग्रहणमित्यर्थः ॥

"अरुर्द्विषदजन्तस्य मुम्" ॥ 'अरुन्तुदइति'। विध्यरुषोस्तुदइति खश्, तुदादित्वाच्छः, सकारात्पूर्वं मुमि कृते सकारस्य संयोगान्तलोपः । 'द्विषन्तपइति'। द्विषत्परयोस्तापेरिति खच्, खचि ह्रस्वः, मुमादि पूर्ववत् । 'विद्वन्मन्यइति'। वसुस्रंसुध्वंस्वितिदत्वं, यरोऽनुनासिकेऽनुनासिको वा, अन्तग्रहणमनर्थकं वर्णग्रहणे सर्वत्र तदन्तविधेर्भावादित्यत आह । 'अन्त-ग्रहणमित्यादि'। समीपवचनोन्तशब्दः, अच्चासावन्तश्चेति अजन्तः, निपातनाद्विशेषणस्य परनिपातः, कः पुनरसौ पूर्वसूत्रे विहितो ह्रस्वस्तेन

पूर्वपदस्य तदन्तविधिः, एतदुक्तं भवति, योऽयमस्य सूत्रस्य समीपभूतो यः पूर्वसूत्रे विहितो ह्रस्वस्तदन्तस्य मुम् इति, यतो ह्रस्वे कृते मुम् भवतीति, एतेनैतदपि निरस्तं मुम एव ह्रस्वेन बाधप्रसङ्ग इति, कथं तन्निमित्तकत्वान्मुमः, ह्रस्वनिमित्तको ह्येष मुम् भवति, यद्येवं स्तनन्धयादौ यत्र ह्रस्वो न क्रियते तत्र मुम् न प्राप्नोति, किं पुनः कारणमत्र ह्रस्वो न क्रियते प्रयोजनाभावात्, अस्ति प्रयोजनं, किं, मुम् यथा स्यादिति, इदानीमेव ह्युक्तं ह्रस्वनिमित्तको मुमिति ॥

"इच एकाचो ऽम्प्रत्ययवच्च" ॥ 'अमागमो भवतीति'। कथमस्यागमत्वं, मित्त्वात्, यद्येवं मकार इत्संज्ञकः प्रयोगे श्रवणं न प्राप्नोति, श्रियंमन्यः भ्रुवंमन्य इति, नैवास्य मकारस्य श्रवणं किं तर्हि मुमः, ननु च नाप्राप्ते मुम्यारभ्यमाणोयमागमस्तं बाधेत, न बाधेत, उक्तं तत्र अन्तग्रहणं कृताजन्तकार्यप्रतिपत्त्यर्थमिति, तेनास्मिन्नपि प्रकृते भविष्यति, वयन्तु ब्रूमः। नैवायमित्संज्ञको मकारः, अम् प्रत्ययवद्भावेन न विभक्तौ तुस्मा इति प्रतिषेधात्, यद्येवमादेशः प्राप्नोति, अम् प्रत्ययवद्भावात्परो भविष्यति, आगमव्यपदेशस्तु यौगिकः समीप आगच्छतीति, यथा नय्वाभ्यां पदान्ताभ्यामित्यत्रैचः, द्वितीयोपि वा मकारः संयोगान्तलोपेन लुप्तनिर्द्दिष्टो द्रष्टव्यः। यद्यत्र प्रत्ययवच्चेत्येतावदुच्येत गांमन्य इत्यत्रौतोम् शसोरित्याकारो न स्यात्, शसा सहचरितस्यामस्तत्र ग्रहणात्, इह च स्त्रींमन्य इत्यमि पूर्व इति पूर्वरूपं न स्यात् प्रथमयोरिति तत्रानुवृत्तेः, इह च नरंमन्य इति ऋतोङि सर्वनामस्थानयोरिति गुणो न स्यात्, सामान्यातिदेशे विशेषानतिदेशात्, यत्र हि सामान्यशब्देनातिदेशस्तत्र विशेषाणामशब्दार्थत्वात्सामान्यनिबन्धनमेव कार्यं प्राप्यते, यथा ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यमिति ब्राह्मणमात्रप्रयुक्तं कार्यमतिदिश्यते न माठरादिविशेषप्रयुक्तं, तद्वदत्रापि प्रत्ययमात्रप्रयुक्तयोरियङुवङोरेवातिदेशः स्यात् नत्वाकारादेरिति मत्वाह। 'अम् प्रत्ययवच्चेति'। एतदेव विवृणोति। 'द्वितीयैकवचनवच्चेति'। ननु चात्रैकममग्रहणं यदि तेनागमो निर्द्दिष्टः प्रत्ययो न विशेषितः स्यात्, अथ प्रत्ययो विशेष्यते

दौर्गास्तु शप्यपि पेठुः, तसि भूष अलङ्कारइति। पुरुषकारे तूक्तमुभयत्रापि भूषैवेत्येव बहव इति॥ १९४॥

मोक्ष असने॥ मोक्षयति शरान्॥ १९५॥

अर्ह पूजायाम्॥ अर्हयति अर्हान्॥ १९६॥

ज्ञा नियोगे॥ अत्र नियोगः प्रेरणम्। स्वभावादयमाङ्पूर्वः। आज्ञापयति। मारणादौ ज्ञपयति इति गतम्। बोधने तु ज्ञपयति विज्ञापयतीत्युभयम्। इदं च घटादौ 'ज्ञपमिच्चे' त्यत्र चोपपादितम्। श्नि जानातीति॥ १९७॥

भज विश्राणने॥ भाजयति। भाज पृथक्कर्मणीति वक्ष्यमाणस्य भाजयति। भञ्जयतीति भाषार्थे ऽपे। भजति, भजतइति शपि सेवायाम्, भनक्तीत्यामर्दने श्नमि॥ १९८॥

शृधु प्रसहने॥ शर्धयति। अशशर्धत्। अशशृधत्। उदित्त्वाच्छर्धतीत्यत्रापि भवति। शर्धित्वा। शृद्ध्वा। शर्धतइति शपि, शब्दकुत्सायां तुदादिः, उन्दने हि शपि शर्धतीति च॥ १९९॥

यत निकारोपस्कारयोरिति मैत्रेयः॥ क्रियानिघण्टौ तु 'यते प्रैषे निराकारे पातयेदप्युपस्कृतौ' इति। क्षीरस्वामी तु निराकारोपसंस्कारयोरिति तु पाठो दृश्यते, निराकारः परिभव इति चाह। यातयति। निसश्च धान्यधनयोः प्रति[1]स्तदर्थत्वे सतीत्यर्थद्वयमाह। एवं च भुवो विकल्कनइति पाठस्य संवादत्वेनोक्तमवकल्पयतीति धनपालोदाहरणं भुवो ऽवकल्पनइति पाठेप्युपपद्यते॥ २००॥

रक लग आस्वादने॥ राकयति। लागयति। रघ लग इत्येकइति मैत्रेयः। राघयति। लागयति। अपरे स्वाद्यमपि रगेति तृतीयान्तं पठन्ति। रागयति। लगयतीति शङ्कायां सङ्गे च घटादिः॥ २०१–२०२॥

---

१ प्रतिदाने इति क्रियानिघण्टौ पाठो दृश्यते, तस्यार्थः। यन्नाद्यर्थेषु चतुर्षु यतधातुं पातयेत् प्रयुञ्जीत, निसः परभागे चेत् प्रयुज्यते तदायं धान्यधनयोः प्रतिदाने वर्ततइति, ऋणं निर्यातयति। प्रतिददातीत्यर्थः।

अञ्चु विशेषणे ॥ विशेषणं व्यावर्तनम् । उदित्त्वाद्विभाषितो णिच् । अञ्चयति । अञ्चति । गतिपूजनयोरञ्चतीति भ्वादौ, गतियाचनयोरञ्चतइत्यपि ॥ २०३ ॥

लिगि चित्रीकरणे ॥ लिङ्गयति । लिङ्गति । गतौ च शपि लिङ्गति ॥ २०४ ॥

मुद संसर्गे ॥ मोदयति सक्तून् घृतेन । मोदते शपि हर्षणे ॥ २०५ ॥

त्रस धारणे ॥ ग्रहणइति नन्दी । अत्र धारणं वारणमिति मैत्रेयः । वारणइत्येव शाकटायनः । त्रासयति मृगान् । त्रंसयतीति भाषणे भविष्यति । त्रस्यति त्रसतीति दिवादावुद्वेगे ॥ २०६ ॥

उध्रस उञ्छे ॥ क्र्यादिकस्योकार इत् । अस्य तु धातोरवयव इति काश्यपादिः । मैत्रेयस्तु पूर्व एवायं धातुरिह पठ्यते, तेनायमुदिदिति । अन्ये तूभयत्रापि धात्ववयव उकार इति । ध्रासयतीति मैत्रेयमते । अन्येषामुध्रासयतीति ॥ २०७ ॥

मुच प्रमोचने मोदने च ॥ स्वर्णं निर्मोचयति । प्रतिददातीत्यर्थः । मुञ्चतीति कल्कने शपि, शे तु मुञ्चतीति मोक्षणे ॥ २०८ ॥

वस स्नेहनच्छेदापहरणेषु ॥ छेदापहरणयोरित्येके । वासयति । अयं निवासे कथादिर्भ्वादिश्च, वस्तइत्याच्छादने । वस्यतीति स्तम्भने । वास उपसेवायामिति दीर्घोपधश्च कथादौ ॥ २०९ ॥

चर संशये ॥ चारयति । चरतीति गतौ शपि ॥ २१० ॥

च्यु हसने ॥ सहने चेत्येके, च्यावयति । च्यवते इति गतौ शपि, च्युसेत्येकइति स्वामी । च्योसयति ॥ २११ ॥

भुवो ऽवकल्कने ॥ अवकल्कनं मिश्रीकरणमिति [1]स्वामी । पुरुषकारे अवकल्कनं चिन्तनमिति काश्यपः । क्वचित्स्वामिग्रन्थे ऽनुकल्कनमिति पठित्वा ऽनुकल्कनं मिश्रीकरणमिति दृश्यते, नन्दी तु भुवो विकल्कनइति, विकल्कनं विपाचनम् । तथा च प्रयुज्यते । तपोभावितमात्मानमिति, अवकल्कनइत्यपरे । तथा च धनपालः, ऋपेस्तादर्थ्य-

१ क्षीरेत्यधिकं ४ पु० ।

इति पठित्वा ऽवकल्पयतीत्युदाजहार । तादर्थ्यइति भुव इति पूर्वंधातोर्यार्थस्तदर्थत्वे सतीत्यर्थः । भावयति । भावयतइति प्राप्तौ युजादिः । भवतीति शपि ॥ २१२ ॥

क्लृपेश्च ॥ कल्पयति । सामर्थ्ये शपि कल्पते । क्षीरस्वामी तु क्लृपेस्तादर्थ्यइति पठित्वा तादर्थ्ये प्रस्तुतस्य भुवोर्थे मिश्रीकरणे । अथ वा तच्छब्देन क्लृपिः परामृश्यते, तस्य योर्थः सामर्थ्यलक्षणः ॥ २१३ ॥

आ स्वदः सकर्मकात् ॥ अत्रान्ये स्वाद इति दीर्घोपधं पठन्तो वक्ष्यमाणं स्वद आस्वादने इति धातुमपि दीर्घोपधं पठन्ति । आ कुस्मादितिवदभिविधावयमाकारः । तेन ग्रसिप्रभृतीभ्यः ष्वद आस्वादनइति वक्ष्यमाणपर्यन्तेभ्यः सकर्मकेभ्य एव णिज् भवति । इदं च सकर्मकत्ववचनं कर्मसापेक्षक्रियामात्रवाचित्वेनाप्रयुज्यमाने ऽपि कर्मण्ययं विधिर्भवति । अत एव हि मैत्रेयः । संभविकर्मकाण्णिजित्याह । उक्तं च पुरुषकारे संभविकर्मकत्वकथनेन सत्यसति वा कर्मणः प्रयोगे तत्संभवमात्रेण णिज् भवतीत्युक्तं भवति । कर्मसंभवः पुनरनेकार्थत्वेनार्थान्तरवाचितायां यथाप्रयोगं द्रष्टव्य इति च । कर्मकर्तृविषयेप्यर्थान्तरवृत्तित्वं समानमिति न तस्येह पृथग्विषयत्वेनेहोपादानम् । अत्र केचित्पञ्चमीप्रकरणाभ्यां सन्निहितेन णिचा ऽर्थप्राप्तमेवकारं संबन्धयन्तः सकर्मकाण्णिजेव भवति अकर्मकात्तु यथायोगमित्याहुः । तदसत् । एवकारस्य सकर्मकादितिश्रुतेनान्वयलाभे ऽश्रुतेनान्वयायोगात् । अनेन खल्वभिप्रायेण मैत्रेयादयः सकर्मकादेवेत्येवं व्याख्यन् । अत्र मतान्तरमप्याह मैत्रेयः । आ स्वाद एव सकर्मकादित्येकइति । तथा च क्षीरस्वामी । आङ्पूर्वात्स्वदेः सकर्मकाण्णिज् भवतीति । अयं पक्षः पुरुषकारे दूषितः । तत्र चाभिविधिपक्ष एव युक्तः प्रत्यवभासते । इहाप्याङः पूर्वपरेष्विवाभिविध्यर्थताया एवौचित्यादा कुस्मादिति हि पूर्वत्राभिविधावाङ् दृष्टः, आ धृषाद्वेत्या गर्वादिति च समनन्तरमेवैवं दृश्यते, तत्रायमपि तन्मध्यपातीतच्छायश्चाङ् तदर्थ एव व्यक्तमवभासते ॥ तदत्र पक्षान्तरं व्याचक्षाणानामाशयश्चिन्त्य इति ॥

ग्रस ग्रहणे ॥ ग्रासयति फलम् । ग्रसतइत्यदने शपि ॥ २१४ ॥

पुष धारणे ॥ पोषयत्याभरणम् । पोषति, पुष्यति, पुष्णाति, इति शप्श्यन्श्नासु पुष्टौ ॥ २१५ ॥

दल विदारणे ॥ दालयति । दलतीति विशरणे घटादौ ॥ २१६ ॥

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोक्ट लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः ॥ मैत्रेयानुरोधेनायं पाठो दण्डकस्य । भासार्था इत्येकइति मैत्रेयः । तथा च क्षीरस्वामी । भासा दिप्तिरर्थो येषान्ते भासार्था इति । पाटयति । पटयतीति कथादौ ग्रन्थे । पटतीति गतौ शपि । पोटयति । पुटयतीति संसर्गे कथादौ । संसर्गे पुटतीति शे । लोटयति । शप्श्यनोर्लोटति लुट्यतीति लोटने । लोटतइति युजादौ प्रतिघाते, लुण्टतीति लुटि स्तेये शपि । लुण्टयतीतीहैव गतः । तुञ्जयति । इदित्त्वात्तुञ्जतीति । हिंसायामिदितोऽनिदितश्च तुञ्जति तोजतीति शपि । मिञ्जयति । मिञ्जति । पिञ्जयति । पिञ्जति । अदादौ वर्णो पिङ्क्ते । लुञ्जयति । भञ्जयति । भजतीति भज सेवायां शपि । भनक्तीत्यामर्दने श्नमि, भाजयतीति विश्राणने गतः । पृथक्कर्मणि च भविष्यति । लङ्घयति । लङ्घति, शोषणे शपि लङ्घति, गत्यान्तु लङ्घते । त्रंसयति, त्रंसति । त्रासयतीति धारणे गतम् । त्रस्यति त्रसतीति उद्वेगे वा श्यनि । पिंसयति पिंसति । पेसयतीति गतौ गतम् । पेसतीति तु शपि । कुंसयति । कुंसति । भ्रुकुंसः । स्त्रीवेशधारित्त्वाद् भ्रुवा कुंसयति पुरुषत्त्वमिति भ्रुकुंसः । दंशयति । दंशति । दशतीति दंशने शपि । कुंशयति कुंशति । घाटयति, अयं सङ्घाते ऽपि, अतः पुनः पाठो ऽर्थभेदादिति मैत्रेयः । घटतइति घटादौ चेष्टायाम् । घण्टयति घण्टति । घण्टा । वृंहयति वृंहति । वर्हतीत्यनिदितो वृंहेः शपि वृद्धौ, इदितस्तु वृंहतीति शब्दे च । वर्हयति, वल्हयति । वर्हते वल्हतइति प्राधान्ये शपि । गोपयति । धूपयति । सन्तापे शपि, रक्षणसन्तापयोः गोपायति धूपायतीति, गुप्यतीति व्याकुलत्त्वे श्यनि, सन्तापे धुपतीति शे,

विच्छयति । विच्छाययतीति शे गतौ । चीवयति । पोथयति । हिंसायां पुथ्यतीति श्यनि । पुन्थतीति शपि संक्लेशे । लोकयति । अलुलोकत् । लोचयति । अलुलोचत्, ऋदित्त्वाच्चाग्लोपीतिह्रस्वनिषेधः । लोचते । लोकते इति दर्शने शपि । नादयति । नदतीति शपि शब्दे । कोपयति । कुप्यतीति कोपे श्यनि । तर्कयति । ऊहेप्ययमभिधीयतइति मैत्रेयः । वर्तयति । वर्धयति । उदित्त्वाद्वर्तति वर्धतीति च, वर्तते वर्धते इति वर्तनवृद्ध्योः शपि । वृत्यतइति विचारणे श्यनि ॥ २४७ ॥

रुठ लजि अजि दसि भृशि रुशि रुसि शीक नट पुटि जुचि रघि अहि रहि महि इत्येते पञ्चदश स्वामिकाश्यपानुसारेण लिख्यन्ते ॥ रोठयति, स्तेये शपि रुण्ठति । प्रतिघाते द्युतादौ रोठते । लञ्जयति । लञ्जति । लजति । लञ्जति भर्जने शपि, लाजति लाञ्जति भर्त्सने शपि, लजते इति व्रीडे तुदादौ, प्राकाशे लञ्जयतीति कथादौ । अञ्जयति । अञ्जति । अनक्तीति श्नमि व्यक्त्यादौ । दंसयति दंसति । भृंशयति । भृंशति, भर्शति भृश्यतीति शप्श्यनोरधःपतने । रुंशयति रुंशति । रुंसयति, रुंसति, शीकयति । शीकति शीकतइति सेचने शपि, नाटयति । अयमवस्यन्दने गतः । नटतीति नृत्तौ घटादिः, पुण्टयति । परिवर्तने शपि पोटते । जुञ्चयति जुञ्चति । रङ्घयति । रङ्घति, गतौ शपि च रङ्घति । अंहयति अंहति । अंहतइति गतौ शपि । रंहयति । रंहति । रहयतीति त्यागे कथादौ भविष्यति । मित्प्रकरणे च गतः, रंहति रहतीति गतित्यागयोः शपि, मंहयति मंहति । महयतीति कथादौ पूजायाम्, महतीति शपि । मंहतइति वृद्धौ । महीयतइति कण्ड्वादौ ॥ भसिपिसिलडिवृहितुडिनडीत्यन्ये पठन्तीति स्वामी । तत्राद्यौ वृहिश्च मैत्रेयानुरोधेनास्माभिर्द्वण्डके पठिताः । लण्डयति । लण्डति । लाडयतीत्युपसेवायां गतम् । विलासे लडतीति शपि । तोडयति । तोडति तुण्डतइति शपि तोडने तुडतीति शे । नाडयति । नडतीति गतौ शपि ॥ २६२ ॥

पूरी आप्यायने ॥ पूरयति । ईदित्त्वान्निष्ठायामनिडर्थादस्यापि णिज्विकल्पितः । तेन पूरयति । पूर्यते इति श्यनि ॥ २६३ ॥

रुज हिंसायाम् ॥ रोजयति रुजतीति शे भङ्क्ते ॥ २६४ ॥

ष्वद आस्वादने ॥ स्वा॑द इत्येके । संवरणइति क्षीरस्वामिधनपालशाकटायनाः । स्वादयति । असिष्वदत् । 'सः स्विदी' ति सत्त्वं णयन्तात्सनि । स्वादते स्वदते इति शपि ॥ आस्वदीयाः ॥ २६५ ॥

आ धृषाद्वा ॥ धृष प्रसहनइति वक्ष्यमाणसहिता विभाषितणिचो वेदितव्याः । आकुस्मादितिवदभिविधावाङ् ॥

युज पृच संयमने ॥ योजयति । पर्चयति । अन्यत्र योजति । पर्चति, योक्ता, अयौक्षीत्, त्यजियुजिरुजीत्यनिट्कारिकापाठादनिट्कः । पर्चिता । अपर्चीत् । युनक्ति युङ्क्ते योगार्थे श्नमि, श्यनि युज्यतइति समाधौ, पृणक्ति संपर्के श्नमि, पृक्ते इति लुकि ॥ २६७ ॥

अर्च पूजायाम् ॥ अर्चयति । अर्चतीति भौवादिकेन स्वरितेता ऽर्चिनैव सिद्धे णिज्विकल्पनं कर्तृगामिफले अर्चतीति यथा स्यादिति । शाकटायनस्त्वयमात्मनेपदीति तन्मते णिज्विकल्पस्य फलमकर्त्रभिप्राये ऽपि तङ्सिद्धिरिति बोद्धव्यम् ॥ २६८ ॥

षह मर्षणे ॥ साहयति । सहति सहतइति शप्यनुदात्तेत् । अस्येह पाठो वृत्तिकारादीनामनभिमत इति दिवादावेवावोचाम ॥ २६९ ॥

ईर क्षेपे ॥ ईरयति, ईरति, लुकीर्ते गतिकम्पनयोः ॥ २७० ॥

ली द्रवीकरणे ॥ लाययति लयति । लेता । श्विडीङ्वर्णेष्वथ शीङ्श्रिञावपीत्येते एवेवर्णान्तेषु सेट इति नियमाच्चेट् । 'विभाषा लीयते'रित्यात्त्वविकल्पमस्यापीच्छन्मैत्रेयो 'लीलोर्नुग्लुकौ'वित्यात्त्वपक्षे लुको विकल्पनाल्लुकं चोदाजहार, अनात्त्वे तु नुक्, तदभावे वृद्ध्यायौ च । तदयुक्तम् । आत्त्वे लीनातिलीयत्योर्यका निर्देश इति भाष्ये उक्तत्वादस्यात्त्वाभावात् । पुरुषकारेप्युक्तं देवेनास्यात्त्वे लुगादि प्रदर्शनं मैत्रेयविस्रम्भा-

१ ह्रस्वोपधपाठेऽप्युपधावृद्ध्या स्वादयतीति रूपाणां 'सः स्विदिस्वदी'ति णयन्तात्सनि सत्वमितिवक्ष्यमाणत्वात्सन्नन्तेऽपि सिस्वादयिषतीति रूपस्य च तुल्यत्वेऽपि असिस्वददिति रूपसिद्धिः प्रयोजनं दीर्घोपधस्यापोपदेशत्वादभ्यासेणः परस्य सस्य षत्वं नेति ।

दयुक्तं चेदं भाष्यविरोधित्वादिति । श्लेषणे श्यनि लीयते । लिनातीति श्नि ॥ २७१ ॥

वृजी वर्जने ॥ वर्जयति । वर्जिता । ईदित्त्वं निष्ठायामनिडर्थं, वृक्तइति वृङ्क्ते वृणक्तीति लुक्श्नमोः ॥ २७२ ॥

वृञ् आवरणे ॥ वारयति । वरति, वरते । वरिता, वरीता, इटो दीर्घविकल्पः । आत्मनेपदेषु लिङ्सिचोः सनि च 'लिङ्सिचोरात्मनेपदेषु' 'इट् सनि वे' तीड्विकल्पः । लिङि परस्मैपदपरे सिचि च 'न लिङि' 'सिचि च परस्मैपदेष्वि' तीटो दीर्घाभावश्च वृञ्वद्वेयः । ञित्त्वादुभयपदित्त्वम् । वृणोति वृणुतइति श्नौ । वृणीते इति संभक्तौ श्नि ॥ २७३ ॥

जॄ वयोहानौ ॥ जारयति । जरति । जरिता । जरीता । 'वॄतो वे'त्यादि । जीर्यते जृणातिवत् । ज्रि इति नन्दी । ज्राययति ज्रयति । क्रैयादिकोप्येवमिति सः, ज्रिणाति ॥ २७४ ॥

रिच वियोजनसंपर्चनयोः ॥ रेचयति । रेचति । रेक्ता । अनिट्कारिकापाठादनिट्त्वं । विरेचने रिङ्क्ते, रिणक्तीति श्नमि ॥ २७५ ॥

शिष असर्वोपयोगे ॥ शेषयति । शेषति । शेष्टा । शिषिम्पिषिमित्यनिट्कारिकासु पाठादनिट्त्वम् । अत एव लुङ्यशित्तदिति क्सो भवति । लुङ्यङोभावादशेषीदिति देवेन यदुक्तं तदस्यानिट्त्वादयुक्तमिति पुरुषकारएव दूषितम् । शिनष्टीति विशेषणे श्नमि । विपूर्वातिशये । विशेषयति । विशेषति ॥ २७६ ॥

तप दाहे ॥ तापयति । तपति । तप्ता । तपिं तिपिमितिवचनादनिट्त्वम् । तपतीति शपि सन्तापे । तपते तपतीत्यैश्वर्ये ॥ २७७ ॥

तृप तृप्तौ ॥ संदीपनइति चीरस्वामी । तर्पयति । तर्पति । तर्पिता । अनिट्कारिकायां तृप्यतीति श्यना निर्देशान्नास्यानिट्त्वम् । तृपति तृम्पतीति शे । तृप्यतीति श्यनि । अस्य स्वादौ पाठो वृत्तिकारादीनामनभिमत इत्यवोचाम ॥ २७८ ॥

छृदी संदीपने ॥ छर्दयति ॥ छर्दति । छर्दिता । छर्दिष्यति । 'से सिचीती' ड्विकल्पः कृतादिसाहचर्याद्रौधादिकस्य, अत एवायं निष्ठा-

यामनिङर्थमीदित्यप्यते । कृप्णः, कृप्णवानिति । कृन्ते कृणत्तीति दीप्ति-देवनयोः श्नमि । धनपालशाकटायनौ तु कृदेत्यनिदितं पेठतुः । तत्र निष्ठायां छर्दितमिति फले भेदः । क्षीरस्वामिनस्तु पान्तो ऽयं, यदाहुः, चृप छृप तृप दृप संदीपने । संदीपनक्रियायां चृपादयश्चत्वारो वर्तन्तइति । चर्पयति । छर्पयति । तर्पयति । दर्पयति ॥ २७९ ॥

दृभी भये ॥ दर्भयति । दर्भिता । दृब्धः । ईदित्त्वादनिट्-त्वम् ॥ २८० ॥

दृभ सन्दर्भे ॥ अस्यानीदित्त्वान्निष्ठायामपि सेट्त्वं विशेषः । अमुं बहवो न पठन्तीति पुरुषकारे । अस्माभिस्तु देवमैत्रेयानुसारेण पठितः । तुदादेरीदितो ग्रन्थने दृभतीति ॥ २८ ॥

श्रथ मोक्षणे ॥ हिंसायामित्यपरइति पुरुषकारे । श्राथयति श्रथ-ति । श्राथयतीति प्रयत्ने ऽपि गतः । श्रथयतीति क्यादौ दौर्बल्ये ॥ २८२ ॥

मी गतौ ॥ माययति । मयति । मेता । श्विडीङिवर्णेष्वथ शीङ्-श्रिञावपीति नियमान्नेडागमः । 'सनि मीमे' त्यत्राचौरादिकैः साहचर्या-त्तादृश एव गृह्यतइति मिमीषतीत्यत्रापमिस्भावो न भवति । मीञो मिनाति मीनीते हिंसायाम् । मीयते ङितः, मिनोति मिनुते स्वादौ ह्रस्वान्तस्य ॥ २८३ ॥

ग्रन्थ बन्धने ॥ ग्रन्थयति । ग्रन्थति । अत्र देवमैत्रेयौ क्रथ हिंसा-यामिति स्वरितेतं पठित्वा क्राथयति । क्रथति । क्रथतइत्याहतुः । शाक-टायनस्तु परस्मैपदीति, जासिनीत्यत्र क्राथेति निपातनाद्वृद्धिरित्युक्त्वा-वृत्तिकारादीनामनभिमतश्चुरादौ पाठ इति घटादौ क्रथतीत्यत्रावो-चाम ॥ २८४ ॥

शीक मर्षणे ॥ शीकयति । शीकति, शीकिता । सेचने अपि शीकते ॥ २८५ ॥

चीक च ॥ चीकयति । चीकति । चीकिता ॥ २८६ ॥

अर्द्द हिंसायाम् ॥ अर्द्दयति । अर्द्दति । अर्द्दते । अयं स्वरितेदिति देव-मैत्रेयौ । आत्मनेपदीति शाकटायनः । गतियाचनयोरर्द्दतीति अपि ॥ २८७ ॥

हिसि हिंसायाम् ॥ हिंसयति । हिंसति । इदित्त्वादेव णिज्विकल्पः सिद्ध इति युजादिपाठे प्रयोजनं चिन्त्यम् । हिनस्तीति श्नमि ॥ २८८॥

आङः षद: पद्यर्थे ॥ पद्यर्थो गतिः । आसादयति । आसीदतीति शपि सीदादेशः । आसत्ता । आसात्सीत् । 'शदिं सदिं स्विद्यतिपद्यतिखिद्यतीन्' इत्यनिट्कारिकायां पाठादनिट्त्वं, विसरणार्थकस्य ज्वलादिकस्य तौदादिकस्य च ऌदित्त्वादङ् । आसदद् इति ॥ २८९ ॥

शुन्ध शौचकर्मणि ॥ शुन्धयति । शुन्धति, शुन्धिता । शुन्धतीति शपि शुद्धावकर्मकः ॥ २९० ॥

'छद अपवारणे ॥ स्वरितेदिति मैत्रेयदेवौ ॥ परस्मैपदीति शाकटायनः । छादयति । छदति । छदते । छदयतीत्यूर्जने घटादौ । छन्दयतीतीहैव संवरणे गतः ॥ २९१ ॥

जुष परितर्कणे ॥ परितर्कणमूहो हिंसा वा, परितर्पणे परितृप्तिक्रियायामिति क्षीरस्वामी । जोषयति । जोषति । प्रीतिसेवनयोर्जुषतइति तुदादौ ॥ २९२ ॥

धूञ् कम्पने ॥ धूनयति । धवयति धवते । 'धूञ्प्रीञोर्नुग्वक्तव्य'इति नुक् । धूञ्प्रीणोरिति हरदत्तकौमारादीनां पाठः । तन्मते प्रीणातिसाहचर्यात् धूञो ऽपि क्रैयादिकस्यैव नुका भाव्यम् । अत एवात्र मैत्रेयो धावयतीत्युदाजहार । एवञ्च स्वादौ दीर्घवादीनामपि धावतीति भवति । धुनाति धुनीते इति क्र्यादौ । धुनोति धुनुतइति स्वादौ । धूनोति धूनुते इति च तत्रैव विधूनने, धुवतीति कुटादिः ॥ २९३ ॥

प्रीञ् तर्पणे ॥ अत्र केचन धातुवृत्तिकाराः धूञ्प्रीञोर्नुग्वक्तव्य इति पठन्तः प्रीणयतीत्युदाहरन्ति । हरदत्तस्तु धूञ्प्रीणोरिति श्नानुकरणाद्दैवादिकस्य नेत्याह । दैवादिकग्रहणेनात्र चौरादिकोऽप्युपलक्षयितव्य इति पुरुषकारे । तन्मते प्राययतीति भाव्यम् । मैत्रेयोऽप्यनेनैवाभिप्रायेण प्राययतीत्युदाजहार ॥ २९४ ॥

श्रन्थ ग्रन्थ संदर्भे ॥ श्रन्थयति । ग्रन्थयति । श्रन्थति ग्रन्थति ।

'णिश्रन्थिग्रन्थीति'वचनात् ग्रन्थयते स्वयमेवेति भवति । ग्रथ्नाति ग्रथ्नातीति श्नि, श्रन्थते ग्रन्थतइति शैथिल्यकौटिल्ययोः शपि ॥ २९६ ॥

आप्लृ लम्भने ॥ आपयति । लृदित्त्वादङ्यापत् । आप्ता । 'तर्पितिपि' मिति कारिकापाठादनिट्त्त्वम् । मैत्रेयेणापयतइत्यात्मनेपदमपि दर्शितम् । अन्ये तु नैतन्मृष्यन्ति ॥ २९७ ॥

तनु श्रद्धोपकरणयोः ॥ उपसर्गाच्च दैर्घ्ये । तानयति । वितानयति । तनति, वितनति, तनुतइति विस्तारे । अत्र क्वचित् चन श्रद्धोपहिंसनयोरिति पठ्यते । चानयति । चनति, चनयतीति घटादौ ॥ २९८ ॥

वद सन्देशवचने ॥ स्वरितेत्, शाकटायनस्य त्वात्मनेपदी । वादयति, वदति, वदते । व्यक्तवाचि शपि वदति ॥ २९९ ॥

वच परिभाषणे ॥ वाचयति । वचति । वक्ता । अवाक्षीत् । अङ्विधौ वक्तीति लुग्विकरणस्य निर्देशाचास्य ग्रहः । 'पचिं वचि'मिति पाठादनिट्त्वम् । पारायणे ऽयं नाधीयते ॥ ३०० ॥

मान पूजायाम् ॥ मानयति । मानति । मानिता । 'मा[१]न्वधेत्यत्र नह्येतेभ्यः प्राक् सन आत्मनेपदं नापि परस्मैपदं पश्याम इति भाष्यं भौवादिकस्य विचारणार्थस्यैव नित्यसनन्तत्त्वं प्रतिपादयतीत्यस्माल्लडाद्युत्पत्तिः । स्तम्भे मानयतइत्याकुस्मीयः । मन्यते मनुते इति दिवादौ तनादौ च ॥ ३०१ ॥

भू प्राप्तौ आत्मनेपदी वा ॥ अयं प्राप्तौ वा णिचमुत्पादयति आत्मनेपदि चेत्यर्थः । अत्र केचिदात्मनेपदं णिच्सन्नियोगेनैव तेनान्यदा नेति । मैत्रेयस्त्वाकुस्मीयप्रकरणे भूप्राप्तौ वेति लघुनैव न्यासेन णिच्यात्मनेपदे वाग्रहणाणिचो विकल्पे च सिद्धे पुनरिह पठित्वात्मने-

१ गुपतिजकितमाना अनुदात्तेतः । गुपादिष्वनुबन्धकरणं किमर्थम् । गुपादिष्वनुबन्धकरणमात्मनेपदार्थम् । गुपादिष्वनुबन्धाः क्रियन्ते आत्मनेपदं यथा स्यात् । अथ क्रियमाणेष्वनुबन्धेषु आत्मनेपदं न प्राप्नोति. किं कारणम् । सना व्यवहितत्वात् । 'पूर्ववत्सन' इत्येवं भविष्यति । 'पूर्ववत्सन , इत्युच्यते, न चैतेभ्यः प्राक् सन आत्मनेपदं नापि परस्मैपदं पश्याम इति 'गुप्तिज्किद्भ्य' इति सूत्रे भाष्ये न तु मान्वधेत्यत्र भाष्ये उपलभ्यते ।

पदीति वचनाण्णिजभावे आत्मनेपदमित्याह । इदम्पुरुषकारे दूषितम् । आकुस्मीयकाण्डे भू प्राप्तौ वेति पठ्यमाने अनन्तरप्रकृतस्यात्मनेपदीतिवचनस्य विकल्पः स्याच्च पुनरप्रकृतस्य णिच इति णयभावे परस्मैपदमुदाहरन्तौ धनपालशाकटायनावप्यत्रैवानुकूलाविति चोक्तम् । तथा भूसूत्रे सुधाकरोऽपि भवत इति प्रस्तुत्य वात्मनेपदं मैत्रेयोक्तेन कारणेन समर्थ²नाण्णिच्सन्नियोगेनात्मनेपदित्वादसाधनम्, अत एव सुराष्ट्रमभवदित्यादि प्रयुज्यतइत्याह । अन्ये तु पुराणव्याकरणेषु भुवो णिङिति सूत्रस्य णिङो ङकारः प्रत्ययान्तादात्मनेपदार्थः, प्रकृते तु केवलादिति श्रीभद्रादिभिर्व्याख्यानात्तन्त्रान्तरवचनानुरोधेन सन्नियोगन्यायो बाध्यतइति, तथा च 'वर्षाभ्वश्चे' त्यत्र कैयटेन वर्षासु भवति वर्षासु भवतइत्यात्मनेपदं दर्शितम्, भावयते, । भवते । भविता ॥ ३०२ ॥

गर्ह निन्दायाम् ॥ गर्हयति । गर्हति । गर्हतइति शपि ॥ ३०३ ॥

मार्ग अन्वेषणे ॥ मार्गयति । मार्गिता, मार्गणा इति चानशि । मृगयतइति कथादौ ॥ ३०४ ॥

कठि शोके ॥ कण्ठयति । कण्ठति । कण्ठिता । कण्ठतइति शपि । कठतीति तु कृच्छ्रजीवने । कठिः प्रायेणोत्पूर्व उत्कण्ठायाम् ॥ ३०५ ॥

मृजू शौचालङ्करणयोः ॥ मार्जयति । मार्जति । मार्जिता । मार्ष्टा । ऊदित्त्वादिड्विकल्पः । निष्ठायां, मृष्टः । वृद्ध्यादि मार्ष्टिवत् । मार्जयति शब्दे गतः ॥ ३०६ ॥

मृष तितिक्षायाम् ॥ पुरुषकारेणायं स्वरितेदित्युक्त्वा शाकटायनोयमात्मनेपदीत्युक्तम् मर्षयति मर्षति । मर्षते । मृष्यति मृष्यतइतिदिवादौ सेचने । शपि मर्षति ॥ ३०७ ॥

धृष प्रसहने ॥ आदित् शाकटायनस्य, धर्षयति, धर्षिता, धृषिता । शाकटायनस्य तु धृष्टः । धृष्णोतीति श्नौ आधृषीयः । एषु पञ्च

२ समर्थ्यते इति ४ पु॰ पा॰ ।

बन्धनइति केचित्पठन्ति, तदुक्तं मैत्रेयेण, पश बन्धनइति युजादाविति ॥ ३०८ ॥

कथ वाक्यप्रबन्धे ॥ कथयति । एतदादयोऽदन्ताः । तत्फलञ्च कथयतीत्यादौ अल्लोपस्य स्थानिवद्भावाद्यथायोगं वृद्धिगुणयोरभावः । तथाऽचकथदित्यत्र 'सन्वल्लधुनी' त्यस्य 'दीर्घो लघो'रिति दीर्घस्य चानग्लोपइति निषेधः । अन्यदपि प्रयोजनं तत्रतत्र वक्ष्यते ॥ ३०९ ॥

वर ईप्सायाम् ॥ वरयति । वारयतीति वृतः ॥ ३१० ॥

गण संख्याने ॥ गणयति । अजीगणत्, अजगणत् । 'ई च गण' इति णौ चङि ईत्त्वात्वे । इह संख्यानं नाम संख्यानिमित्तं ज्ञानविशेषो भागशोऽवस्थापनं च, तत्राद्योर्थः कर्तृस्थो भाव इति न कर्मकर्ताऽस्ति, तत्र इतरत्र कर्मस्थभावकत्त्वाद्गणयते गणः स्वयमेवेति भवति, भागशोऽवस्थाप्यमानो गणस्तत्रानुकूलत्त्वात्स्वयमेव भागशोऽवतिष्ठतइत्यर्थः । अवस्थानं हि कर्मस्थो भावः । यक्चिणौ तु 'णिश्रन्थिग्रन्थी'ति'न भवतः । एवं च 'णेरणा' वित्यत्र गणयति गणः स्वयमेवेति वृत्तिस्थस्य गणयते गणः स्वयमेवेति भाष्यस्थस्य चोदाहरणस्य विरोधोपि न भवति । गणिका । ण्वुलि' प्रत्ययस्थादि'तीत्त्वम् । गणिकानां समूहो गाणिक्यम् । 'गणिकायाश्चेति वक्तव्य'मिति यञ् ॥ ३११ ॥

शठ श्वठ सम्यगवभाषणे ॥ अभाषणइति केचित् । शठयति श्वठयति । शाठयति श्वाठयतीति गत्यादौ गतं, शाटयतइति श्लाघायामाकुस्मीयः । शटतीति कैतवादौ शपि ॥ ३१३ ॥

पट वट ग्रन्थे ॥ वट वेष्टनइति क्षीरस्वामी । पटयति । पाटयतीति भाषार्थे गतः । पटतीति गतौ शपि । वेष्टने शपि वटति, तस्य कारिते वाटयति । वटयतीति परिभाषणे घटादिः, ओष्ठ्यादिं बहवः पठन्तीति तत्रैवोक्तम् ॥ ३१५ ॥

रह त्यागे ॥ रहयति । अररहत् । रहतीति शपि । गतौ तु रंहति ॥ ३१६ ॥

स्तन गदी देवशब्दे ॥ द्विवचननिर्देशो वैचित्र्यार्थ इति मैत्रेयः । अज्दन्त्यपरा इति षोपदेशलक्षणं स्मिङ्स्विधाद्येकाचमाहचर्यादनेकाच्त्तु न प्रवर्तते । स्तनयति । अतस्तनत् । तिस्तनयिषतीत्यत्रापोपदेशत्त्वात् षत्वं न भवति । अभिनिस्तनो मेघस्येत्यत्र अभिनष्टानवचायं शब्दविशेषस्य संज्ञे'त्यभिनिसस्तन'इति षत्वं न भवति । गदयति स्तनयति । गदतीति शपि । स्तनयित्नुः । 'स्तनिहृषिपुषिगदिमदिभ्यो णेरित्नुच्'ति इत्नुच्, अयामन्तेत्ययादेशः ॥ ३१८ ॥

पत गतौ वा ॥ वाशब्दं के चिन्न पठन्तीति पुरुषकारे । अयं विकल्पेन णिचमुत्पादयति । पतयति पततीति । तत्र भूवादिपाठादेव पततीतिसिद्धे णिज्विकल्पस्य प्रयोजनमस्यानेकाच्त्वात्पताञ्चकारेत्याम्सिद्धिः । तथा अपतीदित्यस्य ऌदित्त्वाभावेनाङभावात्सिद्धिरिति पुरुषकारादौ । अन्ये तु वाशब्दमेवं व्याचक्षते । न्यायतस्त्वनन्तरत्वाददन्तत्वस्यैव विकल्पनं युक्तं न तु परमप्रकृतस्य णिचः, तेन पतयति पातयतीत्युदाहर्तव्यम् । उक्तं च स्वेनैव पुरुषकारकृता भू प्राप्तौ वात्मनेपदीत्यत्र, आकुस्मादात्मनेपदीतिप्रकरणे भू प्राप्तौ वेति वक्तव्ये आत्मनेपदीतिवचनं केवलाण्णिजन्तादस्यात्मनेपदं यथा स्यादिति मैत्रेयग्रन्थदूषणावसरे आकुस्मीयकाण्डे भू प्राप्तौ वेत्युच्यमाने ऽनन्तरस्यात्मनेपदित्वस्यैव विकल्पः प्रतीयेत न पुनर्महाप्रकृतस्य चुरादिणिच इति । अत्रस्वामी, संहितायां धातुपाठाद्वाशब्दमुत्तरधातुशेषं वष्टि, तन्निपातस्य वाशब्दस्य चशब्दादिवत् पूर्वप्रयोगो नेति हेलाराजीयादौ समर्थनादयुक्तम् । पतयालुः, 'स्पृहिगृहिपती'त्यादिना ऽऽलुच् ॥ ३१९ ॥

पष अनुपसर्गात् ॥ गतावित्यत्रापि सम्बध्यते, पषयति । सोपसर्गत्वात् प्रपषतीति, अत्र केचित् तालव्यान्तं पठन्तो वाग्रहणं चानुवर्त्यादन्तत्वं विकल्पयन्ति स्वाम्यनुसारिणः । अत्रादन्तत्त्वविकल्पनमनन्तरत्वाद्युक्तं, तालव्यान्तत्त्वं तु पुरुषकारोऽपि न सहते, यदाह पषादिस्तु पष अनुपसर्गादित्यस्य भविष्यति ॥ ३२० ॥

स्वर आक्षेपे ॥ स्वरयति । स्वरतीति शब्दोपतापयोश्शपि ॥ ३२१ ॥

रच प्रतियत्ने ॥ रचयति ॥ ३२२ ॥

कल गतौ संख्याने च ॥ कलयति । कालयतीति क्षेपे गतम् । कलतीति शपि ॥ ३२३ ॥

चह परिकल्कने ॥ परिकल्कनं दम्भः । चहयति । मित्प्रकरणे इह च पाठस्य तत्रैव प्रयोजनमुक्तम् । चहतीति शपि ॥ ३२४ ॥

मह पूजायाम् ॥ महयति । महतीति शपि महि वृद्धावित्यस्य । मंहतइति क्षीरस्वामी, तन्मतेन महि भाषितार्थो ऽत्रैव दण्डके गतः ॥ ३२५ ॥

सार कृप श्रथ दौर्बल्ये ॥ सारयति । कृपयति । कल्पयतीति कृपेस्तादर्थ्यइत्यस्य गतम्, कल्पतइति कृपेः शपि । श्रथयति । श्राथयतीति प्रयत्ने गतः, मोक्षणे श्राथयति, श्रथतीत्याधृषीयः ॥ ३२८ ॥

स्पृह ईप्सायाम् ॥ पुष्पेभ्यः स्पृहयति । 'स्पृहेरीप्सित' इति ईप्सितस्य संप्रदानत्वम् । स्पृहयालुः । 'स्पृहिगृही' त्यादिनालुच् ॥ ३२९ ॥

भाम क्रोधे ॥ भामयति । भामतइति शपि ॥ ३३० ॥

सूच पैशुन्ये ॥ सूचयति । अजन्तलक्षणस्यैकाज्विषयत्वादषोपदेशत्वात् सोसूच्यतइत्यादौ न षत्वं, 'सूचिसूत्री' त्यादिना यङ् ॥ ३३१ ॥

खेट भक्षणे ॥ तृतीयान्त इति दुर्गः । खेटयति ॥ आखेटना । खोट इत्येके । खोटयतीति मैत्रेयः । खेटतीत्यपि शपि ॥ ३३२ ॥

क्षोट क्षेपे ॥ क्षोटयति ॥ ३३३ ॥

गोम उपलेपने ॥ गोमयति ॥ ३३४ ॥

कुमार क्रीडायाम् ॥ कुमारयति ॥ ३३५ ॥

शील उपधारणे ॥ उपधारणमभ्यासः । शीलयति । शीलितः । 'मतिबुद्धी' त्यत्र चकारस्यानुक्तसमुच्चयार्थत्वात् वर्तमाने क्तः । समाधौ शीलतीति शपि ॥ ३३६ ॥

साम सान्त्वप्रयोगे ॥ सामयति । साम सान्त्वनइति पठितस्येह पाठो ऽग्लोपित्वादससामदिति सिद्धये ॥ ३३७ ॥

वेल कालोपयोगे ॥ वेलयति । वेला । काल इत्यपि धातुरित्ति आत्रेयः । कालयति । वेलयतीति शपि चलने ॥ ३३८ ॥

पल्यूल लवनपवनयोः ॥ पल्यूलयति । पल्यूलनं शोधनद्रव्यमिति नास्य पल्यूलवासः, पल्यूलयेयुरित्यत्र भाष्ये ॥ ३३९ ॥

वात सुखसेवनयोः ॥ गतिसुखसेवनेष्वित्येके । वातयति ॥ ३४० ॥

गवेष मार्गणे ॥ गवेषयति ॥ ३४१ ॥

वास उपसेवायाम् ॥ वासयति । वासना । युच्, स्नेहनादौ वासयतीति गतम् । वसतीति वस निवासइत्यस्य शपि । अयं कथादावपीति दैवपुरुषकारयोः । वस्तइत्याच्छादने शब्लुकि, वस्यतीति स्तम्भने श्यनि ॥ ३४२ ॥

निवास आच्छादने ॥ निवासयति । अत्र केचित्पितेव पुत्रं दसये वचोभिरित्यत्र चुरे पितेव पुत्रं दसये निरवासयामि स्तुतिभिरिति व्याख्यानाद्दस निरवसानइति पठन्ति । भट्टभास्करेण त्वाकुस्मीयेषु दस दसि दसनदर्शनयोरिति पठित्वा धातूनामनेकार्थत्वेन वचोभिः स्तुतिभिः संगृह्णामि, यथा पिता दुश्शलं पुत्रं स्तुतिपदैरिति व्याख्यातम् । तस्मात्तुरेप्याकुस्मीय एव निरवसानार्थः कथित इति वक्तुं शक्यत्त्वाचैतावता कथादौ धात्त्वन्तरत्त्वं शक्यते कल्पयितुम् ॥ ३४३ ॥

भाज पृथक्कर्मणि ॥ विभाजयति ॥ ३४४ ॥

सभाज प्रीतिदर्शनयोः ॥ प्रीतिसेवनयोरित्यन्ये । सभाजयति ॥ ३४५ ॥

ऊन परिहाणे ॥ ऊनयति । माभवानुनिनत् । माषेणोनः माषोनः । 'पूर्वसदृशसमोनार्थे' ति तृतीयासमासः ॥ ३४६ ॥

ध्वन शब्दे ॥ ध्वनयति । ध्वनतीति शपि ॥ ३४४ ॥

कूट परीतापे ॥ परिदाहइत्यन्ये । कूटयति, । कुटयतीत्यप्रसादे आकुस्मीयः । अर्थभेदाः पाठभेदाश्च तत्रैव दर्शिताः ॥ ३४८ ॥

सङ्केत ग्राम कुण गुण चामन्त्रणे ॥ चकारेण कूट इत्यपेत्तइति मैत्रेयः । कूटयति । सङ्केतयति । ग्रामयति । कुणतीति शब्दोपकरणयोश्शे । गुण-

यति । अपरे तु पठन्ति । केत श्रावणे निमन्त्रणे च । केतयति निकेतयति । कुण गुण चामन्त्रणे । चकारात्केत चेति, कूण संकोचनइति वा तत्र पठन्ति ॥ ३५२ ॥

स्तेन चौर्ये ॥ अनेकाच्त्वादषोपदेशत्वम् । स्तेनयति अतिस्तेनत् । स्तेनः, स्तेयम् । 'स्तेनाद्यन्नलोपश्चे' ति भावकर्मणोर्यन्नलोपौ । स्तैन्यम्, स्तेनादिति योगविभागात् ष्यञ् ॥ ३५३ ॥

आ गर्वादात्मनेपदिनः ॥ इतः परे गर्व माने इति वक्ष्यमाणपर्यन्ता आत्मनेपदिनः ॥

पद गतौ ॥ पदयते । अपपदत । पद्यतइति श्यनि ॥ ३५४ ॥

गृह ग्रहणे ॥ गृहयते । गृहयालुः । 'स्पृहिगृही' त्यादिना आलुच् । गर्हतइति गृहेर्गर्हेश्च शपि, तत्रान्त्यः कुत्सार्थः । गृह्णाति गृह्णीतइत्युपादानार्थस्य प्रसारिणः क्र्यादेः । गर्हतीति गर्हैराधृषीयस्य निन्दार्थस्य ॥ ३५५ ॥

मृग अन्वेषणे ॥ मृगयते । मृग्यतीति कण्ड्वादिपाठादिति मैत्रेयः । मार्गयति मार्गतीति मार्गेराधृषीयस्य ॥ ३५६ ॥

कुह विस्मापने ॥ कुहयते । कुहना । कुहः । बाहुलकादूकारप्रत्यये कुहूशब्दमाह मैत्रेयः ॥ ३५७ ॥

शूर वीर विक्रान्तौ ॥ शूरयते । वीरयते । शूर्यतइतिहिंसास्तम्भनयोः श्यनि ॥ ३५१ ॥

स्थूल परिबृंहणे ॥ स्थूलयते । अतुस्थूलत । स्थूलः । स्थविष्ठः, स्थवीयान् । 'स्थूलदूरे'त्यादिना यणादि लुप्यते पूर्वस्य च गुणः । पृथ्वादिष्वपाठादिमनिजस्य नास्तीति नोदाहृतम् । स्थावयति । णाविष्ठवदिति यणादिलोपो गुणश्च ॥ ३५८ ॥

अर्थ उपयाञ्चायाम् ॥ अर्थयते । अर्थयिता । अर्थयिष्यते । प्रार्थयन्ति शयनोत्थितं प्रिया इत्यादि कृदन्तात्तत्करोतीति णिचि नेयम् ॥ ३५९ ॥

सत्र सन्तानक्रियायाम् ॥ सत्रयते ॥ ३६० ॥

गर्व माने ॥ गर्वयते । आगर्वीयाः । गर्वतीति शपि ॥ ३६१ ॥

बर्हिरादीनां दर्शपौर्णमासतदङ्गोभयाङ्गत्वम् । अधि॰ १ ।

प्रकरणविशेषादसंयुक्तं प्रधानस्य ॥ १ ॥

दर्शपूर्णमासयोः बर्हिः तद्धर्माः वेदिः तद्धर्माश्च श्रूयन्ते । एते केवलं प्रधानार्था उताङ्गप्रधानार्था इति संशये पूर्वपक्षमाह । प्रकरणेति । असंयुक्तम् अयुङ्गायुङ्गान् मुष्टीन् लुनातीति बर्हिरुत्पत्तिवाक्ये उद्देश्येन असंबद्धम् अतः अङ्गाकाङ्क्षारूपप्रकरणविशेषात् प्रधानस्य धर्मा इमे बर्हिरादयः, अङ्गानामनवस्थाभयेन अङ्गाकाङ्क्षाविरहादिति भावः ॥ १ ॥

सर्वेषां वा शेषत्वं स्यात्तत्र युक्तत्वात् ॥ २ ॥

सिद्धान्तमाह । सर्वेषामङ्गप्रधानानां शेषत्वं बर्हिर्वेद्यादीनां स्यात् । वेद्यां हवींषि आसादयतीति अङ्गप्रधानसाधारणं यद्धविः तत्प्रयुक्तत्वाद् हविर्मात्रप्रयोजकत्वश्रवणात् । प्रकरणाद्वाक्यस्य बलवत्त्वादिति भावः ॥ २ ॥

आरादपीति चेत् ॥ ३ ॥

पूर्वपक्षी शङ्कते । आरादिति । आरात्समीपे शिष्टपिण्डपितृयज्ञस्यापि बर्हिर्वेदिश्चोपकारकं स्यात् । सर्वशेषत्वादिति ॥ ३ ॥

न तद्वाक्यं हि तदर्थत्वात् ॥ ४ ॥

उक्तातिप्रसङ्गं परिहरति । वाक्यमिति । वाक्यं बर्हिर्वेद्यादिवाक्यं दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यनेन एकवाक्यतामापन्नमिति पूरणीयम् । तत्प्रकरणपाठेन तदर्थत्वात् ॥ ४ ॥

लिङ्गदर्शनाच्च ॥ ५ ॥

उक्तार्थे लिङ्गमप्याह । लिङ्गमिति । ध्रुवामेवाग्रे ऽभिघारयति ततो हि प्रथमावाज्यभागौ यक्ष्यन् भवतीति अभिघारणस्याज्यभागार्थतां दर्शयति । यथा ऽभिघारणस्य उभयार्थत्वं तथैवेतरेषामङ्गानामिति भावः ॥ ५ ॥

स्वामिसंस्काराणां प्रधानार्थत्वम् । अधि २ ।

फलसंयोगात्तु स्वामियुक्तं प्रधानस्य ॥ ६ ॥

ज्योतिष्टोमे केशश्मश्रु वपते इत्यादयः पूर्ववदुभयार्थाः इति बहिः पूर्वपक्षे सिद्धान्तमाह । फलेति । स्वामिना यजमानेन संयुक्तं यजमानसंस्काररूपं कर्म प्रधानस्याङ्गं फलसंयोगात् फलभोक्तृत्वादित्यर्थः । यजमानस्य द्वे रूपे कर्तृत्वं भोक्तृत्वं चेति । तत्र कर्तृत्वसिद्धौ न शास्त्रापेक्षा किं तूक्तसंस्कारसाध्यत्वाद्भोक्तृत्वस्य शास्त्रैकसमधिगम्यत्वमतः फलसंस्कारा भोक्तृत्वेनैव साकमन्वयमर्हति तत्रान्वये फलस्य तत्रैव संबन्धात्फलसन्निकर्षात्प्रधानार्थत्वमिति भावः ॥ ६ ॥

सौमिकवेद्यादीनामुभयार्थत्वम् । अधि॰ ३ ।

चिकीर्षया च संयोगात् ॥ ७ ॥

सौमिकी वेदिः उभयार्था उत प्रधानार्थेति संशये पूर्वपक्षमाह । चिकीर्षेति । इयं प्रधानार्था चिकीर्षया इयति शक्ष्यामीति सौमिकवेदिसन्निधौ चिकीर्षाघटितवाक्यश्रवणात् । पुरुषस्य चिकीर्षितं प्रधानं फलवत्त्वात् । अङ्गानि न तथेति भावः ॥ ७ ॥

अभिमर्शनस्याङ्गप्रधानोभयाङ्गत्वम् । अधि॰ ४ ।

तथाऽभिधानेन ॥ ८ ॥

एतदधिकरणमसमाप्यैव अधिकरणान्तरारम्भः । *चतुर्होत्रा पौर्णमासीमभिमृशेत्पञ्चहोत्रा† ऽमावास्यायाम् इति । तथा आभ्यां मन्त्राभ्यामभिमर्शनं प्रधानहविषामभिधानेन पौर्णमासीमित्यादिनाम्ना प्रधानवाचकेन संयोगात् । पौर्णमास्यमावास्याशब्दौ प्रधानवाचकाविति ‡विद्वदधिकरणे व्यवस्थापितत्वादिति भावः । इदमपि पूर्वपक्षसूत्रम् ॥ ८ ॥

तद्युक्ते तु फलश्रुतिस्तस्मात्सर्वचिकीर्षा स्यात् ॥ ९ ॥

प्रथमाधिकरणपूर्वपक्षं निरस्यति । तद्युक्ते इति । तद्युक्ते अङ्गयुक्ते प्रधाने फलश्रुतिः फलसाधनत्वश्रुतिः तस्मात्सर्वस्य साङ्गप्रधानस्य चिकीर्षा स्यादतः सर्वार्था वेदिरिति भावः ॥ ९ ॥

---

* पृथिवी होतेत्यादिको मन्त्रश्चतुर्होता, तस्मिन् मन्त्रे यज्ञाङ्गानां चतुर्णां श्रुतत्वाद् इति माधवः । प्रकारान्तरमपि तेनोक्तं जै॰ न्या॰ वि॰ ।

† अग्निर्होतेत्यादिको मन्त्रः पञ्चहोतेति माधवः ।

‡ द्वि॰ अ॰ द्वि॰ पा॰ सू॰ अ॰ ।

गुणाभिधानात्सर्वार्थमभिधानम् ॥ १० ॥

द्वितीयाधिकरणसिद्धान्तमाह । गुणेति । पूर्वोक्तवाक्ये अमावास्यापौर्णमासीशब्दाभ्यां गुणस्य अङ्गस्य कालस्याभिधानात्सर्वार्थं साङ्गप्रधानार्थमभिमर्शनम् । अयं भावः अमावास्यापौर्णमासीशब्दौ यदि प्रधानवाचकौ गृह्येते तस्य क्रियारूपत्वेन अभिमर्शो न सम्भवति तस्य हविषि लक्षणाकल्पनापेक्षया प्रत्ययस्यैव सप्तम्यर्थे लक्षणा युक्तेति ॥१०॥

दीक्षादक्षिणयोः प्रधानार्थत्वम् । अधि॰ ५ ।

दीक्षादक्षिणं तु वचनात्प्रधानस्य ॥ ११ ॥

दीक्षादक्षिणयोः योग्यत्वेन उभयार्थत्वे प्राप्ते सिद्धान्तमाह । दीक्षेति । वचनात्सोमस्य दीक्षा सोमस्य दक्षिणेति वचनात् । शेषं स्पष्टम् ॥ ११ ॥

निवृत्तिदर्शनाच्च ॥ १२ ॥

उक्तार्थे साधकान्तरमाह । निवृत्तीति । अग्नीषोमीयविकृतौ निरूढपशौ षड्ढोतारं मनसा ऽनुद्रुत्य जुहोति सैवास्य दीक्षेति स्तुत्या दीक्षानिवृत्तिदर्शनान्नोभयार्थो, अङ्गार्थत्वे अग्नीषोमार्थत्वेन विकृतौ अतिदेशेन प्राप्तौ निवृत्त्ययोगादिति भावः ॥ १२ ॥

अन्तर्वेदेर्यूपानङ्गत्वम् । अधि॰ ६ ।

तथा यूपस्य वेदिः ॥ १३ ॥

अग्नीषोमीयपशौ यूपावटं प्रकृत्य श्रूयते, अर्धमन्तर्वेद्यर्धं बहिर्वेदीति । अनेन अवटमुद्दिश्य संस्कृतान्तर्वेद्यर्धदेशो विधीयतउतासंस्कृतः अर्धो देशो ऽन्तर्वेद्याः अर्धः बहिश्च यथा स्यात् तादृशदेशं लक्षयित्वा स विधीयतइति संशये पूर्वपक्षमाह । तथेति । यथा दीक्षादक्षिणं वचनात्प्रधानार्थं तथोक्तवचनाद्यूपस्य यूपावटस्य वेदिः अर्धान्तर्वेदिः अङ्गम् ॥ १३ ॥

देशमात्रं वा शिष्टेनैकवाक्यत्वात् ॥ १४ ॥

सिद्धान्तमाह । देशमात्रमिति । देशमात्रमसंस्कृततावन्मात्रं लक्षयित्वा विधीयते । शिष्टेन अर्धं बहिर्वेदीति शिष्टेन एकवाक्यत्वात् ।

अर्धान्तर्वेदिविधाने अर्धं बहिर्वेदीति बहिर्वेद्यर्धमपि विधेयम् । उभयविधौ वाक्यभेदस्तत्परिहार्यः । देशविशेषे लक्षणायां तादृशो देशविशेष एक एव विधीयतइति न वाक्यभेद इति भावः ॥ १४ ॥

हविर्धानस्य सामिधेन्यनङ्गत्वम् । अधि० ७ ।

सामिधेनीस्तदन्वाहुरिति हविर्धानयोर्वचनात्सामिधेनीनाम् ॥ १५ ॥

ज्योतिष्टोमे श्रूयते, उत यत्सुन्वन्ति सामिधेनीस्तदन्वाहुरितीति। सामिधेनीहविर्धानयोर्मध्ये यस्मिन् हविर्धाने सुन्वन्ति तत्सामिधेनीभिः संबन्धयेदित्यर्थः* । अत्र हविर्धानं सामिधेन्यङ्गमुत तल्लक्षितो देश इति संशये पूर्वपक्षमाह । अत्र इत्यन्तं विषयवाक्यं तस्य वचनादित्यनेनान्वयः । हविर्धानयोर्मध्ये यस्मिन् सुन्वन्ति तत्सामिधेनीनामङ्गम् । यस्मिन् सुन्वन्ति तदन्वाहुरिति वचनात् ॥ १५ ॥

देशमात्रं वा प्रत्यक्षं ह्यर्थकर्म सोमस्य ॥ १६ ॥

सिद्धान्तमाह । देशेति । देशविशेषः दक्षिणहविर्धानदेशमात्रं नियम्यते । कुतः, सोमस्य अर्थकर्म अकारकं हविर्धारणाद्वारोपकारकं प्रत्यक्षम्। तथा च सोमाङ्गत्वेन अङ्गान्तरं नाकाङ्क्षति दर्शपूर्णमासादाहवनीयप्रत्यग्देशोऽतिदेशशास्त्रेण प्राप्तः स एव हविर्धानदेशः । तत्र हविर्धानशकटौ द्वौ दक्षिणोत्तरौ तयोर्द्वयोरप्यतिदेशेन पक्षे प्राप्तौ यस्मिन् सुन्वन्तीति वचनेन दक्षिणहविर्धानदेशनियममात्रमनेन क्रियतइति भावः† ॥ १६ ॥

समाख्यानं च तद्वत् ॥ १७ ॥

समाख्यानं सोमस्य हविर्धानमिति तद्वद् अस्माभिर्यदुक्तं सोमाङ्गमिति तमेवार्थं द्रढयति ॥ १७ ॥

---

* "हविर्धानमण्डपगतयोर्दक्षिणोत्तरभागयोरवस्थितयोर्हविर्धाननामकयोः शकटयोर्मध्ये दक्षिणं शकटमत्र यत्तच्छब्दाभ्यामभिधीयते । तस्य समीपे सोमस्याभिषवः । उतेत्ययं शब्दो ऽयशब्दस्यार्थे वर्तते । अथ यस्मिन् हविर्धाने सोममभिषुण्वन्ति तस्मिन् सामिधेनीरनुब्रूयुरित्यर्थः" इति माधवः ।

† अङ्गत्वपक्षे तु अभिषवोपलक्षितस्य दक्षिणस्य हविर्धानस्यात्यन्तमप्राप्तस्याङ्गत्वस्य विधानाद्गौरवमिति भावः ।

उत्सर्गातिरिक्तस्यान्यद्वारा ऽनुष्ठानम् । अधि॰ ८ ।

शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात् तस्मात् स्वयं प्रयोगे स्यात् ॥ १८ ॥

दर्शपूर्णमासज्योतिष्टोमादिकर्माणि स्वेनैव अनुष्ठेयान्युत स्वेनान्येन वा उतोत्सर्गमात्रं स्वयं कुर्याच्छेषमन्येन इति संशये प्रथमपक्षं व्यवस्थापयति । शास्त्रेति । शास्त्रफलं प्रयोक्तरीति न्यायसिद्धं तल्लक्षणत्वाद् भोक्तृत्वलक्षणत्वाद् यजमानस्य प्रयोगे अनुष्ठाने स्वयमेव स्यात् । कर्तृत्वभोक्तृत्वयोः सामानाधिकरण्यसिद्ध्यर्थमिति भावः ॥ १८ ॥

उत्सर्गे तु प्रधानत्वाच् शेषकारी प्रधानस्य तस्मादन्यः स्वयं वा स्यात् ॥ १९ ॥

द्वितीयपक्षमाह । उत्सर्गइति । उत्सर्गे ऋत्विजां दक्षिणात्यागे प्रधानत्वान्मुख्यत्वात्प्रधानस्य यजमानस्य सिद्धौ शेषकारी उत्सर्गादन्यकर्मणां कर्ता स्वयमन्य ऋत्विग्वेति । द्रव्येण परिक्रीतैः कृते स्वयमेव कृतं भवतीति भावः ॥ १९ ॥

अन्यो वा स्यात्परिक्रयाम्नानाद्विप्रतिषेधात्प्रत्यगात्मनि ॥ २० ॥

सिद्धान्तमाह । अन्य इति । द्रव्योत्सर्गादन्यत्रान्य एव परिक्रयाम्नानात् । ननु स्वस्यैव परिक्रयो ऽस्त्वत आह । प्रत्यगात्मनि स्वस्मिन् परिक्रयस्य प्रतिषेधाद् असंभवात्* ॥ २० ॥

परिक्रीतानामृत्विजां संख्याविशेषनियमः । अधि॰ ९ ।

तत्रार्थात्कर्तृपरिमाणं स्यादनियमाविशेषात् ॥ २१ ॥

परिक्रीतेषु संख्यानियमो ऽस्ति न वेति संशये पूर्वपक्षमाह । तत्रेति । तत्र ऋत्विग्विषये अनियमः संख्याया अनियमः । अविशेषाद्

---

* ननु कर्तृत्वभोक्तृत्वयोः सामानाधिकरण्यनियमो विरुध्येत ऋत्विजां कर्तृत्वे इति चेन्न । षड्भिर्हलैः कर्षतीत्यादौ स्वामिनः प्रयोजकत्वेन कर्मकरद्वारा कर्तृत्ववदत्रापि यजमानस्य प्रयोजकतया ऋत्विग्द्वारा सर्वकर्तृत्वोपपत्तेः । अत एव परिक्रयाम्नानं सार्थकमिति भावः ।

विशेषवचनाभावात् । कर्तृपरिमाणं कर्तृसंख्या अर्थात्कर्मानुरूपम् । यथा लोके गृहादिनिर्माणे भृत्यान् योजयति, कार्यं दृष्ट्वैव तदनुसारेण योजयति तथैव श्रौते ऽपि कर्मणीत्यर्थसिद्धा संख्येति भावः ॥ २१ ॥

अपि वा श्रुतिभेदात् प्रतिनामधेयं स्युः ॥ २२ ॥

सिद्धान्तमाह । अपि वेति । श्रुतिभेदाद् अध्वर्युः ब्रह्मा होतेति-नामभेदात् । प्रतिनामधेयं यावन्ति नामानि तावत्संख्याकाः स्युः * ॥ २२ ॥

एकस्य कर्मभेदात् ॥ २३ ॥

एकस्यैव तत्र क्रियानिमित्तं नामद्वयं त्रयं वा किं न स्यादिति शङ्कते । एकस्येति ॥ २३ ॥

नोत्पत्तौ हि ॥ २४ ॥

अध्वर्युं वृणीते ब्रह्माणं वृणीतइत्यादिषोडशनामभिः उत्पत्तौ प्रथममेव वरणविधानाद् नैकस्य नामद्वयसंबन्ध इति समाधत्ते । नेति ॥ २४ ॥

चमसाध्वर्यूणां पृथक्त्वम् । अधि० १० ।

चमसाध्वर्यवश्च तैर्व्यपदेशात् ॥ २५ ॥

चमसाध्वर्यूणामेष्वेवान्तर्भाव उतान्यइति संशये एष्वेवान्तर्भाव इति पूर्वपक्षे सिद्धान्तमाह । चमसेति । चमसाध्वर्यवो ऽन्ये तैरुक्तनामभिः चमसाध्वर्यून् वृणीतइति व्यपदेशाद् निर्देशात् ॥ २५ ॥

चमसाध्वर्यूणां बहुत्वम् । अधि० ११ ।

†उत्पत्तौ बहुश्रुतेः ॥ २६ ॥

---

* "यद्यपि संख्याविशेषो न श्रुतस्तथा ऽपि कार्यानुसारेण सो ऽवगन्तव्यः । ते च कार्यविशेषाः कर्तृसंयुक्ता एवं श्रूयन्ते । पुरो ऽध्वर्युर्विभजति । प्रतिप्रस्थाता मन्थिनं जुहोति । नेष्टा पत्नीमुदानयति । उन्नेता चमसानुन्नयति । प्रस्तोता प्रस्तौति । उद्गातोद्गायति । प्रतिहर्ता प्रतिहरति । सुब्रह्मण्यः सुब्रह्मण्यामाह्वयति । होता प्रातरनुवाकमनुब्रूते । मैत्रावरुणः प्रेष्यति । अच्छावाको यजति । ग्रावस्तुद् ग्रावस्तोत्रीयामन्वाहेति । एवं ब्रह्मब्राह्मणाच्छंस्याग्नीध्रपोतॄणां छन्दांसि कर्माण्युदाहार्याणि । तस्माद् यावन्ति कार्याणि तावन्त ऋत्विजो वरीतव्याः" इति माधवः ।

† अस्योत्तराधिकरणशेषत्वं वार्त्तिककारो ऽङ्गीचकार ।

ते चमसाध्वर्यवो बहव इति सिद्धान्तमाह । उत्पत्ताविति । उत्पत्तौ वरणवाक्ये शेषं स्पष्टम् ॥ २६ ॥

चमसाध्वर्यूणां दशसंख्यानियमः । अधि· १२ ।

दशत्वं लिङ्गदर्शनात् ॥ २७ ॥

ते चमसाध्वर्यवो दशेति सिद्धान्तमाह । दशेति । तेषु दशत्वं दशपेयनामके यागे एकैकं चमसं दश दशोपसर्पन्ति शतं ब्राह्मणा इति लिङ्गात् । न्यूने अधिके वा शतत्वं विरुध्येतेति भावः ॥ २७ ॥

शमितुरपृथक्त्वम् । अधि १३ ।

शमिता च शब्दभेदात् ॥ २८ ॥

शमिता ऽप्यतिरिक्त इति पूर्वपक्षसूत्रम् । शमितेति । शब्दभेदाद् नामभेदात् ॥ २८ ॥

प्रकरणाद्वोत्पत्त्यसंयोगात् ॥ २९ ॥

सिद्धान्तमाह । प्रकरणेति । उत्पत्तेः वरणवाक्यस्य असंयोगाद् अभावात् । प्रकरणात् प्रकरणकल्पकाध्वर्यवसमाख्यावति संज्ञया ऽनादिपाठात् । *अध्वर्युगणप्रतिप्रस्थात्रेति भावः ॥ २९ ॥

उपगानामपृथक्त्वम अधि० १४ ।

उपगाश्च लिङ्गदर्शनात् ॥ ३० ॥

उपगातारो ऽन्यइति बहिः पूर्वपक्षे सिद्धान्तमाह । उपेति । उपगातारस्तु क्लृप्ता एवर्त्विजः नान्ये लिङ्गदर्शनाद् नाध्वर्युरुपगायेदिति लिङ्गदर्शनात् । यद्यन्ये तर्हि अध्वर्यावत्यन्ताप्राप्त्या निषेधो व्यर्थः स्याद् इति भावः ॥ ३० ॥

सोमविक्रेतुः पृथक्त्वम् । अधि० १५ ।

विक्रयी त्वन्यः कर्मणो ऽचोदितत्वात् ॥ ३१ ॥

सोमविक्रयी त्वन्य इति सिद्धान्तमाह । विक्रयीति । अचोदितत्वाद् विक्रयस्याविहितत्वात् । क्रय एव विहितः गवा क्रीणातीति,

* यद्यपि शमितार इत्यादिमन्त्रस्याध्वर्युकाण्डे पाठात्तस्यैव शामित्रमुचितं तथाऽपि "परावर्तते ऽध्वर्युः संज्ञप्यमानाद्" इति तस्य परावृत्तिश्रवणात् तत्पुरुषाणां प्रतिप्रस्थात्रादीनां तद्भवतीति भावः । परं तु कलौ अन्य एव शमिता । शामित्रं चैव विप्राणामिति कलिवर्ज्यप्रकरणे पाठात् ।

तदन्यथा ऽनुपपत्त्या सिद्धो विक्रयः। ऋत्विजां विहितकर्मकर्तृत्वादन्य एव स इति भावः ॥ ३१ ॥

ऋत्विक्पदस्य योगरूढ्या सप्तदशमात्रगामित्वम्। अधि० १६।

कर्मकार्यात्सर्वेषामृत्विक्त्वमविशेषात् ॥ ३२ ॥

ज्योतिष्टोमे चमसाध्वर्युषु ऋत्विक्त्वमस्ति न वेति संशये पूर्वपक्षमाह। कर्मेति। सर्वेषामृत्विक्त्वं कर्मणः विहितकर्मणः कार्याद् अनुष्ठानाद् हेतोः अविशेषाद् इमे ऋत्विजो नेमइति व्यावर्तयितुमशक्यत्वात् ॥ ३२ ॥

न वा परिसंख्यानात् ॥ ३३ ॥

सिद्धान्तमाह। नेति। न चमसाध्वर्यव ऋत्विजः तस्मात्सौम्यस्याध्वरस्य यज्ञक्रतोः सप्तदश ऋत्विज इति परिसंख्यानात् सप्तदशाधिके ऋत्विक्त्वं नास्तीति परिसंख्यानात् ॥ ३३ ॥

पक्षेणेति चेत् ॥ ३४ ॥

परिसंख्यायां दोषत्रयात् पक्षे ऽनुवाद इति शङ्कते। पक्षेणेति। पक्षेण पाक्षिकतया प्राप्तम् ऋत्विजो वृणीतइति बहुवचनेन सप्तविंशतित्वं चमसाध्वर्युभिः प्राप्तमवयुत्यानूद्यते ॥ ३४ ॥

न सर्वेषामनधिकारात् ॥ ३५ ॥

इमं पक्षं दूषयति। नेति। सर्वेषां सप्तविंशानामनधिकाराद् अश्रवणात्। यथा वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते इति अवधिभूतद्वादशसंख्यायाः श्रुतत्वादष्टाकपालो भवतीत्यादिरवयुत्यानुवादः नेह तथेति भावः ॥ ३५ ॥

दीक्षादक्षिणावाक्योक्तानां ब्रह्मादीनामेव सप्तदशऋत्विक्त्वम्। अधि० १७।

नियमस्तु दक्षिणाभिः श्रुतिसंयोगात् ॥ ३६ ॥

एवमृत्विजः सप्तदशेति सिद्धौ कइत्याकाङ्क्षायां सिद्धान्तमाह। नियम इति। नियमः आग्नीध्रादिष्वेवर्त्विक्त्वमिति नियमः। दक्षिणाभिः सह तत्तत्नामश्रुतिसंयोगात्। ऋत्विग्भ्यो दक्षिणां ददातीति

तुकानुवादमात्रमिह स्यात् तत्र च त्रसरेणुतः किंचित्सूक्ष्मं भवतु मा वा भूद् दृष्टोपक्रमं विवक्षितसिद्धिरित्यत्राकूतं शास्त्रतश्च क्वचिदनन्यथासिद्धात्परमाणुसिद्धावपि तदनुमानभङ्गात्परस्य मानभङ्गः यथा प्रकृत्याद्यनुमायिनस्सांख्यस्य ।

शास्त्रैकविषयत्वे च परमाणो र्न सिध्यति ।
नित्यस्पर्शादियोगित्वं भूतानां विकृतित्वतः ॥
अस्पर्शाण्वंशसंघत्वात्कतिचित्प्रकृतेरतः ।
एकैकाण्वंशभागेऽपि भागानन्त्यं प्रचक्षते ॥
निरंशा प्रकृतिस्सैव परिणामविभागिनी ।
अनन्तांशात्मिका चेति व्याहतं साङ्ख्यभाषितम् ॥
अत्यन्तभिन्नसत्त्वादिद्रव्यसंघातप्रधानतः ।
यथांशं विश्वसृष्टौ च न स्यात्त्रिगुणता क्वचित् ॥ १६ ॥

इति परमाणुकारणतावादभङ्गः ॥ एवं पृथिव्याद्युपादानं चिन्तितम् । अथोपादानातिरिक्तं कार्यद्रव्यं नास्तीति साध्यते तत्रावस्थाभेदमात्रं स्वीकृतम् अयमेव च सत्कार्यवाद आरम्भणाधिकरणसाध्यः ।

विसृष्ट्युल्लासविक्षेपाः कार्याणां कथिताः क्वचित् ।
कल्पनीया न सर्वत्र परिणामोऽस्त्यबाधतः ॥
आविर्भावतिरोभावजन्मनाशविकल्पवत् ।
नित्यं जगदिति स्मृत्या व्यवस्थाद्वयमीरितम् ॥

तदिह प्रत्यक्षागमबलादेकस्यैव द्रव्यस्यावस्थाभेदादुपादानोपादेयभाव इति स्थिते द्रव्यान्तरं प्रागसदागन्तुकं वदतः प्रतिवक्ति । कार्येति ।

मू० कार्योपादानभेदे न कथमधिकता गौरवादे-
स्स्वकार्यं नान्यत्वं नामसंख्याव्यवहृतिधिष-

णाकारकालादिभेदैः । द्रव्याभेदेऽप्यवस्थान्तरत इह तु ते पत्रताटङ्कवत्स्युः नोचेदंशांशिनोस्स्यात्प्रतिहतिरुभयोः स्पर्शवत्त्वाविशेषात् ॥ २० ॥

कार्यद्रव्यस्य स्वोपादानद्रव्याद्भेदे सति द्विपलिकैकपलिकन्यायेन तन्तुगुरुत्वं समं न्यूनमधिकं वा पटगुरुत्वं च सम्भूय पतनातिरेकं कथं न कुर्यात् तदकरणे कश्चिदपि हेतुर्न सिध्येदित्यर्थः तथा हि न तावदवयविनि गुरुत्वं न जायते परमाणुगुरुत्वपरिशेषप्रसङ्गात् तथा च त्वया ऽनभ्युपगमात् अयुक्तेश्च । कार्यगुरुत्वादेव ह्यणुगुरुत्वं कल्पयसि जातस्य च न स्वाभावतः पतनहेतुत्वाभावः प्रतिबन्धात्कार्यानतिरेक इति चेत् । किमयम्प्रतिबन्धोऽवयविगुरुत्वस्योतावयवगुरुत्वस्य नाद्यः परमाणुगुरुत्वस्यैव *प्रपतनहेतुत्वप्रसङ्गात् तथा सति गुरुत्वात् पतनं द्रवत्वात्स्यन्दनमिति तत्तत्क्रियावच्छिन्नगुरुत्वादिकल्पनभङ्गापाताच्च अतो वरमवयविनि गुरुत्वाद्यनुत्पत्तिकल्पनं तच्च चोक्तोदोषः । न द्वितीयः कदाचिन्निष्कम्पे अवयविनि शाखाफलहस्तादिलम्बनाभावप्रसङ्गात् तथा च कथमवयव्यपि तच्चलम्बेत संयोगान्तरादर्शनात् लम्बमानो ऽवयवी स्वावयवमपि लम्बयतीति चेन्न सर्वावयवलम्बनप्रसङ्गात् सङ्घातवादिनस्तु यथार्हं प्रतिबन्धांशेऽलम्बनोपपत्तिः कार्यगुरुत्वोत्पत्तौ कारणगुरुत्वं नश्यतीति चेन्न । अपसिद्धान्तात् रूपादिष्वपि तथात्वप्रसङ्गात् । अथ कार्यगुरुत्वस्यातिमन्दत्वात्सूक्ष्मं पतनवैषम्यन्दुर्ग्रहमिति तदपि न । मान्द्यकारणादृष्टेः कल्पकासम्भवाच्च अतस्तन्तुतत्कार्यपटसमुदा-

* पतनेति पु॰ प॰ ।

योन्माने पटद्वयोन्मान इव गुरुत्वान्तरकार्यन्दुस्त्यजमादिशब्देन द्रवत्वगन्धादिसंग्रहः स्वकार्यं *तत्तदुचितं कार्यमित्यर्थः तथाऽप्य-नन्यथासिद्धभेदकभूम्ना भेदसिद्धौ गुरुत्वान्तरकार्यादर्शनं कथंचिदन्य-तरप्रतिबन्धेन नेयमित्यभिप्रायेण शङ्कमानम्प्रत्याह । नान्यत्व-मिति । यद्यपि नामभेदाभेदावर्थभेदाभेदयोरप्रयोजकौ तथाऽपि पर्या-यातिरिक्तो विशेषणविशेष्यभावानर्हो वाचकभेद इह नामभेदः स च सिंहव्याघ्रशब्दवत् स्ववाच्यं भिन्द्यात् संख्याभेदोऽप्येकस्यैव द्वितीया-दियोगाद्यद्यपि स्यात् तथाऽपि नैवमत्र बहवस्तन्तव एकः पट-इति विभजनात् व्यवहृतिरिहार्थक्रियासिद्ध्यर्थो व्यापारः पटा-द्यर्थे तन्त्वादय उपादीयन्ते पटादयस्त्वाच्छादनाद्यर्थे न च तन्त्वादिमात्रे पटादिधीः पटादिषु वा तन्त्वादिधीरिति धिषणा-भेदः, आकारभेदश्च व्यवस्थिताश्रयो वृत्तचतुरस्रत्वादिः पूर्वका-लीनास्तन्त्वादयः पटादयस्तु पश्चाद्भाविन इत्येवंविध इह काल-भेदः आदिशब्देन कारणभेदादिसंग्रहः अंशुप्रभृतयस्तन्त्वादीनां पटादीनान्तु तन्त्वादय इति नियतोऽत्र कारणभेदः कार्यभे-दश्चैवं नियत एव कारणस्यैव च कार्यत्वे कारकव्यापारवैयर्थ्यं स्यादितिमे दहेतवः । एषामन्यथासिद्धिमाह द्रव्यभेदे ऽपीति । तुशब्दोऽवधारणे उपादानोपादेयतया ऽवस्थाद्वयवति द्रव्ये घटप-टवद्भेदं साधयितुं न शक्नुवन्तीत्यर्थः । अत्र दुस्तरप्रतिबन्द्यभि-प्रायेण निदर्शयति । पन्नताटङ्कवदिति । पन्नस्य हि कुण्डलि-तस्य नियतं नामान्तरं दृष्टं सफलश्चावस्थान्तरेण कारकव्या-पारः न ह्यत्रावयव्यन्तरोत्पत्तिः आकुञ्चनप्रसारणपद्मसंकोचविकासा-दिष्वपि तत्कल्पनाप्रसङ्गात् न चैकेनावयवेनावयव्यारम्भः असम-

* तदुचितमिति पु० पा० ।

वायिकारणासम्भवात् अवयवावयवसंयोगस्तत्रासमवायिकारणमिति चेन्न । तस्यान्यार्थत्वात् अन्यथा अंशूनां तन्तुवत् पटाश्रयत्वमपि स्यात् न च तद्युक्तम् आरब्धकार्यैरवयवैस्तदैवावयव्यन्तरारम्भानभ्युपगमात् तत्र हि सप्रतिघत्वविरोधाद्बिभेषि एवं सम्प्रतिपन्नावस्थाभेदमात्रानादरेण द्रव्यान्तरकल्पनेऽपि तमेव विरोधं प्रसञ्जयति । नो चेदिति । अंशांशिनोः अवयवावयविनोरित्यर्थः उक्तप्रसङ्गे तदभिमतमेव हेतुमाह । उभयोरिति । द्वयोर्द्रव्ययोरन्यतरस्य वा स्पर्शहीनत्वे मिथः प्रतिरोधो नास्ति इह तु न तथेति अभिप्रायेणोभयोरित्युक्तम् अवयवावयविनोरेकत्र वृत्तिर्नास्तीति चेत्समवायिदेशैक्याभावेऽपि संयोगिदेशैक्यमङ्गीकरोषि तत्र कथं तन्त्ववष्टब्धनभःप्रदेशे पटसंयोगः, माभूदिति चेत् मूर्तामूर्तसंयोगविलोपप्रसङ्गः मेरुमन्दरादीनामप्यविभक्ताकाशप्रदेशवृत्तावविरोधः स्यात् नीरक्षीरादिमेलने का वार्ता हन्त स्वसिद्धान्तं प्रस्मृत्य पृच्छसि एतेन भूमावुन्मज्जति निमज्जतीत्यादिसिद्धनिदर्शनमपि निहतम् । तस्मादवयवावयव्यतिरिक्तविषय एव सप्रतिघत्वविरोधव्यवस्थापनमपि निर्मूलमिति ॥ २० ॥ परपक्षे प्रसञ्जितानां दोषाणामभावात् स्वपक्षस्य सम्यक्त्वमाह । इत्थमिति ।

मू० इत्थं वृत्त्यादिखेदो न भवति न च नः कल्पनागौरवं स्याद्ध्रस्वे दीर्घैकतन्तुभ्रमणविरचिते वस्त्रधीर्नापि बाध्या । देशाधिक्यं समेतेष्वणुषु न हि ततः स्थूलधीबाधशङ्का संसर्गादेर्विशेषादवयविपरिषद्राशिवन्यादिवादः ॥ २१ ॥

इत्थमवस्थाभेदमात्रेण निर्वाहे सतीत्यर्थः । यद्वा त्वत्पक्षव-दिति उक्तस्सप्रतिघत्वविरोध इह वृत्तेः खेदः अवयवेषु वृत्त्यनुपप-त्तिर्वा यदि प्रत्यवयवमविभागेनावयवी वर्तते तदैकावयवदर्शनेऽ-प्यवयव्युपलभ्येत जातिरिव प्रत्याधारम्, अथ विभज्य अवयवातिरि-क्तांशभेदेनानवस्थापातः बलवत्प्रमाणोपनीतेऽर्थे सम्प्रतिपन्नवद्वृत्त्य-नुपपत्तिर्विलीयत इति चेन्न । प्रमाणबलस्यात्र निरस्तत्वात् आदि-शब्देनोत्पत्तिनाशानुपपत्तिस्संगृह्यते तथा हि पृथुतरपटनिर्माणप्रक्रमे द्वितन्तुकादिपटपङ्क्तिरुत्पद्यते न वा । न चेत् बुद्धिशब्दान्तरादि-रवस्थाभेदादेवेति सिद्धं स्यात् । उत्पद्यते चेत् त्रितन्तुकाद्यारम्भ-दशायां पूर्वपूर्वन्तिष्ठति न वा पूर्वत्र तदनारम्भः, आरब्धकार्यै-स्तदानीमवयव्यन्तरानारम्भात् । न च द्वितन्त्वादिस्तन्त्वन्तरस हितस्त्रितन्तुकाद्यारम्भक इति युक्तम् इह तन्तुषु पट इत्यादिस्वा-भिमतव्यवहारविरोधात् ।

पूर्वसिद्धपटैस्सार्धं तन्तुभिः पटसम्भवे ।
पटपङ्क्तिस्समीक्ष्येत क्रमादाधिक्यशालिनी ॥
प्राक्सिद्धानां पटादीनामुत्तरोत्तरजन्मनि ।
अहेतुको विनाशश्च स्थिरपक्षे न युज्यते ॥

न चे दुपलम्भविरुद्धनाशसन्ततिकल्पनाप्रसङ्गः एवमेकद्वित्र्या-दितन्त्वपकर्षणदशायामपि खण्डपरम्परोत्पत्तिनाशपरम्पराक्लृप्तिः क्लिष्ट-तरा लाघवशालिनि संघातमात्रपक्षे राशिन्यायान्नासौ दोषः । ननु गौरवभयादवयविपरिहारे सौगतवत्स्वरूपविशेषमालम्ब्य तन्त्वादीनां संयोगोऽपि त्यज्यतामित्यत्राह । न चेति । अत्र हि परैरप्यसमवा-यिकारणतयाऽभिमता दृष्टा च संयुक्तावस्था स्वीकृतेति नास्माक-मह काचित्कल्पना कुतस्तद्गौरवं सम्भवेदिति भावः स्वलक्षणस-

मुदायवादिनाऽपि नैरन्तर्यरूपोऽतिशयः कश्चिदिष्यते अन्यथा दूरस्थवदेकताभ्रान्तिः पुञ्जबुद्धिर्वा न स्यात् त्वमपि विभूनामणूनां च नित्यानामपि हेतुभेदैरवस्थान्तरापत्तिमङ्गीकरोषि सर्वद्रव्यस्वरूपनित्यत्वन्तदवस्थाभेदं च वदतामपि तथा किं न स्यात्संयुक्तावस्थाऽपि हि परिणामः कथन्तर्हि नित्यानित्यविभागः इत्थं द्रव्यतदवस्थयोस्तथाभावादेव द्रव्यविवक्षायान्त्ववस्थाविशिष्टवेषेणानित्यत्वव्यवहार इति । ननु तन्तव एव व्यतिषङ्गविशेषविशिष्टाः पट इति भवतां राद्धान्तः पटवच्चेति सूत्रे दर्शितः तथा सति दीर्घीकृतन्तुपरिवर्तनविशेषनिष्पादितेऽवयविनि कथं पटबुद्धिः स्यात् अनेकतन्तुसंघातासिद्धेरित्यत्राह । वस्त्र इति । नहि वयं तन्तुगतमेकत्वं द्वित्वबहुत्वादिकं वा पटधीनिबन्धनं नियच्छामः यथादृष्टि सर्वसम्भवात् त्वं तु स्वपक्षदोषमस्मत्पक्षस्थं मन्यसे प्रदर्शितं हि पक्षे ताटङ्कनिष्पत्तावेकस्यावयवस्यानारम्भकत्वमतस्तवैव तत्र पटधीबाधः एकस्यारम्भकत्वेऽतिप्रसङ्गोऽपि तवैव । स्यादेतत् अवयविनमनभ्युपगच्छतामन्ततः पर्वतादयोऽपि परमाणव एव संहताः स्युः ते न प्रत्यक्षाः अतस्सर्वाग्रहणमवयव्यसिद्धेरित्यक्षपादोक्तमनतिक्रमणीयं स्यात् स्थूलद्रव्याबाधे चाणुसंहतौ स्थूलत्वाध्यासोऽपि न सिध्येदिति तत्राह । देशाधिक्यमिति । अयम्भावः स्थूलधीरित्यवयविधीर्वा परिमाणविशेषधीर्वा प्रत्यक्षयोग्यत्वधीर्वा प्रत्येकदेशादधिकदेशत्वधीर्वा नाद्यः तदभावप्रसक्तेरिष्टप्रसङ्गात्, न द्वितीयः संहतेरेवावयविवत्परिमाणान्तरस्य सृष्ट्युपपत्तेः अणुष्वेव कथं विरुद्धं स्थूलत्वं स्यादिति चेदेकत्वाद्याश्रयेष्वेव कथं द्वित्वादिकमिच्छसि अपेक्षाबुद्धिसंगृहीतान्यानुबन्धसामर्थ्यादिति चेद्बुद्ध्यनपेक्षसम्भेदसामर्थ्यादेव परिमाणान्तरमपि पश्यन्तु भवन्तः । न तृतीयः एकैकस्या-

प्रत्यक्षत्वेऽपि समुदायवशाद्दृश्यत्वोपपत्तेः यथैकस्य दवीयसः केशहिमादेरदर्शनेऽपि संहतानां दृश्यत्वं एकैकस्याप्यासत्तौ दर्शनाद्योग्यत्वमस्तीति चेदणूनामपि त्रसरेणुमात्ररूपाणां सामग्रीसम्भवे तथैव स्यात् । न चतुर्थः माषादिराशिषु संहतिभेदैर्देशतारतम्यदृष्टेः ननु तत्तत्परिमाणावयविद्रव्याभावे तत्प्रयुक्तदेशन्यूनाधिकत्वन्दुर्निरूपं स्यात् मैवं न ह्यवयविनिरूपणेनैव देशाधिक्यादिनिरूपणं सुरभित्वगन्धत्वादेरिव सम्बन्धिन्यूनाधिकभावेनापि तदुपपत्तेः । द्रव्येषु नैवमिति चेत् न द्व्यणुकोत्पत्तेः पूर्वक्षणे संयुक्ताणुद्वयस्य प्रत्येकदेशादधिकदेशत्वावश्यम्भावात् अन्यथा सर्वपरमाणूनां समानदेशत्वे प्रागुक्तदोषप्रसङ्गात् द्व्यणुकान्तरपरिच्छिन्नस्स देश इति चेन्न । सहवृत्त्ययोगात् अन्यथा परिच्छेदासिद्धेः समवायिनस्संयोगिनो वा देशस्याभावे कथन्तत्र देशाधिक्यमिति चेन्न आकाशाद्यंशभेदेन तदुपपत्तेः कथं निरवयवस्यांशभेद इति चेदात्मानं पृच्छ कर्णशष्कुल्याद्युपाधिपरिच्छित्त्या नभसि नाना श्रोत्राणि कल्पयसि भेर्यादिशब्देषु श्रूयमाणेषु तरङ्गवृत्त्या तत्तदनन्तरदेशेषु शब्दोत्पत्तिं साधयसि वेणुरन्ध्रादिविशेषभागाश्च प्रसिद्धाः आकाशादेरप्रत्यक्षत्वात्तदंशतारतम्यं दुर्ग्रहमिति चेन्न । प्रत्यक्षाकाशवादिनम्प्रति हेत्वसिद्धेः त्वयापि माषादवयविनो महीधरस्याधिकदेशत्वं गृह्यते आलोकमण्डलांशभेदैस्तत्र देशाधिक्यमिति चेन्न आलोकस्यापि नभसि न्यूनाधिकदेशवृत्तित्वदृष्टेः परिमाणाधिक्यमात्रमेव पर्वतादिषु गृह्यत इति चेदगृह्यमाणमपि देशाधिक्यं तत्रास्ति न वा अस्ति चेत्सङ्घातेऽपि कश्चोद्यावकाशः, न चेत्तत्तद्देशेषु चक्षुःप्रसरादिनिरोधकत्वं न स्यात् अन्यथा ऽल्पदेशवर्तिनः सर्वत्र निरोधकत्वप्रसङ्गात् अतः परस्पराक्रान्तदेशावष्टम्भेन संहन्यमानेषु त्रसरेणुषु सुग्रहमेव देशाधिक्यं

देशस्तु आलोकाकाशादिर्यः कश्चिद्यथायोग्यमस्तु अत एव प्रधानाभावादणुषु स्थौल्यारोपोऽपि न स्यादिति चोद्यमपि निस्तीर्णम् तथाऽपि यदि संसृष्टास्तन्तव एव पटस्ततस्तन्तुराशिमात्रेऽपि पटधीः स्यादित्यत्राह । संसर्गादेरिति । न हि त्वयाऽपि तन्तुसंसर्गमात्रं पटस्यासमवायिकारणमिष्यते तथा सति कुविन्दादिव्यापारनैरपेक्ष्यप्रसङ्गात् अतो यादृशात्संसर्गविशेषादवयवी तवोत्पद्यते तादृशसंसर्गविशिष्टास्तन्तवः पट इति क्वातिप्रसङ्गः । आदिशब्देन संसर्गिद्रव्याणि देशकालौ च गृह्यन्ते द्वितीयेन त्वादिशब्देन यूथपङ्क्तिमण्डलसेनाव्यूहपूर्णचतुरस्रादिसंग्रहः परिषदाद्युपादानं दृष्टान्तार्थं मत्वर्थीयमपि शूरवती सेनेतिवत् प्रत्येकसमुदायभेदविवक्षया स्यादिति ।

भिन्नानामेव संश्लेषे संघातैक्यानुसारतः ।
संयुक्तौ द्वाविति प्रख्या राशिद्वित्वनयाद्भवेत् ॥
महत्त्वैकत्वयुक्तत्वप्रभृतेरपि राशिवत् ।
संयुक्तद्रव्यनिष्ठत्वान्न संयोगे प्रसञ्जनम् ॥
घनत्वश्यामताद्दीनां वनैकाधिकरण्यतः ।
न स्याद्वृक्षबहुत्वादेर्घनत्वाद्यैर्विशेषणम् ॥
तन्तवः सितरक्ताद्याः पटचित्रानुयायिनः ।
अवयव्यनपेक्षत्वं चूर्णसंहतिचित्रवत् ॥
रूपादीनामचित्रेऽपि वदन् वैषम्यदर्शनम् ।
अपह्नुवीत वैयात्यात्खपुष्पादेरदर्शनम् ॥
या चासौ धारणाकृष्ट्योरुपपत्तिरसूच्यत ।
तादृग्भूतावयव्यर्थे संघाते सा भविष्यति ॥
गाढावयवसंश्लेषरहिते ऽवयविन्यपि ।
धारणाकर्षणे न स्तस्तथा चाभ्युपगच्छसि ॥

[*Page* 161]. Here, by the Figure 'Reason' (हेतु) is suggested the Figure 'Peculiar Allegation' (विशेषोक्ति), the sense being that 'Even on thinning her body, she does not find a place in your heart.'

Among these the *suggestive* is established only by the bold assertion of characters figured by the poet.

Suggestive meaning due to both word and meaning—only one.

41 *(contd.)* That arising from (the power of) both word and meaning, is only one.

As for example:

अतन्द्रचन्द्राभरणा समुद्दीपितमन्मथा ।
तारकातरला श्यामा सानन्दं न करोति कम् ॥

["Whom does not a beautiful young woman (night) rejoice?—being, as she is, lively, adorned with a peculiar head-ornament (adorned with clear moon) and having her desire *kindled* (kindling desire), with the pupils of her eye unsteady (with moving stars)?"]

Here 'Simile' is suggested (the word *Çyāmā* having a double *entendre*: (1) a young woman and (2) night; and each of the epithets is applicable to both.

Eighteen-foldness of suggestive poetry.

41 *(concld.)*—[*Page* 163]. Of these, therefore, are eighteen forms. (See Appendix II.)

Of this—*i. e.* of Suggestive Poetry.

Objection:—

Rasa, &c. being manifold, why should the number be limited to eighteen?

Reply:

Rasa and its semblance, etc. counted as one.

42. *(contd.)* The number of Rasa, etc. being infinite, they are all taken as one.

'Infinite,' because, there are nine *Rasas;* of these the Erotic has two divisions—of Union and of Separation; Union again has many forms, *viz.* mutual glance, embrace, kissing, gathering of flowers, amorous and sportive baths, descriptions of sunset, moon, moon-rise, the six seasons. Of Separation also, longing, &c. have been already described. Of these two again manifoldness arises from the diversity of the Ensuants and Accessories, &c.; there also the hero and heroine are either of the highest class, medium or of the worst; therein again we have various divisions arising from the diversity of place, time, condition, &c. Thus then of a single *Rasa*, there is an infinite number of divisions; what then of the others? The suggestion of *Rasas*, &c. is counted as one only, through the common quality (*the fundamentum divisionis*) of having the process (of suggestion) such as to have the order of precedence imperceptible.

In a sentence we have suggestion due to both word and meaning.

42. *(contd.)* In a sentence (exists suggestion) arising from both.

'*Arising from both*'—*i. e.* arising from the power of word as well as from that of meaning.

In words—these and others.

42.—*(contd.)* [*Page* 165.] In words also, the others, *i. e.* the former seventeen divisions belong to a word as well as to sentences.

'*Also*'—*i. e.* in sentence also. Speech, suggested by sentence, becomes elegant even with word-suggestion as a lovely woman with an ornament on a single portion of her body.

Of these, the various suggestions of words is respectively exemplified:

[*Page* 166.] "यस्य मित्राणि मित्राणि शत्रवः शत्रवस्तथा ।
अनुकम्प्यो ऽनुकम्प्यश्च स जातः स च जीवति ॥

(1) Having the expressed meaning transferred to another.

[" He only is born and lives whose friends are friends, enemies enemies, and the favourable favoured."]

Here the second मित्राणि (*friends*) etc. have their meaning transferred to that of 'reliable,' 'punishable,' 'object of affection' respectively.

खलव्ववहारा दीसन्ति दारुणा जहवि तहवि धीराणाम् ।
हिअअवअस्सबहुमआ ण हु ववसाआ विमुज्झन्ति ॥

(2) Having the expressed meaning altogether neglected.

"Though the actions of evil men are seen to be terrible, yet the actions of the wise preferred by their friend the heart, are not impeded.''

[*Page* 167.] (*a*) Here in 'impeded' lies the suggestion.

लावण्यं तदसौ कान्तिस्तद्रूपं स वचः क्रमः ।
तदा सुधास्पदमभूदधुना तु ज्वरो महान् ॥

(3) Having the process of suggestion imperceptible.

[" That lively beauty, that loveliness, that form, and that address, were all, then, like nectar; but now they become the source of strong fever."]

Here by the words '*that*' etc. is suggested the indescribable character of the perceived 'beauty,' etc.

[*Page* 168.] Or again, as—

मुग्धे मुग्धतयैव नेतुमखिलः कालः किमारभ्यते
मानं धत्स्व धृतिम् बधान ऋजुतां दूरीकुरु प्रेयसि ।
सख्यैवम्प्रतिबोधिता प्रतिवचस्तामाह भीतानना
नीचैः शंस हृदिस्थितो हि ननु मे प्राणेश्वरः श्रोष्यति ॥

(*a*) Here विमुह्यति being incompatible with reference to an inaccurate subject; the action is neglected and the meaning indicated is 'non-impediment' and by this is suggested the doing of proper actions. Thus the *Com.*

[" O beautiful one! what is this—that you begin to pass your time by mere simplicity. Have self-respect. Bear fortitude. Set aside your straightforwardness to your beloved." Having been thus exhorted by her friend, she, with fear-stricken face, replied: 'speak low, lest the Lord of my life occupying my heart should overhear what you say.']

[*Page* 169.] Here the propriety of the exhortation 'speak low' is shown by the epithet 'with fear-stricken face.'

There being not much charm in the word-suggestion of Emotion, &c. examples of these are not given.

(4) रुधिरविसरप्रसाधितकरवालकरालरुचिरभुजपरिघः ।
झटिति भ्रुकुटिविटङ्कितललाटपट्टो विभासि नृपभीम ॥

[" O thou terrible king! thou shinest, having for thy hindering bar (of thy enemy's victory) thy arms, pleasing as well as terrifying, owing to the sword *reddened* with blood and having in the board of thy forehead waves, as it were, produced by the curling of thy eyebrows."

(4) Suggestion of perceptible process by words—founded on the power of a word—of Figure by Matter.

[*Page* 170.] Here the simile of the terrible king with Bhīmasēna is suggested.

(5) भुक्तिमुक्तिकृदेकान्तसमादेशनतत्परः ।
कस्य नानन्दनिस्यन्दं विदधाति सदागमः ॥

[" Whose pleasure does not the good scripture (the visit of a good man) produce, giving, as it does, worldly enjoyment as well as final beatitude (giving enjoyment, dalliance, and release from the pangs of separation, &c.) and leading to retirement?"]

(5) Suggestion of perceptible process—by words—founded on the power of words—of Matter by Matter.

[*Page* 171.] Some woman speaks this by implication to a paramour who had appointed a place of meeting.

[*Page* 172.] "In the evening thou hadst recourse to bath, anointed thy body with sandal; the Ethereal Gem has passed the Crest of the Setting Mount, (and as such there can be no extraneous cause of heat) and slowly and confidently hast thou come here; astonishing then is thy extreme delicacy by which thou art at present completely exhausted, and thy eyes cannot help being partially closed."

(6) Suggesstion of perceptible process—by word—founded on the power of sense—Self-possible—of Matter by Matter.

[*Page* 173.] Here by the use of 'at present' is suggested by Matter, the Matter that 'thou hast had intercourse with thy paramour, and hence art exhausted.'

"The other milk-maid obtained final release without death by reflecting on the origin of the Universe (Krishna) the true form of the Supreme Spirit—all her sins having been dissolved in her pangs attendant upon her not obtaining him, and the store of her good deeds having been wasted away by her exhuberant joy in reflecting on him."

(7) Of Figure by Matter.

[*Page* 174.] Here it is said that the fruits of actions, good and evil, capable of being undergone in the course of a thousand births, were experienced at a stroke, as it were, by the pang of separation and the pleasure of reflection.

Thus the Figure Hyperbole (अतिशयोक्ति) is suggested by the word "all" (açēsha) and 'store' (चय).

[*Page* 175.] (8) क्षणदाऽसावक्षणदा वनमवनं व्यसनमव्यसनम् ।
बत वीर तव द्विषताम् पराङ्मुखे त्वयि पराङ्मुखं सर्वम् ॥

["Oh brave one! when you become averse to your enemies everything becomes averse to them—the nights become uncomfortable (non-nights), forests their shelter (non-forest) keeping of sheep (non-occupation) their occupation."]

(8) Matter by Figure.

Here the Matter suggested by all the words through the Figure 'Transition' (अर्थान्तरन्यास) subordinate to 'Contradiction,' (विरोध) founded on the power of a word, is that "Destiny also follows the course dictated by you."

[*Page* 176.] "'The lip of your husband in the morning was like a withered lotus,'—the young bride having heard this, cast her face down."

(9) Figure by Figure.

Here through 'Metaphor,' (रूपक) the words 'withered,' etc. suggest the Figure 'Poetic Reason' (काव्यलिङ्ग) that 'you kissed him vehemently and frequently,' whence the witheredness of his lip.

Among these the *suggestive* are self-possible.

[*Page* 177.] "Cupid blandishing his beautiful bow during moonlit nights brings the three w orld as it were, under his own undisputed sway."

(10) Founded on the bold assertion of the poet—Matter by Matter.

Here by Matter is suggested, by means of the words 'three worlds, &c.,' the Matter that 'Cupid is the Lord of all lovers, and from among these not a single goes against his will; and as such they pass the nights in wakeful dalliance.'

[*Page* 178.] "The Bodiless one lends all his force to the eyes of the beautiful-eyed woman in her cruel age (*i. e.* youth), thinking it to be his sharp arrow. And wherever on whatever side this arrow falls, it produces quite an admixture of conditions."

(11) Figure by Matter.

Here by Matter is suggested the Figure 'Contradiction' (विरोध) through the word 'admixture';—the sense being that 'contradictory states are produced simultaneously.' (Such is the power of Cupid).

[*Page* 179.] "Her necklace, of pure breed, moves not from its friend the breasts, even though forbidden by the heart, feeling troubled at the uncomfortable position (of the necklace at the time of embrace)."

(12) Matter by Figure.

Here through the Figure 'Reason' *(Hētu)* founded on the cause 'pure breed' is suggested by the word '*moves*' the Matter that 'the necklace remained swinging.'

[*Page* 180.] "Cupid in the shape the braided lock of black and beautiful form, having re-attained, as it were, to his original lovely form, triumphs (over men) in the battle of dalliance, having borrowed strength from her shoulders."

(13). Figure by Figure.

[*Page* 181.] Here by 'Metaphor' is suggested, through the word 'shoulder,' the Figure 'Peculiar Causation' (विभावना), the sense being that 'by frequent pulling the locks fell in such a way on the shoulders as that the lover had not his desire *satisfied* (his desire for dalliance remained as fresh as ever) even at the end of dalliance.'

Among these the suggestion is based on the poet's bold assertion.

"O beautiful one! let me know truly how you are related to the fresh full moon, who is your beloved like the evening (of the moon)?"

(14) Founded on the bold assertion of some character portrayed by the poet—Matter by Matter.

[*Page* 182.] Here by Matter is suggested through the words 'fresh' and '*evening*'—the Matter that "you bear love for the other woman as you did for me in the beginning only (so far by 'fresh') and no farther (*i. e.* you will give her also up as you did me) as the moon renounces evening (this, by 'evening')."

"O friend! in the new battle of dalliance, your necklace for being an intruder, having been snapped by its friend, the fast embrace, how did you enjoy (your lover's company)?"

(15) Figure by Matter.

[*Page* 183.] Here through Matter is suggested by the word '*how*,' the Figure 'Dissimilitude' (व्यतिरेक),—the sense being that 'there must have been dalliance of a peculiar kind, after the snapping of the necklace; so tell me how it occurred.'

"At the time of entering your house having looked upon the road with your face turned, and then having brought down the water-jar to your shoulders, why are you crying and saying 'Oh! it is broken'?"

(16) Matter by Figure.

Here through the Figure 'Reason' हेत्वलङ्कार is suggested, by the word '*why*,' the Matter that 'if you wish to go to your place of assignation, on seeing your lover proceed thereto, then you might take up another jar and go there (with the pretext of fetching water.)

Or

[*Page* 184.] "The jar seeing thee, O friend! exhausted and with restless and unsteady eyes and thinking itself to be too heavy for thee, fell down under the pretence of having struck the doorway and was broken."

[*Page* 185.] Here through the Figure 'Concealment' (अपह्नुति) is suggested—through the words '*under pretence &c.*,'—the Matter that 'having not found your lover in the *creeper-bower* on the river bank, and then at the time of entering your house seeing him come, in order to go to the river again you purposely broke the jar under pretence of its having struck the doorway; all this I have understood. Then why not be consoled and go to fulfil your desire? I shall justify your conduct before your superiors.'

'It is a pity that your concubine should captivate your heart, like a young girl, though she is an old hag to whose dalliance the vigour of youth is lent by moonlight and wine' (*i. e.* dalliance with whom is not itself pleasing, but it becomes so under the force of wine and the bright moon,—both excitants of sensuality).

(17) Figure by Figure.

[*Page* 186.] Here through the Figure 'Poetical Reason' (काव्यलिङ्ग) is suggested, by the word 'concubine,' the Figure 'Hint,' (आक्षेप),—the sense being that 'I cannot explain your conduct in that you abandon us and desire the company of oldish concubines.'

दृष्टभावान्न शृणोति ? उत शृण्वन्नपि नार्थं प्रत्येति ? उत सत्यामप्यर्थप्रतीतौ ब्राह्मण्याद्युपाधेः कर्तृत्वादेश्चाभावान्नाहं कर्मवश्य इति जानाति ? अर्थे प्रतीतेऽपि किन्नानुतिष्ठति ? उतानुतिष्ठतो न प्रत्यवायः ? उतेष्टानिष्टप्राप्तिनिवृत्ती नेच्छतीति, न प्रथमद्वितीयौ प्रतिबुद्धतत्त्वानां वसिष्ठादीनामप्युक्तिप्रत्युक्तिदर्शनात्, न तृतीयः आत्मनि ब्राह्मण्याद्यभावेऽप्युपाधेरनुवृत्तत्वात् तदभावज्ञानवतां वसिष्ठजनकभीष्मादीनामनुष्ठानदर्शनाच्च, न चतुर्थः, अज्ञस्याननुतिष्ठतोऽप्यशास्त्रवश्यत्वप्रसङ्गात्, न पञ्चमः आदिभरतादीनां प्रत्यवायदर्शनात् विप्रजन्मनि सतां मार्गमदूषयन्निति वचनाच्च, न षष्ठः, अमुमुक्षुत्वप्रसङ्गात् बन्धनिवृत्तीच्छा हि मुमुक्षा, मुक्तस्य न मुमुक्षेति चेन्न क्षुदाद्युपशमाय प्रवृत्तिदर्शनात् । अतोऽनुवृत्तिविधिवश्यत्वादाप्रयाणात् परविद्याऽनुवर्त्तनीया ॥ अन्ये तु साक्षात्कारणफलत्वादुपासनस्य तत्पर्यन्तत्वमिति पूर्वपक्षयन्ति तदयुक्तं परमपुरुषप्रीतिफलकत्वादुपासनस्य प्रीतेश्च यथाशास्त्रमनुष्ठानजन्यत्वात्, अतः शास्त्रार्थस्य कृतत्वादित्येव पूर्वपक्षयुक्तिर्युक्ता । अत एव सिद्धान्तेऽपि साक्षात्कारमात्रफलकत्वाभ्युपगमेनान्तिमप्रत्ययसिद्ध्यर्थमनुवर्त्तनीयतोक्तिरपि न युक्ता किंतु यथाशास्त्रमनुष्ठानसिद्धयेऽनुवर्त्तनीयत्वमेव वक्तव्यम् ॥ आप्रयाणाधिकरणं समाप्तम् ॥

तदधिगमाधिकरणम् ।

सू० तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥१३॥

भा० एवं विद्यास्वरूपं विशोध्य विद्याफलं चिन्तयितुमारभते ब्रह्मविद्याप्राप्तौ पुरुषस्योत्तरपूर्वाघयोरश्लेषविनाशौ श्रूयेते तद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवं विदि पापं कर्म न श्लिष्यते तस्यैवात्मा पदवित्तं विदित्वा न कर्मणा लिप्यते पापकेने"त्युत्तराघाश्लेषः, तद्यथेषीकतूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते क्षीयन्ते चास्य

कर्माणि तस्मिन् दृष्टे परावर" इति पूर्वाघविनाशः, एताव-श्लेषविनाशौ विद्याफलभूतावुपपद्येते नेति संशयः किं युक्तं नोपपद्येते इति कुतः "नाभुक्तं क्षीयते कर्म कल्पकोटि-शतै"रपीत्यादिशास्त्रविरोधात् ॥

टी० सू० तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ १३ ॥ पेटिकासङ्गतिमाह "एवमि"ति, उपायभूतोपासनस्य उपास्यनिरतिशयप्रियत्वेन स्वयमपि प्रियरूपत्वादुपेयरूपत्वमप्यस्तीत्यत्र तन्निरूपणं कृतं "दृश्यमानोमहोरगैर्न विवेदात्मनोगात्रं तत्स्मृत्याऽऽह्लादसंस्थितः । तच्चित्तविमलाह्लादक्षीणपुण्यचयस्तदे"त्यादिभिः प्रीतिरूपत्वं ह्यवगम्यते, ब्रह्मविद्याप्राप्ताविति ब्रह्मविद्याप्राप्तिः साक्षात्कारावस्थोपासनलब्धिर्विवक्षिता तस्मिन् दृष्टे क्षीयन्त इति हि विषयवाक्यं प्राप्तिरूपक्रमः विद्याप्राप्ति—शब्दः साधारण्यात् प्रपदननिष्पत्तेरपि द्योतकः संश्लिष्टस्य पूर्वाघस्याश्लेषायोगाद्विनाश एव उत्तराघस्य त्वश्लेष एवेति योग्यतावशाद्विभागः ॥

भा० अश्लेषविनाशव्यपदेशस्तु मोक्षसाधनभूतविद्याविधायिवाक्यशेषगतः कथंचिद्विद्यास्तुतिप्रतिपादनेनाप्युपपद्यते, न च विद्या पूर्वोत्तराघयोः प्रायश्चित्ततया विधीयते येन प्रायश्चित्तेनाघविनाश उच्यते, विद्या हि "ब्रह्मविदाप्नोति परं ब्रह्म वेद ब्रह्मैव भवती"ति ब्रह्मप्राप्त्युपायतया विधीयते, अतो विद्यार्थवादोऽयमघविनाशाश्लेषव्यपदेश इत्येवं प्राप्ते अभिधीयते—तदधिगमइति, विद्याप्राप्तौ पुरुषस्य विद्यामाहात्म्यादुत्तरपूर्वाघयोरश्लेषविनाशावुपपद्येते । कुतः एवंविधं हि विद्यामाहात्म्यमवगम्यते, एवंविदि पापं कर्म न श्लिष्यते एवं ह्यस्य सर्वे पाप्मानः प्रदूयन्ते इत्यादि-

व्यपदेशात्, न च नाभुक्तं क्षीयते कर्मेत्यनेन शास्त्रे णास्य विरोधः, भिन्नविषयत्वात्तद्धि कर्मणां फलजननसामर्थ्यंद्रढिमविषयम् एतत्तूत्पन्नाया विद्यायाः प्राक्कृतानां पाप्मनां फलजननशक्तिविनाशसामर्थ्यम् उत्पत्स्यमानानां च फलजननशक्त्युत्पत्तिप्रतिबन्धकरणसामर्थ्यं च प्रतिपादयतीति द्वयोर्विषयो भिद्यते, यथाऽग्निजलयोरौष्ण्यतन्निवारणसामर्थ्यविषययोर्द्वयोः प्रमाणयोरपि विषयभेदात्प्रामाण्यम्, एवमत्रापीति न कश्चिद्विरोधः ।

टी० अश्लेषविनाशप्रतीतिसंशयाभावात् तयोरुपपत्त्यनुपपत्तिविषयः संशय उक्तः, किं विदुष उत्तरपूर्वाघयोरश्लेषविनाशौ सम्भवतो ने?ति किमश्लेषविनाशशास्त्रे यथाश्रुतार्थपरे? उत नाभुक्तं क्षीयत इत्यनेन विरोधात् विद्यास्तुत्यर्थतया नेये? किमश्लेषविनाशशास्त्रयोरभुक्तकर्मापरिक्षयशास्त्रस्य च विरोध एव? उताविरोधः सम्भवति? विरोध एवचेद्विद्यास्तुत्यर्थत्वादश्लेषविनाशासंभवः, अविरोधसंभवे शास्त्रस्य यथाश्रुतार्थपरत्वादश्लेषविनाशसंभव इति नाभुक्तमित्यादिना पूर्वपक्षोपन्यासः अननुभवेऽपि कर्मणां प्रायश्चित्तेन विनाशो दृश्यत इत्यत आह "न चे"ति, एवं प्राप्त इति । नाभुक्तमित्यादिवचनविरोधं परिहरति "न चे"ति, अत्र शक्तिशब्दः कर्मानुष्ठाजनितभगवन्निग्रहपरः भिन्नविषयत्वेन वचसोरविरोधे दृष्टान्तमाह "यथे"ति, अश्लेषविनाशौ विवृणोति "अघस्ये"ति, ।

सू० अघस्याश्लेषकरणं वैदिककर्मायोग्यता वासनाप्रत्यवायहेतुशक्त्युत्पत्तिप्रतिबन्धकरणम्, अघानि हि कृतानि पुरुषस्य वैदिककर्मायोग्यतां सजातीयकर्मान्तरारम्भरुचिं प्रत्यवायं च कुर्वन्ति, अघस्य विनाशकरणमुत्पन्नायास्तच्छक्तेर्विनाशकरणं, शक्तिरपि परमपुरुषाप्रीतिरेव, तदेवं

विद्या वेदितुवद्यात्यर्थप्रियत्वेन स्वयमपि निरतिशयप्रिया-सती वेद्यभूतपरमपुरुषाराधनस्वरूपा पूर्वकृताघसञ्चजय-नितपरमपुरुषाप्रीतिं विनशयति, सैव विद्या स्वोत्पत्त्युत्त-रकालभाव्य घनिमित्तपरमपुरुषाप्रीत्युत्पत्तिं च प्रतिब-ध्नाति, तदिदमश्लेषवचनं प्रामादिकविषयं मन्तव्यं, नाविरतोदुश्चरितादित्यादिभिः शास्त्रैराप्रयाणादव्—

टी० उत्पत्स्यमानाया उत्पत्स्यमानस्य कर्मणः स्वकार्य्यकरणशक्तेः प्रतिबन्धः—अश्लेषः, उत्पन्नस्य कर्मणः उत्पन्नायाः कार्य्यकरणशक्तेर्विनाश-करणं विनाश इत्यर्थः । शक्ति—शब्दार्थमाह "शक्तिरपी"ति एतदुपपन्नमि-त्याह "तदेव"मिति, ब्रह्मानुभवस्य स्वतःप्राप्तत्वेनासाध्यत्वात् प्रति-बन्धनिवृत्तिरूपसाध्ये प्रायश्चित्ततुल्यैव ब्रह्मविद्या, स्वर्गादेः साध्यत्वात्त-त्साधनस्य कर्मणो न प्रतिबन्धनिवर्त्तकत्वम् अत्र तु प्रतिबन्धनिवृत्तेरेव साध्यत्वाद्विद्यायास्तद्धेतुत्वं युक्तमित्यर्थः । तर्हि ब्रह्मविदो निषेधशास्त्र-वश्यत्वं न स्यादित्यत्राह "तदिद"मिति, । ननु ब्रह्मविद्याया अपि पाप-प्रायश्चित्तत्ववचनात् कृच्छ्रादीनामिव बुद्धिपूर्वपापनिवर्त्तकत्वमपि स्यात्, नैवं प्रामादिकाघप्रायश्चित्तत्वेनैव तद्विधानात्, "अपि चेत्पातकं किं चिद्योगी कुर्य्यात् प्रमादतः । योगमेव निषेवेत नान्यं यत्नं समाचरेदि"ति, ह्युच्यते । ननु पूर्वं शरीरपातानन्तरं कर्मक्षय उक्तः, अत्र तूपासनारम्भे कर्म-प्रहाणमुक्तं कथमिदमुपपद्यते—उच्यते उपासनारम्भसमाप्त्योर्भगवत्प्री-तिविशेषाभिप्रायत्वात् अधिकरणद्वयाविरोधः । उपासनारम्भप्रीतः पर-मात्मा तत्समाप्तावुपासकस्याघं क्षमिष्यामीति सङ्कल्पयति, समाप्तौ तु क्षान्तमिति, सङ्कल्पयति, अतोऽधिकरणद्वयारम्भ उपपन्नः । परे तु ज्ञानस्या-विधेयत्वेन कर्मक्षयोद्देशे न विद्यायाः ।

सू० रव्हरुत्पद्यमानाया उत्तरोत्तरातिशयभागिन्याः विद्यायाः

दुश्चरितविरतिनिष्पाद्यत्वावगमात् ॥ तदधिगमाधिकरणं समाप्तम् ॥

टी० प्रायश्चित्तकर्मवद्विधानाभावात्तया कथं कर्मक्षय उक्त इत्याशङ्क्य सगुणविद्यायां तावद्विधानमस्ति निर्गुणविद्यायामपि वस्तुसामर्थ्यात् कर्मक्षयः कालत्रयेऽपि नाहं कर्त्ता भोक्तेत्यवगमादिति परिहरन्ति तदयुक्तं नाहं कर्ता नाहं भोक्तेति ज्ञाने सत्यपि चन्दनेन कण्टकेन स्वदेहं लिम्पतस्तुदतश्च पुरुषस्य लेपतोदकर्मकृतसुखदुःखादेरन्वयदर्शनात्, साक्षात्कारवतो न सुखाद्यन्वय इति चेत् न "व्युत्थानकाले राजेन्द्र आस्ते हेयतिरोहित इति योगव्युत्थाने देयसुखदुःखाद्यन्वयस्य प्रामाणिकत्वात् निर्गुणविद्याया अप्रामाणिकत्वाच्च वन्ध्यासुतस्य व्याधिपरिहारवद् व्यर्थः प्रयासः कर्मफलभोगानवश्यम्भावेऽपि देशकालनिमित्तापेक्षो मोक्ष इति पूर्वपक्षिणोक्ते तथा चेत् कर्मफलवदनित्यत्वप्रसङ्ग इति सिद्धान्तिना परिहारश्चानुपपन्नः निवर्त्तकज्ञानोदयानन्तरभाविन्या अविद्यानिवृत्तेरनित्यत्वप्रसङ्गात्, प्रागप्यविद्यानिवृत्तिरस्ति चेत् शास्त्रवैयर्थ्यम् । अपरे तु नाभुक्तमिति स्मरणमविद्वद्विषयमित्याहुः तद्भाष्योक्तविषयव्यवस्थाफलं विद्यायाः कर्मणां फलोत्पादनशक्तिविनाशसामर्थ्ये ह्युक्ते कर्मणां फलजननसामर्थ्यं विद्यारहितेषु भवतीति ज्ञायते अविद्वद्विषयत्वमूलेऽभिहिते तद्विषयत्वं सिध्यतीति भाष्ये मूलयुक्तिरुक्ता । अन्ये त्वाहुः अघफलं द्विविधं लेपो विपाकश्चेति, तत्र लेपोऽप्रायत्यं स्नानाद्यपनेयं, विपाको—नरकपातादिः, सुकृतस्यापि लेपो महत्त्वपङ्क्तिपावनत्वशापानुग्रहसामर्थ्यकाम्यकर्मरुचिरूपः, विपाकः—स्वर्गादिः तत्र महत्त्वं नाम सवनगतौ क्षत्रियवैश्यौ हत्वा ब्रह्महा भवति अग्निर्वै दीक्षितस्तस्मादेनं नोपस्पृशेदित्यवगम्यते, तत्र लेपः स्वसामर्थ्यप्रसूतं फलं विपाको नैयोगिकफलम्, एवं ज्ञानस्यापि स्वसामर्थ्यप्रभावितं नैयोगिकं चेति फलं हि द्विविधं, तत्र पुरुषशुद्धिलक्षणेन महात्म्यशब्दवाच्येन कल्मषविरोधिना पूर्वकल्पषविनाशः, उत्तराघानामप्रायत्यकरणरूपसंश्लेषविघातश्च, ज्ञानस्य नैयोगिकफलं तु देहपातेऽन्तिमप्रत्ययसापेक्षं सुकृतदुष्कृतप्रहाणं ब्रह्मभावाविष्करणं च,

उत्तरेषामघानामश्लेष एव न विनाशः, अत एव सुकृतदुष्कृते धूनुते तस्य प्रिया ज्ञातयः सुकृतमुपयन्त्यप्रियादुष्कृतमिति धूननवचनमप्रियज्ञात्युपायनवचनं चोत्तराघविषयमिति । अत्रोच्यते यद्यपि कर्मणामधिकारानधिकारसजातीयकर्मान्तरर्चिस्वर्गनरकादिफलविभागोऽस्ति तथाऽपि सामर्थ्यप्रभावितनैयोगिकफलविभागो नोपपन्नः भगवत्प्रीत्यप्रीतिव्यतिरेकेण सामर्थ्याभावान्नियोगाभावाच्च तद्व्यतिरेकेण सामर्थ्यनियोगाभ्युपगमेऽप्यश्लेषवचनस्य लेपविघातमात्रविषयत्वं धूननोपायनवचनयोरुत्तराघमात्रविषयत्वं चानुपपन्नं, तथा हि उत्तराघस्य विपाकहेतुशक्तिरुत्पन्ना न वा न चेल्लेपविघातोऽश्लेष इति विश्लेषोपादनवैयर्थ्यं स्यात् अस्मदीयपक्षः परिगृहीतश्च भवेत्, उत्पत्तिपक्षे क्रियोत्तीर्णा कर्मशक्तिरात्मधर्मभूता परमात्मप्रीत्यप्रीतिरूपा वा स्यात्, उभयथाऽप्यश्लेषवचनमनुपपन्नं स्यात्, आत्मधर्मत्वे तत्समवेतत्वात् परमात्मप्रीत्यप्रीत्योश्चेतनविषयत्वाच्च, विपाकशक्तेः श्लेषस्त्विष्टः लेपविघात एवाश्लेषरूपतयाऽभिमत इति चेत्तर्ह्यश्लेषवचनसङ्कोचः स्यात्, सुकृतदुष्कृते धूनत इति धूननश्रवणबलादवर्जनीयः सङ्कोच इति चेत् तर्ह्यनुत्पन्नस्य धूननायोगाद्विपाकशक्त्युत्पत्तिकल्पनगौरवं च स्यात्, न चानुत्पन्नस्य धूननायोगात्तदुत्पत्तिः कल्पनीया भवेत् उत्पन्नस्याप्यदृष्टस्य पांसुभसितकरीषादिवत् संयोगविभागार्हद्रव्यत्वाभावाद्धूननानुपपत्तेस्तत्कल्पनवैयर्थ्यात् धूनन—शब्देन विनाशो लक्ष्यत इति चेत् न विनष्टस्य प्रियाप्रियज्ञातिपरिग्रहायोगात् पुरुषगतादृष्टविनाशेऽपि प्रियाप्रियेषु नष्टसजातीयादृष्टान्तरोत्पत्तिरेव तत्संक्रमणमिति चेत् कर्तृगतादृष्टविनाशस्य पुरुषान्तरगतादृष्टान्तरोत्पत्तेश्च किं कर्मस्वभाव एव कारणं, तर्हि सर्वेषां सर्वाणि कर्माणि नश्येयुः पुरुषान्तरेष्वदृष्टं जनयेयुश्च, ततश्च कर्तॄणां भोगाभावोऽन्येषां भोगनियमश्च स्यात् अभुक्तफलस्याकृतप्रायश्चित्तस्य कर्मणोऽयं स्वभाव इति चेत् तर्हि द्वादशवार्षिकादिषु केनचिदननुष्ठितेषु तद्विषयतां ब्रह्महत्यादिदोषान्वयेन संव्यवहारादिषु वहिष्कार्यता स्यात्, यद्युच्येत नात्र कर्मस्वभावः कारण-

१ विशेषोपादानमिति पा० ।

मपि तु परविद्यामाहात्म्यमेव तत्तु विद्वद्गतं पूर्वाघं विनाश्य तदप्रियेषु तादृशमघं जनयतीति तद्वदुत्तराघप्रतिबन्धं प्रियाप्रियेषु तादृशादृष्टं च विद्याकरोतीत्यभ्युपगमो वरं, तथा सति उत्पत्तिकल्पनगौरवाभावात्, एवं च धूननोपायनयोरुघरात्तमात्रविषयत्वनिर्बन्धो निर्निबन्धनः स्यात्, विदुषः पूर्वाघविनाशने ज्ञातिषु तादृशाघजनने च विद्यासामर्थ्यस्योपपन्नत्वात्, एवं च सति सुकृतदुष्कृते धूनुत इत्यत्र सुकृतदुष्कृतशब्दयोरसङ्कोचः स्यात्, अन्यथा सङ्कोचो निर्निबन्धनः स्यात्, नष्टस्य कर्मणोऽन्यत्र संक्रमणायोगरूपस्य सङ्कोचहेतोः परिहृतत्वात्। पुरुषान्तरे तादृगदृष्टान्तरोत्पत्तिरुपायनमिति त्वयैव ह्युक्तम्, इयान्विशेषः एकस्मिन् पक्षे ऽश्लेषवचनस्य धूननोपायनवचनयोश्च सङ्कोचोविपाकशक्त्युत्पत्तिकल्पनगौरवं च, पक्षान्तरे तु सर्वश्रुत्यसङ्कोचो लाघवं चेति, अत्रायमर्थोऽनुसन्धेयः विदुषः कर्मणां चतस्रोऽवस्थाः श्रुताः विनाशोऽश्लेषो धूननमुपायनं चेति, क्रियामात्रविनाशस्य लोकसिद्धत्वात् क्रियाया अश्लेषधूननसंक्रमणानामयोग्यत्वाच्चावस्थाचतुष्टयं क्रियोत्तीर्णशक्तिविषयं निर्णीतं, सा च शक्तिरिष्टानिष्टफलदित्सालक्षणपरमात्मप्रीत्यप्रीतिरूपा, अन्यथा श्रुतहानाश्रुतकल्पनप्रसङ्गादिति प्रागेवोपपादितं, तत्र विनाशश्लेषवचनयोः पूर्वोत्तराघविषयत्ववदुपायनवचनस्य पुरुषान्तरे तत्समानादृष्टोत्पत्तिविषयत्वं चार्थसामर्थ्यात् सर्वैरभ्युपगन्तव्यम्। अश्लेषवचनं च कृत्स्नोत्तराघविषयम् असङ्कोचस्य स्वतःप्राप्तत्वात् अश्लेषश्च प्रतिबद्धोदयत्वम्। उत्पत्तिकल्पनगौरवात् तत्कल्पनेऽपि धूननसंक्रमणायोगात्, एवं च विद्याया पूर्वाघविनाशने उत्तराघप्रतिबन्धे प्रियाप्रियेषु सजातीयादृष्टजनने सामर्थ्यं च सिद्धम्। एवं विद्याया विनष्टप्रतिबद्धादृष्टसजातीयादृष्टजननसामर्थ्यादुपायननश्रुतिश्च नोत्तराघमात्रविषया अपि तु पूर्वोत्तराघविषया स्यात् तथा चोपनयनवाक्यस्यसुकृतदुष्कृतशब्दासङ्कोचश्च भवेत, तत्र विनाशो भगवतः पूर्वोत्पन्नकर्मफलदित्सानिवृत्तिः, अश्लेषश्च उत्तरकर्मफलदित्साप्रतिबन्धः, तौ च यद्यर्थोपहितौ यद्ययं प्रक्रान्तमुपासनं समापयेत् पूर्वोत्तरयोः कर्मणोः फलं न दास्यामीति सङ्कल्परूपौ हि तौ, समाप्ते तु

कर्मफलं नैव दास्यामीति सङ्कल्पो विधूननश्रुत्यभिप्रेतः, लोके सेवारम्भसमापनयोः प्रीतितारतम्यदर्शनात् । शास्त्रेषु तीर्थसेवाद्युपक्रमसमापनयोः फलतारतम्यदर्शनाच्च । लोके राजादीनामिव परमात्मनोऽपि स्वसेवकविषयप्रीत्यतिशयेन तत्प्रियाप्रियजनेषु तदनुरूपेष्टानिष्टफलदित्सा च भवति, एवं पूर्वोत्तराघविनाशप्रतिबन्धधूननोपायनहेतुर्विद्यामाहात्म्यमिति ॥ तदधिगमाधिकरणं समाप्तम् ॥

इतराधिकरणम्

सू० इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥

भा० उत्तरपूर्वाघयोर्विद्ययाऽश्लेषविनाशावुक्तौ, इतरस्य पुण्यस्याप्येवमुक्तेन न्यायेनाश्लेषविनाशौ विद्यया स्यातां विद्याफलविरोधित्वसामान्याद् व्यपदेशाच्च, भवति च व्यपदेशः उभे सुकृतदुष्कृते निर्दिश्य "सर्वे पाप्मानोऽतो निवर्त्तन्ते" इति, "तत्सुकृतदुष्कृते विधूनुत" इति च मुमुक्षोरनिष्टफलत्वात्सुकृतस्यापि पाप्म-शब्देन व्यपदेशः ।

टी० सू० इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥ अवान्तरसङ्गतिः स्फुटा, इतरस्याप्यसंश्लेष इति प्रतिज्ञानिर्देशः, एवमिति न्यायातिदेशः, उत्तरपूर्वसुकृतयोरश्लेषविनाशौ किं सम्भवतो नेति किं पापं कर्म न श्लिष्यते सर्वे पाप्मानः प्रदूयन्त इति वाक्यद्वयं सुकृतदुष्कृताश्लेषविनाशपरम्? उत दुष्कृतमात्राश्लेषविनाशपरं? किमत्र पापकर्म-शब्दो निषिद्धपरः उत विद्याविरोधिफलकर्मपरः? सर्वे पाप्मान इतिवाक्यं किं पापशब्दस्य विद्याविरोधिफलकर्मपरतामवगमयति? ने? ति न सुकृतं न दुष्कृतं सर्वे पाप्मानोऽतो निवर्त्तन्ते इति हि श्रूयते, न चेत् पापशब्दस्य निषिद्धमात्रपरतया वाक्ययोर्दुष्कृतमात्राश्लेषविनाशपरत्वान्न सुकृताश्लेषविनाशसम्भवः, अवगयतिचेत् पापशब्दस्य विद्याविरोधिफल-

आगमो न निर्द्दिष्टः स्यादित्यत आह । 'अमिति हीत्यादि' । नन्वत्रापि पक्षे ऽम्प्रत्ययप्रयुक्तयोरात्वपूर्वत्वयोरेवातिदेशः स्यान्न गुणस्य सर्वनामस्थानमात्रनिमित्तस्य, नतरामियङुवङोः प्रत्ययमात्रनिमित्तयोः, स्यादेतदेवं, यद्यमि यदाहत्य विहितं तस्यैवातिदेशः स्यात्, वयन्त्वमि यद्दृष्टं सामान्यनिबन्धनं विशेषनिबन्धनं वा तत्सर्वमतिदिशामः। 'त्वङ्मन्यइति' । अत्र त्वचंमन्यइति प्राप्नोति, येषामेको मकारः प्रत्ययवद्भावात्तु परोऽयमिति पक्षः, येषामपि द्वितीयस्तेषामचः परोम् प्राप्नोति, येषां त्वित्संज्ञको मकारस्तेषामत्रापि को दोष इति चिन्त्यम् । नन्वज्ग्रहणानुवृत्तेरेवात्र न भविष्यति, उपसमस्तस्य पृथगनुवृत्तिर्दुर्ज्ञानेति मन्यते । 'लेखाभ्रुंमन्यइति'। पूर्ववद् ह्रस्वत्वं मुमागमश्च । 'अथेहेत्यादि' । भाष्ये अथेह कथमित्यारभ्य श्रिमन्यमिति भवितव्यमिति स्थितं, स्थापितमित्यर्थः, तेन भिन्नकर्त्तृकत्वं ना शङ्कनीयम् । ननु च स्त्रीलिङ्गः श्रीशब्दस्तत्कथं श्रिमन्यमिति रूपमित्याशङ्क्योपपादयति । 'तच्चेदमिति' । अर्थान्तरे हि वर्त्तमानाः शब्दाः केचित्स्वलिङ्गत्यागेन वर्त्तन्ते यथा यष्ट्यादयः शब्दाः पुंयोगात्स्त्रियां वर्त्तमानाः यष्टी प्रचरी गणिकेति, के चित्तु स्वलिङ्गोपादानेन यष्टीः पुरुषान् प्रवेशयेति, तत्रेह प्रथमा विधा भाष्यकारस्याभिप्रेता, तेन स्वमोर्नपुंसकादित्यमो लुकि कृते श्रिमन्यमिति भवति, यद्येवं सुपो धातुप्रातिपदिकयोरित्यस्यापि लुकोतिदेशः प्राप्तोतिं तस्याप्यमि दृष्टत्वात्, अथाम्विधानसामर्थ्यादस्य लुको नातिदेशः, स्वमोर्नपुंसकादित्यस्यापि न स्यात् । उच्यते । येन नाप्राप्तइति वा मध्येपवादा इति वा सुपो धातुप्रातिपदिकयोरित्यस्यैव लुको विधानसामर्थ्याद्बाधः, न स्वमोर्नपुंसकादित्यस्य, एवमप्येकपदाश्रयत्वाल्लुगन्तरङ्गो विपर्ययादागमो बहिरङ्ग इत्यन्तरङ्गे लुकि कर्त्तव्ये बहिरङ्गोमागमो नास्त्येव तत्कृतो लुक्, नात्र बहिरङ्गपरिभाषा शक्याश्रयितुम्, अनुस्वारोपि हि न स्याद् अरुन्तुदो द्विषन्तप इति, तस्मादत्र लुकि सति श्रिमन्यमिति भवति, येषां त्वमो मकार इत्संज्ञकः प्रयोगे तु मुमः श्रवणं तेषामकारमात्रस्य लुकि सति मुमः श्रवणप्रसङ्गः ॥

"वाचंयमपुरन्दरौ च" ॥ 'वाचंयमइति'। वाचि यमो व्रतइति खच्। 'पुरंदरइति'। पूःसर्वयोर्दारिसहोरिति खच्, खचि ह्रस्वः, उभयस्यापि पूर्वपदस्यामन्तत्वं निपात्यते ॥

"कारे सत्यागदस्य" ॥ सत्यङ्कारः समयकरणम्, अशपथेपि परत्वाद् डाचं बाधित्वा कारे मुमेव भवति, अगदंकारो विषप्रतिपक्षद्रव्यविशेषकरणं, भक्षंकारो यागविशेषे द्रव्यभक्षणस्य करणं, भक्षङ्करोतीति वा भक्षङ्कारः, कर्मण्यण्। 'धेनुंभव्येति'। भविष्यन्ती धेनुरुच्यते, भव्यगेयेति यत्कर्त्तरि। 'लोकंपृणेति'। पृणोतिः पूरणकर्मा मूलविभुजादित्वात्कः, 'अनभ्याशमित्यइति'। एतिस्तुशासित्यादिना क्यप्, एतव्यमित्यम्। अनभ्याशन्दूरम्, अनभ्याशमित्यः, दूरतः परिहर्त्तव्य उच्यते। 'भ्राष्ट्रमिन्धः अग्निमिन्धइति'। कर्मण्यण्, घञन्तेन वा षष्ठीसमासः। 'तिमिङ्गिल इति'। मत्स्यविशेषः। तिमिङ्गिलतीति पूर्ववत्कः, इत्वम्। अचि विभाषेति लत्वं, तिमिङ्गिलगिलः, अयमपि मत्स्यविशेष एव। 'गिलगिले चेति'। यदा गिलं गिलतीति गिलगिलः तिमिङ्गिलगिलइति व्युत्पत्तिस्तदेदमुपसंख्यानं, यदा हि तिमिंगिलं गिलतीति तिमिङ्गिलगिलइति व्युत्पाद्यते तदानार्थ एतेन। 'उष्णंकरणं भद्रङ्करणमिति'। षष्ठीसमासौ। 'पुत्रड्विति'। टकारो ङीबर्थः। 'केचित्त्वित्यादि'। तेषां पक्षे उपसंख्यानमिदं नारब्धव्यम्। अन्यत्रापि हीत्यादिना शार्ङ्गरवादिपाठमेव द्रढयति। अन्ये तु शार्ङ्गरवादिपाठं नेच्छन्ति ॥

"श्येनतिलस्य पाते ञे" ॥ 'श्येनपातास्यां क्रियायामिति'। यद्यपि घञः सास्यां क्रियेति ञ इत्यत्र क्रियाग्रहणं प्रकृत्यर्थविशेषणं न प्रत्ययार्थः, श्येनपातोस्यां तिथौ श्येनपाता तिथिरिति तत्रोदाहृतत्वात्, तथाप्यस्यामिति स्त्रीलिङ्गमात्रस्य प्रत्ययार्थत्वात्क्रियाया अपि प्रत्ययार्थत्वमविरुद्धम्। 'श्यैनंपातेति'। पतनं पातः, श्येनस्य पातः, कर्त्तरि षष्ठ्याः समासः, ततो घञः सास्यामिति ञः ॥

"रात्रेः कृति विभाषा" ॥ 'कृदन्तउत्तरपदइति'। यद्यप्याचार्यक्विबन्तस्य रात्रिशब्दस्यानन्तरस्तृजादिः कृत्संभवति तथापि तस्य गौणार्थे-

त्वादग्रहणमिति सामर्थ्यादुत्तरपदाधिकारेप्यत्र तदन्तविधिर्भवति। 'रात्रिंचर इति'। रात्रौ चरतीति चरेष्टः। 'रात्रिमट इति'। अटतीत्यटः, पचाद्यच्, साधनं कृतेति समासः। 'अप्राप्तविभाषेयमिति'। ननु चोभयत्र विभाषेयं युक्ता, रात्रिंमन्येत्यादौ खिदन्ते प्राप्ते ऽन्यत्राप्राप्त इत्यत आह। 'खिति हि नित्यं मुम् भवतीति'। पूर्वविप्रतिषेधेनेति भावः॥

"न लोपो नञः"॥ नञः सानुबन्धकस्य ग्रहणं पामादिभ्यो नः पामनपुत्र इत्यादौ माभूत्, अथ क्रियमाणेऽपि सानुबन्धकग्रहणे स्त्रैणपुत्र इत्यत्र कस्मान्न भवति, प्रत्ययञित्त्वस्य वृद्धिस्वरयोश्चरितार्थत्वात्, निपातञित्त्वस्य चाचरितार्थत्वात्, पूर्वपदेन वा नञ् विशेष्यत इति अपूर्वपदत्वान्न भविष्यति, एवं च कृत्वाऽनुबन्धोच्चारणमपि न कर्त्तव्यमपूर्वपदत्वादेव पामनपुत्रे न भवष्यति। 'अवक्षेपे तिङीति' अवक्षेपो निन्दा। नञोऽशिति वा नञोऽनिति वा सिद्धे लोपवचनं साकच्कार्थमित्याहुः॥

"तस्मान्नुडचि"॥ 'नञ एव हि स्यादिति'। तस्मिन्निति निर्द्दिष्टे पूर्वस्येति वचनात्। नञश्च नुटि सत्यनिष्टं रूपं स्यात्, नलोपविधानमनजाद्यर्थं स्यात्, तस्माद्ग्रहणे तु सति पञ्चमीनिर्द्देशस्य बलीयस्त्वादुत्तरस्यैव भवति। ननु यदि तत्र एव स्यान्नाचीति नलोपमेव प्रतिषेधेत्, तद्वचनन्तूत्तरपदस्यैव भविष्यति, तस्मादेवं वक्तव्यं नाप्राप्ते नलोपे आरभ्यमाणो नुट् तस्य बाधकः स्यात्, तस्माद्ग्रहणेतु सति निमित्तमेव नुटो नलोपो भवति। अथ नुगिति पूर्वान्त एवायं कस्मान्न कृतः, एवं हि नञ एव स्यादित्येवमपि दोषो न भविष्यति, तत्रायमप्यर्थः, तदोः सः सावित्यत्र तदोरित्यपनीय तोरिति वर्गग्रहणमेव कर्त्तव्यं, परादौ ह्यनेष करोतीत्यत्र नुटो नकारस्यापि प्रसङ्गादशक्यं वर्गग्रहणं तत्राह। 'पूर्वान्ते हीति'। 'ङमुट् प्राप्नोतीति'[1]। नलोपः प्रातिपदिकान्तस्येति नलोपो विधानसामर्थ्यान्न भवतीति भावः। अत्रापि पत्तइदं कर्त्तव्यं नाप्राप्ते नलोपे आरभ्यमाणो नुक् तस्य बाधकः स्यादिति॥

"नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु

१ ङमो ह्रस्वादचि ङमुण्नित्यमिति प्राप्नोतीति मुद्रितमूलपुस्तके पाठः।

प्रकृत्या" ॥ 'नभ्राडिति'। भ्राजभासेत्यादिना क्विप्, व्रश्चादिषत्वं, जश्त्वं डकारः, तस्य वावसानइति पक्षे चर्त्वं टकारः। 'पादि[1]ति शत्रन्तमिति'। तनूनपादुच्यते, अपांनपादित्यादावनपुंसकेऽपि दर्शनादुभेवनस्यत्यादिष्वित्यत्र पातेः क्विपि निपातनात्तुगित्यभिधानाच्चापपाठोऽयं, पादिति क्विबन्तमिति पाठः, शत्रन्तमित्यस्य वानन्तरं नरैर्न मन्तव्यमित्यध्याहार्यम्। 'औणादिकः कप्रत्यय इति'। इगुपधात्किरित्यनेन, कं सुखम्, अकं दुःखं, तद्यत्र नास्ति स नाकः स्वर्गः।

[2]दुःखेन यन्न संभिन्नं न च ग्रस्तमनन्तरम्।
अभिलाषोपनीतं च सुखं स्वर्गपदास्पदम्॥

इति हि पठन्ति। अत्र नपुंसकादित्रये निपात्यमस्तीति ते तथैव ग्राह्याः, इतरेषु तूत्तरपदमात्राणि गृहीत्वा नञ् प्रकृत्येत्येव वाच्यम्, एवं सिद्धे सति समुदायपाठः प्रसिद्ध्युपसंग्रहार्थः, तेन नासत्यावित्याश्विनोरेव भवत्यन्यत्रानसत्या इत्येव, एवमन्यत्रापि यथासम्भवं द्रष्टव्यम्। प्रकृत्येति वचनमुत्तरार्थम् इह तु निपातनादेव सिद्धम्॥

"एकादिश्चैकस्य चादुक्" ॥ एकादिरिति बहुव्रीहिः, आदिशब्दो व्यवस्थावचनः। 'एकान्नविंशतिरिति'। पूर्वं नञो विंशत्यादिभिः समासं कृत्वा पश्चात्तृतीयासमासः कर्त्तव्यः। किमर्थं पुनः पूर्वान्तोऽयमादुक् क्रियते न परादिराडुट् क्रियते, एवमेकस्येत्यागमिनिर्देशार्थं न कर्त्तव्यं भवति, प्रकृतस्य नञ एवागमित्वादित्यत आह। 'पूर्वान्तश्चायमिति'। यरोऽनुनासिकेऽनुनासिको वेत्यत्र न पदान्ताट्टोरनामित्यतः पदान्तग्रहणमनुवर्त्तते, अविघ्नः बध्नातीत्येवमादिषु माभूदिति, परादौ सति दकारः पदान्तो न स्यादिति अनुनासिको न स्यात्, अथानुट् क्रियेत, एवमपि पक्षे दकारश्रवणं न स्यात्तदिदमुक्तम्। 'अनुनासिको विकल्पेन यथा स्यादिति'। किमर्थं पुनरादुक् क्रियते अदुगेव नोच्येत सवर्णदीर्घत्वे तावत् सिद्धम्, अतो गुणइति पररूपत्वं चाकारोच्चारणसामर्थ्यादेव न भविष्यति,

१ पातेः शत्रन्त इति मुद्रितमूलपुस्तके पाठः।
२ सांख्यतत्त्वकौमुद्यां तु यन्न दुःखेन संभिन्नं, तत्सुखं स्वःपदास्पदमिति पाठ उपलभ्यते।

यदि स्याद्गुकमेव विदध्यात्, सवर्णदीर्घत्वं तु यं विधिं प्रत्युपदेशोऽनर्थक इति न्यायाद्भविष्यति। वृत्तिकारेण तु प्रतिपत्तिलाघवार्थमादुगयं व्याख्यातः॥

"नगोऽप्राणिष्वन्यतरस्याम्"॥ 'गमेर्डप्रत्ययइति'। डप्रकरणे अन्यत्रापि दृश्यतइति॥

"सहस्य सः संज्ञायाम्"॥ 'सहयुध्वेति'। युध्यतेः क्वनिप् राजनि युधिकृञः। सहे चेति साऽदेशः। 'उदात्तो निपात्यतइति'। अन्यथा तु किं स्यादित्यत आह। 'उदात्तानुदात्तावेतौ हीति'। सहशब्दे निपाता आद्युदात्ता इति सशब्द उदात्तः, शेषनिघाते हशब्दोऽनुदात्तः, तेनासावुदात्तानुदात्तवान् तस्य स्थाने भवन् सशब्द आन्तर्यतः स्वरितः स्यात्, तन्माभूदेष दोष इति उदात्तो निपात्यते। यद्येवमव्ययीभावेपि तस्यैवोदात्तत्वं श्रूयेत तत्राह। 'स चेति'। अयमभिप्रायः। समासे कृते समासस्वरश्च प्राप्नोति अयं चादेशस्तत्र परत्वादस्मिन्नादेशे उदात्तेऽभिनिर्वृत्ते पुनः प्रसङ्गविज्ञानात्समासस्वरः, स च सति शिष्ट इति तस्यैव श्रवणम्, उदात्तनिपातनस्य तु यत्र पूर्वपदप्रकृतिस्वरत्वं बहुव्रीहितत्पुरुषयोस्तत्रैव श्रवणमिति। 'सेष्टि सपशुबन्धमिति'। अन्तवचनेऽव्ययीभावः॥

"ग्रन्थान्ताधिके च"॥ 'सकलमिति'। कला कालविशेषः, तत्सहचरितो ग्रन्थोपि कला, एवं समुहूर्त्तमित्यत्रापि। ससंग्रहमित्येतत्तु प्रमादाल्लिखितम्, अत्र ह्यव्ययीभावे चाकालइति वक्ष्यमाणेनैव सिद्धः सभावः। 'कालवाचिन्युत्तरपदइति'। कालादयः शब्दा यद्यपि तत्सहचरितग्रन्थपरास्तथाप्यधीतइति पदान्तरप्रयोजनसमधिगम्यत्वाद्ग्रन्थपरत्वं बहिरङ्गमिति कालाश्रयः प्रतिषेध एव स्यादिति मन्यते। 'सद्रोणेति'। तेन सहेति तुल्ययोगइति बहुव्रीहिरयं, तेन वोपसर्जनस्येति विकल्पे प्राप्ते नित्यार्थं वचनम्॥

"द्वितीये चानुपाख्ये"॥ 'अप्रधानो यः स द्वितीय इति'। तत्रैव लोके द्वितीयशब्दस्य प्रयोगात्, स्वामिभृत्ययोर्हि स्वामिनं प्रति भृत्यो द्वितीय इत्युच्यते, न विपर्ययेण, उपाख्यायते इत्यस्य विवरणम्। 'प्रत्यक्षेणोपलभ्यतइति'। घञर्थे कविधानमिति कः कर्मणि। 'साग्निरिति'। पूर्ववद्बहुव्रीहिः, इदमपि नित्यार्थं वचनम्। अग्न्यादय इत्यादिना अनु-

पाख्यत्वं दर्शयति, कपोतश्चेदगारमुपहन्यात्ततश्च कपोतेनार्थिरनुमीयते विद्युद्वात्यययोश्च रक्षः पिशाचं, वर्त्ततइति वार्त्ता ॥

"अव्ययीभावे चाकाले" ॥ 'अकालवाचिनीति' । स्वरूपग्रहणं न भवति ग्रन्थान्ताधिके चेत्यत्र ग्रन्थग्रहणात्, तद्धि समुहूर्त्तमित्यादौ यथा स्यादित्येवमर्थं, यदि चात्र स्वरूपग्रहणं भवति तदा मुहूर्त्तादौ निषेधाभावादनेनैव सिद्धत्वादनर्थकं तत्स्यात् । 'सचक्रमिति' । यौगपद्येऽव्ययीभावः । 'सपुरमिति' । ऋक्पूरब्धूरित्यकारः समासान्तः । 'सहपूर्वाह्णमिति' । साकल्येऽव्ययीभावः ॥

"वोपसर्जनस्य" ॥ उपसर्जनस्येत्यस्य सहशब्दे विशेष्ये सहयुध्वा सहकृत्वेत्यत्रापि स्यात्, अनर्थकञ्च विशेषणं स्यात्, सहशब्दस्य चासत्त्ववाचित्वाद् द्वन्द्वो न सम्भवति, समासान्तरे च सह उपसर्जनमेव तस्मादुत्तरपदेन सन्निधापितस्य समासस्यैवेदं विशेषणं विज्ञायते, तत्राप्यवयवद्वारा समासस्योपर्जनसंज्ञाया अभावात् सर्वत्र च समासे कश्चिदवयव उपसर्जनमेव, उच्यते चेदमुपसर्जनस्येति ततश्च सर्वावयवद्वारा विज्ञायते, तदिदमुक्तम् । 'उपसर्जनसर्वावयव इति' । 'तदवयवस्येति' । उपसर्जनस्येत्यवयवयोगे षष्ठीति दर्शयति । 'सहकृत्वप्रियइति' । वा प्रियस्येति पूर्वनिपातविकल्पः । 'इह बहुव्रीहौ यदुत्तरपदमिति' । उत्तरपदाधिकारात्, सर्वोपसर्जनस्य बहुव्रीहेराश्रयणाच्च तत्सम्बन्धिन्येवोत्तरपदे सहशब्दस्यानन्तरे सभावेन भाव्यमिति भावः । 'तत्परः सहशब्दो न भवतीति' । पूर्वत्र तावन्न भवति, कृत्वशब्देन व्यवधानात्, उत्तरत्रापि सहकृत्वेत्येतदुत्तरपदं न कृत्वशब्दः ॥

"प्रकृत्याशिष्यगोवत्सहलेषु" ॥ प्रकृत्याशिषीत्येतावत्सूत्रं, परिशिष्टं भाष्यवार्त्तिकदर्शनात्सूत्ररूपेण पठितं, नेति वक्तव्ये प्रकृतिवचनं वैचित्र्यार्थम् ॥

"समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु" ॥ 'समानस्येति योगविभाग इति' । अपर आह सहशब्दः सदृशवचनोऽस्ति यथा सदृशः सख्या ससखीति, तस्यायमस्वपदविग्रहो बहुव्रीहिः, समानो धर्मोऽस्य, समानः पक्षोऽस्य, समाना जातिरस्य, वोपसर्जनस्येति सभावः, समानशब्दस्य तु

समानजातीय इत्यादि भवति, योगविभागे तु तस्य नित्यत्वान्नैतत्सिध्यति । अत एव भाष्यवार्त्तिकयोर्योगविभागस्य नोपन्यास इति ॥

"ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु" ॥ 'सज्योतिरिति' । समानं ज्योतिरस्येति बहुव्रीहिः, यस्मिञ्ज्योतिष आदित्ये नक्षत्रे वा उपनिपतितमानस्यास्तमयादनुवर्त्तमानमाशौचं सज्योतिरित्युच्यते, सरूपाणामेकशेषः, स्थानान्ताद्विभाषा सस्थानेनेति-निर्द्देशाद्बहुव्रीहावप्ययं सभावो भवति न तु पूर्वापरप्रथमचरमजघन्यसमानेति प्रतिपदोक्तएव तत्पुरुषे ॥

"चरणे ब्रह्मचारिणि" ॥ चरणशब्दः कठकलापादौ शाखाविशेषे मुख्यः, तदध्यायिषु पुरुषेषु गौणः, तदिह मुख्यो गृह्यते, समानो ब्रह्मचारी सब्रह्मचारीति, तच्चरति तदनुतिष्ठतीत्यर्थः । 'ब्रह्मचारीति' । व्रतइति णिनिः, एवं ब्रह्मचारिशब्दं निरूप्य सब्रह्मचारीशब्दं निर्वक्तुकामः समानशब्दस्यार्थमाह । 'समानस्तस्यैव ब्रह्मणः समानत्वादिति' । 'तस्यैवेति' । पूर्वमुक्तस्य, इतिकरणो हेतौ, यस्माद्ब्रह्मचारिणां समानत्वं तद्विवक्षितं तस्मादयं वक्ष्यमाणसब्रह्मचारिशब्दस्यार्थो भवति, तमेव दर्शयति । 'समाने ब्रह्मणीति' । समाने साधारणइत्यर्थः, एकस्मिन्काले एकेन ब्रह्मणा एकशाखाध्ययनार्थं ययोर्व्रतमादिष्टं तावन्योन्यं सब्रह्मचारिणावित्यर्थः । एतच्च चरणग्रहणाल्लभ्यते, तद्धि चरणे समाने यथा स्यादाकारादौ माभूदित्येवमर्थं कृतम्, एवं चरणे गम्यमानइत्यस्यापि चरणे समानत्वेन गम्यमानइत्ययमर्थो द्रष्टव्यः ॥

"तीर्थे ये" ॥ सतीर्थ्य एकगुरुकः ॥

"विभाषोदरे" ॥ 'यप्रत्ययान्त इति' । पूर्वसूत्रे य इति यकारादेः प्रत्ययस्य ग्रहणं यप्रत्ययोन्ते समीपे यस्य स तथोक्तः, तत्र यदा सभावस्तदा सोदर्यः, यदा तु न तदा समानोदरे शयित इति यत् ॥

"दृग्दृशवतुषु" ॥ 'वतुग्रहणमुत्तरार्थमिति' । समानशब्दे ऽसम्भवात् । 'दृक्षे चेति' । छान्दसमेतदिति केचित्, भाष्ये सदृक्षइत्यनुदाहृतत्वात्तस्मिन्पक्षे क्सप्रत्ययोपि छन्दस्येव ॥

"इदंकिमोरीश्की" ॥ 'इयान्कियानिति'। घस्येयादेशे कृते यस्येति चेतीकारलोपः।'किमिदंभ्यां वो घ इति वतुबिति'। नासतो वतुपो वकारस्य घकारः शक्यो विधातुमिति वतुपोप्यनेनैव विधानमिति भावः ॥

"आ सर्वनाम्नः" ॥ अकारोच्चारणमतो गुणे पररूपत्वं माभूत्, अकारविधानं त्वन्तस्य निवृत्त्यर्थं स्यात्, लोपविधौ तु गौरवं भवति ॥

"विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये" ॥ व प्रत्ययो यस्मात्स वप्रत्ययः। 'विष्वद्र्यङिति'। अञ्चतेः क्विनि लोपे उगिदचामिति नुम्, संयोगान्तलोपः, क्विन्प्रत्ययस्य कुरिति कुत्वं नकारस्य ङकारः। 'अद्रि-सध्र्योरिति'। वार्त्तिकस्य साधारणत्वादिह सध्रिशब्दोपादानम्, अश्व-मञ्चति अश्वाची, अञ्चतेश्चोपसंख्यानमिति ङीप्, अच इत्यकारलोपः, चाविति दीर्घत्वं, विष्वग्पुनक्तीति विष्वग्युक्, सत्सूद्विषेत्यादिना क्विप्। 'विष्वगञ्चनमिति'। ल्युट्, कथं पुनरत्र प्रसङ्गः, यावता उत्तरपदइत्यु-च्यते, न चात्राञ्चतिरुत्तरपदं किं तर्हि ल्युडन्तं, न च तदादिविधिरस्ति, अल्ग्रहणएव तदादिविधिरित्यत आह। 'वप्रत्ययग्रहणमिति'। यदि धातुग्रहणे तदादिविधिर्न स्याद्वप्रत्ययग्रहणमकर्त्तव्यं स्यात्, कृतं तु तदादिविधिं ज्ञापयति। अत्र प्रयोजनमाह। 'तेनेति'। 'अयस्कृत-मिति'। असति तु ज्ञापने अयस्कृदित्यादौ यत्र करोतिमात्रमुत्तरपदं तत्रैव स्यात्। 'विश्वाची च घृताची चेति'। वेदपाठोयं प्रदर्शितः, न तु घृताचीत्युदाहरणं, प्राप्त्यभावात्। उपसंख्याने स्त्रियामित्येतेन नार्थः, पुंस्यपि हि क्वचिदद्र्यादेशो न दृश्यते तस्माद्विष्वञ्चौ प्राणापानाविति। 'कद्रीचीति'। किंशब्दस्य टेरद्र्यादेशः, पूर्ववन्ङीप्लोपदीर्घत्वादि ॥

"तिरसः तिर्यलोपे" ॥ 'यदा ऽस्य लोपो न भवतीति'। अकारस्य लोपे सतीत्ययं त्वर्थो न भवति व्याख्यानात् ॥

"सध मादस्थयोश्छन्दसि" ॥ सधमादो द्युम्नि इति केचिदाहुः। अस्मिन्मन्त्रे द्युम्निरित्यादिकमपां विशेषणं, सधमाद इत्यपि तत्स-मानाधिकरणं शसन्तं, मादयतेः क्विबन्तस्य रूपं, मादः छन्दसि सधादेशो दृश्यते बहुलम्, आत्वा वृहन्तो हरयो युजाना, अर्वागिन्द्रसधमादो

वहन्तु इत्यादावपीति, अपर आह। मदनं मादः, मदो ऽनुपसर्गइत्यपि प्राप्ते छान्दसो घञ्, तेन सह वर्त्ततइति सधमाद इति, रेवतीस्यः सधमादइत्यादौ तु सधमादो यज्ञः, सह माद्यन्ति देवा अस्मिन्निति कृत्वा ॥

"द्व्यन्तरुपसर्गेभ्योऽप ईत्"॥ उदाहरणेषु द्विर्गता आपोऽस्मिन्नित्यादि विग्रहः, ऋक्पूरब्धूरित्यकारः समासान्तः। 'समापन्नामेति'। ईत्वे प्रतिषिद्धे अन्येषामपि दृश्यतइत्यकारस्य दीर्घः, अपर आह। समशब्दस्यात्र प्रयोगः, समा आपोऽस्मिन्निति समापइति। 'अप्शब्दं प्रतीत्यादि'। इह यत्क्रियायुक्ताः प्रादयस्तं प्रति तेषामुपसर्गत्वम्, अप्शब्दश्च न क्रियावचनस्तस्मादस्य प्रादेरन्यत्रोपसर्गत्वं तदुपलक्षणार्थमुपसर्गग्रहणं विज्ञायते॥

"ऊदनोर्देशे"॥ 'अवग्रहार्थमिति'। यत्र समासावयवानां रूपाणि प्रदर्श्यन्ते पदकारैः सो ऽवग्रहः॥

"अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु"॥ उदाहरणेषु विशेषणसमासः। 'गहादिष्वन्यशब्दो द्रष्टव्य इति'। तेषामवृत्त्कृतत्वात्। 'दुगागमो ऽविशेषेणेत्यादि'। छप्रत्यये परतोऽविशेषेण सामान्येन दुक्कर्त्तव्यः कीदृशे छे सकारके कारकशब्दसहिते कारकशब्दे चेत्यर्थः। कारकच्छयोरिति पाठे पूर्वनिपातलक्षणस्यानित्यत्वात्तस्य परनिपातः, अन्येष्वाशीरादिषु सप्तसु षष्ठीतृतीययोर्निष्टस्तेष्वेव प्रतिषेधइत्यर्थः। कथमेतल्लभ्यतइत्याह। 'अस्य चेति'। अषष्ठीतृतीयास्थस्येत्येव सिद्धे द्विर्नञ उपादानं प्रतिषेधस्यानित्यत्वज्ञापनार्थं, व्याख्यानप्रकारश्चायं, शक्यं हि वक्तुं द्विर्नञ उपादानं दार्ढ्यार्थमिति।

"कोः कत्तत्पुरुषेऽचि"॥ उदाहरणेषु कुगतिप्रादयइति समासः॥ 'कूष्ट्रइति'। एतदेव तत्पुरुषग्रहणं ज्ञापकम् अस्मिन्प्रकरणे ऽप्रतिपदोक्तोपि समासो गृह्यतइति, तेन ज्योतिर्जनपदेति सभावो बहुव्रीहावपि भवति। 'त्रावुपसंख्यानमिति'। कत्र्यादिभ्यइति वचनात्सिद्धम्॥

"का पथ्यक्षयोः"॥ अनीषदर्थे आरम्भः। कुत्सितः पन्थाः कापथः। पूर्ववत्समासान्तः। 'काक्षइति'। अक्षशब्देन तत्पुरुषः अक्षिशब्देन बहुव्रीहिर्वा, बहुव्रीहौ सक्थ्यक्ष्णोरिति षच्॥

"ईषदर्थे" ॥ 'कामधुरमिति'। कुगतीति समासः, कुः पापार्थ इत्येतत्तु प्रायिकम् 'काम्लमिति'। ननु चात्र कोः कत्तत्पुरुषे चीति कद्भावः प्राप्नोति अस्य त्वनजादिरवकाशः, तत्राह। 'अजादावपीति' ॥

"विभाषा पुरुषे" ॥ 'अप्राप्तविभाषेयमिति'। ईषदर्थइत्यस्य निवृत्तत्वात्। नन्वेवं सत्युभयत्र विभाषेयं युक्ता, ईषदर्थे प्राप्तत्वादन्यत्र वाप्राप्तत्वादत आह। 'इषदर्थे त्विति'। ईषदर्थे चेत्यस्यावकाशः कामधुरमिति, विभाषा पुरुषइत्यस्यावकाशः कुत्सितः पुरुषः कापुरुषः, ईषत्पुरुष इत्यत्रोभयप्रसङ्गे पूर्वविप्रतिषेधः ॥

"कवञ्चोष्णे" ॥ छन्दस्यन्यत्रापि दृश्यते, न कवादिभ्यो न हि ते पृणन्तीति, कवाशब्दोपि दृश्यते केवलः, कवार्तिर्यदि वोपतिष्ठेतेति ईषत्तियंङित्यर्थः ॥

"पृषोदरादीनि यथोपदिष्टम्" ॥ निरुक्तादिशास्त्रसिद्धानामसमासपदानामुणादयो बहुलमिति सिद्धिरुक्ता, अनेन तु समासपदानां जीमूतवलाहकादीनां सिद्धिरुच्यते, प्रकारवचनोयमादिशब्दइति दर्शयति। 'पृषोदरप्रकाराणीति'। व्यवस्थार्थं त्वादिशब्दे यथोपदिष्टमिनर्थकमिति भावः। प्रकारमाह। 'येष्विति'। 'यथोपदिष्टमिति'। सायामयमव्ययीभाव इत्याह। 'यानियानीति'। दिशिरुच्चारणक्रियः, ार्यं हि वर्णानाह उपदिष्टा इमे वर्णा इति, कैः पुनरुपदिष्टानि, शिष्टैः, शिष्टाः पुनरकामात्मानो यथार्थवेदिनो यथाविहितभाषिणश्च किञ्चिदन्तरेण कस्याश्चिद्विद्यायाः पारगाः यानधिकृत्येदमुच्यते ॥

आविर्भूतप्रकाशानामनुपप्लुतचेतसाम् ।
अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते ॥
अतीन्द्रियानसंवेद्यान् पश्यत्यार्षेण चक्षुषा ।
ये भावान्वचनं तेषां नानुमानेन बाध्यते ॥

इति, यदि तर्हि शिष्टाः शब्देषु प्रमाणं किमष्टाध्याय्या क्रियते, शिष्टपरिज्ञानार्थाष्टाध्यायी, कथमष्टाध्यायीमधीयानो ऽन्यं पश्यत्यनधीयानं, ये चानुविहितास्तान् प्रयुञ्जानं स पश्यति नूनमस्य दैवानुग्रहः स्वाभावो वा यदसौ नाष्टाध्यायीमधीते अथ च यत्र तु विहिताः शब्दा-

स्तान्प्रयुङ्क्ते नूनमन्यानपि अयं जानाति, सैषा शिष्टपरिज्ञानार्थाष्टाध्यायी, जीवनस्य जलस्य मूतो भाजनं जीमूतः यथा कुसूलो धान्यानां, खं बिलं, पिशितं मांसं, बृसी तृणमयमासनम्। 'एवमन्येपीत्यादि'। कष्यश्वमहीशब्देषूपपदेषु सुपि स्थः, सकारस्य तकारः, महीशब्दस्य ह्रस्वः, 'दक्षिणतारमिति'। विशेषणसमासः। 'वाग्वादइति'। कर्मण्यण्। 'षोडश्चेति'। वयसि दन्तस्य दतृ,उगित्त्वान्नुम्,। 'धासु वेति'। उत्वस्यायं विकल्पः, उत्वपक्षे तु ष्टुत्वं नित्यमेव भवति, अत्रोत्तरपदशब्देन धाप्रत्ययोऽभिधीयते पद्यते गम्यतेऽनेनार्थइति पदम्, उत्तरं च तत्पदं च उत्तरपदम्। 'षड्धेति'। न पदान्ताट्टोरनामिति ष्टुत्वप्रतिषेधः। 'नानाधिकरणवाचिनइति'। अर्थगतं बहुत्वं शब्दे समारोप्य धास्विति बहुवचननिर्द्देशः, तेनाधिकरणविचाले चेति विहितस्य धाप्रत्ययस्येदं ग्रहणम्। 'षड्धेति,'। आतोनुपसर्गे कः, स्त्रियां टाप्प्रत्ययः, लाक्षणिकत्वादस्याग्रहणमिति चेत् एवमपि क्विबन्ते प्रसङ्गः। 'नाश्यतइति'। णश अदर्शने ण्यन्तः। 'दभ्यतइति'। दम्भु दम्भे। 'स्वो रोहावेति'। लोडुत्तमद्विवचने। 'वर्णागम इत्यादि'। कौ जीर्यतइति कुञ्जरइत्यत्र नकारस्य वर्णस्यागमः। 'हिनस्तीति'। सिंहइत्याद्यन्तयोर्वर्णयोर्विपर्ययो व्यत्यासः, षोडइत्यत्र षकारस्योकाररूपापत्तिः, वर्णविकारः, पृषोदरइत्यादौ तकारादेर्वर्णस्य विनाशः, यस्य धातोर्योर्थः प्रसिद्धः, तस्मादर्थान्तरेण योगस्तदर्थातिशयेन,योग इत्येतत्पञ्चविधं निरुक्तं निर्वचनप्रकारः, शब्दानां तदन्तेन सूत्रेणोच्यतइति श्लोकार्थः॥

"संख्याविसायपूर्वस्याह्नस्याहनन्यतरस्यां ङौ"॥ 'द्व्यह्नइति'। तद्धितार्थइति समासः, कालाट्ठञ्, तस्य द्विगोर्लुगनपत्यइति लुक्, राजाहःसखिभ्यष्टच्, अह्नोऽह्नएतेभ्य इत्यह्नादेशः। 'द्व्यह्नीति'। विभाषा ङिश्योरित्यल्लोपविकल्पः। 'व्यह्न इति'। प्रादिसमासः, शेषं पूर्ववत्। 'सायाह्नइति'। एकदेशिसमासः, ननु चायं पूर्वापरादिसूत्रे न पठ्यते तत्कथमस्यैकदेशिसमासस्तत्राह। 'एकदेशिसमासइत्यादि'। अह्नोऽह्न एतेभ्य इत्यत्र तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः, अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेरिति

प्रक्रान्ताः संख्यादयः परामृश्यन्ते, यदि च पूर्वादय एवैकदेशिना समस्येरन् सायंशब्दात्परस्याह्नो ह्लादेशः स्यात्, एतेभ्य इत्यनेन तस्यापरामृष्टत्वात्, ततश्च तत्र पूर्वस्याह्नशब्दस्येह ग्रहणमनुपपन्नं स्यात्तस्मात्सायशब्दस्य समासस्तावदनुमीयते, तत्र सामान्येन ज्ञापकमाश्रीयते अन्यस्यापि भवतीति, एवं हि प्रयोजनान्तरमपि सिध्यति तद्दर्शयति । "तेनेति'। स्यतेरन्तकर्मणः सायशब्दो घञन्तो ऽहरवसानवचनः, । 'पूर्वाह्णइति' । समासादि पूर्ववत्, अह्नोदन्तादिति णत्वम् ।

"ढ्रलोपे पूर्वस्य दीर्घोणः" ॥ रेफे अकार उच्चारणार्थः, यद्ययं षष्ठीतत्पुरुषः स्यात् तदाणः पूर्वत्वं नोपपद्यते, लोपस्याभावरूपत्वादयापि बुद्धिपरिकल्पितं पौर्वापर्यमाश्रीयते, एवमपि करणीयमित्यादावप्यनीयरो रेफस्य लोपे परतः पूर्वस्य दीर्घप्रसंगइति तत्पुरुषएवं दोषं दृष्ट्वा कण्ठेकालवद्व्यधिकरणपदो बहुव्रीहिरित्याह। 'ढकाररेफयोर्लोपो यस्मिन्निति'। अत्र लिङ्गं भव्यगेयप्रवचनीयेति निर्देशः । 'लीढमिति'। लिह आस्वादने, निष्ठा, ढत्वधत्वष्टुत्वढलोपेषु रूपं, मिह सेचने, गुह संवरणे, मुह वैचित्ये। पूर्वग्रहणमनर्थकं तस्मिन्निति निर्दिष्टे पूर्वस्येति सिद्धेरित्यत आह । 'पूर्वग्रहणमित्यादि'। सति पूर्वग्रहणे यद्यपि ढलोपे वचनप्रामाण्यादनुत्तरपदेपि स्यात् रलोपे त्वनुत्तरपदे न स्यात्, नीरक्तमित्यादावुत्तरपदस्यापि संभवात् । 'आवृढमिति'। वृहू हिंसायां यस्य विभाषेतीट् प्रतिषेधः, क्वचिदादृढमिति पाठः, तदसत्, सेट्त्वाद्दस्य धातोः दृढः स्थूलबलयोरिति हलोपो निपात्यते । 'आवृढमिति'। वृहूउद्यमने ॥

"सहिवहोरोदवर्णस्य"॥'ऊढइति'। अत्रासत्यवर्णग्रहणे वहत इतिस्थिते न तावदोत्वं ढलोपनिमित्तत्वात्, अत्र पूर्वत्रासिद्धमिति ढत्वादीनामसिद्धत्वात्पूर्वं यजादित्वात्संप्रसारणं तस्मिन्कृते पूर्वत्वे वोकारस्योत्वं प्राप्नोति, भाष्ये त्ववर्णग्रहणं प्रत्याख्यातम्, अन्तरङ्गाणि ढत्वादीनि वर्णाश्रयत्वात् बहिरङ्गं संप्रसारणं प्रत्ययविशेषत्वात्तस्याप्यसिद्धत्वात् पूर्वत्रासिद्धमित्यस्यानुपस्थानं, यद्वा ढलोपस्यौत्वदीर्घविधौ निमित्तत्वेनाश्रयणादत्र विषये ढत्वादीनामसिद्धत्वं नास्ति, ततः प्रागेव संप्रसा-

रणात्परत्वात् ढत्वादिषु कृतेषु वढइतिस्थिते संप्रसारणं च प्राप्नोत्योत्वं च परत्वादोत्वं ततः संप्रसारणं पूर्वत्वं च न पुनरोत्वं, तस्मिन्नेव प्रयोगे कृतत्वात्तदभावे निमित्तसद्भावाद्दीर्घत्वं प्रवर्तिष्यतइति। 'वर्णग्रहणं किमिति'। ओदस्येति वक्तव्यमिति प्रश्नः। 'कृतायामपीत्यादि'। उत्पूर्वाद्वहेर्लुङि तामादिषु सिचि वृद्धौ सलोपढत्वादीनि, तत्रेदानीमसति वर्णग्रहणे मात्रिकस्योच्यमानो दीर्घस्य न स्यात्, नन्ववर्णः सवर्णान् गृह्णातीत्याकारस्यापि ग्रहणं भवति तत्राह। 'तादपि परस्तपरइति'। इदमेव वर्णग्रहणं लिङ्गं तपरस्तत्कालस्येत्यत्र पञ्चमीसमासोप्याश्रीयतइति, तेनैतन्न चोदनीयं सहिवहोरस्यौदित्येवं कस्मान्न कृतमिति॥

"साढ्यै साढ्वा साढेति निगमे"॥ साढेति तृचि रूपमित्यपपाठोयम्, आषाढोऽग्निर्बृहद्वयाः, अषाढमुग्रं सहमानम्, आषाढं युत्सुपृतनासु, अषाढाय सहमानायेत्यादौ निष्ठायामात्वदर्शनात्तस्मान्निष्ठायां रूपमिति पाठः, सूत्रवृत्तौ च साढेति ह्रस्वान्तं छेतव्यं यदि तृजन्तेपि क्वचिदात्वं दृश्यते, तदान्यतरत्सूत्रे इतिकरणस्य प्रकारार्थत्वात्साध्यम्।

"संहितायाम्"॥ अनन्तरैर्योगैरुत्तरपदे कार्यं विधीयते, उत्तरपदं च समासे भवति तत्र नित्यमेव संहितया भवितव्यं, संहितैकपदे नित्येति वचनात्, अवग्रहेपि क्वचित्कार्यं दृश्यते क्वचिन्न, इकः काशे अनूकाशमित्यनु–काशमिति, अष्टनः संज्ञायाम्, अष्टाबन्धुरमित्यष्टा–बन्धुरमिति, अतो न तेष्ववश्यमस्योपयोगइति, यत्रानुत्तरपदे कार्यं विधीयते तदुदाहरति। 'वक्ष्यति ह्यचोतस्तिङ इति'। अत्र हि तिङन्तस्य समासासंभवादुत्तरपदइति न संबध्यते। 'विद्माहित्वेति'। विदेर्लेट्,मस् विदो लटो वा॥

"कर्णे लक्षणस्याविष्टाष्टपञ्चमणिभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य"॥ 'तदिह लक्षणं गृह्यतइति'। तत्रैव लक्षणशब्दस्य प्रसिद्धत्वात् विष्टादिपर्युदासाच्च, दात्रादिशब्दै उपमानात्तदाकारे चिह्ने वर्त्तते॥

"नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ"॥ उपनह्यतइत्युपानत्, संपदादित्वात्कर्मणि क्विप्, न हो धः। 'परीणदिति'। उपसर्गा-

दसमासेपीति णत्वम् । 'नीवृदिति'। नीवृदादौ कर्तरि क्विप्, व्यधेर्ग्रहिज्यादिसंप्रसारणं, 'ऋतीषाहमिति'। पूर्वपदादितिषत्वम् । 'परीतदिति'। अनुदात्तेति लोपस्य क्ङिज्झल्निमित्तत्वात् क्वौ च तदभावादनिमादीनामितीत्यनुनासिकलोपे तुक् ॥

"वनगिर्योः संज्ञायां कोटरकिंशुलकादीनाम्" ॥ 'कोटरावणमिति'। वनं पुरगेतिणत्वम् ॥

"वले" ॥ 'वलच्प्रत्ययो गृह्यतइति'। वक्ष्यमाणेन मतुपा साहचर्यात्, तेन वल संवरणइत्यतः पचाद्यचि यत्प्रातिपदिकं तत्र दीर्घो न भवति। अण इत्येव, भर्तृवलः ॥

"मतौ बह्वचो ऽनजिरादीनाम्" ॥ 'संज्ञायामिति मतोर्वत्वमिति'। यद्यप्युदाहृतेषु मादुपधायाइति वत्वं सिद्धं तथापि संज्ञायामत्रापि परत्वादनेनैव वत्वं युक्तं, प्रत्युदाहरणे च व्रीहिमतीत्यत्रापि नानेन वत्वमित्येतदुपन्यस्तम्, अजिरादिष्वबह्वचां पाठ उपसमस्तार्थः ॥

"इको वहेपीलोः" ॥ ऋषीवहादयः षष्ठीसमासाः, वहशब्दः पचाद्यजन्तः ॥

"उपसर्गस्य घञ्यनुष्ये बहुलम्" ॥ उपसर्गाद्घञो ऽविधानादुत्तरपदाधिकारे ऽप्यत्र तदन्तविधिर्विज्ञायतइत्याह। 'घञन्तउत्तरपदइति'। 'वीमार्गइति'। मृजेर्वृद्धिः, कृत्रिमं, करणेन निर्वृत्तं, पुरुषव्यापाराभिनिर्वृत्तमित्यर्थः। निषीदत्यस्मिन्पापमिति निषादः, हलश्चेति घञ् ॥

"इकः काशे" ॥ 'पचाद्यच्प्रत्ययान्तोयं काशशब्दइति'। न घञन्तः, तत्र पूर्वेणैव सिद्धं, यथा निगमे प्राकाशावध्वर्यवे ददातीति, इको वहेपीलोरित्यत्र पूर्वपदमात्रस्येष्यते, इह तूपसर्गस्य, तेन द्विरिकइत्युक्तम् ॥

"दस्ति" ॥ 'दाइत्येतस्येत्यादि'। अत्र तकारादिशब्दः कर्मधारयः। 'तस्मिन्परतइति'। यस्मिन्विधिस्तदादाविति वचनात्तदादावुत्तरपदे परतइत्यर्थः। दाइत्येतस्य संबन्धी यस्तकारस्तदादावुत्तरपदे दीर्घ इत्येषोर्थो विवक्षितः। 'नीत्तमिति'। ननु चात्र तकार आदिर्न

१ अनुदात्तेत्यादि तदभावादित्यन्तो ग्रन्थः २। ३। पु० नास्ति।

भवति, यस्तावदच उपसर्गात्त इति तकारः सो ऽलोन्त्यस्येत्यन्तस्य क्रियते, योपि दकारस्य खरि चेति तकारः सोप्यस्मिन्दीर्घे कर्त्तव्ये ऽसिद्धोत आह । 'अच उपसर्गात्त इत्यादि' । उच्यते चेदं तकारादावुत्तरपद इति, यदि चर्त्वमसिद्धं स्याद्दीर्घविधिरनर्थकः स्यादत आश्रयात्सिद्धं चर्त्वं तेन तकार आदिरुत्तरपदस्य संभवतीत्यर्थः । यद्यपीत्यनेनैतद्दर्शयति द्वितकारपक्षस्याश्रयणे न किञ्चिद्वक्तव्यमिति । 'सुदत्तमिति' ॥

अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि ।
सुदत्तमनुदत्तं च निदत्तं चेति चेष्यते ॥

इत्यनयेष्ट्यात्र ददादेशः ॥

"छन्दसि च" ॥ 'अष्टाकपालमिति' । आन्महत इत्यत्राष्टनः कपाले हविषीति अष्टागवं शकटमिति च व्युत्पादितम्, इदं तु व्युत्पत्तिविकल्पप्रदर्शनार्थमात्वं वा दीर्घो वेति ॥

"विश्वस्य वसुराटोः" ॥ 'विश्वाराडिति' । विश्वस्मिन्राजत इति सत्सूद्विषेत्यादिना क्विप् । 'यत्रास्यैतदिति' । पदसंज्ञाविषय इत्यर्थः ॥

"ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम्" ॥ मन्त्र इति प्रकृते ऋग्ग्रहणं मन्त्रविशेषप्रतिपत्त्यर्थम्, घ इति स्वरूपग्रहणं न तरप्तमपोः, छन्दसि घशब्दस्यैव दीर्घदर्शनात् । 'उत वाघास्यालादिति' । भार्याया भ्राता स्यालस्ततः पञ्चमी । 'तङिति थादेशस्य ङित्त्वपक्षे ग्रहणमिति' । लोण्मध्यमपुरुषबहुवचनस्य थस्य लोटो लङ्वदित्यतिदेशेन यस्तादेशस्तस्य यदा ङित्त्वं तदा ग्रहणमित्यर्थः । 'शृणोत ग्रावाण इति' । तप्तनप्तनथनाश्चेति तबादेशः, अत्र पित्त्वान्ङित्त्वं नास्ति, तङिति प्रत्याहारग्रहणमिति तु वृत्तौ न क्वापि पाठो दृश्यते, यच्च तत्रोक्तं लोण्मध्यमपुरुषबहुवचनादारभ्य आ महिङो ङकारात्प्रत्याहार इति तदप्ययुक्तम्, असन्निविष्टेन प्रत्याहारायोगात् । 'उरुष्याण इति' । रुष्यतिः कण्ड्वादियगन्तो रक्षति कर्मा लोट्, सेर्हिः, अतो हेरिति लुक्, न इत्यस्य नश्च धातुस्थोरुषुभ्य इति णत्वम् ॥

"इकः सुञि" ॥ सुञिति निपातस्य ग्रहणं तस्य च ञकारोत्रैव विशेषणार्थः, । 'ऊषुण इति' । उकारस्य दीर्घः ॥

"द्व्यचोतस्तिङः" ॥ 'भवतेति'। लोण्मध्यमपुरुषबहुवचनम्। 'वक्षि यक्षीति'। वहेर्यजेश्च लेड्, सिप्, सिब्बहुलं लेटीत्ययं तु विधिर्न भवति, बहुलवचनात्, बहुलं छन्दसीति शपो लुक्, वहेर्ढत्वं, यजेः षत्वं, षढोः कः सि, द्वयोरपि देवानावह यज चेत्यग्निं प्रति भरद्वाजस्य वचनम् ॥

"निपातस्य च" ॥ एवशब्दश्चादिषु पाठान्निपातः, अच्छगत्यर्थवदेष्वित्यच्छशब्दः ॥

"अन्येषामपि दृश्यते" ॥ मन्त्रइति निवृत्तम्, । 'केशाकेशीति'। तत्र तेनेदमित्यादिना बहुव्रीहिः, इच् कर्मव्यतिहारे। 'जलाषाडिति'। छन्दसि सह इति ण्विः, सहेस्साडः स इति षत्वम्। 'पूरुषइति'। पुरुषशब्दस्याद्यचो दीर्घः। 'शुनोदन्तेत्यादि'। तत्र श्वादंष्ट्रइति बहुव्रीहिरन्यत्र तत्पुरुषो बहुव्रीहिर्वा। दंष्ट्रेति ह्रस्वान्तस्य ग्रहणाद्दीर्घान्ते नायं दीर्घो भवतीत्याहुः। अन्ये तु दीर्घान्तमेव पठन्तो ऽविशेषेणेच्छन्ति ॥

"चौ" ॥ 'अञ्चतिर्गृह्यतइति'। चवर्गस्य तु ग्रहणं न भवति व्याख्यानात्। 'दधीचइति'। ननु चान्तरङ्गत्वाद्यणादेशेनैव प्राग्भवितव्यम्, अकारलोपो भस्य विधीयते, भसंज्ञा च यकारादावजादौ च संभवतीति बहिरङ्गः, दीर्घत्वं तु लोपमपेक्षतइति बहिरङ्गमत आह। 'अन्तरङ्गापीति। एवं मन्यते, इह दीर्घश्रुत्या अचश्चेत्युपतिष्ठते, तत्राचा पूर्वपदं विशेष्यते, अजन्तस्य पूर्वपदस्येति, यदि च यणादेशः स्यान्न क्वाप्यजन्तपूर्वपदं स्यात्, प्राच इत्यादावपि पूर्वमेव सवर्णदीर्घत्वप्रसङ्गस्तस्मादन्तरङ्गोपि विधिर्बाध्यतइति, अत्र च लिङ्गं प्रतीच इति निर्द्देशः ॥

"संप्रसारणस्य" ॥ 'अङ्गत एवेत्यादि'। कारीषगन्धिपुत्र इति स्थिते ह्रस्वत्वं च प्राप्नोति अनेन दीर्घत्वं च, तस्यावकाशः, ग्रामणि कुलं, ह्रस्वाभावपक्षे दीर्घस्यावकाशः, पक्षान्तरउभयप्रसङ्गः, यद्यपि ह्रस्वाभावपक्षे सावकाशं दीर्घत्वं तथापि तेन परत्वाद् ह्रस्वो बाध्यते, अथेदानीं दीर्घे कृते पुनः प्रसङ्गः[1] कस्मान्न भवति तत्राह। 'पुनः प्रसङ्गविज्ञानं चेति'।

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां

षष्ठस्याध्यायस्य तृतीयः पादः ॥

१ प्रसङ्गाद्ध्रस्वत्वमिति ४ पु॰ पा॰।

MSS. of the 4th *Pâda* of the 6th *Adhyâya* of this valuable work (काशिकाव्याख्या पदमञ्जरी) not being forthcoming in India, the further printing of the work will be delayed till a MS. of the wanting *Pâda* be received from the India Office Library.

EDITOR.

महार्घस्यास्य काशिकाव्याख्यारूपस्य पदमञ्जरीग्रन्थस्य षष्ठाध्यायचतुर्थपादपुस्तकमेषु देशेषु नोपलभ्यतइति लण्डननगरस्थभारतीयमहापुस्तकालयात् तत्प्राप्तिपर्यन्तमग्रे मुद्रणे विलम्बो भवितेति ।

संशोधकः

उक्त्वा आग्नीध्रे प्रथमं ददाति ततो ब्रह्मण इत्यादितत्तन्नामयोगात् । येषां नाम ते ऋत्विज इति भावः ॥ ३६ ॥

उक्त्वा यजमानत्वं तेषां दीक्षाविधानात् ॥ ३७ ॥

उक्तनियमे साधकान्तरमाह । उक्त्वेति । सत्रे ये ऋत्विजः ते यजमाना इति वचनेन ऋत्विक्षु यजमानत्वमुक्त्वा अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयतीति तेषां षोडशानामेव दीक्षाविधानात् । यदि चमसाध्वर्युषु ऋत्विक्त्वं तर्हि तत्रापि यजमानधर्मस्य दीक्षाया अतिदेशः स्यादिति भावः ॥ ३७ ॥

ऋत्विजां स्वामिसप्तदशत्वम् । अधि० १८ ।

स्वामिसप्तदशाः कर्मसामान्यात् ॥ ३८ ॥

*ज्योतिष्टोमे साप्तदश्यं स्वामिना पूरणीयं न सदस्येनेति सिद्धान्तमाह । स्वामीति । कर्मसामान्यात् कर्मकर्तृत्वेन सादृश्यात् । उभयोरपि विहितकर्मकर्तृत्वादिति भावः† ॥ ३८ ॥

आध्वर्यवादिषु अध्वर्य्वादीनां कर्तृत्वनियमः । अधि० १९ ।

ते सर्वार्थाः प्रयुक्तत्वादग्नयश्च स्वकालत्वात् ॥ ३९ ॥

ये ऋत्विक्पदवाच्याः ते सर्वार्थाः स्वस्वेच्छया सर्वक्रियाकर्तारः प्रयुक्तत्वाद् भृत्या नियोजितत्वात् । एवमग्नयः गार्हपत्यादयः सर्वक्रत्वर्थाः स्वकालत्वात् स्वतन्त्रत्वाद् अनारभ्याधीतत्वादिति यावत् । एवं पूर्वः पक्षः‡ ॥ ३९ ॥

---

* कस्यां चिच्छाखायां सदस्यस्यास्याम्नानात्तस्यैव सप्तदशर्त्विक्त्वमिति पूर्वपक्षोऽत्रानुसंधेयः ।

† क्रियां विना ऋतुयजननिमित्त ऋत्विक्शब्दस्सदस्ये न प्रवर्तते । क्रियानुष्ठानं तु विध्यभावात्तस्य नास्तीति भावः ।

‡ "अग्निषु चिन्ता, ते ह्यनारभ्यवादेन यदाहवनीये जुहोतीत्यादिना होमार्थतया विहितास्ते किं प्रकृत्यर्था उत वैकृतानामप्यामनहोमादीनां साधारणा इति । पर्णतादिवत् प्रकृत्यर्थत्वं मन्यमानस्योत्तरम्, अग्नयश्च । सर्वार्था इत्यनुवर्तते । तदनुवृत्त्यर्थं चान्तरा सूत्रकरणम् । स्वकालत्वात् स्वतन्त्राम्नानादप्रकरणाधीतत्वादित्यर्थः । न चात्र द्विरुक्तिदोषः । प्रकृतिसमकालमेव विकृतावप्युपदिष्टत्वाद्धोमस्य । यत्र तु यागमात्रे चोदिते प्रकृतित एव चतुरवत्तं जुहोतीत्येतदतिदेशात्प्राप्यमाणं प्रतीक्षितव्यं तत्र पर्णमयीन्यायः । उपदिष्टे तु वैकृतेष्वपि होमेषु समानमेवाग्निविधानम्" इति शास्त्रदीपिकायां स्थितम् । इतोऽधिकविचारो वार्त्तिके द्रष्टव्यः ।

तत्संयोगात् कर्मणो व्यवस्था स्यात् ॥ ४० ॥

अग्नीनां सर्वार्थत्वं स्वीकृत्य कर्मकर्तृनियममाह सिद्धान्ती । तदिति । तत्संयोगाद् आध्वर्यवं हौत्रमितिसमाख्यासंयोगात् कर्मणः कर्तृत्वे व्यवस्था स्यात् । न स्वेच्छया ॥ ४० ॥

*संयोगस्यार्थवत्त्वात् ॥ ४१ ॥

ननु प्रकरणेनर्त्विजो गृहीताः समाख्यया दुर्बलया कथं बाधस्तत्राह । समिति । संयोगस्य समाख्यानयोगस्यार्थवत्त्वात् फलवत्त्वादन्यथा समाख्या व्यर्थैव स्यात् । आनर्थक्यप्रतिहतानां विपरीतं बलाबलमिति भावः ॥ ४१ ॥

समाख्याप्राप्तकर्तृत्वस्य क्व चिद्बाधः । अधि० २० ।

तस्योपदेशसमाख्यानेन निर्देशः† ॥ ४२ ॥

मैत्रावरुणकर्तृकप्रैषादीनां हौत्रमिति समाख्यया होतृकर्तृकत्वमिति बहिः पूर्वपक्षे सिद्धान्तमाह । तस्येति । तस्य उक्तस्य उपदेशसहितेन मैत्रावरुणः प्रेष्यति चानु चाहेत्युपदेशसहितेन हौत्रमिति समाख्यानेन मैत्रावरुणकर्तृकत्वनिर्देशः व्यवस्था ॥ ४२ ॥

तद्वच्च लिङ्गदर्शनम् ॥ ४३ ॥

ननु समाख्याया नियामकत्वमसिद्धं, हौत्रमित्यादिः समाख्या तस्मिन्कर्मणि पक्षे प्राप्तमनुवदतीत्याशङ्कायां समाख्याया नियामकत्वे लिङ्गं दर्शयति । तद्वदिति । तद्वत् प्रकरणादिवद् नियामकस्य लिङ्गस्य दर्शनं होतुः प्रातरनुवाकमनुब्रुवत उपश्रृणुयादिति समाख्यया प्राप्तं प्रातरनुवाकपाठकर्तृत्वं नित्यतया ऽनुवदति ॥ ४३ ॥

समुच्चितयोरनुवचनप्रैषयोर्मैत्रावरुणकर्तृकत्वम् । अधि० २१ ।

प्रैषानुवचनं मैत्रावरुणस्योपदेशात् ॥ ४४ ॥

अनेन पूर्वोक्तवचनेन मैत्रावरुणः प्रेष्यतीत्यनेन सर्वानुवचनेषु

---

* पूर्वसूत्रशेषतयैवास्य भाष्ये वार्तिके च पाठः ।

† "तदिदं समाख्याविनियोगस्यैकातिप्रसङ्गनिवारणेन शेषीभूतं सूत्रं नाधिकरणान्तरम् । अत एव तस्यैव लिङ्गं पश्चादुच्यते प्रातरनुवाके होतृदर्शनादिकम्" इति शा० दी० ।

सर्वप्रैषेषु तत्कर्तृत्वं विधीयतउत यत्रानुवचनएव प्रैषस्तत्कर्तृत्वमिति संशये पूर्वपक्षमाह । प्रैषेति । प्रैषानुवचनमात्रं मैत्रावरुणस्य उपदेशाद्दुक्तवचनात् ॥ ४४ ॥

पुरोनुवाक्याधिकारो वा प्रैषसन्निधानात् ॥ ४५ ॥

सिद्धान्तमाह । पुरो इति । पुरोनुवाक्यायां प्रैषरूपायां च अधिकारो मैत्रावरुणस्य प्रैषसन्निधानात् । अनु चाहेत्यस्य प्रैषसन्निधानात् । अयं भावः । प्रेष्यति चानु चाहेति चकारसहितेनाख्यातान्तद्वयेन प्रैषसहितानुवचनं लक्षयित्वा तत्र मैत्रावरुणकर्तृकत्वं विधीयते, केवलं प्रैषे केवलानुवचने न। तथा सति विधेयभेदे वाक्यभेदप्रसङ्गादिति भावः ॥ ४५ ॥

प्रातरनुवाके होतृदर्शनात् ॥ ४६ ॥

साधकान्तरमाह । प्रातरिति । अनुवचनरूपे प्रातरनुवाके होतृकर्तृकत्वस्य सिद्धतया कथनस्य पूर्वाधिकरणे दर्शितत्वात् ॥ ४६ ॥

चमसहोमे ऽध्वर्योः कर्तृत्वम । अधि॰ २२ ।

चमसांश्चमसाध्वर्यवः समाख्यानात् ॥ ४७ ॥

चमसान् चमसाध्वर्यवो जुहुयुरुताध्वर्युरिति संशये पूर्वपक्षमाह । चमसानिति । चमसान् चमसाध्वर्यवो जुहुयुः । कुतः, चमसाध्वर्यव इति तेषां समाख्यानात् ॥ ४७ ॥

अध्वयुर्वा तन्न्यायत्वात् ॥ ४८ ॥

सिद्धान्तमाह । अध्वर्युरिति । अध्वर्युरेव जुहुयात् । अध्वर्योः आध्वर्यवसमाख्यया इतरकर्मप्राप्तिः येन तन्न्यायत्वाच् चमसाध्वर्युसमाख्या ऽध्वर्युसमाख्यामुपजीव्य प्रवर्तते अतः तस्य बाधने असमर्थमिति भावः ॥ ४८ ॥

चमसे चान्यदर्शनात् ॥ ४९ ॥

उक्तार्थे लिङ्गमप्याह । चमसेति । चमसे चमसहोमे अन्यस्य चमसाध्वर्योरन्यस्य दर्शनं लिङ्गम् । चमसांश्चमसाध्वर्यवे प्रयच्छति तान् स वषट्कर्त्रे हरतीति, यः प्रयच्छति स होमकर्तेति ज्ञायते ॥ ४९ ॥

अशक्तौ ते प्रतीयेरन् ॥ ५० ॥

चमसाध्वर्योरपि होमकर्तृत्वं क्व चिदस्तीत्याह । अशक्ताविति । अशक्तौ शुक्रामन्थिग्रहप्रचारे व्यापृतत्वाच्चमसहोमे अशक्तौ ते चमसाध्वर्यवः होमे प्रतीयेरन् ॥ ५० ॥

श्येनवाजपेययोरध्वर्य्वादिसर्वगणकर्तृकत्वम् । अधि ० २३ ।

वेदोपदेशात् पूर्ववद्वेदान्यत्वे यथोपदेशं स्युः ॥ ५१ ॥

श्येनयागः सामवेदे पठितोऽस्ति । तत्रोद्गातृगणस्य कर्तृत्वमुत षोडशानामपीति संशये पूर्वपक्षमाह । वेदेति । वेदे सामवेदे उपदेशात् पाठात् सामवेदस्यौद्गात्रमिति समाख्यानात् पूर्ववत् पूर्वाधिकरणे आध्वर्यवसमाख्यया चमसहोमादावध्वर्युकर्तृकत्ववद् वेदान्यत्वे अन्यवेदेऽपि यथोपदेशं यथा समाख्या तथैव स्युः । उद्गातृगणकर्तृक एव श्येनयाग इति पूर्वपक्षनिष्कर्षः ॥ ५१ ॥

तद्ग्रहणाद्वा सधर्मा स्यादधिकारसामर्थ्या-त्सहाङ्गैरव्यक्तः शेषे ॥ ५२ ॥

सिद्धान्तमाह । तदिति । अङ्गैः स्वाङ्गैः सह प्रकृतौ दीक्षणीयाद्यङ्गेषु अध्वर्य्वादिकर्तृकत्वादिरूपाणि यान्यङ्गानि तैः सह श्येने अङ्गानां दीक्षणीयादीनामनुष्ठानम् । अधिक्रियतेऽनेनेत्यधिकारः चोदकशास्त्रं तस्य सामर्थ्यात् । ननु चोदकशास्त्रस्य श्येने प्रवृत्तिर्मास्त्वत आह । तद्ग्रहणाद् दीक्षणीयातिथ्यादीनां ग्रहणात् तदर्थं चोदकशास्त्रस्य प्रवृत्तौ तेन प्रवृत्तौ दीक्षादिकर्मभिः सह तत्तत्कर्तृकत्वानामपि प्रवेशः । शेषे चोदकशास्त्रादप्राप्तकर्मणि यथा श्येने कण्टकैर्वितुदन्तीति, तत्र चोदकशास्त्राप्रवृत्तौ अव्यक्तः समाख्या प्रवर्तताम् ॥ ५२ ॥

इति जैमिनिसूत्रवृत्तौ तृतीयस्य सप्तमः पादः ।

परिक्रयस्य स्वामिकर्मत्वम् । अधि ० १ ।

स्वामिकर्म परिक्रयः कर्मणस्तदर्थत्वात् ॥ १ ॥

ऋत्विग्भ्यो दक्षिणादानादिरूपः परिक्रयः अध्वर्युकर्तृकः यजुर्वेदपठितत्वाद् इति बहिः पूर्वपक्षे सिद्धान्तमाह । स्वामीति । परिक्रयः स्वा-

मिकर्म कर्मणः फलार्थत्वात् । अयं भावः । येन परिक्रीतो यत्कर्म करोति तत्फलं परिक्रेतुरिति लोके गृहनिर्माणादौ दृष्टं तद्वदिहापि फलप्राप्तये यजमानेनैव कर्तव्यमिति ॥ १ ॥

वचनादितरेषां स्यात् ॥ २ ॥

अनड्वान् होत्रे देय इत्यत्र वचनादित्याह । वचनादिति । इतरेषामृत्विजाम् ॥ २ ॥

वपनादिसंस्काराणां याजमानत्वम् । अधि० २ ।

संस्कारास्तु पुरुषसामर्थ्ये यथावेदं व्यवतिष्ठेरन् ॥ ३ ॥

केशश्मश्रुवपनम् अञ्जनाभ्यञ्जनादि अध्वर्योर्यजमानस्य वेति संशये पूर्वपक्षमाह । संस्कारा इति । संस्कारा दर्शिताः कर्मवत् स्तोत्रशस्त्रादिवत् । यथावेदं यस्मिन् वेदे या समाख्या तया व्यवतिष्ठेरन्नियम्येरन् । ननु ऋत्विक्षु संस्कारो निष्फलस्तत्राह । पुरुषसामर्थ्ये अनुष्ठानयोग्यताजनने उपयुज्यतइति शेषः ॥ ३ ॥

याजमानास्तु तत्प्रधानत्वात् कर्मवत् ॥ ४ ॥

सिद्धान्तमाह । याजमाना इति । याजमानाः यजमानसंबन्धिनः ते संस्काराः तत्प्रधानत्वात् संस्काराणाम्भोक्तृत्वप्रधानत्वात् तज्जनकत्वादिति यावत् । कर्मवद् यथा प्रधानभूतस्त्यागः यजमाने तद्वत् । अयं भावः ऋत्विङ्निष्ठकर्मकर्तृत्वसंपादनस्य लोकसिद्धतया न कथम्भावाकाङ्क्षा, यजमाननिष्ठस्वर्गभोक्तृत्वं कथं संपादयेदित्यलौकिकत्वादस्त्याकाङ्क्षा ऽतस्तदर्था एते, संस्कारसंस्कृतआत्मनि सति भोक्तृत्वमिति ॥ ४ ॥

व्यपदेशाच्च ॥ ५ ॥

तमभ्यनक्ति शरेषीकयेति परस्मैपदस्य व्यपदेशाद् निर्देशाद् अध्वर्युकर्तृकाञ्जनं यजमानकर्मकमिति स्पष्टम् ॥ ५ ॥

गुणत्वे तस्य निर्देशः ॥ ६ ॥

कर्म द्विविधं प्रधानरूपं गुणरूपं च । तल्लक्षणानि द्वितीयाध्याये पठितानि । तयोर्मध्ये प्रधानकर्मण्येव समाख्यया व्यवस्था इह तु पुरुष

प्रति गुणत्वेन निर्देशः । अतो ऽपि यजमानस्येत्याह । गुणेति । तस्य संस्कारस्य निर्देशः गुणत्वे पर्यवस्यति ॥ ६ ॥

चोदनाप्रतिभावाच्च ॥ ७ ॥

चोदनायाः स्वर्गकामो यजेतेतिचोदनागम्यापूर्वस्य प्रतिभावाद् यजमानस्य सन्निकृष्टत्वाच्च । यत्रापूर्वं तत्र संस्कार इत्यपूर्वसन्निकर्षो यजमाने चेद्भवतीति भावः ॥ ७ ॥

अतुल्यत्वादसमानविधानाः स्युः ॥ ८ ॥

ननूक्तयुक्त्या यजमानस्य, समाख्यया ऽध्वर्यारिति द्वयोः किं न स्यात्तत्राह । अतुल्यत्वादिति । संस्काराः ऋत्विग्यजमानयोः तुल्यविधाना न स्युः । अतुल्यत्वाद् ऋत्विक्तु भोक्तृत्वाभावेनातुल्यत्वात् ॥ ८ ॥

तपसो याजमानत्वम् । अधि० ३ ।

तपश्च फलसिद्धत्वाद् लोकवत् ॥ ९ ॥

ज्योतिष्टोमे त्र्यहं नाश्नातीत्यनशनरूपं तपः श्रूयते । इदं तपो ऽपि यजमानपापक्षयद्वारा फलभोक्तृत्वसिद्धिर्यस्मात्तत्त्वाद् लोकवत् । लोके कृच्छ्राद्यनुष्ठाने प्रथमं दुःखं पश्चात्सुखं तद्वत् ॥ ९ ॥

वाक्यशेषश्च तद्वत् ॥ १० ॥

उक्तार्थे संमतिमाह । वाक्येति । उक्तविधिरूपवाक्यशेष. अर्थवादः, यदा वै पुरुषे न किं चनाचं भवति तदा ऽस्य चक्षुर्नश्यति अथ मेध्यतम इति । तद्वत् । उक्तमेवार्थमाह ॥ १० ॥

वचनादितरेषां स्यात् ॥ ११ ॥

यत्र, ऋत्विजः एतां रात्रिमुपवसन्तीति वचनं तत्र ऋत्विजामित्याह । वचनादिति ॥ ११ ॥

लोहितोष्णीषतादीनां सर्वर्त्विग्धर्मत्वम् । अधि० ४ ।

गुणत्वाच्च वेदे न व्यवस्था स्यात् ॥ १२ ॥

श्येने, लोहितोष्णीषा ऋत्विजः प्रचरन्तीति । इदं सामवेदे पठितत्वाद्

वेदे सामवेदे स्थितस्यापि व्यवस्था ऋत्विक्पदसंकोचो न स्यात् । अंग-
प्रधानमङ्गावृत्तिन्यायस्यैव प्रवृत्तिरितिभावः ॥ १२ ॥

वृष्टिकामनाया याजमानता । अधि० ५ ।

तथा कामो ऽर्थसंयोगात् ॥ १३ ॥

यदि कामयेत वर्षुकः पर्जन्यः स्यादिति नीचैः सदो मिनुया-
दिति श्रुता कामना ऽध्वर्योर्यजमानस्य वेति संशये समाख्यया ऽध्वर्यो-
रिति बहिः पूर्वपक्षे सिद्धान्तमाह । तथेति । तथा तपोवत् । कामः
यजमानस्य अर्थेन साङ्गयागफलेन संबन्धात् । सर्वं फलं यजमान-
स्यैव ॥ १३ ॥

व्यपदेशादितरेषां स्यात् ॥ १४ ॥

यत्र क्व चिदुद्गाता ऽऽत्मने यजमानाय वा यं कामं कामयेत्तमा-
गायतीति व्यपदेशः निर्देशः तत्रेतरेषामृत्विजाम् ॥ १४ ॥

आयुर्दादिमन्त्रपाठस्य याजमानत्वम् । अधि० ६ ।

मन्त्राश्चाकर्मकरणास्तद्वत् ॥ १५ ॥

आयुर्दा अग्ने ऽस्यायुर्मे देहीत्यादयो ऽकर्मकरणाः क्रियाविशेषस्य
अनुष्ठेयस्य अस्मारकाः ते तद्वत् । इच्छावद् याजमाना इति सिद्धा-
न्तः* ॥ १५ ॥

विप्रयोगे च दर्शनात् ॥ १६ ॥

साधकान्तरमाह । चेति । विप्रयोगे प्रवासे दर्शनात् । प्रवासे
इहैव सन् तत्र सन्तं त्वा ऽग्ने इति प्रवासे लिङ्गेन विनियोगः श्रूयते । न
हि प्रवासे ऽध्वर्युरस्ति । अतः यजमानस्यैवेति सिद्धान्तन्यायेन ईदृशा
मन्त्राः सर्वे ऽपि यजमानेनैव पाठ्या नाध्वर्युणेति सिद्धम् ॥ १६ ॥

द्व्याम्नातस्योभयप्रयोज्यत्वम् । अधि० ७ ।

द्व्याम्नातेषूभौ द्व्याम्नानस्य अर्थवत्त्वात् ॥ १७ ॥

दर्शपूर्णमासयोः स्रुव्यूहनमन्त्रः वाजस्य मा प्रसवेनेत्यादिः
आध्वर्यवकाण्डे यजमानकाण्डे च द्विवारमाम्नातः । तत्राध्वर्युयजमा-

* समाख्यया ऽध्वर्योर्मन्त्रपाठो युक्त इति पूर्वपक्षो ऽत्रानुसंधेयः ।

नाभ्यां पठनीय इति सिद्धान्तमाह । द्व्याम्नातेष्विति । द्व्याम्नातेषु द्विवारमाम्नातेषु उभौ पाठकर्तारौ द्विवारमाम्नानस्य सार्थकत्वात्* ॥ १७ ॥

ज्ञातस्यैव वाचयितव्यत्वम । अधि० ८ ।

ज्ञाते च वाचनं न ह्यविद्वान् विहितोऽस्ति ॥ १८ ॥

वाजपेये †क्लृप्तीर्यजमानं वाचयतीति । अत्राज्ञाने वाचनं सफलमतः एतदज्ञानी यजमानोऽत्र ग्राह्य इति बहिः पूर्वपक्षे सिद्धान्तमाह । ज्ञातइति । अविद्वान् यजमानः न विहितोऽस्ति अतः ज्ञातस्याप्यदृष्टार्थं वाचनमिति भावः ॥ १८ ॥

द्वादशानां द्वन्द्वानामाध्वर्यवत्वम । अधि० ९ ।

यजमानसमाख्यानात् कर्माणि याजमानं स्युः ॥ १९ ॥

दर्शपूर्णमासे याजमानकाण्डे श्रूयते, वत्सं चोपावसृजत्युखां चाधिश्रयत्यव च हन्ति दृषदौ च समाहन्त्यधि च वपते कपालानि चोपदधाति पुरोडाशं चाधिश्रयत्याज्यं च स्तम्बयजुश्च हरत्यभि च गृह्णाति वेदिं च परिगृह्णाति पत्नीं च सन्नह्यति प्रोक्षणीश्च आसादयत्याज्यं चैतानि वै द्वादश द्वन्द्वानीति। याजमानकाण्डे श्रुतत्वादिमानि यजमानकर्तृकाणीति पूर्वपक्षमाह । यजमानेति । सूत्रार्थः स्पष्टः ॥ १९ ॥

अध्वर्युर्वा तदर्थो हि न्यायपूर्वं समाख्यानम् ॥ २० ॥

सिद्धान्तमाह । अध्वर्युर्वेति । एतान्यध्वर्युः कुर्यात् । हि यतः तदर्थो उक्तपदार्थानुष्ठानार्थं, क्रीत इति शेषः । ननु अध्वर्युसमाख्या व्यापिका यजमानसमाख्या व्याप्या तया निरवकाशत्वाद् आध्वर्यवसमाख्याप्राप्तमिष्वध्वर्युकर्तृकत्वं बाध्यते इत्यत्राह । न्यायपूर्वं न्यायाविरुद्धं समाख्यानं वस्तूनि प्रापयति । इह तु अङ्गगुणविरोधे च तादर्थ्यादिति‡न्यायविरोधः । तथा हि एषां पदार्थानामाध्वर्यवकाण्डे पठितत्वात् पदा-

* अध्वर्युयजमानयोः पाठस्याभिप्रायो भिन्नः । अनेन मन्त्रेण प्रकाशितमर्थमनुष्ठास्यामीत्यध्वर्योरभिप्रायः । अत्र न प्रमदिष्यामीति यजमानस्येति वार्त्तिके विस्तरः ।

† "आयुर्यज्ञेन कल्पतामित्यादयो मन्त्राः क्लृप्तयः" इति माधवः ।

‡ अयं न्यायः द्वादशाध्याये द्वितीयपादे नवमाधिकरणे उक्तः ।

र्येष्वध्वर्युकर्तृकत्वं प्राप्तम् । यजमानकाण्डे द्वादश द्वन्द्वानि य एवं संपाद्य यजतइति द्वन्द्वतासंपादनं तत्काण्डपाठाद् यजमानकर्तृकम् । द्वन्द्वतासंपादनं द्वयोर्द्वयोरव्यवहितत्वसंपादनम् । न हि एकेन क्रियाद्वयानुष्ठानमन्येनाव्यवधानसंपादनं संभवत्यतः उभयमप्येककर्तृकं संपाद्यम् । तत्र पदार्थाः प्रधानभूताः तत्कर्तृत्वं प्रधानधर्मः । अव्यवधानं पदार्थधर्मः तत्कर्तृत्वमङ्गधर्मः । अन्यतरकर्तृत्वबाधे प्राप्ते अङ्गगुणत्वाद्यजमानकर्तृत्वस्यैव बाधः स्यात् । यदि विपरीतं तदा न्यायविरोधः स्यादिति भावः ॥ २० ॥

होतुराध्वर्यवकरणमन्त्रानुष्ठातृत्वम् । अधि० १० ।

विप्रतिषेधे करणं समवायविशेषादितरमन्यस्तेषां यतो विशेषः स्यात् ॥ २१ ॥

कुण्डपायिनामयने यो होता सोऽध्वर्युरिति होतर्येव अध्वर्युकार्यकारित्वं विहितम् । प्रकृतौ यूपपरिव्याणसमये युवा सुवासा इति होत्रा पठनीयो मन्त्रः परिवीरसीत्यध्वर्युणा पठ्यमानो मन्त्रः । उभौ चात्रातिदेशेन प्राप्तौ । अत्र कर्तुरशक्त्या युगपन्मन्त्रद्वयपाठासंभवाद्धोत्रा को वा मन्त्रः पठनीय इति संशये परिधौ पशुं नियुञ्जीतेत्यत्र परिधिधर्मान् स्वीयान् सत्वकृत्वादीन् रचितुमागन्तुकाष्टाश्रीकरणलोपन्यायेन होत्रा स्वीयमन्त्रः युवा सुवासा इत्येव पठितव्यो, नागन्तुकः परिवीरसीति बहिः पूर्वपक्षे सिद्धान्तमाह । विप्रतिषेधइति । विप्रतिषेधे उक्तरीत्या विरोधे करणमध्वर्युमन्त्रं ब्रूयात् । समवाये प्रत्यक्षेण यो होतेतिवचनविधेयत्वरूपसंबन्धे विशेषात् । आनुमानिकचोदकशास्त्रसंबन्धात्प्राबल्यरूपविशेषात् । तथाऽपि आनुमानिकशास्त्रस्यापि नात्यन्तं बाध इत्याह । इतरं चोदकशास्त्रप्राप्तमन्यः होतृगणसंबन्धी मैत्रावरुण एव पठेत् । यतः होतुः मैत्रावरुणे अच्छावाकादिभ्यः विशेषः होतृसामीप्यं गणे द्वितीयत्वात्स्यादतः ॥ २१ ॥

प्रैषप्रैषार्थयोः पृथक्कर्तृकत्वम् । अधि० ११ ।

प्रैषे च पराधिकारात् ॥ २२ ॥

दर्शपूर्णमासे प्रोक्षणीरासादय इध्माबर्हिरुपसादय स्रुवं स्रुचश्च संमृड्ढि पत्नीं संनह्याज्येनोदेहीति प्रैषस्य प्रैषार्थस्य च कर्ता एक एवे

स्यात् । उभयोरेकसमाख्यापाठादिति बहिः पूर्वपक्षे सिद्धान्तमाह । प्रैष इति । प्रैषे कर्ता तदर्थकर्तुः अन्यः पराधिकारात् परविषयत्वस्य मध्यमपुरुषघटितत्वेन स्वभावसिद्धत्वात्* ॥ २२ ॥

प्रैषप्रैषार्थयोः यथाक्रममाध्वर्यवाग्नीध्रत्वम् । अधि० १२ ।

अध्वर्युस्तथालिङ्गदर्शनात् ॥ २३ ॥

एवं प्रैषतदर्थयोः कर्तृभेदे सिद्धे अध्वर्युः प्रैषार्थकर्तेति पूर्वपक्षमाह । अध्वर्युरिति । अध्वर्युः प्रैषार्थकर्ता स्यात् । तथालिङ्गदर्शनात् प्रैषोच्चारणसमये, वज्रो वै स्फ्यः यदन्वञ्चं धारयेत् । वज्रेणाध्वर्युं क्षिण्वीतेति शाखान्तरे यस्य हस्ते स्फ्यः स प्रैषकर्तेति ज्ञायते । इदं लिङ्गम् ॥ २३ ॥

गौणो वा कर्मसामान्यात् ॥ २४ ॥

सिद्धान्तमाह । गौण इति । आग्नीध्रे प्रैषार्थकर्तरि अध्वर्युशब्दो गौणः । यजुर्वेदविहितप्रैषार्थकर्तृत्वेन अध्वर्योः साक्षात्परम्परासाधारणकर्तृत्वेन प्रैषे साक्षात् कर्तृत्वं प्रैषेण प्रेरिताग्नीध्रकृते प्रैषार्थे प्रयोजककर्तृत्वमिति आध्वर्यवमितिसमाख्याप्राप्तं कर्मसामान्यकर्तृत्वमबाधितमतः कर्मसामान्यात् कर्मसामान्यकर्तृत्वोपपत्तेः आग्नीध्रः प्रैषार्थकर्ता आग्नीध्रेणान्वञ्चधारणे अध्वर्युक्षयलिङ्गमध्वर्यु-प्रैषे ऽपि न विरुध्यतइति भावः ॥ २४ ॥

करणमन्त्रेषु स्वामिफलस्याशासितव्यत्वम् । अधि० १३ ।

ऋत्विक्फलं करणेष्वर्थवत्त्वात् ॥ २५ ॥

†ममाग्ने वर्चो विहवेष्वस्त्वितिप्रभृतिभिः प्रार्थ्यमानं फलमध्वर्योरिति पूर्वपक्षमाह । ऋत्विगिति । ऋत्विजः अध्वर्योः फलं करणेषु मन्त्रेषु अर्थवत्त्वात् । ममेत्यस्य शक्त्या ऽर्थसंभवादन्यथा लक्षणा स्यादिति भावः ॥ २५ ॥

स्वामिनो वा तदर्थत्वात् ॥ २६ ॥

सिद्धान्तमाह । स्वामिन इति । तदर्थत्वात् साङ्गफलस्य यजमानार्थत्वात्‡ ॥ २६ ॥

* "न च प्रोक्षणासादनादीनामध्वर्युकर्तृकत्वाभावे ऽपि समाख्याविरोधस्तदवस्थ एवेति वाच्यम् । प्रैषद्वारा प्रयोजककर्तृत्वे ऽपि तदविरोधाद्" इति शङ्कासमाधाने जैमिनीयन्यायमालायां स्थिते । विस्तरस्तु वार्त्तिके द्रष्टव्यः ।

† विशिष्टं हवनं येषां यज्ञानां ते विहवाः । तेषु वर्चस्तेजसोपलक्षितं यत्फलं तन्ममास्त्वित्यनेन लिङ्गेन मन्त्रमुच्चारयितुरध्वर्योस्तत्फलमिति माधवः ।

‡ दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यात्मनेपदश्रुत्या साङ्गप्रधानफलस्य यजमानगामित्वप्रतीतेरिति भावः ।

लिङ्गदर्शनाच्च ॥ २७ ॥

लिङ्गदर्शनादिति । यां कां चन यज्ञे ऋत्विज आशिषमाशासते यजमानस्यैवेतिलिङ्गदर्शनात् ॥ २७ ॥

करणमन्त्रेषु कर्मार्थफलस्य ऋत्विग्धर्मत्वम् । अधि० १४ ।

कर्मार्थं तु फलं तेषां स्वामिनं प्रत्यर्थवत्त्वात् ॥ २८ ॥

क्व चिदृत्विजामपि फलं यजमान इच्छतीत्याह सिद्धान्तत्वेनैव । कर्मार्थमिति । *अग्नाविष्णू मावामवक्रमिषं विजिहाथां मा मा संताप्तमिति । अत्र संतापाभावरूपं तेषां फलं कर्मार्थं यजमानकर्मसिद्ध्यर्थमसंतप्तो ऽध्वर्युः कर्म कर्तुं योग्यो ऽतः स्वामिनं प्रत्यपि परम्परया ऽर्थवत्त्वात् । तस्मादृत्विजामपि क्व चित्फलम् ॥ २८ ॥

व्यपदेशाच्च ॥ २९ ॥

क्व चिद्व्यपदेशाद् निर्देशाद् ऋत्विजां फलम् । यथा उपरवेषु यजमानाध्वर्व्योः बाहुप्रवेशवेलायां किमत्र भद्रं तन्नौ सहेति निर्देशादध्वर्योरपि फलम्† ॥ २९ ॥

द्रव्यसंस्कारस्याङ्गप्रधानार्थत्वम् । अधि० १५ ।

द्रव्यसंस्कारः प्रकरणाविशेषात् सर्वकर्मणाम् ॥ ३० ॥

द्रव्येति । द्रव्यस्य बर्हिषश्च संस्काराः साङ्गप्रधानार्थाः प्रकरणाविशेषात् । इदं पूर्वं सिद्धमपि उत्तराधिकरणोत्थित्यर्थं पुनरुक्तम् ॥ ३० ॥

अपूर्वप्राकृतधर्माणां विकृतावसम्बन्धः । अधि० १६ ।

निर्देशात्तु विकृतावपूर्वस्य अनधिकारः ॥ ३१ ॥

बर्हिषा यूपावटं स्तृणातीत्यत्र विकृतौ बर्हिर्धर्माः सन्ति न वेति संशये बर्हिःशब्देन निर्देशादस्ति धर्मप्राप्तिरिति बर्हिः पूर्वपक्षे सिद्धान्तमाह । निर्देशादिति । निर्देशात् प्रकृतौ बर्हिषः कार्यस्य बर्हिषा वेदिं स्तृणातीति स्तरणस्य निर्देशाद् विकृतावपूर्वस्य प्रकृति-

* भोः स्रुक्स्रुवरूपौ अग्नाविष्णू युवां नाभिदेशे धारयन्नहमध्वर्युः मा वामवक्रमिषं युवयोरतिक्रमं न कृतवान् । युवां च मत्तो वियुक्तौ भवतम् । ततो मां देहधारिणं मा संताप्तं मम देहे संतापं ज्वरादिरूपं मा कुरुतम्" इत्यर्थो माधवीये ।

† इदमधिकरणान्तरमङ्गीचकार माधवः ।

कार्यशून्यस्य यूपावटस्तरणसाधनस्य नाधिकारः नोद्देश्यत्वं प्रकृतितः धर्माणां स्वकार्यद्वारैव प्राप्तेरिति भावः ॥ ३१ ॥

विधृतिपवित्रयोः परिभोजनीयबर्हिषा कर्तव्यत्वम् । अधि० १७ ।

विरोधे च श्रुतिविरोधादव्यक्तः शेषः ॥ ३२ ॥

समावनन्तर्गर्भौ दर्भौ विधृती कुरुतइति । ते असंस्कृते संस्कृते वेति संशये सिद्धान्तमाह । विरोधइति । विरोधे कुशसंस्कारसंस्कृतस्य स्तरणादन्यत्र निषेधे शेषः विधृत्यादिः अव्यक्तः धर्मरहितः संस्कृतस्य विधृत्यादौ विनियोगे बर्हिषा वेदिं स्तृणातीति स्तरणे विनियोगश्रुतिविरोधात् ॥ ३२ ॥

प्राकृतपुरोडाशादीनां निधानम् । अधि० १८ ।

अपनयस्त्वेकदेशस्य विद्यमानसंयोगात् ॥ ३३ ॥

ज्योतिष्टोमे श्रूयते, पुरोडाशस्य शकलमैन्द्रवायवस्य पात्रे निदधातीति । अयं पुरोडाशः सवनीयः स्यादन्यो वेति संशये विधृतिवत्संस्कृतादन्य इति प्राप्ते पूर्वपक्षे सिद्धान्तमाह । अपनय इति । सवनीयपुरोडाशस्य एकदेशस्य ऐन्द्रवायवे ऽपनयः विद्यमानस्य क्लृप्तस्य संयोगाद् विधिसंयोगात् । अयं भावः पुरोडाशशकलमिति द्वितीयाश्रुत्या शेषपुरोडाशसंस्कारप्रतीतेः क्लृप्तस्यैवेति ॥ ३३ ॥

काम्येष्टिषु उपांशुत्वस्य प्रधानार्थत्वम् । अधि० १९ ।

विकृतौ सर्वार्थः शेषः प्रकृतिवत् ॥ ३४ ॥

आथर्वणा वै काम्या इष्टयस्ता उपांशु यष्टव्या इति । अत्रोपांशुत्वं साङ्गप्रधानस्य उत प्रधानस्यैवेति संशये पूर्वपक्षमाह । विकृताविति । शेषः विकृतौ विहितो गुणः सर्वार्थः प्रकृतिवद् दर्शपूर्णमासे वेदित्वत् ॥ ३४ ॥

मुख्यार्थो वा ऽङ्गस्याचोदितत्वात् ॥ ३५ ॥

सिद्धान्तमाह । मुख्येति । मुख्यार्थः केवलप्रधानार्थः अङ्गस्य विकृतावचोदितत्वात् । अयं भावः वेद्यां हवींषीति हविर्मात्रमाह । अत्र ता इति सर्वनाम्ना काम्येष्टयः परामृश्यन्ते तत्सन्निधौ नाङ्गपाठः अतो नाङ्गपरामर्शः । अतो यस्य परामर्शः तत्रैवोपांशुत्वमिति ॥ ३५ ॥

श्येनाङ्गानां नवनीताज्यत्वम् । अधि० २० ।

सन्निधानविशेषादसंभवे तदङ्गानाम् ॥ ३६ ॥

श्येने श्रूयते, दृतिनवनीतमाज्यं भवतीति । दृतौ चर्मपुटके निहितं नवनीतं यस्याज्यस्येति तदर्थः । अत्र प्रकरणेन प्रधानग्रहणादतिदेशेन प्राप्तं सोमद्रव्यं बाधित्वा दृतिनवनीतं विधीयतइति बहिः पूर्वपक्षे सिद्धान्तमाह । सन्निधानेति । असंभवे दृतिनवनीतत्वरूपगुणविशिष्टाज्यविधाने गौरवादतिदेशप्राप्ताज्यानुवादेनोक्तगुणमात्रविधानस्य सिद्धौ प्रधाने आज्याभावेन गुणस्यासंभवादङ्गानामाज्ये स्यात् । आज्यपदसन्निधानविशेषात् ॥ ३६ ॥

आधानेऽपि तथेति चेत् ॥ ३७ ॥

आधानेऽपि दृतिनवनीतं स्यादग्निद्वारा तदङ्गत्वादित्याशङ्क्यते । आधानइति ॥ ३७ ॥

नाप्रकरणत्वादङ्गस्यातन्निमित्तत्वात् । ३८ ॥

दूषयति । नेति । आधाने पवमानेष्ट्यां वा नोक्तमाज्यम् । अप्रकरणत्वादसन्निहितत्वात् । अङ्गस्याधानपवमानयोः अतन्निमित्तत्वात् । श्येनोद्देश्यकत्वाभावात् ॥ ३८ ॥

सर्वेषामेव श्येनाङ्गानां नवनीताज्यत्वम् । अधि० २१ ।

तत्काले लिङ्गदर्शनात् ॥ ३९ ॥

दृतिनवनीतं श्येनाङ्गेष्विति सिद्धं तत्रापि दीक्षणीयादियावदङ्गेषु सुत्यादिनएव वेति संशये पूर्वपक्षमाह । तत्कालइति । तत्काले सुत्याकाले । लिङ्गदर्शनात् । अनुमानसम्भवात् । तथा हि श्येनविकृतिधर्माः सुत्याकालसंबन्धिनः सोमविकृतिविशेषधर्मत्वात् साद्यस्के सह पशूनालभेतेतिवत् ॥ ३९ ॥

सर्वेषां वाऽविशेषात् ॥ ४० ॥

सिद्धान्तमाह । सर्वेषामिति । सर्वेषामविशेषाद् विशेषशास्त्राभावात् । आज्यपदस्य श्रूयमाणस्य सुत्याकालीनाज्यमिति संकोचे मानाभावादिति भावः ॥ ४० ॥

न्यायोक्ते लिङ्गदर्शनम् ॥ ४१ ॥

ननु मानत्वेन अनुमानं दर्शितमत्राह । न्यायोक्तइति । न्यायेन वाक्येन उक्तेऽर्थे तद्विरुद्धं लिङ्गदर्शनमप्रमाणमिति शेषः ॥ ४१ ॥

सवनीयानां मांसमयत्वम् । अधि० २२ ।

मांसं तु सवनीयानां चोदनाविशेषात् ॥ ४२ ॥

शाक्यानामयनं षट्त्रिंशत्संवत्सरसाध्यं तत्र संस्थिते संस्थितेऽहनि गृहपतिर्मृगयां याति स तत्र यान्मृगान्हन्ति तेषां तरसाः पुरोडाशाः सवनीया भवन्तीति । अत्र सवनीयाः पुरोडाशा इति विशेष्यविशेषणभावापन्नं पदद्वयमुद्देश्यवाचकम् । तयोर्विशेष्यविशेषणभावापन्नयोरुद्देश्यत्वे विशिष्टोद्देशे वाक्यभेदः स्यादतोऽन्यतरस्य वक्तव्ये केवलं सवनीयानित्यस्योद्देश्यत्वे सवनीयाः कइत्याकाङ्क्षापरिपूर्त्या पुरोडाशपदमुद्देश्यसमर्पकं सवनीयपदमवयुत्यानुवादरूपम् । तथा च पुरोडाशसामान्यं मांसमयमिति बहिः पूर्वपक्षे सिद्धान्तमाह । मांसमिति । मांसमिति श्रुतिस्थतरसव्याख्यानम् । मांसं मृगयानीतमांसं, सवनीयानां सवनीयसंबन्धिधानाकरम्भादिसर्वेषाम् । सवनीयशब्दस्याक्लृप्तार्थत्वाच्चोद्देश्यवाचकत्वं सम्भवतीति न शङ्क्यम् । प्रकृतौ प्रातर्यावभ्यो देवेभ्योऽनुब्रूहि ब्रह्मन्वाचं यच्छ प्रतिप्रस्थातः सवनीयान्निर्वपेत्यत्र सवनीयशब्दस्य निर्वापयोग्यवस्त्वभिधायकत्वस्य क्लृप्तत्वादित्याह । चोदनाविशेषात् । उक्ताद् अर्थक्लृप्तेः । तथा चोद्देश्यसमर्पकं सवनीयपदं विषयवाक्ये सन्निहितत्वाच्च पुरोडाश इत्येवावयुत्यानुवादः । धानादिस्थानेऽपि मांसं सिद्धम्* ॥ ४२ ॥

इति श्रीमज्जैमिनिसूत्रवृत्त्यां तृतीयस्याध्यायस्य अष्टमः पादः ॥ ८ ॥

'समाप्तश्च तृतीयोऽध्यायः' ॥ ३ ॥

* इत उत्तरं, भक्तिरसन्निधावन्याय्येति चेत् । स्यात् प्रकृतिलिङ्गत्वाद् वैराजवत् । इति सूत्रद्वयमत्र न व्याख्यातम् । शाबरभाष्ये तन्त्रवार्त्तिके च व्याख्यातम् । अतस्तद्व्याख्यानं भाष्योक्तमुपन्यस्यते । भक्तिरसन्निधावन्याय्येति चेत् ॥ १ ॥ इति चेत् पश्यसि सवनीयेषु पुरोडाशशब्दोऽनुवादो भविष्यतीति, धानादिषु पुरोडाशशब्दो न वर्तते । भक्तिश्चान्याय्या मुख्ये संभवति ॥ १ ॥ स्यात्प्रकृतिलिङ्गत्वाद्वैराजवत् ॥ २ ॥ प्रकृतौ ज्योतिष्टोमे धानादिषु अयं पुरोडाशशब्दो भाक्तः सन्निहिते प्रयुक्तः, इहापि भाक्त एव प्रयोक्ष्यते, अत्रापि हि सवनीयशब्देन ते सन्निहिताः । प्रकृतौ लिङ्गसमवायाच्छब्दप्रवृत्तिर्विकृतावपि तथैव, यथा छत्रिणो गच्छन्ति ध्वजिनो गच्छन्तीति । यथा उक्थ्यो वैरूपसामा एकविंशः षोडशी वैराजसामा इति प्रकृतिलिङ्गेन सामशब्देन वैरूपपृष्ठो वैराजपृष्ठः इति गम्यते, एवमिहापि सवनीयानां मांसमयतेति ॥ २ ॥

क्रत्वर्थपुरुषार्थविचारप्रतिज्ञा । अधि० १ ।

अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा ॥ १ ॥

हेतुहेतुमद्भावसंगतिं प्रदर्शयन्नध्यायप्रतिपाद्यार्थज्ञानाय प्रतिजानीते । अथात इति । अथ शेषशेषिभावनिरूपणानन्तरम् अतः शेषशेषिभावनिरूपणस्य वक्ष्यमाणार्थनिरूपणे कारणत्वं यतः अतः तृतीयनिरूपणानन्तरं क्रत्वर्थपुरुषार्थयोर्वक्ष्यमाणलक्षणयोः जिज्ञासा तद्विषयज्ञानेच्छा कर्तव्येति शेषः ॥ १ ॥

क्रत्वर्थपुरुषार्थलक्षणं वर्णकान्तरद्वयसहितम् । अधि० २ ।

यस्मिन्प्रीतिः पुरुषस्य तस्य लिप्सा ऽर्थलक्षणा ऽविभक्तत्वात् ॥ २ ॥

प्रथमसूत्रस्थक्रत्वर्थपुरुषार्थपदार्थज्ञानार्थं तयोर्लक्षणमाह । यस्मिन्निति । यस्मिन् स्वर्गादिसुखविशेषे पश्वादिसुखसाधने च लब्धे प्रीतिः कृतार्थो ऽस्मीति वृत्तिस्तत्साधनं पुरुषार्थः । यद्वा यस्मिन्ननुष्ठिते पुरुषस्य प्रीतिः सुखविशेषो भवति स पुरुषार्थः । यथा यागे अनुष्ठिते स्वर्गरूपसुखं भवति तत्त्वमिति लक्षणसमन्वयः । प्रयाजादौ क्रतूपकारकत्वेन फलसाधनत्वाभावान्नातिव्याप्तिः । तदन्यो विहितः क्रत्वर्थः । तस्य स्वर्गादेः लिप्सा इच्छा अर्थलक्षणा शास्त्रं विना अर्थतः स्वत एव लक्षणमुत्पत्तिर्यस्याः तादृशी तेन फलेन सह साध्यसाधनभावस्य अविभक्तत्वादव्यभिचारात् क्रत्विच्छेति । इत्थं च शास्त्रजन्यज्ञानाजन्येच्छाविषयसाधनत्वं पुमर्थत्वम् । स्वर्गेच्छायाः शास्त्रजन्यज्ञानाजन्यत्वेन तदिच्छाविषयस्वर्गसाधनत्वाद्यागे लक्षणसमन्वयः । एवं लक्षणपरत्वेन सूत्रं व्याख्यायाधिकरणपरतया ऽपि लापयति । एवमिति । *गोदोहनेन पशुकामः प्रणयेदित्यत्र गोदोहनं क्रत्वर्थं उत पुरुषार्थं इति संदेहे क्रतूपकारस्य प्रत्यक्षदृष्टत्वेन क्रत्वर्थत्वमित्युत्सूत्रे पूर्वपक्षे सिद्धान्तमाह । यस्मिन्निति । यस्मिन्गोदोहनरूपवस्तुनि प्रणयनसाधने कृते पुरुषस्य प्रीतिः सुखं तत्साधनं भवति स पुरुषार्थ एवेति । शेषसूत्रार्थः पूर्ववत् । सूत्रस्यार्था-

* द्वितीयवर्णकम् । गोदोहनस्य क्रत्वर्थत्वम् ।

न्तरंभाष्यकार आह । एवमिति । *लोके द्रव्यार्जनं क्रत्वर्थं पुरुषार्थं वेति विचारे ब्राह्मणेन याजनादिनैव द्रव्यमर्जयेद् इतिनियमवैयर्थ्यात् क्रत्वर्थं इति पूर्वपक्षे सिद्धान्तमाह । यस्मिंचिति । यस्मिन्नर्जिते द्रव्ये पुरुषस्य प्रीतिः सुखं स पुरुषार्थ एवेति योजना । शेषं पूर्ववत्† । वर्णकमेवं वा एवं वा ॥ २ ॥

प्रजापतिव्रतानां पुरुषार्थत्वम् । अधि· ३ ।

तदुत्सर्गे कर्मणि पुरुषार्थाय शास्त्रस्यानतिशङ्क्यत्वान्न च द्रव्यं चिकीर्ष्यते तेनार्थेनाभिसंबन्धात् क्रियायां पुरुषश्रुतिः ॥ ३ ॥

अनारभ्य, तस्य व्रतमित्युपक्रम्य नेक्षेतोद्यन्तमादित्यमिति श्रुतं क्रत्वर्थमुत पुरुषार्थमिति, तत्र सिद्धान्तेनोपक्रमते । तदिति । कर्मणि एतद्वाक्यबोध्यकर्मणि तस्याः प्रीतेः उत्सर्गे ऽपि अनुपलम्भे ऽपि यथा द्रव्यार्जने अनुरागः स्वतः सिद्ध इति पुरुषार्थत्वं तथा ईक्षणनिषेधे स्वतः अनुरागाभावे ऽपीति फलितम्, पुरुषार्थाय, भवतीति शेषः । ननु प्रीत्यभावेन हेतुना पुरुषार्थत्वाभावः सिध्यति कथं वार्यतइत्यत्राह । शास्त्रस्य प्रकृतवाक्यस्य अनतिशङ्क्यत्वात् । तर्केण निराकर्तुमशक्यत्वात् प्रकृतवाक्यवैयर्थ्यापातादिति भावः । ननु प्रकृतवाक्यविहितकर्मणा ईक्षणविरोधिक्रियया क्रत्वङ्गभूतद्रव्यं संस्क्रियतां तावता शास्त्रस्य न वैयर्थ्यम् उक्तहेतुना क्रत्वर्थत्वमपि संस्कारद्वारेत्यत्राह । न चेति । द्रव्यं क्रत्वङ्गभूतद्रव्यं संस्कारयुक्तं न चिकीर्ष्यते । अनारभ्यपाठेन क्रत्वङ्गद्रव्यसंस्कारासंभवादिति भावः । तेन हेतुना अगतितः अर्थेन पुरुषार्थेन फलेनाभिसंबन्धात् । ननु नेक्षेतेति वाक्येन पुरुषमुद्दिश्य ईक्षणविरोधिक्रिया विधीयते । न स्वर्गादिमुद्दिश्य यागवत्किं चित्फलमुद्दिश्येति कथं पुरुषार्थत्वस्येमत्यत आह । क्रियायामीक्षणविरोधिक्रियामुद्दिश्य पुरुषश्रुतिः आख्यातलत्यपुरुषश्रुतिः । पुरुषस्य कर्तृत्वेन रूपेण प्रकृतक्रियाङ्गत्वमेव न प्रधानत्वमिति भावः ॥ ३ ॥

* तृतीयवर्णकम् । द्रव्यार्जनस्य पुरुषार्थत्वम् ।

† अत्र शास्त्रदीपिकादौ फलस्य विधेयाविधेयत्वविचारो ऽपि कृतः ।

सूत्र वेष्टने ॥ अन्ये तु विमोचनइति पठन्तो [illegible]
इति, ग्रन्थनमित्यपरे । सूत्रयति । सोसूत्र्यते । मूत्रिसूत्री [illegible] ॥ [illegible] ॥

मूत्र प्रस्रवणे ॥ मूत्रयति । मोमूत्र्यते, पूर्ववद्यङ् ॥ ३६३ ॥

रूक्ष पारुष्ये ॥ रूक्षयति । रूक्षतीति शपि ॥ ३६४ ॥

पार तीर कर्मसमाप्तौ ॥ पारयति । तीरयति ॥ ३६६ ॥

पुट संसर्गे ॥ पुटयति । पोटयतीति भाषार्थो दण्डके गतः । पुटतीति संश्लेषे तुदादिः ॥ ३६७ ॥

कत्र शैथिल्ये ॥ कत्रयति । कत्रिः । इन्प्रत्ययः,कात्रेयकम् । 'कत्र्यादिभ्यो ढकञि'ति शैषिको ढकञ् । कुत्सितास्त्रयः कत्रय इति वा कत्रिशब्दव्युत्पत्तिः । 'कद्भावे त्रावुपसंख्यान'मिति कुशब्दस्य कद्भावः । अत्र दुर्गः कर्तेत्यपि पठति । कर्त्तयति ॥ ३६८ ॥

"प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च" ॥ प्रातिपदिकाद्धात्वर्थे णिच्, तस्मिंश्चेष्ठनीव कार्यं भवति । इदं च 'तत्करोति तदाचष्टे', तेनातिक्रामतीनां वक्ष्यमाणत्वात् तद्विषयम् । पटुमाचष्टे पटयति । लघुमाचष्टे लघयति । अपीपटत्, अलीलघत्, । अत्र परत्वाद्वृद्धौ 'णाविष्ठवदि'ति टिलोप इत्यग्लोप्ययं नेति 'सन्वदि'तीत्वम् 'दीर्घो लघो' रिति दीर्घश्च भवति । अत्र केचित्वाग्लोपीत्यत्रागितिप्रत्याहारग्रहणसामर्थ्याद्वृद्धेः प्रागेव टिलोप इत्यग्लोपङ्गमितीत्वदीर्घत्वे नेच्छन्ति । अपपटत् । अललघदिति । तदसत् । 'हलिकल्योरदन्तत्वनिपातनं सन्वद्भावप्रतिषेधार्थ'मिति वार्त्तिकविरोधात् । यदि हि वृद्धेः प्राक् टिलोपः स्याद् अग्लोप्येवाङ्गमिति किमदन्तत्वनिपातनक्लेशेन । प्रत्याहारग्रहणस्य तु प्रयोजनं स्वामिनमाख्यत् असस्वामत्, गोमिनमाख्यत् अजुगोमत्, । वीरुधमाख्यत्, अविवीरत्, प्रावृषमाख्यत् अपप्रावत् । यादृशमाख्यत्, अययादद् इति स्यात् । येषामेषूदाहरणेष्वनभिधानात् णिज् नेति मतं तेषामपि स्रग्विणमाख्यद् इत्यादौ 'विन्मतोर्लुगि' तीष्ठवद्भावेन विनो लुकि ह्रस्वाद्यभावः प्रयोजनमेवासस्रजदिति । अत्र बहुलग्रहणात् स्रजयतीत्यत्र वृद्धौ च

भवति, तथा कुमारीमाचष्टे कुमारयतीत्यत्राप्रातिपदिकत्वेपि णिजिति केचित्¹। अन्ये तु 'प्रकृत्यैकाजि'ति प्रकृतिभावादेव स्रजयतीत्यत्र वृद्धिर्न भविष्यति। तथा यथाकथञ्चित्प्रातिपदिकग्रहणे लिङ्गविशिष्टपरिभाषाया ङ्याप्प्रातिपदिकादिति सूत्रे भाष्ये स्थापनात् कुमारयतीत्यादौ णिजपि सिद्ध इति बहुलग्रहणं विकल्पमात्रफलमाहुः ॥

"तत्करोति तदाचष्टे" ॥ तदिति द्वितीयान्तोपलक्षणम्। तत्करोत्याचष्टइत्यत्र धात्वर्थमात्रं णिजर्थो न कर्तापि, तथा चैवोदाहृतम् ॥

"तेनातिक्रामति" ॥ अत्रापि तेनेति तृतीयान्तोपलक्षणम्। अश्वेनातिक्रामति अश्वयति। हस्तिनातिक्रामति हस्तयति ॥

"धातुरूपञ्च" ॥ णिच्प्रकृतिर्धातुरूपं प्रतिपद्यते। अनेना'ख्यानात्कृतस्तदाचष्टे कृल्लुक् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारक'मित्येतत्सूच्यते। कंसवधमाचष्टे कंसं घातयतीत्युदाहरणम् ॥

"कर्तृकरणाद्धात्वर्थे" ॥ अत्र कर्तृग्रहणं करणस्य विशेषणम्। कर्तुः करणाद्धात्वर्थे णिजिति सूत्रार्थः। करिभिरवबध्नाति अवकरयति। असिना हन्ति असयति। परशुना छिनत्ति परशयति। दात्रेण लुनाति दात्रयति। अत्र कर्त्ता करणस्य विशेषणं करणशब्दवाच्यत्वेन लोकप्रसिद्धानां चक्षुरादीन्द्रियाणां परिग्रहो माभूद् इति ॥

बष्क दर्शने ॥ बष्कयति ॥ ३६९ ॥

चित्र चित्रकरणे ॥ चित्रयति। चित्रकरणमालेख्यकरणमित्यात्रेयः। चित्र आलेख्यकरणइत्येव दुर्गः ॥ ३७० ॥

"कदाचिद्दर्शने" ॥ चित्र इत्ययं कदाचिद्दर्शनेऽद्भुतदर्शने णिचमुत्पादयति। चित्रयति। चित्रीयतइति चित्रप्रातिपदिकादाश्चर्य्यवृत्तेर्नमोवरिवश्चित्रङः क्यजि'ति क्यचि, तत्र हि चित्रङ् आश्चर्य्ये इत्युच्यते, प्रातिपदिकस्य ङित्त्वमवयवे ऽकृतं लिङ्गं समुदायस्य विशेषकमिति न्यायात् प्रत्ययान्तात्तङर्थम् ॥ ३७१ ॥

अंस समाघाते ॥ अंसयति। अंसः ॥ ३७२ ॥

१ मत्रेय इति ४ पु॰ पा॰।

वट विभाजने ॥ वटयति ॥ ३७३ ॥

लज प्रकाशे ॥ लजयति । अत्र मैत्रेयः । वटेः पुनः पाठोऽर्थभेदात् । वटि लजि इत्येके । वण्टयति । लञ्जयति । अदन्तेषु पाठबलाददन्तत्त्वे वृद्धिरित्यपरे । वण्टापयति । लञ्जापति । तथा च शाकटायनसूत्रम् । 'कथादिपाथिस्फायो णौ पुग्लुग्वत्व' मिति । अस्यार्थः । कथादीनां पाथेश्च णौ पुग् लुग् इत्येतावागमौ स्फायोऽन्त्यस्य वत्वं क्रमेणेति । एवञ्च शाकटायनमतेन कथादीनामागमे पुकि वृद्धौ कथापयतीत्युदाहार्य्यम् ॥ ३७४ ॥

मिश्र सम्पर्के ॥ मिश्रयति । गुडमिश्रः । 'पूर्वसदृशे' त्यादिना तृतीयान्तस्य मिश्रशब्देन तत्पुरुषः ॥ ३७५ ॥

संग्राम युद्धे ॥ अयमनुदात्तेत् । तथा च तृतीयादिभ्य इत्यत्र कैयटे । संग्रामयतिरनुदात्तेद् बोद्धव्य इति । पदमञ्जर्यां च 'अनुदात्तेदयं संग्रामयतिरिष्यत' इति । तथा च तत्र भाष्यमपि । असंग्रामयत शूर इति, संग्रामशब्दात्तत्करोतीति णिचापि सिद्धाविह संग्रामस्य पाठः सोपसर्गात्सङ्घातात्प्रत्ययार्थस्तेनासंग्रामयत इत्युपसर्गात्पूर्वमड् भवति । तथा संग्रामयित्वेत्यत्राधीत्येत्यादिवल्ल्यप् न भवति । सिसंग्रामयिषतइत्यत्र समो द्वित्वं भवति । अत एव सङ्घातादुत्पत्तिवचनादन्यत्र धातूपसर्गसमुदायात्प्रत्यये विहितउपसर्गाः पृथक् क्रियन्तइति ज्ञाप्यते । तेन परिवृढय्येत्यत्र ल्यबादि भवति । अस्यानुदात्तेत्त्वमपाणिनीयमिति पाठस्य तदर्थतया न ज्ञापकत्वभङ्गः ॥ ३७६ ॥

स्तोम श्लाघायाम् ॥ स्तोमयति, स्तोमः । अग्निष्टोमः । 'अग्नेः स्तुत् स्तोमे' ति षत्वम् ॥ ३७७ ॥

छिद्र कर्णभेदने ॥ करणभेदनइति गुप्तः, मैत्रेयस्तु छिद्रयति कर्णयतीति कर्णमपि पृथग्धातुमुक्त्वा कर्णेन भावयति कर्णयतीति व्याचष्टेत्याह ॥ ३७८ ॥

अन्ध दृष्ट्युपघाते ॥ उपसंहारइत्येके । अन्धयति ॥ ३८० ॥

दण्ड दण्डनिपातने ॥ अयं द्विकर्मक इत्युक्तं माधवेन । तत्र कर्म...

लादयो नाथत्यादौ प्रपञ्चितास्तद्वदिहापि नेयाः ॥ ३८१ ॥

अङ्क पदे लक्षणे च ॥ अङ्कयति । अङ्कतइति शपि । तत्रैव कुटिलायां गतावकति ॥ ३८२ ॥

अङ्ग च ॥ अङ्गयति । अङ्गतीति गतौ शपि ॥ ३८३ ॥

सुख दुःख तत्क्रियायाम् ॥ तच्छब्देन सुखदुःखे प्रातिपदिकार्थौ निर्दिश्येते । 'प्रातिपदिकाद्धात्वर्थे' इति सिद्धइहानयोः पाठस्सोपसर्गात्प्रत्ययार्थ इति मैत्रेयः । सुखयति । दुःखयति । 'सुखादिभ्यः कर्तृवेदनाया'मिति क्यङि 'अकृत्सार्वधातुकयो'रिति दीर्घे सुखायते, दुःखायते, सुखादिभ्यो वेदनायां क्यङ् भवति तानि च सुखादीनि संनिधानाद्वेदनायां कर्तृस्सम्बन्धीनि चेदिति सूत्रार्थः । कर्तृ इत्यविभक्तिको निर्देशः, तेन सुखं वेदयते प्रसाधको देवदत्तस्येत्यत्र क्यङ् न भवति । सुख्यति दुःख्यतीति कण्ड्वादियगन्तस्य ॥ ३८५ ॥

रस आस्वादनस्नेहनयोः ॥ रसयति । रसतीति । शपि ॥ ३८६ ॥

व्यय वित्तसमुत्सर्गे ॥ व्यययति । व्ययतइति गतौ शपि ॥ ३८७ ॥

रूप रूपक्रियायाम् ॥ रूपस्य दर्शनं करणं वा रूपक्रियेति स्वामी । रूपयति । रूपति । निरूपयतीत्यनेकार्थत्वाद्विचारणे ॥ ३८८ ॥

छेद द्वैधीकरणे ॥ छेदयति । छिनत्तीति छिदेः श्नमि । क्वचिदिहापि छद अपवारणइति पठ्यते ॥ ३८९ ॥

लाभ प्रेरणे ॥ लाभयति । प्राप्त्यर्थे लभतइति शपि ॥ ३९० ॥

व्रण गात्रविचूर्णने ॥ व्रणयति । व्रणतीति शब्दार्थे शपि ॥ ३९१ ॥

वर्ण वर्णक्रियाविस्तारगुणवचनेषु ॥ वर्णक्रिया वर्णकरणं, सुवर्णं वर्णयति । कथां वर्णयति । विस्तृणातीत्यर्थः । राजानं वर्णयति, स्तौतीत्यर्थः । वर्णं गृह्णाति वर्णयति । 'सत्यापपाशे'त्यादिना णिच् ॥ ३९२ ॥

"बहुलमेतन्निदर्शनम्" ॥ क्वचित्तु दर्शितमिति पठ्यते । तत्रापि भावे निष्ठेति निदर्शनमित्येवार्थः । चुरादावदन्तधातुनिदर्शनं बहुलं बोद्धव्यम् । अतोनुक्ता अपीह धातवो वेदितव्याः ॥

पर्ण हरितभावे ॥ पर्णयति ॥ ३९३ ॥

विष्क दर्शने ॥ विष्कयति ॥ ३९४ ॥

क्षप प्रेरणे ॥ क्षपयति ॥ ३९५ ॥

वस निवासे ॥ वसयति ॥ ३९६ ॥

तुत्थ आवरणे ॥ तुत्थयति । एवं गडयति, आन्दोलयति, डलयति, वर्णयति, स्फुटयति, स्फुटा, स्फुटितः, अवधीरयतीत्यादयो यथाभिधानमिति मैत्रेयादयः । अन्ये तु भूवादिष्वेतदन्तेषु दशगणेषु धातूनां पाठो निदर्शनाय, तेन स्तम्भुप्रभृतयः सौत्राः, चुलुम्पादयो वाक्यकारीयाः, प्रयोगसिद्धा विक्लवत्यादयश्च गृह्यन्तइति ।

विग[1]लन्त्याशु जीमूता, विक्लवन्ते दिवि ग्रहाः ।
क्षयन्ति विद्युतः प्रावृट् क्षीयन्ते कामविग्रहाः ॥

इत्यादयः प्रयोगा उपपद्यन्तइत्याहुः ॥ ३९७ ॥

"णिङङ्गान्निरसने" ॥ अङ्गवाचिनः प्रातिपदिकान्निरसने णिङ् भवति । ङकार आत्मनेपदार्थः । हस्तौ निरस्यति हस्तयते । पादयते ॥[2]

"श्वेताश्वाश्वतरगालोडिताह्वरकाणामश्वतरेतकलोपश्च" ॥ श्वेताश्वादीनां चतुर्णां यथासंख्यमश्वतरेतक इत्येते लुप्यन्ते णिङ् च धात्वर्थे, अबाधापि णिचो बाहुलकादिति मैत्रेयादयः । श्वेताश्वमाचष्टे तेनातिक्रामति वा श्वेतयते, एवमश्वयते, गालोडयते, ह्वरयतइति, अत्र स्वामी । पारायणिकास्त्वर्थेऽद् णिचमनुवर्णयन्ति, एवं काश्यपोऽपि व्याचक्षाणः श्वेतयतीत्युदाजहार ॥

"पुच्छादिषु धात्वर्थइत्येव सिद्धम्" ॥ अत्र मैत्रेयः । पुच्छादिषु प्रातिपदिकेभ्यो धात्वर्थइत्येव सिद्धम्, आत्मनेपदं णिजन्ताद् बहुलवचनाद्विज्ञेयमिति 'पुच्छभाण्डचीवराण् णिङि'ति न कर्तव्यमिति । अन्ये तु पुच्छादीनां पुच्छभाण्डेत्यनेन णिङ उक्तत्वादि'ह णिङ् नास्तीति व्याचक्षते । पुच्छमुदस्यति उत्पुच्छयते । भाण्डानि समाचिनोति सभा-

१ लन्तीत्येवमक्षराण्युपलभ्यन्ते पुस्तके आद्यक्षरद्वयं त्रुटितम् ।
२ गणपाठे तेभ्यो णिङ्विधानं न कृतमिति भा ।

यडयते । चीवराण्यर्जयति परिधत्ते वा संचीवरयते । सिद्धशब्दो मङ्गलार्थः ॥

इति पूर्वदक्षिणपश्चिमसमुद्राधीश्वरकम्पराजसुतसंगममहाराजमहामन्त्रिणा मायणसुतेन माधवसहोदरेण सायणाचार्य्येण विरचितायां माधवीयायां धातुवृत्तौ चुरादयः सम्पूर्णाः ॥

संपूर्णा चेयं माधवीया धातुवृत्तिः ॥

शुभं भवतु ॥

श्रीविश्वनाथो विजयते ।

नमः श्रीपूज्यपादेभ्यो गुरुभ्यो बालशास्त्रिभ्यः ॥

माधवीयधातुवृत्तेरुपसंहारः ।

पुरा किल काशिकराजकीयप्रधानपाठशालाध्यक्षैः श्रीयुतथिबोसाहेबमहाशयैरनुमतेन महामहोपाध्यायश्रीयुतगङ्गाधरशास्त्रिणा मया च खण्डितान्येव द्वित्राणि पुस्तकानि काशीस्थराजकीयपुस्तकालयतस्समासाद्य काशीविद्यासुधानिधौ मुद्रयितुमुपक्रान्तामपि धातुवृत्तिं पुस्तकानामत्यन्ताशुद्धतया ऽपरिपूर्णतया च भ्वादिगणपर्यन्तामेव मुद्रयित्वा विरमितमावाभ्यां तन्मुद्रणम् ॥

तामिमां वृत्तिं सौष्ठवातिशयादनतिविस्तृतत्वाच्च व्याकरणनिखिलविषयानल्पेनैवायासेनावजिगमिषूणामभ्यसिसिषूणाञ्चात्यन्ताह्लादप्रदामाकलय्य तस्या मुद्रणे दत्तचित्तैराङ्गलदेशमलंकुर्वाणैः श्रीयुतवेनिससाहेबमहोदयैस्तत एव पुस्तकद्वयं समासाद्य तत्प्रकाशने नियुक्तोपि संप्रेषितपुस्तकद्वयस्य चापरिपूर्णतया कथमयं कार्यभार उद्वहनीय इति चिन्तयमानः काशिकराजकीयपाठशालीयत्रुटितपुस्तकेष्वन्तिमं पत्रद्वयं श्रीयुतविन्ध्येश्वरीप्रसादपण्डितानां साहाय्येन समासाद्य परिज्ञाय च ग्रन्थसमाप्तिं तन्मुद्रणे प्रवृत्तोऽहं पुस्तकानामत्यन्ताशुद्धतया महता परिश्रमेण संशोध्य प्राकाशयं माधवीयां धातुवृत्तिम् ॥

इयञ्च नाम्ना माधवीया धातुवृत्तिर्न तु माधवनिर्मितेति

तेन मायणपुत्रेण सायणेन मनीषिणा ।
आख्यया माधवीयेयं धातुवृत्तिर्विरच्यते ॥

इति ग्रन्थकर्तुः श्लोकत एव निर्धार्यते ॥

अयञ्च सायणो माधवसहोदरः* कम्पराजसुतसंगममहाराजप्रधानामात्यः स्वकुलनाम्नैव प्रसिद्धिं गतः ।

एतस्य कुलनाम सायणेति ।

श्रीमत्सायणदुग्धाब्धिकौस्तुभेन महौजसा ।
क्रियते माधवार्येण सर्वदर्शनसंग्रहः ॥

इति श्रीयुतमाधवाचार्यनिर्मितसर्वदर्शनसंग्रहश्लोकतो निश्चीयते । अत एव माधवाचार्याणां

पूर्वेषामतिदुस्तराणि सुतरामालोड्य शास्त्राण्यसौ
श्रीमत्सायणमाधवः प्रभुरुपन्यास्थत्सतां प्रीतये ।
दूरोत्सारितमत्सरेण मनसा शृण्वन्तु तत् सज्जना
माल्यं कस्य विचित्रपुष्परचितं प्रीत्यै न संजायते ॥

इत्यादिषु सायणमाधव इत्युल्लेख उपपद्यते । अस्य च ग्रन्थकर्तुरुत्पत्तिसमयादिकं वृत्तं माधवसहोदरत्वात् माधववृत्तेनैव गतार्थमिति तद्विषये लेखनीव्यापारश्चर्वितचर्वणमिवेति नेह प्रतायते ।

संप्रति चोपलब्धानां पुस्तकानामत्यन्ताशुद्धतया संदिग्धेषु स्थलेषु भाष्यवृत्तिकैयटपदमञ्जर्यादिग्रन्थपर्यालोचनादिमहाप्रयासेन निर्णीतेष्वपि पाठेषु अन्यच्च च भ्रान्त्या सीसाक्षरव्यत्यासेन शोधकदृष्टिदोषेण वा ऽपर्यालोचितानशुद्धिदोषान् क्षाम्यन्तु प्राचीनग्रन्थपरिशीलनशालिनो गुणैकपक्षपातिनो विद्वांसः, सफलयन्तु च मामकीनं परिश्रमं धातुवृत्तिपठनपाठनपर्यालोचनादिनेति भृशमभ्यर्थये ॥

भाद्रसुदि १ भौमे संवत् १९५२ } काशिकराजकीयपाठशालायां व्याकरणप्रधानाध्यापको भारद्वाजदामोदरशास्त्री ।

* अयं च माधवाचार्यस्य कनिष्ठो भ्राता वेदार्थप्रकाशकश्चेति

स प्राह नृपतिं राजन् सायणार्यो ममानुजः ।
सर्वं वेत्त्येष वेदानां व्याख्यातृत्वे नियुज्यताम् ॥

इत्यादितैत्तिरीयसंहिताभाष्यग्रन्थसंदर्भतो निर्णीयते ।

धारणाकर्षणे चात्र धृताकृष्टानुबन्धतः ।
दृढावयवसंश्लेषसहितेऽवयविन्यपि ॥
अंशान्तरेषु* तेऽस्माकं सिद्धे जतुगृहीतवत् ।
तृणोपलादिजतुसंगृहीतं यदुदाहृतम् ॥
तत्राऽप्यवयवी नेष्टः कश्चिज्जतुतृणादिषु ।
पाशाद्यैरपि पश्वादेर्धारणाकर्षणे क्षमे ॥
किन्तत्र पशुपाशादिष्ववयव्यभ्युपेयते ।
संग्रहप्रभवं चात्र धारणाद्यनुभाष्य तु ॥
पक्षिलस्तन्मतस्थो वा नोत्तरं सम्यगब्रवीत् ।
आरब्धकार्यैरारम्भो मिथस्सप्रतिघत्वतः ॥
न्यायवार्त्तिकटीकादौ क्षिप्तस्संमतिरत्र नः ।
प्रत्यक्षातीन्द्रियोपात्ते प्रत्यक्षत्वं च दुर्भणम् ॥
चाक्षुषाचाक्षुषद्रव्यसंयोगे चाक्षुषत्ववत् ।
मुधा चोदाहृतं कैश्चिद्धिमवत्परमाणुकम् ॥
टीकाकारस्तु तत्राह सूक्ष्मद्रव्योपलक्षणम् ।
विशेषाऽनुपलम्भेऽपि राश्येकत्वमतिर्यथा ॥
वृक्षादिष्वपि तद्वत्स्याद्यथादृष्टि व्यवस्थितेः ।
एकदेशे समस्ते च वृक्षलक्षणसम्भवे ॥
वृक्षधीरुपपद्येत संग्रहाच्चापृथङ्मतिः ।
सर्वाग्रहणमवयव्यसिद्धेरिति सूचयन् ॥
प्रत्यक्षव्यतिरिक्तान्तःक्लृप्तिदौस्थ्यपराहतः ।
सेनावनवदित्यादावप्रत्यक्षाणुसूचणम् ॥
त्रसरेण्वत्रधिस्थाणुस्थापकेषु न शोभते ॥ २१ ॥

* ते इत्यस्य द्विवचनान्तत्वे प्रकृतिभावावश्यंभावेन तेऽस्माकमिति पूर्वरूपं चिन्त्यमिति ।

एवन्तन्तुपटादीनां भेदे बाधकं तत्साधकानामन्यथासिद्धत्वं चोक्तम् । तथाऽप्यभेदे किम्प्रमाणमिति वदन्तं प्रति स्थिरत्वे प्रमाणमेवात्र प्रमाणमित्याह । द्रव्यैक्यमिति ।

मू० द्रव्यैक्यं प्रत्यभिज्ञा प्रथयति परिमित्यन्तरेऽन्याप्रतीतेरंशूत्कर्षक्षयादिक्षममपि च ततो राशिवत्स्थूलमेकम् । नो चेदश्रान्तचण्डानिलजलधिधुनीदन्तिदावानलाद्यैः क्षोणीयं क्षुद्यमाना क्षणमपि चरमामवस्थां न जह्यात् ॥ २२ ॥

परिमित्यन्तरे सत्यपीति शेषः इदं च भेदसाधकानामुपलक्षणं यथा प्रसारितस्याकुञ्चितस्य दीर्घत्वह्रस्वत्वे यथा च घनीकृतस्य विरलीकृतस्य च तूलपिण्डस्याल्पत्वविपुलत्वे दृश्येते एवं वृत्तचतुरस्रत्वादिविशेषे दृष्टेऽपि स्यात् कुतः अन्याप्रतीतेः, द्रव्यान्तरस्यादर्शनादित्यर्थः अन्यथा सर्वत्र यत्किंचिदवस्थाभेदमात्रेऽपि द्रव्यभेदोदृश्यते इति धृष्टवादे का प्रत्युक्तिः पद्मसंकोचविकासादिषु च द्रव्यान्तराभावो न्यायवार्तिकटीकायामुक्तः किंचान्त्यावयवित्वं पटादीनामिष्यते तैरनेकैरच्छिन्नावयवैरेकपटादिनिर्माणेऽवयव्यन्तरमुत्पद्यते न वा पूर्वत्र तेषामन्त्यावयवित्वव्याघात उत्तरत्र तन्त्वादिभिरपि तथा स्यात् अविशेषात् । अन्यस्तर्ह्यन्त्यावयवी भवत्विति चेन्न । सर्वत्रैवं कस्यचित्कार्यस्य सहकारिभेदैः सम्भवात् सन्ति चास्मदादाशक्यस्रष्टारः केचित् अन्तत ईश्वरश्च । किं च योऽसौ गोपुरादिरन्त्यावयवी तत्र यदि कश्चित्सुधाभिरवयवान्तरं संघटयेत् तदा तत्पूर्वं गोपुरं तिष्ठति नश्यति वा पूर्वत्र कथमन्त्यः उत्तरत्रानन्त्य-

थासिद्धोपलम्भविरोधः नाशकारणाभावे नाशानुपपत्तिः अपि च तूल-
पिण्डमध्यस्थमंशुं यदि कश्चित्सूच्याऽपकर्षेत् तदा तस्य परिमाण-
ह्रासो न दृश्यते न च तस्य नाशः । अथापि तत्र ते नाशः कल्प्यः
असमवायिविनाशात् समवायिविगमाच्च संघातवादे त्ववयवोत्कर्षाप-
कर्षमात्रादमात्रान्न किंचिद् द्रव्यमुत्पद्यते नश्यति वा केवलमाषादिराशि-
ष्विवोपचयापचयमात्रमेव अतो यथोपलम्भं संघातपक्ष एव साधीया-
नित्याह । अंशूत्कर्षेति । आदिशब्देनांशविदारणसन्धाने गृह्येते यदि
क्वाचित्कावयवभेदमात्रात्पूर्वद्रव्यनिवृत्तिरवयव्यन्तरोत्पत्तिः स्यात् त-
त्रानिष्टमाह । नो चेदिति । अव्यवस्थितेषु प्रदेशभेदेषु तैस्तैर्भेदकैर-
णुद्वयविघटने द्व्यणुकविनाशादिक्रमेण महापृथिवीपर्यन्तनाशे सति
अवस्थितसंयोगैरपि पुनस्तदारम्भावसरो न सेत्स्यति तदेतत्समु-
द्रादिषु कैमुत्यसिद्धम् । यदप्येवं कल्प्यते द्वाभ्यामेवाणुभ्याम् आद्यं
कार्यद्रव्यमारभ्यते एकस्यानारम्भकत्वात् असमवायिविरहात् संयो-
गो हि न स्वेन स्वस्य बहुभिरारब्धत्वे महत्त्वप्रसङ्गेन प्रत्यक्षत्वापा-
तात् बह्वारब्धस्याप्यणुत्वेऽतिप्रसङ्गः तत्परिमाणं चावयवसंख्या-
विशेषेणावयवमहत्त्वप्रचययोरसम्भवात् नित्यपरिमाणस्यानारम्भक-
त्वात् स्वातिशयपरिमाणारम्भकत्वनियमेनाणुतरपरिमाणारम्भकत्व-
प्रसङ्गाच्च सा च द्वित्वादिसंख्या सर्वत्रापेक्षाबुद्धिजन्या तद्विनाशकाभा-
वेऽपि कार्यत्वादनित्या एवं त्रिभिरेव द्व्यणुकैस्त्रसरेणवारम्भस्तावतैव
महत्त्वलाभात् द्वाभ्यामारम्भे त्ववयवप्रचयमहत्त्वरूपकारणान्तराभा-
वेन महत्त्वानुत्पत्तावदृश्यत्वप्रसङ्गात् स च त्रसरेणुः अप्रत्यक्षावयवक-
तद्रूपोऽपि स्वयं प्रत्यक्षः प्रत्यक्षरूपश्च । यद्वा अन्यरूपारोपेणालोच्यते
यथाऽऽहोदयनः दृश्यमेव ह्यालोकरूपमारोप्य पिञ्जरस्त्रसरेणुश्चालो-
च्यत इति उत्तरावयविनान्तु अनियतसंख्यैरारम्भः भावरूपस्य सर्वस्य

समवाय्यसमवायिनिमित्तसापेक्षत्वेऽपि प्रध्वंसस्तु निमित्तमात्रजन्य इत्यादि। एतादृशं कल्पनाजातं न विद्यावृद्धा बहु मन्यन्ते तथा च सूत्रम् अपरिग्रहाच्चात्यन्तमनपेक्षेति ॥ २२ ॥ इत्यवयविविवादभङ्गः ॥

या चान्या कल्पना शरीरादिषु पृथिव्याद्यनेकभूतसद्भावेऽप्येकमेव भूतमुपादानमन्यत्संसर्गिमात्रमिति तामपि निरस्यति। संघात इति ॥

मू० संघातोऽनेकभूतैरपि भवति यथाऽप्येकभूतस्य भागैर्देहादिः पञ्चभूतात्मक इति निगमा-द्युक्तिभिश्च प्रसिद्धम्। न त्वेवं संकरःस्याद्व्य-वहृतिनियमस्सूत्रितस्तारतम्याद्देहादौ येन भूतान्तरयुजि भवतो भौमतादिव्यवस्था॥२३॥

अवयविसद्भावे ह्येकप्रकृतित्वं नियन्तव्यं न वा त्वया संघातवादे तु यथादर्शनं सर्वमुपादानं न च विजातीयानां संहतिर्नास्ति दृष्टविरोधात् युष्मत्सिद्धान्तविरोधाच्च अन्यथा कथन्तैजसत्वाभिमते काञ्चनादौ गुरुत्वादिक्लृप्तिः किंच त्रिवृत्करणं नामरूपव्याकरणार्थं चतुर्विधाहारमयं शरीरमिति च गर्भोपनिषत् पञ्चभूतात्मकं वपुरित्यादि च स्मर्यते तदिदमाह देहादिरिति यथा विजातीयवृक्षपोतव्यतिषक्तोपचये वृक्षैकत्वधीः एवमेकस्मिन्ननेकभूतारब्धे विरुद्धजातिसमावेशगन्धोऽपि न स्यादित्याह न त्विति एवं शब्द उक्तहेतुपरो वा अपूर्वद्रव्यानुत्पादादित्यर्थः तदुत्पादेऽपि न जातिसङ्कर इत्याशयः नरसिंहादिन्यायेनोभयविलक्षणावयव्युत्पत्तिसम्भवात् कल्प्यते च युष्माभिश्चित्रं रूपान्तरम् एतेन तज्जातीयोपात्तं कथमतज्जातीयमित्यपि प्रत्युक्तं तन्त्वादिजातीयैरतन्त्वादिजातीयोत्पत्त्यभ्युपगमाच्च भवतु वा पृथिवीत्वतोयत्वादीनामेकत्र समावेशः तथाऽपि का हा निः परस्परप-

रिहार्युपाधिद्वयसमावेशन्यायेन दर्शनादर्शनाभ्यामेव सर्वातिप्रसङ्गशान्तेः । ननु पाञ्चभौतिकेषु कथमेकभूतशब्दस्तत्तदर्थक्रियानियमश्च वर्ण्यतेऽहि भवद्भिरेव भूतान्तरोपष्टब्धेषु अपि देहादिषु पार्थिवाप्यादिविभागः कथं च मन्त्रार्थवादेषु पृथिवी शरीरमित्यादिविशेषव्यपदेश इत्यत्राह व्यवहृतीति । सूचितो ह्यसौ वैशेष्यात्तु तद्वादस्तद्वाद इति च्यात्मकत्वात्तु भूयस्त्वादिति च अत्र प्रतिबन्दीं प्रथयति देहादाविति । येनेति तारतम्यपरामर्शः तथाप्यनारब्धावयविकेषु विजातीयराशिषु भूयस्त्वव्यवहारोलोकसिद्धस्सम्मन्तव्यः विजातीयदारुशिलाद्यारब्धेषु च खट्वापुरादिषु किंचिज्जातीयत्वनियमः तथावयव्यनारम्भे सर्वचैवमस्मन्मतसिद्धिः ।

विभागादविभागाच्च भूतभौतिकभेदधीः ।
सत्येव यदि वा द्रव्ये सिद्धसाध्यदशाद्वयात् ॥
एकत्वं च बहुत्वं च मृत्पिण्डकरकादिवत् ।
समष्टिव्यष्टिनीत्यैव त्रिगुणे वदति श्रुतिः ॥
ईदृक्सत्कार्यवादश्च वैदिकैः परिगृह्यते ।
द्रव्यस्य पूर्वसिद्धस्य साध्यावस्थाविशेषतः ॥

ननु यदि पूर्वं नित्यं सद् द्रव्यं तत्कथं सांख्यमतमुक्तः कार्यं स्यात् या त्वागन्तुकव्यवस्था सा न प्राक्सती अतः कथं सत्कार्यवादं ब्रूथ । इत्यत्राह सदेव द्रव्यमवस्थान्तरविशिष्टवेषेण कार्यन्तयैव लोकवेदव्यवहारस्थितिरिति ॥ ३२ ॥

इति देहादेः पाञ्चभौतिकत्वम् । ईदृशसत्कार्यवादमसहमानस्य सांख्यस्य नित्यैकान्तवादनियतान्प्रयोगानन्वाह । सन्तीति ।

मू० सन्ति प्रागप्यवस्थास्सदितरकरणाप्राप्तनिष्प-

स्यदृष्टेः शक्ताशक्तप्रभेदादिभिरपि यदि न स्वोचितात्कार्यदृष्टेः । तस्मिन्सत्येव तस्माज्जनिरपि नियता तन्निमित्तादिनीतेर्व्यक्तिर्व्यक्ता ऽनवस्थां भजति न च कृतामात्थ नैवं कृतौ नः ॥ २४ ॥

द्रव्यपञ्चीकारेऽस्मान्प्रति सिद्धसाध्यताऽतोऽवस्थेत्युक्तम् । यदाहुस्सांख्याः "असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात् । शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यमिति"। तत्रायं सदितरकरणादृष्टेरित्येको हेतुः अप्राप्तनिष्पत्त्यदृष्टेरिति द्वितीयः सदितरशब्देन प्रागसत्त्वमिह विवक्षितं न ह्यसत्खपुष्पादि क्रियेत मा भून्नित्यासतः करणम् । अत्र प्रागसत्त्वमात्रमिति चेन्न । तद्वदेव कदाचिदसतस्सर्वदैवासत्त्वापातात् न चासतः कदाचित्सत्त्वापत्तिः विरोधात्, न हि चिच्छक्तेः कदाचिदपि जडत्वं जडस्य वा चित्त्वम् । एवं यद्यतोऽन्यत् न तत्सर्वं कदाचिदपि तत्स्यात् प्रमाणादेरपि कदाचिदप्रमाणत्वप्रसङ्गात् न चातीतादेर्वर्तमानतादिरीश्वरेणापि सुनिष्पादः असत्त्वं सत्त्वं च वस्तुनोऽवस्थेति चेत् वस्तुनस्तर्ह्यनादितैव न च सन्निवासन्घटः प्रागुपलभ्यतेऽस्माकन्त्वव्यक्तावस्थयाऽनुपलब्धिरप्युक्ता न ह्यसन् घटादिर्न घटादिरिति तु कस्यचिद्वचनं बालप्रतारणमभावप्रतियोगिवचने विवक्षितविरुद्धोक्तेः अभावमात्रविवक्षायां विरोधादिति उपादानग्रहणादित्यनेन विवक्षितं हेतुं व्यतिरेकेण व्यनक्ति । अप्राप्तनिष्पत्त्यदृष्टेरिति । न हि घटादिकार्यमप्राप्तैरन्यत्र दण्डचक्रादिभिस्तस्योत्पत्तिः तन्त्वादिभिर्वा पटादेः अतोऽवगम्यते स्वकार्यं प्राप्तैरेव निमित्तैरुपादानैश्च स्वसाध्यसाधनमिति प्राप्तिश्च

द्विनिष्ठति साध्यस्यापि साधनवत्पूर्वभावित्वात् सदेव साध्यमिति शक्तस्य शक्यकरणादित्युक्तहेत्वभिप्रायेण शक्ताशक्तप्रभेदवचनमसतोऽप्यप्राप्तस्यापि सृष्टिः हेतुशक्तिनियमात्स्यादित्यस्योत्तरमेतत् । अयम्भावः यदि कारणेष्वसत्तदप्राप्तं च कार्यमुत्पद्येत तदा तिलेभ्य एव तैलं किमुत्पद्यते न सिकतादिभ्यः शक्ताशक्तभेदादिति चेत् सिद्धं नस्समीहितं तिलानां तैलोत्पादनशक्तिर्हि तद्गर्भत्वमेवान्यादर्शनात् तदशक्तिश्च सिकतानां तदभावः तथा सति तद्गतस्तन्निष्पत्तेः प्रागपि तत्सिद्धिरनिवार्य्येति आदिशब्देन कारणभावात् सर्वसम्भवाभावादिति हेतुद्वयग्रहणम् । कारणभावात् कार्यस्य कारणात्मकत्वादित्यर्थः प्रागेव सति कारणे कथं तदा तदभिन्नं कार्यमसद्भवेत् । नन्वस्तु प्रागसदेव कार्यं मा च भूवन् हेतुप्राप्ति—तद्वृत्ति—तदैक्यानि तथाऽपि कस्यचिदेव किंचित्कार्यमित्यत्र सर्वसम्भवाभावादिति प्रसङ्गतद्विपर्ययाभ्यां प्रत्युक्तिः तथा हि यदि प्रागसत् हेतुभिरप्राप्तं हेतुवृत्ति तादात्म्यरहितं च तत उत्पद्यते सर्वस्मात्सर्वसम्भवः स्यात् न चासावस्तीति पञ्चानामप्याभासत्वाभिप्रायेण प्रतिवक्ति । नेति । तत्र प्रथमस्य प्रतिक्षेपे हेतुः कार्यदृष्टेरिति । शेषाणान्तु स एव स्वोचितादिति विशेषितः न तावत्कार्यमिति किमपि न दृष्टं सर्वलोकवेदविरोधात् व्यक्तिसाधनस्यापि निराश्रयत्वप्रसङ्गाच्च । न च दृष्टमपि न सत्यं माध्यमिकादिमतानां निराकरिष्यमाणत्वात् । न च सत्यमपि न कारणाद्व्यतिरेकेण गृह्यते उक्तोत्तरत्वात् प्रकृतिविकृतीत्यादिविभागभङ्गप्रसङ्गाच्च अतःकारणाद्भिन्नत्वेन दृष्टं कार्यं तेनाकारेण पूर्वं नासीदिति त्वयैवाकामेनापि स्वीकर्तव्यं न हि घटाकारेण निष्पन्नस्य पुनरपि दण्डादिव्यापारनिष्पाद्यत्वमस्ति किंच कार्यव्यङ्ग्यशब्दौ च व्यवस्थितविषयौ लोके दृष्टौ कारकव्यञ्जकभेदश्च

कारकं समग्रमप्येकमुत्पादयति व्यञ्जकन्तु सहकारिसम्पन्नं समानेन्द्रियग्राह्याणि समानदेशस्थानि तादृशानि सर्वाण्यपि व्यनक्ति तदत्र घटादिव्यक्तिसामग्र्येव तद्वन्मृत्पिण्डगतानां करकादीनामपि व्यक्तिः स्यात् व्यञ्जकत्वे सिद्धे ह्यवान्तरव्यङ्ग्यभेदप्रतिनियतव्यञ्जकभेदव्यवस्थाक्लृप्तिः न चेह तथा आगन्तुकाभावे च पुरुषवत्प्रकृतिरपि ते निर्व्यापारैव स्यात् तथा च गतं सृष्टिप्रलयादिवादैः सिद्धान्तसृष्ट्यादिभिश्च। किंच सत्कार्यमिति कार्यस्य सत्त्वमात्रे साध्ये सिद्धसाध्यता कारकव्यापारात्प्रागपि सदिति साध्ये कार्यस्य कारकव्यापारस्य प्रागसत्त्वमङ्गीकृतं स्यात्। असदकरणात् शक्तस्य शक्यकरणादिति हेत्वोश्च करणशब्देनापूर्वोत्पादने विवक्षिते स्ववचनव्याघातः। व्यक्तिविवक्षायां तु व्यज्यमानत्वात्प्रागपि सदिति स्यात्। तदा अन्यतरासिद्धो हेतुः। ननु सतोऽभिव्यक्तौ घटतैलतण्डुलादिनिदर्शनमस्ति असत उत्पत्तौ न किंचिदिति चेत् किमतः, न हि निदर्शनमेव प्रमाणं हेतुनैष्फल्यप्रसङ्गात्। न च निदर्शनाभावे बाधकः, सर्वत्र प्रतिनियतस्वभावलोपप्रसङ्गात्। अपि च असदकरणादित्यत्र कार्यस्य प्राक्सत्त्वे क्रियमाणत्वादित्येव हेतुः स्यात् तथा च प्रतिज्ञाहेतुविरोधः विपक्षात् खपुष्पादेः सपक्षाच्च सर्वस्मात् व्यावृत्तत्वेन हेतोरसाधारणत्वप्रसङ्गश्च भावत्वेन तु प्राक्सत्त्वं साधयाम इति चेत्। तथाऽपि प्रत्यक्षविरोधः अन्यथा नित्यासतोऽपि कुतश्चिन्नित्यसत्त्वसाधने निवारकाभावात्। असतः सत्त्वापादनमशक्यमित्युक्तमिति चेन्न। अत्यन्तासत्त्वे विवक्षिते कार्येषु तदभावात्। प्रागसत्त्वे तु सृष्ट्यनुगुणस्यैव तद्विरुद्धत्वोपन्यासात्।

प्रागसत्तुच्छमेव स्यात् सच्च नित्यं सदित्यसत्।
अयथादृष्टि निर्णेतुरशेषाभीष्टविप्लवात्॥

Among these (the suggestion) is founded on the bold assertion of some character figured by the poet.

The suggestion of sentence has already been *exemplified.* (See above त्वामस्मि वच्मि विदुषां, &c.) Suggestion founded on the power of both word and meaning, is not due to word; thus there are in all 35 (*a*) divisions.

Suggestion in a Prabandha.

42.—*(concld.)* Suggestion founded on the power of meaning, is in the entire context also.

As in the following dialogue of vulture and the jackal :—

[*Page* 187.] "You need not stay any longer in this horrible crematorium crowded with vultures and jackals, abounding in skeletons and full of terror to all that live; nor has anybody subjugated by death revived here, whether hated or beloved, such is the end of all that live."

This is the speech of the vulture, powerful during day, exhorting the people to go.

"Fools! the Sun still stays; Be tender yet; this moment has many obstacles, and the boy might revive. How can you, O ignorant men, on the vulture's word, leave unsuspectingly, that boy of golden lustre who has scarcely yet attained his youth."

That this is the speech of the jackal, powerful at night in order to turn back the people to the crematorium is shown by the entire context.

The other eleven kinds (of suggestion based on the power of word) are not exemplified for fear of being too prolix. They may be followed in accordance with their definitions.

(*a*) The seventeen kinds of Dhwani (leaving out शब्दार्थोभयशक्त्युद्भव which is only one) being each either in a पद or a वाक्य make up 34, and these with the शब्दार्थोभयशक्त्युद्भव (which can be in sentence only) make up 35.

'*Also*'—*i. e.* in a word as well as in a sentence.

Suggestiveness of the particles of words.

43.—[*Page* 189.] *Rasa*, etc. occur in the particles of inflected words, in compounds, and in letters.

Among these, suggestion by the crude form a word is exemplified:

(1) रइकेलिहिअणिअसणकरकिसलअरुद्धणअणजुअलस्स ।
रुद्दस्स तइअणअणं पव्वइपरिचुम्बिअं जअइ ॥

(1) Suggestion by a part of the Inflected word—the Crude form—of the Erotic (Union).

["The third eye of Rudra kissed by Pārvatī is triumphant —Rudra whose two eyes have been shut by the two lotus-hands of Pārvatī robbed of her cloth in dalliance."

[*Page* 190.] Here it is said 'is triumphant,' and not merely 'shines,' meaning thereby that though the action of being closed applies equally to the three, the unique method of the closing of the third eye, lends a kind of triumph to it over the other two.

Or again:—

प्रेयान् सो ऽयमपाकृतः सशपथम् पादानतः कान्तया
द्वित्राण्येव पदानि वासभवनाद्यावन्न यात्युन्मनाः ।
तावत् प्रत्युत पाणिसम्पुटगलन्नीवीनिबन्धं धृतो
धावित्वेव कृतप्रणामकमहो प्रेम्णो विचित्रा गतिः ॥

["The lover though fallen on the feet of his beloved with swears, being rejected and hence dejected, no sooner had he gone but two or three steps out of the Pleasure-house, than she having suddenly run up caught hold of him, making obeisance, her cloth-knot giving way from between her hands. Strange is the process of Love!"]

(*a*) Here it is said 'steps' not 'doorways.'

(*a*) By using the word 'steps' instead of 'doorways,' &c. excess of anxiety is suggested by the unbearableness of his going even so far as the door. Thus the *Pradīpa*.

To exemplify the suggestiveness of Inflection and Declension:—

(2) पथि पथि शुकचञ्चूचारुराभाङ्कुराणां
दिशि दिशि पवमानो वीरुधां लासकश्च ।
नरि नरि किरति द्राक् सायकान् पुष्पधन्वा
पुरि पुरि विनिवृत्ता मानिनीमानचर्चा ॥

(2) Inflection and Declension of Erotic.

["On every wayside the sprouts appear like the parrot's beak, on every side is the wind waving the creepers; on every man does the Flower-bowed One strike his arrow; and in every town has ceased the talk of self-respect of indignant women."]

Here 'striking' किरति, &c. suggest through inflection the fact of these actions being in the course of accomplishment; and by 'ceased' is suggested through declension the fact of the action of ceasing having been accomplished; and here in the latter case again by the affix 'क्त' is suggested pastness.

[*Page* 195.] Or again :—

लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितो
निराहाराः सख्यः सततरुदितोच्छूननयनाः ।
परित्यक्तं सर्वं हसितपठितं पञ्जरशुकै-
स्तवावस्था चेयं विसृज कठिने! मानमधुना ॥ [*Amarūçataka.*]

["Thy beloved dejected stays outside scratching the ground; thy friends having their eyes swollen by constant weeping lay without food; the cage-parrots have all given up their amusing talks; this is thy condition; now O cruel one! give up thy indignant feeling (sense of wounded honour.)"]

(*a*) Here it is said लिखन्नास्ते 'is scratching' not लिखति

(*a*) All this is thus explained in the *Pradīpa.*—

The unimportance and purposelessness of writing is suggested by the affix शतृ in लिखन्, and the inflective affix ते instead of the declensional क्त in आस्ते, suggests the continuity of the condition till reconciliation; the declensional termination the objective, instead of the locative in भूमिम् suggests the non-intelligent and purposeless character of the writing.

'scratches; and आस्ते 'stays,' 'stays and will stay till your reconciliation,' not आसित; भूमिम 'the earth' not भूमौ 'on the earth' (*i. e.* the accusative and not the locative), the sense being that he does not write anything intelligently,—these are the suggestions of the various affixes (of inflection and declension.)

To exemplify the suggestiveness of the genitive :—

(3) गामरुहम्मि गामे वसामि णअरट्ठिदं ण जाणामि ।
णाअदूराणं पइणो हरेमि जा होमि सा होमि ॥

(3) By the 6th (genitive) case-termination—of Erotic.

["I am born in the village, live in the village, and know not the customs of the town. Be whatever I am, I entrap the husbands of town-women."]

[*Page* 197.] Here to the genitive affix णाअरिआणं 'of town-women,' belongs the suggestion. (*a*)

[*Page* 198.] 'Lovely was the Kshatriya boy'—here we have the suggestiveness of Tense,—the sense being that 'as he is bound to be killed by me, (it is as well to speak of him as dead)' is said by angry Bhārgava, to the son of Daçaratha who had just broken Śiva's bow.

To exemplify the suggestiveness of Number—

(4) ताणं गुणग्गहणाणं ताणं उक्कंठाणं तस्स पेमस्स ।
ताणं भणिआणं सुन्दर एरिसिअं जाअमवसाणम् ॥

(4) Of Number.

["Of those appreciations of good qualities, of those longings of that love, of those talks, O beautiful one! this has been the end."]

Here the plurality of 'appreciations, &c.' and the singleness (and hence the absoluteness) of "Love" are suggested by Number

(*a*) "The genetive implies the cleverness of the husbands, and thereby the speakers own cleverness in detecting such character is signified."—*Pradipa.*

The suggestiveness of change of Person.—

(5) रे रे चञ्चललोचनाञ्चितरुचे! चेतः! प्रमुच्य स्थिर-
प्रेमाणम् महिमानमेणनयनामालोक्य किं नृत्यसि ।
किं मन्ये विहरिष्यसे? बत हताम् मुञ्चान्तराशामिमा-
मेषा कण्ठतटे कृता खलु शिला संसारवारांनिधौ ॥

(5) Of Person.

["Oh heart! whose desire for a fickle-eyed woman has been aroused! why dost thou, having relinquished the permanently loveable excellence (of non-attachment) become unsteady (lose equanimity) on seeing the fawn-eyed woman? Do you mean to say—'You will dally'? ah, give up this thy low-born desire; this is a piece of stone, as it were, fastened to the neck in this Ocean of Worldliness."

[*Page* 200]. (*a*) Here 'redicule' is suggested (by the use of the first person in मन्ये, followed again by the second person in विहरिष्यसे).

[*Page* 201]. The Suggestiveness of "Irregular Priority" of a word, as—

(6) येषां दोर्बलमेव, दुर्बलतया ते सम्मताः, तैरपि
प्रायः केवलनीतिरीतिशरणैः कार्यं किमुर्वीश्वरैः ।
ये क्ष्माशक्र! पुनः पराक्रमनयस्वीकारकान्तक्रमाः,
ते स्युर्नैव भवादृशास्त्रिजगति द्वित्राः पवित्राः परम् ॥

(6) Of the Irregular order of words.

"Those that have only the strength of arms, are said to be weak; and what will those others do who shelter themselves in mere policy? O Indra on earth! those like you whose actions are guided by valour as well as by policy, of these there may or may not be even a couple in the three worlds."

(*a*) Here the Udyóta—In this place where the *first* (*I*) and *second* (*you*) persons are connected, the interchange of persons suggests redicule, in accordance with the Sūtra—"प्रहासे च मन्योपदपदे, मन्यतेरुत्तमएकवच्च"।

(*a*) Here importance of valour is shown.

[*Page* 202.] To exemplify the suggestiveness of "Peculiar Case-affix"—

(7) प्रधानाध्वनि धीरधनुर्ध्वनिभृति विधुरैरयोधि तव दिवसम् ।
दिवसेन तु नरप! भवानयुद्ध विधिसिद्धसाधुवादपदम् ॥

(7) Of Peculiar Case-affix.

["O protector of men! in the battle full of sounds issuing from the bows of brave men, thy enemies fought all the day long; you, on the other hand, fought till evening in such a way as to get praises of all good men."]

(*b*) Here the third case-termination in दिवसेन suggests the attainment of object.

[*Page* 203]. (8) "भूयो भूयः सविधनगरीरथ्यया पर्यटन्तम्
दृष्ट्वा दृष्ट्वा भवनवलभीतुङ्गवातायनस्था ।
साक्षात्कामं नवमिवरतिर्मालती माधवं यद्
गाढोत्कण्ठाललितलुलितैरङ्गकैस्ताम्यतीति ॥
[*Mālatīmādhava, Act I.*]

(8) Of Nominal Affixes.

["Sitting in the window of the high mansion, having frequently seen Mādhava passing by the highway road as Rati sees Kāma, Mālati's heart burns with the several members of her body withered on account of earnest longing."]

[*Page* 204]. Here the nominal affix क in अङ्गकैः implies tenderness and compassion, [in accordance with Pānini's Sūtra "अनुकम्पायां" (V.-iii.-73)].

(*a*) The *Com.*—In the compound 'पराक्रमनय, &c.' the word नय as having fewer vowels ought to come first in accordance with the Sūtra of Pānini 'अल्पाच्तरम्' (II—ii—34). Yet following the Vārtika—'अभ्यर्हितं च' the word पराक्रम is placed before; and this priority in the compound implies the importance of पराक्रम, valour.)

(*b*) The third case-termination when used in such places implies the attainment of object (by the subject in accordance with Pānini's Sūtra (II.—iii.—6) "अपवर्गे तृतीया"

(9) परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।
विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः को ऽप्यन्तर्जडयति च तापं च कुरुते ॥

[*Mālatīmādhava, Act I.*]

(9) Of Verbal Prefixes.

["A curious deep emotion internally freezes and also burns me —an emotion which has gone beyond all measure and power of expression was never before experienced in this birth; and it has altogether deluded my intelligence by the entire destruction of all my discriminative faculties."]

[*Page* 205]. Here the prefix प्र suggests the Privative-Erotic.

(10) कृतं च गर्वाभिमुखम्मनस्त्वया किमन्यदेवं निहताश्च नो द्विषः ।
तमांसि तिष्ठन्ति हि तावदंशुमान्न यावदायात्युदयाद्रिमौलिताम् ॥

(10) Of Nipātas.

["Your mind was inclined towards glorious pride and our enemies have also been destroyed. What else? Darkness prevails only so long as the Rayed God comes not to the Crest of the Rising Mount."]

Here suggestiveness belongs to the particle च suggesting the Figure 'Equal-pairing' (*a*) तुल्ययोगिता

[*Page* 206]. (11) रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिम्पराम्
अस्मद्भाग्यविपर्ययाद्यदि परं देवो न जानाति तम् ।
बन्दीवैष यशांसि गायति मरुद्यस्यैकवाणाहति-
श्रेणीभूतविशालतालविवरोद्गीर्णैः स्वरैः सप्तभिः ॥

[*Rāghavānanda-Nātaka.*]

(*a*) The glorious inclination and the destruction of the enemies are related by the relation of co-evalness; and thus the Figure is तुल्ययोगिता or Equal-pairing. This is the view of the ancients. The modern view is that the glorious inclination and the destruction are connected with one and the same and hence have equal connections: thus तुल्ययोगिता would mean समुच्चय 'Collection;' and this is the Figure suggested here. Thus the *Pradīpa.*

(11) Of the Number, Pronouns and Substantives.

["This Rāma has attained to extreme renown throughout the worlds by means of his valour and other good qualities. And it is extreme inversion of our fate that you yet know him not,—Rāma whose eulogium is being sung by the wind like a bard in seven notes of music, as it were, by means of the sound issuing forth from the holes made in the series (*a*) of Tâla trees growing in a line, pierced by a single arrow of his!"]

[*Page* 207]. Here suggestiveness belongs to number—of pronouns in असौ 'this,' and of substantives in भुवनेषु 'the worlds" and गुणैः 'qualities;' and to universality of अस्मद्भाग्य '*our*' which is used instead of 'my' or 'thine'; and lastly to the mention of 'inversion of fortune' meaning contrary modification or development, instead of saying 'misfortune,' a direct negation of fortune.

[*Page* 208.]

(12) तरुणिमनि कलयति कलामनुमदनधनुर्भ्रुवोः पठत्यग्रे ।
अधिवसति सकलललनामौलिमियं चकितहरिणचलनयना ॥

(12) Of Affixes, Compounds, &c.

["On youth being fully developed in vivacity and the eyebrows being instructed in liveliness in the presence of (their teacher) the bow of Cupid, she of unsteady eyes like those of the antelope occupies the highest position among women."]

Here suggestiveness belongs to the form of the affix इमनिच् in तरुणिमनि used instead of तरुणत्व; to the Avyayībhāva Compound in अनुमदनधनुः used instead of मदनधनुषः समीपे and to the use of the locative as the objective in मौलिम् instead of मौलौ.

Though the denotative power of the alternatives in each case is the same, yet, there is in the forms used something unique that adds elegance to them; and this something constitutes the suggestion.

[*Page* 209]. Similarly the others may be exemplified.

(*a*) This story is related in the 12th Canto of the Kishkindhā-kāṇḍa of Vālmīkiya Rāmāyaṇa.

कर्मपरत्वेन वाक्ययोः सुकृतदुष्कृताश्लेषविनाशपरत्वात् पूर्वोत्तरसुकृतयोरश्लेषविनाशसंभव इति, । एवं-शब्दं व्याचष्टे "उक्तेने"ति, उक्तन्यायं विवृणोति "विद्याफले"ति, एवं-शब्देन पूर्वसूत्रानुकृष्टस्यापदेश-शब्दार्थमुपपादयति "भवति चे"ति, पुण्यस्यापि पाप्म-शब्दवाच्यत्वे श्रुतिं दर्शयति "उभे" इति, उभयोः पृथगभिधाने श्रुतिमाह "तत्सुकृते"ति, अतिदेशस्याधिकाशङ्कामाह-

सू० सुकृतस्यापि शास्त्रीयत्वात्तत्फलस्य केषांचिदिष्टत्वदर्शनाच्च विद्यया अविरोधशङ्कां निवर्त्तयितुमतिदेशः । ननु विदुषोऽपि सेतिकर्त्तव्यताकोपासननिर्वृत्तये वृष्ट्यन्नादिफलानीष्टान्येव कथं तेषां विरोधाद्विनाश उच्यते तत्राह "पाते त्वि"ति, शरीरपाते तु तेषां विनाशः शरीरपातादूर्ध्वं तु विद्याऽनुगुणदृष्टफलानि सुकृतानि नश्यन्तीत्यर्थः ॥ इतराधिकरणं समाप्तम् ॥

टी० "सुकृतस्ये"ति, सूत्रखण्डान्तरस्य शङ्कामाह "नन्वि"ति, विद्यानुगुणदृष्टफलानि तिष्ठन्ति चेत्तानि शरीरपातादूर्ध्वं नश्यन्तीत्यर्थः । परे चापरे च पाते त्विति सूत्रखण्डमेवं व्याचक्षते अश्लेषविनाशसिद्धेर्देहपाते मुक्तिरवश्यं भाविनी, तु-शब्दोऽवधारण इति, तन्निष्प्रयोजनं सर्वबन्धकविरहे मोक्षस्य वक्ष्यमाणप्रकारेण निःसंशयत्वात्सर्वप्रारब्धकर्मानपक्षये सति देहपाते मोक्षस्योपरितनाधिकरणविरुद्धत्वाच्च । अन्ये त्वनेनाधिकरणेनाश्लेषमात्रातिदेशः न विनाशातिदेश इति वदन्ति, तदयुक्तं विनाशाश्रवणरूपहेतोरसिद्धत्वात् पाप्म-शब्दस्यैवोभयवाचित्वोपपादनाच्च देहान्ते ज्ञातिभिः परिग्रहात् अविनाश इति चेन्न द्विषद्भिः परिग्रहेण दुष्कृतस्याप्यविनाशप्रसङ्गात् सुकृतस्याश्लेषो नाम काम्यकर्मस्वन्यनुत्पत्तिः पङ्क्तिपावनत्वादिलक्षणमाहात्म्यस्य तु विद्यया विरोधाभावान्नाश्लेषः, एवं स्वसामर्थ्यप्रभावितं ज्ञानफलं निरूपितं, कदा तर्हि नैयोगि-

कफलं सुकृतदुष्कृतप्रहाणमित्यपेक्षायामाह "पाते त्वि"ति, देहपात एवेत्यर्थ इत्याहुः । पात इत्यस्य व्याख्यानमनुपपन्नं निष्फलत्वादेव, तच्च साम्पराय इत्यत्र प्रागुक्तत्वात् अपेक्षिताकथनं च भाष्योक्तशङ्कायाः परिहरणीयत्वात्, अतोयथाभाष्यमेवार्थः ॥ इतराधिकरणं समाप्तम् ॥

अनारब्धकार्याधिकरणम् ।

सू० अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ १५ ॥

भा० ब्रह्मविद्योत्पत्तेः पूर्वोत्तरभाविनोः सुकृतदुष्कृतयोरश्लेषविनाशावुक्तौ, ततः पूर्वभाविनोः सुकृतदुष्कृतयोः किमविशेषेण विनाशः? उतानारब्धकार्य्ययोरेवेति ? विशये "सर्वे पाप्मानः प्रदूयन्त इति विद्याफलस्याविशेषश्रवणाद्विद्योत्पत्त्युत्तरकालभाविन्याश्च शरीरस्थितेः कुलालचक्रभ्रमणादिवत्संस्कारवशादप्युपपत्तेरविशेषेणेति प्राप्ते उच्यते अनारब्धकार्य्ये एव तु पूर्वे इति, विद्योत्पत्तेः पूर्वे सुकृतदुष्कृते अनारब्धकार्य्ये अप्रवृत्तफले एव विद्यया विनश्यतः, कुतस्तदवधेः तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्य इति शरीरपातविलम्बावधिश्रुतेः, न च पुण्यापुण्यकर्मजन्यभगवत्प्रीत्यप्रीतिव्यतिरेकेण शरीरस्थितिहेतुभूतसंस्कारसद्भावे प्रमाणमस्ति ॥ अनारब्धकार्याधिकरणं समाप्तम् ॥

टी० सू० अनारब्धकार्य्ये एव तु पूर्वे तदवधेः ॥ १५ ॥ अवान्तरसङ्गतिमाह "ब्रह्मविद्योत्पत्तेरि"ति, ततः पूर्वभाविनोः–ब्रह्मविद्योत्पत्तिपूर्वभाविनोरित्यर्थः । किं पूर्वे सुकृतदुष्कृते अविशेषेण नश्यतः ? उतानारब्धफले? किं सर्वे पाप्मान इति सर्वशब्दस्वारस्यानुरोधोन्याय्यः? उत तस्य तावदिति विलम्बश्रुत्यनुरोधः? किं कुलालचक्रभ्रमणवत् कर्मविनाशे संस्का-

रेण शरीरधारणमुपपद्यते ? न ? ति ? किमीश्वरप्रीत्यप्रीतिव्यतिरेकेण संस्कार-कल्पनायां प्रमाणमस्ति ? नेति ? अस्ति चेत् तेन शरीरधारणोपपत्तेः सर्वश-ब्द स्वारस्यानुरोधस्य न्याय्यत्वादविशेषेण नश्यतः, न चेत्संस्कारेण शरी-रधारणायोगाद्विलम्बश्रुत्यर्थानुरोधेनानारब्धफले एव नश्यत इति सिध्यति, सर्वमिथ्यात्ववादिनामिदमधिकरणं विरुद्धं प्रारब्धकर्मणोऽपि मिथ्या-त्वेन बाधात् स्थित्यनुपपत्तेः, द्वितीयचन्द्रज्ञानवैषम्यं प्रागेवोक्तं, प्रवृत्तफ-लस्य कर्मणः कुलालचक्रवेगवदन्तराले प्रतिबन्धासंभाव इत्यपि दुरुक्तं स्वाप्नकुलालचक्रभ्रमणवद् द्वितीयक्षणे प्रबोधे सति तद्वेगस्य बाधितत्वदर्श-नात्, संस्काराद्देहधारणं चेत् क्षीणायुषामविदुषामपि देहधारणं स्यात् ॥

अनारब्धकार्याधिकरणं समाप्तम् ॥

अग्निहोत्राद्य-धिकरणम् ।

सू० अग्निहोत्रादि तु तत्कार्य्यायैव तद्दर्शनात् ॥ १६ ॥

इतरस्याऽप्येवमसंश्लेष इति विद्याबलात्सुकृतस्याप्यसंश्लेष उक्तः, अग्निहोत्रादीनां नित्यनैमित्तिकानां स्वाश्रम धर्माणामपि सुकृतत्वसामान्येन तत्फलस्याश्लेषादनिच्छ-तोऽननुष्ठाने प्राप्ते उच्यते—अग्निहोत्रादि त्विति, तु—शब्दः सुकृतान्तरेभ्यो विशेषणार्थः, अग्निहोत्रा-द्याश्रमधर्माः फलाश्लेषासम्भवादनुष्ठेया एव, तदसम्भ-वश्च तत्कार्यार्थत्वात्तेषां विद्याख्यकार्यायैव हि विदु-षोऽग्निहोत्राद्यनुष्ठानं, कथमिदमवगम्यते तद्दर्शनात्, दृश्यते हि "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेने"त्यादिनाऽग्निहोत्रादीनां विद्यासाधनत्वं विद्यायाश्चाप्रयाणादभ्यासाधेयातिशयाया

अहरहरुत्पाद्यत्वात्तदुत्पत्त्यर्थमाश्रमकर्माप्यहरहरनुष्ठेयमेव, अन्यथाऽऽश्रमकर्मलोपे दूषितान्तःकरणस्य विद्योत्पत्तिरेव न स्यात्, यदि अग्निहोत्रादिसाधुकृत्याविद्योत्पत्त्यर्था विद्योत्पत्तेः प्राचीनं च सुकृतं यावत्सम्पातमुषित्वा प्राप्यान्तं कर्मण इत्यनुभावेन विनष्टं भुक्तावशिष्टं च प्रारब्धं कर्मफलं सुहृदः ।

टी० सू० अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ १६ ॥ अवान्तरसङ्गतिमाह—"इतरस्यापी"ति, ऊर्ध्वरेतःस्वग्निहोत्रादिनैरपेक्ष्यदर्शनादनूर्ध्वरेतसामपि तन्नैरपेक्ष्यशङ्कायां सर्वापेक्षेति सूत्रं यज्ञादेराश्रमधर्मत्वे विद्याङ्गत्वे च नित्यानित्यसंयोगविरोधपरिहारार्थं सहकारित्वे न चेति सूत्रं सुकृतफलाश्लेषादननुष्ठेयत्वशङ्कापरिहारार्थम् अग्निहोत्रादीति सूत्रम् । एवं सूत्राणामपौनरुक्त्यावहेषु शङ्काविशेषेषु सूत्राणामुत्थानात् समुच्चयवादो निरवकाशः, किमग्निहोत्राद्याश्रमधर्मो विदुषः कार्य्याश्लेषादननुष्ठेयः? उतानुष्ठेयः? किमश्लेषवचनं सर्वसुकृतविषयम्? उत विद्याङ्गाश्रमधर्मव्यतिरिक्तसुकृतविषयं? किं विद्वत्संबन्ध्याश्रमधर्मस्यापि फलं विद्याव्यतिरिक्तम्? उत विद्यैवेति,? व्यतिरिक्तं चेत् अश्लेषवचनस्य सर्वसुकृतविषयतया कार्य्याश्लेषादननुष्ठेयता, यदा विद्यैव फलं तदा चाश्लेषवचनस्य विद्वत्संबन्ध्याश्रमधर्मव्यतिरिक्तविषयत्वेन ,-कार्य्याश्लेषाभावादनुष्ठेयता, पूर्वपक्षमाह इतरस्येत्यादिना, राद्धान्तस्तु अग्निहोत्रादि त्वित्यादि, तर्हि सकृदनुष्ठेयमित्यत्राह 'विद्यायाश्चे"ति, उत्तरसूत्रस्य शङ्कामाह "अग्निहोत्रादी"ति सुहृदः ।

भा० साधुकृत्यामित्यस्य को विधेयस्तत्राह—

सू० अतोऽन्यापि ह्येकेषामुभयोः ॥ १७ ॥

अतोऽग्निहोत्रादिसाधुकृत्याया विद्योत्पत्त्यर्थाया अन्यापि विद्याऽधिगमात् पूर्वोत्तरयोरुभयोरपि पुण्यकर्मणोः

प्रबलकर्मप्रतिबद्धफला साधुकृत्याऽनन्ता सम्भवत्येव तद्वि-षयमिदमेकेषां शाखिनां वचनम् "तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्या"मिति, विद्ययाऽश्लेषविनाशश्रुतिश्च तद्विषया । अनुष्ठितस्यापि कर्मणः फलप्रतिबन्धसम्भवं पूर्वोक्तं स्मारयति—

सू० यदेव विद्ययेति ॥ १८ ॥

यदेव विद्यया करोति तदेव वीर्यवत्तरमित्युद्गीथ-विद्यायाः क्रतुफलाप्रतिबन्धफलत्ववचनेनानुष्ठितस्यापि कर्मणः फलप्रतिबन्धः सूच्यते हि अतोऽविदुषोऽनुष्ठित-प्रतिबद्धफलविषयं सुहृदः साधुकृत्यामिति शाट्या-यनिकम् ॥ अग्निहोत्राद्यधिकरणं समाप्तम् ॥

टी० साधुकृत्यामित्यस्य को विषय इति उत्तरपापकृत्यायाः प्रागभुक्तफलत्वात् प्रारब्धफलत्वाभावात् विद्यार्थत्वाभावाच्च द्विषन्तः पापकृत्यामित्यस्योत्तराघं विषयः स्यादिति मत्वा सुहृदः साधुकृत्यामि-त्यस्य को विषय इत्युक्तम्, ॥ सू० अतोऽन्यापि ह्येकेषामुभयोः ॥ १७ ॥ भुक्तं भुज्यमानं भोक्ष्यमाणं प्रतिबद्धफलं चेति विविधं कर्म, तत्र पूर्वकृतं पश्चाच्च वृष्ट्यचादिहेतोः कृतं प्रतिबद्धफलं कर्मास्ति तद्विषया सुहृदः साधुकृत्या-मिति श्रुतिरश्लेषविनाशश्रुतिश्चेत्यर्थः । अनन्तरसूत्रसंगतिमाह "अनुष्ठि-तस्यापी"ति, पूर्वोक्तं स्मारयतीति पृथग्घ्य प्रतिबन्धः फलमिति सूत्रेण कण्ठोक्तमत्र स्मारयतीत्यर्थः । सू० यदेव विद्ययेति हि ॥ १८ ॥ सूच्यते हीति, अयं हि-शब्दः पृथग्घ्यप्रतिबन्धः फलमित्यत्र हि-शब्दवचोपप-त्तिप्रसिद्धिद्योतकः किन्तूपपादितप्रसिद्धिद्योतकः । परे तु तत्कार्या-येति ज्ञानस्य यत्कार्यं मोक्षस्तदर्थमिति व्याख्याय ज्ञानकार्यस्य मोक्षस्य कर्मकार्यत्वं विद्योत्पत्तिद्वारेणेत्यौपचारिकमिति वदन्ति, ततो वरं

ज्ञानाख्यकार्यायेति व्याख्यानम् उत्पन्ने सम्यग्दर्शने विदुषः शास्त्रवश्यत्वाभावात् विद्यायाः प्रागनुष्ठितकर्मविषयं तत्कार्यार्थत्वाभिधानम् । यद्वा सगुणविद्यासु कर्तृत्वानतिवृत्तेर्विद्योत्पत्तावपि तस्याग्निहोत्रादिसंभवात् तद्विषयमिति चाहुः । तदपि सम्यग्दर्शनवतामपि प्रत्यहमन्तःकरणशुद्ध्यर्थमग्निहोत्रादेरनुवर्त्तनीयतायाः स खल्वेवं वर्त्तयन् यावदायुषमिति श्रुतिसिद्धत्वात्सगुणनिर्गुणविद्याविभागस्याप्रामाणिकत्वाच्चानुपपन्नम् । अतोन्यापीति साधुकृत्यावाक्यं काम्यविषयमित्याहुः ॥

यदेव विद्ययेति सूत्रमधिकरणान्तरमाहुः तेनोभौ कुरुतः यश्चैतदेवं वेद यश्च न वेदेत्युद्गीथादिविद्यासंयुक्तमसंयुक्तं च कर्म तत्र विद्यासंयुक्तं कर्म प्रकृष्टं ब्राह्मणाय दद्यादित्युक्तत्वेऽपि विद्यां व्रतवते तद्याच मूर्खायेति विशिष्टविषयत्वसिद्धिवद्यज्ञेनेत्यविशेषणेनोक्तेऽपि विद्यासंयुक्तविशिष्टकर्मविषयत्वसिद्धेर्विद्यासंयुक्तकर्मण एव ज्ञानार्थत्वमिति पूर्वपक्षं कृत्वा तदेव वीर्य्यवत्तरमिति श्रवणाद्विद्याविधुरस्य वीर्य्यवत्त्वमात्रं गम्यत इति तावदुपकारहेतुत्वादविशेषेणासंयुक्तमपि कर्म ज्ञानार्थमनुष्ठेयमिति सिद्धान्तयन्ति, तदयुक्तं यज्ञेनेत्यविशेषश्रवणाद्वेदानुवचनदानादीनामिव विद्याविधुरस्य यज्ञस्य ज्ञानार्थत्वप्रतीतेः यज्ञस्यैव ब्रह्माश्रयोपासनं न दानादेः, ब्राह्मणायेत्युक्तेऽपि विलक्षणपात्रसिद्धिवदित्यप्ययुक्तं दानमश्रोत्रिये यथा अश्रोत्रिये श्राद्धमधीतमव्रतमित्यादिनिषेधवचनान्तरवासितमनस्कस्य तदेकार्थ्याद्विशेषविषयत्वप्रतीतिर्न तु वचनान्तरनिरपेक्षा, इह तु वाक्यान्तरेण विद्याविधुरयज्ञस्य ज्ञानार्थत्वप्रतिषेधादर्शनाद्यज्ञविशेषविषयप्रतीत्यभाव एव, यथा स्वर्गकामो यजेत यज्ञेन देवेभ्य इत्यादिषु विद्यासंयुक्तयज्ञाप्रतीतिः, अतः पूर्वपक्षानुत्थानदनादरणीयतैव । अपरे तु तत्कार्य्यायाऽपवर्गायेति समुच्चयपरमाहुः तदयुक्तं ज्ञानकर्मसमुच्चयस्याप्रामाणिकत्वात् । ते च यदेव विद्ययेति सूत्रमुपेक्षिषत तदयुक्तं यदा परोक्तयोजनैव स्यात् तदा ह्यानर्थक्यं प्रतिबद्धकर्मद्योतनरूपप्रयोजनसद्भावादपरेषां मतिमान्द्यमेव तेन द्योतितं, समुच्चयाप्रामाणिकत्वदोषोऽन्येषामपि तुल्यः ।

आनदरणीय तैवेति पा० ।

अन्ये तु विद्यासहकारिणां कर्मणां विद्यया प्रहाणसम्भावनाया एवाभावाद्विद्याधिगमात् प्राग् जन्मान्तरे चानुष्ठितकाम्यव्यतिरिक्तनित्यनैमित्तिककर्मविषयमिदमधिकरणं व्याचक्षते राजनियोगानुष्ठायिनां संमाननाप्राप्तिवत् स्वाधिकारार्थानामप्यग्निहोत्रादीनामपवर्गाऽवान्तरफलं भवतीत्यप्रमाणमिति सिद्धान्तयन्ति, य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयत इति वचनमत्र प्रमाणयन्ति यस्य तु खलु संस्काराणामेकदेशोऽप्यष्टावात्मगुणा अथ स ब्रह्मणः सायुज्यं सालोक्यं च गच्छतीति गर्भसंस्कारादेरपवर्गार्थत्वविषयस्मृत्युपबृंहितत्वात् प्रागनुष्ठितस्यापवर्गार्थत्वसिद्धिरिति तदयुक्तम् उदाहृतवचनस्य विद्याधिगमात् प्रागनुष्ठितकर्मविषयत्वे स्वरसतः प्रामाण्याभावात् कथंचिदापाद्यमानस्यानुपपन्नत्वाच्च कर्तृत्वममताफलविषयवि[1]विधत्यागभावे कर्मणोऽपवर्गार्थत्वायोगाद्वेदान्तज्ञानात् पूर्वं त्रिविधपरित्यागानुपपत्तेश्च तदानुष्ठितस्यापवर्गार्थत्वायोगाद्विद्यासहकारिणां कथं विद्यया प्रहाणाशङ्केति चेन्न अश्लेषविनाशश्रुतिबलेन विद्यासहकारित्वनिश्चयस्य प्रतिबद्धत्वात् तद्विषयश्रुतेरर्थवादत्वाश्रयणोपपत्तेः, परविद्याकार्य्यमपि जनयन्ति यज्ञादयः किं पुनः स्वर्गमिति हि स्तोतुं शक्यम्, अतः प्रागनुष्ठितविषयत्वमनादृत्य विद्वत्सम्बन्ध्याश्रमधर्मविषयत्वाश्रयणं युक्तम् अतोऽन्यापीति सूत्रेण प्रहाणवचनं विनियोगवचनं च काम्यविषयमित्युक्ते मोक्षार्थं कर्म तु न प्रहीयते किं त्वाब्रह्मलयात्तमनुगच्छति एवं काम्यानि विज्ञानानि च देहान्ते प्रहीयन्ते नित्यानि विज्ञानानि विद्वांसमनुगच्छन्ति इति कर्मसु ज्ञानेषु च विभागमुक्त्वा नित्यानि विज्ञानानि न सन्तीति शङ्कामापाद्य तत्परिहारपरं यदेव विद्ययेति सूत्रं व्याचक्षते कर्मसमृद्ध्यर्थं विज्ञानं हि विहितं तत्र काम्यकर्मसमृद्ध्यर्थं विज्ञानं प्रहीयते मोक्षार्थकर्मसमृद्ध्यर्थं विज्ञानमनुगच्छतीति अत्र ब्रूमः मोक्षार्थं कर्म विद्वांसमनुगच्छतीत्येतन्मुमुक्षोश्चरमदेहपाते? उत तद्व्यतिरिक्तदेहपाते,? प्रथमे कल्पे नायं विभागः ज्ञानकर्मसमुच्चयस्य निरस्ततया विद्योत्पादनमात्रचरितार्थस्य कर्मणो मोक्षार्थमनुगत्यनुपपत्तेः, द्वितीये

१ त्रिविधत्यागाभावे इति पा० ।

तु कृत्स्नसुकृतदुष्कृतप्रहाणाभावात्काम्यं कर्म प्रहीयते मोक्षार्थमनुगच्छतीति विभागोऽनुपपन्नः, यतः कर्मणां विद्याङ्गत्वमेव न मोक्षार्थत्वम् अत एव मोक्षार्थकर्मसमृद्ध्यर्थं विज्ञानमनुगच्छति काम्यकर्मसमृद्ध्यर्थं विज्ञानं प्रहीयत इति च विभागोऽनुपपन्नः । ननु मुमुक्षोश्चरमेतरदेहपातेऽपि विद्याङ्गकर्मसमृद्ध्यर्थं विज्ञानमनुगच्छति इतरत्प्रहीयत इति विभङ्गपरं सूत्रं स्यादिति चेत् चरमदेहपातात् पूर्वमशेषसुकृतदुष्कृतप्रहाणाभावेन सुकृतसमृद्ध्यर्थज्ञानस्यापि प्रहाणायोगात् उपकार्य्यानुगमाननुगमानुगुणौ हि उपकारकानुगमाननुगमौ, अत एव हि मोक्षार्थकर्मसमृद्ध्यर्थविज्ञानानुगमस्त्वयोच्यते, अतः प्रतिबद्धफलसाधुकृत्योपपादनमाकाङ्क्षितमिति तत्परत्वमेव सूत्रस्य युक्तम् ॥ अग्निहोत्राद्यधिकरणं समाप्तम् ॥

इतरक्षपणाधिकरणम् । **सू० भोगेन त्वितरे क्षपयित्वाऽथ संपद्यते ॥ १९ ॥**

भ्रू० यथोः पुण्यपापयोरश्लेषविनाशावुक्तौ ताभ्यामितरे आरब्धकार्य्ये पुण्यपापे किं विद्यायोनिशरीरावसाने? उत तच्छरीरावसाने? शरीरान्तरावसाने वेत्यनियम? इति संशये, तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति तच्छरीरविमोक्षावसानत्वश्रवणात्तदवसाने इति प्राप्त उच्यते "भोगेन त्विति, तु–शब्दः पक्षव्यावृत्त्यर्थः, इतरे आरब्धकार्य्ये पुण्यपापे स्वारब्धफलभोगेन क्षपयित्वा ।

टी० सू० भोगेन त्वितरे क्षपयित्वाऽथ संपद्यते ॥ १९ ॥ सङ्गतिः स्फुटा, आरब्धकार्य्ये पुण्यपापे किं विद्यायोनिशरावसाने? उत तच्छरीरावसाने? देहान्तरावसाने वेत्यनियमः? किं तस्य तावदिति वाक्यं विद्यायोनिशरीरावसानमवगमयति? उत शरीरमतन्त्रीकृत्य फलभोगावसानमवगमयती? ति, प्रथमे विद्यायोनिशरीरावसानत्वं, द्वितीये त्वनियमः। पूर्वपक्षहेतुं परिहरति "तस्य तावद"ति, यावन्न विमोक्ष्ये इत्यत्र देहस्तदव-

The suggestiveness of Letters and Style will be exemplified when we shall treat of the forms of Excellence (Chap. VIII.)

Thus with the former divisions of *Rasa* &c. there are *six* (*a*) forms.

Of Suggestion—51 forms.

43.—*contd.* Thus there are fifty-one (*b*) forms.

These have been already explained.

By various combinations, come to 10,404.

43-44. [*Page* 210]. By the mutual combination of, and this by the threefold Commixture and single Uniform Conjunction,—

The 51 pure forms do not make the whole. Since by multiplying these by fifty-one, the number of their own sub-divisions, and by (*c*) four, *i. e.* Uniform Conjunction (when the divisions are independent of one another), and the three Commixtures (when the divisions may be dependent upon each other)—*viz:* Dubiousness, Mutual Subserviency and Co-substrateness in a single suggestive agent,—

(*a*) वाक्य-पद-पदैकदेश-रचना-वर्ण-प्रबन्धप्रकाश्यतया.

(*b*) I.—अविवक्षितवाच्य has two forms : अर्थान्तरसंक्रमित and अत्यन्ततिरस्कृत, each of these belonging to पद and वाक्य make up 4

II.—विवक्षितान्यपरवाच्य अलक्ष्यक्रमव्यङ्ग्य belonging to पद,वाक्य,पदैकदेश,-वचन-रचना,वर्ण and प्रबन्ध, makes up 6

III.—विवक्षितान्यपरवाच्य लक्ष्यक्रमव्यङ्ग्य has

2 of शब्दशक्तिमूल, each belonging to पद and वाक्य makes	4	
12 of अर्थशक्त्युद्भव, each belonging to पद,वाक्य and प्रबन्ध makes	36	41
1 of उभयशक्तिमूल	1	
Original Total ...		51

These 51 by mutual combination become (51 + 51) = 2,601.

These again from threefold commixture and one uniform conjunction, make up 2,601 × 4 = 10,404.

These with the original 51 make up 10,404 + 51 = 10,455.

(*c*) Thus explained by *Pradipa :—*

The combination when the various members are either directly or indirectly dependent upon each other, is Commixture (संकर) ; distinct from this, when the various members of the combination are independent of each other, is Uniform Conjunction (संसृष्टि). The former of these the (संकर) is threefold—(1) Sometimes there arises a doubt 'if this or that is to be accepted' there being no reasons either *pro* or *con* the one or the other, this is Dubiousness ; (2) sometimes one suggestion becomes subservient to another, by mere statement,—and this is mutual subserviency ; and (3) all suggested significations belonging to a single suggestive agent, rest together in that agent and thus become co-substrate.

44.—*contd.* it becomes the number consisting of Moon (1), Sky (0), Four (4), Sky (0), and Vedas (4) [10,404].

[*Page* 212]. These, with the pure forms, make up—

44.—*contd.* The number consisting of Moon (1), Sky (0), Doubles (4), Arrow (5), and Arrow (5) [10,455].

Total 10,455.

These are only partially exemplified.—

"Oh my husband's brother! has the poor woman, having come here for a moment, been told some thing by your wife? She is weeping at the back of the house. Go, console the poor creature."

The Commixture of Dubiousness.

Here it is doubtful whether 'consoling' is transferred to another meaning, *i. e.* dalliance (thus making the suggestion one of transferred denotation and hence अविवक्षितवाच्य), or that it directly suggests dalliance itself in the manner of an echo, thus making the suggestion the विवक्षितान्यपरवाच्य.

"The clouds have lines of white cranes and are anointed with black lustre; the wind is cool; the pleasant sounds of the friends of clouds (peacocks) is heard; let all these be. I am Rāma, of cruel heart, I will bear all. But ah! how will the daughter of Videha be! O lady, have fortitude!"

Mutual Subserviency.

Here in 'anointed' and in 'friends of clouds' there is conjunction of expressed meaning altogether neglected. And there is the commixture of mutual subserviency arising from the mixture of these two with 'I am Rāma' with its expressed meaning transferred to another sense; and also the commixture of co-substrateness due to the suggestiveness belonging to the word Rāma, arising from the mixture of the above two (*i. e.* that in 'anointed' and 'friends of clouds') with the *rasa* and suggestion of the word, having its expressed meaning transferred to another (*a*).

Similarly may others be exemplified.

Thus ends Chapter IV. of *Kāvyaprakāça* in which is described Suggestive Poetry.

(*a*) *Vivarana:* "The suggestion of the word 'Rāma' is self-deprecation; and of the whole sentence, the Erotic in Privation is the suggestion; and this latter (privation) may also be said somehow to be suggested by the word 'Rāma'; and thus both these (self-deprecation and privation) would be merged in the suggestiveness of the word 'Rāma' alone."

CHAPTER V.

ON POETRY OF SUBORDINATE SUGGESTION.

[*Page* 215]. Having thus determined Poetry Suggestive, the author next states the divisions of Poetry of Subordinate Suggestion:

Poetry of Subordinate Suggestion described.

45-46.—Implication (suggested meaning) being (1) Explicit, (2) Subordinate to another, (3) Subordinate to the accomplishment of the direct expressed meaning, (4) Abstruse (5) of Doubtful Prominence, (6) of Equal Prominence, (7) Manifested by Emphasis, and (8) Not Beautiful or Disagreeable,—makes up the eight divisions of Poetry of Subordinate Suggestion.

[*Page* 216].—(Suggestion), like the breasts of a handsome woman, has its full charm only when covered (hidden); whereas the one which is explicit through its obviousness, touches the precincts of expression, and thus becomes subordinate.

(1) The Explicit, *e. g.*—

(1) The Explicit Subordinate Suggestion, (*a*) having the expressed meaning transferred to another object.

"What should I say who, having at present become the agent for knitting together the girdle-zone, do not really live, though existing,—I, in whose ears, the enemy's insults appeared as a piercing needle."

Here suggestiveness belongs to '*though existing*' which has its meaning transferred to another (*i. e.* ignonimous existence).

(*b*) The Explicit, in which the expressed meaning is altogether neglected.

"The black bees, honey-drinkers, having their bodies coloured tawny by the dust of the full-blown red-lotus, sing sweetly among the tanks; and there shineth the solar disc bright as the Bandhujīva flower, kissing the Rising Mount."

Here suggestiveness belongs to 'kissing' which has its expressed meaning altogether neglected (implying mere connection or conjunction).

"Here was the process of entrapping by serpentine noose; on this place was the Drona Hill brought over by Hanuman when thy husband's brother was struck in the breast with the missile; on this place was Indrajit sent to another world by the excellent arrows of Lakshmana; and here (finally) O thou fawn-eyed! was the forest-like line of the necks of the chief of Rakshasas, cut down by some one." [*Bāla-Rāmāyaṇa, Act X.*]

(c) Explicit, based on the power of meaning.

(*a*) Here suggestiveness belongs to '*by some one*' which has its echoed meaning—reference to Rāma himself—based on the power of meaning. कस्यापत्र would have been the proper reading.

[*Page* 220]. '*Of another*,' *i. e.* of *Rasa*, &c. or of Expression, forming the meaning of a sentence; '*Part*' *i. e.* (*a*) *Rasa* (when the order of precedence is imperceptible) or in the shape of an echo (when the order of precedence is perceptible). *e. g.*

"This is the very hand! the puller of the girdle-zone, the presser of plump breasts, the toucher of the navel, thighs and hips, and the loosener of the cloth-knot!'

(2) Subordinate to another—*Rasa*—subordinate to (*a*) *Rasa*.

[*Page* 221]. Here the Erotic is subservient to the Pathetic.

"May the sheen of the footnails of Pārvati ever protect you,—the sheen having its painting of *alakta* manifested, as it were, by the brightness of the eye of the Dweller of Kailāça, and which excited by emulation instantly removes the fully developed brightness of the eyes, resembling the red lotus and as such having reached its perfection.'

(*b*) *Rasa* of Emotion.

[*Page* 222]. Here *Rasa* (Enjoyment—Erotic) is subordinate to Emotion, affection of the poet for Pārvati).

"'On all sides appear very high mountains; there are oceans wide spreading; bearing even all these, thou art not tired, O Earth! so reverence to thee!' while thus filled with wonder, was I singing the praises

(*c*) Emotion of Emotion.

(*a*) Since the subordination of a fully developed *Rasa* is an impossibility; therefore *Rasa* must be understood to stand for the permanent emotion—says the *Com.*

of the earth, the thought of your arms O king! holding even this earth (in sway) put a stop to my words."

[*Page* 223]. Here the Emotion, the Poet's regard for the Earth, is subservient to that for the king.

(*d*) Semblance of *Rasa* and Emotion of Emotion.

"Your Soldiers, O King! having captured the fawn-eyed wives of your enemies, embrace them, bow to them, carry them about and kiss them, even in the very presence of their (captive) beloveds. And yet by those enemies of yours, you are praised in such strains as,— 'O thou the ocean of propriety, your appearance before our eyes was owing to our past good deeds, and all our calamities have been removed by you'."

[*Page* 224]. Here the semblance of *Rasa* (the Erotic) in the first half and that of Emotion (regard for the conqueror) in the second, are subservient to Emotion (the poet's regard for the king).

(*e*) The allayment of Emotion, of Emotion.

"The pride of the enemies were quite apparent in their brandishing of swords, motions of their eye-brows and the roaring; but on seeing you (O King!) all that pride disappeared."

Here the Allayment of Emotion (Pride) is subservient to Emotion (poet's regard for the king).

(*f*) The appearance of Emotion, of Emotion.

[*Page* 225]. "On the occasion of your foe setting about a drinking revelry in company of his friends and his deer-eyed consort, your name being mentioned with reference to a different thing, quite discomfited him and produced in him queer sensations."

Here the manifestation of Fear (is a part of Emotion, regard for the king).

(*g*) The mixture of Emotion, of Emotion.

"May the Destroyer of Kāma ordain your happiness—He, simultaneously seized by precepitancy and languor, while removing his disguise of a Brāhmana-boy, being unable to bear the over-zealous officiousness of the penance, manifesting itself at that age, and at the same time fondly gratified at Pārvati's confidently affectionate manner of address."

६३१

[*Page* 226]. Here the Union of Flurry and Equanimity is subordinate to Emotion, the poet's regard for the king.

(*h*) The variegation of Emotion, of Emotion.

"'O thou fickle one! Some one might see us! Move away! What is the hurry? I a virgin! Offer me the support of your arms! Ah! this inverted order of things! Where are you going?' thus O Lord of the Earth! does the daughter of your foe retired to a forest, address somebody, while she is collecting flowers."

[*Page* 227]. Here, the Variegation of Apprehension ('somebody might see us'), Envy ('move away'), Equanimity ('what is the hurry?'), Recollection ('I a virgin!'), Weariness ('offer me the support'), Depression ('ah!'), Resolve ('an inverted order of things!'), and Longing ('where are you going?')—is a part of Emotion, regard for the king.

(*a*) These are the Figures, *Sentimental*, &c., including (1) the Sentimental, (2) the Agreeable, (3) the Powerful, (4) the Quiescent; (5) the Manifestation—(6) Union—and (7) Variegation, of Emotion.

(*b*) Though the manifestion, mixture and variegation of Emotions have not been spoken of as Figures; yet some person (the author of *Alankārasarvasva* among others) might call them so, hence they are exemplified.

[*Page* 228]. (*c*) Though there is no instance where there is no combination—either in such a way as to make one subordinate to the other, or have both of equal prominence—of the different forms of poetry, Suggestive and that of Subordinate Suggestion, yet according to the law that (*d*) 'appellations are based on predominance,' different names are given to different instances.

(*a*) This is said with reference to the assertion—'these will be exemplified under 'subordinate suggestion'—*i. e. Com.* to *K.* 36.

(*b*) The question started may be thus clearly laid down: out of the seven Sentimental &c., four—the Sentimental, (having *Rasa*), the Agreeable *or* subordinate Emotion, Powerful or subordinate semblance of *Rasa* and Emotion, and Quiescent or the allayment of Emotion—having been mentioned before as Figures by preceding writers as Sentimental Figures, they may be accepted as such; but whence the application of the name to the Manifestation, &c., of Emotion.

(*c*) This is said in reply to an anticipated objection that in many of the instances cited above, suggestion is easily perceptible through *occasion*, &c. then why call them poetry of subordinate suggestion?

(*d*) That appellation is given, in and through which lies the charm.

[*Page* 229]. जनस्थाने भ्रान्तं कनकमृगतृष्णान्धितधिया
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम् ।
कृतालंकाभर्तुर्वदनपरिपाटीषु घटना
मयाऽऽप्तं रामत्वं, कुशलवसुता न त्वधिगता ॥

(*i*) Suggested Figure, a part of expressed meaning.

["I wandered among men, (Janasthana, a portion of the Dandaka forest) blinded by a miragic solicitude for gold (blinded by desire for the golden deer), every where saying with tearful eyes, 'O give me!' (on every step weeping and calling 'O Vaidehi') and enough did I flatter with lies, the meanly rich people (directed arrows to the row of heads of the king of Lankā), —having done all this, I became endowed with the properties of Rāma, but I never came across perfect richness (the mother of Kusa and Lava)."]

[*Page* 230]. (*a*) Here the similarity with Rāma—of the form of echo-like suggestion based on the power of a word—is made subordinate to the expressed meaning.

(*j*) Suggested Matter, a part of the expressed meaning.

[*Page* 231]. "See, O thou delicate one! the Sun, returning after having passed the night elsewhere (having removed night) is conciliating by falling on her feet (by means of his rays) the lotus, having her body withered through pangs of separation (contracted at night)."

[*Page* 232]. Here the description of a lover, in form of suggested matter, based on the power of meaning, stands as an implantation on (and thus helping the charm of) the expressed meaning, the description of the Sun and the lotus—which is independent of it.

(*a*) Thus explained by Com.—
Here the similarity of the speaker with Rāma implied by the first three lines, through power of the word, is meant to be merely auxilliary to the development of the expressed meaning—that 'I became endowed with the properties of Rāma.'

[*Page* 233]. To exemplify (*a*) Subordinate Suggestion *which is part of the accomplishment of the expressed meaning.*

(3) Suggestion part of the development of the suggested meaning.

"The rains (poison) from the serpent-like (in cruelty) clouds make the minds of separated women unsteady, produce in them a dislike of sensuous objects and lassitude, make them senseless, completely prostrate their internal and external organs, thin their bodies and bring about the departing time of life."

[*Page* 234]. (*b*) Here 'poison' is suggested, which develops the expressed meaning, 'the serpent.'

[*Page* 235]. Or again,

"May Krishna protect you,—Krishna having his body covered all over with horripilation on embracing the cowherdess who had signified her depression and lassitude caused by purposeless stay, by means of the mode of address and gestures, saying—"O Achyuta (of undisturbed equanimity)! I am going; what satisfaction can arise by merely looking on you? People will think otherwise of us staying together in this solitary place."

Here the meaning suggested by the terms 'Achyuta,' &c. is a part of the development of the expression 'address, &c.'

[*Page* 236]. The former of these two examples belongs to one (the poet alone) and the latter to two speakers (the cowherdess in the first half and the poet in the second), and in this lies their difference.

To exemplify the Abstruse (Subordinate Suggestion).—

(4) Abstruse subordinate suggestion,

"There is no comfort to me from you either when seen or unseen, in the former (I am troubled by) the fear of separation, and in the latter (by) a longing to see you."

(*a*) The difference between the 'part of the expressed meaning' and 'part of the development of the expressed meaning,' is that in the former case, the expressed meaning is not in any way dependent upon the suggested meaning, whereas in the latter the full comprehension of the expressed meaning is not possible without the suggested meaning.

(*b*) The *Kāvyapradīpa* thus explains this :—

The meaning of the word *visha*, 'poison' is suggested; the denotation of *visha* being restricted (by context) to water, the suggested meaning, poison, completes the comprehension of the expression 'serpent-like cloud.'

Here the meaning suggested is—'you must make some such arrangements as would never make you unseen and would remove all possibility of separation,'—and this is really abstruse (not readily comprehensible by even poetical men).

[*Page* 237]. To exemplify Subordinate Suggestion of Doubtful Prominence.—

(5) Of Doubtful Predominance.

"Çiva, having his equanimity slightly disturbed like the ocean on the rise of the full moon, directed his eyes towards Gauri's face with Bimba-like lips." [*Kumāra-Sambhava,* Canto. III.]

Here it is doubtful to which prominence is implied, whether to the implied meaning that he desired to kiss her, or to the mere action of the eye, the expressed meaning.

To exemplify Subordinate Suggestion of Equal Prominence.—

(6) Of Equal Prominence.

"To give up the tormenting of Brāhmanas will bring good to you; otherwise their friend, like Paraçurāma, will be displeased."

[*Page* 238]. Here equal prominence applies to the expressed meaning (the exhortation for taking to other means of his advancement than the tormenting of Brāhmanas) and the suggested meaning that 'Paraçurāma will exterminate the Rākshasas, as he did the Kshatriyas.'

To exemplify Subordinate Suggestion manifested by Emphasis.—

(7) Manifested by Emphasis.

"Shall I not wrathfully destroy the hundred Kurus in battle? Shall I not drink the blood from Duhsasana's heart? Shall I not smash Duryodhana's thighs with my mace? Let your King make peace by an amicable settlement."

[*Page* 239]. Here the suggested meaning 'I shall surely destroy, &c.' stands along with its directly expressed negation.

To exemplify the "not-beautiful" (Disagreeable)—

(8) The not-beautiful (disagreeable.

"On hearing the chatter of parrots flying from the Betasa-bower, her body—taken up as she was by household duties—sinks down."

[*Page* 240]. Here the expressed meaning—the sinking of the body—is more charming than the suggested one—that her paramour had entered the bower, which was the assigned place.

The division of the Poetry of subordinate suggestion follows that of the Suggestive Poetry.

46.—The divisions of these (the poetry of subordinate suggestion), must be understood to be, as far as possible, as before (*i. e.* like the divisions of Poetry Suggestive).

'*As far as possible*'—(because) (*a*) where Figure is suggested by Matter pure and simple, the suggestion is not subordinate, as laid down by Ānandavardhanāchārya, the author of Dhvani: "Where Figures are suggested by mere Matter, they surely belong to suggestion,—since Poetry is dependent (founded) on that (*i. e.* Figure)."

Combinations of the various kinds of Poetry suggestive and those of Poetry of subordinate suggestion.

47. (*contd.*)—[*Page* 242]. (*b*) There arises the combination of (the divisions of Poetry of subordinate suggestion *i. e.*) those (*i. e.* the unctional, &c.) assuming the form of Figure and the expressed Figures themselves, with the divisions of Poetry suggestive—the combination being *per* subserviency and *per* equality.

(*a*) Thus the *Com.*—

The sense is—Figure is far more charming than expressed matter; and as such even where the charm of suggestion is removed, as in the divisions just stated, the charm due to Figure remains untouched; and as such in a place where Figure is suggested, it is only Poetry of Suggestive, and not one of subordinate, suggestion.

(*b*) Figure suggested by matter, is ninefold (see Chap. IV.) Thus the pure divisions of Poetry of subordinate suggestion becomes:—51 (the division of Poetry suggestive)—9 (the nine just mentioned) × 8 (the independent divisions, explicit, &c.) = 336. These, by mutual combination, are 336 × 336 = 112896, and these by the threefold commixture and onefold uniform conjunction (see Chap. IV.) 112896 × 4 = 451584; and these with the pure divisions, 451584 + 336 = 451920.

(*a*) *By those Figures* (*i. e.* by the subordinate suggestions in the shape of the Figures *Samāsokti*, *unctional*, &c.) and '*by those having the Figure* (*i. e.* by the poetry with the Figure Simile where suggestion of matter is subordinate), as is said by the author of the Dhvani.

"That (suggestive poetry) again becomes manifold through the combination, *per* subserviency and *per* equality, of its own independent divisions with poetry of subordinate suggestion together with the expressed Figure."

47.—[*Page* 243]. By this mutual combination, the number of divisions becomes (*b*) very great.

[*Page* 245]. *By this*, &c.—By counting the subdivisions, *e. g.*, there are endless divisions and subdivisions of the Erotic alone, not to think of other *Rasas*.

Briefly then, of suggestive poetry there are three divisions, based on the threefoldness of suggestive meaning (Matter, *Rasa* and Figure). Of these some (Matter pure and simple and Figure) can bear (are capable of) (*c*) the expressed meaning also; others (*Rasa*) on the contrary, cannot. Of these again those not capable of the expressed meaning again are either disagreeable or agreeable; of these the former is the suggested Matter pure and simple, and the latter, the suggested Figure (though, this is the predominating element, being the prominent suggestion, and hence something to be embellished and as such cannot itself be an Figure, yet it is spoken of as such, in consideration of its form previous to its being suggested, like the ex-

---

(*a*) Here the *Com.*—

This is said in reply to a question :—Poetry without Figure being impossible, how can there be a combination of Poetry suggestive and of subordinate suggestion, unmixed with (free from) Figure? The reply is—such combination is possible on account of the possibility of the absence of other Figures, where the Figures Unctional, &c. occur. As a matter of fact the combination of poetry suggestive is with poetry of subordinate suggestion, as well as with the expressed Figure.

(*b*) For the almost incredible number, the reader cannot but be referred to the quotation from the Sudhāsāgara given by P. Jhalkikara.

(*c*) Thus explained by Narsinha Thakur.—

Capability of bearing the expressed meaning: means possession of charm or beauty in denotation pure and simple, (as ललना).

pression ('A Brāhmaṇa-ascetic).' *Rasas* and the like, can never even in a dream be said to be directly expressed. The *Rasa* (the essence) is never *denotable* by such terms as *Rasa* (generic) or the *Erotic* &c. (special) used to express it;—it is said to be *not denotable,* since even if the words '*Rasas* &c.' are used there would be no notion of the *Rasa,*—the essence—in the absence of the excitant, &c.; and if these latter are present, then there is an idea of the Essence even in the absence of such words as '*Rasa*' &c. Thus it is established that on account of invariable concomitance, the essence of *Rasa* is known through the denotations of the excitant, &c.

Thus then this *Rasa* can only be a suggestion,—since there being no barring of the primary meaning, &c., it cannot be due to indication.

Suggestion as a process, necessary, apart from all other processes of signification.

[*Page* 247]. It has already been shown before that without the implication of mere matter by a process of suggestion in which the denoted meaning is transferred to another and that in which it is altogether neglected,—without such suggested matter Indication (*a*) itself is not possible. In the case of a suggestion per power of the word, the denotation of the word being restricted, the suggestion of other undenoted meanings and with them the Figure, Similie, &c., is undisputable.

[*Page* 248]. In the case of suggestion per power of meaning also,—according to the view that 'it is not proper to apply convention to the individual' and where it is held that the specific meaning of the sentence, which is made up of (consists on) the mutual combination of the meanings of words in the form of *Classes* through expectancy, compatibility and proximity, is not the meaning (denoted) of the word,—according to this theory, the *abhihitanvayavâda* (see *Supra,* Ch. II.), (when even the meaning of a sentence is denied to be a denotation) there is no question with regard to the denotation of the suggested meaning (a step farther than the direct meaning of the sentence).

(*a*) This is with reference to the suggestion of the motive of Indication. (See p. 56 Text *Supra Indication*).

[*Page* 249]. Others (the Anvitabhidanavadis) assert—(1) '(The inexperienced child) *perceives* the word, the two experienced people (old and young) and the action denoted by the words; and secondly the same child *infers* from his action, the capability of the hearer (the experienced youth) to comprehend, and lastly he understands the twofold power (consisting on the denotation of the sentence, the substratum and the denotability of the meaning, the object) of the word (*i. e.* the relation of the denoting sentence with its meaning), by means of Inference from circumstances; since otherwise (without the relation of the denoter and the denotated) the knowledge of the action of the ox, &c.) will not be complete. Thus the child ascertains the connection (the conventional meaning) by means of the three means of right notion (Perception, Inference, and Inference from Circumstances)."

The meaning of this is—First of all the experienced elder having said 'Devadatta, bring the cow,' the experienced youth brings a substance with dew-laps, &c. (and so far the child has recourse to mere perception); from this action of the youth the child infers that 'by this sentence, such a meaning is expressed;' and then he ascertains by means of inference from circumstances the relation of the denoter and the denoted, to subsist between the unbroken sentence (the sentence taken as a whole) and the meaning (the bringing of the cow); and thus by this threefold process the child comes to comprehend the meaning of the sentence. After this, from such sentences as 'Chaitra, bring the cow; Devadatta bring the horse; Devadatta take away the cow,' the child comes to comprehend such and such meanings; and thus on account of concomitance (affirmative as well as negative (*i. e.* per *modus pollens* and *modus tollens*) the sentence alone is capable of use, on account of its being the cause of the activity or cessation from action (as of the experienced youth above, in the second example); and as such convention is applicable only to the words in a sentence, which are related to each other by means of related word-meanings. Thus only the word-meanings related to one another make up the meaning of the sentence; and to the word-

meanings themselves, there is no relation (independently of the meaning of the sentence). Though it might be said that the very same words though used in a different sentence, are comprehended by means of their previous recognition, and as such the word-meaning alone, as connected with another is capable of convention, yet all connected word-meanings being specific in their character, the conventional meaning (all 'bringing') is known (in each case) only as of a special character, (*i. e.* applying to the bringing of the particular object spoken of, to which alone it is related in the sentence) pervaded over by a genus (*i. e.* a property common to 'bringing' also related to word-meanings other than the one used).

[*Page* 253]. According to this view also, the object of convention is the word-meaning of a specific form based on a common property; and as such the farther specific word-meaning included in the sentence meaning is not denoted, for want of convention on the point. (In a theory where such is the case with the specific signification of a word) what is to be said with regard to the affirmative implications of negative assertions in such instances as—"The sandal paintings of thy breasts have disappeared, &c.," where the implied meaning is altogether opposed to the one expressed?

Thus the *connected generally* (according to the Abhihitanvayavadis;) and *that connected with word-meaning alone*, (according to the Anwitabhidhanavadis), and *that specific related* (according to both),—all such clausal meanings cannot be said to be directly expressed by the words.

[*Page* 254]. (*a*) Some (Mīmāmsakas) again lay down the law that 'Causes are assumed in accordance with effects.' Here we ask, is the cause, an active (that which produces or creates the meaning) or a significant one (that which signifies or makes

(*a*) The objection underlying this law may be thus stated—The knowledge of the suggested meaning must have a cause, which in the absence of any other, must be the word,—which again is not possible without the relation of the signifier and the signified; and as such denotation alone is the (connotative) power of a word.

known)? In the present case Word cannot be the former, since it merely specifies (the meaning); and being itself unknown, it cannot be the latter. Every meaning is known only through convention, and this again lies in mere connection (general), and as such before the causal efficacy of the cause (*i. e.* the word) is ascertained, whence the knowledge of the effect (*i. e.* the suggested meaning)? Consequently the law that 'causes are assumed in accordance with effects' is an inconsiderate assertion.

[*Page* 255.] *Objection:* Some again (Bhattalottata and others) lay down that the action of a word in suggesting resembles that of a swift arrow entering the body and taking away the life of the enemy (that is to say, just as the arrow through its velocity alone pierces the body and subsequently kills the man, so in the same manner a word through its singlefold power, that of denotation, denotes as well as suggests farther meanings), and again that 'the denoted meaning of a word is that with a view to which sense it is used by the speaker' and hence in the example ('The sandal paintings, &c.') the denoted meaning is the import with which the sentence is spoken, that is, that 'thou hadst gone, &c.'

To all this we make the following *reply:* These loved of the Gods (beasts) have not understood the meaning of the saying that 'the denoted meaning of a word is the sense in which it is used.' Because 'when both the Subject and the Predicate are pronounced, the former is used for the sake of the latter (*i. e.* it is used to complete the meaning of the predicate which by itself would give almost no sense). The meaning of the term used as the subject, related as it is to the meaning of the predicate, and being the substrate of an independent action of its own to help the chief action (as for example the moving of the cow to help the to principal action of bringing the cow), becomes itself something to be accomplished (*i. e.* though as subjects they are accomplished, yet being connected with their independent action they assume the form of the predicate). Thus in accordance with the law of 'burning the unburnt,' only the unconnoted portion of full deno-

tation of word or phrase is denoted. As for example, by saying 'the sacrificial priests proceed with red turban,' the simple proceeding of the priests having been known through other means, the predicate to be connoted by the assertion is merely their wearing the red turban. And similarly by saying 'offers sacrifice with curd,' the 'offering' (and the presence of curd) being known through other means, the connotation lies merely in the instrumentality of the curd with regard to the offering.

The predication may be single, twofold, or even threefold,—in 'weave a red cloth,' it may be all (*a*) the three. Hence by saying "the import lies only in so much as is *predicated*" (*b*) what is meant is that the import belongs only to the direct meaning of a word pronounced; not to any and every (*c*) knowlege arising therefrom; for in that case the idea of the "following" in saying "the preceding runs" would become the import (for it is also a knowledge arising from the pronounced word, since 'preceding' presupposes something following it).

(Here it is objected—you say that import belongs only to a pronounced word; this will not hold good in all cases for) in the assertion "Poison yourself,—and do not eat in his house," the import lies in 'it is not advisable to eat in his house' (which is quite distinct from anything directly connoted by the sentence 'Poison yourself').

To this it is replied—in the above assertion, the 'च' ('and') conjoins the two sentences. The relation of subserviency (necessary in this case) cannot be through the sentences as they stand, since they have two independent verbs; consequently the subser-

(*a*) If the weaver has been told nothing yet, then the predication is threefold—*weaving, cloth, red.* If he has been told that he will have to *weave*, then twofold; and lastly if he has been told to *weave cloth*, then singlefold.

(*b*) On this word *Vidheya* I cannot do anything better than quote the footnote given by the Translator of the Sahitya-darpana, on p. 271. "It is necessary to remark here that the Sanskrita word *Vidheya* is not restricted to the sense of *predicate*, but is used also in the signification of a word that gratifies the expectation raised by a previous word."

(*c*) The suggestion neither has its denotative word pronounced nor is it the predicate.

अविशेषात्तु शास्त्रस्य यथाश्रुति फलानि स्युः ॥ ४ ॥

एवमेव समिधो यजतीत्यादिप्रतिपाद्यानामपि पुरुषार्थतैव स्यादित्याशङ्क्यते । अविशेषात्त्विति । शास्त्रस्य समिधो यजतीति शास्त्रस्य नेदंतोद्यन्तमादित्यमित्यस्मादविशेषात् । कर्तृत्वेन कर्मण्यन्वयसंभवात् । यथाश्रुति तत्समीपे श्रूयमाणार्थवादप्रतिपाद्यानि फलानि स्युः ॥ ४ ॥

अपि वा कारणाग्रहणे तदर्थमर्थस्यानभिसंबन्धात् ॥ ५ ॥

समिदादिवैषम्यं दर्शयति । अपि वेति । कारणाग्रहणे श्रुतिलिङ्गादिषट्प्रमाणानां मध्ये कस्याप्यनुपलब्धौ सत्यां तदर्थं पुरुषार्थं नेदंतेति विहितं कर्म अर्थस्य कस्यापि कर्मणः प्रजापतिव्रतैः अनभिसंबन्धात् । एकाधिकारपाठतत्वरूपसंबन्धाभावात् । अनारभ्यपाठ एव समिदादिवैषम्यं दर्शयतीति भावः ॥ ५ ॥

तथा च लोकभूतेषु ॥ ६ ॥

उक्तार्थे लोकानुभवमप्याह । तथा चेति । लोकभूतेषु जनरूपेषु मूर्खजनेष्वपीति फलितम् । अनुभवो दृश्यतइति शेषः । स्नानं कुरु पाकं कुर्वित्युक्ते स्नानं पाकार्थमिति जानाति । केवलं स्नानं कुर्वित्युक्ते स्वतन्त्रफलकमेव तज्जानातीति भावः ॥ ६ ॥

यज्ञायुधानामनुवादत्वम् । अधि० ४ ।

द्रव्याणि त्वविशेषेणानर्थक्यात्प्रदीयेरन् ॥ ७ ॥

स्फ्यश्च कपालानि चाग्निहोत्रहवणी च शूर्पं च कृष्णाजिनं च शम्या चोलूखलं च मुसलं च दृषच्चोपला चैतानि वै दश यज्ञायुधानीति श्रुतम् । अत्र किमेतानि द्रव्याणि होमसाधनानि उत स्वस्वकार्यसाधनानीति संशये पूर्वपक्षमाह । द्रव्याणीति । द्रव्याणि उदाहृतवाक्ये श्रुतस्फ्यादीनि प्रदीयेरन् देवतोद्देशेन दातव्यमानर्थक्याद् वाक्यवैयर्थ्यापातात् । यद्यपि प्रदेयत्वे, वाक्ये अश्रुतान्यविशेषेण अङ्गप्रधानार्थानि वेदिवत्, तथा ऽपि अविशेषेण, श्रुतान्यपि इति शेषः । प्रदीयेरन्नित्यन्वयः । यज्ञायुधानीत्यत्र यज्ञशब्दस्य प्रधाने रूढत्वात्तदङ्गत्वमेवेति भावः ॥ ७ ॥

स्वेन त्वर्थेन संबन्धो द्रव्याणां पृथगर्थत्वात्तस्माद्यथा-श्रुति स्युः ॥ ८ ॥

सिद्धान्तमाह । स्वेनेति । स्वेनार्थेन स्फ्येनोद्धन्ति, कपालेषु श्रपयति, अग्निहोत्रहवण्यां हवींषि निर्वपतीति श्रुतस्वस्वकार्यैः द्रव्याणां स्फ्यादीनां संबन्धः । पृथगर्थत्वात् पृथक्पृथक्प्रयोजनश्रुतेः । यथाश्रुति पृथग्वाक्यविहितेनार्थेन संबन्धः । यज्ञायुधवाक्यमनुवादकमेवेति भावः ॥ ८ ॥

चोद्यन्ते चार्थकर्मसु ॥ ९ ॥

साधकान्तरमाह । चोद्यन्तइति । अर्थकर्मसु पात्रप्रतिपत्तिकर्मसु चोद्यन्ते आहिताग्निमग्निभिः पात्रैश्च दहन्तीति विधीयन्ते । होमार्थत्वे प्रतिपत्तिरनुपपन्नेति भावः ॥ ९ ॥

लिङ्गदर्शनाच्च ॥ १० ॥

उक्तार्थे लिङ्गमप्याह । लिङ्गेति । चतुर्दश पौर्णमास्याम् अमावास्यायां त्रयोदशाहुतय इति संख्याश्रवणं लिङ्गं, दशद्रव्यैराहुतिवृद्धौ श्रूयमाणसंख्या विरुध्येतेति भावः ॥ १० ॥

पश्वेकत्वविवक्षा । अधि० ५ ।

तत्रैकत्वमयज्ञाङ्गमर्थस्य गुणभूतत्वात् ॥ ११ ॥

यदग्नीषोमीयं पशुमालभतइति श्रुतं, तत्र पशुपदोत्तरप्रत्ययवाच्या संख्या विवक्षिता ऽविवक्षिता वेति संशये पूर्वपक्षमाह । तत्रेति । तत्र उदाहृतवाक्यादौ एकत्वं संख्यामात्रमयज्ञाङ्गं यागाङ्गं न भवति यागान्वितं न । अतो ऽविवक्षितमिति फलितो ऽर्थः । अर्थस्य स्वप्रकृत्यर्थपश्वादेः गुणभूतत्वाद्विशेषणत्वात् । अयं भावः । यज्ञाङ्गत्वे तदङ्गस्यैकत्वस्य वैकल्ये यज्ञः फलसाधनक्षमो न भवतीति तद्विवक्षणमावश्यकम् । पशुगतैकत्वविवक्षणे च न किं चिद्बाधकम् । अतो ऽविवक्षैव युक्तेति ॥ ११ ॥

एकश्रुतित्वाच्च ॥ १२ ॥

साधकान्तरमाह । एकेति । एकश्रुतित्वाद्, एकां गां दक्षिणां दद्यात्तेभ्य एवेति वचने एकपदश्रवणात् । अयं भावः । यदि पश्वादि-

संख्या विवक्षिता तदा गां दद्यादित्यत्रैकवचनेनैवैकत्वप्राप्तावेकपदं व्यर्थं स्यात् । अतो ऽविवक्षितेति ॥ १२ ॥

प्रतीयतइति चेत् ॥ १३ ॥

पूर्वपक्षमाक्षिपति । प्रेति । प्रतीयते गामानयेत्युक्ते शिष्यैरेकैव गौरानीयतइति एकत्वस्यापि शाब्दविषयतया प्रवेशो दृश्यतइति विवक्षा ऽऽवश्यकीति भावः ॥ १३ ॥

नाशब्दं तत्प्रमाणत्वात्पूर्ववत् ॥ १४ ॥

इदमशाब्दमिति सदृष्टान्तमाह । नेति । पशुमालभेतेत्यादावेकत्वप्रतीतिः न, यत्प्रतीयते तदशाब्दं शब्दजन्यप्रतीतिविषयो न । तद् एकपदश्रुत्यात्मकं प्रमाणं यस्मिन्वाक्ये तत्त्वात् । अयं भावः । श्रूयमाणैकत्वस्य स्वाश्रयकरणकत्वसंबन्धेन यागे धात्वर्थे ऽन्वये यागस्य पदान्तरोपात्तत्वेन वाक्येन विनियोगः, पशावन्वये एकपदश्रुत्या विनियोगः इति, वाक्याच्छ्रुतिर्बलीयसीति, यदि शाब्दं तदा श्रुत्यैव विनियोगो वाच्यः, स च निष्फल इत्युक्तं प्रागतो ऽशाब्दमिति । अत्र दृष्टान्तमाह । पूर्ववद् यथा पूर्वो धावतीति श्रवणे अपरं विना पूर्वासंभवाद् अपरो ऽप्यस्तीत्यशाब्दी प्रतीतिः तद्वत् ॥ १४ ॥

शब्दवत्तूपलभ्यते तदागमे हि तद्दृश्यते तस्य ज्ञानं यथा ऽन्येषाम् ॥ १५ ॥

सिद्धान्तमाह । शब्देति । शब्दवद् एकत्वादिसंख्याविषयकं ज्ञानं जन्यतासंबन्धेन शब्दविशिष्टं प्रतीयते अनुभूयते संख्याविषयकः शाब्द एवेति भावः । कथमवगतमत्राह । तदागमे एकवचनश्रवणे तद् एकत्वविषयकं स्मरणं दृश्यते अनुभूयते लोकैः । तस्य तद्विषयकं ज्ञानं शाब्दं भवति । यत्पदश्रवणे यद्विषयकस्मरणं तद्विषयः शाब्दबोधः यथा अन्येषां गवादिविषयकशाब्दबोधानां शाब्दबोधत्वं तथैवात्रेति भावः । इत्थं च स्वाश्रयकरणकत्वसंबन्धेन यागे ऽन्वयः । तथा च यागाङ्गस्य सफलस्य विवक्षणमावश्यकम् । एकपदश्रुतिः एकत्वत्वेन रूपेण घटादेकत्वस्याप्युप-

स्थितौ स्वप्रकृत्यर्थे तद्गतैकत्वं व्यावर्तयत् चरितार्थो वाक्यविनियोगं न बाधतइति तत्परिहारो बोध्यः ॥ १५ ॥

तद्वच्च लिङ्गदर्शनम् ॥ १६ ॥

तद्वदुक्तार्थानुरूपमेव लिङ्गदर्शनम्। कर्णा याम्याः अवलिप्ता रौद्राः नभोरूपाः पार्जन्या ऐन्द्राग्ना दशम इति त्रित्वस्य विवक्षायामेवोपपद्यते। अतो ऽस्ति विवक्षा ॥ १६ ॥

लिङ्गस्य विवक्षा। अधि० ६।

तथा च लिङ्गम् ॥ १७ ॥

यथा संख्या तद्वदेव पुंस्त्वादिलिङ्गं विवक्षितम्* ॥ १७ ॥

आश्रयिणामदृष्टार्थता। अधि० ७।

आश्रयिष्वविशेषेण भावो ऽर्थः प्रतीयेत ॥ १८ ॥

उत्तमप्रयाजस्विष्टकृदादिभिर्दैवतादिस्मरणप्रतिपत्त्यादिरूपसंस्कारो दृष्ट एवोतादृष्टमपि किं चिदशेन भवतीति संशये सिद्धान्तेनोपक्रमते। आश्रयिष्विति। ये परकीयद्रव्यदेवतमंशेन संस्कारत्वेनाश्रयन्ति ते आश्रयिणः उत्तमप्रयाजस्विष्टकृदादयः। तेषु, भाव्यतइति भावो ऽर्थः अपूर्वं प्रतीयेत कल्प्येत। मन्त्रोच्चारणादग्न्यधिकरणकद्रव्यसंयोगपूर्वको देवतोद्देशेन द्रव्यत्यागो यज्यर्थः। तत्र मन्त्रोच्चारणस्य देवतास्मरणं हविष्प्रक्षेपस्य शिष्टविनियोग इति द्वयोः सफलत्वे ऽपि त्यागांशस्य न किमपि दृष्टं फलमतो ऽपूर्वं कल्प्यतइति भावः। कुतः, यजतिददातिजुहोत्यादिभिः अपूर्वप्रयोजनैः अविशेषेण वैलक्षण्याभावात्। यथा सोमेन यजेतेत्यादिवाक्यानामपूर्वकल्पकत्वं तथा स्वाहाकारं यजतीत्यादिवाक्यानामपि तथेति भावः ॥ १८ ॥

चोदनायां त्वनारम्भो ऽविभक्तत्वान्न ह्यन्येन विधीयते ॥ १९ ॥

पूर्वपक्षमाह। चोदनायामिति। चोदनायां विधौ अंशानामनारम्भः अंशविध्यभावः अविभक्तत्वाद् विधितात्पर्यविषयीभूतस्य विशिष्टार्थत्वे-

* पूर्वाधिकरणांशो ऽधिकरणान्तरं वेति भाष्यकारः।

नानंशत्वात्। अन्येन विशिष्टविधायकशब्दातिरिक्तेन अंशो न विधीयते। एकविधिप्रतिपाद्या भावना एकं फलमपेक्षते। तच्च देवतास्मरणादिना निराकाङ्क्षमतो नात्रापूर्वं विधिविषय इति भावः॥ १९॥

स्याद्वा द्रव्यचिकीर्षायां भावोऽर्थे च गुणभूतता ऽऽश्रयाद्धि गुणीभावः॥ २०॥

पूर्वपक्षयुक्तिं दूषयन् सिद्धान्तं व्यवस्थापयति। स्यादिति। चिकीर्षायां द्रव्यादिसंस्कारचिकीर्षायां सत्यामपि संस्कारे विधितात्पर्यसत्त्वेऽपीत्यर्थः। यागतः भावः अपूर्वं स्यात्। हि यस्माद् आश्रयात् स्वप्रधानात् स्वस्य गुणीभावः अङ्गत्वमतः यागांशभूतमन्त्रोच्चारणयोः अर्थे संस्काररूपार्थे गुणीभावः, त्यागांशस्य न तत्र गुणत्वं संभवतीत्यदृष्टं कल्प्यम्। यदुक्तमंशानां न विधितात्पर्यमिति तन्न। अंशांशिनोरभेदादिति भावः॥ २०॥

प्रयोज्यप्रयोजकभावनिरूपणप्रतिज्ञा। अधि० ८।

अर्थेन समवैषम्यमतो द्रव्यकर्मणाम्॥ २१॥

एतावत्पर्यन्तं शेषशेषिभावं निरूप्येतः परमेतदध्यायप्रतिपाद्यप्रयोज्यप्रयोजकभावो निरूप्यतइति प्रतिजानीते। अर्थेनेति। अर्थेन फलेन संबन्धवेलायां द्रव्यकर्मणां मैत्रावरुणदण्डदध्यानयनरूपाणां समवैषम्यं, प्रतिपाद्यते इति शेषः॥ २१॥

दध्यानयनस्य आमिक्षाप्रयोज्यत्वम्। अधि० ६।

एकनिष्पत्तेः सर्वं समं स्यात्॥ २२॥

तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति। अत्र दध्यानयनम् आमिक्षा वाजिनमित्युभयार्थमुतामिक्षार्थमेवेति संशये पूर्वपक्षमाह। एकेति। एकनिष्पत्तेः एकदैव आमिक्षावाजिनयोरुत्पत्तेः सर्वं ताभ्यां दध्यानयनस्य संबन्धः समं स्यात्। युगपन्निष्पन्नत्वेनानेनैव संबध्यतइति नियन्तुमशक्यत्वादिति भावः॥ २२॥

संसर्गरसनिष्पत्तेरामिक्षा वा प्रधानं स्यात्॥ २३॥

सिद्धान्तमाह। संसर्गेति। संसर्गेण दधिसंसर्गेण आमिक्षायां रसोत्पत्तेः विनिगमकत्वात् प्रधानं दध्यानयनप्रवृत्त्युद्देश्यमामिक्षा, वाजिनं तु न तथेति॥ २३॥

मुख्यशब्दसंस्तवाच्च ॥ २४ ॥

अर्थवादे आमिक्षास्तुतेः सा प्रधानमित्याह। मुख्येति। मिथुनं वै दधि च शृतं च यत्संसृष्टं वस्तु स गर्भ एवेति। यथा मिथुनीभावस्य मुख्यं कार्यं गर्भः तत्सादृश्यप्रतिपादनेन मुख्यशब्देन गर्भशब्देन संस्तवादपि सा मुख्या ॥ २४ ॥

गवानयनस्य पदकर्माप्रयोज्यत्वम्। अधि० १०।

पदकर्माप्रयोजकं नयनस्य परार्थत्वात् ॥ २५ ॥

एकहायन्या सोमं क्रीणातीत्युक्त्वा षट् पदान्यनु निष्क्रामति सप्तमं पदमध्वर्युरञ्जलिना गृह्णातीत्यप्युक्त्वा तेनाक्षमुपाञ्ज्यादिति श्रुतम्। तेन सोमक्रयी सप्तमपदपांसुना अक्षं सोमस्य राज्ञः शकटावयवं योजयेदिति तदर्थः। अत्र एकहायन्याः पदन्यासः क्रयमात्रोद्देश्यकः उताक्षाञ्जनमप्युद्देश्यमिति संशये अविशेषादुभयार्थमिति पूर्वपक्षे सिद्धान्तमाह। पदेति। पदकर्म पांसुभिरक्षाञ्जनमप्रयोजकमनुद्देश्यं नयनस्य एकहायनीनयनस्य परार्थत्वात् सोमक्रयार्थत्वात्। अयं भावः एकहायन्या क्रीणातीति तृतीयाश्रुत्या क्रयाङ्गं सा तन्नयनमप्यत एव तदङ्गमतः क्रय एवोद्देश्य इति अक्षाञ्जनमानुषङ्गिकमिति ॥ २५ ॥

कपालानां तुषोपवापाप्रयोज्यत्वम्। अधि० ११।

अर्थाभिधानकर्म च भविष्यता संयोगस्य तन्निमित्तत्वात्तदर्थो हि विधीयते ॥ २६ ॥

कपालेषु पुरोडाशं श्रपयतीति, तथा पुरोडाशकपालेन तुषानुपवपतीति। कपालसंपादनमुभयार्थमुत केवलं श्रपणार्थमिति संशये विनिगमनाविरहादुभयार्थमिति पूर्वपक्षे सिद्धान्तमाह। अर्थेति। अर्थेन पुरोडाशश्रपणात्मकफलेन सहाभिधानं यस्य कपालस्य तत्साध्यं कर्म तुषोपवापादि, अप्रयोजकमिति शेषः। एतत्सूचनार्थ एव पुरोडाशपदयुक्तकपालपदप्रयोग इति भावः। ननु तुषोपवापकाले पुरोडाशसंबन्धो नास्ति कथं पुरोडाशकपाल इति वाक्ये संगतं तत्राह। भविष्यता पुरोडाशेन यः संयोगः तस्यैव तन्निमित्तत्वात् पुरोडाशकपालेतिव्यवहारनिमित्तत्वात्। अतः भाविसंबन्धविशिष्ट एव तुषोपवापफलको विधीयते ॥ २६ ॥

अकर्म्मलोहितयोः पशावप्रयोजकत्वम् । अधि० ११ ।

पशावनालम्भाल्लोहितशकृतोरकर्मत्वम् ॥ २७ ॥

पशोः आलम्भनं, तत्समीपे हृदयस्याग्रे ऽवद्यत्यथ जिह्वाया इति, लोहितं निरस्यति शकृत्प्रविध्यतीति । आलम्भ उभयार्थं उत केवलं हृदयाद्यवदानार्थं इति संशये पूर्ववत्पूर्वपक्षे सिद्धान्तमाह । पशाविति । पशौ पशुयागे लोहितशकृन्निरासयोः अकर्मत्वमप्रयोजकत्वम् । तदुद्देशेनेति लोहितशकृन्निरासोद्देशेन अनालम्भात् संज्ञपनाभावात् । उत्पत्तिवाक्ये पशोर्यागार्थत्वेन विधानादिति भावः ॥ २७ ॥

पुरोडाशस्य स्विष्टकृदप्रयुक्तत्वम् । अधि० १२ ।

एकदेशद्रव्यश्चोत्पत्तौ विद्यमानसंयोगात् ॥ २८ ॥

दर्शपूर्णमासयोः श्रूयते, उत्तरार्धात्स्विष्टकृते ऽवद्यतीति । तथा ऽग्न्याद्युद्देशेन प्रधानयागो ऽपि विहितः । एवं सति पुरोडाशनिर्माणमुभयार्थमुत प्रधानार्थमेवेति संशये उभयार्थमिति पूर्वपक्षे सिद्धान्तमाह । एकदेशेति । एकदेशः उत्तरार्धरूपं द्रव्यं यस्य स स्विष्टकृद्यागः अप्रयोजकः । यदाग्नेयो ऽष्टाकपाल इत्युत्पत्तौ उत्पत्तिवाक्ये विद्यमानसंयोगात् क्लृप्तसंबन्धात् ॥ २८ ॥

निर्देशात्तस्यान्यदर्थादिति चेत् ॥ २९ ॥

उक्तयुक्तिमङ्गीकृत्य प्रकारान्तरेण शङ्कते । निर्देशादिति । तस्याग्नेयपुरोडाशस्य निर्देशाद् इदमग्नेरिति क्लृप्तत्वात्तस्य देवतान्तरोद्देशेन दानासंभवात् । अर्थात्स्विष्टकृद्विध्यन्यथानुपपत्त्या अन्यत्स्वतन्त्रं पुरोडाशनिर्माणमिति ॥ २९ ॥

न शेषसन्निधानात् ॥ ३० ॥

निराकरोति । नेति । शेषस्य आग्नेयादिशेषस्य सन्निधानात् । स्विष्टकृदर्थे विद्यमानत्वात् विध्यनुपपत्तिरिति भावः ॥ ३० ॥

कर्मकार्यात् ॥ ३१ ॥

युक्त्यन्तरमाह । कर्मेति । कर्मणः स्वसेवायाः कार्यात् फलरूपत्वेन स्तुतेः । स्तुतिवाक्यं देवा वै स्विष्टकृतमब्रुवन् हव्यं नो वहेति

सो ऽब्रवीदुत्तरार्धान्मह्यं दीयतामिति । लोके स्वसेवकाय यद्दीयते तत्स्वभुक्तशेषमेव दीयते न तु तदर्थं पाकः क्रियते तथेति भावः ॥ ३१ ॥

लिङ्गदर्शनाच्च ॥ ३२ ॥

लिङ्गेति । तद्यत्सर्वेभ्यो हविर्भ्यः स्विष्टकृते समवद्यतीत्यर्थवादे सर्वेभ्य इति दर्शनं लिङ्गम् ॥ ३२ ॥

अभिघारणे शेषधारणतत्पात्रयोरननुष्ठानम् । अधि० १३ ।

अभिघारणे विप्रकर्षादनूयाजवत्पात्रभेदः स्यात् ॥ ३३ ॥

वाजपेये सप्तदशप्राजापत्यपशूनां पर्यग्निकरणं कृत्वा कालान्तरे ब्रह्मसाम्न्यालम्भनं विहितम् । तथा प्रयाजशेषेण हवींष्यभिघारयतीति श्रुतम् । ब्रह्मसाम्न्यालम्भोत्तरं वपाभिघारणपर्यन्तं जुह्वां प्रयाजशेषस्थापनं न संभवति । जुह्वाः कार्यान्तरसत्त्वात् । अतः प्रयाजशेषं पात्रान्तरे स्थाप्यमुत वपाभिघारो निवर्ततइति संशये पूर्वपक्षमाह । अभिघारेति । अभिघारणे कर्तव्ये सति कालान्तरहविषा विप्रकर्षाद्दूरवर्तित्वात्पात्रभेदः स्यात् । यथा तत्रैव अनूयाजसाधनपृषदाज्यधारणार्थं पात्रान्तरं तथा ॥ ३३ ॥

न वा ऽपात्रत्वादपात्रत्वं त्वेकदेशत्वात् ॥ ३४ ॥

समाधत्ते । नेति । न पात्रान्तरंधारणमपात्रत्वाद् धारणपात्रस्याविहितत्वात् । ननु अभिघारणस्य कर्तव्यतया अर्थसिद्धं पात्रान्तरमत आह । एकदेशत्वात् प्रयाजार्थविनियुक्तशेषत्वादाज्यस्य । अयं भावः । शेषाभिघारणं प्रतिपत्तिसंस्कारः । न च तृतीयाश्रुत्या ऽङ्गत्वम् । सक्तुन्यायेन विभक्तिविपरिणामे शेषं हविःषु चारयेदित्यर्थात् । तथा च समये यावन्ति हवींषि तावदभिघारणेव चारितार्थ्यमिति । पृषदाज्यस्यानूयाजाङ्गत्वेन तद्धारणमावश्यकमिति ॥ ३४ ॥

हेतुत्वाच्च सह प्रयोगस्य ॥ ३५ ॥

ननु श्रूयमाणविभक्तिविपरिणामे किं मानमित्यत्र प्रबलं लिङ्गमित्याह । हेतुत्वादिति । सह प्रयोगस्य क्रतुपशुप्राजापत्यपशूनां सहानु-

ष्ठानस्य हेतुत्वाद् हेतुत्वेनार्थवादे संस्तवात् । तीर्थे वै प्रातःसवनं यत्प्रातःसवने सह पशव आलभ्यन्ते तीर्थे एवैतानालभते ऽथो वपानामभिघृतत्वायेति । अनभिघृतासु वपासु उपायान्तरेणाभिघारलाभो लिङ्गमिति भावः ॥ ३५ ॥

अभावदर्शनाच्च ॥ ३६ ॥

लिङ्गान्तरमाह । अभावेति । अभावस्य अभिघाराभावस्य दर्शनात् । क्व चिदर्थवादइति पूरणीयम् । सव्या वा एतर्हि वपा यर्ह्यनभिघारिताः ब्रह्म वै ब्रह्मसाम यद्ब्रह्मसाम्न्यालभते नासव्याः तेनाभिघृताः इति । सव्याः अनभिघारेण रूक्षाः स्नेहसंबन्धहीना इत्यर्थः । यद्यभिघारो ऽभिप्रेतः तर्हि सव्या इत्यनुपपन्नम् ॥ ३६ ॥

सति सव्यवचनम् ॥ ३७ ॥

उक्तलिङ्गमनुपपन्नमित्याशङ्कते । सतीति । सति वपाया अभिघाराभावे रूक्षतासिद्धिरिति सव्यवचनं वास्तवार्थप्रतिपादकं सद् लिङ्गं भवेत् । तदेव न । पञ्चावत्तत्वसंपत्तये उपस्तरणाभिघारसत्त्वादतो ऽवास्तवार्थकं सत् स्तावकमात्रं न लिङ्गम् । इति चेद् इति अधिसूत्रस्थमत्रान्वेति ॥ ३७ ॥

न तस्येति चेत् ॥ ३८ ॥

उत्तरयति । नेति । तस्य चतुरवत्तावयवाभिघाराभावप्रतिपादकं सव्यवचनं न ॥ ३८ ॥

स्यात्तस्य मुख्यत्वात् ॥ ३९ ॥

सव्यशब्देन द्योत्यमानाभावप्रतियोगि कीदृशं तत्राह । स्यादिति । तस्य यत्प्रयाजशेषाभिघारणं तस्याभावद्योतकं स्याद् मुख्यत्वात्प्राधान्यात् ॥ ३९ ॥

समानयनस्याज्यधर्मप्रयोजकत्वम् । अधि० १४ ।

समानयनं तु मुख्यं स्याल्लिङ्गदर्शनात् ॥ ४० ॥

दर्शपूर्णमासयोः श्रूयते, अतिहायेडः समानयतउपभृत इति ।

इदमुपभृतः समानयनं प्रयाजार्थमुत अनूयाजाज्यसंस्कार इति संशये यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तद् यदुपभृति प्रयाजानूयाजेभ्यस्तदित्यनेन चौपभृताज्यस्यापि यावत्सूयाजार्थत्वेन प्रथमप्रयाजात्प्रागेव ग्रहणस्य प्राप्तत्वेनातिहार्येति वाक्येनानूयाजद्रव्ये संस्कारार्थमेवानयनं विधीयत-इति बहिः पूर्वपक्षे सिद्धान्तमाह । समेति । समानयनमुपभृतः समानयनं मुख्यं प्रधानकर्म, न द्रव्यसंस्कारः लिङ्गदर्शनात् । लिङ्गं तु आतिथ्याप्रकरणे चतुर्गृहीतान्याज्यानि भवन्ति न ह्यत्रानूयाजान्यत्यन् भवतीति । अयं भावः यद्यनूयाजाज्यसंस्कारः समानयनं तदा प्रयाजे जुह्वाज्यमुपभृदाज्यं वेति विकल्पः सिद्धः । आतिथ्यायामनूयाजाभावेन अनूयाजचतुर्गृहीतं निवृत्तं, प्रयाजार्थं जुह्वामेकं चतुर्गृहीतं ध्रुवायामेकमिति द्वे चतुर्गृहीते इति आज्यानीत्यनुपपन्नम् । जुह्वाज्यं प्रयाजत्रयार्थमुपभृदाज्यं प्रयाजद्वयार्थमिति प्रयाजे आज्ययोः समुच्चयपक्षे अनूयाजाभावे ऽपि प्रयाजार्थमुपभृति चतुर्ग्रहणसत्त्वात्तेन सह बहुत्वमुपपन्नम् । अतः आनयनं प्रयाजार्थम् ॥ ४० ॥

वचने हि हेत्वसामर्थ्यम् ॥ ४१ ॥

ननु उक्तवाक्यं नार्थवादः किं तु विधायकम् । इत्थं चानूयाजनिवृत्तावपि वचनादुपभृति अपूर्वार्थे चतुर्ग्रहणम् । इत्थं न लिङ्गं तदिति तद्विरोधो ऽपि नेत्यत आह । वचनइति । वचने विधौ सति, हेतोः हेतुप्रतिपादकस्य न ह्यत्रानूयाजान् यक्ष्यन्भवतीत्यस्य असामर्थ्यं स्वारस्याभावः । मन्मते अष्टावुपभृति गृह्यन्ते प्रयाजानूयाजोभयार्थमन्यत्र । अत्र यतो ऽनूयाजाभावः अतः चतुर्गृहीतान्येव सर्वाणि क्व चिदष्टाविति स्वरसं हेतुकथनमिति भावः ॥ ४१ ॥

औपभृतजौहवयोः क्रमेणोभयानुभयार्थत्वम् । अधि० १५ ।

तत्रोत्पत्तिरविभक्ता स्यात् ॥ ४२ ॥

चतुर्जुह्वां गृह्णाति अष्टावुपभृति इति । इदमाज्यं सर्वं सर्वार्थमुत विभज्य विनियोग इति संशये पूर्वपक्षमाह । तत्रेति । जौहवाद्याज्ये

उत्पत्तिः ग्रहणोत्पत्तिप्रतिपादकं वाक्यं कार्यविशेषासंयुक्ता । अतः अविभक्ता । सर्वं सर्वार्थं, यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तदित्यादिवाक्यान्यवयुत्यानुवादकानीति भावः ॥ ४२ ॥

तत्र जौहवमनूयाजप्रतिषेधार्थम् ॥ ४३ ॥

सिद्धान्तमाह । तत्र जौहवमिति । जौहवं यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तदिति वाक्यम् अनूयाजप्रतिषेधार्थम् । चतुर्जुह्वां गृह्णातीत्युत्पन्नग्रहणस्य फलाकाङ्क्षायाः प्रयाजेभ्यस्तदित्यनेन प्रयाजार्थत्वे सिद्धे अनूयाजनिवृत्तिरार्थिकीति भावः ॥ ४३ ॥

औपभृतं तथेति चेत् ॥ ४४ ॥

ननु शाखान्तरे यदुपभृति गृह्णाति अनूयाजेभ्यस्तदिति श्रुतं तेन अनूयाजार्थत्वे सिद्धे प्रयाजसंबन्ध औपभृताज्यस्य न स्यादिति शङ्कते । औपभृतं तथेति । व्याख्यातकल्पम् ॥ ४४ ॥

स्याज्जुहूप्रतिषेधान्नित्यानुवादः ॥ ४५ ॥

यदुपभृति प्रयाजानूयाजेभ्यस्तदित्यनेन अनूयाजेभ्यः जुह्वाज्यप्रतिषेधे उभयार्थत्वव्यवस्थायाः सिद्धौ औपभृताज्यस्य अनूयाजसंबन्धस्य नित्यसिद्धस्यानुवादकमुक्तशाखान्तरवाक्यमित्याह । स्यादिति ॥ ४५ ॥

उपभृति द्विः चतुर्गृहीताचरणम् । अधि० १६ ।

तदष्टसंख्यं श्रवणात् ॥ ४६ ॥

अष्टावुपभृतीति अष्टत्वसंख्याविशिष्टं विधत्ते उत चतुर्गृहीतद्वयमितिसंशये पूर्वपक्षमाह । तदिति । तद् उक्तवाक्यविधेयमष्टसंख्यं श्रवणादुक्तवाक्ये श्रवणात् ॥ ४६ ॥

अनुग्रहाच्च जौहवस्य ॥ ४७ ॥

साधकान्तरमाह । अनुग्रहादिति । जौहवस्य जुहूसंबन्ध्याज्यस्य औपभृताज्येन मेलने श्रूयमाणार्थवादस्यानुग्रहात् । अर्थवादवाक्यं तु चतुर्गृहीतं वै यत्स्रुग्भूत्तस्याघारमाघार्य त्रिरितः प्राचीनं प्रयाजान्यजति समा-

नयतउपभृतः चतुर्गृहीतत्वायेति । अत्र चतुर्गृहीतपदमल्पपरम् । अल्पत्वं किंचिदवधिकम् । तच्च स्ववृत्तिपरिमाणादधिकपरिमाणमपेक्षते । तच्चाष्टत्वसंख्यायामुपभृत्यष्टौ जुह्वां चतुर्गृहीतमाघारप्रयाजोभयपर्याप्तये नालमतः औपभृताज्यग्रहणेन तत्पर्याप्तिः कार्येत्यर्थवादः संगच्छतइति भावः ॥ ४७ ॥

द्वयोस्तु हेतुसामर्थ्यं श्रवणं च समानयने ॥ ४८ ॥

सिद्धान्तमाह । द्वयोः चतुर्गृहीतयोः विधिः, न अष्टत्वावच्छिन्नस्य । यतः आतिथ्यायां चतुर्गृहीतान्याज्यानि भवन्ति न ह्यत्रानूयाजान्यक्ष्यन् भवतीति चतुर्गृहीताज्यबहुत्वे अनुयाजाभावस्य हेतुत्वकथनमतः । अयं भावः । द्वयोश्चतुर्गृहीतयोः विधौ एकचतुर्गृहीतस्यानूयाजनिवृत्त्या निवृत्तौ सर्वेषु चतुर्ग्रहणं तुल्यमिति बहुवचनमप्युपपन्नमिति । नन्वेवं सति द्वे चतुर्गृहीते इति पठेद् नाष्टाविति तत्राह । श्रवणमष्टत्वश्रवणं समानयने ग्रहणे, पात्रभेदाभावद्योतकमिति शेषः । एकस्मिन्नेव द्वयोर्ग्रहणमिति भावः ॥ ४८ ॥

इति श्रीजैमिनिसूत्रवृत्तौ चतुर्थाध्यायस्य प्रथमः पादः ॥ १ ॥

स्वरोश्छेदनाद्यप्रयोजकत्वम् । अधि॰ १ ।

स्वरुस्त्वनेकनिष्पत्तिः स्वकर्मशब्दत्वात् ॥ १ ॥

यूपस्य स्वरुं करोतीति श्रुतम् । अत्र यूपक्रियातो भिन्नक्रियया स्वरुरुत्पाद्यः उत यूपक्रिययैव अनुनिष्पन्नः स्वरुरिति संशये पूर्वपक्षमाह । स्वरुरिति । स्वरुः काष्ठशकलम् । अनेकनिष्पत्तिः यूपक्रियातः स्वतन्त्रक्रियया निष्पत्तिः उत्पत्तिर्यस्य सः । स्वकर्मशब्दत्वात् स्वरुं करोतीति स्वतन्त्रवाक्येन तस्योत्पत्तिश्रवणात् ॥ १ ॥

जात्यन्तराच्च शङ्कते ॥ २ ॥

साधकान्तरमाह । जात्यन्तरेति । स्वरुप्रकरणे तदीयोऽर्थवादः जात्यन्तरं यूपप्रकृतिवृक्षभिन्नवृक्षप्रकृतिकत्वं शङ्कते, यदन्यस्य वृक्षस्य स्वरुं कुर्यादन्यस्य लोकमारोहेद्यूपस्य स्वरुं करोतीति । यदि यूपादनुनि-

च्चः स्वरुः, अन्यस्य वृक्षस्येति शङ्का नोदेति। अतः स्वतन्त्रक्रियया निष्पाद्यः॥ २॥

तदेकदेशो वा स्वरुत्वस्य तन्निमित्तत्वात्॥ ३॥

सिद्धान्तमाह। तदिति। तदेकदेशः यूपैकदेशः यूपक्रियया अनुनिष्पाद्य इति फलितम्। स एव स्वरुः स्वरुत्वस्य स्वरुपदवाच्यस्य तन्निमित्तत्वाद् यूपनिमित्तत्वात्। यूपशब्दार्थविध्यर्थमनुवाद्यत्वादिति निष्कर्षः। अयं भावः यूपस्य स्वरुं करोतीत्यत्र न धात्वर्थविधिः किं तु स्वरुणा पशुमनक्तीतिविध्यन्यथाऽनुपपत्त्यैव सिद्धस्वरुक्रियामनूद्य यूपशब्देन स्वप्रकृतिकत्वं विधीयते। अतः स्वकर्मशब्दत्वादिति हेतुः असिद्ध इति भावः॥ ३॥

*शकलश्रुतेः॥ ४॥

द्वितीयसूत्रं दूषयति। शकलेति। यः प्रथमः शकलः परापतेत्स स्वरुरिति श्रुतेः। यूपार्थं छिद्यमानकाष्ठाद्यः प्रथमः शकलः पतेत्स स्वरुरित्यनेन यूपानुनिष्पत्तिः स्पष्टा। तेनार्थवादो बाध्यतइति भावः॥ ४॥

प्रतियूपं च दर्शनात्॥ ५॥

यूपैकादशिन्यां प्रतियूपं स्वरुदर्शनादपि नेत्याह। प्रेति। स्पष्टम्। यथानुपूर्व्यं स्वरुभिः पशुमनक्तीति श्रुतिः॥ ५॥

आदाने कर्मशब्दः॥ ६॥

ननु स्वरुं करोतीति उत्पत्त्यर्थकः कृञ्धातुरनर्थकः स्याद् यूपच्छेदनेन स्वरोर्निष्पन्नत्वादत आह। आदानइति। आदाने स्वरुपसंग्रहे कर्मशब्दः कृञ्धातुः संग्रहस्यासिद्धत्वात्तदर्थधातोर्लक्षणेति भावः॥ ६॥

शाखाया आहार्यत्वम्। अधि॰ २।

शाखायां तत्प्रधानत्वात्॥ ७॥

दर्शपूर्णमासयोः प्राचीमाहरतीति। अत्र प्राचीशब्दः दिक्परः शाखापरो वेति संशये शक्यार्थोपपत्तये दिक्पर इति पूर्वपक्षे सिद्धान्तमाह। शाखायामिति। शाखायां प्राचीशब्दः। न च लक्षणादोषः, तस्याः

* शकलश्रुतेश्चेति भाष्ये पाठः।

शाखायाः प्रधानत्वात्। प्रधानत्वे अनुवाद्यत्वेन तदंशे लक्षणाया अदोषत्वादिति भावः ॥ ७ ॥

छेदनस्य शाखाप्रयुक्तत्वम् । अधि० ३ ।

शाखायां तत्प्रधानत्वादुपवेषेण विभागः स्याद्वैषम्यात् ॥ ८ ॥

मूलतः शाखां परिवास्योपवेषं करोतीति दर्शपूर्णमासे श्रुतम्। तत्र छेदने शाखा उपवेषश्चोभयं प्रयोजकं शाखैव वेति संशये विनिगमकाभावादुभयमिति पूर्वपक्षे सिद्धान्तमाह । शाखायामिति । शाखायां शाखाच्छेदनप्रतिपादके उदाहृतवाक्ये उपवेषेण छेदनस्य विभागः स्यात् साध्यसाधनभावसंबन्धो न । तस्याः शाखायाः द्वितीयाश्रुत्या प्राधान्यस्य गृहीतत्वात् । ननु उपवेषशब्दादपि द्वितीया ऽस्तीत्यत्राह। 'वैषम्यात् । उपवेषस्य न च्छेदनकर्मत्वं किं तु करोतिकर्मत्वमिति न छेदनं तदर्थमुक्तवैषम्यात् ॥ ८ ॥

श्रुत्यपायाच्च ॥ ९ ॥

ननु मूलस्यापि शाखापदेन ग्रहीतुं शक्यत्वात्तस्यापि प्राधान्यमस्तीत्यत आह। श्रुतीति। श्रुतेः शक्यार्थस्य अपायात् । न हि शाखावयवरूपं मूलमुभयं शक्यार्थः शब्दस्येति भावः ॥ ९ ॥

शाखाप्रहरणस्य प्रतिपत्तिकर्मत्वम् । अधि० ४ ।

हरणे जुहोतिः योगसामान्याद् द्रव्याणां चार्थशेषत्वात् ॥ १० ॥

दर्शपूर्णमासयोः श्रूयते, सह शाखया प्रस्तरं प्रहरतीति । अत्र शाखाप्रहरणमर्थकर्म उत प्रतिपत्तिकर्मेति संशये पूर्वपक्षमाह । हरणइति । हरणे जुहोतिः हरतिधातुः जुहोत्यर्थकः इति सूक्तवाकेन प्रस्तरं प्रहरतीत्यत्र तृतीये क्लृप्तः । योगसामान्यात् । यथा प्रस्तरे धात्वर्थयागसाधनत्वं तथा शाखायामपि साम्यात् । द्रव्याणां च अर्थे यागे शेषत्वाच्च प्रहरणं प्रति शाखा प्रधानम् ॥ १० ॥

प्रतिपत्तिर्वा शब्दस्य तत्प्रधानत्वात् ॥ ११ ॥

सिद्धान्तमाह । प्रतीति । शाखाप्रहरणं प्रतिपत्तिः शब्दस्य शाखाशब्दस्य तत्प्रधानत्वात् । शाखाप्रधानत्वज्ञापकत्वाद्, द्वितीयाश्रुत्येति शेषः । यद्यपि शाखापदोत्तरं द्वितीया नास्ति तथाऽपि सहयोगे तृतीया । सहत्वं तुल्यत्वदेकक्रियान्वयित्वम् । प्रस्तरस्य कर्मत्वे शाखाया अपि कर्मत्वं सिद्धमिति भावः ॥ ११ ॥

अर्थेऽपीति चेत् ॥ १२ ॥

ननु फलवाचकादिव तद्गुणवाचकादपि द्वितीया श्रूयते यथा सक्तुषु । तथा च सक्तुवद्गुणत्वमिति शङ्कते । अर्थेइति । अर्थे परार्थे गुणेऽपि द्वितीयेति शेषः ॥ १२ ॥

न तस्यानधिकारादर्थस्य च कृतत्वात् ॥ १३ ॥

न सक्तुवच् शाखा तस्य सत्त्वादेः अनधिकाराद् अविनियोगात् । शाखया ऽर्थस्य वत्सापाकरणादेः कृतत्वात् प्रतिपत्तिमात्रमपेक्षतइति भावः ॥ १३ ॥

प्रणीतानिनयनस्य प्रतिपत्तिकर्मत्वम् । अधि० ५ ।

उत्पत्त्यसंयोगात्प्रणीतानामाज्यवद्विभागः स्यात् ॥ १४ ॥

दर्शपूर्णमासयोः श्रूयते, अपः प्रणयतीति । प्रणीताभिः संयौति पिष्टं पिण्डीकरोति, अन्तर्वेदि प्रणीतां विमुञ्चति इति प्रणीतानामपां कार्यद्वयं श्रूयते । उभयं तुल्यमुत प्रणीतानिनयनं प्रतिपत्तिः इति संशये पूर्वपक्षमाह । उत्पत्तीति । उत्पत्तौ अपः प्रणयतीत्युत्पत्तिवाक्ये असंयोगात् । कार्यस्याश्रवणाद् । आज्यवत्सर्वस्मै वा एतद्यज्ञाय गृह्यते यद् ध्रुवायामाज्यमितिवद् विभज्य समं विनियोगः ॥ १४ ॥

संयवनार्थानां या प्रतिपत्तिरितरासां तत्प्रधानत्वात् ॥ १५ ॥

सिद्धान्तमाह । संयवनेति । संयवनार्थानां संयवनमुख्यकार्याणा-

मपां संयवनाङ्गत्वं तृतीयाश्रुत्या । इतरासां प्रतिपत्तिः । तासां शेषाणामपां तत्र निनयने प्रधानत्वाद् द्वितीयाश्रुत्या ॥ १५ ॥

दण्डदानस्यार्थकर्मत्वम् । अधि० ६ ।

प्रासनवन्मैत्रावरुणस्य दण्डप्रदानं कृतार्थत्वात् ॥ १६ ॥

दण्डेन दीक्षयति । क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छतीति । मैत्रावरुणाय दण्डदानं प्रतिपत्तिरर्थकर्म वेति संशये पूर्वपक्षमाह । प्रासनेति । प्रासनवच्च चात्वाले कृष्णविषाणां प्रास्यतीतिवत् । दण्डप्रदानं प्रतिपत्तिकर्म कृतार्थत्वाद् दीक्षायां विनियुक्तत्वात् ॥ १६ ॥

अर्थकर्म वा कर्तृसंयोगात्स्रग्वत् ॥ १७ ॥

सिद्धान्तमाह । अर्थेति । अर्थकर्म प्रधानकर्म कर्तुः पुरुषस्य मैत्रावरुणस्य संयोगाच्च श्रवणात् । स्रग्वद् उद्गात्रे स्रजं प्रयच्छतीतिवत् । संप्रदाने चतुर्थी । संप्रदानत्वं क्रियोद्देश्यत्वम् । उद्देश्यत्वप्रधानत्वे समनियते । अतो मैत्रावरुणाङ्गं दण्डदानम् । द्वितीया, तथा युक्तं चानीप्सितमित्यनेनेति भावः ॥ १७ ॥

कर्मयुक्ते च दर्शनात् ॥ १८ ॥

कर्मयुक्ते प्रैषादिरूपकर्मयुक्ते मैत्रावरुणे दण्डस्य दर्शनाद् दण्डी प्रैषानन्वाहेति । यदि प्रतिपत्तिः कर्मान्तरे अङ्गत्वेन श्रवणं न स्यादिति भावः ॥ १८ ॥

प्रासनस्य प्रतिपत्तिकर्मत्वम् । अधि० ७ ।

उत्पत्तौ येन संयुक्तं तदर्थं तच्छ्रुतिहेतुत्वात्तस्यार्थान्तरगमने ऽशेषत्वात्प्रतिपत्तिः स्यात् ॥ १९ ॥

कृष्णविषाणया कण्डूयते इति, तथा, नीतासु चात्वाले कृष्णविषाणां प्रास्यतीति च । अत्रापि कृष्णविषाणायाः क्रतुसमाप्तिपर्यन्तमपेक्षितत्वात्कण्डूयनार्थं द्वितीयां बाधित्वा विषाणस्याङ्गत्वं प्रासने कल्पनीयमिति पूर्वपक्षे सिद्धान्तमाह । उत्पत्ताविति । उत्पत्तौ उत्पत्तिवाक्ये यदङ्गं येन फलेन संयुक्तं तत् तत्फलार्थं तस्मिन्तत्कार्ये प्रत्यङ्गत्वबोधने श्रुतेः तृतीयाश्रुतेः कारणत्वात् तस्य पुनर्वाक्यान्तरेण पदार्थान्तरसंबन्धे अशेषत्वाद् द्वितीयाश्रुत्या अनङ्गत्वात्प्रतिपत्तिः ॥ १९ ॥

अवभृथगमनस्य प्रतिपत्तिकर्मत्वम् । अधि० ८ ।

सौमिके च कृतार्थत्वात् ॥ २० ॥

ज्योतिष्टोमे यत्किं चित्सोमलिप्तं द्रव्यं तेनावभृथं यन्तीति । सोमलिप्तपात्राणामवभृथगमनं प्रतिपत्तिरर्थकर्म वेति संशये सिद्धान्तमाह । सौमिकइति । सौमिके अवभृथे सोमलिप्तपात्रयानं प्रतिपत्तिः कृतार्थत्वाज्जातकार्यत्वात् ॥ २० ॥

अर्थकर्म वा ऽभिधानसंयोगात् ॥ २१ ॥

पूर्वपक्षमाह । अर्थेति । अभिधानेन अङ्गत्वबोधकतृतीयया युक्तत्वात् ॥ २१ ॥

प्रतिपत्तिर्वा तन्न्यायत्वाद् देशार्था ऽवभृथश्रुतिः ॥ २२ ॥

दूषयति । प्रतिपत्तिरिति । पूर्वन्यायत्वाद् अवभृथश्रुतिः अवभृथशब्दः देशार्थो देशलक्षकः । तृतीयाश्रुतिः सहयुक्तइति भावः ॥ २२ ॥

कर्तृदेशकालविधीनां नियमार्थत्वम् । अधि० ९ ।

कर्तृदेशकालानामचोदनं प्रयोगे नित्यसमवायात् ॥ २३ ॥

कर्त्रादीनां विधिरस्ति न वेति संशये पूर्वपक्षमाह । कर्त्रेति । कर्तॄणामृत्विजां, देशस्य समे यजेतेति, कालस्य वसन्ते यजेतेति, एषामचोदनं न विधिः । प्रयोगे अनुष्ठाने नित्यसमवायात् तैर्विना ऽसंभवेन नित्यक्लृप्तत्वात् ॥ २३ ॥

नियमार्था वा पुनः श्रुतिः ॥ २४ ॥

सिद्धान्तमाह । नियमेति । विशेषतः नियमार्थं पुनर्विधौ श्रुतिः श्रवणम् ॥ २४ ॥

द्रव्ये गुणविधानस्य नियमार्थत्वम् । अधि० १० ।

तथा द्रव्येषु गुणश्रुतिरुत्पत्तिसंयोगात् ॥ २५ ॥

इममेव न्यायमतिदिशति । तथेति । वायव्यं श्वेतमालभेतेत्यादौ द्रव्येषु पशुषु गुणश्रुतिः श्वेतादिश्रुतिः तथा नियमार्था । उत्पत्त्या क्रियोत्पादकद्रव्येण संबन्धात्तत्परिच्छेदनियमः ॥ २५ ॥

अवघातादिसंस्कारविधानस्य नियमार्थत्वम् । अधि० ११ ।

संस्कारे च तत्प्रधानत्वात् ॥ २६ ॥

अन्यत्राप्यतिदिशति । संस्कारइति । संस्कारे च अवहननादि-दृष्टफलसंस्कारे तथा । द्रव्यस्य तत्प्रधानत्वाद् नियमप्रधानविधि-संभवात् ॥ २६ ॥

यागपदार्थनिरूपणम् । अधि० १२ ।

यजतिचोदना द्रव्यदेवताक्रियं समुदाये कृतार्थत्वात् ॥ २७ ॥

प्रसङ्गाद्यजत्यादीनां लक्षणान्याह । यजतीति । यजतिचोदना यजतिधात्वर्थः द्रव्यदेवतयोः क्रियायाश्च संबन्धः समुदाये उक्तसमु-दाये कृतार्थत्वात् क्लृप्तशक्तिकत्वात् । देवतोद्देश्यकद्रव्यत्यागरूपा क्रिया तदर्थ इति फलितम् ॥ २७ ॥

होमपदार्थनिरूपणम् । अधि० १३ ।

तदुक्ते श्रवणाज् जुहोतिरासेचनाधिकः स्यात् ॥ २८ ॥

जुहोतिः तदुक्ते यजतिधातूक्ते आसेचनं द्रवद्रव्यप्रतियोगिकाग्निसंयोगः अधिकं पूर्वस्मादधिकं शक्यतावच्छेदककोटावित्यर्थः । श्रव-णात् तत्र व्यवहारात् । देवताद्रव्यसंबन्धविशिष्टद्रव्यप्रतियोगिकसंयोग-रूपो व्यापारो जुहोत्यर्थः इति फलितम् ॥ २८ ॥

दानपदार्थनिरूपणम् । अधि० १४ ।

*ददातिरुत्सर्गपूर्वकः परस्वत्वेन संबन्धः ॥ २९ ॥

ददातिः ददात्यर्थः उत्सर्गपूर्वः स्वस्वत्वनिवृत्तिपूर्वः परस्वत्वेन संबन्धः ॥ २९ ॥

बर्हिषः आतिथ्यादिसाधारण्यम् । अधि० १५ ।

विधेः कर्मापवर्गित्वादर्थान्तरे विधिप्रदेशः स्यात् ॥ ३० ॥

आतिथ्यायामाश्ववालः प्रस्तरो विहितः । आश्ववालः तृण-विशेषः । तथा यदातिथ्यायां बर्हिस्तदुपसदामिति । अत्र बर्हिःशब्दः

* इदं सूत्रं भाष्यादौ नास्ति ।

वाचकः तत्पदं तत्सदृशलक्षणमुत तदेवोभयार्थमिति संशये पूर्वपक्षमाह । विधेरिति । विधेः विधिविहितातिथ्याश्ववालसंबन्धस्य कर्मापवर्गित्वात्तत्कर्मसमाप्तिपर्यन्तत्वात् । अर्थान्तरे क्रियान्तरसंबन्धविधौ सति विधेः पूर्वविहिताश्ववालादेः प्रदेशः अतिदेशः स्यात् । तदुपसदामित्यत्र तत्सदृशे लक्षणेति भावः ॥ ३० ॥

अपि वोत्पत्तिसंयोगादर्थसंबन्धो विशिष्टानां प्रयोगैकत्वे हेतुः स्यात् ॥ ३१ ॥

सिद्धान्तमाह । अपि वेति । उत्पत्तिसंयोगाद् उत्पत्तिवाक्यसंबन्धात् । उत्पत्तिवाक्ये श्रुतस्यैवेत्यर्थः । अर्थेन तत्कर्ममात्रेण संबन्धः । विशिष्टानामुदासीनवाक्यानामर्थः प्रयोगैकत्वे हेतुः स्यात् । उभयार्थं बर्हिस्तरणं सकृदनुष्ठेयमित्यर्थः ॥ ३१ ॥

इति जैमिनिसूत्रवृत्त्यां चतुर्थस्य द्वितीयः पादः ॥ २ ॥

द्रव्यसंस्कारकर्मणां क्रत्वर्थत्वम् । अधि० १ ।

द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्यात ॥ १ ॥

यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीति, यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते इति, यत्प्रयाजा इज्यन्ते वर्मैव तद्यज्ञस्य क्रियत इति । किमेते फलमुद्दिश्य विधीयन्तउतार्थवादा इति संशये सिद्धान्तमाह । द्रव्येति । द्रव्यसंस्कारप्रधानकर्मविधिषु क्रमेण उदाहृतवाक्येषु श्रुतिः फलश्रुतिः अर्थवादः परार्थत्वात्पर्णमयीत्वादीनां प्रकरणेन क्रत्वर्थत्वात् ॥ १ ॥

उत्पत्तेश्चातत्प्रधानत्वात् ॥ २ ॥

ननु पुरुषमुद्दिश्य फलं श्रूयते, न स पापं श्लोकं शृणोतीति, विधीयेत कथमर्थवाद इत्यत आह । उत्पत्तेरिति । उत्पत्तेः उत्पत्तिवाक्यस्य अतत्प्रधानत्वात्पुरुषप्रधानत्वाभावात् । अयं भावः यस्य पर्णमयी जुहूः तस्यापापश्लोकश्रवणमिति । अत्र जुह्वा अपि पुरुषमुद्दिश्य श्रवणं तुल्यं यस्येति पुरुषग्रहणादिति, जुह्वा एव फलत्वं किं न स्यादिति ।

अनुमानादिना तस्य फलत्वनिरासो भाष्यादितो ज्ञेयः विस्तरभयान्न लिख्यते* ॥ २ ॥

गोदोहनादीनामनित्यार्थत्वम् । अधि० २ ।

नैमित्तिके विकारत्वात्क्रतुप्रधानमन्यत्स्यात् ॥ ३ ॥

गोदोहनेन पशुकामः प्रणयेदिति विहितं गोदोहनमेव क्रत्वर्थमुतान्यदिति संशये पूर्वपक्षस्यादृढतया सिद्धान्तमाह । नैमित्तिकइति । गोदोहनादौ नैमित्तिके अनित्यत्वेन विधीयमाने सति क्रतुः प्रधानं यस्येति व्युत्पत्त्या क्रत्वङ्गं नित्यमन्यच्च चमसादि स्यात् । गोदोहनादेर्विकारत्वादनित्यत्वात् ॥ ३ ॥

दध्यादेर्नित्यनैमित्तिकोभयार्थत्वम् । अधि० ३ ।

एकस्यतूभयत्वे संयोगपृथक्त्वम् ॥ ४ ॥

दध्ना जुहोति, दध्नेन्द्रियकामस्य जुहुयादिति । उभाभ्यामेकं विधीयते उत प्रत्येकमिति संशये सिद्धान्तमाह । एकस्येति । एकस्य एकद्रव्यस्य उभयत्वे उभयार्थत्वे, संयुज्यते अनेनेति व्युत्पत्त्या संयोगस्य वाक्यस्य पृथक्त्वं वाक्यभेदः । वाक्यभेदादुद्देश्यपृथक्त्वमिति भावः ॥ ४ ॥

शेष इति चेत् ॥ ५ ॥

ननूभयमेकशेषः कुतो नेति शङ्कते । शेष इति । शेषः एकं प्रति शेषः ॥ ५ ॥

नार्थपृथक्त्वात् ॥ ६ ॥

नेति । अर्थपृथक्त्वात् फलभेदादुद्देश्यभेदे वाक्यं भिद्यते इति भावः ॥ ६ ॥

पयोव्रतादीनां क्रतुधर्मत्वम् । अधि० ४ ।

द्रव्याणां तु क्रियार्थानां संस्कारः क्रतुधर्मत्वात् ॥ ७ ॥

ज्योतिष्टोमे श्रूयते, पयोव्रतं ब्राह्मणस्येति । इदं व्रतं पुरुषार्थः क्रत्वर्थो वेति संशये षष्ठ्या पुरुषस्य प्राधान्यात् पुरुषार्थमिति पूर्वपक्षे

* इत उत्तरं, फलं तु तत्प्रधानायामिति सूत्रमत्र न व्याख्यातं, तद्व्याख्यानं भाष्यादितोऽवगन्तव्यम् ।

सिद्धान्तमाह । द्रव्याणामिति । क्रियार्थानां ज्योतिष्टोमादिष्वधिकृतानां द्रव्याणां संस्कारः । क्रतुधर्मत्वात् । क्रतुसंनिधौ पाठेन प्रयोगविधिपरिगृहीतत्वात् ॥ ७ ॥

पृथक्त्वाद् व्यवतिष्ठेत ॥ ८ ॥

ननु ब्राह्मणस्येति किमर्थमत आह । पृथक्त्वादिति । ब्राह्मणक्षत्रियादिप्रयोगाणां पृथक्त्वाद् व्यवतिष्ठते ब्राह्मणकर्तृके पय एवेति ॥ ८ ॥

विश्वजिदादीनां सफलत्वम् । अधि० ५ ।

चोदनायां फलाश्रुतेः कर्ममात्रं विधीयते न ह्यशब्दं प्रतीयते ॥ ९ ॥

विश्वजिता यजेतेति श्रुतम् । इदमफलमुत फलवदिति संशये पूर्वपक्षमाह । चोदनेति । चोदनायां वाक्ये फलाश्रवणात्कर्मैव विधीयेत । यतः अशब्दं शब्दागम्यमेतच्छास्त्रे न विचार्यतइति भावः ॥ ९ ॥

अपि वा ऽऽम्नानसामर्थ्याच्चोदनार्थेन गम्येतार्थानामर्थवत्त्वेन वचनानि प्रतीयन्ते ऽर्थतो ऽसमर्थानामानन्तर्येण संबन्धः तस्माच्छ्रुत्येकदेशः सः ॥ १० ॥

सिद्धान्तमाह । अपि वेति । चोदनार्थेन आख्यातवाच्यभावनया पुरुषप्रवृत्त्या फलं गम्येत फलं कल्पनीयं यतः अर्थानां लिङ्वाच्यशब्दभावनानां पुरुषप्रवृत्तिरूपार्थवत्त्वेन इतरवचनानि प्रतीयन्ते तथा ऽत्रापि भवितव्यम् अतः, अर्थतः अतः कारणाद् असमर्थानां फलश्रावकपदाभावात्तद्बोधाक्षमानां वाक्यानामानन्तर्येण स्वसमीपवृत्तिवाक्यघटकफलवाचकपदेन वाक्यस्य संबन्धः कार्यः । अत एव श्रुत्येकदेशः वेदघटकपदस्येव योजनाच्च लौकिकवाक्यत्वशङ्केति भावः* ॥ १० ॥

विश्वजिदादीनामेकफलकत्वम् । अधि० ६ ।

तत्सर्वार्थमनादेशात् ॥ ११ ॥

* इत उत्तरं वाक्यार्थश्च गुणार्थवद्, इति सूत्रमत्र न व्याख्यातं, तद्व्याख्यानं भाष्यादौ द्रष्टव्यम् ।

अयं विश्वजिद्यागः सर्वफलैः संबध्यतएकेन वेति संशये पूर्वपक्षमाह । तत्सर्वेति । अनादेशाद् विशेषाश्रवणात् ॥ ११ ॥

एकं वा चोदनैकत्वात् ॥ १२ ॥

सिद्धान्तमाह । एकमिति । चोदनैकत्वाद् एको विधिरेकं फलमपेक्षतइति भावः ॥ १२ ॥

विश्वजिदादीनां स्वर्गफलकत्वम् । अधि॰ ७ ।

सः स्वर्गः स्यात्सर्वान्प्रत्यविशिष्टत्वात् ॥ १३ ॥

एको ऽपि स्वर्ग एव सर्वान्प्रति अविशिष्टत्वादवैलक्षण्यात् । सर्वाभिलषणीयत्वादिति भावः ॥ १३ ॥

प्रत्ययाच्च ॥ १४ ॥

प्रत्ययात्स्वर्गस्य सर्वाभिलषणीयत्वेन लोकानुभवात् ॥ १४ ॥

रात्रिसत्रस्यार्थवादिकफलकत्वम् । अधि॰ ८ ।

क्रतौ फलार्थवादमङ्गवत्कार्ष्णाजिनिः ॥ १५ ॥

प्रतितिष्ठन्ति ह वा यएता रात्रीरुपयन्तीति । अत्र प्रतितिष्ठन्तीत्यंशः फलबोधकः अर्थवादो वेति संशये पूर्वपक्षमाह कार्ष्णाजिन्याचार्यमतेन । क्रताविति । क्रतौ रात्रिरूपक्रतुबोधकवाक्ये फलप्रतिपादकं वाक्यमर्थवादं मनुते आचार्यः । अङ्गवत् । न स पापं श्लोकं शृणोतीतिक्रत्वङ्गत्वबोधकवाक्यवत् ॥ १५ ॥

फलमात्रेयो निर्देशादश्रुतौ ह्यनुमानं स्यात् ॥ १६ ॥

आत्रेयमतं सिद्धान्तमाह । फलं बोध्यते इत्यात्रेयः निर्देशात्फलत्वेन निर्देशयोग्यत्वात् । ननु विधिप्रत्ययो न श्रूयते तत्राह । अश्रुतौ अनुमानमध्याहारः कार्यः ॥ १६ ॥

अङ्गेषु स्तुतिः परार्थत्वात् ॥ १७ ॥

ननु यस्य पर्णमयीत्यत्रापि फलश्रुतिः स्यादत्राह । अङ्गे जुह्वादौ स्तुतिरेव परार्थत्वात् । प्रकरणेन यागार्थत्वस्य क्लृप्तत्वात् ॥ १७ ॥

काम्यानां यथोक्तकाम्यफलकत्वम् । अधि. ९ ।

काम्ये कर्मणि नित्यः स्वर्गो यथा यज्ञाङ्गे क्रत्वर्थः ॥ १८ ॥

कर्ममात्रे स्वर्गः फलं पशुब्रह्मवर्चसादीन्यानुषङ्गिकाण्युत श्रूयमाणमेव फलमिति संशये पूर्वपक्षमाह । काम्यइति । नित्यः मुख्यः । पश्वादिरानुषङ्गिकं, यथा यज्ञाङ्गे प्रस्तरप्रहरणे आयुराशास्ते इतिमन्त्ररम्यं फलं, यज्ञाङ्गे यज्ञोपकारके गोदोहनादौ अनुष्ठिते अङ्गफलं पश्वादिः क्रत्वर्थः स्वर्गादिश्च तथा ॥ १८ ॥

वीते च कारणे नियमात् ॥ १९ ॥

साधकान्तरमाह । वीतइति । वीते गते कारणे पश्वादीच्छायां गतायामपि नियमाद् आरब्धस्य समाप्तिनियमाद् । अन्यथा समाप्ति-र्व्यर्थेति भावः ॥ १९ ॥

कामो वा तत्संयोगेन चोद्यते ॥ २० ॥

सिद्धान्तमाह । काम इति । कामः कामपदसमभिव्याहृतोऽर्थः पश्वादिरेव यतस्तत्संयोगेन पश्वादिसाधनत्वेन चोद्यते विधीयतेऽतः ॥ २० ॥

अङ्गे गुणत्वात् ॥ २१ ॥

अङ्गे गोदोहनादौ गुणत्वात् पश्वादीन्प्रति गोदोहनेन पशुकाम इति वाक्येन गोदोहनस्य गुणत्वेन विधानाद् वैषम्यं प्रस्तरप्रहरणादावपि मन्त्रलिङ्गेन क्लृप्तम् ॥ २१ ॥

वीते नियमस्तदर्थम् ॥ २२ ॥

वीते इच्छानिवृत्तौ समाप्तिनियमः तदर्थं प्रत्यवायपरिहारार्थम् । यो यद्यदित्युक्त्वा न यजतइति प्रायश्चित्तश्रवणात् ॥ २२ ॥

दर्शपूर्णमासादीनां सर्वार्थत्वम् । अधि० १० ।

सार्वकाम्यमङ्गकामैः प्रकरणात् ॥ २३ ॥

सर्वफलार्थं दर्शपूर्णमासाविति श्रुतम् । अत्र सर्वशब्दः अङ्गफलानि गृहीत्वा संपाद्यः प्रधानफलैरेव वेति संशये पूर्वपक्षमाह । सार्वेति । सूत्रे संपादयेदिति शेषः । प्रकरणाद् उपस्थितत्वादिति शेषः ॥ २३ ॥

फलोपदेशो वा, प्रधानशब्दसंयोगात् ॥ २४ ॥

सिद्धान्तमाह । फलेति । फलोपदेशः प्रधानफलभावना स्यात् । प्रधानशब्देन दर्शपूर्णमासशब्देन संयोगाचाङ्गफलमादाय सर्वशब्द इति निष्कर्षः ॥ २४ ॥

दर्शादीनां प्रतिफलं पृथगनुष्ठानम् । अधि० ११ ।

*तत्र सर्वे ऽविशेषात् ॥ २५ ॥

सर्वेभ्यो दर्शपूर्णमासावित्यत्र एकेनैव प्रयोगेण सर्वफलप्राप्तिरुत पर्यायेणानुष्ठितस्येति संशये पूर्वपक्षमाह । तत्रेति । तत्र सकृत्प्रयोगे सर्वे अर्थाः संबध्यन्ते विशेषाश्रवणात् ॥ २५ ॥

योगसिद्धिर्वा ऽर्थस्योत्पत्त्यसंयोगात् ॥ २६ ॥

सिद्धान्तमाह । योगेति । योगेन प्रत्येकप्रयोगसंबन्धेन सिद्धिः तत्तत्फलोत्पत्तिः क्रमेण । उत्पत्त्या फलोत्पत्त्या असंयोगित्वाद्विधेः । न ह्ययं यावत्फलसाहित्यविधायकः । यद्यद्विषयणी या इच्छा तत्तद्विषय-साधनत्वप्रतिपादकम् । इच्छानां क्रमिकत्वात्साधनमपि क्रमिकमिति भावः । २६ ॥

सौत्रामण्यादीनां चयनाद्यङ्गत्वम् । अधि० १२ ।

समवाये चोदना संयोगस्यार्थवत्त्वात् ॥ २७ ॥

वाजपेयेन इष्ट्वा बृहस्पतिसवेन यजेतेति । अत्र बृहस्पतिसवस्य वा-जपेयाङ्गभूतस्य अपूर्वकर्मणो विधिरुत बृहस्पतिसवस्य वाक्यान्तरोत्पन्नस्य वाजपेयोत्तरकालमात्रविधिरिति संशये सिद्धान्तमाह । समवायइति । समवाये अङ्गाङ्गिभावलक्षणसंबन्धविषयिणी चोदना उक्तविधिः स्यात् । संयोगस्य वाजपेयसंयोगस्य वाक्ये अर्थवत्त्वात् सफलत्वात् । अन्यथा व्यर्थमेवेति भावः ॥ २७ ॥

कालश्रुतौ काल इति चेत् ॥ २८ ॥

शङ्कते । कालेति । कालस्य कालवाचकत्वात्प्रत्ययस्य श्रुतौ श्रवणे सति कालविधिरेवास्तां लाघवादिति भावः ॥ २८ ॥

* इतः प्रभृति सूत्रद्वयं भाष्यकारेण वर्णकान्तरत्वेनापि व्याख्यातम् ।

अन्योऽपि घटवान्कालः कालत्वादिति वादिनः ।
पक्षदृष्टान्तबाधादिप्रसङ्गः प्रणिधीयताम् ॥

यच्च कारकाणां कार्यं प्राप्तानामेव तदुत्पादकत्वमिति । व्याहतमेतत् । किंच किं दृष्टत्वादेवमङ्गीक्रियते अव्यवस्थाभयाद्वा । नाद्यः अनन्यथासिद्धनियतपूर्वभावित्वादतिरिक्तायाः कार्यप्राप्तेः कारणानां मिथः प्राप्तिवत् त्वयाऽप्यदृष्टत्वात् तदिहानङ्गाङ्गीकारो युक्ताङ्गहानिश्च । प्रागसत्त्वस्य युक्तस्योपेक्षणात् । अविषयवृत्तित्त्वं वा कारकाणां सम्बन्धस्य । विरुद्धस्थले सञ्चरणात् । समश्च प्राप्तावप्यतिप्रसङ्गः, न हि प्राप्तयोरपि रज्जुघटयोर्जन्यजनकता । तत्र नित्यप्राप्तिर्नास्तीति विशेष इति चेत् । निमित्तानामपि घटादिभिर्नित्यप्राप्त्यसम्भवात् । उपादाने तु स्यादिति चेन्न । निमित्तवदेव नित्यप्राप्तिनैरपेक्ष्यात् । त्वत्पक्षेण च यद्येन नित्यप्राप्तं न तत्तस्योपादेयं यथा पटस्य तन्तुः तथा च पटः तस्मान्न तन्तूपादेय इति प्रसङ्गात् । प्रकृतिपुरुषयोर्नित्यप्राप्तयोर्नोपादानोपादेयभावः अतो यद्येन नित्यप्राप्तं न तत्तस्योपादेयं यथा प्रकृतिपुरुषयोरन्योन्यमिति पटादिकमपि येन नित्यप्राप्तं कथं तस्योपादेयं स्यात् । तयोरन्योन्यप्राप्तिर्नास्तीति चेन्न । पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्ग इति स्वसमयविरोधात् । अजसंयोगपक्षे विभूनामपि नित्यप्राप्तेः ।

व्याप्तिरूपेण सम्बन्धस्तस्याश्च पुरुषस्य च ।

दारुण्यग्नि यथा—

इत्यागमविरोधाच्च । जहात्येनां भुक्तभोगामिति श्रुत्या मुक्तस्य प्रकृतिप्राप्तिर्निवर्त्स्यतीति चेन्न । तदाऽपि परस्परधर्माध्यासाधिकारभूतदर्शनमात्रनिवृत्तेः त्वदिष्टत्वात् । यद् ब्रूथ । या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्येति । अतः कार्यप्राप्तिः कारणा-

नन्वुक्तम् उक्तं चाक्षपादेन घटादिनिष्पत्तिदर्शनात्पीडने च व्यभिचारादप्रतिषेध इति । अत्र कार्यमप्राप्तेः इत्युपस्कार्यम् एतेन ।

असत्त्वान्नास्ति सम्बन्धः का*रणैः सत्त्वसङ्गिभिः ।
असम्बद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थिति ॥

इति साङ्ख्यवृद्धगाथाऽपि प्रत्युक्ता । इह तु स्वोचितात्कारकचक्रात् तत्सम्बन्धतश्च कार्यदृष्टेरित्यव्यवस्थामूलघातः । एतेन विमतं पूर्वापरकालयोरपि सत् प्रमेयत्वात् सत्त्वाद्वा आत्मवत् । विगीतः काल एतद्घटादिमान् कालत्वात् एतत्कालवदित्यादिर्निरस्तः सर्वलोकप्रत्यक्षादिबाधात् ।

कारकव्यञ्जकानां च व्यवहारव्यवस्थितिः ।
किन्निमित्तेति वक्तव्यं सर्वनित्यत्ववादिना ॥
न हि व्यक्तौ विशेषोऽस्ति न चावरणवारणम् ।
तयोरपि भवत्पक्षे नित्यत्वात्साध्यता कथम् ॥
आवारकं च नित्यं चेन्नित्यमावरणं भवेत् ।
अन्यथा त्वपसिद्धान्तस्तत्तिरोधिश्च दुर्वचः ॥
तिरोधिं तन्निवृत्तिं च नानित्यौ तस्य मन्यसे ।
मिथश्चाभिभवाद्युक्तिर्गुणेष्वेवमनर्थिका ॥
समानदेशकालत्वमभावप्रतियोगिनोः ।
सहन्ते क्वाप्यगत्यैव न तथाऽन्यथा गतेः ॥
अपि चाऽशेषनित्यत्वे पौर्वापर्यं न कुत्र चित् ।
व्यक्तिभोगापवर्गादिसाध्यतोक्तिरतो मुधा ॥
स्वप्रवृत्त्यादिनैष्फल्यं शास्त्रादेरप्यनुत्थितिः ।
सांख्यचार्वाकयोस्स्यातां साध्यसाधनबाधनात् ॥

* कारिकैरिति पा० ।

अयोग्यत्वं तिरोधानं योग्यत्वं व्यक्तिरित्यपि।
तन्नित्यानित्यताभ्यां ते विवक्षितविघातकृत् ॥
इन्द्रियप्रतिघातेन भागैर्भागान्तरावृतिः।
यथा ऽन्यच तथा नाऽत्र कादाचित्कदशात्ययः ॥
असम्भवनिरस्तं च ग्रसनोद्गसनादिकम्।
मृत्पिण्डादिषु दुस्साधं शास्त्रमप्यनिदम्परम् ॥
अप्राप्तावव्यवस्थोक्ता प्राप्तावपि तथापतेत्।
व्यक्तिवादोऽत एवेत्यप्ययुक्तं तन्निरासतः ॥
सत्त्वादिगुणभूयिष्ठभागभेदाव्यवस्थितेः।
त्रिगुणद्रव्यसम्बन्धः प्रवाहानादिरात्मनाम् ॥
सार्वज्ञ्यप्रागभावात्मा तिरोधिरपि कर्मिणाम्।
संविद्विकाससङ्कोचप्रवाहान्नातिरिच्यते ॥
तत्तत्कर्मप्रवाहेण तयोरेवं व्यवस्थितेः।
न हि स्वरूपतोऽनादेर्हेतुरस्माभिरिष्यते ॥

यत्तु कारकशक्तिर्नाम तद्गतं सूक्ष्मं कार्यमिति कल्प्यते तत्प्रतिबन्द्या प्रतिरुणद्धि। तस्मिन्निति। तस्मादित्यत्राऽपि स्वोचितादिति विशेषणीयं यथा, सर्वेषु द्रव्येषु तिला एव तैलगर्भाः स्वकारणशक्त्या सृज्यन्ते तथा तत्तत्कार्यनियतपूर्वभावितया तत्तदुत्पादकस्वभावास्ते ते भावास्तथैवेति स्वीकार्यम्। अन्यथा दृष्टहानमदृष्टकल्पनं च। प्रतिबन्द्यन्तराणि स्वव्याघातं चाभिप्रेत्याह। तन्निमित्तेति। निमित्तादीनां कार्योत्पादनशक्तिरस्ति वा न वा न चेत्कथं तन्निमित्तत्वम् अन्येषां वा कथमतन्निमित्तत्वम्। अस्ति चेत्सा किं कार्यस्य सूक्ष्मावस्था अन्या वा। न पूर्वः अपसिद्धान्तात्। उपादाने हि तत्सत्त्वमङ्गीकरोषि। अन्यथा प्रकृतेरिवात्मनोऽपि

प्रपञ्चगर्भत्वेन प्रकृतित्वप्रसङ्गात् । आत्मा खल्वयस्कान्तवन्निर्व्यापारोऽपि सन्निधिमात्रेण निमित्तमिष्यते तथा सति निमित्तोपादानवैषम्यविलयाच्च । नाशकेषु च नाश्यवृत्तिरस्ति न वा । अस्ति चेद्वह्नितूलवद्विरोधः न चेत्कथं तदेव तस्य नाशकं न ह्यतद्वृत्तिस्तेन नाश्यते शुक्तावविद्यमानस्य रूप्यस्य तया नाशप्रसङ्गात् सर्वत्र वाऽतिप्रसङ्गात् दूषणेषु च दूष्यं वर्तते न वा । पूर्वश्च दूषणत्वादेरिव तद्वृत्तेस्तेन दूषणायोगः । उत्तरश्च तद्वृत्तिरहितस्य घटादेरिव तद्दूष्यत्वं न स्यात् । अथैतेषु यथादर्शनं व्यवस्थेष्यते । प्रकृतेऽपि तथा स्यात् । एवं निमित्तादिप्रतिबन्द्यैव कार्यस्य कारणभावः सर्वत्र सर्वसम्भवप्रसङ्गश्च निरस्तः । यानि च सांख्यानामवस्थातद्वतोरभेदसाधकानि तेषु यदेतत् पटस्तन्तुभ्यो न भिद्यते तद्धर्मत्वादिति । अत्र तावत्प्रतिज्ञाहेतुविरोधः स्पष्टः । दृष्टान्ताभावेन व्याप्तिश्च नास्ति यद्यतो भिद्यते न तत्तस्य धर्म इति व्यतिरेकव्याप्तिरस्तीति चेन्न । सपक्षेभ्यस्तन्तुभ्योऽपि व्यावृत्तत्वेन केवलव्यतिरेकित्वायोगात् । यदपि तदुपादेयत्वात्तदभिन्न इति । एतदपि पूर्ववदेव । तदुपादेयत्वं च तज्जन्यत्वमात्रं वा तद्विकारत्वं वा तत्सम्बन्धित्वं व तद्धर्मत्वं वा तदभिन्नत्वं वा अन्यद्वा यत्किंचिदिति नाद्यः । निमित्तेष्वभेदप्रसङ्गात् न द्वितीयः तद्धर्मत्वहेतूक्तदोषादेव । उभयत्र पटावस्था तन्त्वात्मा न भवति तन्तुभ्यो भिन्नत्वात् घटवदिति प्रतिप्रयोगस्य शक्यत्वाच्च । इष्टो हि त्वयापि तत्र भेदोऽपि । न तृतीयः कार्येषु परस्परसम्बन्धिषु व्यभिचारात् त्वत्पक्षेणाऽसिद्धेश्च । न हि धर्मधर्मिणोस्तादात्म्यवादिनः तत्संबन्धित्वसम्भवः समवायस्यानभ्युपगमात् अन्यतरस्याद्रव्यत्वे तु संयोगायोगाच्च । न चतुर्थः प्रागेव दूषितत्वात् न पञ्चमः तस्यैव साध्यत्वात्, न षष्ठः अभेद-

व्याप्यस्य कस्यचिदन्यस्य त्वयाऽप्यदर्शनात् । इति यच्चैतत्पटस्त-न्त्वात्मकः तत्संयोगतदप्राप्तिरहितत्त्वात् तादात्म्याभावे हि कुण्ड-बदरयोरिव संयोगो वा स्यात् हिमवद्विन्ध्ययोरिवाप्राप्तिर्वा तदुभयमिह निवर्तमानं तादात्म्यविरहमपि निवर्तयति इति तदपि मन्दं तादा-त्म्यविरहेऽपि अन्यतरस्याद्रव्यत्वात् संयोगाभावः तद्धर्मस्वभाव-त्वादेवाप्राप्तिपरिहार इत्यन्यथासिद्धस्यासाधकत्वात् अन्यथा तादात्म्याभाव इव भेदसद्भावेऽपि घटपटयोरिव धर्मधर्मिभावो न स्यादिति प्रसज्येत । गुरुत्वान्तरकार्यादर्शनन्तु द्रव्यान्तरोत्पत्तिं प्रति-रुन्ध्यात् न त्ववस्थातद्वतोरभेदं विदधीत । ननु जनिरपि व्यक्ति-रेव जनी प्रादुर्भावे इति धात्वर्थपाठात् । न । जनिव्यक्तिशब्दयो-रर्थभेदेनैव निरूढेः प्रादुर्भावपाठोऽप्युत्पत्तिपरस्स्यात् निर्वर्त्यप्राप्य-भेदसिद्धेश्च । जन्यं हि निर्वर्त्यं व्यङ्ग्यं तु प्राप्यम् अभूततद्भावादिषु च प्रागसतस्सत्त्वमनुस्मृतमेव । भवतु वा जनिशब्दो व्यक्तिपरः ।

न व्यक्तिरुपलब्धिस्ते दृष्टाऽदृष्टदशान्वयात् ।
अथोपलब्धियोग्यत्वं न तदव्यापकत्वतः ॥
सत्स्वलक्षणपूर्तिश्चेदभिव्यक्तिस्तदप्यसत् ।
साऽपि वः प्राक्तनी नो चेन्न सिद्ध्येद्धेतुरप्यसन् ॥

किं च व्यक्तिरपि नित्या कार्या वा । पूर्वत्र कारकाणामिव व्यञ्जकानामपि नैष्फल्यम् । उत्तरत्र अर्धजरतीयः सत्कार्यवादः व्यक्ते-रपि व्यक्त्यर्थं कारकापेक्षेति चेत् तत्रानवस्थाप्रसङ्गमाह । व्यक्तिरिति । व्यक्तेः कार्यत्वपक्षे अपसिद्धान्तमसदकरणादित्यादिहेतुविरोधं चा-भिप्रेत्याह । न चेति । ननु कार्यस्य कृतिः तावन्न कार्यस्वरूपमेव । कार्यं क्रियते घटः क्रियत इति सामान्यतो विशेषतश्च सह प्रयो-गात् अतिरिक्ता च सा तथा सति कार्यव्यक्तौ कः प्रद्वेषः कृतिरपि

कृता वा व्यक्ता वा पूर्वेचानवस्था उत्तरत्र कारकनैष्फल्यापसिद्धान्तौ व्यक्तिरपि कृता व्यक्ता वेत्युभयथाऽप्यनवस्था तत्राह। नैवमिति। कृतिर्हि कारकाणां व्यापारः स चागन्तुस्वकारणव्यापारेण जन्यते सोऽपि तथेति सिद्धाऽनवस्थैषा। सा च सर्वसम्मता न दोषः त्वयाऽप्यभिव्यञ्जकव्यापारो व्यञ्जकान्तरव्यापारव्यङ्ग्य इति वाच्यं। ननु व्यक्तिर्न व्यज्यते न क्रियते च अव्यक्तैव नित्यं स्वयं व्यक्तैव वा कार्याणां व्यक्तिः स्यात्। न स्यात्। तदर्थकारकव्यापारवैयर्थ्यप्रसङ्गात् कार्याणां नित्यव्यक्तिप्रसङ्गाच्च। ननूत्पत्तिर्नाम सत्तासमवायो वा। स्वकारकसमवायो वा स च नित्यः न तदर्थश्च कारकव्यापारः कृतिरिति समा नश्चर्चा। न। समवायस्यास्माभिरनभ्युपगमात् तदेतदस्मच्छब्दान्वादेशेन सूचितं। का तर्ह्युत्पत्तिः कृतिरेव। अन्यधर्मः कथमन्यस्योत्पत्तिरिति चेत्तादर्थ्येन तद्धर्मतोपचारात् यदा हि तन्त्वादयो व्याप्रियन्ते तदा पट उत्पद्यत इति व्यवहरन्ति आद्यक्षणावच्छिन्नपटत्वावस्थैव वा पटोत्पत्तिरुच्यते सैव तदवस्थस्योत्पत्तिरिति भाष्यमपि तदभिप्रायमेव स्यात्। अत एव हि सह प्रयोगोपपत्तिः न चेदृश्या उत्पत्तेरुत्पत्त्यन्तरमस्ति। तथाऽपि प्रागसिद्धस्वरूपलाभादुत्पत्तिशब्द उपचाराद्भवतु वा मा वा तदा कार्योत्पत्त्यर्थः कारकव्यापार इति सिद्ध्यति स एव यदोत्पत्तिर्विवक्षिता तदा कार्यार्थः कारकव्यापारइत्येव वक्तव्यम् अन्यथा तूपचारः।

क्रियैव कारकाणां स्यात् प्रतिसम्बन्धिनीत्यसत्।
प्राक्सत्त्वासत्त्वसंक्षोभस्तस्यामपि हि दुस्तरः॥
क्रियावद्भिः पटादेश्च कारकैस्तादृशोऽन्वयः।
प्रधाने भागनिष्पत्त्या भागैरैक्याच्च भागिनः॥

प्राक्सत्त्वं सर्वभावानां मिथश्चैक्यमिति त्वसत् ।
भिन्नांशपूर्वसत्त्वे हि नाभिन्नाद्भेदसम्भवः ॥
भिन्नाभिन्नाद्यदि व्यक्तिभैदानीं प्राक्तनी भवेत् ।
एकस्य प्रागसन् भेदो यदि स्यादस्मदिष्टवत् ॥
प्राक्सतोऽस्याप्यवस्था चेत्तथाऽप्यस्मदभीष्टवत् ॥ २४ ॥

इति सांख्यसत्कार्यवादभङ्गः ॥

अर्थवैनाशिकनिरासाय सत्कार्यवादे साधिते तुल्यन्यायतया सर्वनित्यत्ववादेन समुत्थितः सांख्यो निरस्तः । अथ पक्षचयप्रतिपक्षं वैनाशिकमतं निरस्यति । वस्तुस्थैर्यमिति ।

सू० वस्तुस्थैर्यं विरुद्धानुपहितविषया साधयेत् प्रत्यभिज्ञा नैकस्मिन् शक्त्यशक्ती कृतितदितरयोः सा ह्यभेदेन सिद्धेः । एकस्मिन् कालभेदाद्भवति च सहकार्यन्वयानन्वयादिर्नाचेन्नो देशभेदादपि सुपरिहरस्तेन नैकं क्वचित्स्यात् ॥ २५ ॥

वस्तुशब्देन सत्त्वानुमानसूचनं यथाऽऽहुः यत्सत्तत्क्षणिकं यथा जलधरः सन्तश्च भावा इति । यदक्षणिकं तदवस्तु यथा खसूनम् । अक्षणिकत्वे चामीषां तद्वदसत्त्वप्रसङ्ग इति भावः । विरुद्धानुपहितविषयेति । विरुद्धधर्मासंसृष्टविषयेत्यर्थः दीपस्रोतःप्रभृतिषु अनन्यथासिद्धभेदकबलात् बाधः विप्रतिपन्नैकत्वधीः प्रमा विरुद्धधर्मासंसृष्टविषयत्वात् सम्मतैकत्वधीवत् न हि स्वलक्षणानां प्रत्येकमेकत्वं नास्ति तथा सत्येकानेकसर्वविकल्पलोपेन माध्यमिकविजयप्रसङ्गात् । रूपादिधीवदित्यत्र वोदाहर्तव्यं तदियं प्रमितिः सती

प्रत्यभिज्ञा पूर्वापरकालवर्तिविषयं साधयति दीपनदीप्रवाहकृत्तपुनः-प्ररूढकेशादिषु तु सम्प्रतिपन्नसामग्रीभेदादिबाधकबलात् तस्या न साधकत्वम् । ननु स इति धीः स्मृतिः अयमित्यनुभवः निरन्तरोत्पत्तेः ज्वालावर्णेष्विव तयोर्भेदाग्रह इति तन्न । समानाधिकरणबोधात् यद्यपि सोऽयमिति व्यवहारे तादृशधीभेदेन वैयधिकरण्यशङ्का । तथाऽपि तमिमं पश्यामीत्यादिषु उभयाकारविशिष्टस्यैकस्य दृशिकर्मत्वदृष्टेर्बुद्ध्यैक्यं दुरपह्नवम् । अत एव ग्रहणस्मरणात्मकमिदं ज्ञानमिति वदन्तः प्रत्युक्ताः । ननु कथमिन्द्रियासम्बद्धः तदंश इदानीमिन्द्रियेण गृह्येत मनोऽसम्बद्धोऽनुभूतविषयः कथं मनसा तदनुभवजन्यसंस्कारसहकारादिति चेत् समानमत्राऽपि । दृष्टत्वात् तथैव तत्रेति चेत् अत्राऽपि तथैव । वेद्याकारैकदेशादुत्पन्नस्य प्रत्यक्षत्वे शुक्तिरजतधीरपि मानं स्यादिति चेन्न । आरोपानारोपाभ्यां विशेषात् । किं च संस्कारोपनीतरजताद्यारोपे च इदं रजतमिति चाक्षुषबुद्धिरेका । न हि तत्र रजताद्बुद्ध्युत्पत्तिः तस्यासन्निहितत्वात् । अर्थजत्वेन त्वदुक्ताविसंवादित्वप्रसङ्गाच्च । इन्द्रियजन्यतया प्रत्यक्षत्ववत् संस्कारजन्यतया स्मृतित्वमपि दुर्निवारमिति चेन्न । तमेतमनुभवामि पश्यामीत्यादिप्रत्यक्षविरोधादेव । अत एव संस्कारप्राधान्यमुत्प्रेक्ष्य केवलस्मृतित्वशङ्काऽपि निरस्ता । भवतु वा स्मृतित्वमपि । तथाऽपि स्मृत्यनुभवात्मकमेकं ज्ञानं स्वविषयस्य स्थिरत्वं साधयत्येव । कथमप्रमा स्मृतिरर्थं व्यवस्थापयेदिति चेत् किमत्राप्रमात्वं ज्ञानव्यतिरिक्तत्वं वा । अनुभवव्यतिरिक्तत्वं वा अयथार्थत्वं वा । नाद्यः असिद्धेः । न द्वितीयः चितवप्रकाशवादिभिः स्मृतेरप्यात्मस्वात्मविषयेऽनुभवत्वस्वीकारात्, त्वया च स्वसंवेदनांशेऽपि । विषयांशेऽनुभवव्यतिरिक्तत्वं स्मृतेरिति चेत् । तथाभूताऽपि स्वकार-

धिश्च न श्रुतौ धूत्वा शरीरमकृतं कृतात्मेत्यत्र शरीरं श्रुतम्, अवधिस्तु न श्रुतः शरीरमिति एकवचनमपि जातिविषयम्, अश्व इव रोमाणि विधूय-पापमिति पूर्वखण्डस्थपापशब्दैकवचनवदित्यभिप्रायेण देहावधिनियमाश्र-वणादित्युक्तम्, अस्मिन्पादे बह्वधिकरणोक्तार्थस्य सुग्रहत्वायाह "तदेव-मि"ति, परे त्वनारब्धकार्य्ये इत्यत्र यद्भावर्तितं तस्य कर्मणः क्षयप्रकारं दर्श-यतीदं सूत्रमित्याहुः। तत्प्रयोजनशून्यत्वादनाददरणीयम् अनारब्धकार्ययो-र्ज्ञानदाह्यत्वेऽभिहिते तद्वितरयोर्हि भोगेन क्षयः स्फुटः । अपरे तु कर्तृत्व-स्याविद्यामूलत्वाद्विदुषश्चाविद्यानिवृत्तौ भोक्तृत्वासम्भवात् बहुशरीरप्र-दैककर्मणो देहान्तरोपाधौ तस्य तावदेवेति श्रुतिवशेन भोगासंभ-वाच्च प्रारब्धस्यापि ज्ञानेनैव क्षय इति पूर्वपक्षं कृत्वा तस्य ताव-दित्यवशेषितस्य कर्मणो ज्ञानदाह्यत्वायोगाद्विदुषोऽपि सुखदुःखानुभवद-र्शनेन प्रारब्धभोगानुगुणाविद्यालेशानुवृत्तेरभ्युपगन्तव्यत्वात्तस्य तावदिति श्रुतेः प्रारब्धसर्वकर्मक्षयावधिपरत्वोपपत्तेरत एव प्रारब्धस्य देहान्तरो-पाधौ ज्ञानादाह्यत्वाश्रयणायोगाच्च भोगेनैव क्षय इति सिद्धान्तयति तद-युक्तम् । अनारब्धकार्य्ये एवेत्यत्र समर्थितत्वात्, एवकारार्थो हि प्रारब्धस्य ज्ञानादाह्यत्वं, तच्च तस्य तावदित्यवधिश्रवणेन समर्थितम् अविद्यापूर्वक-त्वात् कर्त्तृत्वस्य तदभावात् ।

वृ० तत्फलभोगसमाप्त्यनन्तरं ब्रह्म सम्पद्यते, ते च पुण्यपापे एकशरीरोपभोग्यफले चेत्तच्छरीरावसाने इति सम्पद्यते, अनेकशरीरोपभोग्यफले चेत्तदवसाने सम्पद्यते भोगेनैव च क्षययितव्यत्वादारब्धफलयोः कर्मणोः तस्य तावदेव चिरं यावन्न विमोक्ष्य इति च भोगेन तयोः कर्मणोर्विमोक्ष उच्यते देहावधिनियमाश्रवणात् तदेवं ब्रह्मविद्यायाः प्रागनुष्ठितमभुक्तफलमनारब्धफलं पुण्यपा पद्रूपं कर्मानादिकालसञ्चितमनन्तं विद्यामाहात्म्यादि-नश्यति, विद्यारम्भोत्तरकालमनुष्ठितञ्च न श्लिष्यति, तच

पुण्यरूपं सर्वं विदुषः सुहृदो गृह्णन्ति, पापं च द्विषन्त इति निरवद्यम् ॥ इतरक्षपणाधिकरणं समाप्तम् ॥

अत्राधिकरणानि एकादश,

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये चतुर्थाध्यायस्य प्रथमः पादः ॥

टी० भोगानुपपत्तिः परिहरणीयेति चेत् यदि सा परिहार्य्या तर्हि तत्रैव परिहर्त्तव्या, इह सूत्रेऽपि तत्परिहारस्याभिप्रायिकत्वं वक्तव्यं तत्त्रैव वक्तुं युक्तं साध्यसिद्ध्युपयोगस्याविशिष्टतया तदौपयिकार्थानां तत्रैव वक्तव्यत्वात्, युक्तिरपि निर्मूला जक्षत् क्रीडन् रममाण इति मुक्तोपरं ब्रह्मोपसम्पन्नस्यापि कर्तृत्वश्रवणेन तस्याविद्यापूर्वकत्वाभावात् कर्मफलभोगादिकर्त्तृत्वं चौपाधिकमिति पूर्वपक्षयुक्तेर्निर्मूलतयाऽनारम्भणीयता । अतः अनारब्धकार्य्ये इत्यत्र प्रारब्धस्य भोगविनाश्यत्वे सिद्धे तदवधेरेव चिन्तनीयत्वं युक्तम् । अन्ये तु एकस्यापि कर्मणो बहुशरीरप्रदत्वसम्भवात्तस्य तावदित्यस्य कर्मक्षयावधिपरत्वोपपत्तेर्व्यासादीनां पुनर्जन्मदर्शनाच्च विद्यायोनिशरीरावसानत्वनियमाभावं पूर्वपक्षीकृत्य विद्यायोनिशरीरावसाने प्रारब्धस्यापि कर्मणो विरतव्यापारत्वात् विरतव्यापारस्यानारब्धतुल्यत्वेन विद्याविनाश्यत्वात् तस्य तावदिति वाक्यस्य तद्देहावधिविषयत्वोपपत्तेर्व्यासादीनामाधिकारिकत्वादविरतव्यापारेण पूर्वकर्मणैव बहुशरीरग्रहणोपपत्तेश्च विद्यायोनिशरीरावसानत्वं सिद्धान्तयन्ति, तदयुक्तं विद्यायोनिशरीरपाते प्रारब्धकर्मणो विरतव्यापारत्वे प्रमाणाभावात्,प्रत्युत व्यासादीनां बहुदेहपरिग्रहस्तद्विरुद्धश्चोपलभ्यते तेषां कर्मणोऽविरतव्यापारत्वे संप्रतिपन्ने तदितरेषामेकस्मिन् विद्यायोनिदेहान्त एव विरतव्यापारत्वे किं प्रमाणं, तस्य तावदिति श्रुतेस्त्ववधिविशेषाश्रवणात् तद्देहपातावधिपरत्वमनुपपन्नं, न हि विद्यायोनेः शरीराद्यावन्न विमोक्ष्ये इति श्रूयते, तस्माद्विद्यायोनिशरीरावसानत्वनियमाभाव एव सिद्धान्तीकर्तव्यः ॥ इतरक्षपणाधिकरणं समाप्तम् ॥

इति श्रीश्रुतप्रकाशिकायां चतुर्थस्याध्यायस्य प्रथमः पादः ॥

श्रीमते रामानुजाय नमः ।

नमः पूर्वाचार्येभ्यः ।

अथ चतुर्थस्य द्वितीयः पाद आरभ्यते ।

वागधिकरणम् । **सू० वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १ ॥**

भू० इदानीं विदुषो गतिप्रकारं चिन्तयितुमारभते, प्रथमन्ता-वदुत्क्रान्तिश्चिन्त्यते, तत्रेदमाम्नायते "अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवताया"मिति, अत्र वाङ्मनसि संपद्यत इति वाचो मनसि संपत्तिश्रुतिः किं वाग्वृत्तिमात्रविषया ? उत वाग्विषये ? ति विशये वृत्तिमात्रविषयेति युक्तं, कुतः मनसो वाक्प्रकृतित्वाभावात्, नच वाक्स्वरूपसम्पत्त्य-सम्भवात्, वागादिवृत्तीनां मनोऽधीनत्वेन वृत्तिसम्पत्ति-श्रुतिः कथंचिदुपपद्यत इत्येवं प्राप्तेऽभिधीयते वाङ्मन-सीति, वाक् स्वरूपमेव मनसि संपद्यते कुतः तद्दर्शनात् ।

सू० वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १ ॥ शरीरस्थितिसमये यद्वि-द्याफलं तदुक्तम्, । अथ गत्युपक्रमश्चिन्त्यत इति पादसङ्गतिः, गतेरुपक्रम उत्क्रान्तिः सा चिन्त्यते, किमियं सम्पत्तिर्वाग्वृत्तिविषया ? उत वाक्स्वरूप-विषये ? ति, किं वाक्शब्दस्य मुख्यार्थपरिग्रह उपपद्योनेति, किमियं सम्प-त्तिर्लयरूपा ? उत व्यापारनिवृत्तिपूर्वकसंयोगरूपे ? ति इन्द्रियान्तरसम्पत्ति-वचनं किं लयपरत्वेऽप्युपपद्यते ? उत संयोगपरत्व एवे ? ति, यदा लयपरत्वे-ऽप्युपपद्यते, तदा सम्पत्तेर्लयरूपतया वाक्छब्दस्य मुख्यार्थपरिग्रहायोगा-त्सम्पत्तिर्वृत्तिविषया स्यात्, यदा संयोगपरत्व एवोपपत्तिस्तदा सम्पत्तेः

संयोगरूपत्वेन वाक्शब्दस्य मुख्यार्थत्वात्सम्पत्तिः स्वरूपविषया स्यात् कुत इत्यादि, कारणे हि लयः न वाचो मनः कारणं तत्प्रवृत्तेरेव कारणं मन इति वृत्तिविषया सम्पत्तिरित्यर्थः, वाग्वृत्तेर्हि वागाश्रयभूता न मनः, अतस्तद्वृत्तिहेतुस्वरूपव्यापारस्य मनसि लय इत्यस्वारस्याभिप्रायेण कथञ्चिदित्युक्तं, वाङ्मनसीतीति वाक्शब्दस्य वृत्तिपरत्वे लक्षणा स्यात्, स्वरूपपरत्वे तु न लक्षणा सम्पत्तिशब्दो लयवाची संयोगवाची च, लयवाचित्वे प्रसिद्धिप्राचुर्यात् संयोगवाचित्वमस्वरसमिति चेत् पूर्वपक्षिणोऽपि लयवाचित्वमयुक्तम्, उपादाने हि लयः वाग्वृत्तेर्वागेवोपादानं मनस्तु निमित्तम्, एवं वाक्शब्दसम्पत्तिशब्दयोरुभयोरपि लाक्षणिकत्वास्वारस्यप्रसङ्गः पूर्वपक्षे । अस्माकं तु सम्पत्तिशब्दास्वारस्यमेव न वाक्शब्दलक्षणेति विशेष इत्यर्थः ॥

भा० दृश्यते हि वागिन्द्रिये उपरतेऽपि मनःप्रवृत्तिः, वृत्तिमात्रसम्पत्त्याऽपि तदुपपद्यते इति चेत्तचाह शब्दाच्चेति, वाङ्मनसि सम्पद्यते इति वाक्स्वरूपसंपत्तावेव हि—शब्दो न वृत्तिमात्रसम्पत्तौ, न हि तदानीं वृत्त्युपरमे वागिन्द्रियं प्रमाणान्तरेणोपलभ्यते येन वृत्तिमात्रं संपद्यत इत्युच्येत यदुक्तं मनसोवाक्प्रकृतिकत्वाभावाद्वाचो मनसि संपत्तिर्नोपपद्यत इति, तद्वाङ्मनसि संपद्यत इति वचनान्मनसा वाक् संयुज्यते न तु तत्र लीयत इति परिहर्त्तव्यम् ॥

सू० अत एव सर्वाण्यनु ॥ २ ॥

यतो वाचो मनसा संयोगमात्रं सम्पत्तिर्न तु लयः, अत एव वाचमनु सर्वेषामिन्द्रियाणां मनसि सम्पत्तिर्मुनिरुपपद्यते, तस्मादुपशान्ततेजा अपुनर्भवमिन्द्रियैर्मनसि सम्पद्यमानैरिति ॥ वागधिकरणं समाप्तम् ॥

मनोऽधिकरणम् । सू० तन्मनःप्राण उत्तरात् ॥ ३ ॥

तत्सर्वेन्द्रियसंयुक्तं मनः प्राणे सम्पद्यते प्राणेन संयुज्यते न मनोवृत्तिमात्रं कुतः, उत्तरात् मनः प्राण इति वाक्यात्, अधिकाशङ्का तु, अन्नमयं हि सोम्य मन इति वचनान्मनसोऽन्नप्रकृतिकत्वमवगम्यते, अन्नस्य च "ता अन्नमसृजन्तेत्यम्मयत्वं सिद्धम् आपोमयः प्राण इति चाप्प्रकृतित्वं प्राणस्यावगम्यते, अतो मनः प्राणे संपद्यत इत्यत्र प्राणशब्देन प्राणप्रकृतिभूता आपो निर्दिश्य तासु मनःसम्पत्तिप्रतिपादने ।

टी० दृश्यते हीति, प्रवृत्तव्यापारं मनो निवृत्तव्यापारं वागिन्द्रियं, तत्र प्रवृत्तस्वकार्य्ये मनसि निवृत्तस्वकार्य्यं वागिन्द्रियमन्तर्गतम्भवितुमर्हति, यथा प्रवृत्तस्वकार्य्ये दारुणि निवृत्तस्वकार्य्योऽग्निरन्तर्भूत इति भावः । वृत्तिमात्रे इति यद्यन्निवृत्तस्वकार्य्यं तत्तत्प्रवृत्तस्वकार्य्ये ऽन्तर्गतम्भवतीति न व्याप्तिरस्ति, अतो वृत्तिमात्रसम्पत्त्यापि वागिन्द्रियोपरमे मनःप्रवृत्तिदर्शनमुपपद्यत इत्यर्थः । दर्शनाच्छब्दाच्चेति द्वयमप्येको हेतुः सू० अत एव सर्वाण्यनु ॥ २ ॥ वाचमनु वाचः पश्चादित्यर्थः ॥ वागधिकरणं समाप्तम् ॥ सू० तन्मनः प्राण उत्तरात् ॥ ३ ॥ सङ्गतिः स्फुटा, किमत्र मनसो लय उच्यते? उत संयोगः? किमत्र प्राण इत्यपां निर्द्देश? उत प्राणस्यैव? आपोमय इति वाक्यं किं प्रकृतिविकारभावपरम्? उताप्याय? परं नप्रकृतिविकारपरत्वे प्राण इत्यपां निर्द्देशात् सम्पत्तिर्लयः स्यात् आप्यायनपरत्वे प्राणस्यैव निर्द्देशात् सम्पत्तिः संयोगः स्यात्, तच्छब्दं व्याचष्टे "सर्वेन्द्रिये"ति, अधिकाशङ्केत्यादि, ॥

सू० परम्परया स्वकारणे लय इति सम्पत्तिवचनमुपपन्नं भवतीति । परिहारस्तु अन्नमयं हि सोम्य मनः आपोमयः

प्राण इति मनःप्राणयोरन्नेनाद्भिश्चाप्यायनमुच्यते न तत्प्रकृतित्वम् आहङ्कारिकत्वान्मनसः, आकाशादिविकारत्वाच्च प्राणस्य प्राणशब्देनापां लक्षणा च स्यादिति ॥ मनोऽधिकरणं समाप्तम् ॥

टी० परम्परया स्वकारणे लय इति, स्वकारणपृथिवीद्वारेणान्नमयस्य मनसः प्राणशब्दलक्षितास्वप्सु लय इत्यर्थः । परिहरति "परिहारस्त्वि"ति, परे तु श्रुतिलक्षणाविशये श्रुतेर्बलीयस्त्वाद्वागेव सम्पद्यत इति, पूर्वपक्षं कृत्वा वाचो मनःप्रकृतिकत्वाभावेन तत्र तल्लयायोगात् पार्थिवेन्धनजन्याया अग्निवृत्तेरप्सूपशमदर्शनेन वृत्त्युद्भवाभिभवयोः प्रकृतिसमाश्रयत्वासम्भवाच्च वाग्वृत्तिर्मनसि संपद्यते, एवमेवेन्द्रियान्तरवृत्तिर्मनसि संपद्यत इति सिद्धान्तयन्ति, शब्दादिति वाक्शब्दस्यापि वृत्तिभेदोपचारादुपपत्तेरिति व्याचक्षते तदयुक्तं सौत्रयोर्वाक्शब्दशब्दयोर्वृत्त्युपपत्तिपरत्वे लाक्षणिकत्वप्रसङ्गात्, अर्थविरोधाच्च, अर्थविरोधश्च श्रुतिस्वारस्यहान्याधिक्यरूपः वाक्शब्दस्य वृत्तिपरत्वं मनसीति सप्तम्या निरर्थकत्वं लयवाचिनः संपत्तिशब्दस्योपशमपरत्वं च स्वावस्थाप्रहाणेन कारणसंश्लेषो हि लयः न तूपशममात्रं जलसंसर्गो वह्निशान्तिहेतुः न स्थानम् अभिज्वलनाभावो ह्यग्न्यवयवाश्रयः अम्भसोक्षिते दहने सत्यम्भसा शाम्यतीति ह्युच्यते न त्वम्भसि शाम्यतीति बहुजलप्रक्षिप्तेऽप्यग्नौ तच्छान्तिहेतुरेव जलं न त्वभिज्वलनाभावाधिकरणं बहुसलिलस्याङ्गाराधिकरणतया विवेकाभावात् निरिन्धनोऽप्सु शाम्यतीति व्यवहारः, अतः श्रुतिस्वारस्यभङ्गाधिक्यम्, अस्माकं तु संपत्तिशब्दास्वारस्यमात्रमेवेत्यस्मत्पक्ष एवोपपन्नः, तन्मनः प्राण इत्यनन्तराधिकरणस्यापि मनोवृत्तिलयपरत्वमुक्तदोषग्रस्तम् । अपरेऽप्यस्मिन्नधिकरणे तुल्याभिप्रायाः, तुल्यप्रतिक्षेपाश्च, हेतुवैषम्यमेव ब्रह्मणि लयश्रुतिविरोधात् अविदुषोऽपि देहान्तरप्रतिपत्तौ करणानुवृत्त्यनुपपत्तेश्च वाग्वृत्तिलय इति तत्राद्यो हेतुरयुक्तः, तथा हि मनसि वाग्वृत्तिलयश्चेत् ब्रह्मणि सर्ववस्तुलयश्रुतिविरोधः, मनसो ब्रह्माभिन्नत्वादविरोधश्चेत्स्व-

रूपलयेऽपि तुल्यं, द्वितीयस्तु स्वरूपलयाभावहेतुत्वादस्मत्पक्षानुगुणः । अन्य तु वागादिबाह्येन्द्रियाणां मनस्येव लय ? उतान्यत्रेति विचार्य मनः-शब्दलक्षिते अहङ्कारे लय इति पूर्वपक्षं कृत्वा सम्पत्ति-शब्देन वृत्तिविलोपाय संयोगस्य विवक्षितत्वात् मनस्येव सम्पत्तिरिति सिद्धान्तयन्ति तन्मन इति, प्राण-शब्दलक्षिते अहङ्कारे मनसो लय इत्याशङ्क्य पूर्ववत् सिद्धान्तयन्ति मुख्यप्राणे मनःसंश्लेषश्चेत् सहोत्क्रान्तिर्वाच्या न तु पश्चात् सर्वे प्राणा अनूत्क्रामन्तीति पश्चादुत्क्रान्तिश्रवणात्सर्वेन्द्रियसंयुक्तस्य मनसो न प्राणसंयोग इत्यधिकाशङ्कामुक्त्वा अनुर्न पश्चाद् भावपरः किं तु तृतीयार्थे कर्मप्रवचनीयः तस्मात्सहोत्क्रामतीत्यधिकं परिहारमाहुः तत्र विचारस्य संपत्तिस्थानविषयत्वादपि संपद्यमानवस्तुविषयत्वमुचितम् आकाशाद्वायुर्वायोरग्निरग्नेराप इत्युत्पत्तिवचन इव संपत्तिवाक्येऽपि वाङ् मनसि मनः प्राणे प्राणस्तेजसीति श्रङ्खलितनिर्देशे पूर्वापरयोर्मनः-शब्दयोः प्राणशब्दयोश्चार्थैक्यस्यस्वतःप्राप्तत्वेनाहङ्कारवाचित्वमनोवाचित्वाहङ्कारवाचित्वप्राणवाचित्वास्मयणायोगात्, एकस्मिन्नर्थे ग्राह्ये तत्रापि मुख्यार्थस्य स्वतःप्राप्तत्वात् मनःप्राणशब्दयोरमुख्यैकरूपार्थस्वीकारे सत्यहङ्कारपरत्वात्तयोरुत्तरवाक्यान्वयायोगान्मुख्यार्थः स्वतःप्राप्त इति तथा प्रसिद्धार्थे स्वकृते सति क्रियमाणो विचारः सम्पद्यमानवस्तुविषय एव भवितुमर्हतीति पश्चादुत्क्रान्तिश्रवणमिन्द्रियाणां प्राणसंश्लेषबाधकमित्यधिकाशङ्का चानुपपन्ना, प्राण-शब्दस्याङ्कारपरत्वं पूर्वपक्षयतामनभिमतं पूर्वपक्षविरुद्धत्वाच्छङ्कायाः पूर्वपक्षसाधकयुक्त्याधिक्यमूला ह्यधिकाशङ्का मनसोऽहङ्कारलीनत्वे मुख्यप्राणात् पृथगिन्द्रियोत्क्रमणं हि विरुध्यते,तस्माद्विचाराधिकशङ्के यथाभाष्यमेवोपपन्ने । मनोऽधिकरणं समाप्तम् ॥

अध्यक्षाधिकरणम् । **सू० सोऽध्यक्षे तदुपगमादिभ्यः ॥४॥**

स्रू० यथा वाङ्मनसि संपद्यते मनः प्राण इति वचनानुरोधेन मनःप्राणयोरेव वाङ्मनयोः संपत्तिः ।

टी० सू० सोऽध्यक्षे तदुपगमादिभ्यः ॥ ४ ॥ संगतिः स्फुटा, किं प्राणस्तेजसि संपद्यते? उत जीवे? किं प्राणस्तेजसीति वाक्यं जीवसंपत्तिपूर्वकतेजःसंपत्तिपरम्? उत केवलतेजस्संपत्तिपरं? जीवसंपत्तिपरत्वे प्राणस्तेजसीति वाक्यस्वारस्यं हीयते नेति? हीयते चेद्वाक्यस्य केवलतेजःसम्पत्तिपरत्वान्न जीवे सम्पत्तिः, न हियते चेत् जीवसंपत्तिपूर्वकतेजःसम्पत्तिपरत्वाद्वाक्यस्य प्राणस्य जीवे सम्पत्तिः, यथेत्यादि उपगमः संबन्धः तेजःशब्देन भूतसूक्ष्मांशका विवक्षिताः आदिशब्दविवक्षितार्थमाह—

सू० तथा प्राणस्तेजसीति वचनात्तेजस्येव प्राणः सम्पद्यत इति प्राप्त उच्यते सोऽध्यक्ष इति, स प्राणोऽध्यक्षे करणाधिपे जीवे संपद्यते कुतः तदुपगमादिभ्यः, प्राणस्य जीवोपगमस्तावच्छ्रूयते "एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ती"ति, तथा जीवेन सह प्राणस्योत्क्रान्तिः श्रूयते तमुत्क्रामन्तं प्राणोऽनूत्क्रामतीति प्रतिष्ठा च जीवेन सह श्रूयते कस्मिन्नुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठिते प्रतिष्ठि[१]तःस्यामिति एवं जीवेन संयुक्ता तेन सह तेज सम्पत्तिरिह प्राणस्तेजसीत्युच्यते, यथा यमुनायाः गङ्गया संयुज्य सागरगमनेऽपि यमुना सागरं गच्छतीति वचो न विरुध्यते तद्वत् ॥ अध्यक्षाधिकरणं समाप्तम् ॥

भूताधिकरणम् । सू० भूतेषु तच्छ्रुतेः ॥ ५ ॥

प्राणस्तेजसीति जीवसंयुक्तस्य प्राणस्य तेजसि संपत्तिरुक्ता सा सम्पत्तिः किं तेजोमात्रे? उत संहतेषु सर्वेषु भूतेष्विति विशये तेजोमात्रश्रवणात्तेजसीति प्राप्त उच्यते भूतेष्वि"ति, भूतेषु संपद्यत इति, कुतः तच्छ्रुतेः,

१ प्रतिष्ठास्यामीति पा० ।

टी० "तथे"ति, अन्येन संयुज्य पदार्थान्तरत्वन्येऽप्यन्यतरवाचिशब्दनिर्देशे दृष्टान्तमाह "यथे"ति, इतरे त्वयोऽप्यश्रुतत्वादिति पूर्वपक्षहेतुमाहुः, अतिरिक्तहेतौ सम्भवति अश्रवणमात्रस्य हेतुत्वायोगादप्यप्रयोज्यो भाष्ये दर्शितः । सिद्धान्ते च सुघ्नात् पाटलीपुत्रगमनस्य मथुराव्यवधानेऽपि सुघ्नात् पाटलीपुत्रगमनव्यवहारो दृष्टान्तितः, ततोऽपि गङ्गासाहित्यकण्ठोक्तिरहितयमुनासागरगमनव्यवहारदृष्टान्त उचितः, पाटलीपुत्रगमने सुघ्नमथुरयोः सह गमनाभावात्, इह तु सहगमनसद्भावात् गङ्गास्थानीयजीवापेक्षया यमुनास्थानीयस्य प्राणस्य गुणभावाच्च सहावस्थानस्य श्रुतिं स विज्ञानो भवतीत्युदाहरन्ति विज्ञायतेऽनेनेति व्युत्पत्त्या विज्ञानानीन्द्रियाणि सेन्द्रिय इत्यर्थः । तस्यात्रिपदार्थत्वात् प्रतिष्ठाविषयश्रुत्यन्तरमुदाहृतं भाष्ये । अध्यक्षाधिकरणं समाप्तम् ॥ सू० भूतेषु तच्छ्रुतेः ॥ ५ ॥ सङ्गतिः स्फुटा किमत्र भूतान्तरसंसृष्टतेजःसंयोगः? उत तेजोमात्रसंयोग? इति, किं तेजःशब्दस्तेजोमात्रपर? उत भूतान्तरसंसृष्टपरः?

भा० पृथिवीमय आपोमयस्तेजोमय" इति जीवस्य सञ्चरतः सर्वभूतमयत्वश्रुतेः । ननु तेजःप्रभृतिष्वेकैकस्मिन् क्रमेण संपत्तावपि पृथिवीमय इत्यादिका श्रुतिरुपपद्यते अत आह—

सू० नैकस्मिन्दर्शयतो हि ॥ ६ ॥

नैकस्मिन् एकैकस्य कार्याक्षमत्वात् ।

टी० किं पृथिवीमय आपोमय इत्यादिवाक्यं युगपदनेकभूतसंसर्गं दर्शयति, नेति, किं त्रिवृत्करणश्रुतिः पञ्चीकरणस्मृतिश्च संहतानामेव कार्यसामर्थ्यं दर्शयतो नेति? न चेत् पृथिवीमय इत्यादिना यौगपद्यप्रदर्शनाभावेन तेजः शब्दस्य तेजोमात्रपरतया तेजोमात्रसंयोगः स्यात् । दर्शयतश्चेत् पृथिवीमयत्वादिश्रुत्या युगपदनेकभूतसंसर्गप्रदर्शनेन तेजःशब्दस्य

भूतान्तरसंसृष्टतेजःपरतया भूतान्तरसंसृष्टतेजःसंयोगः स्यात्सर्वभूतमयत्व-
श्रुतेरिति भूतमात्रे प्रक्रान्तेऽपि सामर्थ्यात् भूतमयत्वपरामर्शित्वसिद्धिस्त-
च्छब्दस्य फलितेति भावः । अनन्तरसूत्रशङ्कामाह "नन्वि"ति, । सू० नैक-
स्मिन्दर्शयतो हि ॥ ६ ॥ पञ्चीकृतेषु त्रिवृत्कृतेषु वा भूतेष्वेकैकमेव
कार्य्यसमर्थं न त्वत्रिवृत्कृतमेकैकं कार्य्यसमर्थम् । आपः पुरुषवचसो भव
न्तीत्यत्र त्रिवृत्कृतानामेवापां कार्य्यकरत्वदर्शनात्, अजहल्लक्षणया तेजः
शब्दस्त्रिवृत्कृतान् भूतसूक्ष्मांशानाह । अत्र परे चापरे च नैकस्मिन्निति सूत्रा
न्तमेकमधिकरणं वर्णयन्ति, कथं तर्हि प्राणस्तेजसीति श्रुतिरित्यपेक्षाय
तन्निर्वाहार्थं भूतेषु तच्छ्रुतेरिति सूत्रं स प्राणसंपृक्तोऽध्यक्षस्तेजःसचिव
भूतेषु वर्त्तेत इत्यवगन्तव्यं तच्छ्रुतेः प्राणस्तेजसीति श्रुतेरिति व्याख्या
तावता प्राणस्य साक्षात्तेजःप्राप्तिश्रुतिविरोधस्यापरिहृतत्वात् स्रुघ्नपाटली
पुत्रदृष्टान्तेन विरोधं शमयन्ति एकमेव तेजः श्रूयते न भूतान्तरमित्यपे
क्षायां नैकस्मिन्निति सूत्रमवतारयन्ति दर्शयतः प्रश्नप्रतिवचने आपः पुरु
षवचस इति व्याख्यातं त्र्यात्मकत्वादिति पृथिवीमय आपो मयः ।

सू० दर्शयतो ह्यक्षमत्वं श्रुतिस्मृती, "अनेन जीवेनात्मनाऽनुप्र
विश्य नामरूपे व्याकरवाणि तासां त्रिवृतं त्रिवृतमेकैक
करवाणी"ति नामरूपव्याकरणयोग्यत्वाय त्रिवृत्करणमुप
दिश्यते "नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विन
नाशक्नुवन्प्रजाः स्रष्टुमसमागम्य कृत्स्नशः । समेत्य
न्योन्यसंयोगं परस्परसमाश्रयाः महादाद्या विशेषान्त
अण्डमुत्पादयन्ति ते" इति, अतः प्राणस्तेजसीति तेजः
शब्देन भूतान्तरसंसृष्टमेव तेजोऽभिधीयते, अतोभूतेषु
सम्पत्तिः ॥ भूताधिकरणं समाप्तम् ॥

आसृत्युपक्रमाधिकरणम् ।

सू० समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥ ७ ॥

इयमुत्क्रान्तिः किं विद्वदविदुषोः समाना? उताविदुष एवे? ति चिन्तायामविदुष एवेति प्राप्तं कुतः विदुषोऽचैवामृतत्ववचनादुत्क्रान्त्यभावाद्विदुषो ह्यचैवामृतत्ववचनं श्रूयते "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः । अथ मर्त्यो ऽमृतो भवत्यच ब्रह्म समश्नुत" इत्येवं प्राप्तेऽभिधीयते समाना चासृत्युपक्रमादिति, विदुषोऽप्यासृत्युपक्रमादुत्क्रान्तिः समाना; आसृत्युपक्रमात्—आगत्युपक्रमात्, नाडीप्रवेशात् प्रागित्यर्थः ॥ विदुषोऽपि हि नाडीविशेषेणोत्क्रम्य गतिः श्रूयते "शतं चैका च हृदयस्य नाड्यस्तासां मूर्द्धानमभिनिःसृतैका ।

टी० अण्व्योमात्राविनाशिन्यो दशार्धानान्तु याः स्मृताः । ताभिः सार्धमिदं सर्वं सम्भवत्यनुपूर्वशः" इति, श्रुतिस्मृती दर्शयत इति वेति, भूतेष्विति सूत्रे दृष्टान्तस्य कण्ठोक्त्यभावादभिप्रायकल्पनायां साक्षात्तेजःसम्पत्तिश्रुतिविरोधपरिहारो दृष्टान्ताभिप्रायकल्पनं च सोऽध्यक्ष इति सूत्रे एव कर्त्तुं युक्तं, तत्र जीवसम्पत्तिपरतायाः स्फुटत्वात् भूतेष्विति सूत्रे जीवसहितप्राणनिर्द्देशाभावात् भूतशब्दतद्गतबहुवचनस्वारस्येन सर्वभूतसंसर्गपरत्वस्य, स्फुटत्वात्, तत्र च व्युदसनीयशङ्काभेदसद्भावात् अधिकरणभेदस्य न्याय्यत्वात् । ननु नैकस्मिन्नित्यनेन पुनरुक्तिरिति चेत्र तस्य च व्युदसनीयशङ्कायान्तरस्योपन्यस्तत्वात् । अन्ये त्वधिकरणभेदं वर्णयन्त एव तच्छ्रुतेरिति प्राणस्तेजसीति श्रुतेरिति व्याचक्षते तदयुक्तं तत्र तेजोमात्रश्रवणेन पूर्वपक्षबीजतया तन्निवारणक्षमत्वाभावात्, अतः पृथि-

वीमय इत्यादिश्रुतिरेव तत्रोदाहार्य्या अतो नैकस्मिन्नित्यत्र त्रिवृत्करण
पञ्चीकरणवाक्ये एवोदाहर्त्तव्ये पञ्चाग्निविद्यावाक्यस्य दशार्धानामिति
स्मृतेश्च पुनःसम्भवविषयतया विद्वदविदुषोः समानत्वाभावात् भाष्ये
तदनादरः ॥ भूताधिकरणं समाप्तम् ॥ सू० समाना च सृत्युपक्रमादमृतत्व
चानुपोष्य ॥ ७ ॥ सङ्गतिः स्फुटा किमियमुत्क्रान्तिर्विद्वदविदुषोःसमाना
उताविदुषएवे ? ति ॥

सू० तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति,
इति, एवं नाडीविशेषेण गतिश्रवणाद्विदुषोऽप्युत्क्रान्ति
वर्ज्जनीया, सा च नाडीप्रवेशात् प्राग्विशेषाश्रवणात्समाना
नत्प्रवेशदशायां च विशेषः श्रूयते "तेन प्रद्योतनेनैष आत्मा
निष्क्रामति चक्षुषो वा मूर्ध्नो वा अन्येभ्यो वा शरीर
देशेभ्य" इति, शतं चैका च हृदयस्येत्यनया श्रुत्यैकार्थ्या
मूर्ध्नो निष्क्रमणं विद्वद्विषयमितरदविद्वद्विषयं, यदु
विदुषोऽचैवामृतत्वं श्रूयते इति, तचोच्यते अमृतत्वं चानु
पोष्य इति, च-शब्दोऽवधारणे अनुपोष्य शरीरेन्द्रिय
दिसंबन्धमदग्ध्वैव यदमृतत्वमुत्तरपूर्वाघयोरश्लेषविनाश
रूपं प्राप्यते तदुच्यते "यदा सर्वे प्रमुच्यन्त" इत्यादिक
श्रुत्येत्यर्थः । अत्र ब्रह्म समश्नुत इति चोपासनवेलाय
यो ब्रह्मानुभवस्तद्विषयमित्यभिप्रायः ॥

सू० तदापीतेः संसारव्यपदेशात् ॥ ८ ॥

अवश्यं च तदमृतत्वमदग्धदेहसम्बन्धस्यैवेति विज्ञेयं, कुत
आपीतेः संसारव्यपदेशात् आपीतिरप्ययो ब्रह्मप्राप्तिः

टी० तयोर्ध्वमायन्नमृतत्वमेतीति श्रुतिः किं विदुष उत्क्रान्तिमवगमयति ? नेति ? किमेषा श्रुतिर्विरहामृतत्वश्रुत्युत्क्रान्तिनिषेधश्रुतिभ्यां व्याहन्यते नेति ? इहामृतत्वं किमघाश्लेषविनाशरूपम् ? उत सर्वबन्धमोक्षरूपं ? निषिध्यमाना चोत्क्रान्तिः किं शरीरापादाना उत शारीरापादाने ? ति च, यद्देहामृतत्वं सर्वबन्धविमोक्षरूपम् । उत्क्रान्तिश्च शरीरापादाना तदा तद्विषयश्रुतिभ्यां तयोर्ध्वमायन्निति श्रुतेर्व्याघातादविदुष एवोत्क्रान्तिः यद्देहामृतत्वमघाश्लेषविनाशरूपं निषिद्धोत्क्रान्तिश्च शारीरापादाना तदा तद्विषयश्रुतिभ्यामूर्ध्वमायन्निति श्रुतेरविरोधात् विदुषोऽप्युत्क्रान्तिं सावगमयति इत्युत्क्रान्तिर्विद्वदविदुषोः समाना स्यात् । पूर्वपक्षहेतुमाह "विदुष"इति, शाङ्कान्ते विष्वगिति, अन्या नाड्यः विष्वग्विततः ताश्चामुमुक्षूणामुत्क्रमणार्था इत्यर्थः, तेन प्रद्योतेन प्रकाशेन तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेनैष आत्मा निष्क्रामतीति पूर्वं श्रुतेः मूर्ध्नो निष्क्रामत एव ऊर्ध्वया नाड्या प्रकाशितद्वारया च निष्क्रमणमित्यर्थः वस्तुसामर्थ्यात्, अनुपोष्य—उष दाह इति धातुः । सू० तदापीतेः संसारव्यपदेशात् ॥ ८ ॥ उत्क्रान्तस्यापि गच्छतः सूक्ष्मशरीरसंबन्धादापीतेः संसार इत्यभिप्रायः । ब्रह्मणः सर्वगतत्वादत्रैव हि ब्रह्म प्राप्तमिति शङ्काया व्यावृत्त्यर्थमाह—

क्षु० सा चार्चिरादिना मार्गेण देशविशेषं गत्वेति वक्ष्यते, आतदवस्थाप्राप्तेः संसारो, देहसम्बन्धलक्षणो हि व्यपदिश्यते, तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति, अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात् प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवानी"ति च, ॥

सू० सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ ९ ॥

विदुषोऽपि बन्धो नाक्ष विदग्धः, यतः सूक्ष्मशरीरमनुवर्त्तते, कुतः इदमवगम्यते, प्रमाणतस्तथोपलब्धेः,

उपलभ्यते हि देवयानेन पथा गच्छतो विदुषस्तं प्रतिब्रूयात् सत्यं ब्रूयादिति चन्द्रमसा संवादवचनेन शरीरसद्भावः, अतः सूक्ष्मशरीरमनुवर्त्तते, अतश्च बन्धो न दग्धः॥

सू० नोपमर्दनातः ॥ १० ॥

अतो यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः । अथ मर्त्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत" इति वचनं न बन्धोपमर्देनामृतत्वं वदति, ॥

सू० अस्यैव चोपपत्तेरूष्मा ॥ ११ ॥

अस्य सूक्ष्मशरीरस्य क्वचिद्विद्यमानत्वोपपत्तेर्विदुषः प्रक्रान्तमरणस्य मरणात्प्रागूष्मा स्थूलशरीरे क्वाचित्क उपलभ्यते, न च स्थूलस्यैव शरीरस्यायमूष्मा अन्यत्रानुपलब्धेः, ततश्चोष्मणः क्वचिदुपलब्धिर्विदुषः सूक्ष्मशरीरस्योत्क्रान्तिनिबन्धनेति गम्यते, तस्माद्विदुषोऽप्यासृत्युपक्रमात्समानोत्क्रान्तिरिति सुष्टूक्तं, पुनरपि विदुष उत्क्रान्तिर्न सम्भवतीत्याशङ्क्य परिह्रियते–

टी० "स चार्चिरादिने"ति, सू० सूक्ष्मंप्रमाणतश्च तथोपलब्धेः ॥ ९ ॥ पूर्वसूत्राभिप्रेतसूक्ष्मशरीरसम्बन्धे प्रमाणमिहोच्यते। सू० नोपमर्दनातः ॥ १० ॥ जीवन्मुक्तिनिराचिकीर्षयेदं सूत्रमुक्तम् उपासनविधानात्तस्याप्रयाणादनुवृत्तिश्रुतेरुत्क्रान्तिश्रुतिरर्चिरादिमार्गश्रुतेर्देशविशेषप्राप्त्या सर्वबन्धविमोक्षश्रुतेरीदृशानेकश्रुतीनां बाधप्रसङ्गात्प्रत्यक्षविरोधाच्च जीवन्मुक्तिरनुपपन्नेति भावः। तदुक्तं भगवताऽऽपस्तम्बेन "वेदानिमं लोकममुञ्च परित्यज्यात्मानमन्विच्छेत् बुद्धे क्षेमप्रापणं तच्छास्त्रैर्विप्रतिषिद्धं बुद्धे चेत् क्षेमप्रापणमिहैव न दुःखमुपलभेत इति शास्त्रै"रिति बहुवचनेनानेकशास्त्रविरोधो विव-

च्चितः विप्रतिषिद्धं विशेषप्रतिषिद्धं प्रकरणसमवच्च समबलेन प्रतिरोधः कालात्ययापदिष्टवदधिकबलेन विरोधः अनेकशास्त्रविरोधादिति भावः। सू० अस्यैव चोपपत्तेरूष्मा ॥ ११ ॥ स्थूलशरीरस्योष्मा सार्वत्रिकः सन्तापयति स्वं देहमापादतलमस्तकमिति श्रुतेः, अत उत्क्रान्तौ क्वाचित्क ऊष्मा सूक्ष्मशरीरस्य क्वाचित्कत्वेन तत्रैव सर्वदेहव्याप्ताग्निशिखायाः क्रमेणोपह्रियमाणत्वादित्यर्थः ॥

सू० प्रतिषेधादिति चेन्न शारीरात्स्पष्टो ह्येकेषाम् ॥ १२ ॥

भू० यदुक्तं विदुषोऽप्युत्क्रान्तिः समानेति तन्नोपपद्यते, विदुष उत्क्रान्तिप्रतिषेधात्, तथा हि "स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्वपक्रामतीत्युपक्रम्य तेन प्रद्योतेनैष आत्मा निष्क्रामति तमुत्क्रामन्तं प्राणोऽनूत्क्रामतीत्यविदुष उत्क्रान्तिप्रकारमभिधाय अन्यन्नवतरं कल्याणतरं रूपं कुरुत" इति देहान्तरपरिग्रहंचाभिधाय प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययं तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मण" इति तु कामयमान इत्यविद्वद्विषयं परिसमाप्य अथाकामयमानेयोऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येतीति विदुष उत्क्रातिः प्रतिषिध्यते, तथा पूर्वचार्तभागप्रश्नेऽपि विदुष उत्क्रान्तिप्रतिषेधो दृश्यते अपपुनर्मृत्युं जयतीति विद्वांसं प्रस्तुत्य याज्ञवल्क्य इति होवाच यत्रायं पुरुषो म्रियत उदस्मात्प्राणा उत्क्रामन्त्याहो नेति पृष्टे नेति होवाच याज्ञवल्क्योऽत्रैव

समवलीयन्ते स उच्छ्वयत्याध्मातो मृतः शेत” इति अतो विद्वानिहैवामृतत्वं प्राप्नोतीति चेत् तन्न शारीरात् प्रत्यगात्मनः प्राणानामुत्क्रान्तिरत्र च प्रतिषिध्यते, न शरीरात्, न तस्य प्राणा उत्क्रामन्तीत्यत्र तच्छब्देन अथाऽकामयमान इति प्रकृतः शारीर एव परामृश्यते नाश्रुतं शरीरम् ।

टी० पुनरपीति पूर्वमिहामृतत्वश्रुतिनिबन्धन उत्क्रान्त्यसम्भवः परिहृतः । सू० प्रतिषेधादिति चेन्न शारीरात् स्पष्टो ह्येकेषाम् ॥ १२ ॥ अथोत्क्रान्तिनिषेधश्रुतिनिबन्धनस्तदसम्भवः परिह्रियत इत्यर्थः । यदुक्तमित्यादि तेजोमात्राः भूतसूक्ष्माणि हृदयमेवान्वपक्रामति हृदयान्निष्क्रामतीत्यर्थः, तेन प्रद्योतेनेत्यादिवाक्यस्य कथमविद्वदुत्क्रान्तिपरत्वमिति चेत् उच्यते चतुर्मुखलोकगन्तुरुपासकस्यार्चिरादिकाङ्गतिं पूर्वपक्षी मन्यते न तु मुक्तस्य, तस्मादविदुष इत्युक्तं पूर्वपक्षे, सिद्धान्ते तु विद्वद्विषयमेवेदं वाक्यम् अकामयमानो योऽकामो निष्काम इत्यत्र पुत्रवित्तविषयैषणात्रयराहित्यं विवक्षितम् । उदस्मात् प्राणाः क्रामन्ति उत्क्रामन्तीत्यन्वयः समवलीयन्ते अत्रैव शरीरे लीयन्त इत्यर्थः । स उच्छ्वयत्याध्मातः वायुना पूरित उच्छूनो भवतीत्यर्थः । तत्रेत्यादि प्रकृतपरामर्शिनस्तत्शब्दस्य शारीरपरत्वात् तस्मात्प्राणानुत्क्रान्तिरुच्यत इत्यर्थः । चोदयति—

भू० तस्येति षष्ठ्या प्राणानां संबन्धित्वेन शारीरो निर्दिष्टः न तूत्क्रान्त्यपादानत्वेन, उत्क्रान्त्यपादानन्तु शरीरमेवेति चेन्न अपादानापेक्षायामश्रुताच्छरीरात् संबन्धितया श्रुतस्यात्मन एव सन्निहितत्वेनापादानतयाऽपि ग्राह्यत्वात् । किंच प्राणानां जीवसंबन्धितयैव प्रज्ञातानां तत्संबन्धकथने प्रयोजनाभावात् संबन्धमात्रवाचिन्या षष्ठ्या अपादानमेव विशेष्य इति निश्चीयते, अथः तस्य

काशीविद्यासुधानि[illegible]

THE PANDIT

A MONTHLY PUBLICATION
OF THE
BENARES COLLEGE,
DEVOTED TO
SANSKRIT LITERATURE

NEW SERIES.